This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 49. Benares, June 1st, 1870. Vol. V.

BIBLIOTHECA REGIA MONACENSIS

॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

ननु बुद्ध्यादिभिरात्मनि ज्ञानमुत्पाद्यते ततः कथमिदमुच्यते आत्मचैतन्यं बुद्धावध्यस्यते इति तत्राह ।

(६७) स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिः श्रुतेर्यतः ।
न बुद्ध्या क्रियते तस्मान्नात्मनान्येन वा सदा ॥ ४८० ॥

स्वरूपं चेति । ज्ञानमात्मनः स्वरूपं "तदेव ज्योतिषां ज्योतिरात्मैवास्य ज्योतिरत्रायं पुरुषः स्वयंज्योतिः साक्षी चे"त्यादिश्रुतेः । अतश्च नित्यमेव यतस्तस्माच्च बुद्ध्या ज्ञानं क्रियते आत्मना वान्येन वा चक्षुरादिना ज्ञानं सदा कदाऽपि न क्रियतइत्यर्थः ॥ ६७ ॥

बुद्ध्यात्मनोरन्योन्यधर्माध्यासेनैव व्यवहारइत्युक्तेर्थे दृष्टान्तमाह ।

(६८) देहेहंप्रत्ययो यद्वज्जानातीति च लौकिकाः ।
वदन्ति ज्ञानकर्तृत्वं तद्वद्बुद्धेस्तथात्मनः ॥ ४८१ ॥

देहइति । रूपादिमत्त्वेन घटादिवदहंप्रत्ययायोग्येपि देहे चेतनामध्यस्य यथाहं मनुष्यः कृशः स्थूल इत्यादिप्रत्ययो दृश्यते तथा बुद्धेर्जडत्वेन ज्ञातृत्वायोग्यत्वेपि चिदाभासव्याप्त्या ज्ञातृत्वमारोप्य जानामीति लौकिका वदन्ति व्यवहरन्ति । दार्ष्टान्तिकमाह । तथात्मन इति । विकाररहितस्याप्यात्मनो विकारिचित्ताविवेकाद्विकारित्वादिव्यपदेशसिद्धिरित्यर्थः । यद्वा स्थूले देहे यद्वदहंप्रत्ययो मनुष्योहमित्येवमादिरहंप्रत्ययायोग्येपि व्यवह्रियते सर्वैः, लौकिकाश्च शास्त्रसंस्काररहिता देवदत्तो जानाति मनुतइति च देहस्यैव ज्ञातृत्वं वदन्ति च तद्वद्बुद्धेर्ज्ञानकर्तृत्वं तथा ऽऽत्मनो ज्ञानाश्रयत्वं विकारवत्त्वं च व्यवहारास्पदं भवतीत्यर्थः ॥ ६८ ॥

ननु "तार्किका ज्ञानस्योत्पत्तिविनाशौ पश्यन्तो ज्ञानमात्मना क्रियतइत्याहुः" तत्कथं नित्यं ज्ञानमात्मरूपमित्युक्तमित्यत आह ।

(६९) बौद्धैस्तु प्रत्ययैरेवं क्रियमाणैश्च चिन्निभैः ।
मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः ॥ ४८२ ॥

बौद्धैस्त्विति । एवं पूर्वोक्तप्रकारेणात्मबुद्ध्योरन्योन्याध्यासाच्चिन्निभैश्चिच्छायापत्त्या चिदिव भासमाना ये तैर्बौद्धैर्बुद्धिप्रभवैः क्रियमाणैः प्रत्ययैर्वृत्तिविशेषैर्मोहितास्तार्किका जना ज्ञानं क्रियते जायतइत्याहुर्वदन्ति, तेषां बुद्ध्यात्माविवेक एवापराधो न तु ज्ञानं क्रियते तथा सति प्रत्ययोत्पत्तिविनाशयोरसाक्षिकतयाऽसिद्धिप्रसङ्गादिति भावः ॥ ६९ ॥

यस्मादेवं विचार्यमाणे प्रमाणसिद्धकौटस्थ्यस्यात्मनो न विकारित्वं प्रामाणिकं, यस्माच्च ज्ञानमात्मरूपत्वश्रवणान्नित्यमेवेति न केनापि क्रियते, यस्माच्च बुद्धिसंसर्गं विनात्मनो न ज्ञातृत्वमुपलभ्यते, सुषुप्तावदर्शनाद्, बुद्धिश्च नात्मनः पृथग् ज्ञातृत्वाद्याकारोपलभ्यते, तस्मादात्मबुद्धितत्स्थाभासानामविवेकाद्यथाप्रसिद्धमेव व्यावहारिकं बुद्ध्यात्मनोरैकत्वं गृहीत्वा जानात्यादिव्यपदेश उपपद्यते, न परमार्थतो मुख्यमन्यदालम्बनमस्तीति प्रकृतमुपसंहरति ।

(७०) तस्माज्ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिताः ।
जानातीत्यादिशब्दश्च प्रत्ययो या च तत्स्मृतिः ॥ ४८३ ॥

Digitized by Google

तस्मादिति । ज्ञानातीत्यादिशब्दश्च तदनन्तरभावी तद्विषयः प्रत्ययश्च या तत्संस्कारजा स्मृतिः सा चेति त्रयोर्थाः ज्ञाभासबुद्धीनामविवेकात्प्रवर्त्तिता इति योजना ॥ ७० ॥

ज्ञाभासबुद्धीनामविवेकमूलः सर्वो व्यवहारो न पारमार्थिक इत्युक्तमर्थं दृष्टान्तेन स्पष्टयति ।

(७१) आदर्शानुविधायित्वं छायाया अस्यते मुखे ।
बुद्धिधर्म्मानुकारित्वं ज्ञाभासस्य तथेष्यते ॥ ४८४ ॥

आदर्शेति । छायायाः मुखाभासस्य यदादर्शानुविधायित्वं तन्मुखे ऽस्यते ऽध्यस्यते यथेति शेषः, तथा ऽध्यस्तस्य चिदाभासस्य बुद्धिधर्मानुकारित्वं ज्ञे आत्मनीष्यते ऽध्यस्य व्यवह्रियतइत्यर्थः ॥ ७१ ॥

यस्मादेवं चिदाभासाविविक्ता बुद्धिस्तस्मात्तत्परिणामेषु ग्राहकत्वप्रतिभाससिद्धिरित्याह ।

(७२) बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः ।
ग्राहकाइव भासन्ते दहन्तीवोल्मुकादयः ॥ ४८५ ॥

बुद्धेस्त्विति । निगदव्याख्यातं पद्यम् ॥ ७२ ॥

एवमाभासविविक्तपदार्थस्वरूपाज्ञानाद्यथा तार्किकाणां व्यामोहो ज्ञानं क्रियतइति, तथा बौद्धानामपि बुद्धिव्यतिरिक्तो ग्राहको नास्तीति व्यामोह एवेत्याह ।

(७३) स्वयमेवावभास्यन्ते ग्राहकाः स्वयमेव च ।
इत्येवं ग्राहकास्तित्वं प्रतिषेधन्ति सौगताः ॥ ४८६ ॥

स्वयमेवेति । स्वयमेव च प्रत्यया इति शेषः ॥ ७३ ॥

यद्येवं प्रत्ययानां ग्राहकमन्यं स्थिरमनादृत्य प्रत्ययमेव ग्राह्यग्राहकाकारं बौद्धा मन्यन्ते तर्हि तन्मतस्यानुभवानुसारित्वादाभासानभ्युपगमे कथं ते निराकर्त्तव्या इत्याशयेन स्वयूथ्यं पृच्छति ।

(७४) यद्येवं नान्यदृश्यास्ते तद्वारणं किमुच्यताम् ।
भावाभावौ हि तेषां यो नान्यग्राह्यौ सदा यदि ॥ ४८७ ॥
अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम् ।
अचितित्वस्य तुल्यत्वादन्यस्मिन् ग्राहके ऽसति ॥ ४८८ ॥

यद्येवमिति । ते प्रत्यया नान्यदृश्या अन्येन साक्षिणा नित्यसिद्धेन न ग्राह्या इति यद्येवं बौद्धा वदन्ति तन्मतवारणं किमस्ति तदुच्यतामित्युक्तः स्वयूथ्यः प्रत्याह । भावाभावाविति । तेषां प्रत्ययानां यो भावाभावावुत्पत्तिविनाशो सदा स्वतःसिद्धेन साक्षिणान्येन न ग्राह्यौ यद्यपि तथापि यस्मिन्प्रत्ययानां भावाभावौ सोहमिति प्रत्यभिज्ञाबलात्तेषां ग्राहकोन्वयी स्याय्यात्मा सिद्ध्यति किमाभासकल्पनयेति योजना ।

एवं स्वयूथ्येनोक्ते नैतावता बौद्धो वारयितुं शक्यतइति दूषयति । एतदपीति । एतदपि प्रत्यभिज्ञानसिद्धमपि ग्राहकरूपं तत्समं प्रत्ययसमं जडमेवेत्यत्र हेतुमाहाचितित्वस्येति । अयमर्थः । प्रत्ययग्राहकः प्रत्यभिज्ञासिद्धोपि ग्राह्यः स्वप्रकाशो वा,आद्यं प्रत्याह । अचितित्वस्येति । अन्यस्मिन् ग्राहके असति ग्राह्यकोटिपतितत्वेन जाड्यापरिहारात्स्वयमप्यसिद्धः कथं प्रत्ययानां ग्राहक इत्यर्थः । अथ वा ऽन्यस्मिन् ग्राहके असति स्वतः सिद्धे साक्षिण्यविद्यमाने प्रत्यभिज्ञाग्राह्यस्याप्यचितित्वस्य तुल्यत्वाद्ग्राहकस्यासिद्धिरित्यर्थः । द्वितीये स्वप्रकाशस्य साक्षिणो निर्विकारत्वादाभाससिद्धिरिति द्रष्टव्यम् ॥ ७४ ॥

स्वप्रकाशसाक्षिण्यसति प्रत्ययानां भावाभावासिद्धिश्चेत्तर्हि साक्षिसान्निध्यमात्रेणैव तत्सिद्धेः कृतमाभासाभ्युपगमेनेति शङ्कते ।

(७५) अध्यक्षस्य समीपे तु सिद्धिः स्यादिति चेन्मतम् ।
नाध्यक्षेनुपकारित्वादन्यत्रापि प्रसङ्गतः ॥ ४८९ ॥

अध्यक्षस्येति । तत्र वक्तव्यं, किं साक्षिसन्निधानमात्रं प्रत्ययसिद्धिहेतुः, किं वा तत्कृतविशेषयोगोपीति, तत्र द्वितीयं तावद्दूषयति । नेति । निर्विकारे ऽध्यक्षे उपकारित्वानिरूपणादित्यर्थः । पाठान्तरे अध्यक्ष्ये साक्ष्ये ऽहंकारादावनुपकारित्वादुपकारपदवाच्यातिशयाजनकत्वादित्यर्थः । प्रथमं दूषयत्यन्यत्रापीति । साक्षिणः पूर्णतया सर्वत्र सदा सान्निध्याविशेषात्काष्ठलोष्टादीनामपि सिद्धिप्रसङ्गादित्यर्थः ॥ ७५ ॥

एवमाभासानभ्युपगमे बौद्धादिमतसाम्यदोषपरिहारानुपपत्तिं स्वयूथ्यान्प्रत्युक्त्वा शास्त्रीयो बन्धमोक्षव्यवहारोपि तेषां न सिद्ध्यतीति वक्तुं विकल्पयति ।

(७६) अर्थी दुःखी च यः श्रोता स त्वध्यक्षो ऽथ वेतरः ।
अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम् ॥ ४९० ॥

अर्थीति । यो दुःखित्वेन मोक्षार्थित्वेन च प्रसिद्धो गुरूपदेशश्रोता स एवाध्यक्षो मतस्ततो ऽन्यो वेति विकल्पार्थः । आद्ये निरनुग्रहाध्यक्षवादिनस्तवापसिद्धान्तप्रसङ्ग इति दूषयत्यध्यक्षस्य चेति । आत्माभासानङ्गीकारवादिनस्ते द्वाराभावादविद्यातत्कार्यसंबन्धासिद्धेस्तेन च विनार्थित्वाद्यसिद्धेराभासाभ्युपगमप्रसङ्ग इत्यर्थः ॥ ७६ ॥

द्वितीयं दूषयति ।

(७७) कर्त्ता ऽध्यक्षः सदस्मीति नैव सद्ग्रहमर्हति ।
सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ॥ ४९१ ॥

कर्त्तेति । श्रोतुरर्थिनो ऽध्यक्षस्य च भेदपक्षे कर्त्ता कर्तृत्वादिधर्मको ऽविकारी श्रोता जडवर्गपतितत्वात्सदहमध्य-

Digitized by Google

चोस्मीति सद्ग्रहं सदादिशब्दनिर्दिष्टब्रह्मात्मग्रहं नार्हति विरोधादित्यर्थः । यद्वा सदध्यक्षो निर्विकार आत्मा ऽहमस्मीति सद्ग्रहं यथार्थबोधं नार्हति न लभत इत्यर्थः, श्रुतिबाधप्रसङ्गाच्चायं पक्षो न युक्त इत्याह । सदेवेति ॥ ७७ ॥

चिदाभासानभ्युपगमपक्षे बन्धमोक्षानुपपत्तिमुपपाद्य स्वपक्षे तदुपपत्तिमाह ।

(७८) अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद्ग्रहस्तथा ।
अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि ॥ ४६२ ॥
प्रत्ययान्वयिनिष्ठत्वमुक्तो दोषः प्रसज्यते ।

अविविच्येति । उभयमात्मानमहंकारं च द्वयमाभासद्वारेणाविवेकापन्नमविविच्य विविक्तमकृत्वा यथाप्राप्तमर्थित्वाद्युपादाय श्रोतृत्वेन स्थितं प्रति तत्त्वमसीति श्रुतिर्वक्त्यात्मतत्त्वमिति चेत्पक्षस्तदा तथा यथा श्रुत्युक्तस्तस्य ग्रहो ग्रहणं स्यादिति योजना । अयमभिप्रायः । अन्तःकरणादौ चिदाभासोदये सति तद्गतविकाराध्यासादविविक्ताहंकार आत्मार्थित्वादिसंपन्नो मुमुक्षुतां प्रतिपद्यते तथैवाविवेकावस्थं त्वमित्यनूद्याभासद्वारा साभासान्तःकरणसाक्षितया लक्षयित्वा तेजोबन्नादिजगत्कारणत्वेनोपलक्षितं सच्छब्दवाच्यं ब्रह्म तदित्यनूद्य जीवेनात्मना नामरूपसंघातानुप्रविष्टत्वेनापरोक्षप्रत्यक्तया लक्षयित्वा त्वं तदसीति श्रुतिरुपदिशत्यात्मतत्त्वमिति तथा ग्रहणमुपपद्यत इति । अहंकार एव श्रोता स्यात्किमात्माभासाभ्युपगमेनेति सांख्यमतमनूद्य दूषयत्यस्मदस्त्विति । प्रत्ययान्वय्यहंकारः यदि वाक्यमस्मदः प्रत्यक्चैतन्यादहंकारं विविच्यैव त्वमेवेति प्रत्ययान्वयिनिष्ठत्वं वदेत्तदोक्तो दोषः श्रुतेर्मिथ्योक्तित्वप्रसङ्गरूपः प्रसज्यत इत्यर्थः ॥ ७८ ॥

तर्ह्यहंकर्तृविषयोऽप्युपदेशो ऽध्यक्षे पर्यवस्यतीत्याशङ्क्याभासानभ्युपगमे तदपि दुर्घटमित्याह ।

(७९) त्वमित्यध्यक्षनिष्ठश्चेदहमध्यक्षयोः कथम् ॥ ४६३ ॥
संबन्धो वाच्य एवात्र येन त्वमिति लक्षयेत् ।

त्वमिति । त्वमितिपदमहंकारवाचि सदध्यक्षं बोधयति चेदहंकाराध्यक्षयोः संबन्धग्रहणमन्तरेण वाक्यार्थबोधानुपपत्तेरहमध्यक्षयोः संबन्धो ऽत्र वाच्य एव, स कथमुपपद्यते, येन संबन्धेन त्वमिति पदमध्यक्षं लक्षयेदित्यर्थः ॥ ७९ ॥

अस्तिसंबन्ध इहेत्याशङ्क्य परिहरति ।

(८०) द्रष्टृदृश्यत्वसंबन्धो यद्यध्यक्षे ऽक्रिये कथम् ॥ ४६४ ॥

द्रष्टृदृश्यत्वेति । यदि द्रष्टृदृश्यत्वसंबन्धो ऽभ्युपगम्यते तदापि संबन्धग्रहणमनुपपन्नम्, अहंकारस्य जडत्वात्संबन्धग्रहणायोगादध्यक्षस्य तद्ग्रहणमिति वक्तव्यमक्रिये निर्विकारे ऽध्यक्षे कथं संबन्धग्रहणकर्तृत्वमित्यर्थः ॥ ८० ॥

मास्तु संबन्धग्रहणं तथापि तादात्म्योपदेशो भविष्यतीति शङ्कामनूद्य दृष्टविरोधान्मैवमिति परिहरति ।

(८१) अक्रियत्वे ऽपि तादात्म्यमध्यक्षस्य भवेद्यदि ।
आत्माध्यक्षो ममास्तीति संबन्धाग्रहणे न धीः ॥ ४६५ ॥

अक्रियत्वेपीति । यथा लोके घटस्य शौक्ल्यमिति घटशौक्ल्ययोः संबन्धाग्रहणे शुक्लो घट इति वाक्यात्तादात्म्यधीर्नोदेति, तथा ममात्माध्यक्षो ऽस्तीति संबन्धाग्रहणे सति न तादात्म्यधीः श्रुतितो जायेतेत्यर्थः ॥ ८१ ॥

"एष य आत्मान्तर्हृदयेऽणीयानेष य आत्मान्तर्हृदय एतद्ब्रह्मे"ति शास्त्रादस्त्यहंकाराध्यक्षयोः संबन्धग्रह इति शङ्कामुत्थाप्य निराकरोति ।

(८२) संबन्धग्रहणं शास्त्रादिति चेन्मन्यसे नहि ।
पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहो वा स्यान्ममेति च ॥ ४६६ ॥

संबन्धग्रहणमिति । नहीत्युक्तं व्यनक्ति । पूर्वोक्ता इति । अहंकारस्य जडत्वात्संबन्धग्रहीतृत्वं न घटते, नाप्यध्यक्षस्य, निर्विकारित्वादिति द्वौ दोषौ, जडं प्रति श्रुतेर्बोधकत्वासंभवस्तृतीयो दोष इति त्रिधा दोषाः स्युः, यदि कथं चित्संबन्धग्रहणं कल्प्येत तदापि ममाध्यक्षो ऽस्तीति संबन्धग्रहणं स्यान्न त्वहमेवाध्यक्षोऽस्मीति तादात्म्याध्यासानङ्गीकारात्, चकारान्ममाध्यक्षो ऽस्तीत्यपि न घटते ऽहंकारस्य जडत्वादित्यभ्युच्चयः ॥ ८२ ॥

एवमात्मानात्मनोः परपक्षे संबन्धासिद्धिमुक्त्वा स्वपक्षे मिथ्या तादात्म्यसंबन्ध इति दर्शयति ।

(८३) अदृशिर्दृशिरूपेण भाति बुद्धिर्यदा सदा ।
प्रत्यया अपि तस्याः स्युस्तप्तायोविस्फुलिङ्गवत् ॥ ४६७ ॥

अदृशिरिति । यदा अदृशिरचेतना बुद्धिर्दृशिरूपेण सदा भातीत्यभ्युपगम्यते तदा तस्या बुद्धेः प्रत्यया वृत्तयोऽपि तप्तायोविस्फुलिङ्गानामग्न्यात्मत्ववद् दृशिरूपाः स्युरित्यर्थः ॥ ८३ ॥

अस्मिन्पक्षे लौकिकवैदिकव्यवहारसिद्धिरपि सुसंपादेत्याह ।

(८४) आभासस्तदभावश्च दृशेः सीम्नो न चान्यथा ।
लोकस्य युक्तितः स्यातां तद्ग्रहश्च तथा सति ॥ ४६८ ॥

आभास इति । सीम्नो ऽवधिभूतायाः दृशेश्चिदात्मनः सकाशादेव लोकस्याभासस्तदभावश्च स्यातां युक्तितो युक्तेरुपपत्तेर्न चान्यथा, तथा सति आभासानभ्युपगमे सति प्रत्ययभावाभावयोः प्रत्ययग्राह्यत्वायोगात्ततोऽत्यन्तमेव विविक्तस्य चात्मनस्तद्ग्राहकत्वानुपपत्तेराभासद्वारा तु संबन्धादात्मने

Digitized by Google

बुद्धिवृत्तिभावाभावसाक्षित्वमुपपद्यते, बुद्धेश्च तद्धह आत्मयद्दो ऽहमस्मीत्युपपन्नः स्यादित्यर्थः ॥ ८४ ॥

तप्तायोविस्फुलिङ्गवदिति दृष्टान्ताभिधानादात्मनो विकारप्राप्तिं शङ्कते ।

(८५) नन्वेवं दृशिसंक्रान्तिरयःपिण्डेऽग्निवद्भवेत् ।
मुखाभासवदित्येतदादर्शे तन्निराकृतम् ॥ ४६६ ॥

…वेवमिति । अयःपिण्डे ऽग्निसंक्रान्तिवद् बुद्धौ दृशिसंक्रान्तिर्विकारो भवेदित्यर्थः । परिहरति, मुखाभासवदिति । तदेतच्चोद्यमादर्शे मुखाभासवदिति दृष्टान्तप्रबन्धेन निराकृतमित्यर्थः । यथा मुखस्यादर्शे प्रतिबिम्बितस्य तत्स्थत्वेन रूपेण मिथ्यात्वं तथा बुद्धौ प्रतिबिम्बितस्य चिदात्मनो बुद्धिधर्मत्वेनावभासो मृषेति पूर्वमुक्तं सर्वमिहानुसंधेयमिति भावः ॥ ८५ ॥

तर्हि कथं तप्तायोविस्फुलिङ्गदृष्टान्त उक्तस्तत्र विकारप्रसिद्धेर्दार्ष्टान्तिकाननुरूपत्वादित्याशङ्क्य विवक्षितांशस्येहापि संभवान्मैवमित्याह ।

(८६) कृष्णायो रोहिताभासमित्येतद् दृष्टमुच्यते ।
दृष्टदार्ष्टान्ततुल्यत्वं न तु सर्वात्मना क्व चित् ॥ ५०० ॥

कृष्णाय इति । कृष्णवर्णमयो लोहिताभासं लोहितवर्णमवभासतइत्येतदेतावद् दृष्टं दृष्टान्तमुच्यते, जडाया बुद्धेश्चैतन्याभास इत्यर्थः । सर्वांशसाम्यमनुपपन्नमित्याह । दृष्टदार्ष्टान्तेति । अप्रकाशाद्यात्मनो मुखादेश्चन्द्रादिदृष्टान्ताभावप्रसङ्गादिति भावः ॥ ८६ ॥

दृष्टान्ते विवक्षितमंशमुक्त्वा दार्ष्टान्तिकेपि तथाविधमंशं दर्शयति ।

(८७) तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत् ।
मुखाभासो यथा ऽऽदर्शे आभासश्चोदितो मृषा ॥ ५०१ ॥

तथैवेति । चेतनाया आभासो यस्मिंस्तच्चेतनाभासं चित्तं चैतन्यवच्चेतनमिव भवेत्स चाभासो यथा आदर्शे मुखाभासो ऽविकृत एवमेवेहापि द्रष्टव्यः, आभासश्चोपाधिस्थतया दृश्यमानो मृषा मिथ्येत्युदित उक्त एवेत्यर्थः ॥ ८७ ॥

कस्माच्चिदाभासव्याप्त्या चित्तस्य चेतनतावभासोऽभ्युपगम्यते न स्वत इति शङ्का न कार्या, तत्र प्रमाणन्याययोरभावादित्याह ।

(८८) चित्तं चेतनमित्येतच्छास्त्रयुक्तिविवर्जितम् ।
देहस्यापि प्रसङ्गः स्याच्चक्षुरादेस्तथैव च ॥ ५०२ ॥

चित्तमिति । उत्पत्तिविनाशवत्तया ऽन्यदृश्यस्यापि चित्तस्य चेच्चेतनता स्वभावः स्यात्तदातिप्रसङ्गश्च दुष्परिहर इत्याह । देहस्येति ॥ ८८ ॥

इष्टापत्तिमाशङ्क्य परिहरति ।

(८९) तदप्यस्त्विति चेतन्न लोकायतिकसङ्गतेः ।
न च धीर्दृशिरस्मीति यद्याभासो न चेतसि ॥ ५०३ ॥

तदपीति । अवैदिकत्वप्रसङ्गादित्यर्थः, किं चाभासानभ्युपगमे द्वाराभावादहं ब्रह्मास्मीत्यागन्तुकं वाक्यजन्यमैक्यज्ञानं न सिद्ध्येदित्याह । न च धीरिति । चेतसि यद्याभासो न भवेत्तदा दृशिर्ब्रह्मास्मीति धीर्न भवेत्केवलस्य चित्तस्य जडत्वाच्चिन्मात्रस्य च कूटस्थत्वादित्यर्थः ॥ ८९ ॥

ब्रह्मास्मीतिधियो ऽभावे का क्षतिरित्यत आह ।

(९०) सदस्मीति धियो ऽभावे व्यर्थं स्यात्तत्त्वमस्यपि ।
युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ॥ ५०४ ॥

सदस्मीति । अपिरवधारणार्थः । तत्त्वमसिवाक्यमैक्यग्राहकमुक्तधियो ऽभावे व्यर्थमेवाप्रमाणमेव स्यादित्यर्थः । अस्तु वैयर्थ्यं तद्वाक्यश्रोतृणां सर्वेषां झटिति ब्रह्मास्मीति बुद्ध्युत्पत्त्यदर्शनादित्याशङ्क्याह । युष्मदस्मदिति । अधिकारिणः प्रमितिजनको वेद इति न्यायात्सम्यक्पदार्थविज्ञानवत एव वाक्यार्थबोधे ऽधिकारादात्मानात्मविभागज्ञानवत्येव पुंसीदं वाक्यमर्थवच्च सर्वान्प्रति झटितीत्यर्थः ॥ ९० ॥

तमेव युष्मदस्मद्विवेकं दर्शयितुमुपक्रमते ।

(९१) ममेदंप्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः ।
अहमित्यस्मदीष्टः स्यादयमस्मीति चोभयोः ॥ ५०५ ॥

ममेदमित्यादिना । इदं पुत्रादि ममेति च प्रत्ययौ युष्मद्यनात्मन्येव ज्ञेयौ पुत्रादिबाह्यार्थस्य देहाध्यासप्रणालिकयैवास्मदर्थे प्रवेशाद्बाह्यार्थसंबन्धोऽप्यनात्मधर्म एवेति युक्तमुक्तं ममेति प्रत्ययो युष्मद्येवेति । न संशय इति सर्वत्रानुषज्यते । अहमिति । प्रत्यय आभासद्वारात्मभूते व्यावहारिके ऽस्मद्यात्मन्यहंकर्त्तरीष्टः स्यादहमित्येवोल्लेखदर्शनाद्, अयं देहादिरस्मीति चोभयोरात्मानात्मनोः प्रत्यय इत्यर्थः ॥ ९१ ॥

आत्मानात्मविषयाणां प्रत्ययानामसंकीर्णतया संकीर्णतया च विषयानुत्क्वोक्तविवेकसिद्ध्यर्थं तेषां गुणप्रधानभावेन विशेषणविशेष्यभावो ग्राह्य इत्याह ।

(९२) अन्योन्यापेक्षया तेषां प्रधानगुणतेष्यते ।
विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्तितः ॥ ५०६ ॥

अन्योन्येति ॥ ९२ ॥

विशेषणविशेष्यत्वं युक्तितो ग्राह्यमित्युक्तमेव विविच्य दर्शयति ।

(९३) ममेदं द्वयमप्येतन्मध्यमस्य विशेषणम् ।
धनी गोमान्यथा तद्वद्देहो ऽहंकर्तुरेव च ॥ ५०७ ॥

ममेदं द्वयमिति । मध्यमस्य पूर्वश्लोके मध्ये निर्दिष्टस्यास्मदर्थस्यात्मनो विशेषणमिदं ममेति च द्वयं मनुष्यो ऽहमिति प्रत्ययापेक्षयेत्यर्थः । तत्रोदाहरणं धनी गोमान्यथेति यथा धनादीवंत्वास्पदं तद्देहापेक्षया ममत्वास्पदमहंकर्त्तुः सिद्धं तद्वत्स्थूलो देहो ऽहंकर्त्तुरात्मनो बाह्यधनाद्यपेक्ष्याहंत्वास्पदतया विशेषणमेवेत्यर्थः । चकारादात्मनोऽपि सोऽहं ज्ञातेत्याद्युल्लेखे स्थूलदेहमपेक्ष्य प्रधानभूतो ऽप्यहंकर्त्ता विशेषणमिति योज्यम् ॥ ९३ ॥

एतत्सर्वं यदधीनसत्ताप्रकाशं तत्रारोपितं सत्तस्य सदा विशेषणं भवदपि तेन साक्षिणा न संस्पृशतीत्येषु यो निरपेक्षसिद्धः स शुद्ध आत्मेति युष्मदस्मद्विभागज्ञस्य भवेदेव वाक्याद्वाक्यार्थज्ञानमिति प्रमाणमेव वेदान्तवाक्यमित्यभिप्रेत्योपसंहरति ।

(९४) बुद्ध्यारूढं सदा सर्वं साहंकर्त्ता च साक्षिणः ।
तस्मात्सर्वावभासो ज्ञः किं चिदप्यस्पृशन्सदा ॥ ५०८ ॥

बुद्ध्यारूढमिति । बुद्ध्यारूढं बुद्धिवृत्तिक्रोडीकृतं सर्वं देहतत्सम्बन्धिविषयजातं साक्षिणो विशेषणं गुणभूतमिति योजना । न केवलमेतावत्,किं च साहंकर्त्ता अहंकर्त्रा साभासमनसा सहितः सूक्ष्मो ऽपि संघातः साक्षिणो विशेषणं तस्मिन्नध्यस्ततया तदवभास्यत्वादित्यर्थः । यस्मादेवं परमार्थतः किं चिदप्यस्पृशन्सदा सर्वं स्वाभासद्वारा ऽवभासयतीति सर्वावभासस्तस्मात् ज्ञो ज्ञानस्वरूप एव सदात्मेति विवेको युक्त इत्यर्थः ॥ ९४ ॥

एष विवेकिनां मार्गो विपरीतस्त्वविवेकिनां तेत्रादावप्यात्मनो विशेषणत्वप्रतीतेरित्याह ।

(९५) प्रतिलोममिदं सर्वं यथोक्तं लोकबुद्धितः ।
अविवेकधियामस्ति नास्ति सर्वं विवेकिनाम् ॥ ५०९ ॥

प्रतिलोममिति । बाह्यार्थापहृतचेता लोकस्तस्य बुद्धिर्लोकबुद्धिस्तस्या इति बाह्यार्थसत्त्वप्रधानां लोकबुद्धिमपेक्ष्येति यावत्,तथा च बाह्यार्थं प्रधानीकृत्य यदिदं यथोक्तं विशेषणविशेष्यादि सर्वं प्रतिलोममनात्मभूतं तदविवेकधियो विवेकज्ञानशून्यानां दृष्ट्यास्ति वर्त्तते, विवेकिनां तु दृष्ट्या सर्वमेतद्विशेषणादिकं दृश्यरूपं नास्ति न वर्त्तते, अतो ऽविवेकिनां बुद्धिमात्मन्यवतारयितुं विशेषणविशेष्यादिप्रबन्धकल्पना यथाप्रतीति सत्तामादाय क्रियते ऽध्यारोपापवादन्यायेनेति भावः ॥ ९५ ॥

नन्वन्वयव्यतिरेकाभ्यामेव सर्वसंसारविनिर्मुक्तात्मावगमात्किं वाक्येनेत्याशङ्क्याह ।

(९६) अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च ।
स्यादेतदहमित्यत्र युक्तिरेवावधारणे ॥ ५१० ॥

अन्वयव्यतिरेकौ हीति । पदार्थस्यान्वयव्यतिरेकौ नाम, आत्मपदार्थो द्रष्टा साक्षी न कदापि दृश्यः साक्ष्यो वा भवति तस्यालुप्तप्रकाशसन्मात्रतया स्वतः सिद्धत्वादतो ऽनन्याश्रयत्वाच्च कदापि कस्यापि विशेषणमात्मा तथा यद्दृश्यं साक्ष्यं चाहंकारादिविषयान्तं तदन्याधीनप्रकाशसत्ताकतयान्याश्रयं सत्सदा विशेषणभावं न व्यभिचरति तस्मादनागमापायि दृगात्मरूपं सत्यं शुक्त्यादिवत्तद्विपरीतमसत्यं रजतादिवदित्यनृतजडपरिच्छिन्नपराधीनपरागर्थव्यावृत्तः सत्यज्ञानानन्तप्रत्यगानन्दरूप आत्मेति विवेचनम् । पदस्यान्वयव्यतिरेकौ नाम आत्मा चैतन्यं प्रज्ञानं ब्रह्म सदित्यादिपदानि कर्त्तृत्वाद्युपपदविधुराणि, केवलस्यैवात्मनः समर्पकाणि, न विशेषणतद्विशिष्टविषयाणि, असामर्थ्यात्,कर्त्ता भोक्ता ज्ञाता द्रष्टा श्रोता वक्ता गन्ता कृशः स्थूल इत्यादीनि तु न केवलपूर्णात्मविषयाणि, अन्याधीनक्रियाद्युपरागदशायामेव प्रयुज्यमानत्वादिति विवेचनम् । एवं पदस्य पदार्थस्य चान्वयव्यतिरेकाविति पदे तदहमित्यत्रास्मदर्थविषये ऽवधारणे युक्तिरेव स्याद्विवेकावधारणोपायमात्रं स्यान्न तु वाक्यार्थे पदार्थैक्ये व्यापारोऽस्येत्यर्थः । तस्मादेतावतापि विवेकेन देहादिवैलक्षण्ये ऽवधारिते ऽपि कोऽहं तर्हीति जिज्ञासाया अनुवृत्तेस्तत्त्वमसीति वाक्यं जिज्ञासितस्वरूपविशेषसमर्पकमवश्यमपेक्षितव्यमेवेति भावः ॥ ९६ ॥

किं चावस्थात्रयं परस्परव्यभिचारि चैतन्यात्मा तु न कदापि व्यभिचारीति प्रकारान्तरेणात्मानात्मविवेकं दर्शयति ।

(९७) नाद्राक्षमहमित्यस्मिन् सुषुप्ते ऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति ॥ ५११ ॥

नाद्राक्षमिति । अस्मिन् सुषुप्ते ऽत्रात्मनि अत्र स्थाने वा मनागपीषदप्यन्यदात्मस्वरूपातिरिक्तमहं नाद्राक्षं न दृष्टवानस्मीति परामृशन् जनो न स्वां स्वात्मनो दृष्टिं चैतन्यं वारयति, प्रत्ययं तु पुनर्निषेधति, प्रतीयत इति प्रत्यय इति व्युत्पत्त्या प्रमातृप्रमाणप्रमेयादिरूपः सर्व एव विशेषो गृह्यते, तस्मात्परस्परव्यभिचारितया दृष्टनष्टस्वभावाभ्यो ऽवस्थाभ्यो मिथ्याभूताभ्यो ऽव्यभिचारी चिद्रूपः साक्षी सत्य आत्मेति विवेकः सिद्ध्यतीत्यर्थः ॥ ९७ ॥

एवमुक्तान्वयव्यतिरेकौ शास्त्रसंमतौ न स्वबुद्ध्युत्प्रेक्षामात्रकृताविति विश्वासाय शास्त्रमुदाहरति ।

(९८) स्वयंज्योतिर्नहि द्रष्टुरित्येवं संविदोऽस्तिताम् ।
कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम् ॥ ५१२ ॥

स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक् ।

स्वयंज्योतिरिति सार्द्धेन । "अत्रायं पुरुषः स्वयंज्योतिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत" इत्येवमादि शास्त्रं संविदश्चेतनाया अस्तितां सद्भावं तस्याः संविदः कौटस्थ्यं निर्विकारतां च स्वयमेवाब्रवीदिति संबन्धः, तथा प्रत्ययस्य प्रमात्रादिभेदस्य लुप्ततामसत्तां च, "न तु तद्वितीयमस्ति न ततोऽन्यद्विभक्त"मित्यादि शास्त्रं स्वयमेवाब्रवीदिति पुनरेवान्वयः, एवं प्रत्ययावगती पृथगसंकीर्णे शास्त्रेणैव विवेचिते इति शेषः, प्रत्ययो व्याख्यातः, अवगतिश्चैतन्यम् ॥ ९८ ॥

एवमवान्तरवाक्यकृतं युष्मदस्मद्विवेकमुपपत्तित उक्त्वा विज्ञातपदार्थतत्त्वे पुरुषे महावाक्यं फलवद्विज्ञानं जनयतीत्याह ।

(९९) एवं विज्ञातवाक्यार्थे श्रुतिलोकप्रसिद्धितः ॥ ५१३ ॥
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ।

एवमिति । एवमुक्तप्रकारेण श्रुतिप्रसिद्धितो लोकप्रसिद्धितोऽन्वयव्यतिरेकतश्च विज्ञातावान्तरवाक्यार्थे पुंसि सति महावाक्यात्मिका श्रुतिः श्रोतुर्जिज्ञासोर्मोहापनुत्तये सकार्याविद्यानिवृत्तिप्रयोजनाय तत्सदाख्यं ब्रह्म तत्त्वमसीत्याहोपदिशतीत्यर्थः ॥ ९९ ॥

वाक्यश्रवणमात्रान्मोहापोहे दृष्टान्तं पुराणसिद्धमाह ।

(१००) ब्रह्मा दाशरथेर्यद्वदुक्त्यैवापानुदत्तमः ॥ ५१४ ॥
तस्य विष्णुत्वसंबोधे न यत्नान्तरमूचिवान् ।

ब्रह्मेति । दाशरथिना रामेण देवकार्यसिद्धये मनुष्यावतारनाट्येन स्वमाहात्म्याच्छादनं संकल्पपूर्वकं यत्कृतं तदिह तमःशब्देनोच्यते, न त्वीश्वरस्य मोहः संभवति, तदुक्तं संक्षेपशारीरके ।

"संकल्पपूर्वकमभूद्रघुनन्दनस्य
नाहं विजानइति कं चन कालमेतत् ।
ब्रह्मोपदेशमुपलभ्य निमित्तमात्रं
तच्चोत्ससर्ज स कृते सति देवकार्ये" ॥

इति । हे राम त्वं विष्णुरसि न दशरथपुत्रमात्र इत्युक्त्यैव ब्रह्मा दाशरथेः संकल्पमात्रकृतं तमो विष्णुत्वाच्छादनरूपमपानुदत् । एवकारार्थमाह । तस्येति । यत्नान्तरं वाक्योपदेशग्रहणातिरिक्तमित्यर्थः ॥ १०० ॥

दार्ष्टान्तिकमाह ।

(१०१) अहंशब्दस्य या निष्ठा ज्योतिषि प्रत्यगात्मनि ॥ ५१५ ॥
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ।

अहंशब्दस्येति । एवंशब्दः प्रथमं योज्यः, यथायं दृष्टान्त एवं सदसीति वाक्येन सा निष्ठोक्तैव केवलं नानुष्ठापितेति योजना । सा का निष्ठेति तामाह । अहंशब्दस्येति । प्रत्यगात्मनि परागर्थेभ्यो व्यावृत्ते शोधिते आत्मनि निरुपाधिके ज्योतिषि साक्षिस्वप्रकाशस्वभावे अहंशब्दस्य या निष्ठा लक्षणया पर्यवसिता वृत्तिः सैवेत्यर्थः, तत्र त्वं तदसीत्युपदेशमात्रादहं सद्ब्रह्मास्मीति वाक्यार्थज्ञानोदयमात्रे सति विमुक्तता मोहापोहरूपा फलं भवतीत्यर्थः । यद्वा दृष्टान्तस्य दार्ष्टान्तिकमेव विज्ञातवाक्यार्थ इति पूर्वश्लोकएव स्थितं द्रष्टव्यम्, । अयं त्वन्यथोत्थाप्यते । ननु दाशरथेर्भवेदेव विष्णुत्वोपदेशमात्राद्विष्णुरहमस्मीति झटिति बोधोदयस्तस्य महामहिमसंपन्नत्वात्कथमिदानींतनस्य कर्ता भोक्तेत्यादिप्रत्ययाभिमतमिथ्याप्रत्ययगृहीतस्योपदेशमात्रादहं ब्रह्मास्मीति निर्विचिकित्सं ज्ञानं संभाव्यत इत्याशङ्क्य शोधितत्वंपदार्थस्य पुंसः कर्त्रादिसाक्षिण एवाहमादिशब्दलक्षितस्य ब्रह्मत्वोपदेशाचानुपपत्तिरत्रापीति परिहरति । अहंशब्दस्येति । सदसीत्येवं वाक्येन सैव निष्ठोक्तेति संबन्धः, अन्यत्समानम् ॥ १०१ ॥

एवमवगतपदार्थतत्त्वस्य वाक्यादेव समूलसंसारनिवृत्तिफलं ज्ञानं जायतएवेति स्थिते श्रुतेः प्रामाण्यसिद्ध्यर्थं कार्यपरत्वंकल्प्यमित्याग्रहो निरर्थको विद्वदनुभवविरोधादित्यभिप्रेत्याह ।

(१०२) श्रुतमात्रेण चेन्न स्यात्कार्यं तत्र भवेद्ध्रुवम् ॥ ५१६ ॥

श्रुतमात्रेणेति । यथोक्तन्यायेन वाक्यस्य श्रुतमात्रेण चेदुक्तफलं विज्ञानं न स्यात्तत्र तदा कार्यं कल्प्यं ध्रुवमवश्यं भवेदन्यथाऽर्थवादादिवाक्यवत्स्वार्थे प्रामाण्यानुपपत्तेः, इह तु न तथा कल्प्यमस्ति, फलस्य सद्य एवानुभवसिद्धत्वादित्यर्थः । स्वयंज्योतिर्नहि द्रष्टुरिति श्लोके पूर्वमर्द्धश्लोकोऽधिकः स्थितः, इह चायमर्द्ध एव श्लोक इति सह गणनीयः ॥ १०२ ॥

किं च सिद्धे ब्रह्मात्मनि शास्त्रस्याप्रामाण्यं नाम विपर्यासलक्षणं वा निष्फलत्वं वा संशयलक्षणं वाऽनुत्पत्तिलक्षणं वेति विकल्पान् क्रमेण दूषयति ।

(१०३) व्यवहारात्पुरापीष्टः सद्भावः स्वयमात्मनः ।
अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा ॥ ५१७ ॥

व्यवहारादित्यादिना । नाद्यः, यस्माद्व्यवहारादहं ब्रह्मास्मीतिशास्त्रोपदेशव्यवहारात्पुरा पूर्वमप्यात्मनः स्वयमेव सद्भाव इष्टो बाधकाभावात्तस्माद्यथावस्थितात्मस्वरूपस्यैव श्रुत्या निवेदनाच्च शुक्तिरौप्यज्ञानवदप्रामाण्यमित्यर्थः । न द्वितीयोऽनुभवविरोधादित्याह । अशनायादीति । तत्कालाप्रवाक्यश्रवणकाल एव कालो यस्याः सा तत्काला प्रमा, अशनायाद्युपलक्षितसंसारस्य निर्मुक्त्यै निवृत्त्यर्थं जायते, विदुषां प्रत्यक्षमेवैतदित्यतो न निष्फलत्वशङ्कावकाश इत्यर्थः ॥ १०३ ॥

Digitized by Google

तृतीयमप्यनुभवविरोधेन निराकरोति ।

(१०४) तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशयः ।

तत्त्वमसीति । असंशयः संशयो नास्तीत्यर्थः ॥ १०४ ॥

चतुर्थे प्रत्याह ।

(१०५) प्रतिबन्धविहीनत्वात्स्वयं चानुभवात्मनः ॥ ५१८ ॥
जायेतैव प्रमा तत्र स्वात्मन्येव न संशयः ।

प्रतिबन्धेति । पदार्थाज्ञानं हि वाक्यार्थज्ञानोत्पत्तिप्रतिबन्धस्तद्विहीनत्वादवगतपदार्थस्य पुंसस्तत्र तस्मिन्नेव वाक्यश्रवणकाले आत्मन्येव प्रमा जायेतैव न संशय इति योजना । आकाशपुष्पमस्तीत्यादिवाक्यार्थवदनुभवायोग्यार्थत्वशङ्कां वारयति । स्वयं चेति । अनुभवस्वरूपत्वात्स्वयमात्मनः प्रत्याख्यातुमशक्यत्वादित्यर्थः । अतो हुंफडादिशब्दवदनुत्पत्तिलक्षणमप्यप्रामाण्यं नास्तीति सिद्धं सिद्धे ब्रह्मात्मनि वाक्यस्य प्रामाण्यमिति भावः ॥ १०५ ॥

एवं प्रमाणस्वरूपनिरूपणेनाहं ब्रह्मास्मीति ज्ञानमुपपाद्येदानीं प्रतिपत्तव्यार्थस्वभावनिरूपणेनापि तदुपपादयितुं विकल्पयति ।

(१०६) किं सदेवाहमस्मीति किं वान्यत्प्रतिपद्यते ॥ ५१९ ॥
सदेव चेदहंशब्दः सता मुख्यार्थ इष्यताम् ।

किं सदेवेति । तत्त्वमसीतिवाक्यश्रवणसमनन्तरं प्रतिपत्ताहमस्मीति किं सदेव प्रतिपद्यते किं वान्यदिति विकल्पार्थः । आद्यमनूद्य तत्रपरस्यानिष्टापत्तिरित्याह । सदेव चेदिति । सता सच्छब्दार्थेनाहंशब्दो मुख्यार्थ इष्यतां तदा च सच्छब्दाहंशब्दयोरेकार्थपर्यवसानादैकात्म्यमेव वाक्यार्थो न संसर्ग इत्यपरोक्षज्ञानसिद्धिरित्यर्थः ॥ १०६ ॥

द्वितीये दोषमाह ।

(१०७) अन्यच्चेत्सदहंग्राहप्रतिपत्तिर्मृषैव सा ॥ ५२० ॥
तस्मान्मुख्यग्रहे नास्ति वारणावगतेरिह ।

अन्यच्चेदिति । प्रत्यगात्मनोऽन्यच्चेत्सत्तदाहंग्राहप्रतिपत्तिरहंब्रह्मरूपा या प्रतिपत्तिर्मृषैव सा भवेत्संपदादिज्ञानवत् तत्र वाक्यस्याप्रामाण्यमेव प्रसज्येतेत्यर्थः । प्रमाणप्रमेयस्वभावपर्यालोचनया वाक्यादेवापरोक्षं फलवदात्मतत्त्वविज्ञानमुत्पद्यत इत्युपपन्नमित्युपसंहरति । तस्मादिति । इह वाक्ये मुख्यग्रहे सति अवगतेर्यथार्थानुभवस्य वारणा निवारणं नास्तीत्यर्थः ॥ १०७ ॥

नन्वात्मनः कूटस्थत्वेन प्रतिपत्तृत्वानुपपत्तौ फलसंबन्धो नोपपद्यत इत्यस्यात्मग्रहे निवारणेत्याशङ्क्याह ।

(१०८) प्रत्ययी प्रत्ययश्चैव यदाभासौ तदर्थता ॥ ५२१ ॥
तयोरचितिमत्त्वाच्च चैतन्ये कल्प्यते फलम् ।

प्रत्ययीति । प्रत्ययी परिणाम्यन्तःकरणं प्रत्ययस्तत्परिणामश्च यदाभासौ यस्य चिदात्मन आभासो ययोस्तौ यदाभासौ तयोस्तदर्थता तच्छेषभूततेति यावत्, तस्मिंश्चैतन्ये चिदात्मनि तदाभासद्वारा फलं कल्प्यते, किं च तयोः प्रत्ययिप्रत्यययोरचितिमत्त्वाज्जडत्वादपि फलसंबन्धायोगात्फलस्यात्मसंबन्धः स्यादित्यर्थः ॥ १०८ ॥

निर्व्यापारस्यापि फलसंबन्धे दृष्टान्तमाह ।

(१०९) कूटस्थेऽपि फलं योग्यं राजनीव जयादिकम् ॥ ५२२ ॥
तदनात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य च ।

कूटस्थेति । ननु राजतद्भृत्ययोः स्वस्वामिभावसंबन्धोऽस्ति राजनि जयादिसंबन्धनिमित्तमिह त्वध्यस्ताध्यस्ययोस्तादृशस्यादर्शनात्कथमयं दृष्टान्तः प्रकृतेः संगतः स्यादित्याशङ्क्यात्राप्यस्त्यधिष्ठानाधिष्ठेयभावः फलसंबन्धहेतुरित्याह । तदिति । हेतुभ्यामित्यत्र हेतुत्वाभ्यामिति भावप्रधानता योज्या, क्रिया ऽहमात्मिका वृत्तिः, प्रत्यर्थमयतीति व्युत्पत्तेः प्रत्ययोऽन्तःकरणं साभासमुच्यते, साभासवृत्तिवृत्तिमतोरिति यावत् । आत्मत्वं च हेतुत्वं चात्मत्वहेतुत्वे तस्य फलस्य न आत्मत्वहेतुत्वे तदनात्मत्वहेतुत्वे ताभ्यां तदनात्मत्वहेतुत्वाभ्यामिति योजना । तथा च क्रियाप्रत्यययोर्जडयोः फलस्वरूपत्वाभावात्फलोपादानत्वाभावाच्च तद्व्यापारनिबन्धनं फलतदधिष्ठान एव निर्व्यापारेऽपि कूटस्थे योग्यमित्यस्ति दृष्टान्तदार्ष्टान्तिकसंगतिरित्यर्थः ॥ १०९ ॥

शुद्धस्यात्मनः प्रमातृत्वं नास्तीत्यभिप्रेत्येदं विशिष्टप्रमातृकृतं फलं कूटस्थे उपचर्यत इति राजदृष्टान्तेनोक्तं, वस्तुतस्तु चित्प्रतिबिम्बस्यैव स्वोपाधिव्यापारेण स्वात्मन्यध्यस्तेन विद्यत एव प्रमातृत्वमिति चिदात्मन एवाविकृतस्य प्रतिबिम्बभावनिबन्धनः फलसंबन्ध इति सदृष्टान्तमाह ।

(११०) आदर्शस्तु यदाभासो मुखाकारः स एव सः ॥ ५२३ ॥
यथैवं प्रत्ययादर्शो यदाभासस्तथा ह्यहम् ।

आदर्शस्त्विति । येन मुखाकारेण विशिष्टतया आभासत इति यदाभासः सचादर्शो मुखाकारः स एव ग्रीवास्थ एव स न ततोऽन्यो यथा बिम्बप्रतिबिम्बयोरैक्यं लोके प्रसिद्धमित्यर्थः । एवं प्रत्ययादर्शोऽहंकारो यदाभासो येन चित्प्रतिबिम्बेनाभास्यत इति यदाभासः स चित्प्रतिबिम्बः परमात्मैव न ततोऽन्योऽहंकारेऽहमवभासगोचरस्तथा सत्यहं ब्रह्मेति वाक्यार्थधीर्घटतेऽध्यस्तांशापोहमात्रेण विना नात्मनः कर्मत्वमित्यर्थः ॥ ११० ॥

अयमेव पक्ष आदरणीय इत्याह ।

(१११) इत्येवं प्रतिपत्तिः स्यात्सदस्मीति च नान्यथा ॥५२४॥
तत्त्वमित्युपदेशोपि द्वाराभावादनर्थकः ।

इत्येवमिति । एवं सति चिदाभासाभ्युपगमे सति सदहमस्मि चकारादहं सदस्मीत्येवमाकारा प्रतिपत्तिः स्याद्वान्यथा आत्मन एवाहंकारस्यैव वा प्रमातृत्वाभ्युपगमे इति यतो, ऽतोऽयमेव मार्गो ऽनिच्छद्भिरप्यादरणीय इति योजना । एवमनभ्युपगमे न केवलं प्रतिपत्त्यनुपपत्तिरपि तूपदेशस्याप्यनुपपत्तिरित्याह । तत्त्वमिति । स्वमर्थानुवाददद्वारेण हि तदर्थभाव उपदेष्टव्यस्तच्चानूद्यमानस्य चित्प्रतिबिम्बस्याभावे तदर्थोपदेशो निरालम्बनो ऽनर्थकः स्यादित्येतदाह । द्वाराभावादिति ॥१११॥

एतदेव विशदयति ।

(११२) श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं तथा भवेत् ॥ ५२५ ॥
अध्यस्तस्य न चेदिष्टं श्रोतृत्वं कस्य तद्भवेत् ।

श्रोतुरिति । तथा सतीत्यर्थः । तच्च श्रोतृत्वमध्यस्तादन्यत्र न संभवतीत्याह । अध्यस्तस्येति । न कस्यापीत्यर्थः ॥ ११२ ॥

यद्यप्यध्यस्तस्य नोपदेशस्तथापि न वैयर्थ्यमिति शङ्कते ।

(११३) अध्यस्तस्य समीपे स्याद्बुद्धेरेवेति चेन्मतम् ॥ ५२६ ॥
न तत्कृतोपकारो ऽस्ति काष्ठाद्यद्वन्न कल्प्यते ।

अध्यस्तस्येति । तत्र बुद्धेः श्रोतृत्वं किमध्यस्तसन्निधिसत्तामात्रापेक्षमाहोस्वित्तत्कृतोपकारापेक्षमिति विकल्प्याद्यं प्रत्याह । न तदिति । तत्कृतः सन्निहिताध्यस्तकृत उपकारो ऽतिशयो बुद्धेर्नास्त्येव यद्वत्काष्ठादिन्धनादेः सन्निहिताद्बुद्धावतिशयो न कल्प्यते तद्वदित्यर्थः ॥ ११३ ॥

द्वितीयमुत्थाप्य दूषयति ।

(११४) बुद्धौ चेत्तत्कृतः कश्चिन्नन्वेवं परिणामिता ॥ ५२७ ॥
आभासे ऽपि च को दोषः सति श्रुत्याद्यनुग्रहे ।

बुद्धौ चेदिति । एवं सति आभासानभ्युपगमे अध्यस्तस्य परिणामिता ननु निश्चितं प्रसज्येतेत्यर्थः । अतो "रूपंरूपं प्रतिरूपो बभूव, एकधा बहुधा चैव दृश्यते जलचन्द्रव"दित्यादिश्रुतिस्मृत्यनुगृहीत आभासपक्षो निर्दुष्ट उपादेय इत्यभिप्रेत्याह । आभासेपि चेति । यद्वा अस्तु परिणामिताध्यस्तस्येति चेत्तर्ह्याभासेपि च प्रमाणसिद्धे ऽभ्युपगम्यमाने तव को दोषो भविष्यतीत्याहाभासेपीति ॥ ११४ ॥

आभासपक्षे चिदात्मनः परिणामप्रसङ्गाभावं वक्तुं शङ्कामुत्थापयति ।

(११५) आभासे परिणामश्चेन्न रज्ज्वादिनिभत्ववत् ॥ ५२८ ॥
सर्पादेश्च तथावोचमादर्शे च मुखत्ववत् ।

आभासे परिणामश्चेदिति । नैवमाभासस्य मृषात्वोपपत्तेरिति परिहारमाह । न रज्ज्वादीति । रज्ज्वज्ञानकल्पितस्य सर्पादेरज्जुनिभत्ववदनिदमात्मकस्य रजतादेरिदमात्मत्ववच्च चिदात्माज्ञानकल्पितस्य बुद्ध्यादेर्मृषैव चिन्निभत्वं, चकारादभोक्तृस्वरूपस्यात्मनो भोक्तृत्वाभासो मृषैवेति सूच्यते, यथैवं मृषात्वं तथा पूर्वमवोचमादर्शे च मुखत्ववन्मुखाकारत्ववदिति दृष्टान्तप्रणयेनेत्यर्थः । चकारान्मुखस्येवात्मनो ऽविकृतत्वमप्यत्रोक्तमित्यर्थः ॥ ११५ ॥

॥ शेष उत्तराङ्के ॥

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

शुद्धज्ञानसुधाम्भोधिघनं द्वैपायनं स्तुवे ।
यो ऽवर्षद्विश्वहर्षाय श्रीभारतसुधारसैः ॥ १ ॥
चतुरङ्गचमूचारभारभुग्नावनिर्व्यधात् ।
भीमानुजो ऽथ कौबेरीदिग्जयाय प्रयाणकम् ॥ २ ॥
स्फाराहंकारहुंकारझङ्कारिनभसो ऽलसन् ।
अमिषश्रीसमाकृष्टिमान्त्रिका इव पत्तयः ॥ ३ ॥
मुखरा हयहेषाभिः पताकाहस्तशिक्षया ।
रथाः स्वरथिनां कीर्तीर्नर्तयन्त इवाचलन् ॥ ४ ॥
स्वगतिस्पर्धिनीं छायामपि च्छादयितुं रुषा ।
पिधानाय रवेर्धूतधूलयो हलयो ऽस्फुरन् ॥ ५ ॥
चलन्ताः कलुषीकर्तुं द्विषत्कीर्तिपटीरिव ।
सम्रमेदमखीधारावर्षिणः करिणां गणाः ॥ ६ ॥
जयश्रीवल्लिबीजानां राजयो लाजमुष्टयः ।
जिष्णौ घनरसासिक्ते क्षिप्ताः पुरपुरन्ध्रिभिः ॥ ७ ॥
कुलिन्दविषयप्रतापवासस्तदनु वासविः ।
अपारपौरुषो भूरीन् जिगाय जगतीपतीन् ॥ ८ ॥
सुमण्डलादिभूमीन्द्रशौर्यनिद्रानिशागमः ।
सप्तद्वीपजयी जिष्णुर्ययौ प्राग्ज्योतिषं ततः ॥ ९ ॥
आलानितचमूनागमदस्यन्दकदम्बकैः ।
तत्रातिसुरभीचक्रे कृष्णः कृष्णागुरुद्रुमान् ॥ १० ॥
वृतश्चीनैः किरातौघैः सागरानूपवासिभिः ।
तत्र शक्रसुहृद्राजा भगदत्तो युधं व्यधात् ॥ ११ ॥

आरूढभगदत्तस्य सुप्रतीकस्य दन्तिनः ।
पपुः शिलीमुखाः पार्थकराम्भोजत्यजो मदम् ॥१२॥
कृत्वा कामं दिनान्यष्टौ कामरूपेश्वरो रणम् ।
धनंजये जयं पूर्वं स ततो व्यतरद्धनम् ॥ १३ ॥
सर्वपर्वतखर्वत्वकरद्विपवरोऽथ सः ।
उलूकपुरभूपालं बृहन्तं जितवान् युधा ॥ १४ ॥
रामदेवसुनामादिराजराजिजयोज्ज्वलः ।
सेनाबिन्दुं देवप्रस्थपुरे सत्याभिधं व्यधात् ॥१५॥
कृत्वा तु पौरवं ध्वस्तगौरवं पर्वतेश्वरम् ।
जिष्णुरुत्सवसंकेतांश्चक्रेऽनुत्सवकेतनात् ॥१६॥
रागिण्यः स्मेरकाश्मीरैः श्लथीभूतपतिक्रियाः ।
काश्मीरभूमयः कामतप्तास्तमभजंस्ततः ॥ १७ ॥
अस्रैस्तेनारिनारीणां द्विरदानां मदाम्बुभिः ।
तेन मङ्क्षूर्मयो वङ्क्षुसरितस्त्रिगुणीकृताः ॥ १८ ॥
अवीरीकृतकाश्मीरः शौर्यमोहितलोहितः ।
दशमण्डलदण्डोग्रस्त्रिगर्तभटकर्तनः ॥ १९ ॥
गतोऽयमिति वैरीभसिंहः सिंहपुरं पुरम् ।
युधि चित्रायुधं भूपं तत्र चित्रायुधं व्यधात् ॥२०॥
युग्मम् ।
अथ केलिचलाक्षीणां चक्षुश्चञ्चलतां क्षिपन् ।
नव्यवैधव्यसंबन्धं कुर्वन् बाह्लीकयोषिताम् ॥२१॥
सिक्तकीर्तिलतः शिष्टभूक्षणीदृगम्बुभिः ।
दरदोदरदीर्घोत्थनिःश्वासेद्धमहःशिखी ॥ २२ ॥
ययौ काम्बोजमोजस्वी रङ्गत्तुङ्गतुरङ्गमम् ।
लक्ष्मीलिप्सुरसौ जिष्णुस्तरङ्गमिवार्णवम् ॥ २३ ॥
विशेषकम् ।
बद्धाः सिषिचुरक्षोलवृक्षालीं तद्द्विपा मदैः ।
अपकारिष्वपि व्यक्तं महतामुपकारिता ॥ २४ ॥
कृत्वा सुदक्षिणं क्षीणशौर्यं काम्बोजभूपतिम् ।
नृपान् पार्थो जिगायाथ प्रागुदीच्यां दिशि स्थितान् ॥२५॥
ओजः परमकम्बोजलोहद्रोहभवं भजन् ।
दरदैः सह काम्बोजमजयत् पाकशासनिः[1] ॥ २६॥
हरितः स हरीनष्ट प्राप्य तत्प्रभुढौकितान् ।
रवेरप्यधिको रेजे तेजःक्रान्तजगत्त्रयः ॥ २७ ॥

एतद्विजयसंजातं यशोजातमिवात्मनः ।
अथारुक्षत् तुषाराद्रिं शुभ्रमभ्रंकषं विभुः ॥ २८ ॥
एषां नास्योचितं गात्रमास्यं गात्रोचितं न वा ।
इत्यत्र विस्मितास्तस्य तुरगान् वीक्ष्य किंनराः ॥२९॥
आसन्नोत्तरदिग्दन्तिमदगन्धोद्धुरक्रुधः ।
नीरदेषु रदाघातं तत्र तद्द्विरदा व्यधुः ॥ ३० ॥
तत्र तद्रथचक्राध्वसमूढप्रवहत्पयाः ।
सहस्रमुखतां मन्ये तदादि द्युधुनी दधौ ॥ ३१ ॥
तद्वीराः शौर्यसोष्माणो यत्र यत्र ददुः पदम् ।
तत्र तत्रावहत् स्वच्छकीर्तिस्तेषां हिमच्छलात् ॥ ३२ ॥
चक्रे भूर्जसदृग्बिन्दुबन्धुरैः सिन्धुरैरथः ।
सोऽद्रिस्तदीयैर्दानालिध्वनिधिक्कृतकिंनरैः ॥३३॥
भिया शैलाधिदेवस्य दिग्गजैरप्यलम्भिताम् ।
तत्करिक्रीडया पीडां सेहिरे देवदारवः ॥ ३४ ॥
जित्वा स निष्कुटं शैलं तं क्रान्त्वा श्वेतपर्वतम् ।
देशे किंपुरुषावासे द्रुमपत्रं ततोऽजयत् ॥ ३५ ॥
स देशे हाटके कीर्तिशुभगं भावुकोद्यमः ।
प्रसह्य गुह्यकान् जित्वा सरो मानसमासदत् ॥३६॥
तत्र गजेन्द्रजालोकादस्थानाब्धभयोत्थितैः ।
यशोभिरर्जुनस्येव नभश्छन्नं सितच्छदैः ॥ ३७ ॥
सुवर्णसिकताखेलैः स्वर्णपद्मावतंसनैः ।
वीरास्तत्र बभुर्मूर्तदीप्ततेजोवृता इव ॥ ३८ ॥
स्फटिकाद्रौ तटीबिम्बद्विगुणायितसैनिकः ।
ततोऽलकापुरीद्वारि स निवासं न्यवेशयत् ॥ ३९ ॥
तटीषु वर्णसादृश्याददृश्यदशनानिह ।
निजबिम्बान् वशाबुद्ध्या मुदा तद्दन्तिनोऽस्पृशन् ॥४०॥
कर्णानिलोल्लसद्दानमक्षीबिन्दुनिवेशतः ।
तद्द्विपैरलकावप्रे तत्प्रशस्तिरलिख्यत ॥ ४१ ॥
यच्छन् धनान्यसंख्यानि तस्य स्वपुरभङ्गभीः ।
तदा धनद इत्याख्यां दधौ तथ्यां धनाधिपः ॥ ४२ ॥
जित्वा गन्धर्वदेशं स गन्धर्वनगरेऽग्रहीत् ।
हयांस्तित्तिरिकल्माषान् मण्डूकाख्यशिलोद्भवान् ॥ ४३ ॥
उत्तरं हरिवर्षं तु जिगीषुरथ फाल्गुनः ।
दिव्यैर्नरैः करान् दत्त्वा बहुरत्नानि वारितः ॥४४॥

१ हृषीकेषु हृषीकेशविक्रमस्तु क्रमाक्षयो इति पा० ।

Digitized by Google

सशंभुनन्दनाभ्यर्णकैलासस्तम्भविभ्रमम् ।
आरोपयज्जयस्तम्भमिह निर्दम्भविक्रमः ॥ ४५ ॥
इत्युत्तरहरिं चैषः संसारेणापि सङ्गतः ।
उन्नतश्च स कैलासशैलादेरविलार्चितः ॥ ४६ ॥

इत्युत्तरदिग्जयः ।

बलान्यथ बली भीमो रक्तकुङ्कुमितैरसौ ।
वेगैरुच्छ्रितमाकल्प्य पूर्वः पूर्वदिशोऽदिशत् ॥ ४७ ॥
कमलश्रीविलासाद्रिर्वाहिनीं सहयन्नयम् ।
भीमोऽभवद्दामशृङ्गशृङ्गारः स्यन्दनाश्रयः ॥ ४८ ॥
अस्य प्रातःप्रयाणेऽभूत् पुरः कन्येव पूर्वदिक् ।
मौलौ विजयकल्याणकुम्भवद्बिभ्रती रविम् ॥ ४९ ॥
पुण्डरीकैः सशिखण्डैरस्तुरंगैरुत्तरङ्गितः ।
भीमाननेन्दुतेजोभिर्जगर्ज बलसागरः ॥ ५० ॥
पूर्वदिग्विजयेऽपूर्वमेव पूर्वादितस्तदा ।
अग्रतापीकृतः सैन्यैः सूरो दूरोत्थरेणुभिः ॥ ५१ ॥
भूभृतः कटकाभोगवाहिनीं वाहिनीं द्विधा ।
लङ्घमानो मदोत्तालान् पाञ्चालान् प्राप मारुतिः ॥ ५२ ॥
निष्प्रपञ्चान् स पाञ्चालान् गण्डकान् दण्डदायिनः ।
विदेहान् देहदान् कृत्वा दशार्णेषु ततोऽविशत् ॥ ५३ ॥
निरायुधं यथा जित्वा सुधर्माणं दशार्णपम् ।
स न्यधाद्विद्विषामुर्व्यां यशस्तम्भमिव ध्रुवम् ॥ ५४ ॥
प्रयाति तत्र तत्सैन्यवृषा वेत्रवतीतटे ।
शिलावेरलिखन्नीलैरश्वशैलाश्मसु द्विपाः ॥ ५५ ॥
इनं सेनापतिं कृत्वा सुधर्माणं ततोऽजयत् ।
सोऽश्वमेधेश्वरं पूर्वदेशाधीशं नरेश्वरौ ॥ ५६ ॥
सुकुमारसुमित्राख्यौ पुलिन्दनगराधिपौ ।
वशीकृत्य निवासान् स चेदिदेशे न्यवेशयत् ॥ ५७ ॥
शिशुपालमहीपालप्रौढप्रेमगुणैरसौ ।
आलानितो गज इव तत्र पिंयन्निशाः स्थितः ॥ ५८ ॥
प्रविश्यानन्तं कुमारेषु कोशलेषु बृहद्बलम् ।
विनिर्जित्य स तेजस्वी ययावुत्तरकोशलान् ॥ ५९ ॥
सङ्कराङ्कुरैरीशैः समेदा तत्र गार्वितम् ।
अलक्ष्मश्यदयोध्यां स दीर्घप्रज्ञं नृपं जयन् ॥ ६० ॥
सरयूसरिता तत्र तद्धन्तिमदमिश्रया ।
स्वर्धुनी प्राप संभेदं कालिन्द्येव द्वितीयया[1] ॥ ६१ ॥
गोपालकच्छराजादिराजराजीवचन्द्रमाः ।
जगामोद्दामसंग्रामरसो वाराणसीमसौ ॥ ६२ ॥
जित्वा सुमन्तुनामानमुद्दामानमिलापतिम् ।
कीर्तिः प्रतेने तेनेह द्वितीयेव द्युवाहिनी ॥ ६३ ॥
सोऽथ विश्वेश्वरं नत्वा प्रतापयशसी दधौ ।
तद्भालनेत्रबालेन्दुप्रभयेवाद्भुतप्रभे ॥ ६४ ॥
तेन तेजोऽग्निभिर्मत्स्यदेशादिक्षितिपेन्धनैः ।
चिरं देहे विदेहेषु जनको मिथिलापतिः ॥ ६५ ॥
कृष्टोग्रधन्वनो जायज्जनके मिथिलापुरे ।
रामस्येवाभवत् तस्य करग्रहमहोत्सवः ॥ ६६ ॥
अथेन्द्रपर्वतं सुह्मान् प्राच्यसुह्मान् सपत्नकान् ।
जिगाय मागधान् दण्डदण्डधारधराधवो ॥ ६७ ॥
गिरिव्रजे जरासंधसुतं कृत्वा करप्रदम् ।
स तैरेव वृतः सर्वं पौण्ड्रदेशानुपाद्रवत् ॥ ६८ ॥
कम्पयन् भूभृतः सैन्यैः स्थावरान् जङ्गमानपि ।
ततः प्रापैव गोष्ठेषु चम्पां निष्कम्पसंपदम् ॥ ६९ ॥
तं प्रग्रविषयं वीक्ष्य विषमायुधविग्रहम् ।
स्त्रीलोक इव चम्पायाः कम्पार्तः पार्थिवोऽभवत् ॥ ७० ॥
उत्तालकर्णभूपालाकर्णनरतस्ततः ।
पौण्ड्रकं रणसेवासु वासुदेवं जिगाय सः ॥ ७१ ॥
कृती कौशिककच्छादिदेशक्रमितविक्रमः ।
रङ्गदब्धितरङ्गेषु वङ्गेषु क्रमतोऽगमत् ॥ ७२ ॥
तस्याङ्घ्रिपूजानिर्मुक्तमुकुटेन महौजसः ।
आज्ञा समुद्रसेनेन राज्ञा मूर्ध्नि न्यधीयत ॥ ७३ ॥
चन्द्रद्वीपक्षिरोत्क्षिप्तैस्तस्य नानामणिव्रजैः ।
गाम्भीर्यनिर्जितः पूर्वसागरोऽपि करं ददौ ॥ ७४ ॥
स गङ्गासागरन्यस्ते जयस्तम्भे यशोध्वजम् ।
स्वयमाकलयामास पूर्वदिक्कुरिजित्वरम् ॥ ७५ ॥
दीप्तस्तस्य प्रतापाग्निस्तत्र सिन्धूर्मिमारुतैः ।
उत्थाल्यन्वदिनं यस्य स्फुलिङ्गा इव भानवः ॥ ७६ ॥
इत्यशेषां दिशं जित्वा प्रबलेऽसौ बलाम्बुधिः ।
दोर्दण्डदर्पितोद्दण्डमण्डलाधिपमण्डलः ॥ ७७ ॥

१ स्वर्धुनीप्राप्तसंभेदकालिन्द्येव, इति पा० ।

इति पूर्वदिग्जयः ।

सहदेवोऽपि चतुरं चतुरङ्गचमूवृतः ।
वीरो दक्षिणदिग्देशभूमीं यात्रामसूत्रयत् ॥ ७८ ॥

सम्रान्तान् पातयंस्तुङ्गान् गिरीनरिमहीभृताम् ।
चचालाम्नायमार्गाश्चक्रे तस्य निर्याणनिस्वनः ॥ ७९ ॥

हरिणाङ्कुमभीन्द्रकर्णस्पन्दनकेतुभिः ।
क्रमाच्छूरसेना निन्ये महद्भिः परमं नभः ॥ ८० ॥

शूरसेनेषु विद्वेषिशूरसेनां रणेन सः ।
अजयज्जयदन्तीन्द्रालानमोचधनाचलः ॥ ८१ ॥

मथुरानगरीनाथनारीभिः स जयोद्धुरः ।
सचेलच्चं सहर्षं च दृष्टः सौभाग्यभाग्यभूः ॥ ८२ ॥

वृन्दावनाधिदेव्यस्तत्कुम्भिकुम्भैस्तदास्मरन् ।
कृष्णालोकोल्लसद्गोपीपीनवक्षोजविभ्रमान् ॥ ८३ ॥

तस्य द्विपमदैः श्यामैः सपत्नीसाश्रुनाभिभिः ।
पृथक्प्रवाहैर्भिन्नश्च त्रिस्रोता यमुनाप्यभूत् ॥ ८४ ॥

मत्स्यराजाहिराजादिदेशजेताथदेशकः ।
चर्मण्वतीसरित्तीरभूपभोजाङ्कुशाङ्कुरः ॥ ८५ ॥

अथायमुच्चलद्धूलिच्छायाच्छन्नबलाकुलः ।
ययाववन्तिदेशाय दक्षिणदेशीयविक्रमः ॥ ८६ ॥

युग्मम् ।

विन्दानुविन्दराजेन्द्रद्वयीजयमयीमिव ।
स शिप्रापुलिनोत्सङ्गरङ्गे कीर्तिमनर्तयत् ॥ ८७ ॥

अथ मुञ्जयिनीवारनारीनेत्रोत्पलार्चितः ।
तत्रानर्च महाकालं सान्द्ररोमाञ्चकञ्चुकः ॥ ८८ ॥

माहिष्मत्यां गतो नीलनृपेण कलयन् कलिम् ।
स व्यधाद्रुधिरै रेवामपि कोपारुणामिव ॥ ८९ ॥

नीलस्य पूर्वजामातृवरदोऽग्निरज्वलत् ।
साहाय्यायाथ माद्रेयपृतनान्तः प्रतापवत् ॥ ९० ॥

स्वं विलोक्याथ बलज्वालामालाभिर्विह्वलं बलम् ।
सहदेवः शुचिर्भूत्वाऽस्तौषीदिति कृताननम् ॥ ९१ ॥

सर्वारम्भस्वरूपोऽयं स्वाहाप्रिय नमोऽस्तु ते ।
मुखं त्वमेव देवानां यज्ञविघ्नाय नार्हसि ॥ ९२ ॥

इत्यादिस्तुतिभिस्तस्य प्रयाते हव्यवाहने ।
तेजसा नीलभूपालः शालग्रामाय शासकम् ॥ ९३ ॥

चेपुरं करदं कृत्वा नगरं चेरवेलरम् ।
कोशामकम् विवशीकृत्य सुराष्ट्राणां ततोऽगमत् ॥ ९४ ॥

सुराष्ट्रमन्तोऽजैषीन्नृपं भोजकटे पुरे ।
रुक्मिणपुत्रकं स्वसुहृदं भीष्मकाभिधम् ॥ ९५ ॥

मिलित्वाथ परप्रेमशालिनो वनमालिनः ।
गत्वा चकार शूर्पारदेशं वशगतं बली ॥ ९६ ॥

दण्डकेषु जयन् भूपान् पूजयन् राघवाश्रमान् ।
गतोऽथ सागरद्वीपं स निषादविषादकृत् ॥ ९७ ॥

छिन्नप्रावरणान् कुर्वन् कर्मप्रावरणान् रणे ।
द्विषां कालसमः कालमुखान् कालमुखान् सृजन् ॥ ९८ ॥

मुरचीपुरवीरालिजयशालियशस्ततिः ।
दीप्तताम्राक्षयद्वीपनृपदीपसमीरणः ॥ ९९ ॥

रामकाद्रिभरस्तम्भीकारिसेनारजश्चयः ।
रत्नाब्धौ शरजालेन गृह्णन् भूपं तिमिंगिलम् ॥ १०० ॥

अयोध्येष्वेकपादेषु दण्डदेषु दयापरः ।
उत्कटः करहाटादिदेशात्तकरहाटकः ॥ १०१ ॥

इत्थं युधिष्ठिराज्ञां स राज्ञां मूर्ध्नि किरीटयन् ।
मलयाद्रितटीं प्राप श्रीखण्डद्रुममण्डनाम् ॥ १०२ ॥

पञ्चभिः कुलकम् ।

तत्र बर्हातपत्राणि दृष्ट्वा केकिविशङ्किभिः ।
चन्दनाः पन्नगैर्मुक्ता ययुस्तत्सैन्यसेव्यताम् ॥ १०३ ॥

तत्र तस्येभनिर्भग्नचन्दनस्यन्दसिन्धुषु ।
जलकेलिं विलेपं च समं चक्रुश्चमूचराः ॥ १०४ ॥

खेलंस्तमालमालासु हेलामेलासु संचरन् ।
तत्र रक्षन् लवङ्गेषु तमसेवत मारुतः ॥ १०५ ॥

तस्माद्भुतभयोद्रेकज्वरजर्जरविग्रहः ।
तेने कोद्रखण्डपाण्डित्यं च पाण्ड्यः पाण्डवं प्रति ॥ १०६ ॥

तत्रेभभग्नशुक्त्युत्थव्यक्तमुक्ताफलावलिः ।
प्रशस्तिपट्टिकेवास्य ताम्रपर्णी सरिद्बभौ ॥ १०७ ॥

दुर्दुरात्सर्वसिंहस्त्रीगर्भभिद्दृष्टहुंकृतिः ।
अथाप च गिरिं सह्यमसह्यः प्रतिपार्थिवैः ॥ १०८ ॥

यार्द्रास्तद्दन्तिदानौघैर्मेचकैस्तदुपत्यकाः ।
रामास्त्रताडिताम्भोधिसव्योमुक्ता इवाम्बुः ॥ १०९ ॥

Digitized by Google

विडौजोनिविडौजोभिर्भटैर्द्रविडभूमिषु ।
पराञ्चि काञ्चीनाथस्य चक्रे चक्राणि स क्रमात् ॥ ११०॥
चोडीनेत्रपुटक्रोडीकृतैरपि पयःकणैः ।
शान्तश्चित्तान्तरे तस्य कोऽप्यहो कोपपावकः ॥१११॥
तद्धुलेहनरत्कुम्भिसेतुभिः स्तम्भिताम्भसः ।
कावेर्या विरहारम्भमम्भोधिर्लम्भितः क्षणम् ॥११२॥
केरलीचिकुरैरेव कुटिलैः केरलेऽथ सः ।
क्षणं विभ्रान्तहृदयो विदधे न विरोधिभिः ॥११३॥
मुरलातीरवानीरकुञ्जसंकेतकेतने ।
कान्ता केरलनाथस्य लक्ष्मीरभिससार तम् ॥ ११४॥
उपक्रेऽथ तन्नृपस्त्रैणबाष्पधौतपदाम्बुजः ।
महानदीनदीपद्मैरानर्च पुरुषोत्तमम् ॥ ११५ ॥
ततोऽन्ध्रेतिसप्रसप्रिसप्रयस्तस्य सप्रयः ।
सप्रगोदावरीतीरे मुमुचुर्मार्गजं रजः ॥ ११६ ॥
नीरन्ध्रयन् दिवो रन्ध्रमन्ध्रभूपजयोद्भवैः ।
यशोभिः सोऽत्र भावेनानमद्भीमेश्वरप्रभुम् ॥११७॥
ततः कुन्तलकर्णाटभूपाभ्यां भीमविक्रमः ।
शासनं ग्राहयामास पाकशासनशासनः ॥११८॥
हसन् सैन्यार्तभूभुग्नं भुजगेशं भुजेन सः ।
स्फूर्जत्त्वत्स्फुलिङ्गेभ्यः कलिङ्गेभ्यस्ततोऽचलत् ॥११९॥
निस्वाननिबिडस्वानग्रस्तसानुततिच्छलात् ।
कलिङ्गेषु महेन्द्राद्रिस्तं तुङ्गं त्वजितोऽनमत् ॥१२०॥
तस्मिन् नाराचधाराभिः कलिङ्गेशः सुरेशवत् ।
चिरं ववर्ष विस्तीर्य गर्जतो रदिवारिदान् ॥ १२१ ॥
करवालेन कुम्भिभ्यः कृष्ट्वा मुक्ताफलान्यथ ।
बीजानीव यशोवल्लेरुप्तवान् भुवि पाण्डवः ॥ १२२ ॥
धाराद्भयाग्रभिन्नेभकुम्भमुक्तावलिच्छलात् ।
जयश्रीस्तत्कृपाणस्य वरमालामिवाक्षिपत् ॥ १२३ ॥
पदपद्मद्वयं तस्य लक्ष्मीसद्म स्वयं ततः ।
मुक्त्वा कालं कलिङ्गेशस्ततः केशैरमार्जयत् ॥ १२४ ॥
तत्र नीरधितीराग्रपूगाभोगिलतादलैः ।
तद्वीरैः किंचिदस्मारि नारिकेलीफलेक्षणात् ॥ १२५ ॥
जित्वा रोमांश्चयवनरुरुकच्छादिभूपतीन् ।
दिदीपे सिंहलद्वीपे स महोभिर्महाबलः ॥ १२६ ॥
तत्र द्विपरदोत्खातकम्पमानमहावपुः ।
तस्मै भियेव भूरीणि ददौ रत्नानि रोहणः ॥ १२७ ॥
द्विरदोदस्तकर्पूरतरुणीर्णाभिरावृतम् ।
तत्र कर्पूरपारीभिस्तत्कीर्तिभिरिवाम्बरम् ॥ १२८ ॥
श्रीरोहणाश्रमागस्त्यसेवार्थी तत्र संस्थितः ।
सिंहलेशार्चितः प्रैषील्लङ्कां प्रति घटोत्कचम् ॥ १२९ ॥
श्रीरामविक्रमचमत्कारविस्मारणे रणैः ।
अक्षोभितः स रक्षोभिर्वशीचक्रे विभीषणम् ॥ १३० ॥
युधिष्ठिरजयस्तम्भसमारोपवशादसौ ।
त्रिकूटमपि शैलेन्द्रं चतुष्कूटमिव व्यधात् ॥ १३१ ॥
लङ्कावस्कन्दकल्याणैस्तडित्वन्तोऽम्बुदा इव ।
यशोऽवर्षन् सुवेलाद्रौ तत्रमूरजनीचराः ॥ १३२ ॥
इत्थं जयजुषा तेन समर्थेन समन्वितः ।
चचले कलयन् कीर्तिमर्जुनामर्जुनानुजः ॥ १३३ ॥
इति दक्षिणदिग्जयः ।

नकुलस्तु महीपालकुलस्तुतपराक्रमः ।
प्रपञ्चयंश्चमूवीचीं प्रतीचीमभिचेलिवान् ॥ १३४ ॥
परिभ्रष्टयशःपुष्पा मरुतेव प्रसर्पता ।
कम्पयांचक्रिरे तेन के न भूपतिभूरुहः ॥ १३५ ॥
अन्धानां सैन्यधूलीभिर्बधिराणां च भेरिभिः ।
निःशङ्कं द्विषतां लक्ष्मी रसादभिससार तम् ॥१३६॥
विपक्षपक्ष्मलाक्षीणां क्षीणां कुर्वन् मनोरतिम् ।
श्रीकार्तिकेयभवनं रोहीतकमुपाद्रवत् ॥ १३७ ॥
दिग्धाराभयशोरोही रोहीतकपुरस्पृशाम् ।
शूराणां द्रावयन् मत्तमयूराणां रणोत्सवम् ॥ १३८ ॥
चमूभरनमद्भूमिदूरोन्नतकुलाचलः ।
महाक्षकृतावेशं मरुदेशं विवेश सः ॥ १३९ ॥
युग्मम् ।
वशिष्ठाश्रमजैर्वृक्षैरर्बुदाद्रेः सदाफलैः ।
तत्सैन्यास्तापममुचन् बहिरन्तश्च मार्गजम् ॥ १४० ॥
स वशिष्ठमखोत्थानां विश्वामित्रजितामपि ।
तत्र धात्रीभूतामन्यैरनुच्छिष्टं पपौ यशः ॥१४१॥
तस्य सैन्येभदानार्द्रे हतवीराग्रपङ्किले ।
द्विषत्कान्ताश्रुभिर्नद्यो आकूलेऽपि स्थलेऽवहन् ॥१४२॥

Digitized by Google

शैरीषकान् शिबीन् हैमांस्त्रिगर्तानर्तमालवान् ।
पञ्चकर्वटकान् मध्यवाटधानद्विजान् जयन् ॥ १४३ ॥
अपि ग्रीष्मज्वलद्दावपावकोऽयमहःसहः ।
पुष्करारण्यलोकोऽथ प्रतापैस्तेन तापितः ॥ १४४ ॥
युग्मम् ।
तद्वलाम्भोनिधेर्लोकलङ्घनाय प्रसर्पतः ।
भेजेऽम्भोनिधिरेवाये मर्यादावल्लिवैभवम् ॥ १४५ ॥
दहता कूलभूपालान् क्रान्तस्तत्तेजसार्णवः ।
मेनेऽग्निमौर्वं सर्वाङ्गव्यापिनं स्वजयोत्थितम् ॥ १४६ ॥
तच्च तालासवोन्मत्ताश्चलत्प्रतिबलभ्रमात् ।
वीरा बिम्बितसैन्यासु सागरोर्मिषु धाविताः ॥ १४७ ॥
अथैष मत्तदन्तीव भूरुहानिव भूभुजः ।
सरस्वतीसरित्कूलबद्धमूलानमूलयत् ॥ १४८ ॥
गर्वं पार्वतिकेषु खर्वमकृत प्रापञ्चयन् पञ्चता-
सूयां पञ्चनदेशितुर्व्यजयत द्रागुत्तरज्योतिषम् ।
दर्पेणामरपर्पटक्षितिपतिं विश्लेषयन् निर्ममे
खेदं दिव्यकटाधिपस्य रसवान् निर्लोडयामास सः ॥ १४९ ॥
दोर्भारानथ हारहूणनृपतेर्भङ्क्त्वा प्रभासाभिध-
श्वेषालंकृततीर्थसार्थममनैः कृत्वा कृतार्थं वपुः ।
देवं द्वारवतीपतिं प्रियवचस्तोमातुलं मातुलं
शल्यं मद्रनरेन्द्रमार्द्रमनसो स प्रेमभिर्निर्ममे ॥ १५० ॥
म्लेच्छानुच्छिद्य कृत्स्नानमरगिरिचरान् बल्लवेन्द्राय दत्त्वा
दारिद्र्यं बर्बरेशोपशमनशमनः पूर्णदिग्जेचयाच: ।
अप्येतस्यां प्रतीच्यामयमुदयगिरिः स्वीयतेजोयशःश्री-
भानुप्रालेयभासोरजनयत यशस्तम्भमम्भोधितीरे ॥ १५१ ॥
इति पश्चिमदिग्जयः ।
मध्येबन्धु प्रथितविजयस्तम्भवेदीचतुष्कं
दीप्रे तेजःशिखिनि विधिना वर्तयन् मण्डलानि ।
यज्ञप्रेप्सुः प्रसृमरयशश्चन्दनस्यन्दशुभ्रा-
मित्थं पृथ्वीं सुकृततनयः पर्यणैषीन्मनीषी ॥ १५२ ॥
अथामी सामीरिद्युपतिसुतनासत्यतनुजा
जगज्जित्वोपेताः सुकृतसुतमानम्य मुदितम् ।
नगर्याः पर्यन्तक्षितिषु निखिलाशाजयमय-
श्रियां लीलाशैलानिव कनककूटानघटयत् ॥ १५३ ॥
भ्रष्टस्पष्टापरनरपतिश्रेणिशुभ्रातपत्र-
च्छत्रं हैमं जगति सकले लालयन्नेकमेव ।
ताराभारव्यपगमभवद्वैभवो भानुबिम्ब-
भ्राजी भूमीं दिवस इव स द्योतयामास वीरः ॥ १५४ ॥
इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-बालभारतनाम्नि महाकाव्ये वीराङ्के सभापर्वणि सर्वदिग्विजयो नाम द्वितीयः सर्गः ॥ २ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ तृतीयः सर्गः ॥

अस्तु वस्तुषु पराशरात्मज-
ज्ञानदुग्धजलधिः स शुद्धये ।
नीयते बत यदेकबिन्दुना
भारतेन विलयं भवानलः ॥ १ ॥
सोदरैरथ वृकोदरादिभि-
स्तैरधिष्ठितजयो युधिष्ठिरः ।
आदधौ वशगदिक्चतुष्टय-
स्तुष्टये मखभुजां मखोद्यमम् ॥ २ ॥
एष एव समयः समुन्नतिं
यावदापतति तावदापतत् ।
श्रीपुराणपुरुषः पुरः पुरी-
भर्तुरस्य चतुरः क्रतुक्रमे ॥ ३ ॥
स्फाटिके सदसि संनिवेश्य तं
क्षीरनीरधिनिवेशविस्मरम् ।
विश्वपूज्यमभिपूज्य चावदत्
पुंगवः क्रतुकृतां कृताञ्जलिः ॥ ४ ॥
त्वत्प्रसादमदसीमया मया
निर्जितं जगदजेयमप्यदः[1] ।
तामसं सृजति दिक्षु भङ्गुरं
पङ्कुरप्यरुणसेवयारुणः ॥ ५ ॥
तत्त्वणां कलुषितात्मनां रणे
भूभृतामपहृताः प्रभा इव ।

१—दशेय—इति पा० ।

मान्ति कान्तिसमदा मदालये
हस्तिनीवर न हस्तिपर्वताः ॥ ६ ॥
ध्यातया जगदिन त्वदाशया
स्तम्भितो मणिकदम्बदम्भतः ।
आजगाम मम धाम मानिनां
नाम धामदहनो महीभुजाम् ॥ ७ ॥
यैर्विलासगिरिभिर्जयश्रियां
जिघ्यिरे चकितदिग्गजा दिशः ।
तान् मम व्यदधत क्षमाभृतः
प्राभृतं भृशमसंनिभानिभान् ॥ ८ ॥
येऽश्ववारमनसा समं नभ-
स्युल्लसन्ति समरे समन्ततः ।
युक्तमेव मयि तान् ददुर्नृपा-
श्चित्तसेवितमदङ्घ्रयो हयान् ॥ ९ ॥
इत्यमी मम परोपकारिता-
भासुराशयविभूतिराश्रयः ।
त्वत्प्रसादवशतः परःशत-
क्ष्माभुजंगजययोनयोऽभवन् ॥ १० ॥
तद्विश त्रिदशशर्मकर्मठे
यत् करोमि समयज्ञ संप्रति ।
त्वं सुमित्रमसि मे सुमन्त्रिते
सद्गुरुः सदुपदेशसंसदि ॥ ११ ॥
सन्ति सन्ततमपि त्वदीक्षणा-
द्राजसूयमखराजयोऽपि मे ।
किंतु तातवचनादिहस्पृहा
सापि तु त्वदनुबन्धबान्धवा ॥ १२ ॥
मङ्क्षु मामनुमनुष्व तत्क्रतौ
गच्छ मेऽद्भुतमहाः सहायताम् ।
दीक्षितो भवतु वा भवान् भव-
द्भारतीभरपरो भवाम्यहम् ॥ १३ ॥
इत्युदीरितवति प्रभौ भुवः
सत्यमभ्यधित विष्टपाधिपः ।
लोकदृक्कुमुदवृन्दसंमद-
द्योतमानदशनेन्दुमण्डलः ॥ १४ ॥

त्वं क्रतुं कुरु कृतिन् भवत्कृते
मत्कृतेऽपि च न किंचिदन्तरम् ।
एकमेव हि यशोऽम्बुबोधने
भात्यहर्पतिमहः समूहयोः ॥ १५ ॥
दिग्जितस्त्वदनुजास्त्वदुत्सवे
निर्विशेषमतिरेष तेष्वहम् ।
इत्यमी ददतु पञ्च पञ्चतां
तस्य यस्त्वयि न कर्मकृन्नृपः ॥ १६ ॥
एवमुक्तवति देवकीसुते
सेवकीकृतसमस्तराजकः ।
सैष धौम्यमुनिना मुनीन् नृपः
सोदरैरपि नृपानजूहवत् ॥ १७ ॥
सिद्धसिन्धुसुतमुख्यबन्धुभि-
र्बन्धुरैरनुगतोऽनुबन्धतः ।
सोममूर्तिरयमष्टमूर्तिभू-
न्मूर्तितामधित दीक्षितो नृपः ॥ १८ ॥
धौम्यदिष्टनकुलाशयद्द्विज-
स्तोमसंस्तुतसमस्तवस्तुनि ।
यज्ञकर्मणि पृथात्मजो यथो-
चित्यमादिशदथावनीधवान् ॥ १९ ॥
सज्जनेष्वकृत भोजनक्रिया-
शोधनान्यथ सुयोधनानुजः ।
भूमिदेवततिप्रतिग्रहे
साग्रहोऽजनि कृपीतनूद्भवः ॥ २० ॥
पूजनानि जनयन् नयोज्ज्वलो
राजराजिषु रराज संजयः ।
कृत्यवस्तुनि मनो धुनीजनि-
द्राशयोरजनि याज्ञिकेऽधिकृत् ॥ २१ ॥
दक्षिणास्वजनि दक्षिणः कृप-
स्तत्त्वमैक्षि विदुरेण धार्मिकम् ।
अर्हणाग्रहणगौरवं नृपः
कौरवोऽभजत सर्वभूभुजाम् ॥ २२ ॥
नारदादिमुनिराजिराजिते
केशवादिकनरेशपेशले ।

Digitized by Google

ब्रह्मतामधित तत्र सत्यव-
त्यङ्गजस्त्रिजगदर्चितः क्रतौ ॥ २३ ॥
यत्र वेदिमनुसंस्कृतामुपा-
ध्यायपङ्क्तिभिरथो यथोचितम् ।
आजगाम सह राजकैरसौ
राजसूययजमानशंकरः ॥ २४ ॥
सा जगत्त्रयजनौघपावनी
नूनमात्मनि पवित्रताकृते ।
तत् पदं त्रिपथगाप्यमादनू-
चानचक्रगुणितत्रयीमयी ॥ २५ ॥
भावसौरभभृतौ विभावसौ
मन्त्रपूतमुपहूतदेवताः ।
जुह्वति स्म बत बह्वपि द्विजा
द्रव्यमण्डलमखण्डभक्तयः ॥ २६ ॥
पालनोद्यततृतीयपाण्डव-
प्रत्तखाण्डवरसौघनीरुजा ।
पावकेन पपिरे परंपराः
सर्पिषामिह वपुःप्रपुष्टये ॥ २७ ॥
हूयमानमुपहूय सज्जिता
वीक्ष्य हव्यममरा हविर्भुजि ।
आननोत्थममृतं मुहुर्मुहुः
सावहित्थमहृतस्पृहाः पपुः ॥ २८ ॥
उद्धुतेऽपि सति धूमसंचये
लोचनैरनिमिषैर्निरीक्षितम् ।
गृह्णते स्म हविराहुतं द्रुतं
पावके निपतदेव देवताः ॥ २९ ॥
नीरसाभिरमृतामृतद्युतौ
किंच नीरुचिभिरप्सरोऽधरे ।
तत्र कश्चन सुधाचयस्त्रय-
स्त्रिंशता त्रिदशकोटिभिः पपे ॥ ३० ॥
तत्र वल्गनरसाय वल्गता
संततं द्युपतिना वियोगिनी ।
द्यौरराजत मखाग्निकेतन-
श्रेणिदम्भकृतवेणिबन्धना ॥ ३१ ॥

दानवारिधुतदानवैर्यथा-
स्वादितैव विबुधैः सुखं सुधा ।
धौम्यधूतलघुजातिभिस्तथा-
भुज्यतान्नममृतं द्विजातिभिः ॥ ३२ ॥
पावकैकमुखदुःखभोजनात्
तृप्तिराप नियतं न दैवतैः ।
तत्र ते रसवतीरसामृतं
पातुमित्यजनि भूमिदैवतैः ॥ ३३ ॥
संभृतैरवभृथैकमङ्गलैः
संगतस्त्रिजगतः प्रियंकरः ।
बन्धुबन्धुरितसंनिधिर्व्यधा-
द्दानवर्त्मनि मनो जनाधिपः ॥ ३४ ॥
स्पष्टतामटतु रत्नमण्डलं
दानहेतुवसुधा च वर्धताम् ।
इत्ययं द्विजकरेषु कल्पना-
वारि वारिनिधिवेष्टकं ददौ ॥ ३५ ॥
अथ दानरसिके रमापतौ
स्वायतायभरभाजि के वयम् ।
इत्यभावि भुवि कल्पपादपै-
रस्य दानजलसेकतोऽपि न ॥ ३६ ॥
भूमिदेवतकुलाय भूमिकां
दातुमेव दधतो निजे भुजे ।
रुद्धभूरितरभूमयरुजं
कुर्वते स्म हृदि तस्य भूधराः ॥ ३७ ॥
भूमिदेवनिवहाय भूरिभि-
र्भूरदायि वसुभिः सहामुना ।
इत्यसौ वसुमतीति नूतनं
नाम नूनमजनिष्ट विष्टपे ॥ ३८ ॥
राजकानि मखशेषया भुवा
स्वल्पयाप्ययमपूजयद्यया ।
तानि तां ननु नितान्तभारिणीं
मौलिभिर्द्रुतमगृह्णतानतैः ॥ ३९ ॥
आदितो यदसुवद्धृतं वसु
क्ष्माधवैस्तदुपदाकृतं मुदा ।

Digitized by Google

आददे स बहुमानतः कृती
मार्गणेषु तृणवद्ददौ पुनः ॥ ४० ॥
पूर्यतामुपदया मम क्रतुः
स्पर्धयेति यददुर्धनं नृपाः ।
तद्बभूव खलु तस्य भूपते-
रेकमार्गणकदानवर्णिका ॥ ४१ ॥
दातुमिष्टमजनिष्ट तस्य यत्
तन्न्यचिन्ति मनसापि नार्थिभिः ।
चिन्तितं न रसनास्वधारि तैः
किंतु दानमजनि त्रपाधिकम् ॥ ४२ ॥
याचको यदिह याचतेऽर्थ्यतां
तज्जयादिति जगाद किंकरान् ।
दानकृत् कनकमानयत्यसौ
नादिशत् खलु नकारकेरतः ॥ ४३ ॥
अर्थिनः प्रथितकार्यसंमितं
गृह्णतोऽभ्यधिकमस्य यच्छतः ।
नाददे खलु ददामि खल्वहं
वाद एष भुवि केन भज्यताम् ॥ ४४ ॥
तत्प्रदेयमणिपूर्तये पयो-
नाथमाथहृदयस्तदा हरिः ।
मन्दरभ्रमिसखं विलेऽखिप-
द्यद्विरोचनसुतं शुशोच तत् ॥ ४५ ॥
कम्पभृद्गृहमणिर्नभोमणि-
स्तापवान् कलुषहृन्निशामणिः ।
स्वस्वदानचकिताः शुचाभवं-
स्तत्र यच्छति नवच्छवीन् मणीन् ॥ ४६ ॥
पात्रमेष वसुभिर्यथोन्नतं
रागभृद्भिरपि पूरयन् क्रमात् ।
पर्वतोऽप्यवनिमप्यपूरयत्
प्रातरभ्युदयवानिवार्यमा ॥ ४७ ॥
स्थापयन् पृथु यथादरिद्रकं
वित्तमेष निखिलेऽपि भूतले ।
ऐकरूप्यमसृजद्यथा यथा
निम्नमम्बु घटयन् घनाघनः ॥ ४८ ॥

आयुगान्तकुलभृद्भिरव्ययै-
रर्थिनां निधिगतैस्तदर्पितैः ।
रत्नराशिभिरनन्तया रजो-
गर्भयाप्यजनि रत्नगर्भया ॥ ४९ ॥
स्वं तथादित स पार्थिवो यथा
संजगुर्दिवि बिले च याचकाः ।
स्वर्युधिष्ठिरममर्त्यपादपं
पन्नगालययुधिष्ठिरं बलिम् ॥ ५० ॥
भूमिपातुरथ पात्रमत्र त-
त्संसदि प्रथममर्हणोचितम् ।
पृच्छतः क्रतुमहे पितामहः
संभ्रमादिति बभार भारतीम् ॥ ५१ ॥
शक्रचक्रनुतमर्हणोचितं
यद्विदन्नपि जगद्गुरुं हरिम् ।
पृच्छसि त्वमिह मां व्यनक्ति तद्
गौरवं गुरुषु कौरवोत्तम ॥ ५२ ॥
यत्पदोदकमधत्त मूर्धनि
स्वर्धुनीं त्रिजगतीहरो हरः ।
तं पुराणपुरुषं त्वमञ्जसा
विद्धि यज्ञपुरुषं प्रपूजय ॥ ५३ ॥
इत्युदारनिजचिन्तनस्फुटी-
कारवाचि सति शन्तनोः सुते ।
आद्यमर्घमसुरारये रयात्
पाण्डवोऽदित नवोदितस्मयः ॥ ५४ ॥
यज्ञसीम्नि शिशुपालपार्थिव-
श्चक्षमे न हि तदर्चनं हरेः ।
पाटलायितकरालदृग्गिरं
देहिनीमिव रुषं ततान तत् ॥ ५५ ॥
सत्स्वपि द्रुपदकुम्भसंभव-
व्यासवृद्धगुरुयाज्ञिकेषु किम् ।
पूजितः कुरुपते हरिस्त्वया
नैकमप्यधित तेषु यो गुणम् ॥ ५६ ॥
पूज्य एव यदि वा स एष व-
स्तन्नृपाः किमुपहूय वञ्चिताः ।

धर्मसूनुरिति चात्मन: कुतो
नाम नाम निबिडं विडम्बितम् ॥ ५७ ॥

इत्युदीर्य सममुत्थितो नृपै-
र्गन्तुमिच्छुरवनीभृता धृत: ।
बोधितोऽपि शुचिसान्त्वनोक्तिभि-
र्वाचमित्ययमुवाच कोपन: ॥ ५८ ॥

नो गतिर्भवति पुण्यवर्जिते
तेन नूनमगतिर्धुनीजनि: ।
हेतुमेष भवतोऽपि सद्गतिं
बुद्धिदोऽजनि जनार्दनार्चने ॥ ५९ ॥

उत्तवाहशकटाहिमुख्यभि-
द्विक्रमस्मितमना स्त्रिविक्रम: ।
भूयसोऽपि परिभूय भूपती-
नद्भुतानयमपूजि धिक् त्वया ॥ ६० ॥

य: स्त्रियं बत जघान पूतनां
नूतनाङ्कुरितपुण्यकन्दल: ।
ईदृशि क्रतुमहोत्सवे महा-
राज युक्तमयमच्युतोऽर्चित: ॥ ६१ ॥

कौतवादयमजर्जरां जरा-
सन्धबन्धनविधौ धियं व्यधात् ।
तत्कलङ्कभरभागभागसि
स्तुत्य इत्युचितमच्युतस्तव ॥ ६२ ॥

एतदुक्तवति तत्र कोपत-
स्तद्वधाय युधि भीममुत्थितम् ।
संनिरुध्य सहसा भुजोरसा
शान्तनिस्तमिति शान्तये जगौ ॥ ६३ ॥

प्रागिह त्रिनयने चतुर्भुजे
जातवत्यशुभरासभध्वनौ ।
वत्समातृपितृभीतिपारदा
भारतीति गगनोद्भवाभवत् ॥ ६४ ॥

डिम्भ एष भविता जगज्जयी
मृत्युरस्य स पुनर्भविष्यति ।
यास्यतोऽधिकदृशा समं यदु-
त्सङ्गसङ्गवशतोऽधिकौ भुजौ ॥ ६५ ॥

इत्यमुष्य जननी श्रुतस्रवा:
कस्य नैनमकृताङ्कवर्तिनम् ।
विष्णुमस्तमिव भानुमानयं
प्राप्य नष्टकरदर्शनोऽभवत् ॥ ६६ ॥

भ्रातृजं निजमथाह सा हरिं
सापराधमपि मा वधीरमुम् ।
इत्यदादभयदं वरं तदा
विष्णुरप्रियशतावधिं सुधी: ॥ ६७ ॥

एनमप्रियशतायुषं ततो
विष्णुयज्ञपशुमत्र मा वधी: ।
इत्यवेत्य शममाप मारुति:
कोपमाप्य च जगाद चेदिप: ॥ ६८ ॥

भीष्म भीष्मतरतेजसो भृशं
भूभुजोऽवगणयन्ति यं गुणै: ।
तं जलेशयमपि प्रपूजयन्
वृद्ध इत्यधम तेन वध्यसे ॥ ६९ ॥

गां निशम्य निशितामिति क्रुधा
दुर्धरोऽप्यधित सिद्धुसिन्धुभू: ।
ये नृपा न गणयन्ति शार्ङ्गिणं
तच्छिर:सु पदमेतदर्पितम् ॥ ७० ॥

पूजितो हरिरयं मयामुना
रे नृपा: किमपि यस्य दुष्यति ।
अद्य मद्भुजभुजंगभेकतां
निर्विवेकमतिरातनोतु स: ॥ ७१ ॥

इत्युदीर्णगिरि जीर्णपूरुषे
रोषरूचितमुखेषु राजसु ।
शार्ङ्गिणं प्रति जगौ जगद्विदा-
घोषघोषि दमघोषनन्दन: ॥ ७२ ॥

योग्यतातिगमुपाददेऽर्चनं
किं त्वया कथममीभिराहितम् ।
त्वामहं शिखिमुखे जुहोम्यत:
कृष्ण शान्तनवपाण्डवै: समम् ॥ ७३ ॥

एहि मङ्क्षु मदपूर्णमीहितं
संविधेहि युधि शक्तिरस्ति चेत् ।

Digitized by Google

मद्गुणोऽस्त्वनुचिताहर्णग्रह-
क्रूरपापहरणाय ते गुरुः ॥ ७४ ॥
त्वं च शान्तनव पाण्डवाश्च रे
मङ्क्षु संयति समेतमेत वा ।
एककालमपि वः पिबाम्यहं
कुम्भयोनिरिव सप्त तोयधीन् ॥ ७५ ॥
एवमब्दमिव शब्दमम्बर-
ध्वानितं सृजति सात्वतीसुते ।
आददे सदसि विष्णुना द्विष-
त्खण्डिना मृदु शिखण्डिनेव गीः ॥ ७६ ॥
मत्पुरीमदहदेष मत्पितु-
र्वाहमप्यहृत वाहमेधतः ।
बभ्रुसुभ्रुवमपाहरन्नृपा
वच्मि विप्रियमतः किमेककम् ॥ ७७ ॥
आगसामिति शतं पितृष्वसुः
पुत्रकोऽयमिति मर्षितं मया ।
सांप्रतं तु न सहेऽतिमन्यतः
क्षीरनीरधिरपि व्यधाद्विषम् ॥ ७८ ॥
कोपकम्पितकरक्रमाधरः
प्रोचिवानथ सुनीथपार्थिवः ।
रे जनार्दन विनर्दसीति किं
किंकरस्य तव का मयि क्षमा ॥ ७९ ॥
मा सहस्व सहसाद्य साहसा-
दुत्पतेति तमुदित्वरायुधम् ।
चक्रचङ्क्रमवशादसौ शिरो-
विप्रयुक्तवपुषं विभुर्व्यधात् ॥ ८० ॥
नूयमानमहिमांशुदुःसहं
हर्षिभिः सुरमहर्षिभिर्महः ।
सात्वतीसुतकबन्धतोऽविशत्
केशवे वपुषि वीक्षितं न कैः ॥ ८१ ॥
संप्रधार्य निजमातृबान्धवी-
नन्दनस्य दहनक्रियां कृती ।
धृष्टकेतुमभिषिच्य तत्सुतं
तत्पदेऽथ सदमानयन्नृपः ॥ ८२ ॥

इत्थं मुरारिपरिपालितपूर्णयज्ञः
साम्राज्यमाप्य विरराज स राजराजः ।
पूर्णं यशोमयपयःप्रचयैश्च चक्रे
यज्ञान्तपूर्तमिव शाश्वतमन्तरिक्षम् ॥ ८३ ॥
जगत्त्रितयपूजितोज्ज्वलचरित्रभाजा स्वयं
नृपेण परिपूजितां मुदमुदित्वरीं बिभ्रतः ।
स्मितैरनुगता वृकोदरकिरीटिमाद्रीसुतै-
स्ततो निजनिजं पदं सपदि विश्ववीरा ययुः ॥ ८४ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के सभापर्वणि राजसूयव-
र्णनो नाम तृतीयः सर्गः ॥ ३ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ चतुर्थः सर्गः ॥

ज्ञानप्रदीपपाषाणां सर्वेषामुपरि स्फुरन् ।
पायाद् द्वैपायनो विश्वजनमञ्जनमञ्जुलः ॥ १ ॥
अथेन्द्रप्रस्थसौन्दर्यं पश्यन् दुर्योधनोऽमुचत् ।
पुरंदरपुरीजैत्रस्वपुरीचारुतामदम् ॥ २ ॥
कदापि कौतुकाविष्टः प्रविष्टस्तामसौ सभाम् ।
द्रष्टुं ग्रामणिको राजधानीमिव ससंभ्रमः ॥ ३ ॥
स्फटिकोर्व्यामसौ वीरमुत्क्षिपन् नीरशङ्कया ।
रसादहासि दासेरैर्विलक्षवदनः क्षणम् ॥ ४ ॥
पद्मरागमयीं पश्यन्नन्तरा पद्मिनीमयम् ।
अर्कोश्मभूवितर्केण लीलावापीजलेऽपतत् ॥ ५ ॥
अहासि न तदा तस्मिन् निस्तेजसि जलस्थिते ।
अब्धिपातिनि मार्तण्डे कैरवैरिव कौरवैः ॥ ६ ॥
हसत्सु सह दासेरैर्भीमार्जुनयमादिषु ।
अहस्यत प्रतिध्वानैः सभाभित्तिभिरप्यसौ ॥ ७ ॥
धिग्गतास्मि समयक्ष्मापतिक्षयनिमित्तताम् ।
इत्यन्तःपतिते तत्र चकम्पे केलिवापिका ॥ ८ ॥
वाप्यालवालमध्येऽसौ विरोधद्रुरिवाङ्कुवान् ।
बभौ फलाय कस्मैचिद्विलक्षस्मितपुष्पितः ॥ ९ ॥
तापवानुत्थितः सोऽयं तोयोद्धृतनवांशुकः ।
निश्चितक्षवनक्षयो रविरिवार्णवात् ॥ १० ॥

Digitized by Google

तस्याग्रे स्फाटिकीं भित्तिमच्छामनवगच्छतः ।
गच्छतः स्खलिते मौलौ ते पुनर्जहसुर्जनाः ॥ ११ ॥
इत्येष रोषवैलक्ष्यावहित्थकृतसंमदः ।
तपसः पुत्रमापृच्छ्य प्रपेदे हस्तिनापुरीम् ॥ १२ ॥
तादृशीं क्ष्माभृतो लक्ष्मीं स्मारंस्मारं पदेपदे ।
न रतिं क्वापि स प्राप मेरौ तप्त इव द्विपः ॥ १३ ॥
अमान्तीरिव चित्तान्तर्दुःखसंतापवीचिकाः ।
तप्तनिश्वासरूपेण मुहुरुद्वमति स्म सः ॥ १४ ॥
कृतकार्श्यपरिष्वङ्गास्तदङ्गावयवाः क्रमात् ।
प्रभाधिक्यममुञ्चन्त हेमन्तदिवसा इव ॥ १५ ॥
अथालोच्य मिथस्तेन प्रणुन्नः सौबलो नृपः ।
प्रज्ञाचक्षुषमुर्वीशं विजनस्थं व्यजिज्ञपत् ॥ १६ ॥
रत्नैरिद्धोऽपि कान्ताभिः सेव्यमानोऽपि ते सुतः ।
कुतोऽपि कृशतामेति प्रावृषेण्य इवार्णवः ॥ १७ ॥
स मत्वेत्थमथाहूय नृपतिः स्वयमब्रवीत् ।
आश्रयोऽपि श्रियो वत्स किमिन्दुरिव सीदसि॥१८॥
दूरनिर्मुक्तकौन्तेयाः समुच्चेयाः पदेपदे ।
किं तात रमयन्ति त्वां नेताः पैतामहश्रियः ॥१९॥
वचोनासीरतानीतस्फीतनिःश्वसितानिलः ।
गान्धारीनन्दनो दैन्यसगद्गदमथावदत् ॥ २० ॥
कौन्तेया इव नूयन्ते क्षत्रियाः स्वार्जितश्रियः ।
श्रीमुदे वणिजां पैतामही तात महीयसी ॥ २१ ॥
पाण्डवैः खाण्डवप्रस्थमर्जिताभिर्विभूतिभिः ।
तथाभूषि यथेहाभूद्वस्तुं वास्तोस्पतेः स्पृहा ॥ २२ ॥
स्फुरति स्फाटिकस्तत्र प्राकारो रक्षितुं निधीन् ।
कुण्डलीन्द्र इव श्वभ्रात् परिखापथनिर्गतः ॥ २३ ॥
गुरुणा यस्य वप्रेण दत्तेव जपमालिका ।
माणिक्यकपिशीर्षालिर्व्योम्ना धारि तमोभिदे ॥ २४ ॥
नभोमरकतादर्शे भान्ति यत्परिखोर्मयः ।
संक्रान्ता इव वप्रान्तचलकेतनकैतवात् ॥ २५ ॥
प्रवेशेनेव यद्वप्रे स्खलितस्य नभस्वतः ।
सफलं मेनिरे मारविवराणां जनुर्जनाः ॥ २६ ॥
चतुर्भिस्तोरणामुक्तमुक्ताप्रन्दर्शनैर्मुखैः ।
चतुर्दिक्लोकपालानां पुराणि हसतीव यत् ॥ २७ ॥

अपराह्णे नमन्नर्कस्तर्क्यते यद्बहिर्जनैः ।
वप्राग्रसंसमानैकमाणिक्यकपिशीर्षवत् ॥ २८ ॥
वसन्तमन्तर्दिवसं रत्नवेश्मविभानिभात् ।
यत्रारामसमयो वप्रो बहिर्ध्वान्तः सदारुधत् ॥ २९ ॥
न मामसावसौ वेत्ति वेत्तीह युवमध्यगम् ।
हरः सोऽपीति निर्भीतिर्यत्रानङ्गोऽपि रङ्गति ॥ ३० ॥
मुक्तद्युगतयोऽभ्यस्तुं भुवि लीलागतीरिव ।
वसन्ति यत्र रम्भोरूदम्भाद्रम्भादिदेवताः ॥ ३१ ॥
मिथुनौघैर्मिथोरूपनिरूपादनिमेषिभिः ।
दिव्यैरिवागतं दैत्यभीतैर्यत्राकुतोभये ॥ ३२ ॥
मन्ये यच्चन्द्रशालानां नामाभूदमरावती ।
यद्भूमिगर्भगेहानां नाम भोगवती पुनः ॥ ३३ ॥
रत्नाव्यां कन्दुकभ्रान्त्या धावन्तः सह वालिना ।
द्वयेऽपि रविबिम्बे न सीमां यान्ति यदर्भकाः ॥ ३४ ॥
बाला यत्सौधमालासु नक्तमेणाङ्कमण्डले ।
पाणिं क्षिपन्ति जानन्त्यो रजताञ्जनभाजनम् ॥ ३५ ॥
यत्प्रासादास्तथाभूतस्वाभोगग्रस्तमम्बरम् ।
उद्गिरन्ति सदोद्भूतधूपधूमावलिच्छलात् ॥ ३६ ॥
ध्वजरत्ना भुजंगेशभाजो यद्देववेश्मसु ।
कुम्भाः कारयितुः पुण्यनिधिकुम्भा इव स्फुटाः ॥ ३७ ॥
भान्ति यत्रोदवीथीषु कल्याणरजतच्छलात् ।
साम्राज्यदीक्षितन्यायतेजःकीर्तिचया इव ॥ ३८ ॥
जलैर्यत्केलिवापीनां स्यन्दिभिर्भूमिभेदिभिः ।
सुधाकुण्डावलिर्नूनं जाता पातालपातिभिः ॥ ३९ ॥
दानदीक्षागुरूणां यज्जनानां मणिपादुकाः ।
नूनं कल्पद्रुमा मूर्ध्नि वहन्ते पल्लवच्छलात् ॥ ४० ॥
कवीनां रसनालोलदोलाकेलिरसस्पृशः ।
वाग्देव्या यत्र दासीव श्रीः पुरः स्फुरति स्फुटम् ॥ ४१ ॥
शेषोऽपि द्विसहस्राक्षरसनस्तत्पुरश्रियम् ।
वीक्ष्य वीक्ष्य स्वयं वक्तुं शक्तो भवति वा नवा ॥ ४२ ॥
वसन् यत्र मणिश्रेणिनद्धसौधास्ततामसे ।
रवेरुदयमस्तं वा न वेत्ति सुखितो जनः ॥ ४३ ॥
स्वयंकृतस्य कौन्तेयैः पत्तनस्यास्य दूरगा ।
पूर्मे पैतामही काण्डकरपाटकवद्बभौ ॥ ४४ ॥

सहजद्विषतामेषामेषा लक्ष्मीः पुरस्य माम् ।
स्मर्यमाणा दुनोत्यन्तरयोगिनमिव प्रिया ॥ ४५ ॥
चतुर्भुजेन दिग्भेदैः सोदरैश्च वृतः कृती ।
श्रियं यामाश्रयद्धर्मसूनुः क्लिश्नाति साति माम् ॥४६॥
समस्तैर्वस्तुभिः स्वस्वदेशजैर्विश्वभूभुजः ।
दत्तैरानन्दयन् यज्ञवलये बलिनोऽपि तम् ॥४७॥
श्रीचन्दनरसं शातकुम्भकुम्भैरढौकयत् ।
यशः स्वमिव तेजःस्थं पाण्ड्यो मलयपार्थिवः ॥४८॥
जातं रावणगङ्गायां पद्मरागमणिव्रजम् ।
भक्त्या स्फुटीकृतं मूर्तमनुरागमिवात्मनः ॥४९॥
अब्धितीरोद्भवानिन्द्रनीलमौक्तिकसंचयान् ।
स्वराज्यश्रीसितश्वेतकटाक्षस्तबकानिव ॥ ५० ॥
सिंहलेशो यशोवल्लिवृन्दकन्दानिवोज्ज्वलान् ।
अदत्त दक्षिणावर्तशङ्खानपि सहस्रशः ॥ ५१ ॥

विशेषकम् ।

अब्ध्यर्पिता नु पुष्पालीः सभृङ्गास्तज्जुषे श्रिये ।
मुक्तामकरकतैर्युक्ता ददौ बर्बरदेशपः ॥ ५२ ॥
मल्लक्ष्मीस्तव मुण्डीति वदंस्तस्याः कचानिव ।
वैदूर्याणि पुरोऽमुञ्चत् कोङ्कचोलकदेशपः ॥ ५३ ॥
शङ्खमत्स्यमुखोन्मुक्तमुक्तापङ्क्तिद्वयीसिताः ।
प्रवालकन्दलश्रेणीर्नवीनरविपाटलाः ॥ ५४ ॥
नदीपद्वीपभूमीपा ददुर्यास्ताभिराबभौ ।
ओष्ठपर्यस्तदन्तालिद्वयच्छायेव तत्सभा ॥ ५५ ॥

युग्मम् ।

मुक्ताफलजुषो हीरान् नीरवाहद्युतो ददौ ।
हसतोऽन्यानि रत्नानि नूनं सूर्पारपार्थिवः ॥ ५६ ॥
करिदंष्ट्राकरिशिरोवेणुमुक्तास्थलचयीः ।
ददुस्त्रिविधवीरश्रीलीलाशैलानिवाद्रिपाः ॥ ५७ ॥
मुक्ताभरणसश्रीकान् पारसीकाधिपो हयान् ।
ददौ स्वविषयस्थस्य तरङ्गानिव तोयधेः ॥ ५८ ॥
चामरौषधिकस्तूरीमुख्यैः किमु वयं यदि ।
हीरानिति क्रुधा रक्तान् हिमाद्रिसदना ददुः ॥५९॥
हेमाभश्याममहीरालिमालिनो ददतुर्द्विपान् ।
कलिङ्गपुण्ड्रकौ जातानभितः काम्यकं सरः ॥६०॥
कोशलेशः शिरीषाभान् नातिपीतान् मतंगपः ।
रेवातीरनृपः शुभ्रान् शोणान् सौराष्ट्रभूपतिः ॥ ६१ ॥
हीरानढौकयन्नेते विद्योतद्योतिताम्बरान् ।
भक्ता विभूषणानीव स्वस्वधामभुवां भुवाम् ॥६२॥

युग्मम् ।

व्यतरन्नितरेऽप्युर्वीभुजः सारं निजश्रियाम् ।
शतादृक्षमखप्रेक्षाः कृपवत् कृपभक्तयः ॥ ६३ ॥
हेमकक्षास्तडित्वन्तोऽर्जुनप्रीतिलताम्बुदाः ।
चतुर्दश सहस्राणि हरिणा करिणोऽर्पिताः ॥६४॥
अदाच्चित्ररथः शक्रसुहृद्गन्धर्वनायकः ।
जगन्मनस्त्वराभ्यासगुरुं हयचतुःशतीम् ॥६५॥
अयं महाप्रभावानि प्रभावन्ति सहस्रशः ।
अहीन्द्रमौलिजीमूतगर्भमुक्ताफलान्यदात् ॥ ६६ ॥
वितताार त्वरातारांस्तुम्बुरुस्तुरगान् शतम् ।
समीरोऽपि करोत्येव यदारोहस्पृहां गतौ ॥ ६७ ॥
पृथिव्यामुदयास्ताद्रिमुख्यदिक्पर्वतान्तरे ।
न स कोऽप्यस्ति भूभर्ता यस्तस्मै न बलिं ददौ ॥ ६८ ॥
अदृष्टपूर्वानज्ञातनाम्नो विस्मयदानपि ।
निर्विण्णोऽहं तदा गृह्णन् पदार्थान् सपरिच्छदः ॥ ६९ ॥
देशारण्यनदीशैलसिन्धुमध्यादिसंभवैः ।
वस्तुभिः पूरिता सा भूर्जम्बूद्वीपं श्रियाहसत् ॥ ७० ॥
पाथस्तदभिषेकार्थं मुनयोऽम्बरचारिणः ।
आहरन् सर्वतीर्थेभ्यस्तदानीं नारदादयः ॥ ७१ ॥
भूपतेरभिषेकाय तस्योपस्करढौककाः ।
महामहीभुजोऽप्यासन् भुजिष्या इव संसदि ॥ ७२ ॥
बाह्लीकेन्द्राहृतं वाहैः काम्बोजोऽयोजयद्रथम् ।
सुनीथोऽसज्जयत् केतुं वसुदानो महागजम् ॥७३॥
मागधेन्द्रः स्रगुष्णीषे एकलव्य उपानहौ ।
काश्योऽस्त्रं कवचं पाण्ड्यश्चेकितानोऽधितेषुधिम् ॥ ७४ ॥
शल्येन धारितस्यासेर्धाराद्वितयबिम्बितः ।
त्रिमूर्तिरिव रेजेऽसौ त्रिवेदीवेदिनोऽर्चितुम् ॥ ७५ ॥
वृत्तैस्तस्य स्वकुल्यस्य निष्कलङ्क इवेक्षितुम् ।
सात्यकिस्फारितच्छत्रमूर्त्या तत्राययौ विधुः ॥७६॥

रैवतुश्चामरे तस्य भीमफाल्गुनचालिते ।
कटाक्षौ निकटप्राप्तयशोदानश्रियोरिव ॥ ७७ ॥
वेदोक्त्या राजचिह्नेषु सज्जितेष्वपि पार्थिवैः ।
अभ्यषिञ्चंस्तपःसूनुं धौम्यव्यासादयो द्विजाः ॥ ७८ ॥
अकल्पयत् पुरा कल्पे यं शक्राय प्रजापतिः ।
तं ददौ वारुणं शङ्खं तदास्मै कलशोदधिः ॥ ७९ ॥
एनमादाय दायादः किरीटिसुखदुःखयोः ।
अभिषेकं व्यधात् तस्य तीर्थाम्भोभिः स्वयं हरिः ॥ ८० ॥
वीरवादितमङ्गल्यकम्बूनां निनदैस्तदा ।
मयान्यैरपि भूपालैर्मूर्च्छालैः पतितं भुवि ॥ ८१ ॥
कृष्णापाण्डवशैनेयधृष्टद्युम्नैरमूर्च्छितैः ।
हसितोऽहं व्रजन्मोहं यत् तैस्तन्नैति विस्मृतिम् ॥ ८२ ॥
आसीत् कृष्णार्चनात् पुष्पवृष्टिर्या नकुलाग्रजे ।
सा मां दुनोति चेदीन्द्रमृत्यूत्पातोल्कापातवत् ॥ ८३ ॥
बाष्पान्तः पतितं कृष्णा यन्मां स्त्रीभिः सहाहसत् ।
स्खलत्यद्यापि तत् तात चित्ते निशितशल्यवत् ॥ ८४ ॥
इत्यादिस्मरणोत्पन्नचिन्ताभारभियेव मे ।
स्थितिमेकत्र कुत्रापि स्थाने न कुरुते मनः ॥ ८५ ॥
अपूर्यमाणवाञ्छस्य तादृक्परिभवोदधेः ।
मृत्युरेवाद्य मे श्लाघ्यो नतु दुःखविडम्बनम् ॥ ८६ ॥
इत्यवेत्य व्यथां सूनोरेवमूचेऽम्बिकासुतः ।
वत्स कापुरुषस्येव वैराग्याय परर्द्धयः ॥ ८७ ॥
पुरीं कुरु नयारम्भैर्जृम्भमाणश्रियं स्वयम् ।
सभां तादृक्प्रभां नानारत्नैर्यत्नेन कारय ॥ ८८ ॥
गौतमाङ्गपतिद्रोणद्रौणिभिः ककुभो जय ।
सप्ततन्तुं कुरु वृतः सोदरैः राजसूयवत् ॥ ८९ ॥
वत्स निर्वेदभूर्मा भूः कीर्तिमर्जय विक्रमात् ।
त्वज्ज्येष्ठो यत् पृथासूनुः श्रीमान् सोऽप्युत्सवस्तव ॥ ९० ॥
अथाकिरद्गिरं दैन्यच्छन्नक्रोधां सुयोधनः ।
सा श्रीः पुरे चिरेण स्यात् प्रतिभूः कोऽस्ति जीविते ॥ ९१ ॥
सभा क्व भाविनी तात तादृग्मनुजकर्तृका ।
पाण्डवैः पीतसर्वस्वाः कः स्वार्था जयतां दिशः ॥ ९२ ॥
राजसूयं विना न स्यां सम्राट् किं सप्ततन्तुना ।
लज्जे तद्विक्रमार्तासु त्रिक्रामन् राजराजिषु ॥ ९३ ॥

ज्येष्ठः क्व मे तपःसूनुरुद्भासो यस्तदाभवत् ।
भीमादिषु सहासेषु सभान्तः स्खलिते मयि ॥ ९४ ॥
गौतमादिभिराक्रम्य तत् पार्थान् वैरिणो रणे ।
गृह्ण पुरं सभाशोभिदिग्जयोत्थां च संपदम् ॥ ९५ ॥
मत्वेति तत्र दुर्मन्त्रं धृतराष्ट्रे विवक्षति ।
स्वस्रीयं प्रति गान्धारधरणीपतिरभ्यधात् ॥ ९६ ॥
पुरःस्फुरन्मुरारातिभीमार्जुनयमो युधि ।
क्रोधे दग्धुं क्षमो विश्वं केन जेयो युधिष्ठिरः ॥ ९७ ॥
तं तु रन्तुमजानन्तमाहूतमनिवर्तिनम् ।
शारिद्यूतेन जित्वाहं ग्रहीष्ये सर्वमप्यदः ॥ ९८ ॥
तद्भूप कारितस्फारसभालोकच्छलादमुम् ।
इहानय ततः सर्वं ग्रहीष्येऽहं धियानया ॥ ९९ ॥
ऊचेऽथ व्यथमानोऽन्तः स प्रज्ञानयनो नृपः ।
धिङ्मन्त्रं वः स धर्मात्मा जेतव्यः कैतवादिति ॥ १०० ॥
कर्मण्यस्मिन् क्व सा धर्मख्यापयशसो कथा ।
किंतु पापमसामर्थ्यमयशश्च प्रकाशि वः ॥ १०१ ॥
इत्युक्ते व्यक्तकोपान्धः स्वभावान्धसुतोऽवदत् ।
धर्मात्मा वा विधर्मा वा कैषा द्विषि विचारणा ॥ १०२ ॥
शक्त्या जेतुमशक्योऽरिः संताप्यः कैतवादपि ।
छलाद्बलानुजोऽबध्नाद्दुर्मेधं बलिनं बलिम् ॥ १०३ ॥
तत् कुरूपक्रमं तूर्णमेनं जेतुं विरोधिनम् ।
न चेद्रोगैरिवाच्छिन्नैस्तैरुन्मूलयितास्महे ॥ १०४ ॥
कार्येऽस्मिन् पाण्डुपक्षीयैर्विदुराद्यैर्निषेध्यसे ।
तत् त्वं तात चिरं नन्देर्मरणं शरणं तु मे ॥ १०५ ॥

इतिसुतमतिविप्लवेन जान-
न्नपि कुलवीरविनाशमभ्युपेतम् ।
नृपतिरपि तथेत्युवाच कस्य
भ्रमयति पुत्रकदाग्रहो न चित्तम् ॥ १०६ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के सभापर्वणि कौरवामर्षो
नाम चतुर्थः सर्गः ॥ ४ ॥ :: ::

श्रीः

अगुणोऽपि पुमान्ध्येयो योऽक्रियः परमार्थदः ।
अजोऽपि मनुजोऽमर्त्यो राघवः पातु नो विभुः ॥

पुरा श्रीमद्दाशरथे रामचन्द्रस्य लङ्काधिपतिरावणहननोत्तरं ततः परावर्तनसमये श्रीरामचन्द्रो नारायणावतार इति सूचयितुं श्रीहनूमान् मीनाद्यवतारवर्णनविषयकं पद्यात्मकं काव्यं रचयित्वा जलधिसेतुप्रस्तरेषु विलिलेख ।

ततोऽनल्पे काले व्यतीते धनार्जनार्थिनो द्वीपान्तरं गच्छन्तः स्वपोतयानाः सांयात्रिकाः कदाचित्सेतुपथमागत्य प्रस्तरेषु पद्यबन्धं काव्यं दृष्ट्वा तल्लेखने प्रयता बभूवुः, परन्तु जलधिजलकल्लोलैर्दृषदां नाशात्तत्सम्पूर्णं नोपलब्धम् । ततश्च ते खण्डितमेव तद्विलिख्य स्वपुरमेत्य विद्वत्सदसि प्रादर्शयन्, ते च धीमन्तः कवयो दृष्ट्वा तत्खण्डितं काव्यं स्वशक्त्या पूरयन्ति स्म खण्डप्रशस्त्यभिधया तेर्व्यवहृतं च ।

ततश्चैकचत्वारिंशदधिकषोडशशततमे (१६४१) वैक्रमेऽब्दे जैनमतानुयायिना श्रीजयसोमगुणिशिष्येण श्रीगुणविनयगुणिना विवृतम् ।

सर्वं चैतत्तद्विवृतित एव मया ऽवगतम्, अस्य काव्यस्यातिप्राचीनमेकं पुस्तकं विपणौ लब्ध्वा पुस्तकान्तरमलभमानस्तत्पुस्तकमशुद्धमपि महता यत्नेन संशोध्य सरसालङ्कृतमेतत्काव्यं काशीविद्यासुधानिधिरसिकानां परमाल्हादजनकं भवेदितिधिया मुद्रितुमारभ्यतइति शम् ॥

काशिकराजकीयपाठशालायां ज्योतिश्शास्त्राध्यापको वामनाचार्यः

॥ श्रीगजाननाय नमः ॥

खण्डप्रशस्तिः

तिलकयुता ।

श्रीपार्श्वे फलवर्धिकाद्भुतमहाराजं महो राजतं
त्रिःकृत्वःसुकृतैकभाजनमहं नत्वा कृपावारिधिम् ।
सारं श्रीगुरुराजपादकमलं चानन्दसंवर्द्धकं
संवक्ष्ये विवृतिं यथामति मतां खण्डप्रशस्तेः शुभाम् ॥ १ ॥

(१) कृतक्रोधे यस्मिन्नमरनगरी मङ्गलरवा
नवातङ्का लङ्का समजनि वनं वृश्चति सति ।
सदा सीताकान्तप्रणतिमतिविख्यातमहिमा
हनूमानव्याद्वः कपिकुलशिरोमण्डनमणिः ॥

एतच्च काव्यं हनूमद्विरचितश्रीरामप्रशस्तिलेखनकर्त्रा मङ्गलार्थमादौ विरचितं तद्व्याख्येयम् । स हनूमान् वः युष्मान् अव्यात् रक्षतु । सइति कः, यस्मिन् हनूमति कृतक्रोधे कृतो विहितः क्रोधः कोपो येन सः तस्मिन् सति अमरनगरी अमरावती, मङ्गलरवा मङ्गलशब्दा अजनि जाता, देवप्रतिपन्थिदैत्यविनाशनात्सुरपुर्यां परमोत्साहः समुत्पेदे इति भावः । तथा यस्मिन् हनूमति वनं वृश्चति छिन्दति सति लङ्का नवातङ्का नवसाध्वसा समजनि, किंविशिष्टः हनूमान् सदा सीताकान्तप्रणतिमतिविख्यातमहिमा सदा शश्वत् सीताकान्ताय रामाय या प्रणतिमतिर्नमस्कारबुद्धिस्तया विख्यातः प्रसिद्धो महिमा माहात्म्यं यस्य सः पुनः किंविशिष्टः कपिकुलशिरोमण्डनमणिः कपिकुलस्य वानरसमूहस्य शिरोमण्डनमणिरिव यः स कपिकुलशिरोमण्डनमणिः ॥ १ ॥

इहहि श्रीरामप्रशस्तिः खण्डप्रशस्तित्वेन कथमजनीत्येतदाह ॥

पुरा श्रीदशरथाज्ञया श्रीरामः सलक्ष्मणः सीतासहायः समादाय कार्मुकमेकं मुक्त्वा च पुरग्रामादिकं विजनवनान्तं निर्ययौ, तत्र च ते त्रयोपि विपिने तरुफलान्येव भुञ्जते न कृष्टक्षेत्रोत्पन्नसस्यानीत्येवं कालं सुखेन गमयन्ति स्म, अन्यदा श्रीरामजनीं सीतामेकाकिनीं विनीतां कामपत्नीस्वरूपां सुरूपामवगम्य स्त्रीलोलुपतया रावणस्तां सीतामपहर्तुकामः कनकमृगं मायया व्यधत्त, तं च मायामृगं दृष्ट्वा सा सीता स्वक्रीडार्थं स्वपतिं श्रीरामं विज्ञापयति स्म, यथा च, हे भर्तः कनकमृगं केलिनिमित्तं समानीय मे देहीत्युक्तिः । तादृक्प्रियवचःश्रवणविह्वलतया मायामृगमपि आखेटक्येनाज्ञासीत् । ततः श्रीरामस्तं मायामृगमनुधावति स्म, ततो यावता तन्मायामृगानुगामित्वेनादृश्यतां प्राप्तः श्रीरामस्तावता रावणः पश्चादागत्य तां सीतामेकाकिनीमपाहरत्, स्वनगरीं लङ्कां चानयत्, ततो विफलाशः श्रीरामः समाययौ, यत्र सीता निविष्टासीत्तत्र च तामनवलोकयन्महावियोगदुःखार्तः सा सीता केन नीतेति प्रलपन् स्वस्थीकृतो हनुमता, ततो वानरकुलमुपादाय स समुद्रं दृषद्भिर्बबन्ध, ततस्तां लङ्कां सर्वामपि स्वपुच्छाग्रन्यस्ताग्निनाऽदहत्, ततः श्रीरामोऽपि सलक्ष्मणः समागत्य तस्य रावणदैत्यस्य एकेनैव बाणेन दशापि शिरांसि छित्त्वा तन्मार्गेणैव सीतां स्वगृहे समानयत् । तत्र च सिन्धुसेतौ दृषद्बद्धे हनूमान् श्रीरामप्रशस्तिमलिखत् । तत्र केचित्सांयात्रिकाः स्वपोतमारुह्य क्रयविक्रयार्हवस्तुसमुदायमादाय समुद्रान्तः प्राविशन् तत्र च यथेप्सितं द्वीपं गत्वा बहूनि धनान्यर्जयित्वा समागच्छतां तेषां पोतवणिजां पोतः केन चिद्वायुना प्रेरितो

हनूमद्भिरचितसमुद्रसेतुमार्गे समागच्छत्, तत्र च हनूमद्भिरचितां श्रीरामप्रशस्तिं सिन्धुसेतौ दृष्ट्वा तां ते सांयात्रिका अलिखन्· तत्र च कानि चित्काव्यानि समुद्रकल्लोलैर्दृषदां पातनेन खण्डितान्यपि तानि तैर्लिखितानि, ततस्तस्याः खण्डप्रशस्तिरित्यभिधानं स्फुटतया तैश्च कृतं ततस्ते स्वपुरीमागत्य महतां संख्यावतां तां खण्डप्रशस्तिमदर्शयन्, तेपि सुन्दराखण्येतानि काव्यानीति विमृश्य तानि पूरयन्ति स्मेति संबन्धलेशः तत्र च खण्डप्रशस्तौ हनूमद्भिरचितायां श्रीरामस्य दशावतारा व्याख्येयाः ॥ तत्क्रमश्चायम् ।

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बौद्धः कल्की तथैव च ॥

तत्र ग्रन्थारम्भे आदौ मङ्गलं विधेयम्· यतस्तदभावे न विघ्नध्वंसः स्यात्, विघ्नध्वंसाभावे च न प्रारब्धशास्त्रपरिसमाप्तिरतः प्रारब्धशास्त्रसमाप्त्यर्थिना प्रथममवश्यं मङ्गलं विधेयम्, अन्वयव्यतिरेकाभ्यां मङ्गलस्य विघ्नध्वंसं प्रति कारणत्वसाधनात्, न च कृतेऽपि मङ्गले न शास्त्रसमाप्तिः कादम्बर्यादिवत्, अकृतेपि मङ्गले प्रमत्तानुष्ठितशास्त्रसमाप्तिरित्यन्वयव्यतिरेकाभ्यां व्यभिचाराच्च कारणता मङ्गलस्येति वाच्यम्, यतः कादम्बर्यादौ यत् कृतेऽपि मङ्गले न ग्रन्थसमाप्तिस्तत्र विघ्नानां बाहुल्यात् मङ्गलस्याल्पत्वाच्च समग्रा विघ्ना ध्वंसमापुः, यदि बहूनि मङ्गलान्यादौ कृतान्यभविष्यन् तदा सर्वेपि विघ्ना अध्वंसिष्यन्त, परं तानि बहुलानि न कृतानि ततस्तेऽपि सर्वे न ध्वस्ता इति यावच्च मङ्गलं कृतं तावान्विघ्नध्वंसस्तत्रापि जात एवेति । तथा, यच्चाकृतेऽपि मङ्गले प्रमत्तानुष्ठितशास्त्रसमाप्तिरित्युक्तं तदपि न चेतश्चमत्कारकारि, यतस्तेन पूर्वजन्मनि यद् विघ्नविरहदशायां ग्रन्थारम्भे मङ्गलं कृतमासीत्, तच्चादग्धदहनन्यायेन यदि तदानीं विघ्ना अभविष्यंस्तदा तान् मङ्गलमध्वंसिष्यत, परं तदानीं तदभावात्तन्मङ्गलमसमाप्तफलकं सत्तज्जन्मन्यकृतेऽपि मङ्गले विघ्नध्वंसं विधाय शास्त्रसमाप्तिं करोतीत्यन्वयव्यतिरेकाभ्यां व्यभिचाराभावात् ग्रन्थसमाप्तिं प्रति पारंपर्येण मङ्गलस्य कारणत्वादादौ विधेयम् ।

तत्र च श्री भगवतस्तत्कृत्यमेव नास्ति यन्मङ्गलरूपतया न स्यात्, अतो मत्स्याकृतेर्भगवतः शक्तिविशेषप्रकटनं मङ्गलरूपं तदेवादौ श्रीरामप्रशस्तिकारकः श्रीहनूमान् स्वश्रेयोर्थं मङ्गलमारभते ।

(२) वियत्पुच्छातुच्छोच्छलितजलगर्भे निधिरपा-
मपां नाथः पाथःपृथुलवदुःस्थो वियदभूत् ।
निधिर्भासामौर्वो दिनपतिरभूदौर्वदहन-
श्चलत्काये यस्मिन्त्स जयति हरिर्मीनवपुषा ॥

स हरिर्विष्णुर्मीनवपुषा मीनाकृत्या जयति सर्वोत्कर्षेण वर्तते दशावतारित्वाद्विष्णोः प्राक् मीनाकृत्या यद्दर्शनं तत्समुद्रशायित्वेन भगवतो मत्स्याकृतेरतीववल्लभत्वादिति । अथ मत्स्याकृतेर्हरेः शक्तिविशेषमाविष्कुर्वन्नाह । यस्मिन्हरौ चलत्काये चलन्कायः शरीरमस्येति तस्मिन् वियदाकाशं शून्यरूपं अपां निधिः समुद्रोऽभूद्बभूव, किंविशिष्टं वियत् पुच्छातुच्छोच्छलितजलगर्भम्, पुच्छेन लाङ्गूलेनातुच्छानि बहून्युच्छलितानि जलानि तानि गर्भे मध्यप्रदेशेऽस्येति । तथा· अपां नाथः समुद्रो वियदम्भोऽभूत्· कीदृगपां नाथः, पृथुलवदुःस्थः पाथसामम्भसां पृथुलो विपुलो यो लवस्तेन दुःस्थो दरिद्रोऽभूत् । पानीयरहितो बभूवेति भावः । तथा भासां निधिः श्रीसूर्य और्वो वडवानलोऽभूत् । यतः, पानीयं यदा मीनाकृत्या भगवतास्वपुच्छेनोच्छालितं तदा सर्वमपि सामुद्रं जलं वियति गतं तत्र च रविर्वर्तत एव स वडवानलाकृत्या मेने बुधैः । तथा चौर्वदहनो वाडवाग्निर्दिनपतिरभूत् । यतः, समुद्रे पानीयाभावात्समुद्रस्याकाशकल्पना, तत्र च वाडवाग्निः सूर्योपमेति भावः ॥ १ ॥

THE

VAIŚESHIKA APHORISMS

OF

KAṆÁDA.

THIRD BOOK, FIRST DAILY LESSON.

Examination of the mind.

आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावो
ऽभावश्च मनसो लिङ्गम् ॥ १ ॥

Aph. 1. Existence and non-existence of knowledge on contact of the soul with the objects of sense are the mark of the existence of an internal organ.

Distinction of real and fallacious arguments is the subject of the (preceding) daily lesson. In order now

[1] हेतुहेत्वाभासविवेक आह्निकार्थः। इदानीमात्मपरीक्षाशेषं वर्तयिष्यन् उद्देशक्रमलङ्घनेन मनःपरीक्षामवतारयन्नाह । मनोगतिमात्मनो लिङ्गं वक्ष्यति तद् यदि मनो ज्ञानकरणत्वेन मूर्तत्वेन च परीक्षितं भवति तदा यत्प्रेरितं मन इन्द्रियान्तरादभिमतविषयग्राहिणि इन्द्रिये सम्बध्यते स आत्मेति सिद्धं भवतीत्येतदर्थं क्रमलङ्घनम् । आत्मेन्द्रियार्थसन्निकर्षे सति यस्मिन् इन्द्रियसन्निकृष्टे ज्ञानस्य भाव उत्पादः असन्निकृष्टे ज्ञानस्याभावो ऽनुत्पादस्तन्मन इत्यर्थः ननु मनोवैभवे ऽपि करणधर्मत्वादेव ज्ञान[illegible]पद्यमुपपद्यते किञ्च मनो विभु विशेषगुणशून्यद्रव्यत्वात् कालवत् ज्ञानासमवायिकारणसंयोगाधारत्वादात्मवत् स्पर्शात्यन्ताभाववत्त्वादाकाशवदित्यादि वैभवसाधकं प्रमाणमिति चेत् मैवं यदि मनो विभु स्यात् तदा सर्वेन्द्रियसन्निकृष्टात् ततः सर्वेन्द्रिय[illegible] स्यात् कार्यविरोधाच्चैवमिति चेन्न न हि सामग्री विरोधाविरोधमाकलयति येन चाक्षुषत्वरासन-

to bring the investigation of soul to a conclusion, by a breach of the order of enunciation (i. e. of the order in which the substances were enumerated), an examination of mind (or the internal organ] is instituted. It will be shown that mental movement is the mark of the soul's existence. If, then, the mind be examined as being an instrument of cognition, and as having form, then soul is proved to exist as that by which the internal organ is actuated when it is brought into connection with an organ of sense apprehensive of its proper object in consequence of the other [and internal ?] organ. This is the reason of the breach of the order [of enumeration.] That is mind which, there being contact of the soul and an object of sense, being in connection with an organ of sense, knowledge exists or comes into being, and which not being in connection with an organ of sense knowledge does not exist, or does not come into being. It may be urged that though mind is an all-pervading substance, all cognition is not necessarily simultaneous, because of its property as an instrument; further, that mind is an all-pervading substance, because, like time, it is a substance void of any peculiar attribute; because, like soul, it is the substratum of conjunction with the non-cohesive cause of knowledge; because, like ether, it possesses absolute negation of sound; and so forth. If this argument to prove that it is an all-pervading substance be adduced, we reply that it is not so, for were the mind an all-pervading substance, then as it would be in contact with all the sensual organs, cognition would be one only and composed of all sensation. If it be replied that such is not the case because there is a contrariety among the effects, we deny this, for the instrument is not concerned with contrariety or non-contrariety, so that one should be apprehensive of a contrariety between visibility and sapidity and the rest, or that there should be a variegated form, as there is a variegated colour. If you object that there is [such simultaneous and complex sensation] in the case of eating a long ear of corn [which is at once seen and tasted], we deny this, for in that case also confusion is observed. If you ask how it is that you are conscious of simultaneous perceiving colour, taste, smell, and touch, we reply that neither is this the case, for this is merely a sense of simultaneity in five cognitions presented in memory and produced [successively] by the rapidly shifting internal organ. If it be urged that the confusion depends on the property of the instrument, we deny this, for the answer has been already stated. If it be maintained that the confusion depends on the desire of knowing, we deny this, for on that supposition it would follow that when there was a desire to know all there would be a total presentation of all objects, whereas the only result of a desire to know is connection of the internal organ with the sensual organ percipient of its proper object. Inasmuch, therefore, as non-simultaneity of cognition would be otherwise impossible, the mind is proved to possess a minimum of divisibility. U.

स्वादिविरोधाय बिभ्येत् चित्ररूपवत् चित्राकारमेव वा स्यात् भवत्येव दीर्घशष्कुलीभक्षणस्थले इति चेन्न तत्रापि व्यासङ्गदर्शनात् तर्हि रूपरसगन्धस्पर्शान् युगपत् प्रत्येमीति कथमनुव्यवसाय इति चेन्न शीघ्रसञ्चारिमनोजनितेषु पञ्चसु स्मृत्युपनीतज्ञानेषु यौगपद्याभिमानात् व्यासङ्गो ऽपि करणधर्माधीन इति चेन्न उक्तोत्तरत्वात् बुभुत्साधीनो व्यासङ्ग इति चेन्न सर्वबुभुत्सायां सर्वविषयकसर्वावगाहप्रसङ्गात् बुभुत्साया अपि अभिमतार्थग्राहीन्द्रियमनःसम्बन्धमात्रफलकत्वात् तस्माज्ज्ञानायौगपद्यान्यथानुपपत्त्या सिध्यति अणु मनः ॥

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ २ ॥

Aph. 2. Its substantiality and eternity are explained by air.

[1] It may be urged that the internal organ which is proved to exist by the inference that a sense of pleasure &c. is effected by an instrument because it is an action, like the sense of colour &c., or because simultaneous cognition is impossible, is proved to exist because it is an instrument: whence, then, its substantiality and eternity? It is therefore stated that, as an aerial atom inferred to exist by reason of the compound substance [air] is a substance because it possesses qualities and actions, so mind which is inferred from the impossibility of simultaneous cognitions is a substance because it possesses qualities. For without conjunction with the organs of sense it would not be productive of cognition, so that there would be no possession of qualities. Moreover presentation of pleasure &c. must have a sensitive organ as its instrument, because, like the presentation of colour &c., it is a presentation. Therefore mind is proved to exist as an organ. The essence of an organ is the being a substratum of conjunction of the mind with the cause of a cognition. It is therefore established without any difficulty that mind is a substance. Its eternity is proved by its having no substratum; and that it has no substratum follows from the absence of any warrant in imagining constituent portions of it. U.

[1] ननु सुखाद्युपलब्धिः करणसाध्या क्रियात्वात् रूपोपलब्धिवदित्यनुमानात् युगपज्ज्ञानानुपपत्त्या वा यन्मनः सिद्धं तत्करणतया तथा च तस्य द्रव्यत्वं नित्यत्वञ्च कुत इत्यत आह । यथा ऽवयविद्रव्यानुमितो वायुपरमाणुर्गुणवत्त्वात् क्रियावत्त्वाच्च द्रव्यम् तथा युगपज्ज्ञानानुपपत्त्या ऽनुमितं मनो गुणवत्त्वाद्द्रव्यं न हि तस्य इन्द्रियसंयोगान्तरेण ज्ञानोत्पादकत्वं येन गुणवत्त्वं न स्यात् किञ्च सुखादिसाक्षात्कार इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदितीन्द्रियत्वेन मनः सिद्धम् इन्द्रियत्वं ज्ञानकारणमनःसंयोगाश्रयत्वमित्ययत्नसिद्धमेव मनसो द्रव्यत्वम् नित्यत्वञ्च तस्यानाश्रितत्वात् तस्यावयवकल्पनायां प्रमाणाभावादनाश्रितत्वमिति ॥

Digitized by Google

[2] As there is in an aerial atom substantiality inasmuch as it possesses originative conjunction and other attributes; and eternity inasmuch as there is no warrant for assuming that it has constituent parts; so the substantiality and eternity of the mind follow from its possession of conjuuction productive of cognition and its possession of other attributes, and from absence of proof of its production and destruction. V.

प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम् ॥ ३ ॥

Aph. 3. Because of non-simultaneity of volitions, and non-simultaneity of cognitions [mind] is one [in each body.]

[3] A decision is stated with reference to the doubt whether mind be one in individual bodies or more than one. The words 'minds' and 'in each body' are to be supplied. If there were in each single body many internal organs or minds, there would be simultaneity of cognitions and volitions. The opinion that many volitions are simultaneously exerted, since we see simultaneous action in the arms, legs, fingers, and toes of a dancer, is erroneous, for this arises merely from the rapid transition of the internal organ. U.

[4] The unity of the mind in individual bodies is established. When there is conjunction between the mind and any member of the body, a volition is exerted with restriction to that member, and not with restriction to other members. It must not, therefore, be said that the mind being manifold two volitions are [simultaneously] exerted because conjunction between the mind and each of two members at the same time is possible; and that by restriction to the ten fingers and ten toes twenty acts of volition are produced at the same time [for otherwise how would the corresponding actions be produced?]; for the conviction of simultaneity in those actions, as of that in the scattering of the hundred petals of a lotus, is erroneous, inasmuch as they are produced in successive moments merely by the rapid transition of the mind. So, if the internal organ were manifold, then since each internal organ might be in conjunction with simultaneous sensations of smell, taste, &c. simultaneous production of cognitions derived from the organs of smell, taste, &c., would be possible. Mind, therefore, [since this is not the case] is in each individual body one only and not manifold. If it be objected that the internal organ must necessarily be manifold since we observe action in the two parts of a scorpion and the like when cut in two, we reply that this is not the case, for such action is possible through the mere accession of a new internal organ by the influence of fate; and because multiplicity of mind cannot be allowed owing to the authoritativeness of [the argument from] non-simultaneity of volition and non-simultaneity of cognition. Some have held that simultaneity and non-simultaneity of volitions to cognitions are the result of the contraction and expansion of the inner organ after the manner of a tortoise and an elephant's trunk. This is not satisfactory for there is great complication in the assumption of endless particles, of their previous and subsequent non-existences, and of their endless atoms.

Existence of Soul proved.

प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्च चात्मनो लिङ्गानि ॥ ४ ॥

Aph. 4. The ascending and descending vital airs, the opening and closing of the eyes, life, motions of the mind, affections of the other organs of sense, pleasure and pain, desire and aversion, and volition are marks of the existence of Soul.

[1] The completion of the remainder of the inqury into

---

[2] यथा वायवीयपरमाणौ आरम्भकसंयोगादिरूपगुणवत्त्वाद् द्रव्यत्वं तदवयवकल्पनायां प्रमाणाभावाच्चित्यत्वं तथा ज्ञानजनकसंयोगादिरूपगुणवत्त्वात् तदुत्पादविनाशयोः प्रमाणाभावाच्च मनस्यपि द्रव्यत्वं नित्यत्वञ्चेत्यर्थः ॥

[3] तत् किं प्रतिशरीरमेकमनेकं वेति सन्देहे निर्णायकमाह। मनः प्रतिशरीरमिति शेषः यद्येकैकस्मिन्नपि शरीरे बहूनि मनांसि स्युस्तदा ज्ञानप्रयत्नानां यौगपद्यं स्यात् यत्तु नर्तकीकरचरणाङ्गुलीषु युगपत् कर्मदर्शनाद्युगपदेव बहवः प्रयत्ना उत्पद्यन्ते इति मतं तदयुक्तं मनसः शीघ्रसञ्चारादेव तदुपपत्तेः ॥

[4] प्रतिशरीरं मनस एकत्वं व्यवस्थापयति। यदङ्गेन मनसः संयोगो यदा भवति तदा तदङ्गावच्छेदेन प्रयत्न उत्पद्यते नान्यावच्छेदेन एवञ्च मनसो नानात्वे एकदा अङ्गद्वयेनापि एकैकस्य मनसः संयोगसम्भवात् प्रयत्नद्वयमुत्पद्यते न च विंशत्यङ्गुल्यवच्छेदेन एकदैव विंशतिः प्रयत्ना उत्पद्यन्ते कथमन्यथा एकदैव तेषां क्रिया उत्पद्यन्ते इति वाच्यम् उत्पलपत्रशतव्यतिभेद इव तासु यौगपद्यप्रतीतेर्भ्रमरूपत्वात् मनस आशु सञ्चारादेव भिन्नभिन्नक्षणेषु तासामुत्पादात् एवं मनसो नानात्वे युगपदेव घ्राणरसनादिभिः सह तेषामेकैकस्य संयोगसम्भवात् घ्राणजरासनादीनामपि युगपदुत्पादापत्तिरितः प्रतिशरीरं मन एकमेव न तु नानेत्यर्थः। ननु छिन्नवृश्चिकादिखण्डद्वय एव क्रियादर्शनान्मनसो नानात्वमावश्यकमिति चेन्न तदानीमदृष्टवशेन मनोऽन्तरसञ्चिवेशादेव तत्सम्भवात् अन्यत्र प्रयत्नायौगपद्यस्य ज्ञानायौगपद्यस्य च प्रामाणिकत्वेन मनसो नानात्वस्वीकारस्य कर्तुमशक्यत्वादिति। कूर्मशुण्डादिवन्मनसः सङ्कोचविकाशाभ्यामेव प्रयत्नानां ज्ञानानाञ्च यौगपद्यायौगपद्ययोर्निर्वाहः ऐकमेवैकस्मिन् शरीरे मन इति केचित् तदपि न मनोरमम् अनन्तावयवानां तत्प्रागभावानां तत्प्रध्वंसानाम् अनन्ततत्परमाणूनाञ्च कल्पने महागौरवादिति संक्षेपः ॥

[1] इदानीं क्रमलङ्घनप्रयोजनमादर्शयन्नेवात्मपरीक्षाशेषं वर्तयिष्यन्नाह प्रसिद्धिर्ज्ञानमेव केवलमात्मनो लिङ्गमिति न मन्तव्यं प्राणादयोऽपि सन्ति आत्मनो लिङ्गानि तथाहि शरीरान्तश्चारिणि समीरणे प्राणापानलक्षणे ऊर्ध्वाधोगती उत्क्षेपणावक्षेपणे मुशलादाविव प्रयत्नं विना ऽनुपपद्यमाने यस्य प्रयत्नाद्भवतः स नूनमात्मा न हि तिर्यग्गमनस्वभावस्य वायोरेवं स्वभावविपर्ययो विना प्रयत्नात् न च विरुद्धदिक्क्रिययोर्वाय्वोः सलिलयोरिवोर्ध्वगतिः स्यादिति वाच्यम् एवं सत्यूर्ध्वगमनमेव स्यान्न त्वधोगमनं फूत्कारादौ वा तिर्यग्गमनम् तथा चास्ति कश्चित् यः प्रयत्नेन वायुमूर्ध्वमधो वा प्रेरयति सुषुप्तिदशायां कथं प्राणापानयोरूर्ध्वाधोगती इति चेत् तदानीं योग्यप्रयत्नाभावे ऽपि प्रयत्नान्तरस्य सद्भावात् स एव जीवनयोनिः

Digitized by Google

the soul is commenced; showing the purpose of the breach of the order [in which the substances were enumerated.] It is not to be supposed that consciousness or knowledge alone is the mark of the existence of the Soul. The ascending vital air and the rest also are marks of the existence of the soul. For that is soul in consequence of the volition of which the upward and downward motions in the air moving within the body, and known as the upward and downward vital air, take place, not being produced otherwise than by volition, just as the throwing upwards and downwards [of a pestle &c.] in a mortar &c., are not produced without volition. For the nature of this air which is to move horizontally could not be thus changed except by volition. Nor can it be objected that two airs with differently directed motion may like two pieces of [confluent] water have an upward motion. Were this the case there would be an upward but not a downward motion, or in exsufflations and the like there would be horizontal motion. There is then a being, who, by his volition, impels the vital air upwards or downwards. It is no valid objection to ask how there could be upward and downward motions of the vital air in a condition of deep sleep; for at that time though volition proper does not exist, there exists another kind of volition, which is called volition the source of vitality. In like manner the opening and closing of the eyes causes us to infer a ruler of the body, for closing the eyes is an action productive of conjunction of the eyelids, and the opening of the eyes is an action productive of disjunction of the eyelids. These two actions being constantly manifested without any visible cause such as motive force, are not produced otherwise than by volition. As the dancing of a doll depends upon some one's volition, so also is the gesticulation of the eyelids. Therefore a being who exerts volition is inferred. Similarly vitality is also a mark of the existence of the soul, for by the word life the effects of vitality such as growth, recovery of what is hurt or broken &c., are indicated by implication. For as the owner of a house builds up the broken edifice or enlarges a building which is too small, so the ruler of the body effects by food &c., the increase or enlargement of the body which is to him in the stead of a habitation, and with medicine and the like causes what is wounded to grow again, and broken hands or feet to grow together again. Thus like the master of a house, is proved a guardian of the body. In a like manner the motions of the mind are also a mark of the existence of the soul. For it has been proved in the foregoing section that mind is possessed of form and of indivisibility. Its appliance to an organ of sense cognisant of its proper object depends on desire and effort. The desire and effort which actuate the internal organ are inferred to be identical with the soul. This may be exemplified by a child standing in a corner of a room, who throws a ball or a handful of red powder about the room. It may be objected that the doll, the master of the house, and the child are not other than body that they should be adduced as examples and that it is in the body that consciousness resides, inasmuch as the body is an object of sense of self, for the conviction of being pale, stout, and the like is produced by community of substratum with the sense of personal identity. Moreover, (it may be urged), that which was experienced in childhood is remembered in youth or in old age, whereas in the case

---

प्रयत्न इत्युच्यते एवं निमेषोन्मेषावपि शरीरस्याधिष्ठातारमनुमापयतः तथाहि निमेषस्तावत् अक्षिपक्ष्मणोः संयोगजनकं कर्म उन्मेषस्तयोरेव विभागजनकं कर्म एते च कर्मणी नोदनाभिघातादि दृष्टकारणमन्तरेण निरन्तरमुत्पद्यमाने प्रयत्नं विना नोत्पद्येते यथा दारुपुत्रकनर्त्तनं कस्यचित् प्रयत्नात् तथा ऽक्षिपक्ष्मनर्त्तनमपि तेन प्रयत्नवाननुमीयते एवं जीवनमप्यात्मलिङ्गं तथाहि जीवनपदेन लक्षणया जीवनकार्य्यं वृद्धिक्षतभग्नसंरोहणादि लक्षयति तथाच यथा गृहपतिर्भग्नस्य गृहस्य निर्म्माणं करोति लघीयो वा गृहं वर्द्धयति तथा देहाधिष्ठाता गृहस्थानीयस्य देहस्याहारादिना वृद्धिमुपचयं करोति क्षतञ्च भेषजादिना प्ररोहयति भग्नञ्च करचरणादि संरोहयति तथाच गृहपतिरिव देहस्याप्यधिष्ठाता सिध्यतीति एवं मनोगतिरप्यात्मलिङ्गं तथाहि मनस्तावन्मूर्त्तमणु चेति पूर्वप्रकरणे साधितम् तस्य चाभिमतविषयग्राहिणि इन्द्रिये निवेशनम् इच्छाप्रणिधानाधीनम् तथा च यस्येच्छाप्रणिधाने मनः प्रेरयतः स आत्मेत्यनुमीयते यथा गृहकोणावस्थितो दारकः कन्दुकं लाक्षागुटकं वा गृहाभ्यन्तर एव इतस्ततः प्रेरयति ननु दारुपुत्रनर्त्तयिता गृहपतिर्दारको वा न शरीरादन्यो यो दृष्टान्तः स्यात् किञ्च शरीरमेव चैतन्याश्रयः अहङ्कारास्पदत्वात् भवति हि गौरोऽहं स्थूलोऽहमित्याद्यहङ्कारसामानाधिकरण्ये न प्रत्ययः यत्तु बाल्येऽनुभूतं यौवने वार्द्धके वा स्मरति तत्र चैत्रमैत्रयोश्शरीरभेदेऽपि स्मरणं न स्यात् नान्यदृष्टं स्मरत्यन्य इति तत्र चैत्रमैत्रयोर्भिन्नसन्तानत्वेन प्रतिसन्धानं माऽस्तु बाल्यकौमारभेदेऽपि सन्तानैकत्वात् कार्य्यकारणभावेन प्रतिसन्धानमुपपत्स्यत इति तत्र ब्रूमः पित्राऽनुभूतस्य पुत्रेणापि स्मरणप्रसङ्गः तत्र शरीरभेदपक्षोबाधक इति चेत् वृद्धेन बालशरीरात्भेदेनैव स्वशरीरस्य ग्रहात् प्रतिसन्धानानुपपत्तेः अनुपलब्धपितृकस्य बालस्य शरीरभेदाग्रहस्यापि सत्त्वात् मम शरीरमिति ममकारसामान्येनाहङ्कारस्य भानात् ममात्मेत्यत्रापि तथैति चेन्न तत्र ममकारस्यौपचारिकत्वात् राहोःशिर इतिवदभेदेऽपि षष्ठ्युपपत्तेः हिंसादिफलञ्च कर्त्तारं न स्यात् शरीरस्यान्यान्यत्वात् पातकमिच्छतोऽभूतचैतनिकस्य कृतहानमकृताभ्यागमश्च दोष इति दिक् इन्द्रियान्तरविकारात् खल्वपि दृश्यते हि नागरङ्गस्य चिरं बिल्वस्य वा रूपविशेषसहचारितं रसविशेषमनुभूय पुनस्तादृशं फलमुपलभमानस्य रसगर्द्धिप्रवर्त्तितो दन्तोदकसंप्लवः स च नाम्लरसानुमितिमन्तरेण अनुमितिर्न व्याप्तिस्मृतिमन्तरेण सा च न संस्कारं विना स च न व्याप्त्यनुभवमन्तरेण स च न भूयोदर्शनमन्तरेणेति इयं ज्ञानपरम्परा नैकं कर्त्तारमन्तरेण कार्य्यकारणभूता सम्भवतीति तथाच गौतमीयं सूत्रम् इन्द्रियान्तरविकारात् इति सुखादयश्च ज्ञानवदेवात्मलिङ्गानि द्रष्टव्याः तथाहि सुखादिकं क्वचिदाश्रितं द्रव्याश्रितं वा कार्य्यवस्तुत्वात् गुणत्वाद्वा रूपादिवदितीतरबाधसहकृतं सामान्यतोदृष्टमेव अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं विषयीकरोति नहि पृथिव्याद्यष्टकानाश्रिता इच्छा द्रव्याश्रितेति प्रतिज्ञा अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं प्रकारमनादाय पर्य्यवस्यति यत्र तु प्रथमं न बाधावतारस्तत्राष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं व्यतिरेकिसाध्यमिति विभागः व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति तु तुच्छम् येन विना प्रतीतिर्न पर्य्यवस्यति तस्यैव तत्र प्रकारत्वात् अन्यथा द्व्यणुकं कार्य्यानाश्रितं सत् क्वचिदाश्रितम् अस्पर्शवत्त्वादित्याद्यावकार्य्याश्रितत्वप्रकारिकाऽनुमितिर्न स्यात् ॥

of separate bodies as those of Chaitra and Maitra there would be no act of memory, as it is said, One man remembers not that which another saw. In the latter case there will be no recollection because Chaitra and Maitra are the offspring of different parents; but, though childhood and youth be different, the act of recollection will take place in the order of cause and effect, because there is but one individual. To this argument we reply that it would follow that the son would remember what was experienced by the father. If it be rejoined that perception of difference of body prevents this, we reply that an old man, by having a body different from that which he had as a child, through perception of his body would be incapable of remembering [what he experienced as a child]. A child that never knew his father has no perception of difference of body. The notion 'my body' as generally in the case of the word 'my,' belongs to the sense of personal identity. If you reply that so also is the notion 'my soul,' we reply that such is not the case, for the word 'my' is usual tropically, since the genitive may be used where no difference is implied as in the case of 'Ráhu's head' [where Ráhu and Ráhu's head are one and the same thing]. Moreover on your supposition there could be no result of injuries and the like [i. e. no rewards or punishments] to the doer, for the body is constantly different [in the transmigratory state]; whereas the harm done by one who has consciousness, and the result unfulfilled, are an objection. It is also inferred from affections of the other organs [that there is a soul], for after experiencing the particular taste which accompanies the particular colour of an orange or *chira-villa* fruit, on again observing such fruit, there arises in one desirous of tasting it a watering in the mouth. This can only take place by an inference respecting the acid flavour, the inference only by remembering the invariable co-existence [of the colour and taste,] the remembrance only by a permanent impression *(Sanskára)*, the permanent impression only by observation of the universal co-existence, and observation only by seeing it repeatedly, and this series of cognitions in the order of cause and effect is impossible unless there be one and the same agent in all. Accordingly the aphorism of Gautama, 'From the affection of other organs of sense.' Pleasure and the like are also to be regarded, like knowledge, as marks of the existence of the soul. For pleasure and the like must inhere in something or have some substance as their substratum, because it is a thing produced or a quality like colour &c. Hence an inference by analogy *(sámányato drishṭam)*, accompanied by a residual inference *(itara-bádha)*, takes for its subject inherence in a substance other than eight substances. For the proposition that desire which does not inhere in earth and seven other substances, inheres in a substance, is incomplete unless it assumes as its matter inhesion in a substance other than those eight substances. But if the residual method be not first employed, inhesion in a substance other than eight substances will have to be proved by negative conditional reasoning, and thus the division will be made. It is absurd to say that inference has for its matter only that which is essential to universal co-existence, for that is the matter of conviction without which the conviction is incomplete. Otherwise there could be no inference having for its matter inhesion in what is uncaused, such as, an aggregate of two atoms, which does not inhere in anything caused [or produced], inheres in something, because it is composite. U.

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ५ ॥

Aph. 5. Its substantiality and eternity are explained by air.

[1] It may be said, Granted that the soul is perdurable, but why is it eternal, and why a substance? It is therefore stated, that as there is no warrant for assuming that an aerial atom has parts, and therefore it is eternal so also is soul eternal; and that as an aerial atom is a substance because it possesses attributes, so also is soul a substance. U.

THE APHORISMS

OF THE

YOGA PHILOSOPHY,

OF

PATAÑJALI.

(Continued from p. 225.)

a. Having stated the external Siddhis, he (now) proceeds to explain the internal ones.*

नाभिचक्रे कायव्यूहज्ञानम् ॥ ३० ॥

Aph. 30. A knowledge of the particular structure of the body (arises in an ascetic who performs his restraint) with regard to the circle of the navel.

b. The particular structure of the body; that is the constitution of the essential humour (Rasa), the excretion (Mala), the principle (Dhátu) and veins &c. of the body:—a knowledge about this structure arises in an ascetic by his performing restraint with regard to the circle of the navel situated in the body called Nábhi

[1] ननु सिध्यतु आत्मा स्थिरः सतु नित्य इति कुतः कुतश्च द्रव्यमित्यत आह यथा वायुपरमाणोरवयवकल्पनायां न प्रमाणमतो नित्यत्वं तथात्मनोऽपि यथा गुणवत्त्वाद्वायुपरमाणुर्द्रव्यं तथात्माऽपीत्यर्थः ॥

* बाह्याः सिद्धीः प्रतिपाद्यान्तरीः प्रतिपादयितुमुपक्रमते ।

Digitized by Google

which is endowed with sixteen angles. The true meaning of this is that the circle of the navel being situated in the middle of the body is a root or origin of veins &c. which are extended throughout (the body), and consequently by performing restraint with regard to the circle of the navel, the whole constitution of the body becomes exactly known to the ascetic. *

a. He (now) states another Siddhi.†

कण्ठकूपे क्षुत्पिपासाविनिवृत्तिः ॥ ३१ ॥

Aph. 31. A cessation of hunger, thirst, &c. (takes place in an ascetic by performing his restraint) with regard to the well of (his) throat.

b. There is a place like a pit below the tongue in the throat (which is called) the well of the throat; a contact of the vital airs with this well causes the manifestation of hunger, thirst, &c. And these inclinations cease in an ascetic who performs a restraint with regard to that (well), *i. e.* a superhuman faculty of this nature (is invariably at the command of an ascetic) on account of his brooding upon this stream (*i. e.* the well of the throat which is situated) below the uvula. ‡

a. He (now) states another Siddhi. §

कूर्मनाड्यां स्थैर्यम् ॥ ३२ ॥

Aph. 32. A firmness (of mind takes place when an ascetic performs his restraint) with regard to the vein (called) kúrma (tortoise).

b. A firmness of mind is produced when the ascetic performs his restaint with regard to the vein called kúrma which is situated below the well of the throat:—that is fickleness of mind does not take place when the ascetic (by the efficacy of his meditation) enters the spot (i. e. the vein) or firmness is produced in the body (of the ascetic) that is, it cannot be moved by anything. ||

a. He (now) states another Siddhi. ¶

मूर्द्धज्योतिषि सिद्धदर्शनम् ॥ ३३ ॥

Aph. 33. (The ascetic) sees siddhas the divine personages or spirits (when he performs his restraint) with regard to the light—Jyotis—of the head.

---

* शरीरवर्ति नाभिसंज्ञकं यत्षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः कायगतो योऽसौ व्यूहो विशिष्टरसमलधातुनाड्यादीनामवस्थानं तत्र ज्ञानमुत्पद्यते । इदमुक्तं भवति । नाभिचक्रं शरीरस्य मध्यवर्ति सर्वतःप्रसृतानां नाड्यादीनां मूलभूतमतस्तत्र कृतावधानस्य समग्रः सन्निवेशो यथावद्भाति ।

† सिद्ध्यन्तरमाह ।

‡ कण्ठे गले कूपः कण्ठकूपो जिह्वातोऽधस्तात् कूप इव कूपो गर्ताकारः प्रदेशः प्राणादेर्यत्संस्पर्शनात्क्षुत्पिपासादयः प्रादुर्भवन्ति तस्मिन् कृतसंयमस्य योगिनः क्षुत्पिपासादयो निवर्तन्ते घण्टिकाधस्तात्स्रोतस्यवधार्यमाणे तस्मिन्भाविते भवत्येवंविधा सिद्धिः ।

§ सिद्ध्यन्तरमाह ।

|| कण्ठकूपस्याधस्ताद्या कूर्माख्या नाडी तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्पद्यते । तत्स्थानमनुप्रविष्टस्य चञ्चलता न भवतीत्यर्थः । यदि वा काये स्थैर्यमुत्पद्यते न केनचित् स्पन्दयितुं शक्यत इत्यर्थः ।

¶ सिद्ध्यन्तरमाह ।

---

b. An aperture called Brahmarandhra in the skull (of e[illegible] body) is a light (Jyotis) on account of its being a reservoir of light:—as the spreading light of a gem situated in the inside of a house collects in the key-hole of the door, so in the same manner the luminousness of sattva of mind, being spread collects in the aperture called Brahmarandhra of the skull. (Therefore) when the ascetic performs his restraint with regard to this aperture or light (as just expounded), he catches sight of the divine spirits who dwell in the (wide) space between the earth and sky and who cannot be seen by any other beings (but the ascetic); that is he secs and converses with them. *

a. He (now) states another expedient for omniscience.†

प्रातिभाद्वा सर्वं सर्वनिमित्तानपेक्षम् ॥ ३४ ॥

Aph. 34. Or (the ascetic disregarding all other instrumental causes (knows) every thing from (only) Prátibhá (a knowledge called Táraka.)

b. A right knowledge instantly produced from (the operations of) mind only is called Pratibhá, and a restraint being performed with regard to this, Táraka (i. e. preserver) a knowledge antecedent to a discriminating faculty of mind Vivekakhyáti, arises. As the twilight appears before sun-rise, so Táraka, a knowledge concerning all things, manifests (itself in the ascetic) before the Vivekakhyáti. (That is, when this is the case, the ascetic, having then no need of any other restraint, knows every thing.

a. He (now) states another Siddhi.‡

हृदये चित्तसंवित् ॥ ३५ ॥

Aph. 35. A knowledge about mind—Chitta—(arises in an ascetic, when he performs his restraint) with regard to the internal organ—Hṛidaya.

b. "Hṛidaya" a particular part of the body :—in this part, there is the site of the internal organ within a small inverted lotus, and when the ascetic performs his restraint with regard to that site, a knowledge of his own mind as well as that of others arises in him, that is he knows all fancies of his own mind as well as the passions &c, of the minds of others. §

---

* शिरः कपाले ब्रह्मरन्ध्राख्यं छिद्रं प्रकाशाधारत्वात् ज्योतिः । यथा गृहाभ्यन्तरस्थस्य मणेः प्रसरन्ती प्रभा कुञ्चिकाविवरप्रदेशे घट्टते तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृतस्तत्र संपीडितत्वं भजते । तत्र कृतसंयमस्य ये द्यावापृथिव्योरन्तरालवर्तिनः सिद्धा दिव्याः पुरुषास्तेषामितरप्राणिभिरदृश्यानां दर्शनं भवति तान् स पश्यति तैश्च संभाषत इत्यर्थः ।

† सर्वज्ञत्व उपायान्तरमाह ।

‡ मनोमात्रजन्यमविसंवादकं द्रागुत्पाद्यमानं ज्ञानं प्रतिभा तस्यां संयमे क्रियमाणे प्रातिभं विवेकख्यातेः पूर्वभावि तारकं ज्ञानमुदेति । यथोदेष्यति सवितरि पूर्वं प्रभा प्रादुर्भवति तद्वद्विवेकख्यातेः पूर्वं तारकं सर्वविषयकं ज्ञानमाविर्भवति । तस्मिन् सति संयमान्तरानपेक्षः सर्वं जानातीत्यर्थः ।

§ सिद्ध्यन्तरमाह ।

|| हृदयं शरीरस्य प्रदेशविशेषस्तस्मिन्नधोमुखस्वल्पपुण्डरीकाभ्यन्तरेऽन्तःकरणस्य स्थानं तत्र कृतसंयमस्य स्वपरचित्तज्ञानमुत्पद्यते स्वचित्तगताः सर्वा वासनाः परचित्तगतांश्च रागादीन् जानातीत्यर्थः G. D. Ś.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 50. Benares, July 1st, 1870. Vol. V.

॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

अहंकृतेरेवात्मत्वमिति मन्यमानस्तस्य विविक्तत्वमाचिष्यति ।

(११६) नात्माभासत्वसिद्धिश्चेदात्मनो ग्रहणात् पृथक् ॥ ५२६॥
मुखादेश्च पृथक् सिद्धिरिह त्वन्योन्यसंश्रयः ।

नात्मेति । आत्मनः केवलस्य ग्रहणादवभासनात् पृथगेवात्माभासत्वस्य सिद्धिश्चेन्न भवेदाभासावभासेनैवात्मभासो भवेत्तदा इह त्वस्मिन्मते ऽन्योन्यसंश्रय इति योजना । दृष्टान्तश्च विषम इत्याह । मुखादेरिति । दर्पणादिगताभासव्यतिरेकेण ग्रीवास्थत्वेन मुखस्य सदा सिद्धिरस्तीति न तत्रान्योन्यसापेक्षतेत्यर्थः ॥ ११६ ॥

अन्योन्याश्रयमेव स्पष्टयति ।

(११७) अध्यस्तस्य पृथक् सिद्धावाभासस्य तदीयता ॥ ५३०॥
आभासस्य तदीयत्वे ह्यध्यस्तव्यतिरिक्तता ।

अध्यस्तस्येति । तथा चाहमिति प्रतीयमानोऽहंकृत्यात्मक एव चेतन आत्मेति युक्तमित्यभिप्रायः ॥ ११७ ॥

अहंकृत्यात्मकस्यान्तःकरणस्य स्वप्ने दृश्यत्वेनैव व्यवस्थितत्वात्तदाभासनिरपेक्ष एवात्मा तत्र सिद्ध इति नोक्तदृष्टान्तासङ्गतिरिति परिहरति ।

(११८) नैवं स्वप्ने पृथक् सिद्धेः प्रत्ययस्य दृशेस्तथा ॥ ५३१ ॥
रथादेस्तच्च शून्यत्वात्प्रत्ययस्यात्मना ग्रहः ।

नैवं स्वप्न इति । प्रत्ययस्यान्तःकरणस्य दृशेरात्मनश्च स्वप्नावस्थायां तथा मुखतत्प्रतिबिम्बवत्पृथगन्योन्यनिरपेक्षतयैव सिद्धेरित्यर्थः । कुत एतदित्यपेक्षायामाह । रथादेरिति । न तत्र रथा न रथयोगा न पन्थानो भवन्तीत्यादिना स्वप्ने रथादिदृश्यराहित्यस्य श्रूयमाणत्वात् प्रत्ययस्यैव रथाद्याकारमापन्नस्य तत्रात्मना स्वप्रकाशचैतन्येन ग्रहः, तथा चात्मा प्रत्ययसंवलनविनिर्मुक्तः स्वप्रकाशतया भासमान एव स्वप्ने विषयाकाराकारितप्रत्ययसाक्षी सिद्ध इत्यर्थः ११८ ॥

स्वप्नपर्यालोचनया चिदात्मनः प्रत्ययाद्विवेकं दर्शयित्वा जाग्रत्स्वभावालोचनयापि तमाह ।

(११९) अवगत्या हि संव्याप्तः प्रत्ययो विषयाकृतिः ॥ ५३२ ॥
जायते स यदाकारः स बाह्यो विषयो मतः ।

अवगत्या हीत्यादिना । विषयस्याकृतिरिवाकृतिर्यस्य, अथवा विषयस्याकृतिरेवाकृतिर्यस्य स विषयाकृतिरिति विग्रहः । आत्मचैतन्यव्याप्ते विषयाकारे प्रत्यये जायमाने तस्मिन् यो विषयाकारः स बाह्यो विषय इष्ट इत्यर्थः ॥ ११९ ॥

किं च ।

(१२०) कर्मेप्सिततमत्वात्स तद्वान्कार्ये नियुज्यते ॥ ५३३ ॥
आकारो यत्र चार्प्येत करणं तदिहोच्यते ।

कर्मेप्सितेति । स बाह्यो विषय ईप्सिततमत्वात्कर्तुः साध्यतयोद्दिश्यत्वेनेष्टतमत्वात्कर्म भवति तद्वांस्तद्विषयेच्छावान्कार्ये नियुज्यते कुर्विति प्रेर्यते यत इत्यध्याहारः । आकारसमर्पकस्य कर्मकारकतया विषयत्वमुक्त्वा प्रत्ययस्य करणत्वमाहाकारो यत्रेति । यत्र बुद्धिपरिणामे विषयेणाकारोऽर्प्यतेऽर्प्यते तदिह विषयाभिव्यक्तौ करणमुच्यते तत्तद्बाह्येन्द्रियविशेषिता तत्तदर्थाकारा बुद्धिवृत्तिर्विषयप्रमितिं प्रति करणमित्यर्थः ॥१२०॥

Digitized by Google

विषयकरणे व्युत्पाद्य कर्तारं व्युत्पादयति ।

(१२१) यदाभासेन संव्याप्तः स ज्ञातेति निगद्यते ॥५३४॥
त्रयमेतद्विविच्याथ यो जानाति स आत्मवित् ।

यदाभासेनेति । यस्य चित्प्रतिबिम्बस्याभासेन संव्याप्तोऽहंकारः परिणमते स चिदात्मप्रतिबिम्बो ज्ञातेति निगद्यते कथ्यते। एवं साक्ष्यं निर्दिश्य ततः साक्षिणं पृथगुपलम्भयति । त्रयमिति । एतत्त्रयं ज्ञाता ज्ञानं ज्ञेयं चेति विविच्यासाधारण्येनावगम्याथ त्रये परस्परापेक्षसिद्धिके आगमापायिनि वर्तमानं स्वतः सिद्धं तदवधिभूतमनागमापायिसाक्षिणं यो जानाति सम्यगवगच्छति स आत्मवित् त्वंपदलक्ष्यप्रत्यगात्मविदिति योजना । तदुक्तं श्रीभागवते ।

"एकमेकतराभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः"

इति ॥ १२१ ॥

विवेकप्रकारमेव विशदयति ।

(१२२) सम्यक् संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः ॥५३५॥
एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ।

सम्यगिति ॥ १२२ ॥

भेदस्तु प्रत्ययार्पित इत्येतद्दृष्टान्तेन स्पष्टयति ।

(१२३) आधिभेदाद्यथा भेदो मणेरवगतेस्तथा ॥५३६॥
अशुद्धिः परिणामश्च सर्वं प्रत्ययसंश्रयात् ।

आधिभेदादिति । मणेः स्फटिकादेः प्रत्ययसंश्रयादहंकारप्रतिबिम्बकृताभाससंश्रयान्निमित्तादित्यर्थः ॥ १२३ ॥

ननु ग्राह्यग्रहणग्राहकातिरिक्तात्मसिद्धौ किं प्रमाणमुक्तमेतावता भवतीत्यपेक्षायां तदाह ।

(१२४) प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहान्यतः ॥५३७॥
आपरोक्ष्यात्तदेवोक्तमनुमानं प्रदीपवत् ।

प्रथनमिति । प्रत्ययानां विषयाकाराणां जाग्रत्स्वप्नावस्थानां प्रथनं स्फुरणं ग्रहणमुपादानं स्थितिर्वा व्यवहारो वा सिद्धिः स्वरूपलाभश्चेह व्यवहारभूमौ अन्यतोऽन्यस्मादापरोक्ष्यादपरोक्षस्वभावाद्भवितुमर्हति, अचित्स्वभावत्वादचित्स्वभावत्वं चागमापायित्वात्प्रदीपवदित्येतदेवानुमानमिहोक्तमित्यर्थः । विमताः प्रत्ययाः, स्वविलक्षणान्याधीनप्रथनग्रहणसिद्धिकाः, अचित्स्वभावत्वात्, प्रदीपादिवदिति प्रयोगः । एवं सामान्यतो दृष्टानुमानेनात्रायं पुरुषः स्वयंज्योतिरात्मैवास्य ज्योतिस्तस्य भासा सर्वमिदं विभातीत्यादिश्रुतिप्रसिद्धस्वप्रकाशे आत्मनि संभावना दर्शितेति द्रष्टव्यम् ॥ १२४ ॥

एवमनुमानमात्मन्युपन्यस्य विधिमुखेन प्रमाणेनात्मसिद्धिरुक्ता, तत्र के चिन्निषेधमुखेनैव प्रमाणेनात्मसिद्धिर्न विधिमुखेनापीति मन्यन्ते तन्मतनिराकरणाय विकल्पयति ।

(१२५) किमन्यद्ग्राहयेत्कश्चित्प्रमाणेन तु केन चित् ॥५३८॥
विनैव तु प्रमाणेन निवृत्त्याऽन्यस्य शेषतः ।

किमन्यदिति । प्रथमस्तुशब्द एवकारार्थः, द्वितीयस्तुर्वाशब्दार्थः, किं कश्चिद्वादी केन चित्प्रमाणेनैव देहादिभ्योऽन्यदात्मतत्त्वं ग्राहयेत्किं वा प्रमाणेन विनैवान्यस्य निवृत्त्या परिशेषत इति विकल्पार्थः ॥ १२५ ॥

प्रथमपक्षे विधिमुखेनैव प्रमाणप्रवृत्तिः सिद्ध्यतीतीष्टहानिः स्पष्टेत्यभिप्रेत्य द्वितीयं प्रत्याह ।

(१२६) शब्देनैव प्रमाणेन निवृत्तिश्चेदिहोच्यते ॥ ५३९ ॥
अध्यक्षस्याप्रसिद्धत्वाच्छून्यतेव प्रसज्यते ।

शब्देनैवेति । शब्देन प्रमाणेनानात्मनिवृत्तिरेव चेदिहोच्यतइति संबन्धः, तदाऽध्यक्षस्य अध्यक्षसद्भावस्यान्यतोऽप्रसिद्धत्वात्परिशेषासिद्धेः शून्यतैवावशिष्येत नात्मेत्यर्थः ॥१२६॥

ननु चेतनाचेतनयोर्विरुद्धरूपत्वकथनेनान्यनिवृत्तिः शब्देन क्रियते, तथा चाचेतनविरुद्धश्चेतनः परिशिष्यतइति न शून्यताप्रसङ्ग इत्याशङ्क्य परिहरति ।

(१२७) चेतनस्त्वं कथं देह इति चेन्नाप्रसिद्धितः ॥ ५४० ॥
चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः ।

चेतनस्त्वमिति । अप्रसिद्धितो नैवमित्युक्तं साधयति । चेतनस्येति । अयमर्थः । सिद्धे हि धर्मिणि प्रतियोगिनि चायमयं न भवतीति तादात्म्यनिषेधेन विरुद्धरूपत्वोपदेशः स्याच्च चात्रापि चेतनपदार्थः पृथक् सिद्ध इत्यनेनैव तत्साधनेऽन्योन्याश्रयः स्यादिति ॥ १२७ ॥

आत्मा नात्यन्तमप्रसिद्धस्तस्य स्वतः सिद्धत्वादित्याशङ्कते ।

(१२८) अध्यक्षः स्वयमस्त्येव चेतनस्यापरोक्षतः ॥५४१॥
तुल्य एवं प्रबोधः स्यादन्यस्यासत्त्ववादिना ।

अध्यक्ष इति । चेतनस्य स्वतोऽपरोक्षत्वादित्यर्थः । दूषयति । तुल्य इति । एवं सत्यन्यस्यासत्त्ववादिना शून्यवादिना तुल्यः समः प्रबोधः स्यात्, यथा शून्यवादिनः प्रमाणं विना स्वतःसिद्धशून्यमात्मेति न प्रबोधसिद्धिस्तथाध्यक्षस्यापि तवेत्यर्थः ॥ १२८ ॥

इदानीं स्मृतिबलेन स्वतःसिद्धाध्यक्षसिद्धिं शङ्कते ।

(१२९) अहमज्ञासिषं चेदमिति लोकस्मृतेरिह ॥ ५४२॥
करणं कर्म कर्ता च सिद्धास्त्वेकक्षणे किल ।

Digitized by Google

अहमज्ञासिषमिति । अहमिदमज्ञासिषमितीह व्यवहारे लोकस्य युगपत्स्मृतिदर्शनादननुभूते स्मृत्यभावात्करणकर्मकर्तारस्त्रयोऽप्येकक्षणे प्राग्येन सिद्धाः सोऽस्त्यध्यक्षः स्वतः सिद्ध इति गम्यते किलेत्यनभिमतत्वद्योतनात्पूर्वपक्षता द्योतितेत्यर्थः ॥ १२९ ॥

एतन्निराकरोति ।

(१३०) प्रामाण्येऽपि स्मृतेः शैघ्र्याद्यौगपद्यं विभाव्यते ॥५४३॥
क्रमेण ग्रहणं पूर्वं स्मृतेः पश्चात्तथैव च ।

प्रामाण्येपीति । स्मृतेः पूर्वानुभवगमकत्वेन प्रामाण्येपि न युगपत्त्रितयसिद्धिगमकत्वं, यतः पूर्वं क्रमेण कर्त्रादीनां ग्रहणमभूत्तथैव च पश्चादुत्तरकालं स्मृतेः संभवो ऽतः शैघ्र्याच्चेतन्तेर्येणाविलम्बाद्यौगपद्यं विभाव्यते मृषैवेत्यक्षरार्थः । अर्थत्रयस्यैकस्मृत्यवभास्यत्वे निश्चिते सत्येवं स्यान्न तु तन्निश्चेतुं शक्यते, यतो ऽहमिदं जानामीति क्रमेण व्यपदिश्यते, ऽतो ग्राह्यस्फुरणस्य ग्राहकग्रहणाकारताऽसंभवात्तत्काले तयोर्न भानं संभवति, एवं ग्राहकस्य प्रतीचः स्फुरणसमये ग्राह्यस्य पराचो नास्ति स्फुरणं विरुद्धाकारद्वयस्यैकस्मिन्प्रमाणज्ञाने स्फुरणासंभवात्तथा ज्ञानस्यापि विषयैकाकारत्वात्तत्स्फुरणेन ज्ञातृस्फूर्त्तिरिति क्रमेणैव ज्ञात्रादिसिद्धिः प्रागुन्नेया । तस्मादुत्पलपत्रशतभेदनयौगपद्याभिमानवद्युगपत्स्मृतिरित्यभिमानः शैघ्र्यनिबन्धन इति भावः ॥ १३० ॥

स्मृतेर्यौगपद्याभावे कारणान्तरमाह ।

(१३१) अज्ञासिषमिदं मां चेत्यपेक्षा जायते ध्रुवम् ॥५४४॥
विशेषोपेक्ष्यते यत्र तत्र नैवैककालता ।

अज्ञासिषमिति । इदमित्याकारो हि प्रत्यगपेक्षयोल्लिख्यते, तथा मामिति परागपेक्षया धीर्जायते, तथा च यत्र विशेषोन्यप्रतियोगिकोऽपेक्ष्यते, तत्रैककालता यौगपद्यं नैव घटत इत्यर्थः ॥ १३१ ॥

स्मृतेर्विषयतः स्वरूपतश्च यौगपद्यासंभवात्कर्त्रादिसिद्धौक्यानुमापकत्वानुपपत्तिरित्युक्तं, संप्रति कर्त्रादीनां युगपदनुभवसाधनाभावादपि न युगपत्तत्सिद्धिसंभावनेत्याह ।

(१३२) आत्मनो ग्रहणे चापि त्रयाणामिह संभवात् ॥५४५॥
आत्मन्यासक्तकर्तृत्वं न स्यात्करणकर्मणोः ।

आत्मन इति । अयमर्थः । यथा विषयस्य ग्रहणे कर्त्ता करणं कर्म चेति त्रितयमपेक्ष्यते एवं प्रत्येकं कर्त्रादिग्रहणेपि त्रितयमपेक्षणीयं, तथा चात्मनः प्रमातुरहंकारात्प्रमेयस्य प्रमाणज्ञानस्य च ग्रहणेपि त्रयाणां कर्त्रादीनामिहापेक्षासंभवात्तत्कर्त्रादिस्फुरणमन्तरेण तत्तदर्थस्य [illegible]त्वनियमासिद्धेः कर्त्राद्यनवस्था प्रसज्येतेत्यर्थः । तैरेव कर्त्रादिभिः स्वस्वरूपसिद्धिसंभवात्किमित्यनवस्थेति शङ्कां वारयति । आत्मनीति । आत्मन्येकस्मिन्नेव स्वसिद्धावासक्तमुपक्षीणं यत्कर्तृत्वं तदेव करणकर्मणोः सिद्धौ तन्न स्यादित्यर्थः । तथा चैकस्मिन्नवभासे कर्त्रादिभावेनान्वीयमानानां तदैवावभासान्तरसाधनत्वान्वयायोगाच्च कर्त्रादित्रितयस्य युगपदनुभवसाधनसंभावनेति तदसिद्धिस्तदवस्थेत्यर्थः ॥ १३२ ॥

कर्त्रादीनां युगपत्सिद्ध्यभ्युपगमे व्याकरणविरोधोपि स्यादित्याह ।

(१३३) व्याप्तुमिष्टं च यत्कर्तुः क्रियया कर्म तत्स्मृतम् ॥५४६॥
अतो हि कर्तृतन्त्रत्वं तस्येष्टं नान्यतन्त्रता ।

व्याप्तुमिति । कर्तुः क्रियया यद्व्याप्तुमिष्टतमं तत्कर्म स्मृतं "कर्तुरीप्सिततमं कर्म"ति पाणिनिना स्मृतमित्यर्थः । हि यस्मादेवमतः तस्य कर्मणः सकलकारकप्रयोक्तृस्वतन्त्रकर्तृतन्त्रत्वमिष्टं न तद्व्यतिरिक्ताध्यक्षतन्त्रता, उक्तन्यायेन तत्साधकासिद्धेरित्यर्थः ॥ १३३ ॥

तस्माद्विधिरूपेण प्रवृत्तादेव प्रमाणादभिमतवस्तुसिद्धिर्नान्यनिषेधमात्रावसानादिति निर्णीतमित्युपसंहरति ।

(१३४) शब्दाद्वाऽनुमितेर्वापि प्रमाणाद्वा ततोऽन्यतः ॥५४७॥
सिद्धिः सर्वपदार्थानां स्यादज्ञं प्रति नान्यथा ।

शब्दाद्वेति । अन्यतोन्यस्मात्प्रत्यक्षादेवेत्यर्थः ॥ १३४ ॥

जडानां प्रवृत्तप्रमाणादेव सिद्धिरस्तु, न स्वयं चेतनस्येत्याशङ्क्याह ।

(१३५) अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा ॥५४८॥
विना स्वस्य प्रसिद्धिस्तु नाज्ञं प्रत्युपयुज्यते ।

अध्यक्षस्यापीति । येयमध्यक्षस्य सिद्धिरज्ञस्य सा प्रमाणाधीना न वेति विकल्प्यान्त्ये स्वरूपप्रकाशमात्रस्य विना प्रमाणेन सिद्धावपि नाज्ञं प्रत्यध्यक्षता तस्य सिध्यतीति दूषयति । विना स्वस्येति ॥ १३५ ॥

अध्यक्षस्वरूपमपि विकल्प्य प्रमाणाधीनसिद्धिकतां तस्य दर्शयन्नाद्यं पक्षमभ्यनुजानाति ।

(१३६) तस्यैवाज्ञत्वमिष्टं चेज्ज्ञानत्वेऽन्या मतिर्भवेत् ॥५४९॥
अन्यस्यैवाज्ञतायां च तद्विज्ञाने ध्रुवा भवेत् ।

तस्यैवेति । तस्यैव ज्ञानस्वरूपस्य चेतनस्यैवाज्ञत्वमिष्टं चेत्तदा तस्य ज्ञानत्वे चेतनत्वे ऽन्या प्रमाणजन्या मतिरपेक्षणीया भवेत्, अन्यस्यैवाचेतनस्याहंकारस्यैवाज्ञतायां तद्विज्ञाने ऽध्यक्षविज्ञाने चान्या मतिर्ध्रुवा भवेदिति योजना । उभयथापि विधिमुखप्रमाणाधीना ऽध्यक्षसिद्धिरित्यर्थः ॥ १३६ ॥

Digitized by Google

अध्यक्षस्य सिद्धस्वरूपत्वान्मानापेक्षा नास्तीत्याशङ्क्य सिद्धिशब्दार्थ एव तर्हि वक्तव्य इत्याह ।

(१३७) ज्ञातता स्वात्मलाभो वा सिद्धिः स्यादन्यदेव वा ॥५५०॥
ज्ञातत्वे ऽनन्तरोक्तौ त्वं पक्षौ संस्मर्तुमर्हसि ।

ज्ञाततेति । किं ज्ञानं सिद्धिः स्वरूपलाभो वा स्यादन्यदेव वोभयान्यप्रकारो वेति विकल्पार्थः । तत्राद्ये दोषमाह । ज्ञातत्वइति । अनन्तरोक्तौ तस्यैवाज्ञत्वमिष्टं चेदित्यादिना पूर्वश्लोकोक्तौ, पूर्वोक्तविकल्पदूषणप्रसराद्वाद्यः कल्पः साधुरित्यर्थः ॥ १३७ ॥

द्वितीयमनूद्य दूषयति ।

(१३८) सिद्धिः स्यात्स्वात्मलाभश्चेद्यत्नस्तत्र निरर्थकः ॥५५१॥
सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तु वस्तुनः ।

सिद्धिः स्यादिति । निरर्थकत्वे हेतुमाह । सर्वलोकेति । वस्तुनः सर्वस्य स्वहेतुभ्यः स्वात्मलाभरूपा सिद्धिरिति सर्वलोकप्रसिद्धत्वात्तत्र प्रमातृप्रमाणप्रयासो व्यर्थः स्यादित्यर्थः ॥ १३८ ॥

तृतीयं पक्षमप्रसिद्धिपराहतं मत्वा वक्ष्यमाणपक्षविशेषज्ञापनार्थमुक्तं पक्षं निगमयति ।

(१३९) ज्ञानज्ञेयादिवादे ऽतः सिद्धिर्ज्ञातत्वमुच्यते ॥५५२॥
अध्यक्षाध्यक्ष्ययोः सिद्धिर्ज्ञेयत्वं नात्मलाभता ।

ज्ञानज्ञेयादीति । ज्ञानं ज्ञेयं ज्ञाता चास्तीति यस्य वादस्तस्मिन्वादे ज्ञातत्वमेव सिद्धिरुच्यते, अध्यक्षाध्यक्ष्ययोस्तु पुनर्ज्ञेयत्वमेव सिद्धिर्न स्वात्मलाभ इत्यर्थः ॥ १३९ ॥

अध्यक्षस्यापीत्यादेरपरा योजना । अहमज्ञासिषं चेदमित्याख्येयता यत्नेन कर्तृकर्मकरणानां विधिमुखेन प्रवृत्तप्रमाणादेव सिद्धिर्नान्यथेति प्रासङ्गिकमुपपादितमुपसंहृत्याध्यक्षस्यापि वस्तुत्वाविशेषात्प्रवृत्तप्रमाणादेव सिद्धिरिति प्रकृतमनुसरन्नाह । अध्यक्षस्यापीति । वाशब्दः कटाक्षे । अध्यक्षस्यापि द्रष्टुः प्रमाणेन विनैव सिद्धिः स्याद्वेति योजना, नैव स्या दित्यर्थः । चेतनत्वादध्यक्षस्य प्रमाणेन विना कथं न सिद्धिरित्यत आह । विनेति । प्रमाणेन विना स्वस्य वस्तुनः प्रसिद्धिस्तु ज्ञानं प्रमितिं विना नाज्ञं प्रत्युपयुज्यते, ज्ञानस्यैव स्वरूपस्फुरणे प्रमाणानपेक्षा, न ज्ञातुरध्यक्षस्येत्यर्थः ॥

कथमिति चेत्तत्र वक्तव्यम्, अध्यक्ष एवाज्ञः सन् प्रमाणेन विनार्थसिद्धिं साधयिष्यति, किं वा ऽन्या ऽन्तःकरणादिति, तत्राद्यमनूद्य दूषयति ! तस्यैवेति । चेतनस्याध्यक्षस्यैवेत्यर्थः । ज्ञानत्वे ऽहमध्यक्ष इति ज्ञानवत्त्वे ऽन्या मतिः प्रवृत्तप्रमाणजन्या मतिरपेक्षिता भवेदागन्तुकसिद्धेरन्यनिमित्तत्वादित्यर्थः । द्वितीयमनूद्य दूषयति । अन्यस्यैवेति । तद्विज्ञान इति तस्यान्यस्यान्तःकरणादेरध्यक्षविषयविज्ञाने ऽन्या प्रमाणजन्या मतिर्मृग्या भवेदिति योजना । उभयथा ऽपि विधिमुखेन प्रवृत्तप्रमाणादेवाध्यक्षसिद्धिरित्यर्थः ॥

ज्ञातता ज्ञानवत्ता सिद्धिरिति पक्षे तस्यैवाज्ञत्वमिष्टं चेदिति पूर्वश्लोकोक्तविकल्पदूषणप्रसरणमनिवारणं स्यादित्याह । ज्ञातत्वे ऽनन्तरोक्ताविति । यथा व्याख्यातौ स्वपक्षावित्यर्थः । अन्यत्समानम् ॥

ननु ज्ञातता ऽऽत्मलाभातिरिक्ताप्यस्ति स्पष्टता नाम सिद्धिरतो नाप्रसिद्धं पक्षान्तरमिति भट्टमतमाशङ्क्य परिहरति ।

(१४०) स्पष्टत्वं कर्मकर्त्रादेः सिद्धिता यदि कल्प्यते ॥५५३॥
स्पष्टतास्पष्टते स्यातामन्यस्यैव न चात्मनः ।

स्पष्टत्वमिति । स्पष्टत्वं प्राकट्यं कर्मकर्त्रादेः, स्पष्टतास्पष्टते अप्यन्यस्यैव कर्त्रादिविलक्षणस्य साक्षिणश्चिदाभासजननेन स्यातां, न स्वात्मनः कर्त्रादिस्वरूपस्य, जडत्वादित्यर्थः ॥ १४० ॥

एतदेव व्यतिरेकप्रदर्शनेन स्पष्टयति ।

(१४१) अद्रष्टुर्नैव चान्धस्य स्पष्टीभावो घटस्य तु ॥५५४॥
कर्त्रादेः स्पष्टतेष्टा चेद् द्रष्टृता ऽध्यक्षकर्तृका ।

अद्रष्टुरिति । अन्धस्य दर्शनशक्तिरहितस्य ज्ञातुर्विषयीभूतस्य घटस्य यः स्पष्टीभावः स नैव ज्ञानविषयतातिरिक्तो भट्टमते संभवतीत्यर्थः । एवं सति भाट्टमतानुसारिणा कर्त्रादेः स्पष्टता प्राकट्यरूपेष्टा चेत्तदा द्रष्टृता तद्विलक्षणाध्यक्षकर्तृका ऽवश्यमेष्टव्या, तस्मात्कर्मादेर्जडस्य स्पष्टतायाः प्रकाशापरपर्यायाया असंभवान्न स्पष्टता सिद्धिशब्दार्थः, किं तु ज्ञानविषयतैवेति कर्त्रादिगतचिदाभासनद्वारा तदधिष्ठानभूतश्चिदात्मा विधिमुखेनैव प्रदीपादिदृष्टान्तानुमानादिना प्रमाणेनावगन्तव्य इति भावः ॥ १४१ ॥

अत्र कर्तृकर्मविहीन एव प्रत्ययः स्वयमाभासत इति वदन् विज्ञानवादी बौद्धः प्रत्यवतिष्ठते ।

(१४२) अनुभूतेः किमन्यस्मिन् स्यात्तवापेक्षया वद ॥५५५॥
अनुभवितरीष्टा स्यात्सोप्यनुभूतिरेव नः ।

अनुभूतेरिति । अनुभूतेः संवेदनस्यान्यस्मिन्कर्त्रादावपेक्षया तव किं फलं स्यात्तद्वद, न किंचित्फलं, तस्याः स्वप्रकाशत्वादित्यर्थः । अनुभवितरि आश्रयभूते सेष्टव्या स्यात्तस्यास्तदधीनत्वदर्शनादिति चेत् त्वं ब्रूयास्तर्हि सोप्यनुभविता नोस्माकं मते ऽनुभूतिरेव न ततः पृथक् तत्सत्त्वे प्रमाणाभावादित्यर्थः ॥ १४२ ॥

Digitized by Google

कथं तर्ह्यनुभूतिरनुभविता ऽनुभाव्य इति भेददर्शनमित्यत आह ।

(१४३) अभिन्नोपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः ॥५५६॥
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ।

अभिन्नोपि हीति । बुद्ध्यात्मा बुद्धिस्वभावो ऽभिन्नोप्येकोपि विपर्यासितदर्शनैर्भ्रान्तबुद्धिभिः पुरुषैर्ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते प्रतीयते संवित्तिशब्दो ग्रहणशब्दपर्यायः ॥ १४३ ॥

बुद्धेः कारकत्वानङ्गीकाराच्च न कर्त्राद्यपेक्षेत्याह ।

(१४४) भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ॥५५७॥
सत्त्वं नाशित्वमस्याश्चेत्सकर्तृत्वं तथेष्यताम् ।

भूतिरिति । येषां मते या भूतिरनुभूतिः सैव क्रिया सैव कारकमुच्यते । क्षणभङ्गुरत्वेन विरम्य व्यापारायोगात्तेषां मते कस्तस्याः स्वव्यतिरिक्तोपेक्षणीयः स्यादित्यर्थः । प्रथममनुभूतेरन्यानपेक्षत्वं निराकरोति सिद्धान्ती । सत्त्वमिति । अनुभूतेरस्याः सत्त्वं स्वरूपसत्त्वं नाशित्वं क्षणभङ्गुरत्वमिष्टं चेत्तर्हि तथा सकर्तृत्वमपीष्यतामनुभवस्यात्रापि सद्भावादित्यर्थः ॥ १४४ ॥

अथ सत्त्वादिरपि धर्मो नेष्यते इति मतं, तदा क्षणिकत्वपक्षस्याप्यसिद्धिरित्याह ।

(१४५) न कश्चिन्नेष्यते धर्म इति चेत्पक्षहानता ॥ ५५८ ॥

न कश्चिदिति ॥ १४५ ॥

ननु नास्माभिर्विज्ञानस्य क्षणिकत्वादयो धर्मा इष्यन्ते, किं त्वक्षणिकत्वाद्यपोहरूप एव क्षणिकत्वादिरिष्यते, ऽतो नोक्तदोष इति शङ्कते ।

(१४६) नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः ।
न भूतेस्तर्हि नाशित्वं स्वालक्षण्यं मतं हि ते ॥ ५५९ ॥

नन्विति । निराकरोति । नेति । एवं चेत्तर्हि भूतेरनुभूतेर्नाशित्वं न सिद्ध्येत्, हि यस्मात्ते तव भूतेः स्वालक्षण्यं मतं स्वेनैव लक्ष्यते ज्ञायत इति स्वलक्षणं तस्य भावः स्वालक्षण्यं निर्विकल्पकमात्रमिति यावत्, ततः सविकल्पकत्वात्क्षणिकत्वासत्त्वानाशित्वात्सत्त्वादिव्यावृत्तेरनुभूतेश्च सविकल्पकज्ञानागोचरत्वाच्च सत्त्वनाशवत्त्वादिधर्मसिद्धिरित्यर्थः ॥ १४६ ॥

एतदेव स्फुटयति ।

(१४७) स्वलक्षणावधिर्नाशो नाशो ऽनाशनिवृत्तिता ।

स्वलक्षणेति । अयमर्थः । कार्यं विनश्यच्च निरवधि नश्यति । इदमत्र नास्ति, इदमिदानीं नास्ति, नष्टमिति, वा नाशो व्यवह्रियते यस्मात्तस्मात्किमप्यस्ति विनाशावधिभूतमविनश्यदनुत्पन्नं स्वतः सिद्धं चेत्यभ्युपेयं, तदेतदाह । स्वलक्षणावधिर्नाश इति । स्वरूपमेव लक्षणं प्रमाणं धर्मो वा यस्य स स्वलक्षणः सोवधिः सीमा यस्य विनाशस्य स तथेति विग्रहः । तथा च त्वन्मते आविर्भावतिरोभावयोरवधिभूतस्य स्थिरस्याभावाच्च सत्त्वविनाशयोः सिद्धिरित्यर्थः । किं चापोहपक्षे ऽन्योन्याश्रयश्च प्रसज्येतेत्याह । नाश इति । सिद्धे नाशे तद्विरोधिनो ऽनाशस्य सिद्धिस्तत्सिद्धौ तदपोहरूपनाशसिद्धि रित्यर्थः ॥ १४७ ॥

यत्तु सामान्यमनभ्युपगच्छता बौद्धेनागोव्यावृत्तिर्गोलक्षणमित्यभ्युपगम्यते, तदनुपपन्नमन्योन्याश्रयस्य तादवस्थ्यादित्यभिप्रेत्याह ।

(१४८) अगोरसत्त्वं गोत्वं ते न तु तद्गोत्वलक्षणम् ॥ ५६० ॥
क्षणवाच्योपि योर्थः स्यात्सोप्यन्याभाव एव ते ।

अगोरिति । गोरन्यस्याश्वत्वादेरगोपदाभिधेयस्यासत्त्वं निवृत्तिरभावो गोत्वमिति ते मतं, तत्तु न गोत्वलक्षणं सिद्ध्यति, अश्वत्वस्यापि गोत्वव्यावृत्तिलक्षणतया परस्परापेक्षासिद्धित्वादित्यर्थः । अपोहवादे दोषान्तरमाह । क्षणवाच्यो ऽपीति । अन्याभावो ऽक्षणिकाभावः क्षणिक इति ते प्रसज्यते, अतः स्थिरोपि क्षणिकताविरोधी त्वया ऽभ्युपगतः स्यादित्यर्थः ॥ १४८ ॥

नन्वभावो नाम न सतो निवृत्तिरिष्यते येनातिप्रसङ्गः स्या,त्किं तु निरुपाख्यगोत्वमेवान्यव्यावृत्त्यात्मना ऽभिलप्यत इति शङ्कते ।

(१४९) भेदाभावे ऽप्यभावस्य भेदो नामभिरिष्यते ॥ ५६१॥
नामभेदैरनेकत्वमेकस्य स्यात्कथं तव ।

भेदाभावेपीति । अभावस्य स्वरूपतो भेदाभावेपि अगोत्वमश्वत्वमनश्वत्वं गोत्वमित्यादिनामभिः स्वरूपभेद इष्यत इत्यर्थः । दूषयति । नामभेदैरिति । एकस्य निःस्वभावस्याभावस्य नामभेदैर्निरर्थकसंज्ञाभेदैरनेकत्वमनेकपदार्थासाधारणतया व्यावृत्त्यात्मत्वं तव कथं घटेतेत्यर्थः ॥ १४९ ॥

किं च भिन्नानां व्यावृत्तिरपोहो ऽभिन्नानां वा, तत्राद्यमनूद्य दूषयति ।

(१५०) अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि ॥ ५६२ ॥
नाभावा भेदकाः सर्वे विशेषा वा कथं चन ।

अपोहो यदीति । भेदप्रतियोगिनामानन्त्यात्तदवगममन्तरेण तदपोहानवगमात्तस्यापोहस्य गवि वृत्तिः कथं सिद्ध्येदिति शेषः । तदसिद्धौ च किंचिदभावस्य क्वचित्सुलभत्वाद्व्यवहारानियमप्रसङ्ग इति भावः । द्वितीये दोषमाह । ना-

भावा इति। सर्वेप्यभावा अजत्वाश्वत्वाद्यपोहरूपा न भेदका न गोरितरेतरव्यावृत्तत्वबुद्धिजनकाः स्युस्तथा विशेषा वा भावरूपाः खण्डमुण्डत्वादयो भेदका न स्युर्भेद्यभेदकयोर्भेदासिद्धेरित्यर्थः ॥ १५० ॥

एवं चापोहवादे खण्डो गौर्नीलमुत्पलमित्यादिविशिष्टव्यवहारासिद्धिरियं गौरित्याद्यसाधारणस्वरूपव्यवहारासिद्धिश्च स्यादित्यभिप्रेत्यापोहनिराकरणमुपसंहरति ।

(१५१) नामजात्यादयो यद्वत्संविदस्ते ऽविशेषतः ॥ ५६३ ॥

नामजात्यादय इत्यर्द्धेन । ते तव मते संविदो ऽविशेषतो निर्विशेषत्वान्नामजात्यादयो यद्वच्च विशेषणम्, एवं गवादीनामगवादिव्यावृत्तयः खण्डादयो वा न विशेषणमिति विशिष्टव्यवहारलोप एवेति जीवनमपि ते दुर्लभमिति भावः ॥ १५१ ॥

यदुक्तं भूतिर्येषां क्रिया सैवेत्यत्र संविदः क्रियाकारकभेदापेता नास्तीति, तत्प्रत्यक्षमनुमानं वेति प्रमाणद्वयाभ्युपगमविरुद्धमित्याह ।

(१५२) प्रत्यक्षमनुमानं वा व्यवहारे यदीच्छसि ।
क्रियाकारकभेदैस्तदभ्युपेयं ध्रुवं भवेत् ॥ ५६४ ॥

प्रत्यक्षमिति । स्पष्टार्थः ॥ १५२ ॥

तथा च संवेदनातिरिक्तवेद्यवेदितृस्वरूपमनिच्छताप्यभ्युपेयमिति बौद्धमतनिराकरणमुपसंहरति ।

(१५३) तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणम् ।
संविदस्तदुपेयं स्याद् येन चाप्यनुभूयते ॥ ५६५ ॥

तस्मादिति । येन चाप्यनुभूयते सोपि ज्ञाता ऽभ्युपेयः स्यादित्यर्थः ॥ १५३ ॥

संवित्साक्षिण्यनुमानं प्रमाणमाह ।

(१५४) रूपादीनां यथान्यः स्याद्ग्राह्यत्वाद्ग्राहकस्तथा ।
प्रत्ययस्य तथान्यः स्याद् व्यञ्जकत्वाच्च दीपवत् ॥ ५६६ ॥

रूपादानामिति । यद्ग्राह्यं तत्स्वान्यग्राह्यं यथा रूपादिग्राह्या संविदिति बौद्धं प्रति प्रयोगो योज्यः, तथा ऽवभासको ऽवभास्यादन्यो व्यञ्जकत्वाद् घटादेः प्रदीपवदित्यास्तिकान् प्रति प्रयोक्तव्यमित्यर्थः। तथा रूपादीनां ग्राह्यत्वाद्ग्राहकोन्यः स्यात्तथा प्रत्ययस्य ग्राह्यत्वाद्ग्राहकोन्यः स्यात्तथा ग्राहकश्च ग्राह्यादन्यः स्याद्व्यञ्जकत्वात्प्रदीपवदिति श्लोकयोजना ॥१५४॥

कस्तर्हि प्रत्ययाध्यक्षयोः संबन्ध इत्यपेक्षायामाह ।

(१५५) अध्यक्षस्य दृशेः कीदृक् संबन्धः संभविष्यति ।
अध्यक्षेण तु दृश्येन मुक्तान्यो द्रष्टृदृश्यताम् ॥ ५६७ ॥

अध्यक्षस्येति । स्पष्टम् ॥ १५५ ॥

द्रष्टृदृश्यसंबन्धाभ्युपगमे बलादाभासो ऽभ्युपगन्तव्य इति दर्शयितुं विकल्पयति ।

(१५६) अध्यक्षेण कृता दृष्टिर्दृश्यं व्याप्नोत्यथापि वा ।
नित्याध्यक्षकृतः कश्चिदुपकारो भवेद्धियाम् ॥ ५६८ ॥

अध्यक्षेणेति । अध्यक्षेण प्रत्ययेन दृशेरात्मनः कीदृक् संबन्धो भविष्यति, पारमार्थिको वा ऽपारमार्थिको वेति विमर्शार्थः । तत्राद्यो दृशेः परिणामादिविकारप्राप्तिप्रसङ्गात् सावद्य इत्यभिप्रेत्य द्वितीयमङ्गीकरोति। नित्याध्यक्षेति॥ १५६ ॥

कोसावुपकार इत्यपेक्षायामाह ।

(१५७) स चोक्तस्तन्निभत्वं प्राक् संव्याप्तिश्च घटादिषु ।
यथा ऽऽलोकादिसंव्याप्तिर्व्यञ्जकत्वाद्धियस्तथा ॥ ५६९ ॥

स चोक्त इति । स च नित्याध्यक्षकृतो बुद्धेरुपकारस्तच्चिभत्वं चिचिभत्वं प्राक् पूर्वमेव मुखप्रतिबिम्बदृष्टान्तेनोक्त इत्यर्थः। उक्ताभासद्वारा ऽऽत्मनो दृश्यं बाह्यविषयसंबन्धं वक्तुं साभासाया बुद्धेर्विषयव्याप्तिं सदृष्टान्तमाह । संव्याप्तिश्चेति । यथा घटादिष्वालोकादिसंव्याप्तिर्व्यञ्जकत्वात्तथा धियो दृश्यघटादिव्याप्तिरित्यर्थः ॥ १५७ ॥

उक्तमेव स्फुटयति ।

(१५८) आलोकस्थो घटो यद्वद्बुद्ध्यारूढो भवेत्तथा ।
धीव्याप्तिः स्याद्घटारोहो धियो व्याप्तौ क्रमो भवेत् ॥५७०॥

आलोकस्य इति । यद्वद्यथा ऽऽलोकनिविष्टो घट आलोकारूढो भवेत्तथा बुद्धिनिविष्टो बुद्ध्यारूढो भवेत्, आरूढ इत्युक्ते पुरुषाश्वयोरिवोपर्यधोभाव इति शङ्कां वारयति । धीव्याप्तिः स्यादिति । यद्येवं विषयव्याप्तिमात्रमेव धियो विषयव्यञ्जकत्वं तर्ह्यात्मनो बुद्धेश्च को विशेष इत्याशङ्क्य विशेषमाह । धियो व्याप्तौ क्रमो भवेदिति ॥ १५८ ॥

धियो विषयव्याप्तौ क्रमो भवेन्नात्मन इत्यर्थादुक्तं विशेषं विशदयति ।

(१५९) पूर्वं स्यात्प्रत्ययव्याप्तिस्ततो ऽनुग्रह आत्मनः ।
कृत्स्नाध्यक्षस्य सो ऽयुक्तः कालाकाशादिवत्क्रमः ॥५७१॥

पूर्वमिति । धियो विषयव्याप्तिः पूर्वं प्रथममिव प्रथमं स्यात्ततो विषयाकारतायां सिद्धायामात्मनो ऽनुग्रहस्तदाकारप्रतिबिम्बभावस्तद्बलाच्च विषयव्यञ्जकत्वमिति क्रमवत्त्वमन्यशेषत्वं च धियः सिध्यति न तथात्मन इत्याह । कृत्स्नाध्यक्षस्येति । प्रत्यर्थं परिणामभेदेन व्यञ्जकत्वाद्बुद्धेरेव क्रमो युक्तः कृत्स्नाध्यक्षस्य सर्वविक्षेपास्पदतया सर्वदा सर्वत्रानुगतप्रकाशरूपस्यापरिच्छिन्नस्यात्मनो न युक्तः स क्रम इत्यर्थः ।

Digitized by Google

देशतः कालतो वा क्रमाभावे दृष्टान्तः, कालाकाशादिवदिति ॥ १५९ ॥

नन्वध्यक्षस्यापि भोग्यविषयावभासकत्वाद्बुद्धेरिव परिणामः प्राप्नोतीत्याशङ्क्याह ।

(१६०) विषयग्रहणं यस्य करणापेक्षया भवेत् ।

सत्येव ग्राह्यशेषे च परिणामी स चित्तवत् ॥ ५०२ ॥

विषयग्रहणमिति । करणापेक्षया कर्त्रादिकारकापेक्षया ग्राह्यशेषे स्वासंसृष्टविषयान्तरावशेषे च सति यस्य विषयग्रहणं भवेत्स परिणामी स्याच्चित्तवत्, नैवमात्मनो विषयावभासनं, किं तु नित्यसिद्धप्रकाशस्वभावेन युगपत्स्वाध्यस्तसमस्तावभासनमित्यतो न तस्मिन् परिणामशङ्कावकाश इत्यर्थः ॥ १६० ॥

यद्यपि तस्योक्तरीत्या भोग्यविषयाकारपरिणामो नास्ति, तथापि ब्रह्मज्ञानाकारेण परिणामः स्याद् ब्रह्मणः स्वात्मत्वे सत्यपि तदाकारावभासस्यागन्तुकज्ञानसापेक्षत्वादित्याशङ्क्याह ।

(१६१) अध्यक्षोऽहमिति ज्ञानं बुद्धेरेव विनिश्चयः ।

नाध्यक्षस्याविशेषत्वान्न तस्यास्ति परो यतः ॥ ५०३ ॥

अध्यक्षोऽहमिति । तत्त्वमस्यादिवाक्यादध्यक्षः परमात्मैवाहमिति यज्ज्ञानं जायते तन्नाध्यक्षस्य साक्षिणः परिणामस्तस्याविशेषत्वात् स्वतः परतो वा निरवयवस्यासङ्गस्य विशेषासंभवात्, किं तु बुद्धेरेव साभासाया विनिश्चयो ऽवस्थाविशेष इत्यक्षरार्थः । एतदुक्तं भवति । अनेकजन्मानुष्ठितयज्ञादिकृतादृष्टदोषनिवृत्तिसंस्कारवत्याः सगुणब्रह्मोपासनानिराकृतचाञ्चल्यायाः सांप्रतं विवेकवैराग्यशमादिगुणसंस्कृतायाः पदार्थद्वयपरिशोधनज्ञानाहितदृढसंस्कारायाश्च बुद्धेस्तत्त्वमस्यादिवाक्यश्रवणसमनन्तरशोधितपदार्थगतकल्पितभेदांशतिरोधानेनाखण्डाकारा या चिदवस्था जायते तस्यां प्रतिबिम्बितश्चिदात्मा तादृशस्यविविक्ताकारेणाहमिति परामृश्य ततो विविक्ताकारमेवोपाध्यंशापोहेन स्वमेव रूपं ब्रह्मेति प्रतिपद्यतइति, न तस्मिन् कोऽपि विशेष उपजायतइति । चिदात्मनः परिणामाभ्युपगमे परिणामिनश्चित्तवत् स्वान्यवेद्यत्वनियमादात्मनो ऽप्यन्यः साक्षी कल्प्येत, तदनुपपन्नमनवस्थानादप्रमाणकत्वाच्चेत्यभिप्रेत्याह । न तस्यास्ति परो यत इति ॥ १६१ ॥

यद्यप्येवमन्तःकरणस्यैव ज्ञानाकारपरिणाम,स्तथापि तस्य न ज्ञानफलभागिता, किं त्वात्मन एवेत्यभिप्रेत्याहंकर्तुः फलसंबन्धे दोषमाह ।

(१६२) कर्ता चेदहमित्येवमनुभूयेत मुक्तता ।

सुखदुःखविनिर्मोक्षो नाहंकर्तरि युज्यते ॥ ५०४ ॥

कर्ता चेदिति । कर्ता विकारित्वा चेदहं मुक्त इति मुक्तता ऽनुभूयेत तदा नाहं कर्तेति कर्तृत्वोपमर्देन सुखदुःखविनिर्मोक्षो ऽसंबन्धस्तस्मिन्न युज्यते, कर्तुः सुखादिमत्त्वानुभवविरोधादित्यर्थः । कर्तुरपि क्रियया सह तदा विलीयमानत्वाच्च तस्य फलसंबन्ध इति भावः ॥ १६२ ॥

आत्मन्यपि कथं फलसंबन्धस्तस्य कूटस्थनित्यत्वादित्याशङ्क्य, तत्त्वज्ञानोदयानान्तरीयकतया बाध्यमानाध्यस्तानात्मसंभेदावभासस्य फलत्वोपचारात्तस्य चात्मन्येवोपपत्तेरित्यभिप्रेत्याह ।

(१६३) देहादावभिमानोत्थो दुःखीति प्रत्ययो ध्रुवम् ।

कुण्डलिप्रत्ययो यद्वत्प्रत्यगात्माभिमानिना ॥ ५०५ ॥

बाध्यते प्रत्ययेनेहाविवेकेनाविवेकवान् ।

देहादाविति । दुःखीत्युपलक्षणं, सुखी कृशः स्थूलः कामी क्रोधीत्यादेः, कुण्डलस्य स्वसंबन्धित्वाभिमानकृते तत्संयोगवियोगयोः सुखदुःखे यद्वदिति दृष्टान्तार्थः । एवं बाध्यस्याध्यस्तत्वमुक्त्वा तस्य बाधमाह । प्रत्यगात्माभिमानिनेति । अविवेकवानाभिमानिकप्रत्ययोऽविवेकेन प्रत्यगात्माभिमानिना शुद्धत्वंपदार्थात्माभिमानिना प्रत्ययेन बाध्यतइत्यन्वयः । प्रत्यगात्माभिगामिनेति पाठान्तरं सुगमम् । अत्र प्राग्वद्बुनार्द्धेन सह गणनयेह वृद्धमर्द्धमेकीकृत्य ॥ १६३ ॥

अविवेकवता विवेकी प्रत्ययः कस्मान्न बाध्यते, विरोधस्य समत्वादित्यत आह ।

(१६४) विपर्यासे ऽसदन्तं स्यात्प्रमाणस्याप्रमाणतः ॥ ५०६ ॥

विपर्यास इति । वैपरीत्ये प्रमाणस्याप्रमाणतापातात् सर्वमसदन्तं शून्यान्तं स्यात् प्रामाणिकस्यार्थस्यासत्त्वे प्रतिभासस्य निरालम्बनत्वापत्तौ निरवधिको बाध इति शून्यान्तताप्रसङ्ग इत्यर्थः । अयमर्द्धोऽप्येकः ॥ १६४ ॥

विवेकेनाविवेकबाधो भवतीति पूर्वमुक्तं प्रपञ्चयति ।

(१६५) दाहच्छेदविनाशेषु दुःखित्वं नान्यथाऽऽत्मनः ।

नैव ह्यन्यस्य दाहादावन्यो दुःखी भवेत्क्वचित् ॥ ५०७ ॥

दाहच्छेदेति । दाहादिदेहोपघातनिमित्तं हि दुःखमनुभूयते, नान्यथा, तच्च देहाभिमाननिबन्धनमन्यथा सुषुप्तावपि प्रसङ्गादात्मा च देहादेरन्य इति प्रमाणसिद्धमतोऽन्यगतदाहादिना ऽन्यस्य दुःखे ऽतिप्रसङ्गादध्यासनिबन्धनं दुःख्यहमस्मीति ज्ञानमित्यर्थः ॥ १६५ ॥

Digitized by Google

आत्मनः स्वतो दाहादिसंबन्धाभावे प्रमाणमाह ।

(१६६) अस्पर्शत्वाददेहत्वान्नाहं दाह्यो यतः सदा ।
तस्मान्मिथ्याभिमानोत्थं मृते पुत्रे मृतिर्यथा ॥ ५७८ ॥

अस्पर्शत्वादिति । फलितं सदृष्टान्तमुपसंहरति । तस्मादिति ॥ १६६ ॥

॥ शेष उत्तराङ्के ॥

॥ अथ बालभारतस्य ॥

॥ पञ्चमः सर्गः ॥

शितिद्युतिः सत्यवतीतनूजः
पुनातु सूर्येन्दुविलोचनो वः ।
बभौ महाभारतशङ्कुनाम्ना
गुणेन संक्षिप्तमिवाम्बरं यः ॥ १ ॥

अथो पृथासूनुसभाविभूति-
स्पर्धासमुत्पादितपातकेन ।
च्युता सुधर्मेव दिवः पृथिव्यां
शुभा सभाकारि सुयोधनेन ॥ २ ॥

धुनीतनूजे मयि च स्थितेऽन्त-
र्नैवानयः स्यादिति संप्रबोध्य ।
दुरोदरार्थं विदुरो निषेधन्
नृपेण पार्थानयने नियुक्तः ॥ ३ ॥

हरित्वरापीतमहत्पथेन
रथेन धीमान् व्यथमानचेताः ।
तत् खाण्डवप्रस्थपुरं स हस्ति-
पुराज्जवेनोपपुरादिवाप ॥ ४ ॥

कृत्वा सुहृद्द्यूतकृते कुरूणां
प्रभुः सभामाह्वयते द्रुतं त्वाम् ।
इत्युक्तवन्तं विदुरं प्रपूज्य
इसन्निवाचष्ट तपस्तनूजः ॥ ५ ॥

वशंवदं द्यूतगुणेन वेद्मि
छद्मैतदातन्यत सौबलेन ।
युद्धे रजय्यो हि यथा तथापि
जेयो रिपुः स्यादिति साधु तद्धीः ॥ ६ ॥

जयाजयाख्यातुषि संयतीव
द्यूतेऽपि हूतो न निवर्तते यः
स सर्वगोत्रैकपतिस्ततोऽह-
मेष्यामि तस्यां पुरि यद्भविष्यः ॥ ७ ॥

इत्येव निश्चित्य सहानुयातैः
कृष्णापुरोगैरनुजैश्चतुर्भिः ।
रथस्थितो हस्तिपुरं प्रतस्थे
क्रीडालये भानुरिवापराब्धिम् ॥ ८ ॥

पितामहद्रोणविचित्रवीर्य-
पुत्रादिपूजाकृतकृत्यमेतम् ।
दुर्योधनः पूजयति स्म बाह-
मेधक्रतौ बाहमिवार्चनीयम् ॥ ९ ॥

अथापरेद्युर्धृतराष्ट्रभीष्म-
मुख्यैर्वृतायामभितः सभायाम् ।
दुर्योधनो धर्मसुतेन रन्तुं
सारैः शकुन्यन्तरितः प्रवृत्तः ॥ १० ॥

अष्टापदाष्टापदमूर्ध्नि यात्य-
मानो समुत्पाद्य मुहुस्तदाक्षो ।
युधिष्ठिरश्रीहरणे प्रवृत्तो
वृत्तो स्वनैस्तेनतुरट्टहासम् ॥ ११ ॥

गृहान्तरारोपणसारबुद्ध-
घात्कारभारप्रतिमाददम्भात् ।
भविष्यदात्मप्रभुमृत्युदुःखा-
च्चक्रार हाकारमहो सभापि ॥ १२ ॥

सारा दधुः केऽपि कुभूपमृत्यु-
ध्यानैकतानाः किल कालिमानम् ।
भेजुः पृथासूनुविभूतिकृष्टि-
ध्यानेन मन्येऽरुणरूपमन्ये ॥ १३ ॥

उत्थापितारोपितबद्धमुक्तैः
श्यामैश्च रक्तैश्च नृपैरिवैतौ ।
सारैर्विचिक्रीडतुरेकचित्तौ
गमं चरेऽप्यादधतावलत्यम् ॥ १४ ॥

हाकारधिक्कारपरेषु धर्म-
पुष्टेषु दुष्टेषु च हर्षितेषु ।
यद्यत् पृथाभूः पणतां निनाय
जिगाय तत् तच्छकुनिश्छलज्ञः ॥ १५ ॥

Digitized by Google

पराजितीभूतसमस्तराज्य-
भरोऽप्यसंभावितरोषदोषः ।
पणेन बन्धूनपि हारयित्वा
स्वं हारयामास स धर्मसूनुः ॥ १६ ॥

सा विद्यतेऽद्यापि तवैव कृष्णा
द्यूतं तया क्रूरपणं विधेहि ।
अपीति पार्थं प्रति धार्तराष्ट्रे
वदत्यमर्षी विदुरो जगाद ॥ १७ ॥

रेरेऽन्धसूनोऽन्धविवेक केयं
क्रूरा कुलोच्छेदकरी मतिस्ते ।
स्वमृत्यवे केसरिणोऽङ्घ्रिघाते-
रमून् किमुत्थापयसि प्रसुप्तान् ॥ १८ ॥

जन्मक्षणोत्थवनजास्थिवृष्ट्या
ज्ञातोऽपि पापान्धतमेन पित्रा ।
न जातमात्रोऽपि हतोऽसि हा धिक्
शशाङ्कवंशैकघुणस्त्वमेव ॥ १९ ॥

कालक्षयस्रः स्वकुले भवन्तं
मत्वा भविष्यन्तमतिप्रमत्तम् ।
जगत्त्रयीप्रीतिकरो बभार
प्रागेव देवः कलुषत्वमन्तः ॥ २० ॥

रे कौरवाः क्रूरविपाकमन्त-
र्दुष्टं क्षयं वो मरणाय जातम् ।
उन्मूल्यतामेष विशेषशस्त्र-
कर्मप्रगल्भैर्यदि जीवितेच्छा ॥ २१ ॥

इत्यालपत्यालमिवालमस्मिन्
हसन्निवाचष्ट वशंवदात्मा ।
पणीकृता धर्मसुतेन कृष्णा
जितेयमेवं शकुनिर्बभाषे ॥ २२ ॥

दासीयमासीदिति धार्तराष्ट्रः
स्वं प्रातिकामाख्यमयुङ्क्त सूतम् ।
आनेतुमेतां द्रुपदस्य पुत्रीं
कुलक्षयायेव विषस्य वल्लिम् ॥ २३ ॥

निवेद्य वृत्तान्तमथामुनेय-
माहूयमानेति जगाद कृष्णा ।
स्वं हारयित्वा पणितां नृपेण,
जेता जयेत् तामिति पृच्छ सभ्यान् ॥ २४ ॥

इत्युक्तिमागत्य वदत्यमुष्मिन्
दुर्योधनो द्रागनुजं न्ययुङ्क्त ।
समानयेनामजयं जयं वा
सभ्यान् स्वयं पृच्छतु संसदीति ॥ २५ ॥

एह्येहि दासी त्वमसीति कोपात्
दुःशासने जल्पति तत्र याते ।
अन्तःपुरान्तः कुरुपुंगवस्य
गन्तुं प्रवृत्तातिभयेन कृष्णा ॥ २६ ॥

क्व यासि दासि त्वमिति क्रुधान्धो
वदन्ननूत्पत्य कचैर्गृहीत्वा ।
चकर्ष कृष्णामधमोऽयमात्म-
द्रोही स्वकानामिव कालरात्रिम् ॥ २७ ॥

स्त्रीधर्मनिर्मापितपारवश्यां
मां मेति कर्षेति शनैर्वदन्तीम् ।
इमां विशेषात् स चकर्ष हर्ष-
परः किमुद्भ्रान्तहृदामकृत्यम् ॥ २८ ॥

गृहीतदुर्योधनशासनेन
दुःशासनेन प्रसभेन कृष्टाम् ।
आलोक्य तां तत्कुलकालवह्नि-
धूम्यामिवाक्रम्यत राजलोकः ॥ २९ ॥

देवव्रतद्रोणकृपेषु कोऽपि
स्वेदः कुलैकक्षयसूचकोऽभूत् ।
सभाजनः किंच चकार हाहा-
कारस्वरैकार्णवमन्तरिक्षम् ॥ ३० ॥

अधोमुखो निःश्वसितप्रवाह-
संप्लाव्यमानोदररोमराजिः ।
तत् कर्म पश्यन् विदुरो दुरन्तं
शिरो धुनीते स्म धृतं कराभ्याम् ॥ ३१ ॥

वह्न वणोऽप्यस्फुटितं स्फुटाश्म-
रूपं स्मरन्तः स्वमुरो नरेन्द्राः ।
दुःखानलप्लुष्टमतीव चूर्णी-
कर्तुं जलैर्दृग्गलितैरसिञ्चन् ॥ ३२ ॥

Digitized by Google

महीभुजां कौरवपक्षभाजां
मुखेष्वराजन्त महाट्टहासाः ।
आसन्नसंभावितजीवितव्य-
प्रयाणभेरीप्रणादप्रकाशाः ॥ ३३ ॥

तां वीक्ष्य भीमः कुपितो बभाषे
युधिष्ठिर द्यूतकरौ करौ ते ।
धक्ष्यामि साक्षात् सहदेव वह्निं
यच्छेति कोपे सति को विवेकी ॥ ३४ ॥

ऐन्द्रिस्तमाचष्ट चिराद्विवेक-
निधे धियस्ते किमु विप्लवन्ते ।
अस्मान् विभुः सत्यधृतव्रतो य-
दहारयद्भीम यशस्करं तत् ॥ ३५ ॥

इत्यर्जुनोक्त्या शमभाजि भीमे
दुःशासनः संसदमानिनाय ।
तां याज्ञसेनीं प्रसभात्दकीर्ति-
प्रतानिनीकन्दलवत् कुरूणाम् ॥ ३६ ॥

रजस्वला संसदमेकवासा
विकञ्चुका तेन शठेन नीता ।
सा रोषरूक्षं कृपणं च चक्षु-
स्त्रपानतेषु न्यधित प्रियेषु ॥ ३७ ॥

जितासि किं दासि विलोकसेऽमून्
दुर्योधने निक्षिप मङ्क्षु चक्षुः ।
दुःशासनेनेत्यभिलोडितासौ
सती नमस्कृत्य गुरून् जगाद ॥ ३८ ॥

विष्णोः सखीं पार्षतभूपपुत्रीं
पाण्डोर्धरित्रीकमितुर्वधूटीम् ।
दासीति किं मामयमाह धर्मं
विचार्य वार्यः कुमतिर्भवद्भिः ॥ ३९ ॥

भीष्मो बभाषेऽथ तवाभिभूत्या
कुलक्षयं चेतसि चिन्तयन्तः ।
वत्से वयं मूढहृदो न विद्म-
स्त्वत्प्रश्नमप्यादृतधर्मशास्त्राः ॥ ४० ॥

द्यूते जितास्माभिरसौ न वेति
दुर्योधन पृच्छति धर्मतत्त्वम् ।
सभ्येषु भीत्या खलु यद्वदेषु
प्रोचे विकर्णो धृतराष्ट्रसूनुः ॥ ४१ ॥

सभ्या भयं किं भवतां विभाव्य
धर्मक्रमं ब्रूत यथार्थमेव ।
जितेन राज्ञा पणिता जितासौ
न स्याद्ध्रुवं पञ्चवशा हि कृष्णा ॥ ४२ ॥

इत्यस्य वाचं चिरमभ्यनन्दन्
सभ्या नृपः किंतु रुषाभ्यधत्त ।
विकर्ण नो वेत्सि जितैव कृष्णा
प्राक् क्लृप्तसर्वस्वपणेन साकम् ॥ ४३ ॥

अस्त्राणि वस्त्राणि च पाण्डवानां
जितानि च स्वीकुरु को विलम्बः ।
पञ्चप्रियायाः प्रसभादसत्या
गृहाण वासश्च विचित्रमस्याः ॥ ४४ ॥

अनेकभार्यापि बहुत्वपापं
गीयेत या गौरिव राजतेऽसौ ।
वासस्तदस्या रभसेन कर्ष
गावोऽधिकं भान्ति विनांशुकेन ॥ ४५ ॥

इत्यस्य वाक्यादपि पाण्डुपुत्रा
मुक्तोत्तरीयाः सदसि व्यराजन् ।
समुज्झिताः शारदवारिदौघैः
कराः खरांशोरिव विस्फुरन्तः ॥ ४६ ॥

विचित्रवीर्याङ्गजनिर्विशेषं
सभाजने तत्क्षणमीलिताक्षे ।
दुःशासनः शासनतोऽङ्गभर्तु-
श्चकर्ष चीरं द्रुपदाङ्गजायाः ॥ ४७ ॥

कुतूहलोत्तानदृताशनैष-
रपूर्णवाञ्छै रिपुभिर्न्यरूपि ।
आविर्भवन् नूतनमेव वास-
स्तद्रूपमाच्छादितरूपमस्याः ॥ ४८ ॥

यथा यथासौ वसनं चकर्ष
तथा तथात्युज्ज्वलमाविरासीत् ।
नवं नवं तत्र सुवृत्तभाजि
जवेन वाप्यामिव वारि हारि ॥ ४९ ॥

Digitized by Google

अनुज्ञया चीवरकर्षणस्य
मुहुर्मुहुः कम्पि शिरः कुरूणाम् ।
अस्त्राधिदेवैरिव पाण्डवीयैः
प्रारब्धमुन्मूलयितुं रराज ॥ ५० ॥
अतिप्रकर्षेऽशुककर्षणाना-
ममर्षतोऽभाषत भीमसेनः ।
अनध्वनीनां श्रवणाध्वनीनां
मम प्रतिज्ञां शृणुत क्षितीशाः ॥ ५१ ॥
दुःशासनस्यास्य विदार्य वक्षः
पिबामि नासृक् चुलकत्रयं चेत् ।
लिप्ये तदस्यैव दुराशयस्य
पापेन साध्वीपरितापजेन ॥ ५२ ॥
देव्या मणीभासुरदिव्यवासो-
राशिस्तदा संसदि कृष्टमुक्तः ।
बभौ महीयान् धृतराष्ट्रवंश-
दाहाय दावाग्निरिव स्वयंभूः ॥ ५३ ॥
दुःशासने चीवरकर्षखिन्ने
ह्रिया निषण्णेऽथ वधूः पृथायाः ।
अनाथवन्नाथवतीं सतीं मा-
मयं ह हाकर्षदिति व्यलापीत् ॥ ५४ ॥
सूतात्मजस्तामथ भाषते स्म
क्व ते सतीत्वं प्रचुरप्रियायाः ।
जितेत्यनाथासि तदाशु नाथ-
वती भवैकं वृणु कौरवेषु ॥ ५५ ॥
वदत्यदः सूतसुते मदान्धः
पापाश्चिरं चोपविशेति जल्पन् ।
मूर्खो मुमूर्षुर्द्रुपदात्मजाया
दुर्योधनोऽदर्शयदूरुदेशम् ॥ ५६ ॥
क्रुधोच्छ्वसन् कर्णमुखारिरन्ध्र-
कीर्णाग्निकीलोऽभ्यधिताथ भीमः ।
विनिर्यदौर्वाग्निशिखो युगान्त-
विमुक्तमर्याद इवाम्बुराशिः ॥ ५७ ॥
आस्फालयंश्चीरमपोह्य यं रे
प्रदर्शयः संसदि यज्ञजायाः ।
दुर्योधनाजौ गदयानयाहं
तं वाममूरुं तव चूर्णयिष्ये ॥ ५८ ॥
इत्युन्नदन्तं दृढकोपपिष्ट-
दन्तं निरूप्य प्रसरन्मदं तम् ।
कम्पं दधुः केचन विष्टरेभ्यः
पेतुः परे मूर्च्छनमापुरन्ये ॥ ५९ ॥
अद्यैव वा श्वोऽप्यथवायमेव
कालः कुरूणां कुमते गुरूणाम् ।
एवं बभूवुर्विदुरापगेय-
शारद्वतद्रोणमुखेषु वाचः ॥ ६० ॥
मुखेन मुञ्चन् शिखिनः शिखौघं
वदन्निवाशेषकुलस्य दाहम् ।
तदग्निहोत्रे कुरुपार्थिवस्य
गोमायुरुच्चैः स्वरमुन्ननाद ॥ ६१ ॥
मत्वेत्यरिष्टं विदुरो दुराशा-
मुन्मुच्य भीक्षुभितचित्तवृत्तिः ।
कदर्थितस्वान्तमकीर्तिशब्दै-
र्दुर्योधनं धीनयनो जगाद ॥ ६२ ॥
ज्येष्ठस्य बन्धोर्दयिता स्वसेव
मातेव वन्द्यैव यथा तथास्तु
सतीव्रतस्तुत्यपदां सदोऽन्त-
रिमां किमित्थं तु वदस्यबुद्धे ॥ ६३ ॥
त्वं तेजसा स्वेन सतीमयेन
वत्से जगद्भस्मयितुं समर्था ।
न दुर्नयेऽस्मिन्नपि कोपनासि
तुष्टोऽस्मि पाञ्चालि वरं वृणीष्व ॥ ६४ ॥
अथावदत् पाण्डवधर्मपत्नी
तव क्रतौ भूमिभुजः समस्ताः ।
यस्याययुः कर्मसु किंकरत्व-
मकिङ्करः सोऽस्तु तपस्तनूजः ॥ ६५ ॥
वृणु द्वितीयं वरमित्यमुष्य
गुरौ पुनर्जल्पति सा जजल्प ।
अमी सहास्त्रा रथिनः परेऽपि
भवन्त्वदासा नृप पाण्डुपुत्राः ॥ ६६ ॥

Digitized by Google

निमज्जतामापदि पाण्डवाना-
मसौ भृशं नीरजनिष्ट कृष्णा ।
इत्युक्तय: सभ्यजनस्य भीम-
क्रोधानलान्तर्दधुरिन्धनत्वम् ॥ ६७ ॥

स्त्री नौ: किमस्मासु विपत्पयोधिं
वयं तरामो भुजलीलयैव ।
एष द्विषो हन्मि रुषेति जल्पन्
गदामुदस्योत्थित एव भीम: ॥ ६८ ॥

तं वीक्ष्य दुर्योधनकर्णदु:शा-
सनादिषु द्वेषिषु कम्पितेषु ।
धृत्वा भुजे धर्मसुतस्तमेषां
वधान्तरायं रचयांचकार ॥ ६९ ॥

प्राक् सुयोधनवधोद्धुतानुज-
क्रोधरोधमधुरे युधिष्ठिरे ।
भारतीमथ विचित्रनन्दन-
श्चन्दनद्रवनिभामभाषत ॥ ७० ॥

वत्स मत्सरिषु हूच्छारायित-
क्रूरदूरवचनेषु वल्गुषु ।
विष्टपानि रुषि दग्धुमीश्वर:
को न कुप्यति महासहायवान् ॥ ७१ ॥

मुञ्चतीन्दुमणिरप्यहो महा-
घर्षणेन तमसि स्फुलिङ्गकान् ।
ईदृशोपशमचारुचेतस:
कस्तवोपमितिमेतु हेतुभि: ॥ ७२ ॥

सोदरै: सह हसत्प्रदीधिति-
स्पर्धिवर्धितमहो महोद्यमै: ।
अद्रियस्व निजराज्यमुज्ज्वलं
पावनीं कुरुकुलावनीमिमाम् ॥ ७३ ॥

सद्गुरूक्तमिव चिन्तत: क्वचि-
न्नोपकारमवतारयन्त्यहो ।
अर्थिदत्तमिव वित्तमुत्तमा
न स्मरन्त्यपकृतं परै: कृतम् ॥ ७४ ॥

संसहस्व कुनयं सुयोधने
स्वानुजैर्व्रज निजां पुरीमपि ।
सा पृथाभव भवद्वियोगिनी
क्लेशलेशविवशा भविष्यति ॥ ७५ ॥

तूर्णमित्ययमनुज्ञया पितु:
स्वं पुरं प्रति चचाल धर्मसू: ।
सोदरै: सह मुहुर्मुहुर्महा-
मर्षनिश्वसितहर्षितायुधै: ॥ ७६ ॥

रोषदोषकलुषा: प्रयान्त्यमी
तात मृत्युरयमात्मन: कुले ।
तै: समं समरकर्म दुष्करं
द्यूतमेतदिह वर्ततां पुन: ॥ ७७ ॥

द्वादशैव शरदो वनावनीं
ते व्रजन्त्वजिनवाससो जिता: ।
खञ्जना इव शुचौ पयोदशे
गुप्तमेव विचरन्तु वत्सरे ॥ ७८ ॥

इत्यजेयसमरो भवामि ते-
र्द्वादशाब्दबलवद्बलोच्चय: ।
एवमङ्गजगिरा कुरुद्रुहो
धर्मनन्दनमजूहवत् पुन: ॥ ७९ ॥

विशेषकम् ।

क्षत्रधर्ममधिकृत्य धर्मसू-
र्यद्वविष्यहृदय: सभां गत: ।
निर्जित: शकुनिना दुरोदरे
सोदरै: सह वनाय चेलिवान् ॥ ८० ॥

दत्तराज्यविभव: सुयोधने
कृत्तिचीवरधरो युधिष्ठिर: ।
शैलकाननविलासमानस:
शंकरप्रियमशिश्रियत् तदा ॥ ८१ ॥

पाण्डवाननु यतीमथावदद्
द्रौपदीमिति सुयोधनानुज: ।
मुञ्च पञ्च दयितानकिंचना-
नेकमेव वृणु कौरवेश्वरम् ॥ ८२ ॥

पावनिस्तमवदत्त्वतुद्भृशे
वत्सरे निबिडमत्सरेरित: ।
त्वत्पदाकौरवशतार्पितक्रम:
कौरवेशमुकुटे नटाम्यहम् ॥ ८३ ॥

कृत्तिवेष्टितवपुः किमच गो-
गौरयं वदति काननोषितः ।
एवमुद्गिरि सुयोधनानुजेऽ-
ह्रासि कर्णशकुनिक्षितीश्वरैः ॥ ८४ ॥
हन्तुमुग्रतरमन्तुकारिणः
कर्णसौबलकशेषभूपतीन् ।
प्रत्यजानत धृतक्रुधस्त्रय-
स्तेऽपि संसदि वृकोदरानुजाः ॥ ८५ ॥
वीक्ष्य कानपि विनम्य कानपि
स्वान्तचिन्तिततदङ्गमङ्गलान् ।
साग्रहस्य विदुरस्य मन्दिरे
ते विमुच्य जननीमथाचलन् ॥ ८६ ॥
अभिवाद्य पदद्वयं वधूं
चलितां कृच्छ्रमथावदत् पृथा ।
कुसुमास्तरवृन्तभीरु ते
भविताङ्गं सति कर्करातिथिः ॥ ८७ ॥
सुकुमारतयानयाश्मयद्
घुसृणं मौक्तिकमण्डनानि च ।
रविधाम सहिष्यते कथं
भवती स्वेदलवांश्च सा वने ॥ ८८ ॥
जगदेकजितोऽपि यान्त्वमी
सति सत्यव्रतपालिनो वनम् ।
प्रतिपालय मामिहैकिकां
किमु वत्से त्वमपीति मुञ्चसि ॥ ८९ ॥
भवदीयमुखेन्दुनामुना
विकसत्कोमलकान्तिना विना ।
नकुल क्व कुलैककैरव-
प्रतिमं मेऽक्षि विकाशमेष्यति ॥ ९० ॥
यदि सत्यमपालि सोदरै-
र्नियतं पालितमेव तत् त्वया ।
त्वमिहैव कृतस्थितिः शुचः
सहदेव प्रियपुत्र पाहि माम् ॥ ९१ ॥
सकृपः कृतदुर्नयेऽप्यरौ
विजयिन् यः समभूः सभाभुवि ।
अकृपः स कथं स्थितोऽधुना
रुदतीं मां न दृशापि पश्यसि ॥ ९२ ॥
जतुमन्दिरतो विकृष्य मां
निजपृष्ठेन वहन्नहर्निशम् ।
किमु भीम गतस्तदा खिदां
यदिदानीं रुदतीं विमुञ्चसि ॥ ९३ ॥
निजमौलिमणीगणोन्मृजा-
शुचिशोभेषु नमन्नहर्मुखे ।
मम पादनखेषु को युधि-
ष्ठिर कर्ता वदनावलोकनम् ॥ ९४ ॥
उपलानपि सा विलापिनी-
त्यवशारोदयदश्रु नाद्भुतम् ।
यदशोच्यत तैस्तदा सुयो-
धनदुःशासनकर्णसौबलैः ॥ ९५ ॥
अधिपाः किमु यान्त्यमी ह हा
वनभूमीमिति नागरो जनः ।
सकलोऽपि रुरोद रोदसी-
दरदूरोदरपूरणारवः ॥ ९६ ॥
माहं दृथा कुपितया धृतराष्ट्रराष्ट्र-
दाहाय भूवमतिदम्भगृहीतराज्यः ।
इत्येष चीरपिहितास्यविभातिभूत-
जीमूतगोपितविधुः प्रचचाल राजा ॥ ९७ ॥
कालेन कालकवलीकरवैरवार्त-
मेतेन कौरवकुलं कलहोत्कटेन ।
विस्तार्य बाहुयुगमित्यगमन्निकाम-
कोपारुणोरुनयनः पवनाङ्गजन्मा ॥ ९८ ॥
एवं किरन् शरकदम्बकमाम्बिकेय-
सेनासु दुर्धरधनुर्धरधैर्यरोधम् ।
युद्धे करोम्यहमिति प्रववर्ष गच्छन्
विष्वक् शतक्रतुसुतः सिकतावितानम् ॥ ९९ ॥
आच्छिद्य मेदुरदुरोदरदम्भजृम्भ-
माणप्रभावबलिनं युधि सौबलेयम् ।
स्याद्युक्तमस्य विशदत्वमिति स्वमास्यं
लिप्त्वा मषीभिरगमत् सहदेववीरः ॥ १०० ॥

Digitized by Google

रङ्गत्यरातिनिकरे चिरमङ्गमङ्ग
शृङ्गारितं भुजभृतां निभृतं न भाति ।
इत्यङ्गनाजनमनोरमरूपरोचि-
र्धूलीविलेपशबलो नकुलो जगाम ॥ १०१ ॥
इत्यातुरं विशतु हस्तिपुरं पुरन्ध्री-
वर्गा दिनैः कतिपयैरपि कौरवाणाम् ।
इत्याललाप बहुशापमबद्धकेशा
सा पाण्डुपुत्रसुदती रुदती प्रवासे ॥ १०२ ॥
अल्पैरहोभिरिति कौरवकैरवाल्यो
गीतानि बिभ्रतु शपन्निति कोपशोणः ।
धौम्यो जगौ परिपतन् पथि याम्यरौद्र-
सामानि नैर्ऋतदिगुद्धृतदर्भपाणिः ॥ १०३ ॥
उत्पाताः शतशोऽभवन् पुरि समागत्य स्वयं नारदो
वंशोच्छेदमथादिशत् कुरुपतेश्चिन्ताज्वलच्चेतसः ।
तद्भीत्येव समागतेषु शरणं दुर्योधनाद्येषु च
द्रोणो वीररसैकवार्धिरभयं दत्वास्तजन्मङ्गलम् ॥ १०४ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
तत्कीर्त्त्यौकसि बालभारतमहाकाव्ये द्वितीयं सभा-
पर्वैतत् कविगर्वपर्वतपविः प्राप्तं समाप्तेः पदम् ॥ १०५ ॥
अमुष्मिन् पञ्चभिः सर्गैः सभापर्वण्यनुष्टुभाम् ।
जातानि अधिकाशीतिसंयुतानि शतानि षट् ॥ १०६ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-बालभारतनाम्नि महाकाव्ये वीराङ्के सभापर्वणि पाण्डवप्रवासो नाम पञ्चमः सर्गः ॥ ५ ॥ :: :: ::

॥ अथ बालभारतस्यारण्यपर्वारम्भः ॥

॥ तत्र प्रथमः सर्गः ॥

रामादपि श्लाघ्यगुणः श्रियेऽस्तु
व्यासो मुनिः श्रीदयितावतारः ।
विनिर्मितो येन परार्थमेव
भवार्णवे भारतसेतुबन्धः ॥ १ ॥
अथेन्द्रसेनादिभिरिन्द्रसेना-
जयेऽप्युदारैः सह चारिदारैः ।
भक्तैश्चतुर्भिर्दशभिश्च पार्था
वीरै रथस्थैः पथि पर्यचारि ॥ २ ॥
वैचित्र्यवा नु प्रहितं विचित्रं
रथादिसत्कारमवाप्य पार्थाः ।
संबोध्य संमान्य निवर्त्य पौरां-
स्तच्चित्तचौरा ययुरभ्युदीचीम् ॥ ३ ॥
योगेद्धया धर्मसुतोऽनुगामि-
द्विजव्रजायैसरशौनकोक्त्या ।
शुचं निशायाममुचत् त्रिमार्गा-
तटे प्रयागस्य वटे स्थितोऽसौ ॥ ४ ॥
श्रीविप्रयुक्तेन च भूरिविप्र-
युक्तेन च क्षोणिभुजा विभासे ।
अनव्ययरूपा रसवत्यथापि
धौम्योपदिष्टेन रवेः स्तवेन ॥ ५ ॥
सरस्वतीमुख्यसरस्वतीभिः
श्लाघ्यं कुरुक्षेत्रमुपास्य भूपः ।
दुरोदरं दूरतरं प्रशंसन्
स जग्मिवान् काम्यककाननाय ॥ ६ ॥
आस्थाय पन्थानमिह प्रथीयान्
स्थितो निशीथे बकदैत्यबन्धुः ।
किर्मीरवीरः समवर्तिसख्य-
वर्ती रणोऽकारि बकारिणाशु ॥ ७ ॥
निन्द्योऽर्चनं द्योतयिता कथं ते
सूनुः कलेरंश इति त्यजामुम् ।
इत्यादिवादी विदुरो निरस्तः
प्रज्ञादृशा प्राप वनेऽत्र पार्थान् ॥ ८ ॥
संमानितो बन्धुवियोगतप्त-
धीदृष्टिदिष्टेन स संजयेन ।
पुनः पुरेऽगाद्विदुरोऽन्धपुत्र-
कुमन्त्रबोधार्थमभीष्टपार्थैः ॥ ९ ॥
घात्या विसैन्या रिपवोऽधुनेति
कर्णोक्तिभिः पार्थवधाय धावन्
अनीतिपङ्के किमु मज्जसीति
व्यासेन रुद्धोऽथ सुयोधनो द्राक् ॥ १० ॥

पार्थाग्निशिखासु कराहतोरुं
निरादरं संसदि कौरवेन्द्रम् ।
शशाप मैत्रेयमुनिर्मरुद्भू-
गदाहतोरुर्भव संयतीति ॥ ११ ॥
पार्थे वनं द्वैतवनं गतेऽथ
मित्राणि धात्रीपतयः समीयुः ।
हृदि प्रविष्टे प्रशमे समन्ताद्
गत्वा गुणानामिव गौरवाय ॥ १२ ॥
यो राजसूयावभृथार्द्रमौलि-
र्यो धर्मसूर्यो मतधर्मतत्त्वः ।
शुचां शुचीनामिव तत्प्रसङ्गाद्
भागं गृहीत्वा क्षितिपैर्गतं तैः ॥ १३ ॥
देशाय सूनुर्द्रुपदस्य साकं
कृष्णासुतैः पञ्चभिरञ्चति स्म ।
तदा यदूनां च विभुः सुभद्रा-
भिमन्युयुक्तोऽगमदुग्रमन्युः ॥ १४ ॥
प्रमोदवल्लिं द्विषदुग्रदाव-
दग्धां प्ररोहाभिमुखीं प्रतन्वन् ।
कृष्णो मुनिर्मेघ इवेत्य पार्थे
प्रतिस्मृतिं नाम ववर्ष विद्याम् ॥ १५ ॥
सरस्वतीसङ्गसदापवित्रं
गतास्ततः काम्यककाननं ते ।
प्रतिस्मृतिं साधयितुं किरीटी
जगाम जाग्रन्महिमा हिमाद्रिम् ॥ १६ ॥
ददाह संक्रन्दननन्दनस्य
दिनैश्च कैश्चिद्दववद्वियोगः ।
मनो वनोर्व्यां विततानि तेषां
श्रीशोषशोकद्रुमकाननानि ॥ १७ ॥
वृत्तान्तरे शान्तरसः शरीरी
श्रीलोमशो नाम दिवोऽवतीर्णः ।
ववर्ष देवर्षिवरः कृतार्थे
कर्णानुजे कर्णरसायनं गाम् ॥ १८ ॥
त्वं वर्धसे धर्मतनूज दिष्ट्या
धन्योऽसि मन्यस्व जितानरातीन् ।
जगत्त्रयीजैत्रभुजस्य भीमा-
नुजस्य राजन्नमरास्त्रलाभैः ॥ १९ ॥
गतो हिमाद्रेस्तटमिन्द्रकील-
मिन्द्रेण विप्राकृतिना तपोऽर्थे ।
विमोचितोऽप्यस्त्रमसावमुञ्चन्
स्फुटात्मनाभाषि शिवं भजेति ॥ २० ॥
तपोवनं चारु ततो गतोऽसौ
तपःस्थितो वासविरेकमासम् ।
दिनत्रयानन्तरपारणानि
चकार कारुण्यकलः फलानि ॥ २१ ॥
परं तपस्तत्र ततो वितन्वन्
परंतपः किंचिदचिन्तनीयम् ।
प्रकाशयामास स मासमात्रं
षड्वासरीपारणकं फलानि ॥ २२ ॥
सृजन्नथो मासमुदासवृत्ति-
र्वपुष्यपि क्षीणयशास्तपांसि ।
बभञ्ज पक्षान्तरितानि शीर्ण-
पर्णान्यपर्णापतिदत्तचित्तः ॥ २३ ॥
स्वयं मरुद्भिः परितः स्फुरद्भिः
कृताहुतिर्मासि ततश्चतुर्थे ।
निष्कम्पमूर्ध्वं दधदङ्गमङ्गी-
चकार ताराणि तपांसि पार्थः ॥ २४ ॥
हिमाद्रिशृङ्गाणि हिमार्दितानि
रसादसाराणि विमुच्य चक्रुः ।
नीलाश्मशृङ्गभ्रमतस्तदङ्गे
दिग्दन्तिनो दन्तहतीरतीव ॥ २५ ॥
रजस्तमोलङ्घनजाङ्घिकेन
क्रोडीचकाराशु हृदा तदानीम् ।
सत्त्वं स्थितं मूर्तमिवाष्टमूर्ति-
र्जगत्त्रयीमूर्तिमसौ महेच्छः ॥ २६ ॥
तेनाथ तीव्रव्रतलीलयैव
निहन्यमानैरिव भीतभीतैः ।
तस्मिन् प्रदेशे सकलोऽप्यमोचि
द्वेषादिदोषैरसुमत्समूहः ॥ २७ ॥

Digitized by Google

पुच्छं चमर्यास्तरुगुच्छलग्न-
ममोचयत् सिंहयुवा नखाग्रैः ।
श्रान्तं रतान्ते कलविङ्कयुग्मं
सर्पैर्मृदु व्यज्यत फूत्कृतेन ॥ २८ ॥
शुष्यज्जलादाशु तटादुदस्य
तिमिर्दकेऽमोचि बकेन भूरो ।
अपाययन्मातृवियुक्तमेण-
मेणारिनारी कृपया पयांसि ॥ २९ ॥
समं समग्रैर्ऋतुभिर्व्यभूषि
वनावनी तत्र विमुक्तवैरैः ।
आविर्बभूवार्जुनमर्जुनस्य
यशो लतापुष्पततिच्छलेन ॥ ३० ॥
अंसद्वयोत्तंसकृपाणचापं
निषङ्गयुग्मव्यतिषङ्गिपृष्ठम् ।
तपांसि तादृंशि च तप्यमानं
तं वीक्ष्य विक्षोभमगुर्दिगीशाः ॥ ३१ ॥
प्रीतोऽद्भुतैस्तस्य तपोभिरेभिः
कुतूहली सत्त्वविलोकनाय ।
तत्राययौ सानुचरः किरात-
रूपं विरूपाक्षविभुर्विभाव्य ॥ ३२ ॥
स्वसंमुखं क्रूरतरस्तरस्वी
मूकासुरः शूकरमूर्तिरुद्यन् ।
पुरः शरेणाशु तवानुजेन
जघ्नेऽनुजघ्ने शशिशेखरेण ॥ ३३ ॥
अयं मयाङ्गीकृत एव कोलः
कुतस्त्वयाहन्यत हन्मितत् त्वाम् ।
इत्युक्तिभिर्दूतमुखोदिताभिः
पार्थं रणार्थं विभुराबभाषे ॥ ३४ ॥
अथोदितास्त्रे शशिभृत्किरीट-
भिल्ले किरीटी भुजभृत्किरीटः ।
आरोप्य चापं रचयांचकार
ब्रह्माण्डमुन्मण्डपमेव काण्डैः ॥ ३५ ॥
तेनेषुजालेन भिया कराले
त्रस्ते समस्ते गणचक्रवाले ।
प्रभावतस्तस्य धनुर्निषङ्गा-
द्दूरोऽहरद्विस्मितमानसस्य ॥ ३६ ॥
कोशादथाकृष्य कृपाणमुद्य-
त्पाणिः प्रतापी प्रति तं किरातम् ।
तत्रानुजो भानुजयोग्रजाग्र-
द्दृग्दीप्तिसंदीप्तदिगुच्चचाल ॥ ३७ ॥
हृते कृपाणेऽप्यकृपाणि पाणि-
पातैः क्षिपन्मङ्क्षु शिलाकुलानि ।
भीमानुभूरेष पुरो रुरोध
क्रोधैकवीरः प्रधनेऽन्धकारिम् ॥ ३८ ॥
क्षीणद्रुपाषाणगणायुधोऽथ
प्रफुल्लमल्लत्वविधिः स धीरः ।
करेण धृत्वा चरणे स्मरारि-
मविभ्रमज्जैत्रपटीमिवाक्षो ॥ ३९ ॥
चूलागलद्गाङ्गजलः कपाली
शूली जटालः स्फुटबालचन्द्रः ।
प्रत्यक्षतां तस्य गतस्त्रिनेत्रः
क्षणेन सत्त्वप्रसरेण तुष्टः ॥ ४० ॥
पृथाभवाय प्रथितस्तवाय
ततः प्रभुः पाशुपतास्त्रमस्मै ।
अमानवक्षेप्यमदात्मदान्ध-
सुरासुरश्रेणिजयोज्ज्वलश्रि ॥ ४१ ॥
दास्यत्यसौ नः सुपतीनितीव
देवीभिरभ्यार्चि स पुष्पवृष्ट्या ।
तदा द्युलक्ष्मीमदगर्जिताभो
नभोऽन्तरा दुन्दुभिरुन्ननाद ॥ ४२ ॥
एष प्रसन्नैरथ पर्यवारि
वृन्दारकैरिन्द्र इवेन्द्रसूनुः ।
ददत्युदात्ते सुमनस्त्वभाजः
प्रभोः सुतेऽपि प्रभुवत् प्रभुत्वम् ॥ ४३ ॥
प्रस्वापनास्त्रं धनदः प्रचेताः
पाशान् ददौ दण्डधरश्च दण्डम् ।
जगज्जयाशीर्भिरुदारवीर-
मुदीरयन्तः स्वयमित्यमुष्मै ॥ ४४ ॥

Digitized by Google

धन्योऽधुना मातलिसारथौ तं
रथेऽधिरोप्य प्रथमानमानम्[1] ।
द्विषन्निकायद्रुतसूदनाय
द्युनायकः स्वर्भुवनं निनाय ॥ ४५ ॥

अर्धासने तं विनिवेश्य शक्रः
किमेतदेतत् परिपृच्छतो मे ।
साक्षान्नराख्यानयुतं समस्त-
मिदं चरित्रं कथयांचकार ॥ ४६ ॥

सगद्गदस्मेरमुखे सहर्ष-
दृग्बद्धबाष्पाम्भसि हृष्टरोम्णि ।
ईदृक्चरित्रश्रवणामृतौघ-
मग्नाशये भूभुजि सानुजेऽपि ॥ ४७ ॥

पुनर्मुनीन्द्रो निजगाद राजन्
भूतीर्थयात्रासु मयि प्रवृत्ते ।
इदं मदीयेन मुखेन पार्थः
कृतप्रणामस्तव संदिदेश ॥ ४८ ॥
युग्मम् ।

संवत्सरैः पञ्चभिरुत्प्रपञ्च्य
दिव्यास्त्रचक्रं रचितेन्द्रकार्यः ।
श्वेताद्रिमौलौ भवदङ्घ्रिपद्म
रोलम्बयिष्यामि शिरोजराजीः ॥ ४९ ॥

तस्मिन्निति व्यक्तगिरि प्रमोदं
प्रपद्य पृथ्वीपतिरित्युवाच ।
त्वया करिष्ये सह तीर्थयात्रां
प्रसीद सीदन्तु ममाद्य संघाः ॥ ५० ॥

श्रीलोमशेनानुमते मतेऽस्मिन्
वृद्धं जनं काम्यकतो निवर्त्य ।
स्थितस्त्र्यहं पर्वतनारदादि-
कथाभिरुद्वेषहृदेष पार्थः ॥ ५१ ॥

नृपोऽन्वहं वर्त्मनि लोमशेन
धौम्येन चादिष्टविशिष्टतत्त्वः ।
चचाल पूर्वां प्रति मार्गशीर्षी-
विरामपुष्योदयवासरेऽसौ ॥ ५२ ॥

सस्नानदानार्चितविश्वतीर्थः
पार्थः पथा नैमिषकाननस्य ।
सोद्रेकगङ्गायमुनाम्बुसेकं
प्रयागमागःक्षयदक्षमागात् ॥ ५३ ॥

महानदीभाजमयं गयाद्रि-
मगात् पवित्रं शिरसा गयस्य ।
अब्दस्तदा ग्रीष्मजयेन गर्जन्
विभूषयामास नभोऽन्तरालम् ॥ ५४ ॥

धौम्योऽथ पार्थं निजगाद धर्म्या
न युज्यते पार्थिव तीर्थयात्रा ।
वर्षासु वर्षाम्बुवशप्रभूता-
विर्भूतजीवाकुलभूमिकासु ॥ ५५ ॥

क्ष्मापाल कालः पुनरेष रम्यः
स्थानस्थितानां न तु यात्रिकाणाम् ।
दृक्प्रीतिकृद्दृश्यसमस्तवस्तु-
र्जम्बालजालाम्बुकरालवर्त्मा ॥ ५६ ॥

तथाहि पश्याब्दमृदङ्गनादै-
र्नृत्यन्ति नूनं नृपदिक्पुरन्ध्र्यः ।
आसामतश्चञ्चलरत्नभूषा-
विभासिभा भात्यचिरप्रभासौ ॥ ५७ ॥

श्रौर्वाग्निकीला नियतं पयोधेः
समं पयोभिः पपिरे पयोदैः ।
एतास्तदेतेषु तडिद्वितान-
च्छलाज्ज्वलन्त्युज्ज्वलदिग्विभागाः ॥ ५८ ॥

उत्तेज्यते मन्मथसैनिकास्त्र-
गणोऽब्दशाणेषु तडिन्मिषेण ।
तस्य स्फुलिङ्गैरिव पश्य पिङ्गै-
र्द्योतिः खद्योतकुलैश्चलद्भिः ॥ ५९ ॥

पतिर्द्युतीनां पिहितः पयोदै-
स्तत्कान्तयस्तद्दिवि तद्वियुक्ताः ।
भ्रमन्ति मूर्च्छन्ति पतन्ति वात-
वीचीचलन्नीपरजोऽपदेशात् ॥ ६० ॥

जित्वा दवाग्नीन् निजधर्मपुष्ट-
द्रुमद्रुहः पश्य मुदाम्बुदानाम् ।

1—मेनम् इति पा० ।

गजोदृहासैर्हंसतां लसन्ति
दन्ता इवैता धवला बलाकाः ॥ ६१ ॥
नायं पयोदोऽर्जुन एष नील-
द्युतिर्दिवोऽभ्येति तडित्किरीटी ।
धारापदेशान्नृप दर्शयंस्ते-
भ्यस्तेषुपातान् कलितेन्द्रचापः ॥ ६२ ॥
निरीक्ष्य नीराणि पतन्ति गर्भा-
धानस्य बीजानि भुजंगमीनाम् ।
विभाव्य संभावि सुभिक्षमेते
नदन्ति नृत्यन्ति च नीलकण्ठाः ॥ ६३ ॥
सुजातिभाजः समयस्य राज-
न्नमुष्य पुत्री: सरितो रसाढ्याः ।
समुद्वहन्तस्त्रपया महान्तः
पयोधयः संप्रति संकुचन्ति ॥ ६४ ॥
वियोगिनीहृद्दलदारणाय
दधाति कामः क्रकचानि कामम् ।
उत्कण्टकान्यागतभृङ्गसङ्ग-
नीलस्फुटत्केतककैतवेन ॥ ६५ ॥
गूढाङ्ग्रयः पङ्कपरंपरासु
श्यामाः स्वरामाविरहातिदुःखैः ।
फूत्कारिणो मार्गवशेन वक्रं
सर्पन्ति सर्पा इव पश्य पान्थाः ॥ ६६ ॥
कृतां पयोदैः सरितं स्मराज्ञा-
रेखामिवोल्लङ्घितुमप्यशक्ताः ।
प्राणान् परित्याजयितुं नदद्भि-
र्हृता इवैते पथि पार्थ पान्थाः ॥ ६७ ॥
पान्थस्य दुःखं नलिनस्य नाशं
जलस्य मालिन्यमिनस्य लोपम् ।
पश्याम मा स्मेति विशुद्धपक्षाः
प्रागेव जग्मुर्नृप राजहंसाः ॥ ६८ ॥
सुप्तोऽधुना विष्णुरितीव तीव्र-
मयूखपीयूषमयूखबिम्बे ।
तल्लोचने रोचयतो न रोचि-
श्चयेन विश्वं तिमिरार्तमेतत् ॥ ६९ ॥

स विश्वनाथः स्वपिति स्म पार्थे
तीर्थानि सर्वाण्यपि यन्मयानि ।
इहैव तत् संप्रति तिष्ठ तस्मिन्
विद्राणनिद्रे कुरु तीर्थयात्राम् ॥ ७० ॥
इत्युक्तिभिर्धौम्यपुरोहितस्य
नृपश्चतुर्मासमुवास तत्र ।
मठद्विजास्यादशृणोच्च वृत्तं
राजर्षिराजस्य गयस्य विश्वम् ॥ ७१ ॥
पश्यन्नगस्त्याश्रमदुर्नेयादि-
तीर्थान्यथो पार्थिवपुंगवोऽसौ ।
पुरातनानां चरितानि शृण्वन्
जगाम गङ्गान्वितसागराय ॥ ७२ ॥
तस्मिन् कृती पञ्चनदीशतेषु
स्नातो गतः पुण्यफलः कलिङ्गान् ।
अद्वैतधीर्वैतरणीं स्रवन्ती-
मुत्तीर्य तेने पितृतर्पणानि ॥ ७३ ॥
उत्पन्नमत्राखिललोकवृत्त-
विलोकनज्ञानममुष्य राज्ञः ।
तथाशृणोत् सप्तिसहस्रगव्यू-
त्यन्तर्गतानां यमिनां जपं सः ॥ ७४ ॥
दानं ददद्भार्गवसङ्गमाय
गिरा मुनीन्दोरकृतव्रणस्य ।
अथ स्थितः कश्यपवेदिकायां
चतुर्दशीं यावदसौ नरेशः ॥ ७५ ॥
नत्वाथ भास्वन्महसं महेन्द्र-
महाद्रिमौलौ भृगुनन्दनर्षिम् ।
सोणीसमुख्यो दिशि दक्षिणस्यां
परिस्रुतं नाम नदीं जगाम ॥ ७६ ॥
गोदावरीस्नानकरीकृतश्री-
रगस्त्यतीर्थं द्रविडेषु नत्वा ।
पराक्रमं शक्रसुतस्य नारी-
तीर्थेषु नत्वा स ययौ प्रभासम् ॥ ७७ ॥
आनन्दसंवादविशारदाभ्यां
रामाच्युताभ्यां परिपूजितेन ।

Digitized by Google

तत्र स्थितं भूमिभुजा समीर-
पयोभुजा द्वादश वासराणि ॥ ७८ ॥

ततो विदर्भेषु गतः स तेने
स्नानं पयोष्णीसरितः पयोभिः ।
तत्र स्थितः शक्रसहासनस्थं
त्वानेन दृष्ट्वानुजमुन्मदोऽभूत् ॥ ७९ ॥

आननं द्रुपदराजसुतायाः
सर्वतीर्थविहितस्नपनायाः ।
यद्व्यलोकि कमलैः क्व तदेषां
प्रीतये भवतु शीतमरीचिः ॥ ८० ॥

ददत् प्रतिपदं मुदा द्विजजनाय दानान्ययं
नयं च जनयन् जनैर्जगति धर्मवीरोत्तमः ।
उपास्य परितोऽप्युदक्ककुभि सर्वतीर्थावलीः
सुबाहुपुरमासदत् तदनु मेदिनीकामुकः ॥ ८१ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के आरण्यके पर्वणि ती-
र्थोपासनो नाम प्रथमः सर्गः ॥ १ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

कनीनिकीभवन् ध्यानदृशि दर्शयतां सताम् ।
संसारपारावारस्य पारं पाराशरो मुनिः ॥ १ ॥

व्यासादासाद्य तत् कर्णविषं पार्थकथानकम्[1] ।
दिनानि तानि गान्धारीजानिर्दुःखादवाहयत् ॥ २ ॥

ततश्चरणचारेण वैचित्रतनयास्तु ते ।
परिमुक्तरथा युक्तं चेलुर्भूभृद्विभुं प्रति ॥ ३ ॥

भूधराधिपतिभानिभालनो-
त्तालभालतरलं विलोचनम् ।
लोमशस्तदनु सोमवंशजं
चित्तवल्लभमभाषत चित्तैः ॥ ४ ॥

शैलाधिपोऽयमिह राज्यमपास्य पाण्डु-
स्तस्थौ चिरं तव पिता मृगयाविरक्तः ।

1—कथामिषम् इति पा० ।

तत्कृप्रनिर्भरतपःप्रभवैर्यशोभिः
शुभ्रैर्विभाति वपुरस्य सुधांशुशुद्धम्[1] ॥ ५ ॥

ध्रुवमवनिधरादृतः पितुः स्वात्
किमपि वशीकरणौषधं गृहीत्वा ।
अहरत वपुरर्धमेव गौरी
पदमदित द्युधुनी तु मूर्ध्नि शंभोः ॥ ६ ॥

नृपाल बालश्चिरमद्रिभर्तुः
क्रोडेऽस्य विक्रीडितवान् यतस्त्वम् ।
तत् त्वद्वियोगैरिव तापितोऽयं
प्रालेयजालानि तनौ तनोति ॥ ७ ॥

मूलप्रतेदृक्प्रुतिविश्वगर्भे
प्रत्यन्तशैलप्रभवैर्भुवोऽन्तः ।
शिरश्च्युतैरस्य हिमाम्बुपूरै-
रन्तर्महद्वेश्म ररङ्ग गङ्गा ॥ ८ ॥

ग्रीष्मे दिवाकरकरप्रकरार्दितानां
मध्यंदिनेषु नृप किंनरदंपतीनाम् ।
अस्मिन् गलत्तुहिनबिन्दुकदम्बकानि
धारागृहश्रियमयन्ति गुहागृहाणि ॥ ९ ॥

तपसि दृढतरो दधाति मूर्ध्ना
विबुधमणीन् वहति क्षमां समन्तात् ।
धरणिधर भवन्तमित्यवश्यं
सुहृदमिवेक्षितुमेष नित्यमूर्ध्वः ॥ १० ॥

हेलाविलङ्घितहिरण्मयरत्नशृङ्गाः
शृङ्गारभासुररुचः सहचारिकान्ताः ।
कान्तारभूवसतयोऽत्र चरन्ति सारं
सारङ्गचञ्चलदृशो मरुतां महेलाः ॥ ११ ॥

रत्नावनीरुचिचयेन मिथोऽप्यलक्ष्या-
वेकत्र वासरसिकाविह हर्म्तिसिंहौ ।
जानन्तु मुग्धहृदया इति किं नु वेद्मि
तादृक्तपोधनतपःप्रभवं प्रभावम् ॥ १२ ॥

बहुकासारः सारः
सारस्वतवारिभिर्महानेष ।

1—शुभ्रम् इति पा० ।

निजकान्तारं तारं
तारं वहति व्रजं मरुताम् ॥ १३ ॥

उत्तीर्य तूर्णतरमङ्कतटात् तटिन्यः
पेतुः सुता इव गिरेरिह पादपीठे ।
तल्लब्धरत्नमयभूषणभारभाजो
गच्छन्ति विस्तृतरसा दयितं पयोधिम् ॥ १४ ॥

विश्वैकचक्षुशरणागतमन्धकारं
संरक्ष्य भानुमति वीक्षणभाजि शैलः ।
भ्रान्त्वा दिनं गतवतीह गुहागृहान्त-
राकृष्य मुञ्चति निशि ज्वलितौषधीकः ॥ १५ ॥

भात्येष मेरुरुचिरोऽपि नमेरुशोभी
कृत्स्नामिलामपि वहन्ननिलाभिरामः ।
सव्यालवालमपि चन्दनपादपानां
नव्यालवालमभितो वहते समूहम् ॥ १६ ॥

खेलत्यन्तर्वनस्यास्मिन् रतिभूतरुचारुणः ।
सुरौघः श्रीसखो रत्नैरतिभूतरुचारुणः ॥ १७ ॥

वन्येभप्रकरकराग्रभग्नवंश-
प्राग्भारप्रभवनवीनमौक्तिकोऽयम् ।
कान्तारप्रसवपरागपिङ्गमूर्ति-
र्नक्षत्रावलिवृतमेरुवद्विभाति ॥ १८ ॥

भित्त्वा भित्त्वा कुवलयदलश्यामभासः सशब्दा-
नब्दानस्मिन् गुरुतरशिलासङ्गसंपीडिताङ्गः ।
सारङ्गाणामपि पतिरपि प्रत्यहं हन्ति जातं
मातङ्गानां नहि गुरुरवं संनिधावप्यशङ्कम् ॥ १९ ॥

करिपरिणतदन्ताभ्याससंभग्नशृङ्ग-
च्युतमणिचयमिश्रैरस्य पूरैर्नदीनाम् ।
अपि मृगमृगनाभिभ्राजमानान्तराले-
रुदधिरजनि रत्नस्थानकं मेचकस्य ॥ २० ॥

धूमायमान इव लोलपयोदजालैः
कीलानुबद्ध इव रत्नशिरःसमूहैः ।
स्फारस्फुलिङ्ग इव कान्तिपिशङ्गपक्षि-
व्यूहैरयं वियदुदन्वति वाडवाग्निः ॥ २१ ॥

अस्मिन् महीभृति महाकटकाभिरामे
तुङ्गा विभान्ति शिखराः किल धीरवीराः ।
मौलिस्थितद्रुममिषेण धृतातपत्राः
क्रीडद्भुजंगकपटप्रचलत्कृपाणाः ॥ २२ ॥

गोप्रसङ्गोज्ज्वलच्छायो हरिच्छविपरिच्छदः ।
एष भूमीधरो भाति जगत्त्रितयवस्तुवत्* ॥ २३ ॥

लसन्नीलग्रावच्छविभरविनीलेऽम्बरतले
सदा वर्षाहर्षादिह तटवनेषु क्षितिभृतः ।
समीरप्राग्भारप्रहतनिपतन्निर्झरकणै-
र्मयूरा नृत्यन्ति स्फुरति परितश्चातकचयः ॥ २४ ॥

चूलाचञ्चन्मणिगणविभाकृष्टकोदण्डकेलिः
कीलालोलस्फुरदुरुतडिद्दम्भदम्भोलिशोभी ।
कालेनाब्दच्छलनवभवत्पक्षपक्षोऽयमद्रि-
र्जैत्रं शत्रुं हरिमिव पराजित्य जग्राह शस्त्रे ॥ २५ ॥

प्राचीमञ्चति चण्डरोचिषि चिरे प्राप्ते प्रतीचीं प्रति
प्रातः शीतकरे करैरुभयतो गाङ्गेयभङ्गोज्ज्वलः ।
हैमं कुण्डलमेकतः कलयतः कापालमप्यन्यतो
भूतेशस्य वधूविभक्तवपुषः सैष श्रियं पुष्यति ॥ २६ ॥

त्वद्बन्धुबन्धुरतपोवशदर्शितात्मा
जामातृसङ्गमसुखानि चिरादवाप ।
अभ्यापतन्तमयमित्यधुना भवन्तं
लीलाभिराह्वयति शाखिशिखाङ्गुलीभिः ॥ २७ ॥

इति लोमशोक्तिभिरयं नृपतिः
कुतुकी विलोकयितुमेवमगम् ।
अकृत द्रुतामपि गतिं बत यां
अदधायि सापि बरला पतिभिः ॥ २८ ॥

पुरश्चरद्भीमपदान्तघात-
समीकृतोरुस्वपुटोपलेन ।
पथारुरोहाथ धराधरं तं
धराधवोऽन्यैरनुगम्यमानः ॥ २९ ॥

गन्धमादनवनान्तयायिनो
वायुवर्धितरजोऽम्बुवृष्टिजम् ।

१–शिखा–इति पा० ।

* अनन्तार्थोऽयं श्लोकः ।

घ्नन्ति विघ्नमथ कुञ्जपुञ्जिता
ध्यानशुद्धशुचिचेतसः स्म ते ॥ ३० ॥
आकुले द्विजकुले पथि वध्वां
पातभाजि नकुलेन धृतायाम् ।
अस्मरच्च मनसाथ मरुद्भू-
राजगाम च घटोत्कचवीरः ॥ ३१ ॥
व्योमाङ्गणायसरलोमशदर्शितेन
मार्गेण मेघपरिरब्धतडिल्लताभाः ।
ऊढा घटोत्कचचमूसुभटोच्चयेन
शैलेन्द्रमूर्धनि ययुर्बदरीवनं ते ॥ ३२ ॥
पतिभ्यो निर्विशेषायाः कृष्णायाः सुखदुःखयोः ।
सत्याः स्नानेन गङ्गा स्वं तत्र पुण्यममन्यत ॥ ३३ ॥
कृष्णा तत्र कृतानल्पा कल्पा बिन्दुसरोऽम्बुजैः ।
मुदा मुकुरयामास कैलासस्य गिरेः शिलाः ॥ ३४ ॥
सप्तमेऽह्नि कैलासतटे स्वमुखबिम्बवत् ।
पूर्वोत्तरमरुत्कृष्टं कृष्णा हेमाब्जमैक्षत ॥ ३५ ॥
अब्जानि मह्यमीदृंशि यच्छेति प्रेरितस्तया ।
मारुतिः पितृभक्त्येव मरुतः संमुखोऽचलत् ॥ ३६ ॥
गन्धमादनमारुह्य मुह्यद्गन्धर्वगुह्यकम् ।
सशङ्खनादं नादं स चक्रे चकितदिग्गजम् ॥ ३७ ॥
वसन्निह वने हेमकदलीखण्डमण्डने ।
तद्ध्वानजाग्रदुत्तानसंभ्रमो हनुमानभूत् ॥ ३८ ॥
पुच्छाच्छोटेन स पविप्रहारं स्मारयन् गिरिम् ।
उत्तस्थौ कुम्भकर्णादीन् नाकस्थानपि कम्पयन् ॥ ३९ ॥
मत्वायान्तमथ घ्राणाद्गान्धर्वं गान्धवाहिना ।
तस्थे तस्य प्रियाकर्तुं संकटे पथि सुप्तवत् ॥ ४० ॥
खिन्नो भीमः सुसंरम्भाद्धेमरम्भावनाध्वनि ।
क्वापि तापं सरस्यौज्झत् पानस्नानैर्द्विपेन्द्रवत् ॥ ४१ ॥
गच्छन् पुरः कपीन्द्रं तमथ रुद्धमहापथम् ।
स हेमाद्रिमिवाद्रीन्द्रसेवायातमलोकयत् ॥ ४२ ॥
अपसर्पेत्वसौ मार्गादिति मारुतिरुन्नदन् ।
तूर्णं घूर्णोत्पतन्मुह्यज्जीवक्लीबमगं व्यधात् ॥ ४३ ॥
अथोन्मील्य दृशौ किंचित् किंचिदाकुञ्च्य कन्धराम् ।
मन्दं मन्द इवोवाच वानरोऽयं नरोक्तिभिः ॥ ४४ ॥

महात्मन इवाकारस्तवाचारस्तु नीचवत् ।
यतो वृथा व्यथापात्रं जीवान् जनयसि स्वनैः ॥ ४५ ॥
निद्रागुणगणक्षीणरोगभोगपृथुव्यथम् ।
किं मां जागरयन् मूढ कृतवान् सुकृतं भवान् ॥ ४६ ॥
मर्त्योऽस्यमर्त्यदेशोऽयं निवर्तस्व क्रिमत्र ते ।
सुखं निद्रां करोम्येष सुखं जीवन्तु जन्तवः ॥ ४७ ॥
निजं कुलं स कार्यं च प्रथयित्वा पृथासुतः ।
ययाचे वैरिमन्थानः पन्थानमथ वानरम् ॥ ४८ ॥
ऊचे कपिरपि स्वात्मस्थानाच्चेन्मां न लङ्घसे[1] ।
तद्गच्छ पुच्छमुत्क्षिप्य रुग्णोऽहं चलनाक्षमः ॥ ४९ ॥
नात्मवान् लङ्घनीयः स्यादस्य पुच्छमुदस्य तत् ।
इतो यामीति भीमस्तदुत्क्षेप्तुमकरोत् करम् ॥ ५० ॥
अक्षमः स तदुत्क्षेप्तुमहं दृष्टोऽस्मि केनचित् ।
इति दिक्षु विपन्नाक्षि कपिना तेन भाषितः ॥ ५१ ॥
लज्जतां मा स्म सामीरे यदहं भवदग्रजः ।
वत्स त्वद्दर्शनोत्कण्ठी प्राप्तः श्रीरामकिंकरः ॥ ५२ ॥
अथानन्दपरिस्यन्दस्यन्दमानस्वमानसः ।
बकारिः शिरसि न्यस्य पाणी वाणीमिमां जगौ ॥ ५३ ॥
मायालब्धमपि प्रेक्ष्य त्वां प्रीतोऽस्मि दृढं प्रभो ।
अतिप्रीणय मामब्धिजयोग्रस्फूर्तिमूर्तिभृत् ॥ ५४ ॥
कल्पान्तक्रमवर्धितानलभयं भ्रान्तद्युसद्मानवं
रुक्मच्छन्नशिरःकिरीटतिलकग्रीवामणिद्योमणि ।
रोमस्तोमशिखातिखर्वितनगं निःसीम भीमस्तदा-
पश्यद् भ्रातुरकातरेण मनसा तद्वर्धमानं वपुः ॥ ५५ ॥
नासाश्वासवशोदरागतमुहुर्यातोडुजातो मुख-
श्वासव्यासनतोन्नतक्षितिधृतिव्यग्रोरगग्रामणीः ।
अङ्गव्याप्तिसमाप्तभुवनो नाद्यापि यत्रच्युत-
स्वेदार्णःकणवर्णमर्णवमसावैक्षिष्ट किं वर्ण्यताम् ॥ ५६ ॥
तत्पुच्छाहतिनिम्नभूतलपथात् पाथोऽभवन्निम्नगा-
स्तच्छ्वासाज्जलधेर्गतैरित इतोऽर्णोभिश्च सप्तार्णवाः ।
तद्धूत्कारबलात् तदा स्फुटितवत्यद्रीन्द्रवृन्दे गुहा-
विद्धे व्योमनि तत्तनूरुहमुखैश्छिद्राणि कच्चच्छलात् ॥ ५७ ॥

---

१ स्वात्महितं चे- इति पा० ।

कृतं तत्तेजोभिः किमपि रथपृष्ठे प्रसृमरं
स्वबिम्बस्यच्छायावलयमवलोक्य द्युतिपतिः ।
चसन् राहुभ्रान्त्या समुपहसितो दूरगतिना
मृगाङ्केण स्वाभिः सह सहचरीभिः खलु तदा ॥ ५८ ॥

कर्णनासाननच्छिद्रैः पञ्चग्रासीकृताम्बरः ।
स बभौ ब्रह्मचारीन्द्रः कपीन्द्रो मरुतां मुदे ॥ ५९ ॥

अदर्शि दर्शनीयं ते रूपं कपिकुलोत्तम ।
भाति यद्वर्णने दीना मुनीनामपि कापि वाक् ॥ ६० ॥

मानहीनस्तवाकाशप्रासादः स्वर्धुनीध्वजः ।
तमेकादशरुद्र द्राङ्मुञ्च चञ्च सतां हृदि ॥ ६१ ॥

कौन्तेयमिति जल्पन्तं द्रागल्पितवपुः कपिः ।
आलिलिङ्ग च सानन्दबाष्पो मूर्ध्नि चुचुम्ब च ॥ ६२ ॥

ऊचे च त्वमभीतो मद्रूपं भीतेन्द्रमैचथाः ।
उत्तारणीयमात्मानं तद्वीर्यस्यादधे मुदा ॥ ६३ ॥

अद्यादि सिंहनादस्ते मन्नादेन विमिश्रितः ।
भविता वैरिमर्मविद्विषलिप्रः शरो यथा ॥ ६४ ॥

स्वयं रणाङ्गणे स्फूर्जन्नर्जुनस्यन्दनध्वजे ।
करिष्ये बाढबूत्कारैर्गतबोधान् विरोधिनः ॥ ६५ ॥

इत्युक्त्वास्मिन्नदृश्यत्वं हनूमति गते सति ।
भीमस्याभूत् तदा दुःखप्रमोदरससंकरः ॥ ६६ ॥

ततो निशातधीः शातकुम्भरम्भावनावनौ ।
हेमपद्मनदीयोगि सोऽगात् सौगन्धिकं वनम् ॥ ६७ ॥

तत्रैलविलशैलाग्रवननिर्झरसंभवाम् ।
सुवर्णपद्मिनीं रक्षोरक्षितामयमैचत ॥ ६८ ॥

तस्यां पद्मानि कान्तास्यश्रीसद्मानि निरीक्ष्य सः ।
प्रियामनोरथोऽपूरि मयेत्युत्पुलकोऽभवत् ॥ ६९ ॥

भविष्यद्वल्लभापाणिस्पर्शात् पुलकिते करे ।
तामब्जिनीं स जग्राह रक्षारक्षःक्षयक्षमः ॥ ७० ॥

मिलद्भिः पलभुग्योधैररोधि क्रोधिभिः पुनः ।
उद्यद्भिर्वियदग्रं स मशकैरिव कुञ्जरः ॥ ७१ ॥

उग्रभ्रमित्वराटोपचक्राकारविडम्बिनीम् ।
स गदां भ्रामयामास मूर्ध्नि दैत्यभयंकरीम् ॥ ७२ ॥

तस्मिन् याति तदा तेनुः शिलावर्षाणि राक्षसाः ।
तान्यस्मिन्नपतन् कान्तामुक्तलीलारबिन्दवत् ॥ ७३ ॥

अथोत्पातेषु जातेषु कृष्णादिष्टेन वर्त्मना ।
राजा घटोत्कचव्यूढस्तत्रागात् सपरिच्छदः ॥ ७४ ॥

प्रबोध्य द्विषिरक्षांसि भीमं भूमिपतिः स्वयम् ।
समाश्लिष्यन्नसंतप्तं चक्रे रविमिवाम्बुदः ॥ ७५ ॥

कल्याणकदलीखण्डचारुतामोहितास्ततः ।
तत्रैवास्थुरमी राज्यसंपद्यपि निरादराः ॥ ७६ ॥

शंसन् भास्करशिष्यं स्वं जटाशाली जटासुरः ।
विप्रवेषी छलान्वेषी तानुपेत्येह तस्थिवान् ॥ ७७ ॥

घटोत्कचान्विते भीमे मृगयायां गतेऽन्यदा ।
भुजद्वयवियुक्तेव रेजे यौधिष्ठिरी चमूः ॥ ७८ ॥

एधिष्यन् भीमकोपाग्नेः प्राग् हृत्वास्त्राणि मायया ।
क्षणेऽस्मिन् पाण्डवान् कृष्णायुतान् जह्रे जटासुरः ॥ ७९ ॥

संस्तम्भितगतिं राज्ञा माद्रेयक्षोभितं च तम् ।
चक्रे यमपुरीपान्थं द्रुतमन्वेत्य मारुतिः ॥ ८० ॥

अमी पुनः समागत्य नरनारायणाश्रमम् ।
श्वेताश्वदत्तसंकेताश्चतुर्वर्षीमपूरयन् ॥ ८१ ॥

ते मृगीकण्ठकण्डूभिर्मृगारातिनखाङ्कुरम् ।
ततोऽगमन् शमिपतेराश्रमं वृषपर्वणः ॥ ८२ ॥

स्थित्वा नृपोऽत्र सप्ताहं सत्कृतो वृषपर्वणा ।
भास्वानिव सहस्यान्तेऽचलत् प्रत्युत्तरां दिशम् ॥ ८३ ॥

ततः किरीटिसंपर्कमनोरथमिवोज्ज्वलम् ।
श्वेताद्रिमारुरोहाह्नि चतुर्थे पार्थपार्थिवः ॥ ८४ ॥

अथ गौरीनवोद्वाहप्रसन्नशिवसेवितम् ।
ते ययुः कृतमेरुश्रीनन्दनं गन्धमादनम् ॥ ८५ ॥

कीरोक्तिभग्नसंदेहपठद्वटुकमण्डले ।
महर्षेरार्ष्टिषेणस्य तत्र ते तस्थुराश्रमे ॥ ८६ ॥

पञ्चवर्णदलैः पुष्पैः समीरणसमीरितैः ।
कृष्णाथ लोभिता भीमं प्रैषीत् तद्ग्रहणेच्छया ॥ ८७ ॥

अथाधिरुह्य शैलाग्रमालोक्याग्रेऽलकां पुरीम् ।
स नादक्षोभितोदन्वदम्बुकम्बुमवादयत् ॥ ८८ ॥

तदा तदाननं तादृक्कम्बुचुम्बितवैभवम् ।
मरालभ्राजिराजीवभ्रमतः शिश्रिये श्रिया ॥ ८९ ॥

त्रुट्यत्तारातिचस्यदक्षोश्वस्तस्य कम्बुभूः ।
नादो विघटमानेन्दुकलासंधिरवर्धत ॥ ९० ॥

नादस्तत्कम्बुभूर्भूभृद्गुहोद्गतप्रतिस्वनः ।
दिशि क्वासौ बभूवेति निश्चिकाय न कश्चन ॥ ६१ ॥

तासु प्रतिध्वनत्कम्बुध्मानश्चलासु बिम्बितः ।
प्रीतो भीमः प्रियादेशात् कोटिर्मूर्तिरिवाभवत् ॥ ६२ ॥

हनुमन्नादमिश्रेण सिंहनादेन मोहयन् ।
गन्धर्वान् पुष्पपङ्क्तिं तां सोऽग्रहीद्गन्धमादनात् ॥ ६३ ॥

गन्धमादनवनाधिपालकः
कोपमाप्य मणिमान् महाबलः ।
भीमदक्षिणकरव्यथाकर-
क्षिप्रशक्तिरमरैरनूयत ॥ ६४ ॥

स्वव्यथाहितरुषेव बाहुना
दक्षिणेन हठदक्षिणेन सः ।
चित्रगुप्तकरमार्जिताभिधं
तं व्यधादथ समीरनन्दनः ॥ ६५ ॥

आर्ष्टिषेणमुनिसद्मनि कृष्णां
न्यस्य बन्धुभिरसावथ वन्ने ।
आययौ हतपलादकुलोक्ति-
क्रोधतश्च धनदः प्रधनाय ॥ ६६ ॥

प्रेक्ष्य पाण्डवमपोह्य च रोषं
गुह्यकाधिपतिरेतदवोचत् ।
पुण्यमस्ति मयि नूनमुपेतो
यः स्वयं त्वमिह धर्मतनूजः ॥ ६७ ॥

भूचक्रशक्र मम केलिवनान्यमूनि
नित्यं कृतार्थय यथासुखखेलनेन ।
अत्रैव ते निवसतो मधुसेकमेक-
मासेन दास्यति दृशोस्त्रिदशेन्द्रसूनुः ॥ ६८ ॥

इत्युक्त्वा स्वपदं गते सति धनाधीशे धनाधीश्वरो
भीमं वीररसैकनिर्मितमिवाश्लिष्य प्रशान्तिं नयन् ।
संप्राप्य पुनरार्ष्टिषेणसविधे मासावधिं तन्मय-
ध्यानोऽयं निरवाहयद्गुरिसुतप्रेक्षाक्षणोत्कण्ठितः ॥ ६९ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आरण्यकपर्वणि हिमवदधिरोहणो नाम द्वितीयः सर्गः ॥ २ ॥ :: ::

॥ खण्डप्रशस्तिः ॥

(२) चन्द्रादित्योरुनेत्रः कमलभवभवस्फारपृष्ठप्रतिष्ठो
भास्वत्कालाग्निजिह्वः पृथुलगलगुहादृष्टनिश्शेषविश्वः ।
अद्भिः पुच्छोत्थिताभिश्चकितसुरवधूनेत्रसंसूचिताभि-
र्मत्स्यश्छिन्नाब्धिवेलं गगनतलमलं क्षालयन्वः पुनातु ॥

मत्स्यः मत्स्याकृतिर्भगवान् वः युष्मान् पुनातु पवित्रीकरोतु, किं कुर्वन्, गगनतलं अलमत्यर्थं क्षालयन्, कीदृग्गगनतलम्, छिन्नाब्धिवेलं छिन्नाद्द्वैधीकृताः पुच्छचापल्येन आकाशं गच्छन्त्योऽन्तरालेऽब्धिवेलाः समुद्रजलवृद्धयो यस्मिन् तत्, इदं क्रियाविशेषणं वा । काभिः क्षालयन्, अद्भिः पानीयैः, कीदृशीभिः, पुच्छोत्थिताभिः पुच्छादुत्थिताभिः तादृक्समुद्राच्छोटनादुद्गताभिः, पुनः किंविशिष्टाभिः, चकितसुरवधूनेत्रसंसूचिताभिः चकितानि भयविह्वलानि यानि सुरवधूनामप्सरसां नेत्राणि तैः संसूचिताभिः सविस्मयं दृष्टाभिः, कीदृशो मत्स्यः, चन्द्रादित्योरुनेत्रः चन्द्रश्चादित्यश्च चन्द्रादित्यौ तावेव उरुणी गरिष्ठे नेत्रे यस्येति, पुनः किंविशिष्टः, कमलभवभवस्फारपृष्ठप्रतिष्ठः कमलभवभवा वेदास्तेषां स्फारेगरिष्ठे पृष्ठे स्वपृष्ठप्रदेशे प्रतिष्ठा स्थानं यस्येति, अत्राम्नायः पुराहि शङ्खदैत्यो ब्रह्मणः सकाशाद्वेदान् लात्वा समुद्रस्य शरणं गतः ततस्त्रयस्त्रिंशत्कोटिदेवविज्ञप्त्या कृष्णेन मात्स्यं रूपं धृत्वा दैत्यं निहत्य समुद्राद्वेदाः स्वपृष्ठे क्षिप्त्वा समानीता इति, अथ वा कमलभवाद् ब्रह्मणस्सकाशाद् भवमुत्पन्नं ब्रह्माण्डं तस्य स्फारे विस्तीर्णे पृष्ठे प्रतिष्ठा यस्य सः, अतिमहागरिष्ठरूपत्वाद् ब्रह्माण्डं मत्स्यपृष्ठे लग्नमस्तीति भावः । यद्वा, कमलभवो ब्रह्मा तद्भवो महेशस्तद्वत् स्फारा बहुला पृष्ठे प्रतिष्ठा यस्येति, पुनः किंविशिष्टः, भास्वत्कालाग्निजिह्वः भास्वान् देदीप्यमानो यः कालो यमः, स च ज्जगज्जन्तुदाहकत्वेनाग्निरिवाग्निः स एव जिह्वाऽस्येति, पुनः किंविशिष्टः, पृथुलगलगुहादृष्टनिश्शेषविश्वः पृथुलगलगुहायां विस्तीर्णकण्ठकुहरे अदृष्टं निश्शेषं विश्वं जगद्यस्येति, सर्वस्यापि जगतो गलगुहायां निक्षिप्तत्वात्परैरदृश्यमानतेति भावः । अथवा पृथुलगलगुहायां दृष्टं निश्शेषं विश्वं यस्मिन् सः ॥ २ ॥

(३) जीयासुः शकलाकृतेर्भगवतः पुच्छच्छटाच्छोटना-
दुद्यन्तः शतचन्द्रिताम्बरतलं ते बिन्दवः सैन्धवाः ।
यैर्व्यावृत्य पतद्भिरोर्वशिखिनस्तेजोजटालं वपुः
पानाध्मानवशादरोचकरुजां चक्रे चिरायास्पदम् ॥

Digitized by Google

शकलाकृतेर्मत्स्याकृतेर्भगवतः पुच्छच्छटाच्छोटनात् पुच्छच्छटाभिर्यदाच्छोटनमितस्तत आलोडनं तस्माच्छतचन्द्रिताम्बरतलं यथास्यात्तथा शतचन्द्रितं शतमित्युपलक्षणं अनेके संजाताश्चन्द्रा अस्येति तारकादित्वादितच् ततः शतचन्द्रितमम्बरतलं शतचन्द्रिताम्बरतलं तलशब्दोऽत्रोपरितनभागवाची आदर्शतलादिवत्, उत्क्रान्तऊर्ध्वं गच्छन्तस्ते सैन्धवाः सिन्धौ भवाः सैन्धवाः भवार्थे अण् बिन्दवः पृषतो जीयांसुः, ते इति के ये बिन्दुभिः प्रागाकाशं गच्छद्भिः पश्चाद्व्यावृत्य निवृत्य पतद्भिः और्वशिखिनो बाडवाग्नेस्तेजोजटालं तेजांस्येव जटा अस्येति तत्, प्राणिस्थादातोलजन्यतरस्यामितिमत्वर्थीयो लच्, तेजोव्याप्तमिति भावः । ईदृग्वपुः शरीरं अरोचकरुजां अरुचिरोगाणां चिराय चिरकालं आस्पदं स्थानं चक्रे, कथमरुचिर्जातेत्याह । पानाध्मानवशादिति, पानेन अतिजलपानेन अध्मानमग्निसंयोगाभावः । "ध्माशब्दाग्निसंयोगयोरिति" तद्वशादन्योऽपि यस्तावृड्ड्दाघज्वरादिरुगाक्रान्तो बहुपानीयं पिबति तस्य पश्चात्पानीयस्यारुचिर्जायते तथैतस्येति भावः । अथवा पानेनातिजलपानेनाध्मानवशाद् वातव्याकोपवशादरोचकरुजां चिरायास्पदं चक्रे, अतिपानेनाध्मानमरुचिश्च जायते इति निदानविदः ॥ ३ ॥

(४) दिश्याद्वः शकलाकृतिः स भगवान्नैश्श्रेयसीं सम्पदं
यस्य स्फूर्जदतुच्छपुच्छशिखरप्रेङ्खोलनक्रीडनैः ।
क्षुभ्यद्वार्धिसमुच्छलज्जलभरैर्मन्दाकिनीसङ्गतैर्-
गङ्गासागरसङ्गमप्रणयनी जाता विहायस्थली ॥

स भगवान् शकलाकृतिर्मत्स्याकृतिर्नैःश्रेयसीं संपदं मोक्षलक्ष्मीं दिश्यात् देयात्, "दिश अतिसर्जने" स इति कः, यस्य स्फूर्जदतुच्छपुच्छशिखरप्रेङ्खोलनक्रीडनैः स्फूर्जदतुच्छं गरिष्ठं यत्पुच्छशिखरं पुच्छाग्रं तदेव प्रेङ्खोलनं दोला तेन क्रीडनं क्रीडाकरणं येषु तैः ईदृग्विधैः क्षुभ्यद्वार्धिसमुच्छलज्जलभरैः क्षुभ्यन् क्षोभं प्राप्नुवन्यो वार्धिः समुद्रस्तस्मात्समुच्छलन्तऊर्ध्वं गच्छन्तो ये जलभरास्तैः, किंशिष्टैः मन्दाकिनीसङ्गतैः मन्दाकिनीसुरसरित्तां सङ्गता मिलिता ये तैः विहायःस्थली आकाशस्थली गङ्गासागरसङ्गमप्रणयिनी गङ्गासागरयोः सङ्गमे मिलने प्रणयः स्नेहः संजातोऽस्या इति गङ्गासागरसङ्गप्रणयिनी जाता बभूव, यतः सागरजलं मत्स्यपुच्छेनोच्छालितं सुरनद्याः सङ्गमवाप ततो गङ्गासागरसङ्गमतीर्थं नभस्यपि जज्ञे इति ॥ ४ ॥

(५) मायामीनतनोस्तनोतु भवतां पुण्यानि पङ्कस्थितिः
पुच्छाच्छोटसमुच्छलज्जलगुरुप्राग्भाररिक्तोदधेः ।
पातालावटमध्यसङ्कटतया पर्याप्तकष्टस्थितेर्-
वेदोद्धारपरायणस्य सततं नारायणस्य प्रभोः ॥

मायामीनतनोः मायया शङ्खदैत्यनिर्भर्त्सनचिकीर्षितकपटेन मीनाकृतिर्मत्स्याकारा तनुः शरीरं यस्य स तस्य, नारायणस्य प्रभोः स्वामिनः पङ्कस्थितिः पङ्कावस्थानं भवतां पुण्यानि तनोतु विस्तारयतु, ननु पङ्कप्लवनं किं पुण्यकर्तृत्वेन भविष्यतीति न वाच्यम् । यतो महतां सर्वमपिकृत्यं श्रेयसे भविष्यतीति । किंविशिष्टस्य प्रभो पुच्छाच्छोटसमुच्छलज्जलगुरुप्राग्भाररिक्तोदधेः पुच्छाच्छोटेन पुच्छोल्लालनेन समुच्छलन् यो जलस्य गुरुर्गरिष्ठः प्राग्भारस्तेन रिक्तो निर्जलः उदधिः समुद्रो यस्मात्स तस्य, पुनःकिंविशिष्टस्य, पातालावटमध्यसङ्कटतयापर्याप्तकष्टस्थितेः पातालमेवावटो भूरन्ध्रं तस्य यन्मध्यं तत्सङ्कटतया तत्सङ्कीर्णतया पर्याप्ता प्राप्ता कष्टस्थितिर्येन स तस्य पुनः किंविशिष्टस्य वेदोद्धारपरायणस्य वेदस्योद्धारः समुद्राद्वेदानामाविष्करणं तत्र परायणस्य तत्परस्य सततं निरन्तरमिति ॥ ५ ॥

(६) मग्ने मेरौ पतति तपने तोयबिन्दाविवेन्दा-
वन्तर्लीने जलधिसलिले व्याकुले देवलोके ।
मात्स्यं रूपं मुखपुटतटाकृष्टनिर्मुक्तवार्द्धि
श्रीकान्तस्य स्थलजलगतं वेत्यलक्ष्यं पुनातु ॥

श्रीकान्तस्य विष्णोर्मात्स्यं रूपं स्थलगतं जलगतं वेत्यलक्ष्यं पुनातु पवित्रीकरोतु, भक्तानिति शेषः । किंविशिष्टं मात्स्यं रूपं मुखपुटतटाकृष्टनिर्मुक्तवार्धि मुखपुटतटेनाकृष्टः पूर्वं पीतः पश्चाद्विर्मुक्तो वार्धिः समुद्रो येन तत्, कस्मिन्सति, जलधिसलिले मेरौ मग्ने सति, तथा तत्रैव तपने सूर्ये पतति सति तथा तत्रैव इन्दौ चन्द्रे तोयबिन्दाविवान्तर्लीने उदकान्तः प्रविष्टे सति तथा देवलोके व्याकुले संजाते सति, मात्स्यं रूपं अलक्ष्यतया वृत्तमिति किं स्थलगतं जलगतं वेति भावः ॥ ६ ॥

(७) जृम्भाविस्तृतवक्त्रपङ्कजविधेर्हृत्वा श्रुतीः सागरे
लीनं त्रस्तसमस्तनक्रनिकरं शङ्खं जघानाजिरे ।
पुच्छोत्क्षिप्तजलोत्करैः प्रतिदिशं संतर्प्य यो वै धरां
पायाद्वः स मृणालकोमलतनुर्मीनाभिधानो हरिः ॥

स मृणालकोमलतनुर्मृणालवत्कोमला तनुर्यस्य स मीनाभिधानो मत्स्याख्यो हरिर्विष्णुर्वो युष्मान्पायादवतु, स इति कः, यः शङ्खं शङ्खदैत्यं आजिरेऽर्थाद्रणाङ्गणे जघान अहनत् किं विशिष्टं शङ्खं, जृम्भाविस्तृतवक्त्रपङ्कजविधेर्हृत्वा श्रुतीः सागरे लीनं जृम्भया मुखविवरणेन विस्तृतं वक्त्रपङ्कजं मुख-

कमलं यस्य, ईदृग्विधो यो विधिर्ब्रह्मा तस्माद् ब्रह्मणः सकाशात् श्रुतीर्वेदान् हृत्वा चोरयित्वा सागरे समुद्रे लीनं तत्रोषितं, पुनः किं विशिष्टं, त्रस्तसमस्तनक्रनिकरं त्रस्तो भयविह्वलः समस्तो नक्रनिकरो यस्मात्स तं, किं कृत्वा जघान, पुच्छोत्क्षिप्तजलोत्करैः पुच्छेन ऊर्ध्वं क्षिप्ता जलकणा ये तैः धरां पृथ्वीं दिशं दिशं प्रतीति प्रतिदिशम् "वीप्सायामव्ययीभावः शरत्प्रभृतित्वात्समासान्तष्टच्" संतर्प्य भृत्वेति ॥ ७ ॥

(८) यं दृष्ट्वा मीनरूपं स्फुरदनलशिखायुक्तसंरक्तनेत्रं
लोलद्विस्तीर्णकर्णक्षुभितजलनिधिं नीलजीमूतवर्णम् ।
श्वासोच्छ्वासानिलौघैः प्रचलितगगनं पीतवारिं मुरारिं
दिङ्मूढोऽभूत्स शङ्खः स भवतु भवतां भूतये मीनरूपः ॥

मीनरूपो भगवान् भवतो भूतये लक्ष्म्यै भवतु, स इति कः, यं मीनरूपं मुरारिं दृष्ट्वाऽवलोक्य स शङ्खो दिङ्मूढो व्याकुलोऽभूत्, किंविशिष्टं हरिं स्फुरदनलशिखायुक्तसंरक्तनेत्रं स्फुरती अनलशिखायुक्ते संरक्ते लोहिते नेत्रे यस्य सतं, पुनः कीदृशं, लोलद्विस्तीर्णकर्णक्षुभितजलनिधिं लोलद्विस्तीर्णकर्णक्षुभितो जलनिधिर्यस्मात्सतं, पुनः किंविशिष्टं, नीलजीमूतवर्णं नीलमेघाकृतिं, पुनः किंविशिष्टं, श्वासोच्छ्वासानिलौघैः श्वासोच्छ्वासवायुसमूहैः प्रचलितं गगनं यस्मात्सतं, पुनः किंविशिष्टं, पीतवारिं पीतं वारिजलं येन सतम् ॥ ८ ॥

(९) हंहो मीनतनो हरे, किमुदधे, किं वेपसे, शैत्यतः
स्विन्नः किं, बडवानलात्, पुलकितः कस्मात्, स्वभावादहम् ।
इत्थं सागरकन्यकामुखशशिव्यालोकनेनाधिक-
प्रोद्यत्कामजचिन्हनिन्हुतिपरः शौरिः शिवायास्तु वः ॥

इत्थं उक्तप्रकारेण सागरकन्यकामुखशशिव्यालोकनेन लक्ष्मीमुखचन्द्रवीक्षणेन अधिकानि प्रोद्यन्ति यानि कामजचिन्हानि तेषां यानिन्हुतिरपलपनं तत्र परः सावधानः शौरिः "अपत्यं शूरस्य शौरिः" ... "ऐरेनतद्वसिति शूरादिभ्य" वः युष्माकं शिवाय कल्याणायास्तु, इत्थमिति किम् हंहो इति सम्बोधने, समुद्रः प्राह भो मीनतनो हरे इति, सम्बोधितो हरिराह हे उदधे किं पृच्छसीति शेषः, इत्युक्ते समुद्र आह किं वेपसे, हरिराह शैत्यतः समुद्रोत्थशीतलसमीरणस्पर्शात्, पुनराह समुद्रो हरिं प्रति, तर्हि स्विन्नः प्रस्वेदाकुलः किम्, हरिराह बडवानलात् बाडवाग्नेरुष्णत्वात्तत्संयोगे स्वेदः संभवतीति, पुनः प्रश्नितस्तेन कस्मात्पुलकितो रोमाञ्चितः हरिरूचे स्वभावात्, अहं हरिः, यत एते भावाः कामिनां कामिनीमुखावलोकनाज्जायन्ते तत्र च हरेरपि समुद्रमथनादुद्भूताया लक्ष्म्याः सत्वादेते भावाः समुपेदिरे, परं श्वशुरस्य ह्रिया तान् भावान्हरिरपजुन्हुवे इति ॥ ९ ॥

(१०) दिङ्मूढं तं सुरारिं किल शितदशनैः पीडयमानं रटन्तं
हृत्वा तीरे पयोधेः करतलकलितं पूरयामास शङ्खम् ।
नादेनाक्षोभ्य विश्वं प्रमुदितविबुधं त्रस्तदैत्यं सदेवै-
र्दत्तार्घः पद्मयोनेः प्रहसितवदनः पातु वो दत्तवेदः ॥

स मीनरूपो देवः वो युष्मान्पातु रक्षतु; किं भूतः सः, देवैर्दत्तार्घो वितीर्णपूजाविशेषः, पुनः किं भूतः, प्रहसितवदनः प्रहसितं प्रकर्षेण हसो हास्यं जातोऽस्येति तत्प्रहसितं प्रहसितं सुस्मितोपेतं वदनमाननं यस्य स ईदृग्विधः सन् पद्मयोनेर्ब्रह्मणो दत्तवेदः दत्ता वेदा येनेति सः, स इति कः, यो भगवान् तं दिङ्मूढं कान्दिशीकं सुरारिं दैत्यं, किलेति निश्चये, शितदशनैस्तीक्ष्णदन्तैः पीडयमानं अत एव रटन्तमाक्रन्दं कुर्वाणम्, पयोधेः समुद्रस्य तीरे तटे हृत्वा नीत्वा करतलकलितं पाणितलधृतं शङ्खं पाञ्चजन्यं पूरयामास वादयामासेत्यर्थः, किं भूतं शङ्खम् नादेन शङ्खरवेण विश्वं जगत् आक्षोभ्य क्षोभमापाद्य प्रमुदितविबुधं प्रमुदिता अन्तर्भूतण्यर्थत्वात्प्रमोदं प्रापिता विबुधा देवा येन स तम्, पुनः किं विशिष्टम्, त्रस्तदैत्यं त्रस्ता भयाकुला दैत्या यस्मात्स तम् ॥ १० ॥

"इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवृत्तौ मीनावतारहरिवर्णनविवरणम्"

काशिकराजकीयपाठशालायां
ज्योतिश्शास्त्राध्यापको
वामनाचार्यः

THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

THIRD BOOK, FIRST DAILY LESSON.

(Continued from page 27.)

Objections to the preceding arguments.

यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद्दृष्टं लिङ्गं न विद्यते ॥ ६ ॥

Aph. 6. In the contact [of the organs of sense and the object] from which the judgment 'This is Yajnadatta,' is derived, there being no perception, there exists no visible mark.

[1] There being contact, if in the judgment 'This is Yajnadatta' there is no act of perception, there is no visible mark, no mark by which a universal co-existence is ascertained from perception. There is no visible mark establishing the existence of soul, as there is a visible mark in the case of fire, viz. smoke observed concomitant with fire perceived. U.

[2] Though there be contact of the eye and other organs with the body of Yajnadatta, yet, since there is no ocular or other perception of the soul which presides over that body, there is no visible mark, i. e. no mark which by being included is an object of perception. How, then, is an inference of the existence of the soul possible? For, there being contact with fire &c., after the perception of it, an inference as to fire &c. meets with no obstacle, because universal concomitance therewith has been observed; [but this is not the case with the present inference.] V.

सामान्यतो दृष्टाच्चाविशेषः ॥ ७ ॥

Aph. 7. Moreover, from that which is observed generally [there results] no distinction.

[3] Though there is a generally observed mark, yet there is no proof therefrom of the existence of the soul, by means of the notion of soul, or of a substance over and above eight substances. It would be thereby established only that desires &c. must inhere in something but there is nothing to suggest the thought of a soul. Therefore it is stated that there results no distinction U.

[4] From that which is generally observed, i. e. from observation of inclusion in something determined by a general attribute, there results no distinction, i. e. no inference by means of a particular property, according to the rule that there must be observed in that which determined the character of the subject of an inference the nature of being determinant of that which is inclusive [of the subject.] V.

तस्मादागमिकः ॥ ८ ॥

Aph. 8. Therefore the soul is proved to exist by revelation only.

[1] The existence of the soul &c. rests on revelation, for, inasmuch as there is no mark of an observed universal co-existence, any inference of the existence of the soul is impossible. The existence, then, of the soul rests solely on the authority of revelation. Thus this system for cogitation on the soul is useless. V.

Objections answered.

अहमिति शब्दस्य व्यतिरेकान्नागमिकम् ॥ ९ ॥

Aph. 9. [The evidence of the existence of the soul] is not [solely] from revelation, because of exclusion of the word 'I' [from other designates.]

[2] Revelation is not the sole evidence of the existence of the soul; but that there is a soul is established also by the inference that the word 'I' or the word 'soul' [or 'self'] has some designate because it is a term, like the terms 'water-pot' &c. It might be said, let earth &c. be its designates. Hence the words 'because of its exclusion,' i. e. because of the exlusion or separation of the word 'I' from earth &c. For there never arises any such supposition or assurance as 'I am earth,' 'I am water,' 'I am light,' 'I am air,' 'I am ether,' 'I am time,' 'I am space,' 'I am mind.' If you object that such conviction arises with respect to the body, we reply that it is not so, for it would be equally applicable to the bodies of others: if, that it arises with respect to

---

[1] सन्निकर्षे सति अयं यज्ञदत्त इति चेत् प्रत्यक्षं नास्ति तदा दृष्टं प्रत्यक्षतो गृहीतव्याप्तिकं लिङ्गं नास्ति यथा वह्निना प्रत्यक्षेण सहचरितो गृहीतो धूमो वह्नौ दृष्टं लिङ्गं तथात्मसाधकं लिङ्गं दृष्टं नास्तीत्यर्थः ॥

[2] यज्ञदत्तशरीरे चक्षुरादिसन्निकर्षे सत्यपि तदधिष्ठातुरात्मनश्चाक्षुषाद्यभावात् दृष्टं व्याप्यत्वेन प्रत्यक्षविषयीभूतं लिङ्गं नास्तीत्यतः कथमात्मानुमानं सुघटम् वह्न्यादौ सन्निकर्षे तत्प्रत्यक्षानन्तरं तद्व्याप्तिप्रत्यक्षाद्वह्न्याद्यनुमानन्तु निराबाधमेवेति भावः ॥

[3] सामान्यतो दृष्टमपि लिङ्गं भवति न तु तत आत्मत्वेन अष्टद्रव्यातिरिक्तत्वाद्द्रव्यत्वेन वा स्यादात्मसिद्धिः किन्तु तेनेच्छादीनां क्वचिदाश्रितत्वमात्रं सिध्येत् तत्र आत्ममननोपक्रमित्यर्थः तदेतदाह अविशेष इति ।

[4] सामान्यतो दृष्टात् सामान्यधर्मावच्छिन्नव्याप्यत्वग्रहात् अविशेषः विशेषधर्मप्रकारेण नानुमितिः व्यापकतावच्छेदकत्वग्रहस्यैवानुमितिविधेयतावच्छेदकत्वे तन्त्रत्वादित्यर्थः ॥

[1] आगमिक इत्यस्य आत्मेत्यादि यतो गृहीतव्याप्तिकलिङ्गाभावादात्मनो ऽनुमितिर्न सम्भवति अत आत्मा आगममात्रप्रमाणक इत्यर्थः । तथा चात्ममननार्थमेतच्छास्त्रं विफलमिति भावः ॥

[2] नागममात्रं प्रमाणमात्मनि किन्त्वहमिति पदं वा साभिधेयं पदत्वात् घटादिपदवत् इत्यनुमानादप्यात्मसिद्धिः । ननु पृथिव्यादि तदभिधेयं स्यादित्यत आह व्यतिरेकादिति पृथिवीत्यादितो ऽहमिति पदस्य व्यतिरेकाद्व्यावृत्तेरित्यर्थः । न हि भवत्यहं पृथिवी अहमापः अहन्तेजः अहं वायुः अहमाकाशम् अहं कालः अहं दिक् अहं मन इति व्यपदेशः प्रत्ययो वा शरीरे भवतीति चेन्न परशरीरे तत्प्रसङ्गात् स्वशरीरे भवतीति चेन्न स्वस्यात्मभिन्नस्यानिरुक्तेः मम शरीरमिति वैयधिकरण्येन प्रत्ययाच्च नन्विदमपि सामान्यतो दृष्टमेव तच्च विशेषापर्यवसन्नमिति दूषितमेवेति चेन्न अहम्पदे ऽहन्त्वमात्मत्वमेव प्रकारः तथा च पक्षधर्मताबलादेवाहन्त्वस्य प्रवृत्तिनिमित्तत्वं पर्यवसन्नं तच्चानन्यसाधारणमेवेति विशेषसिद्धेः एवं सामान्यतो दृष्टादपि बाधसहकृताद्विशेषसिद्धिः यच्चोक्तं श्रवणादेव साक्षात्कारः किमनेनेति तदयुक्तं न हि मननमन्तरेण सङ्कुशुकस्याश्रद्दधानस्य श्रवणम् न च तदन्तरेण तत्र निदिध्यासनाधिकारः न च निदिध्यासनमन्तरेण सवासनमिथ्याज्ञानोन्मूलनक्षमस्तत्त्वसाक्षात्कारः न हि शाब्दमानुमानिकं वा ज्ञानं मिथ्याज्ञानोन्मूलनक्षमं विङ्मोहादौ दृष्टमिति भावः । ननु तथापि परोक्षे आत्मनि कथं सङ्केतग्रह इति चेत् क एवमाह नात्मा प्रत्यक्ष इति किन्तु मनसा संयोगप्रत्यासत्त्यात्मग्रहः कथमन्यथाहं सुखी जानामीच्छामि यते दुःखीत्यादिप्रत्ययः न ह्ययमवस्तुकः सन्दिग्धवस्तुको वा नीलादिप्रत्ययवत् अस्यापि निश्चितवस्तुकत्वात् न च लैङ्गिकः लिङ्गज्ञानमन्तरेणापि जायमानत्वात् नापि शाब्दः तदनुसन्धानाननुविधानात् प्रत्यक्षाभासो ऽयमिति चेत् तर्हि क्वचिदनाभासविषयो ऽपि न ह्यप्रमितमारोप्यते इत्यावेदयिष्यते ॥

the body of oneself, we reply that this is not so, for there is not intended a self different from soul, and because the conception 'my body' involves a difference of substrata. If you urge that this also is merely observed generally, and therefore, not being determined by a particular attribute, involves a fallacy; we reply that it is not so, for in the term 'I' the notion 'I' or the notion 'soul' is the form or essence, and that in virtue of being the attribute of the subject it is determined that the notion 'I' is the cause of actuality, and this is not common to other objects, being a proof of a particular object. In like manner there is proof of the particular even from the generally observed accompanied with the argument from impossibility. Whereas it is said, 'From merely hearing results realisation, what need of this proof'? this is wrong; for without reflection the dross of unbelief in wavering minds cannot be purged away; without this purification there can be no aptitude for profound meditation on this subject; and without profound meditation there can be no realisation of truth capable of uprooting false knowledge together with its impressions. For it is by practice only that the sad lover can realise [a mental image of] his beloved. For knowledge from verbal information or from inference is unable to uproot false knowledge, as is seen in the case of delusion in regard to direction in space, and similar instances. If it be asked, how whereas soul is invisible, can a sign [of its existence] be apprehended, we rejoin, 'Who has maintained that the soul is unknowable by perception?' But soul is cognised by its proximity to conjunctions with the internal organ: else how such assurances 'I am happy,' 'I know,' 'I desire,' 'I will,' 'I am in pain?' since such assurance is not without matter or of doubtful matter, for like an assurance of blueness &c. this has a definite matter. Nor is it derived from argument, for it arises without any knowledge of an argument. Nor is it derived from verbal communication, for it does not follow upon inquiry for that. If it be maintained that it is a mere appearance of perception, we reply that there must be some object not merely apparent, for it will be shown in the sequel that that which is not an object of certain knowledge cannot be applied by metaphor to another object. U.

यदि दृष्टमन्वक्षमहं देवदत्तो ऽहं यज्ञदत्त इति ॥ १० ॥

Aph. 10. If the notion, 'I Devadatta,' 'I Yajñadatta' is a perception' [what need of any inference?]

[1] An opponent says, 'If this be so, what need of an inference?' The word *iti* marks the form of the notion, and the word *drishṭa* ends in the affix *kta* used in a passive sense. 'Perception' means 'observation.' The sense, therefore, is as follows: If the percept or perception which has for its form 'This Devadatta,' 'This Yajñadatta, is only a perception, what occasion is there for the trouble of making an inference? For 'On seeing an elephant those who infer do not infer him to be one from his screaming.' U.

दृष्टयात्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः ॥ ११ ॥

Aph. 11. If a mark of the existence of the soul were observed, there would be one and one only conviction because of its certitude, as in the case of perception.

[1] The anticipated objection is refuted. The completed sense is that if a mark of the soul's existence were observed or apprehended by the internal organ, there being an inference, there would be one and one only primary conviction, in the same form as a perception in the case of perception. Whence its primary nature? The being a primary conviction or being of recognised validity, results from its certitude or power of removing doubts of invalidity. As, for instance, when the distant water of a lake &c. has been seen, there arises a doubt as to the evidence for such a perception, there being a doubt whether it may not be a mirage or the like; and afterwards there being an inference by means of cranes, &c. the mark [of its being a lake], the doubt ceases on the recognition of the evidence by means of discussion; so, although the soul is perceived, a doubt arises as to the validity of the conception, on account of counter probabilities, &c., but afterwards, the soul being recognised by inference, the certitude of such recognition, which certitude consists of capability of removing suspicion of invalidity through the recognition in that case of validity by means of argumentation, is easily demonstrated. It has accordingly been declared by the sage that 'The logicians desire to understand by inference even that which is fully established by perceptions.' V.

देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः ॥१२॥

Aph. 12. The judgment 'Devadatta goes,' Yajñadatta goes,' is applied by a metaphor to the body.

---

[1] एवञ्चेत् किमनुमानेनेति पूर्वपक्षवादी आह । इति शब्दो ज्ञानप्रकारमाह दृष्टमिति भावोक्तप्रत्ययान्तम् अन्वक्षमित्यध्यक्षं तेनायमर्थः अयं देवदत्तः अयं यज्ञदत्त इति प्रकारकं दृष्टं दर्शनं अध्यक्षमेवास्ति यदि किमनुमानप्रयासेन न हि करिणि दृष्टे चीत्कारेण तमनुमिमते ऽनुमातारः ॥

[1] आशङ्कां निरस्यति । दृष्टे मनसा गृहीते आत्मनि लिङ्गे अनुमाने सति प्रत्यक्षवत् प्रत्यक्षसमानाकारक एक एव मुख्य एव प्रत्ययः भवतीति शेषः मुख्यत्वं कुतः दृढत्वात् अप्रामाण्यशङ्कानिवर्तनक्षमत्वात् मुख्यत्वञ्च गृहीतप्रामाण्यकत्वम् यथा दूरस्थे सरोवरादिसलिले दृष्टे ऽपि मरीचिकादिसन्देहात्तादृशप्रत्यक्षे ऽप्रामाण्यशङ्का उदेति ततो बलाकादिलिङ्गेन तदनुमाने सति तदनुमाने सति संवादेन तत्र प्रामाण्यग्रहात्तादृशशङ्का निवर्तते तथात्मनि दृष्टे ऽपि विपरीतसम्भावनादिना तज्ज्ञाने ऽप्रामाण्यशङ्का सञ्जायते ततो ऽनुमानेनात्मनि गृहीते संवादेन तत्र प्रामाण्यग्रहादप्रामाण्यशङ्कानिवर्तनक्षमत्वरूपं दृढत्वं तादृशग्रहस्य सुघटमेव तदुक्तं मिश्रैः प्रत्यक्षपरिकलितमप्यनुमानेन बुभुत्सन्ते तर्करसिका इति ॥

Digitized by Google

¹ It may be objected that if the notion 'I Yajñadatta' refers to the soul, such a judgment of community of substratum with motion, as 'Yajñadatta goes' is impossible. It is therfore stated that there are such judgments as 'I am fair-complexioned,' 'I am stout,' and there are such complex concepts as 'my body.' Of these in the judgment 'Devadatta goes' the perception of a community of substratum with motion, and the use of language to express it, are tropical, whereas the notion 'mine' is true. Although the notion Devadatta is a class or universal idea existing in the body, and accordingly the use of the proposition 'Devadatta moves' is correct even in its primary sense, as also the judgment; yet if the term Devadatta be employed with regard to the soul determined thereby, it is then to be understood metaphorically. U.

² It may be asked how, if such a notion as 'I Yajña-datta' has the soul for its object, the judgment 'Yajña-datta goes' can apply to the soul, for the soul has not the power of motion. It is therefore stated that the conviction excited by the proposition 'Devadatta goes' arises from the observation of the implication in the word 'Devadatta' &c. of the [meaning of the] body. Since such propositions as 'Devadatta knows, wishes, acts, hates' &c., are used in their primary sense, the term Devadatta must have the power of expressing a soul limited to a heterogeneous body. For, as in the meaning of these propositions there is a manifold application the complication [of this hypothesis] is inoperative [i. e. does invalidate it ;] and it may be considered that the primary sense possibly belongs to such application to the expression of volition in the proposition 'He goes.' V.

सन्दिग्धस्तूपचार : ॥ १३ ॥

Aph. 13. The metaphor, however, is doubted.

³ The word 'however' points out the opponent's view. The notion and the use of the word 'I' are observed to refer both to the soul and the body. The doubt in this case is which are the primary and which the metaphorical [notion and expression.] U.

अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः॥१४॥

Aph. 14. The notion 'I' is a perception of something other [than the body], since it arises in the case of one's own soul, and not in the case of another's.

¹ A notion in which something different, of the nature of soul, is observed, is a perception of something different. The meaning is as follows :—since the notion 'I' arises with reference to one's own soul, and not with reference to another's, it is proper to regard the reference to something else, i. e. to one's own soul as primary. If, on the other hand, the primary reference were to the body, the notion would be produced by the external organs of sense, for the body is not an object of mental perception, and the notion 'This being I' is mental being produced without any operation of the external organs of sense. Such notions as 'I am sorry', 'I am glad', 'I know', 'I will', 'I wish', arise from the mind's taking as its object the soul accompanied by its appropriate particular attributes. Such a notion is not inferred, since it is produced without seeking any mark of co-existence. It is not verbally communicated, since it is produced without reflection on words. It, therefore, belongs to the internal organ, and to the internal organ independent of the external organs, not being concerned with the body, &c. Moreover if it be urged that if it referred to the body it would refer to the bodies of others, and if it be referred to one's own soul it would refer to the souls of others ; we deny this, for the soul of one man is beyond the senses of another, since its particular attributes are incapable [of being perceived], and it is so capable only by apprehension of perceptible particu-

¹ ननु यदि यज्ञदत्तो ऽहमिति प्रत्यय आत्मनि तदा यज्ञदत्तो गच्छतीति गमनसामानाधिकरण्यभानमनुपपन्नमित्यत आह । अस्ति हि अहं गौरः अहं स्थूल इति प्रत्ययः अस्ति च मम शरीरमिति भेदप्रत्ययः तत्र देवदत्तो गच्छतीति गतिसामानाधिकरण्यानुभवो भक्तः ममेति प्रत्ययस्य यथार्थत्वात् यद्यपि देवदत्तत्वं शरीरवृत्तिर्जातिस्तेन देवदत्तो गच्छतीति मुख्य एव प्रयोगो यथार्थ एव च प्रत्ययः तथापि देवदत्तपदं तदवच्छिन्नात्मनि प्रयुक्तञ्चेत् तदौपचारिको बोद्धव्यः ॥

² नन्वहं यज्ञदत्त इत्यादिप्रत्यक्षं यद्यात्मविषयकं तदा यज्ञदत्तो गच्छतीति प्रत्ययः कथं स्यादात्मनि गतिमत्त्वस्याभावादित्यत आह । देवदत्तो गच्छतीति वाक्यजन्यप्रत्ययः देवदत्तादिपदस्य शरीरे लक्षणा ग्रहाद्भवति देवदत्तो जानाति इच्छति करोति द्वेष्टीत्यादि प्रयोगाणां मुख्यतया देवदत्तादिपदस्य विजातीयशरीरावच्छिन्नात्मनि शक्तेरावश्यकत्वात्तदर्थे भूरिप्रयोगसत्त्वेन गौरवस्या ऽकिञ्चित्करत्वात् गच्छतीत्यत्राख्यातस्य यत्नार्थकत्वे तादृशप्रयोगस्य मुख्यत्वमपि सम्भवतीत्यपि द्रष्टव्यम् ॥

³ तुशब्दः पूर्वपक्षद्योतकः । आत्मशरीरयोस्तावदहमिति प्रत्ययः प्रयोगश्च दृश्यते तत्र क्व मुख्यः क्व वौपचारिक इति सन्देहः ॥

¹ अर्थान्तरात्मस्वरूपं प्रत्यक्षं यत्र प्रत्ययो स प्रत्ययो ऽर्थान्तरप्रत्यक्षः अयमर्थः अहमिति प्रत्ययस्य प्रत्यगात्मनि स्वात्मनि भावात् परत्र परात्मनि अभावात् अर्थान्तरे स्वात्मन्येव मुख्यः कल्पयितुमुचितः यदि तु शरीरे मुख्यः स्यात् तदा बहिरिन्द्रियजः स्यात् न हि शरीरं मानसप्रत्यक्षं मानसश्चायमहमिति प्रत्ययः बहिरिन्द्रियव्यापारमन्तरेणापि जायमानत्वात् अहं दुःखी अहं सुखी जाने यते इच्छाम्यहमिति योग्यविशेषगुणोपहितस्यात्मनो मनसा विषयीकरणात् नायं लैङ्गिको लिङ्गानुसन्धानमन्तरेणापि जायमानत्वात् न शाब्दः शब्दाकलनमन्तरेणापि जायमानत्वात् तस्मान्मानस एव मनसश्च बहिरस्वातन्त्र्येण शरीरादावप्रवृत्तेरिति भावः । किञ्च यदि शरीरे स्यात् परशरीरे स्यात् स्वात्मनियदिस्यात् तदा परात्मनि स्यादिति चेन्न परात्मनः परस्यातीन्द्रियत्वात् तद्विशेषगुणानामयोग्यत्वात् योग्यविशेषगुणोपग्रहेण तस्य योग्यत्वात् न केवलमात्मन इदं शीलं किन्तु द्रव्यमात्रस्य द्रव्यं हि योग्यविशेषगुणोपग्रहेणैव प्रत्यक्षं भवति आकाशमपि तर्हि शब्दोपग्रहेण प्रत्यक्षं स्यादिति चेत् स्यादेवं यदि श्रोत्रं द्रव्यग्राहकं भवेत् आकाशं वा रूपवत् स्यात् आत्मनो ऽपि नीरूपत्वं तुल्यमिति चेत् बहिर्द्रव्यमात्र एव प्रत्यक्षतां प्रति रूपवत्त्वस्य तन्त्रत्वात् प्रत्यगित्ययं शब्दो ऽनन्यावृत्तमाह ॥

Digitized by Google

lar attributes. Nor is this the nature of soul only, but of all substance, for substance becomes perceptible by apprehension of particular attributes capable [of being perceived.] If you rejoin that on this ground ether also should be perceptible by the apprehension of sound, we reply that such would be the case were the organ of hearing capable of apprehending a substance, or if ether possessed colour. If you object that the soul is equally devoid of colour, we reply that it is in the case of external substances only that possession of colour is a requisite with regard to perceptibility. U.

¹ The notion 'I' and the expressions 'I Yajñadatta am happy &c.,' are the notion of different objects, the perception or conception of a different object, of one different from the body &c., since it produced verbal information the subject of which is different from the body. Such is the sense resulting [from the aphorism.] The application, accordingly, which is to the soul which is different from the body is primary, that to the body is metaphorical. Why so? The answer is because of existence, viz., the existence of pleasure, &c. in one's own soul, and because of non-existence, viz., the non-existence of pleasure, &c., elsewhere, i. e. in the body. There is not therefore so much as the shade of a doubt that of the diverse application, since [pleasure and the like] exists in the soul only, that the application to the soul is primary, and that to the body, &c., metaphorical. V.

देवदत्तो गच्छतीत्युपचारादभिमानात्तावच्छरीरप्रत्यक्षो ऽहङ्कारः ॥ १५ ॥

Aph. 15. Since the expression 'Devadatta goes,' is by metaphor, i. e. by reference to self, self-consciousness is percipient of the body.

² Again a doubt is raised. Self-consciousness is the assurance of 'myself.' This is percipient of the body, and that is percipient of the body, of which the object of perception is the body. You have concluded that the proposition or judgment 'Devadatta goes' is merely by metaphor: but this metaphor is self-regarding, for the judgments and propositions 'I am fair-complexioned,' 'I am stout,' 'I am thin,' 'I am fortunate,' and the notion of repeated births cannot be arrived at by a metaphorical use of language. U.

सन्दिग्धस्तूपचारः ॥ १६ ॥

Aph. 16. The metaphor, however, is doubted.

¹ This word 'however,' points out a true principle. This metaphor is self-regarding, but whereas it has been said that this notion 'I' refers to the body, there is a doubt on this subject. Since, therefore, the notion is on both sides a false witness, we must endeavour to find a particular limitation. Since on making this endeavour, we observe the notion 'I' even when the eyes are closed, we must hold that it refers to an object different from the body, and not an object of the external organs of sense. If it referred to the body, it would refer to the bodies of others also, and would not be independent of the body. If it be asked how there can be the possession of a common substratum in 'I who am stout (or thin) am happy', we reply that in this case the notion of the body is possible under the condition of pleasure, as in the proposition 'This forest is resonant with the roar of a lion.' The notion 'I' being in contiguity with the internal organ is transferred to the body, just as the heat presented by the organ of touch in the judgments 'The water is hot,' 'The body is hot.' U.

² The metaphor is doubted. It is doubted whether the metaphor be in 'Yajñadatta goes', or in 'I Yajñadatta am happy,' and because, there being no criterion of the diverse application to the body and the soul, it is impossible to choose one final alternative. The word 'however' is intended to point out a fixed principle. V.

A. E. G.

(To be continued.)

¹ अहमितीति अहं यज्ञदत्तः सुखीत्यादिव्यवहारः अर्थान्तरप्रत्यक्षः अर्थान्तरस्य शरीरादिभिन्नस्य प्रत्यक्षं ज्ञानं यस्मात् शरीरादिभिन्नविषयकशाब्दबोधजनकइति फलितार्थः तथा च शरीरादिभिन्न एवात्मनि तादृशप्रयोगो मुख्यः शरीरे त्वौपचारिकः कुत एवमत आह प्रत्यगात्मनि स्वात्मनि भावात् अर्थात् सुखादेः सत्त्वात् परत्र शरीरे ऽभावात् सुखादेरसत्त्वात् तथा च भूरिप्रयोगस्यात्मन्येव सत्त्वात्तत्रैव तादृशप्रयोगस्य मुख्यत्वं शरीरादावौपचारिकत्वमिति न सन्देहगन्धो ऽपीति ॥

² पुनः शङ्कते । अहङ्कारो ऽहमिति प्रत्ययः स च शरीरप्रत्ययः शरीरं प्रत्यक्षं विषयो यत्र स शरीरप्रत्यक्षः । देवदत्तो गच्छतीत्युपचारात् तावत् प्रयोगः प्रत्ययो वा त्वया समाहितः स चोपचारः आभिमानिकः यतो ऽहं गौरः अहं कृशः सौभागिनो ऽहं पुनरुक्तजन्मेत्यादयः प्रत्ययाः प्रयोगाश्चोपचारेण समन्वयितुमशक्या इत्यर्थः ॥

¹ तु शब्दो ऽयं सिद्धान्तमभिव्यनक्ति उपचारो ऽयमाभिमानिकः किन्तु शरीर एवायमहम्प्रत्यय इति यदुक्तं तत्रापि सन्देह एवेत्यर्थः तथा च प्रत्ययस्योभयत्रापि कूटसाक्षित्वेन विशेषावधारणाय यतितव्यं तत्र यत्ने क्रियमाणे निमीलिताक्षस्याप्याहमिति प्रत्ययदर्शनात् शरीरभिन्ने बहिरिन्द्रियागोचरे वस्तुनि स मन्तव्यः शरीरे भवन् परशरीरे ऽपि स्यात् चक्षुर्निरपेक्षेण न च स्यात् अहं कृशः स्थूलो वा सुखीति कथं सामानाधिकरण्यमिति चेन्न सुखाद्यवच्छेदकत्वेनापि तत्र शरीरभानसम्भवात् सिंहनादवदिदं गहनमितिवत् अहन्त्वमात्रं शरीरे समारोप्यते मानसोपस्थितम् त्वगिन्द्रियोपनीतमौष्ण्यम् उष्णं जलम् उष्णं शरीरमितिवत् ॥

² उपचारः सन्दिग्धः किं यज्ञदत्तो गच्छतीत्यत्रोपचारः उत यज्ञदत्तो ऽहं सुखीत्यत्र शरीरे आत्मनि च भूरिप्रयोगस्याविशिष्टत्वेनैकशेषस्य कर्तुमशक्यत्वादित्यर्थः तु शब्दः सिद्धान्तद्योतनार्थः ॥

Digitized by Google

RÁMÁYAṆA, BOOK I.

(Continued from page 276.)

Deformed, terrific, murderous, dread,
Swift as the levin on she sped,
Like cloudy pile in autumn's sky,
Lifting her two vast arms on high,
When Ráma smote her with a dart,
Shaped like a crescent, to the heart.
Sore wounded by the shaft that came
With lightning speed and surest aim,
Blood spouting from her mouth and side,
She fell upon the earth and died.
Soon as the Lord who rules the sky
Saw the dread monster lifeless lie,
He called aloud, Well done! well done!
And the Gods honoured Raghu's son.
Standing in heaven the Thousand-eyed,
With all the Immortals, joying cried:
'Lift up thine eyes, O Saint, and see
The Gods and Indra nigh to thee.
This deed of Ráma's boundless might
Has filled our bosoms with delight.
Now, for our will would have it so,
To Raghu's son some favour show.
Invest him with the power which naught
But penance gains and holy thought.
Those heavenly arms on him bestow
To thee entrusted long ago
By great Kriśáśva best of kings,
Son of the Lord of living things.
More fit recipient none can be
Than he who joys in following thee;
And for our sakes the monarch's seed
Has yet to do a mighty deed.'

He spoke; and all the heavenly train
Rejoicing sought their homes again,
While honour to the saint they paid.
Then came the evening's twilight shade.
The best of hermits overjoyed
To know the monstrous fiend destroyed,
His lips on Ráma's forehead pressed,
And thus the conquering chief addressed:
'O Ráma gracious to the sight,
Here will we pass the present night,
And with the morrow's earliest ray
Bend to my hermitage our way.'
The son of Daśaratha heard,
Delighted, Viśvámitra's word,
And as he bade, that night he spent
In Táḍaká's wild wood, content.
And the grove shone that happy day,
Freed from the curse that on it lay,
Like Chaitraratha[1] fair and gay.

THE CELESTIAL ARMS.
XXIX.

That night they slept and took their rest;
And then the mighty saint addressed,
With pleasant smile and accents mild,
These words to Raghu's princely child:
'Well pleased am I. High fate be thine,
Thou scion of a royal line.
Now will I, for I love the so,
All heavenly arms on thee bestow.
Victor with these, whoe'er oppose,
Thy hand shall conquer all thy foes,
Though Gods and spirits of the air,
Serpents and fiends, the conflict dare.
I'll give thee as a pledge of love
The mystic arms they use above,
For worthy thou to have revealed
The weapons I have learnt to wield.[2]
First, son of Raghu, shall be thine
The arm of Vengeance, strong, divine:
The arm of Fate, the arm of Right,
And Vishṇu's arm of awful might:
That, before which no foe can stand,
The thunderbolt of Indra's hand;
And Śiva's trident, sharp and dread,
And that dire weapon Brahmá's Head.
And two fair clubs, O royal child,
One Charmer and one Pointed styled
With flame of lambent fire aglow,
On thee, O Chieftain, I bestow.
And Fate's dread net and Justice' noose
That none may conquer, for thy use:
And the great cord, renowed of old,
Which Varuṇ ever loves to hold.
Take these two thunderbolts, which I
Have got for thee, the Moist and Dry.
Here Śiva's dart to thee I yield,
And that which Vishṇu wont to wield.

(To be continued.)

[1] The famous pleasure-garden of Kuvera the God Wealth.

[2] 'The whole of this Canto together with the following one, regards the belief, formerly prevalent in India, that by virtue of certain spells, to be learnt and muttered, secret knowledge and superhuman powers might be acquired. To this the poet has already alluded in Canto xxiii. These incorporeal weapons are partly represented according to the fashion of those ascribed to the Gods and the different orders of demi-gods, partly are the mere creations of fancy: and it would not be easy to say what idea the poet had of them in his own mind, or what powers he meant to assign to each.' SCHLEGEL.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 51. Benares, August 1st, 1870. Vol. V.

॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

प्रागुक्तं दृष्टान्तं विवृण्वन्विवेकिप्रत्ययेनैवाविवेकी बाध्यत इत्युपपादितमुपसंहरति ।

(१६७) कुण्डल्यहमिति ह्येतद्बाध्यतेव विवेकिना ।
दुःखीति प्रत्ययस्तद्वत्केवलाहंधिया सदा ॥ ५७६ ॥

कुण्डलीति । केवले शुद्धे ब्रह्मण्येवाहंधीः केवलाहंधीस्तयेति विग्रहः ॥ १६७ ॥

नन्वदुःखिनो मोक्षोपदेशानुपपत्तेरात्मनोपि दुःखित्वमवगम्यते, ततस्तत्सिद्धये शक्तिमत्त्वं गम्यते, ऽतो नान्यगतेन निमित्तेनैव दुःखी, किं तु स्वतोपीति सुषुप्त्यादावपि शक्तिमत्त्वमनिवारितमिति चेत्तत्राह ।

(१६८) सिद्धं दुःखित्वमिष्टं स्यातच्छक्तिश्छन्दसाऽऽत्मनः ।
मिथ्याभिमानतो दुःखी तेनार्थापादनक्षमः ॥ ५८० ॥

सिद्धमिति । कस्यां चिदवस्थायां यद्यात्मनः केवलस्य दुःखित्वं प्रमाणसिद्धं स्यात्तथा सति छन्दसा इच्छया तच्छक्तिर्दुःखित्वशक्तिः कल्प्येत, न सा कल्पयितुं शक्यते, दुःखदर्शनस्यान्यथोपपत्तेरित्याह । मिथ्येति । अत्र ह्यन्वयव्यतिरेकौ दर्शितौ, तेन मिथ्याभिमाननिबन्धनत्वेनार्थापादनक्षमो दुःखित्वानुभव इति योजना । अर्थादनुपपत्त्या यद् दुःखित्वशक्तिमत्त्वापादनं तस्य क्षमः समर्थो ऽयमनुभव इत्यन्यथोपपत्तिरित्यर्थः । तथा च यथादर्शनं दुःखशक्तिमत्त्वमपि मिथ्यैवेति भावः ॥ १६८ ॥

तामेवान्यथोपपत्तिं साधयति ।

(१६९) अस्पर्शोपि यथा स्पर्शमचलश्चलनादि च ।
अविवेकात्तथा दुःखं मानसं चात्मनीक्षते ॥ ५८१ ॥

अस्पर्शोपीति । निरवयवस्य पूर्णस्यात्मनो यथा स्पर्शचलनादिदर्शनमविवेकादेव, आदिशब्दाच्छयनोत्थानोपवेशनादि गृह्यते, चकारात्परिच्छिन्नत्वाभिमानः । तथा मानसं मनःकल्पितं च दुःखमविवेकादेवात्मनीक्षतइत्यर्थः ॥ १६९ ॥

अविवेकादेव दुःखदर्शनमात्मनीत्येतदन्वयव्यतिरेकाभ्यामुपपादयति ।

(१७०) विवेकात्मधिया दुःखं नुद्यते चलनादिवत् ।
अविवेकस्वभावेन मनो गच्छत्यनिच्छतः ॥ ५८२ ॥

विवेकेति । विवेकरूपया ऽऽत्मधियेत्यर्थः, चलनादिवत्, यस्मात्स्थूलदेहविवेकात्मज्ञानेन चलनादि स्थूलदेहसंबन्धि मिथ्याध्यस्तमात्मनि निवर्त्यते तथा सूक्ष्मदेहाविवेकनिमित्तं दुःखं ब्रह्मात्मज्ञानेन समूलं निवर्त्यतइत्यर्थः ॥ १७० ॥

अनिच्छतोप्यविवेकस्वभावान्मनश्चलतीति निमित्तमुक्त्वा नैमित्तिकमाह ।

(१७१) तदा तु दृश्यते दुःखं नैश्चल्येनेव तस्य तत् ।
प्रत्यगात्मनि तस्मात्तद्दुःखं नैवोपपद्यते ॥ ५८३ ॥

तदेति । नैश्चल्ये सति तस्यात्मनः तद् दुःखं नैवेत्यन्वयः । उपसंहरति । प्रत्यगात्मनि तस्मादिति ॥ १७१ ॥

एवं युक्तितः प्रत्यगात्मनो निर्दुःखस्वाभाव्ये सिद्धे वाक्यादेव ब्रह्मास्मीत्यपरोक्षं ज्ञानं भवतीत्याह ।

Digitized by Google

(१७२) त्वंसतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत् ।
निर्दुःखवाचिना योगात् त्वंशब्दस्य तदर्थता ॥ ५८४ ॥
प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा ।

त्वंसतोरिति सार्द्धेन । इदं वाक्यमखण्डार्थनिष्ठं भवेत् त्वंसतोस्त्वंसत्पदयोस्तुल्यनीडत्वादेकार्थवृत्तित्वान्नीलाश्वपदवदित्यक्षरार्थः । नीलोश्व इतिपदयोर्यद्यपि गुणगुणिरूपेण संसृष्टार्थविषयत्वं तथाप्येकद्रव्यपर्यवसायित्वेन सामानाधिकरण्ये दृष्टान्त इति द्रष्टव्यम् । कथं पदयोरेकार्थनिष्ठत्वं तद्दर्शयति । निर्दुःखेति । निर्दुःखवाचिना सच्छब्देन योगात्सामानाधिकरण्यात्त्वंशब्दस्य तदर्थता सच्छब्दार्थता तथा प्रत्यगात्माभिधानेन त्वंशब्देन तच्छब्दस्य सच्छब्दस्य युतेर्योगात्सामानाधिकरण्यादपरोक्षात्मता सिद्ध्यतीत्यर्थः ॥ १७२ ॥

वाक्यमप्यपरोक्षवस्तुप्रतिपादकमित्यत्र दृष्टान्तमाह ।

(१७३) दशमस्त्वमसीत्येवं वाक्यं स्यात्प्रत्यगात्मनि ॥ ५८५ ॥

दशमस्त्वमसीति ॥ १७३ ॥

ननु तत्त्वंपदयोरेकार्थनिष्ठत्वे पर्यायत्वापत्तौ सहप्रयोगायोग इति चेन्नास्ति पर्यायत्वं प्रवृत्तिनिमित्तभेदादित्यभिप्रेत्याह ।

(१७४) स्वार्थस्य ह्यप्रहाणेन विशिष्टार्थसमर्पकौ ।
प्रत्यगात्मावगत्यन्तौ नान्योर्थोर्थाद्विरोध्यतः ॥ ५८६ ॥

स्वार्थस्य हीति । प्रत्यक्त्वपरोक्षत्वलक्षणस्वार्थस्य स्ववाच्यार्थस्याप्रहाणेनापरित्यागेनैव त्वंसच्छब्दौ विशिष्टार्थसमर्पकौ, अतो वाच्यभेदान्न पर्यायतेत्यर्थः । एवं तर्ह्यखण्डार्थत्वं न स्यादित्याशङ्क्याह । प्रत्यगात्मेति । प्रत्यगात्मनः शुद्धसाक्षिणोवगतिस्तत्त्वावगतिरन्तोवसानं ययोस्तौ तथा श्रूयमाणं पदयोः सामानाधिकरण्यं मिथो विरुद्धवाच्यार्थसंसर्गे ऽन्यतरविशिष्टे ऽन्यतरस्मिन् वा पर्यवसानमगच्छत्कल्पितभेदपरामर्शेन लक्षणया विगतपरोक्षत्वापरोक्षत्वाद्यंशे स्वरूपमात्रे सोयं देवदत्त इतिवदखण्डे पर्यवस्यतीति प्रत्यगात्मावगत्यन्तौ तत्त्वंशब्दावुक्तावित्यर्थः । ननु तत्त्वंपदयोः सामानाधिकरण्यमंशांशित्वादिविषयतयाप्युपपत्स्यते किमित्यखण्डार्थतापक्षपात इत्यत आह । नान्योर्थ इति । अतो ऽस्मादुक्तादखण्डार्थादेकरसाद्विरोधी अन्योर्थो न वेदान्तेषु प्रतिपाद्यतइत्यर्थः । तदिदं विवक्षितं तत्त्वमर्थयोः सुवर्णं कुण्डलमितिवच्च कार्यकारणभावेन संसर्गः संभवति, "अन्यत्रास्मात्कृताकृता"दिति श्रुतिविरोधात्, नापि भूम्युषरादिवदंशांशिभावेन, निष्कलं निष्क्रियमित्यादि, कूटस्थैकरसप्रतिपादकश्रुतिविरोधात्, नापि गुणगुणिभावेन नीलमुत्पलमितिव,न्निर्गुणत्वश्रुतिविरोधात्, नापि जातिव्यक्तिविशिष्टस्वरूपादिप्रकारेण संसर्गः, "एकमेवाद्वितीयमसङ्गो ह्ययं पुरुष" इत्यादिश्रुतिविरोधा,त्तस्माद्विशिष्टसंसर्गविरोधि वस्तुमात्रनिष्ठत्वं वाक्यस्याखण्डार्थत्वमिह विवक्षितं, तथा च विमतमखण्डार्थनिष्ठम्, उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदवस्तुनिष्ठत्वात्, सोयं देवदत्तः खं छिद्रमित्यादिवाक्यवदिति ॥ १७४ ॥

नन्वेवमखण्डार्थनिष्ठत्वेपि वाक्यस्य न तावन्मात्रे पर्यवसानं युक्तं, बोधमात्रात्फलासिद्धेर्यत्नान्तरमेष्टव्यमिति क्रियापर्यवसायिता कस्मान्न कल्प्यतइत्याशङ्क्य मुमुक्षोर्जिज्ञासितमर्थं विहायार्थान्तरपरत्वकल्पने ऽबुभुत्सितार्थपरत्वेन वाक्यस्याप्रामाण्यप्रसङ्गान्मैवमित्यभिप्रेत्य ज्ञानमात्रादेव फलसिद्धिं दृष्टान्तेनोपपादयति ।

(१७५) नवबुध्यपहाराद्धि स्वात्मानं दशपूरणम् ।
अपश्यन् ज्ञातुमेवेच्छेत्स्वमात्मानं जनस्तथा ॥ ५८७ ॥

नवबुद्धीत्यादिना । नवैव वयमिति बुद्ध्या भ्रमरूपया ऽपहारात्तिरोहितत्वात्तिरोधानमात्रनिवृत्तिफलतया दशत्वसंख्यापूरणं स्वात्मानमपश्यन् ज्ञातुमेवेच्छेन्न तु किं चित्कर्त्तुमित्यर्थः । यथा ऽयं दृष्टान्तस्तथा जनो मुमुक्षुरिति स्वमात्मानं केनापि हेतुना विस्मृतं ज्ञातुमेवेच्छति भ्रमनिवृत्तिफलायैवातः क्रियापरत्वकल्पना नावकाशं लभतइत्यर्थः ॥ १७५ ॥

प्रकृते स्वात्मनः केनापहारः कृत इत्यपेक्षायां दार्ष्टान्तिकं विवृण्वंस्तदाह ।

(१७६) अविद्याबद्धचक्षुष्ट्वात्कामापहृतधीः सदा ।
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा ॥ ५८८ ॥

अविद्याबद्धेति । अविद्या ऽनाद्यज्ञानं तया बद्धमाच्छादितं चक्षुर्विवेकदर्शनं यस्य स जीवस्तथा तस्य भावस्तत्त्वं तस्मादिति विग्रहः । आवरणमुक्त्वा विक्षेपमाह । कामापहृतधीरिति । बहिर्विक्षिप्तचित्त इत्यर्थः । सदा सर्वदा दृश्यसंघाताद्विविक्तमेव परमार्थं दृगात्मतत्त्वं नेक्षते न पश्यति यथा नवबुद्ध्यपहृतस्वात्मतत्त्वो नवस्वेव विक्षिप्तचित्तो दशमं नवभ्यो वस्तुतो विविक्तं नेक्षते तथेत्यर्थः ॥ १७६ ॥

कथं तर्ह्यात्मानं जानातीत्यपेक्षायां शास्त्राचार्योपदेशाक्षिमित्तमात्राज्जानातीति सदृष्टान्तमाह ।

(१७७) दशमस्त्वमसीत्येवं तत्त्वमस्यादिवाक्यतः ।
स्वमात्मानं विजानाति कृत्स्नान्तःकरणेक्षणम् ॥ ५८९ ॥

दशमस्त्वमसीत्येवमिति । कृत्स्नान्तःकरणेक्षणमहंकर्त्तुरपि विविक्तं तत्साक्षिणमित्यर्थः ॥ १७७ ॥

ननु

Digitized by Google

यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।
तच्छब्द एवकारश्च स्यादुपादेयलक्षणम् ॥

इतिन्यायेन प्रथमनिर्दिष्टमुद्देश्यं चरमनिर्दिष्टमुपादेयमिति नियमो वक्तव्यः, इह नोपपद्यते, यतस्तत्त्वमित्यत्र तदर्थस्य प्राथम्यं श्रूयते, अहं ब्रह्मास्मीत्यत्र त्वमर्थस्य, एवं तत्रतत्रान्यथान्यथा श्रूयमाणत्वात्कथमिहोद्देश्यविधेयनियम इत्याशङ्क्य वेदपदानामर्थवशादेव संबन्धो न पाठवशादाहर पात्रं पात्रमाहरेतिवदार्थनियमं विवक्षवाह ।

(१७८) इदं पूर्वमिदं पश्चात्पदं वाक्यं भवेदिति ।
नियमो नैव वेदेस्ति पदसांगत्यमर्थतः ॥ ५६० ॥

इदं पूर्वमिति । पाठस्यानियमेपि प्रसिद्धमुद्दिश्यानूद्याप्रसिद्धो बोध्यतइति न्यायादिदं प्रसिद्धार्थकत्वमहमादिपदं पूर्वमिदमप्रसिद्धार्थकं ब्रह्म सदादिपदं पश्चादित्येवं पदं विन्यस्तं वाक्यं भवेदित्यन्वयव्यतिरेकाभ्यामवधार्य ततो वाक्यार्थबोधनं त्वमर्थस्य तदर्थात्मत्वप्रतिपत्तिरूपं भवेदित्यर्थः ॥१७८॥

उक्तेर्थे हेतुमाह ।

(१७९) वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः ।
अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबोधनम् ॥ ५६१ ॥

वाक्ये हीति ॥ १७९ ॥

आचार्येण ब्रह्मासीत्युपदिष्टः खलु शिष्यः कथमहं ब्रह्म स्यामिति पृच्छति तदन्यथानुपपत्त्या वाक्यं साक्षाद्बोधजननसमर्थं न भवतीति गम्यतइत्याशङ्क्याह ।

(१८०) यदा नित्येषु वाक्येषु पदार्थस्तु विविच्यते ।
वाक्यार्थज्ञानसंक्रान्त्यै तदा प्रश्नो न युज्यते ॥ ५६२ ॥

यदा नित्येष्विति । नित्येष्वर्थाव्यभिचारिष्वित्यर्थः ॥१८०॥

पदार्थतत्त्वानभिज्ञस्यैव प्रश्नो घटतइत्युक्तं स्पष्टयति ।

(१८१) अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु ।
स्मृत्यभावेन वाक्यार्थो ज्ञातुं शक्यो हि केन चित् ॥५६३॥

अन्वयेति । अन्वयव्यतिरेकोक्तिशब्देनावान्तरवाक्यैस्तदनुकूलैश्च तर्कैरात्मानात्मविवेचनमुच्यते, पदार्थस्मृतिः पदोपस्थापिता वाक्यार्थज्ञानकारणमित्यत्र लोकप्रसिद्धिमाह । स्मृत्यभावइति ॥ १८१ ॥

तत्रापि त्वंपदार्थविवेके ऽतीव यत्नः कार्य इत्यभिप्रेत्याह ।

(१८२) तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः ।
व्यज्यते नैव वाक्यार्थो नित्यमुक्तोहमित्यतः ॥ ५६४ ॥

तत्त्वमस्यादीति त्रिभिः श्लोकैः ॥ १८२ ॥

विचारप्रयोजनं द्रढयति ।

(१८३) अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा ।
त्वंपदार्थविवेके हि पाणार्पितबिल्ववत् ॥ ५६५ ॥
वाक्यार्थो व्यज्यते चैवं केवलोऽहंपदार्थतः ।
दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात् ॥ ५६६ ॥

अन्वयव्यतिरेकोक्तिरिति । अत इति पूर्वश्लोकगतं पदमस्मिन् योज्यं, तद्विवेकाय त्वंपदार्थविवेकायेत्यर्थः । पदार्थविवेकफलं स्पष्टयति । त्वंपदार्थविवेके हीति । केवलो भेदसंसर्गशून्यो वाक्यार्थ इत्यन्वयः । तत्र हेतुमाहाहंपदार्थतो दुःखीत्येतदपोहेनेति । अहमिति प्रतीयमानात्पदार्थाद् दुःखीत्येतस्येदमंशस्यापोहेन प्रत्यगात्मनः साक्षिणो विशेषेण निश्चयादित्यर्थः ॥ १८३ ॥

एवमुक्तेन न्यायेन वाक्यादेवापरोक्षाखण्डब्रह्मात्मज्ञानमुपपाद्येदानीं पूर्ववादिकल्पनाया निर्मूलतामाह ।

(१८४) तथैवं संभवत्यर्थे श्रुतहानाश्रुतार्थधीः ।
नैव कल्पयितुं युक्ता पदवाक्यार्थकोविदैः ॥ ५६७ ॥

तत्रैवमिति ॥ १८४ ॥

यथाव्याख्यानं वाक्यस्य यथाश्रुतार्थे संभवति श्रुतहान्यादिकल्पनमनवकाशमित्युक्तमयुक्तं, प्रत्यक्षादिविरुद्धेर्थे वाक्यस्य बाधदर्शनादिति पूर्ववादी दृष्टान्तेन शङ्कते ।

(१८५) प्रत्यक्षादीनि बाधेरन् कृष्णलादिषु पाकवत् ।
अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम् ॥ ५६८ ॥

प्रत्यक्षादीनीति । यथा कृष्णलान् श्रपयेदिति कृष्णलशब्दवाच्यसुवर्णमयकणेषु श्रुतोपि पाकः प्रत्यक्षेण बाध्यते तेषु विक्लित्तेरदर्शनात्, किं त्वदृष्टार्थ एव संस्कारस्तत्र पाकक्रियासाध्यः, एवमिहाप्यखण्डार्थतां वाक्यस्य प्रत्यक्षादीनि प्रमाणानि भेदग्राहकाणि बाधेरन्, श्रुतेप्यात्मनो ब्रह्मत्वे पूर्णत्वादर्शनादतः प्रसंख्यानेनात्मसंस्कारार्थता वाक्यस्येति चेत्तत्रोत्तरमाह । अक्षजादीति । भवेदेवं यदि कर्तृत्वादिप्रतिभासस्य प्रत्यक्षप्रमाणता स्या,चैतदस्ति, अध्यस्ताहंकाराद्युपरागमन्तरेण स्वत आत्मनि दुःखित्वादिधर्मसंबन्धस्य निराकृतत्वादतः प्रत्यक्षाद्याभासैरेतैः प्रमाणभूतवाक्यबाधनं कथं स्यान्नैव स्यादित्यर्थः । "प्रयाजेप्रयाजे कृष्णलं जुहोती"तिवद्ब्रह्मज्ञानसंस्कृतस्यात्मनो ऽन्यत्र विनियोगादर्शनादिह न संस्कारार्थत्वं वाक्यस्योपपद्यते । सद्यो ब्रह्मत्वादर्शनं तु पदार्थमतिदार्ढ्याभावादित्युक्तमेवेति भावः ॥ १८५ ॥

नन्वेवं विरोधितालक्षणाप्रामाण्याभावेपि स्यादनुत्पत्तिलक्षणमप्रामाण्यं वाक्यस्येति पूर्ववादी शङ्कते ।

Digitized by Google

(१८६) दुःख्यस्मीति सति ज्ञाने निर्दुःखीति न जायते ।
प्रत्यक्षादिनिभत्वेपि वाक्यान्न व्यभिचारतः ॥ ५९९ ॥

दुःख्यस्मीति । सतीति । दुःखित्वादिभानस्योक्तरीत्या प्रत्यक्षाद्याभासत्वेपि दुःख्यस्मीति विरोधग्रन्थिनि ज्ञाने सति वाक्याच्चिर्दुःखीति विज्ञानं न जायते, इति योजना । पूर्वसिद्धतया प्रत्यक्षस्यासंजातविरोधित्वेन प्राबल्यमस्तीत्यभिप्रायः । दूषयति । न व्यभिचारत इति ॥ १८६ ॥

तमेव व्यभिचारमाह ।

(१८७) स्वप्ने दुःख्यहमध्यासं दाहच्छेदादिहेतुतः ।
तत्कालभाविभिर्वाक्यैर्न बाधः क्रियते यदि ॥ ६०० ॥

स्वप्नइति । स्वप्ने दाहच्छेदादिहेतुतो निमित्तादहं दुःख्यासं तदा ऽऽप्तोपदेशाच्चिर्दुःखो ऽभूवमित्यनुभवसिद्धत्वाच्चात्मधर्मो दुःखित्वादीत्यर्थः । तत्र पराभिनिवेशमनुवदति, तत्कालेति ॥ १८७ ॥

तथापि दुःखमात्मव्यभिचारीत्याह ।

(१८८) समाप्तेस्तर्हि दुःखस्य प्राक्च तद्बाध इष्यताम् ।
नहि दुःखस्य संतानो भ्रान्तेर्वा दृश्यते क्वचित् ॥ ६०१ ॥

समाप्तेरिति । दुःखस्य समाप्तेरूर्ध्वं तद्बाधो दुःखबाध इष्यते, एवं प्राक्च पूर्वमपि दुःखं नाभूदिति तद्बाध इष्यतां, मध्ये दृश्यमानस्य शुक्तिरूप्यवन्मिथ्यात्वाव्यभिचारादित्यर्थः । कुतो बाध इष्यतइत्यत्र हेतुमाह । नहीति । भ्रान्तेर्वेति दृष्टान्तार्थो वाशब्दः, तस्माद्दुःखित्वादेरात्मनि सति व्यभिचाराद्दागन्तुकस्य चाविकारिण्यात्मन्यनुपपत्तेरारोपितत्वसिद्धौ प्रमाणज्ञानं शुक्तितत्त्वज्ञानमिव रजतादिबाधनेन दुःखित्वादिबाधनं कुर्वदेव वाक्यादुदेतीति न वाक्यस्यासामर्थ्यशङ्कावकाश इति तात्पर्यार्थः ॥ १८८ ॥

इतश्च वाक्यं न प्रत्यक्षाद् दुर्बलमित्याह ।

(१८९) प्रत्यगात्मन आत्मत्वं दुःख्यस्मीत्यस्य बाधया ।
दशमं नवमस्येव वेद चेदविरुद्धता ॥ ६०२ ॥

प्रत्यगात्मन इति । स्पष्टार्थः ॥ १८९ ॥

विस्तरेणोक्तं न्यायार्थं संक्षिप्याह श्लोकचतुष्टयेन ।

(१९०) नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः ।
वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥ ६०३ ॥
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥ ६०४ ॥
सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥ ६०५ ॥
प्रबोधेन यथा स्वाप्नं सर्वं दुःखं निवर्तते ।
प्रत्यगात्मधिया तद्वद् दुःखित्वं सर्वदा ऽऽत्मनः ॥ ६०६ ॥

नित्यमुक्तत्वेत्यादिना । प्रमा स्फुटतरा अपरोक्षा । निगदव्याख्याताः श्लोकाः ॥ १९० ॥

पुरोक्तकृष्यालादिपाकदृष्टान्तवैषम्यं स्फुटयति ।

(१९१) कृष्यालादौ प्रमाऽजन्म तदन्यार्था ऽमृदुत्वतः ।
तत्त्वमस्यादिवाक्येषु न त्वेवमविरोधतः ॥ ६०७ ॥

कृष्यालादाविति । प्रमाया अजन्म यत्कृष्यालादौ न युज्यते यतस्तत्रान्यार्था प्रमा ऽदृष्टार्था न पाकार्था ऽमृदुत्वतो ऽमृदुत्वात्कृष्यालानामिति योजना । कृष्यालपाके पुरुषस्यानैश्वर्यादशक्यार्थे च नियोगानुपपत्तेरित्यर्थः । प्रकृते न तथाविधो विरोधोस्तीत्याह । तत्त्वमिति ॥ १९१ ॥

"तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः ।
व्यज्यते नैव वाक्यार्थः"
इत्युक्तं प्रपञ्चयंस्त्वंपदार्थविवेचने यत्नाधिक्यं सूचयति ।

(१९२) वाक्ये तत्त्वमसीत्यस्मिन् ज्ञातार्थं तदसिद्वयम् ।
त्वमर्थे ऽसत्यसाहाय्याद्वाक्यं नोत्पादयेत्प्रमाम् ॥ ६०८ ॥

वाक्ये तत्त्वमिति । पदत्रयात्मकेस्मिन्वाक्ये तत्पदमसिपदं चेति द्वयं ज्ञातार्थं प्रसिद्धार्थं त्वमर्थे त्वंपदार्थे ऽसत्यविज्ञाते ऽसाहाय्यात्सहायशून्यत्वात्सहकारिविरहाद्वाक्यमेतत्प्रमां नोत्पादयेदपरोक्षनिश्चयरूपामित्यर्थः ॥ १९२ ॥

असिपदस्योपयोगमाह ।

(१९३) तत्त्वमोस्तुल्यनीडार्थमसीत्येतत्पदं भवेत् ।

तत्त्वमोरिति । तुल्यनीडार्थं कुरुचिन्तयेत्यादिक्रियाकाङ्क्षानिवारणेन सामानाधिकरण्यसिद्ध्यैक्यालम्बनत्वस्पष्टीकरणार्थमस्यस्मीत्यादिपदमुपयुज्यतइत्यर्थः ॥ १९३ ॥

निराकाङ्क्षे सामानाधिकरण्ये सति को लाभ इत्यपेक्षायामाह ।

(१९४) तच्छब्दः प्रत्यगात्मार्थस्तच्छब्दार्थस्त्वमस्तथा ॥ ६०९ ॥
दुःखित्वाप्रत्यगात्मत्वे वारयेतामुभावपि ।

तच्छब्द इति । प्रत्यगात्मा ऽर्थो यस्य स प्रत्यगात्मार्थस्तच्छब्दः स्यात्, त्वंपदेन सामानाधिकरण्यादिति योज्यम् । तथा त्वमस्त्वंपदस्य तच्छब्दार्थो ऽर्थो भवेत्तत्पदेन सामानाधिकरण्यादिति योजना । तदा को लाभ इति तमाह । दुःखित्वेति । उभावपि शब्दौ त्वमर्थस्य दुःखित्वांशं तदर्थस्यानात्मत्वपरोक्षत्वांशं च वारयेतामित्यर्थः ॥ १९४ ॥

एवं वाक्यार्थवर्णने ऽद्वितीयत्वपरश्रुत्यविरोधः सिद्ध्यतीत्यभिप्रेत्योपसंहरति ।

Digitized by Google

(१६५) एवं च नेतिनेत्यर्थौ गमयेतां परस्परम् ॥ ६१० ॥

एवं चेति । नेतिनेति वाक्यसिद्धमर्थमित्यर्थः ॥ १९५ ॥

पूर्वपक्षे श्रुतहान्यश्रुतकल्पना निष्प्रमाणिकेत्युक्तमुपसंहरति ।

(१६६) एवं तत्त्वमसीत्यस्य गम्यमाने फले कथम् ।
अप्रमाणत्वमस्योक्त्वा क्रियापेक्षत्वमुच्यते ॥ ६११ ॥

एवमिति । कथंशब्द आक्षेपार्थः ॥ १९६ ॥

यस्मादेवं विचार्यमाणे क्रियाया अनवकाशस्तस्मादित्युपसंहरति ।

(१६७) तस्मादाद्यन्तमध्येषु कुर्वित्येतद्विरोध्यतः ।
न कल्पामो ऽश्रुतत्वाच्च श्रुतत्यागोप्यनर्थकः ॥ ६१२ ॥

तस्मादिति । आदौ तत्त्वमसीति प्रथमोपदेशे मध्ये पदार्थपरिशोधनान्वयव्यतिरेकग्रहणकाले ऽन्ते च निर्विचिकित्सब्रह्मानुभवकाले कुर्वित्येतदनुष्ठानकल्पनं तत्तदर्थप्रतिपत्तिविरोधि यतो ऽतो न कल्पामो न कल्पयामः क्रियामिति शेषः । किं चाश्रुतत्वादपि न कल्पयामः । न केवलमश्रुतत्वात्क्रिया त्याज्या श्रुतत्यागस्यानर्थकत्वादपीत्याह । श्रुतेति । नहि तत्त्वमर्थयोः स्वरूपमप्राप्तं चिन्तनीयतया विधातुं शक्यते । तत्प्राप्तिश्चान्यतो ऽसंभवादस्मादेव तत्प्राप्तिमाशंसतो वाक्यभेदादिदोषप्राप्तिरपरिहार्या स्यात्, तत्त्वमोस्तत्त्वसिद्धिमनपेक्ष्यैव यथाकथंचिच्चिन्तनविधानाभ्युपगमे चिन्त्यब्रह्मसाक्षात्कारस्याप्रमात्वादविद्यानिवृत्तिफलासिद्धेर्निरर्थकः प्रसंख्यानविधिरिति भावः ॥ १९७ ॥

उक्तार्थानभिज्ञः पुनराक्षिपति ।

(१६८) यथानुभूयते तृप्तिर्भुजेर्वाक्यान्न गम्यते ।
वाक्यस्य विधृतिस्तद्वद्गोशकृत्पायसी क्रिया ॥ ६१३ ॥

यथेति । भुजेर्भोजनात्तृप्तिः फलं वाक्याद्वाक्यार्थज्ञानमात्राच्च गम्यते मोक्षफलमिति शेषः । तस्माद्यथा गोशकृतो गोमयात् पायसी क्रिया पायसकरणं नोपपद्यते, तस्यातत्साधनत्वात्तद्वद्वाक्यस्य विधृतिर्विधारणमर्थतो ऽवधारणं न वाक्यार्थापारोक्ष्यसाधनमित्यर्थः ॥ १९८ ॥

उत्सर्गतो वाक्यं नार्थापारोक्ष्यार्थमित्येतदङ्गीकुर्वन् प्रकृते तस्यापवादकमाह सिद्धान्ती ।

(१६९) सत्यमेवमनात्मार्थे वाक्यात्पारोक्ष्यबोधनम् ।
प्रत्यगात्मनि न त्वेवं संख्याप्राप्तिवद्ध्रुवम् ॥ ६१४ ॥

सत्यमिति । प्रत्यगात्मनि तु नैवमध्रुवमनिश्चितं, किं तु संख्याप्राप्तिवद्दशमसंख्याप्राप्तिवदपरोक्षज्ञानसाधनत्वं वाक्यस्य ध्रुवमेवेत्यर्थः ॥ १९९ ॥

कुत इत्यपेक्षायां स्वतो ऽपरोक्षप्रत्यगात्मन एव ब्रह्मत्वोपदेशादित्याह ।

(२००) स्वसंवेद्यत्वपर्याय: स्वप्रमाणक इष्यताम् ।
निवृत्तावहम: सिद्ध: स्वात्मनो ऽनुभवश्च न: ॥ ६१५ ॥

स्वसंवेद्यत्वेति । स्वप्रमाणक: प्रमाणनिरपेक्षप्रकाशमानतास्वभाव आत्मेष्यतां स्वयंज्योतिष्ट्वादिश्रुतेरित्यर्थः । तथा च वाक्यादहमो ऽहंकारस्य ब्रह्मभेदकस्य निवृत्तौ स्वात्मनो ऽनुभवश्च सिद्ध एव नोस्माकमिति न किं चिदनुपपन्नमित्यर्थः । विमतं परोक्षार्थज्ञानजनकं वाक्यत्वात् संमतवदित्यादिप्रयोगेष्वनात्मविषयत्वमुपाधिर्दशमस्त्वमसीत्यादौ व्यभिचारश्चेत्युक्तं भवति ॥ २०० ॥

अत्र दुःखानुभवविरोधशङ्का न कार्या, दुःखस्य व्यभिचारित्वेनात्मधर्मत्वस्य निरस्तत्वाद्विषयधर्मत्वाच्चेत्यभिप्रेत्याह ।

(२०१) बुद्धीनां विषयो दु:खं तापस्य विषया मता: ।
कुतो ऽस्य दु:खसंबन्धो दृशे: स्यात्प्रत्यगात्मन: ॥ ६१६ ॥

बुद्धीनामिति । दुःख्यहमस्मीति दुःखधर्मवत्त्वेनाहंकर्तुरेवानुभवात्तस्य विषयभूतं दुःखं न बुद्धिवृत्त्याश्रयाहंकर्तृसाक्षिण आत्मनो धर्मः संभवतीत्यर्थः ॥ २०१ ॥

सर्वधर्मरहितश्चेत्प्रत्यगात्मा कथं तस्यानुभव इत्यत आह ।

(२०२) दृशिरेवानुभूयेत स्वेनैवानुभवात्मना ।
तदाभासतया जन्म धियो ऽस्यानुभव: स्मृत: ॥ ६१७ ॥

दृशिरेवेति । दृशेरनुभवस्वभावत्वात्तस्य स्वरूपे को नामान्योनुभवो ऽपेक्ष्यतेत्यर्थः । तर्हि कथं तस्य विशेषानुभव इति तत्स्वरूपमाह । तदाभासतयेति । चैतन्याभासव्याप्ततया धियो जन्मैवात्मन आगन्तुकोनुभव: स्मृतो विद्वद्भिरित्यर्थः ॥ २०२ ॥

प्रकारान्तरेण प्रसंख्यानप्राप्तिं निराकरोति ।

(२०३) अशनायादिनिर्मुक्त: सिद्धो मोक्षस्त्वमेव स: ।
श्रोतव्यादि तवेत्येतद्विरुद्धं कथमुच्यते ॥ ६१८ ॥

अशनायादीति । सर्वसंसारविनिर्मुक्तो नित्यसिद्धो मोक्षो ब्रह्मत्वमेवेत्याचार्योपदेशे सति तव श्रोतव्याद्यनुष्ठेयं विद्यत इति कथं विरुद्धमुच्यते, नह्यविक्रियं ब्रह्म त्वं कर्ता चेति वचः प्रमाणं स्यादित्यर्थः ॥ २०३ ॥

अथ तत्त्वं सेत्स्यतीति विपरिणाम उपदेशवाक्यस्याभ्युपेयत इति शङ्कामनूद्य तत्रैकं संधित्सतो ऽपरं प्रच्यवत इति न्यायेन मोक्षानित्यत्वप्रसङ्गं दोषमाह ।

(२०४) सेत्स्यतीत्येव चेत्तस्याच्छ्रवणादि तदा भवेत् ।
मोक्षस्यानित्यतैव स्याद्विरोधे नान्यथा वच: ॥ ६१९ ॥

सेत्स्यतीति । एवमुभयथा विरोधे सति वचो वाक्यं नान्यथा न विपरिणामवद्युक्तमित्यर्थः ॥ २०४ ॥

इतश्च प्रसंख्यानवादो ऽनुपपन्न इत्याह ।

(२०५) श्रोतृश्रोतव्ययोर्भेदो यदीष्टः स्याद्भवेदिदम् ।
इष्टार्थेऽपि एवं स्यान्न युक्तं सर्वथा वचः ॥ ६२० ॥

श्रोतृश्रोतव्ययोरिति । श्रोत्रादिभेदो यदीष्टः स्यात्तदेदं प्रसंख्यानं भवेत्कर्तृकर्मभेदाभावे कार्यानुपपत्तेरित्यर्थः । अस्तु भेद इति चेत्तत्राह । इष्टार्थेति । जीवस्य ब्रह्मभावो हीष्टार्थः सो ऽन्यस्यान्यभावायोगाद्विहन्येतातः सर्वथा वचो वाक्यं न युक्तमयुक्तमप्रमाणमेव प्रसंख्यानपक्षे भवेदित्यर्थः ॥ २०५ ॥

न युक्तं वच इत्येतत्प्रकटयति ।

(२०६) सिद्धो मोक्षो ऽहमित्येव ज्ञात्वा ऽऽत्मानं भवेद्यदि ।
चिकीर्षुर्यः स मूढात्मा शास्त्रं चोद्घाटयत्यपि ॥ ६२१ ॥

सिद्ध इति । उक्तप्रकारेणात्मानं ज्ञात्वा यो यदि चिकीर्षुर्भवेत्स मूढात्मेत्यन्वयः । उद्घाटयत्युत्सादयतीत्यर्थः ॥ २०६ ॥

मूढात्मत्वं प्रकटयति ।

(२०७) नहि सिद्धस्य कर्तव्यं सकार्यस्य न सिद्धता ।
उभयालम्बनं कुर्वन्नात्मानं वञ्चयत्यसौ ॥ ६२२ ॥

नहीति ॥ २०७ ॥

ननु किमित्यस्माविन्दथास्मदभिप्रायमज्ञात्वैवेति पूर्ववादी स्वाभिप्रायमाविष्करोति ।

(२०८) सिद्धो मोक्षस्त्वमित्येतद्वस्तुमात्रं प्रदर्श्यते ।
श्रोतुस्तथात्वविज्ञाने प्रवृत्तिः स्यात्कथं त्विति ॥ ६२३ ॥

सिद्धो मोक्षस्त्वमिति । मुमुक्षोरात्मविज्ञाने प्रवृत्त्यर्थं सिद्धब्रह्मरूपो मोक्षस्त्वमसीति वस्तुमात्रकथनपरमिदं वाक्यं न तत्त्वपर्यवसितमित्यर्थः ॥ २०८ ॥

उक्तमेव विवृणोति ।

(२०९) कर्ता दुःख्यहमस्मीति प्रत्यक्षेणानुभूयते ।
कर्ता दुःखी च माभूवमिति यत्नो भवेत्ततः ॥ ६२४ ॥

कर्त्तेति ॥ २०९ ॥

वाक्यश्रवणानन्तरं मन्तव्य इति श्रुत्या कर्तव्यविधानाद्यत्नमेवाभ्युपेयमित्याह ।

(२१०) तद्विज्ञानाय युक्त्यादि कर्तव्यं श्रुतिरब्रवीत् ।
कर्तृत्वाद्यनुवादेन सिद्धत्वानुभवाय तु ॥ ६२५ ॥

तद्विज्ञानायेति । त्वमिति कर्तृत्वमनूद्य वस्तुगत्या त्वं सिद्धमोक्षब्रह्मरूपोऽस्यतस्तज्ज्ञानाय यतस्वेति वाक्यतात्पर्यमित्यर्थः ॥ २१० ॥

नेयं कल्पना श्रुत्यनुसारिणीति सिद्धान्ती दूषयति ।

(२११) निर्दुःखो निष्क्रियो ऽकामः सिद्धो मोक्षो ऽहमित्यपि ।
गृहीत्वैवं विरुद्धार्थमादध्यात्कथमेव सः ॥ ६२६ ॥

निर्दुःख इति । निर्दुःखादिविशेषणो मोक्ष एवाहमिति गृहीत्वापीत्यन्वयः । वाक्याद्वाक्यार्थज्ञानं न जायतएवेति न वक्तुमुचितमप्रामाण्यप्रसङ्गादनुभवविरोधाच्च, तथा चोत्पन्ने ज्ञाने तद्विरुद्धप्रतिपत्तिर्न संजाघटीतीत्यभिप्रायः ॥ २११ ॥

यदि वाक्यादेव निर्दुःखादिलक्षणमोक्षात्मसाक्षात्कारः, कथं तर्हि तदा तद्विरुद्धाकारानुभव इति पृच्छति ।

(२१२) सकामः सक्रियो ऽसिद्ध इति मे ऽनुभवः कथम् ।
अतो मे विपरीतस्य तद्भवान् वक्तुमर्हति ॥ ६२७ ॥

सकाम इति । अतः सकामत्वादिरूपाद्विपरीतस्य मे ब्रह्मभूतस्येत्यर्थः ॥ २१२ ॥

अन्यस्वभावस्य सतो ममान्यस्वभावानुभवः कथमित्यस्मिन्नर्थे सकृच्छ्रुतवाक्यस्य पुंसः प्रश्नो घटते युज्यते, न तु कथमहं निर्दुःखादिरूप इति मुक्तत्वानुभवार्थं इति प्रश्नविषयं विविच्य प्रतिवक्ति ।

(२१३) इहैव घटते प्रश्नो न मुक्तत्वानुभूतये ।
प्रमाणेन विरोधी यः सोऽर्थः प्रश्नमर्हति ॥ ६२८ ॥

इहैवेति ॥ २१३ ॥

अज्ञातज्ञापनस्वभावेन प्रमाणेनापूर्वार्थे बोधिते तद्विरोधी यः प्रमाणाभासगृहीतोऽर्थः स प्रश्नमर्हतीत्युक्तं प्रपञ्चयति ।

(२१४) अहं निर्मुक्त इत्येव सद्सीत्यन्यमानजः ।
प्रत्यक्षाभासजन्यत्वाद् दुःखित्वं प्रश्नमर्हति ॥ ६२९ ॥

अहं निर्मुक्त इति । सदसीति । यदन्यन्मानं तज्ज इत्यर्थः ॥ २१४ ॥

इदानीं शिष्याकाङ्क्षावशेनापि कार्यकल्पनं न घटतइत्याह ।

(२१५) पृष्टमाकाङ्क्षितं वाच्यं दुःखाभावमभीप्सितम् ।

पृष्टमिति । किं तदाकाङ्क्षितं तदाह । दुःखाभावमभीप्सितमिति । दुःखस्याभावो यस्मिन् तद् दुःखाभावं ब्रह्मरूपं मोक्षलक्षणमित्यर्थः ॥ २१५ ॥

प्रश्नस्वरूपमनुपन्यस्य तदनुरूपत्वं प्रतिवचनस्य निगमयति ।

(२१६) कथं हीदं निवर्तेत दुःखं सर्वात्मना मम ॥ ६३० ॥
इति प्रश्नानुरूपं यद्वाच्यं दुःखनिवर्तकम् ।

कथं हीति ॥ २१६ ॥

ननु पृष्टमेवोच्यते प्रसंख्यानद्वारेण तद्व्यतिरेकेण श्रुते दुःखापनयनसामर्थ्याभावादित्याशङ्क्य, प्रमाणस्य प्रमेयावबोधनमेव कार्यं न कार्यान्तरमस्तीति परिहरति ।

Digitized by Google

(२१७) श्रुतेः स्वात्मनि नाशङ्का प्रामाण्ये सति विद्यते ॥६३१॥
तस्मादात्मविमुक्तत्वप्रत्ययं याति तद्वचः ।
वक्तव्यं तत्तथार्थः स्याद्विरोधे ऽसति केन चित् ॥ ६३२ ॥

श्रुतेरिति । श्रुतेः स्वतःसिद्धप्रामाण्ये सति स्वात्मनि स्वप्रमेये नाशङ्का विद्यते स्वप्रमेयावभाससामर्थ्याभावाशङ्का न विद्यतइत्यर्थः । किं ततः सिद्धं तदाह । तस्मादिति । मुक्तत्वप्रत्ययं प्रति कारणत्वं यातीत्यर्थः । विशेषपरिहारस्य कृतत्वादिति भावः ॥ २१७ ॥

वाक्यस्योक्तार्थानुभवहेतुतां विहाय गत्यन्तरं नास्त्यनुभवमार्गगतमित्याह ।

(२१८) इतोन्योनुभवः कश्चिदात्मनो नोपपद्यते ।
अविज्ञातं विजानतां विज्ञातारमिति श्रुतेः ॥ ६३३ ॥

इतोन्य इति । प्रकारान्तरकल्पना चात्रानुपपन्ना, श्रुतिविरोधादित्याह । अविज्ञातारमिति ॥ २१८ ॥

यदुक्तं पूर्वपक्षिणा प्राक्
"चर्या नो शास्त्रसंवेद्या स्यादनिष्टं तथा सति"
इति, तदन्यथैवोपपत्तेर्न प्रसंख्यानकल्पकमित्याह ।

(२१९) त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् ।
साधनत्वं व्रजत्येवं शान्तोदान्तानुशासनात् ॥ ६३४ ॥

त्वंपदार्थेति । "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा ऽऽत्मन्येवात्मानं पश्यती"ति श्रुतेरुपरतिशब्दनिर्दिष्टस्य संन्यासस्यात्मज्ञानं प्रति साधनत्वावगमाच्च तस्याशास्त्रसंवेद्यतया परित्यागप्रसङ्ग इत्यर्थः । तथा च वाक्यार्थज्ञानस्य पदार्थज्ञानपूर्वकत्वात्पदार्थावधारणपर्यन्तमेवाश्रमधर्माणां विधितो ऽनुष्ठानं, ततः परं तु वाक्यादवगतब्रह्मात्मतत्त्वस्य मयेदमस्मै कर्त्तव्यमिति नियोज्यविषयप्रयोजनबुद्धेरनुत्पत्तेर्न तस्य क्वापि विधितः प्रवृत्तिः, किं तु साधकावस्थायामभ्यस्तस्य निवृत्तिरूपस्याश्रमधर्मस्य ज्ञानाविरोधिनः संस्कारमात्रेणानुवृत्तिर्भवति, ततश्च न यथेष्टचेष्टा ऽप्यवकाशं लभतइति सर्वमवदातमेवास्मन्मतइति भावः ॥ २१९ ॥

एतदेव प्रपञ्चयिष्यन् वाक्यार्थोदयप्रकारं श्रौतं व्युत्पादयति ।

(२२०) त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि ।
वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम् ॥ ६३५ ॥

त्वमर्थमिति । शान्त्यादिसाधनसंपन्नो भूत्वा ऽऽत्मन्येवात्माभासव्याप्ते स्वकार्यकरणसंघातएव न बहिरात्मानं प्रत्यक्चेतयितारं पश्येदिति श्रुत्यर्थः प्रथमार्द्धेनोक्तः । सर्वमेनं पश्यतीति श्रुत्यर्थमुत्तरार्द्धेनाह । तत इति । एवं शोधितं प्रत्यगात्मानं सर्वं ब्रह्म पश्यतीति श्रुत्यर्थो दर्शित इति द्योतयति । वाक्यार्थमिति ॥ २२० ॥

एवं विज्ञातवाक्यार्थस्य विधिगोचरता नैव संभवतीत्याह ।

(२२१) सर्वमात्मेति वाक्यार्थे विज्ञाते ऽस्य प्रमाणतः ।
असत्त्वे ह्यन्यभानस्य विधिस्तं योजयेत्कथम् ॥ ६३६ ॥

सर्वमात्मेति ॥ २२१ ॥

वाक्यार्थविज्ञानात्प्रागेव विधयो ऽवकाशं लभन्ते नोर्ध्वमित्युपसंहरति ।

(२२२) तस्माद्वाक्यार्थविज्ञानान्नोर्द्ध्वं कर्म्मविधिर्भवेत् ।
नहि ब्रह्मास्मि कर्त्तेति विरुद्धे भवतो धियौ ॥ ६३७ ॥

तस्मादिति । ऊर्द्ध्वं विध्यसंभवे हेतुमाह । नहीति ॥ २२२ ॥

नन्वैक्यज्ञानेन भेदज्ञानमेव किमिति बाध्यते, विपरीतमेव किं न स्यादित्यत आह ।

(२२३) ब्रह्मास्मीति च विद्येयं नेवं कर्त्तेति बाध्यते ।
सकामो बद्ध इत्येवं प्रमाणाभासजातया ॥ ६३८ ॥

ब्रह्मास्मीति चेति । प्रमाणाभासाज्जाता प्रमाणाभासजाता तयेति विग्रहः ॥ २२३ ॥

स्वभावप्रवृत्ताया बुद्धेः प्रमाणजातया बाध्यत्वं दृष्टान्तेनोपपादयति ।

(२२४) शास्त्राद्ब्रह्मास्मि नान्योहमिति बुद्धिर्भवेद्दृढा ।
यदा ऽयुक्ता तदैवं धीर्यथा देहात्मधीरिति ॥ ६३९ ॥

शास्त्रादिति । दृढा यदा भवेत्तदैवं धीः कर्त्ताहमित्येवं धीरयुक्तेत्यन्वयः । यथा देहात्मधीर्मनुष्योहमित्यादिरूपा शास्त्राद्विदितात्मतत्त्वस्य न भवति तथेत्यर्थः ॥ २२४ ॥

विदितात्मतत्त्वस्य कर्त्ता कामीत्यादिधीरनवकाशेत्युक्तेर्थे दृष्टान्तान्तरमाह ।

(२२५) सभयादभयं प्राप्तस्तदर्थं यतते च यः ।
स पुनः सभयं गन्तुं स्वतन्त्रश्चेन्नहीच्छति ॥ ६४० ॥

सभयादिति । लोकप्रसिद्धार्थानुवादी श्लोकः स्पष्टार्थः ॥ २२५ ॥

यदुक्तं नियोगाभावे ज्ञानिनो यथेष्टचेष्टाप्राप्तिरिति तत्राह ।

(२२६) यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः ।
पदार्थाज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ॥ ६४१ ॥

यथेष्टेति । आदिशब्दाच्छ्रवणादिविधिर्गृह्यते, पदार्थयोरासमन्ताज्ज्ञानं पदार्थस्वरूपालोचनं तेन बुद्धस्य देहाद्यभिमानशून्यस्येति यावत् । पदार्थाज्ञानाद्बुद्धस्य प्रतिबुद्धस्येति वा ।

Digitized by Google

वाक्यार्थानुभवमर्थयमानस्य तत्रैव लग्नचित्तस्य कुतो यथेष्टाचरणप्राप्तिर्निमित्ताभावादवसराभावाच्चेत्यर्थः । प्रबुद्धवाक्यार्थस्य तु मिथ्याज्ञानलेशस्याप्यभावात्तन्मूला यथेष्टचेष्टा नोन्मिषतीति भावः ॥ २२६ ॥

प्रकरणार्थमुपसंहरति ।

(२२७) अतः सर्वमिदं सिद्धं यत्प्रागस्माभिरीरितम् ॥६४२॥

अतः सर्वमिदमिति ॥ २२७ ॥

मुमुक्षोरपि नास्ति यथेष्टचेष्टा, कुतः सा मुक्तस्य स्यादिति कैमुतिकन्यायमाह ।

(२२८) यो हि यस्माद्विरक्तः स्यान्नासौ तस्मै प्रवर्त्तते ।
लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते ॥ ६४३ ॥

यो हीति ॥ २२८ ॥

विदुषो नियोगपारतन्त्र्याभावेपि भिक्षाटनादिप्रवृत्तिवद्विषयान्तरेपि प्रवृत्तिः कदा चित्स्यादिति चेत्तत्राह ।

(२२९) क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिच्छति ।
मिष्टान्नध्वस्ततृट् जानन्नामूढस्तज्जिघत्सति ॥ ६४४ ॥

क्षुधयेति । विषयाणां दुःखसाधनतावधारणपूर्वकं प्रागेव विषवत्त्यक्तानां न पुनरुपादानममूढस्य संभवति, भिक्षाटनादेस्तु ज्ञाननिष्ठाविरोधाभावाच्छरीरस्थितिमात्रहेतुतया ऽऽवश्यकत्वे ऽप्यपूर्वोपचयहेतुत्वाभावाच्च संस्कारवशादनुवृत्तिरिति न दोष इति द्रष्टव्यम् ॥ २२९ ॥

उत्पन्नतत्त्वज्ञानस्य यद्यपि किमपि कृत्यं नास्ति तथापि गुरुशास्त्रे माननीये एवेति शिष्याञ्छिक्षयन्निव गुरुप्रणामं निबध्नाति ।

(२३०) वेदान्तवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम् ।
उज्जहारालिवद्यो नस्तस्मै सद्गुरवे नमः ॥ ६४५ ॥

॥ इति तत्त्वमसिप्रकरणम् ॥

वेदान्तवाक्येति । नो ऽस्मदर्थमित्यर्थः ॥ २३० ॥

इति तत्त्वमसिप्रकरणमष्टादशं विवृतम् ॥ १८ ॥

॥ अथ बालभारतस्य ॥

॥ तृतीयः सर्गः ॥

सूत्रधार इव मुक्तिपुरैक-
द्वारभारतकृतौ कृतकृत्यः ।
श्रेयसेऽस्तु स मुनिर्महनीये
स्वात्मधामनि सुखेन निषण्णः ॥ १ ॥

श्वेतपर्वततटेषु स खेल-
न्नेकदा नृपतिरैक्षत कान्तिम् ।
द्वादशद्युमणिदीप्तिसहस्रीं
पिण्डितामिव दिवः प्रपतन्तीम् ॥ २ ॥

व्योमकालिमपयोदतमिस्र-
ज्योतिरिङ्गणमशीतमयूखम् ।
विश्वविश्वदृगशक्यविलोकैः
स्वप्रभावविभवैः पिदधानाम् ॥ ३ ॥

विस्फुलिङ्गनिभपिङ्गपतङ्ग-
भ्राजमानसर्हांचं वियदब्धौ ।
और्वहेतिपटलीमिव तादृ-
ङ्नीलिमच्छलजलानि पिबन्तीम् ॥ ४ ॥

विशेषकम् ।

किं किमेतदिति निश्चिनुतेऽसौ
यावदग्रभुवि तावदुपेतः ।
दीप्तिलिप्तजगदेष महेन्द्र-
स्यन्दनस्तडिदिव द्रुतमभ्रात् ॥ ५ ॥

स्यन्दनावनिगतेः समकालं
वीक्ष्य पादपुरतो विलुठन्तम् ।
कृष्णसर्पमिव जेतुमरातीन्
पार्थमादित करेण नरेन्द्रः ॥ ६ ॥

संमदादथ हृदा परिरब्धः
पार्थिवेन चिरमेष किरीटी ।
कृष्णया पुनरनेन समन्ता-
दान्तरेण भुजदूरगतोऽपि ॥ ७ ॥

मन्दचन्दनरसो विरसेन्दु-
श्रीर्मुधाकृतसुधापरिणामः ।
कोऽपि संमदपदाय तदाभूत्
सोदरेषु परितः परिरम्भः ॥ ८ ॥

स्पृष्टभीमचरणं च यमाभ्या-
मानतं च पुरतो विनिविष्टम् ।
सव्यसाचिनमथ क्षितिपालः
पूजितप्रहितमातलिरूचे ॥ ९ ॥

अस्मदुग्रतरपञ्चवियोगी
पञ्चवह्नितपसा समसाधि ।
यत् त्वया किमपि पञ्चसमाभि-
स्तद्विदारिकरिपञ्चमुख द्राक् ॥ १० ॥

अङ्गकान्तियमुनाजलसङ्ग-
स्वर्धुनीकृतलसद्वसनांशुः ।
शेषरायितकराम्बुजलक्ष्मी-
रभ्यधादथ सुराधिपसूनुः ॥ ११ ॥

अर्जितेयमजरा धनुषि ज्या
वर्म विद्विषदभेद्यमलाभि ।
शिक्षिता च दिवि पञ्चदशास्त्री
त्वत्प्रसादवशतस्त्रिदशेभ्यः ॥ १२ ॥

निष्कपुष्करमयी मयि माला
सेयमुल्लसदमेयमदेन ।
दीयते स्म हरिणायमपाय-
व्रातघातनपटुर्मुकुटश्च ॥ १३ ॥

चित्रसेनममरेशसभाया
भूषणं भरतपुत्रमुपास्य ।
स्वीकृतं भुवनमोहि मयोच्चै-
र्गीतनर्तनकलायुगलं च ॥ १४ ॥

ते निवातकवचा युधि तिस्रः
कोटयः सुरजितोऽम्बुधिकुक्षौ ।
स्वीकृतेन्द्ररथसारथिनास्त्रै-
र्जघ्निरे नृप भवत्पदिकेन ॥ १५ ॥

व्योमचारिणि हिरण्यपुरेऽहं
कालिकेयकपुलोमजदैत्यान् ।
अच्छिदं निहितपाशुपतास्त्रो-
द्भूतभूरिपशुभिः स्मरणात् ते ॥ १६ ॥

सा रतिः क्वचिदभून्न पुनर्मे
यास्ति नाथ भवदङ्घ्रिविलोके ।
पारिजातमधुपस्य कुतः स्यात्
कर्णिकारकुसुमे रसमोहः ॥ १७ ॥

अस्त्रचित्र्यमिह नः प्रथयेत्थं
तं पृथाप्रथमसूनुरथोचे ।

1–वित्त–इति पाठान्तरम् ।

सोऽपि भूपकुतुकाय वितेने
देवतायुधशतानि ततानि ॥ १८ ॥

तत्क्षणार्जुनभुजार्पणनियुक्ता-
दप्यशस्त्रविसरप्रसरेण ।
किं किमद्य भवितेति जगद्भिः
क्षोभितासुरसुरैः प्रचकम्पे ॥ १९ ॥

अन्तरेऽथ तरलामरमाला-
खेदमेदुरगतिर्द्रुतमेत्य ।
शंकरः स्वयमुदञ्चितपाणिः
प्राणिनामभयदः प्रभुरूचे ॥ २० ॥

वत्स संहरतु संहरतु द्राक्
शस्त्रमस्तु न भवान् भुवनार्त्यै ।
भास्करो यदि करोति तमिस्रं
तत् प्रकाशयति लोकममुं कः ॥ २१ ॥

देवतायुधगणोऽयमरातौ
क्षिप्त एव कुशलाय न शून्ये ।
किं न तत्क्षणमतोयधिमुक्तो
वाडवाग्निरभिहन्ति जगन्ति ॥ २२ ॥

तद्धनुः परिहरेत्युदितोऽपि
स्थाणुना स्वयमसौ हरिसूनुः ।
वीक्ष्य धर्मतनुजस्य मुखाब्जं
तद्वशेव शमितोऽस्त्रममुञ्चत् ॥ २३ ॥

धार्मिनिर्मिततनुतो ससुरेशे-
ऽदृश्यताविरहितेऽथ महेशे ।
ते परस्परसमागमहर्षो-
त्कर्षतो वनमहीषु विलेसुः २४

त्वां निषेवितुमिहाहमुपेतः
पाण्डुनन्दनमिदं किल जल्पन् ।
काननेषु मधुपीमधुरोक्ति-
र्व्यक्ततामथ ततान वसन्तः ॥ २५ ॥

निश्चितं मधुदिनैः परितक्ष्य
स्वल्पिताः शिशिरदीर्घरजन्यः ।
तल्लताः पतिततत्तनुखण्डा-
नीव रेजुरुरुमण्डलपुष्पाः ॥ २६ ॥

1 पुन– इति पाठान्तरम् ।

नृत्तवल्लिवलयो मृदुभङ्गी-
गीतिमान् मलयवायुनटोऽयम् ।
मानिनीजनविडम्बननम्रो
नाटकान्मदयति स्म जगन्ति ॥ २७ ॥

स्वं कुटुम्बमरबिन्दकदम्बं
लुप्तपत्रमवलोक्य सकोपः ।
अर्दितुं किल हिमानि हिमाद्रिं
प्रत्यगात् तरणिरुद्धुरतेजाः ॥ २८ ॥

कः सखाः प्रियतमानभिसर्तुं
ध्यायिनीरिति नितान्तमसाध्वीः ।
कोकिलः किल कुहूरिति वाचा
भाविविद् द्विजवरो निजगाद ॥ २९ ॥

वीक्षितासु सरुषं कुरुवध्वा
गन्धमादनविलासपरासु ।
स्ववधूषु विधुवंशभवैस्तैः
प्रापि पञ्चशरपञ्चशरत्वम् ॥ ३० ॥

यन्मधौ तरुणिमस्पृशि किंचित्
प्रौढिमानमतनिष्ट दिनश्रीः ।
निर्भरं तरणिरेष विशेषात्
तत्क्रुधेव परितापमवाप ॥ ३१ ॥

क्वापि गन्तरि मधौ कुसुमाली-
मण्डनेषु शिथिलीकृतभावाः ।
वल्लयः शुशुभिरे विरहाग्नि-
ज्वालिता इव विपाकपिशङ्ग्यः ॥ ३२ ॥

उच्छलज्जलधितुङ्गतरङ्ग-
ध्वानमङ्गलमृदङ्गनिनादः ।
आययावथ विजित्य वसन्तं
ग्रीष्मभूविभुरुदर्यमतेजाः ॥ ३३ ॥

ग्रीष्मतापचकितः कुसुमेषु-
र्बाणपुष्पमधुभिः स्वगृहाणि ।
सिञ्चति स्म हृदयानि वधूना-
मन्यथा कथमिमानि हिमानि ॥ ३४ ॥

तत्र पात्रनिहितानि पयांसि
श्याममेघमहिषीकुलजानि ।
आपिबद्भिरभितोऽपि विवस्व-
न्नन्दनैरिव दिनैः समवर्धि ॥ ३५ ॥

अद्भुतद्युमणिदीधितिभीतैः
क्ष्मां प्रविश्य जगतोऽपि जलौघैः ।
आश्रिते विलपथान् खलु नाथः
पाथसामिति दधातु समृद्धिम् ॥ ३६ ॥

पाटलाविचकिलद्रुमपुष्पै-
रर्पितद्युतिनि वल्लभदत्तैः ।
नो शिरीषकुसुमैः स्वसमान-
श्रीपुषि द्रुपदजावपुषि श्रीः ॥ ३७ ॥

चन्दनद्रवभरैरपि भीष्म-
ग्रीष्मतापचकितैरिव कामम् ।
स्फीततत्समयशीतगुणेषु
स्त्रीजनस्तनतटेषु विलेसे ॥ ३८ ॥

तैस्तथा जगदिदं शुचिजातैः
पर्यतापि परितः परितापैः ।
नो निशा व्यलसदत्र यथोडु-
द्योतचन्दनधरापि चिराय ॥ ३९ ॥

नूतना दिवि तपात्ययभूभृ-
द्घाटिकेव तरला जलदाली ।
अभ्युपेत्य तपभूरिविभूतिं
लुम्पति स्म मुहुरुष्णमरीचिम् ॥ ४० ॥

छाद्यमानमहसं सहसार्कं
वीक्ष्य नव्यजलदैर्मुदितेव ।
उल्ललास वसुधा नवदर्भै-
रुत्पपात पयसा नदराजिः ॥ ४१ ॥

उद्यतं शुचिजयाय वयस्यं
तोयवाहमवलोक्य नटद्भिः ।
स्फारितस्फुरसदृच्छिखण्डैः
क्षोणिमण्डलममण्डि मयूरैः ॥ ४२ ॥

श्यामतां वहतु वातिकठोरं
वक्तु वार्कविभवं हरतां वा ।
तद्वदो किमपि वारिधरस्तु
प्रीणितानि बत येन जगन्ति ॥ ४३ ॥

तैर्घनाघनघटापरिघट्टैः
खण्डितस्य दिवि चण्डमरीचेः ।
खण्डमण्डलममण्डयदाशा-
मण्डलीं चलतमोमणिमूर्त्या ॥ ४४ ॥

धूमयोनिहृदितः कृतवासं
स्वं पितामहमरण्यमहीषु ।
पावकं दलयति स्म ह हा धिग्-
दुर्विवेकमुदयं मलिनानाम् ॥ ४५ ॥

पाण्डवेद्रुपदजावदनेन्दु-
ज्योत्स्नया कृततमःशमनेषु ।
अप्रवृत्तजलदाम्बुलवेषु
क्रीडितं गिरिगुहान्तगृहेषु ॥ ४६ ॥

यूथिकाकुटजकेतकजाती-
नीपपुष्पकृतपञ्चशरश्रीः ।
आततान मकरध्वजवीरः
सज्जतां त्रिजगतीविजयाय ॥ ४७ ॥

वृष्टितो विरमतापि कदाचित्
तुष्टयेऽनुसरतां पतगानाम् ।
अम्बुचा मुमुचिरे जललेशा-
स्तुङ्गपादपदलेषु गलन्तः ॥ ४८ ॥

गन्धलीनमधुपैरहणात्वं
धारयद्भिरभितोऽपि शिलीन्ध्रैः ।
भूषिता मरकतोपलमिश्रै
रत्नभूषणगणैरिव भूमिः ॥ ४९ ॥

दातुमन्नपटलान्यदिताब्दः
कल्पनाजलमपि चुटदब्धेः ।
यज्जगत्यपि जवात् तदवाप-
च्छुभ्रतां शुचियशोभिरिवासौ ॥ ५० ॥

संगतामपतिवद् घनकालः
काननेषु शरदं परिरभ्य ।
तत्क्षणादपि पलायत शश्वन्
राजहंसजनितध्वनितानि ॥ ५१ ॥

चन्द्रचारुवदना धृतभास्व-
द्दर्पणा सुरधनुर्मुकुटाढ्या ।
हंसहाररुचिरा च तदीय-
क्वाणनूपुररवा शरदागात् ॥ ५२ ॥

पुण्यवानहमनेन समन्तात्
पायिषीय सपदीति मुदाब्धिः ।
उद्गते घटभुवि स्फुटमब्दैः
कर्षितोऽपि भृशमुच्छ्वसिति स्म ॥ ५३ ॥

लोचनैरिव निमेषवियुक्तै-
रम्बुजै रसभृतो भृशमापः ।
पथ्यताममृगयन्त विशुद्धा
मार्गमेव विशदच्छदयूनाम् ॥ ५४ ॥

हन्त भास्करकराग्रगतानां
प्रान्तरे विरमणं विरहेषु ।
श्यामतां गतवतः कृशमूर्तेः
कर्दमस्य हृदयेन विदीर्णम् ॥ ५५ ॥

जीवितैः किमु स यः समयोऽसौ
साहसादिव हृदेषु पतित्वा ।
बर्हिणां छदभरैः पदमापि
छत्रतामुपगतैर्नृपमूर्ध्नि ॥ ५६ ॥

प्रीतिनिश्चलमृगाः करलोल-
त्कङ्कणक्वणपलायितकीराः ।
गीतनृत्तविधिनेव वितेनुः
पालनानि नवशालिषु गोप्यः ॥ ५७ ॥

स्फारितामृतकरामृतकुण्डे
नाकिनागजगती जगतीयम् ।
माधुरीगुणधुरीणधृतेन्दुः
काशिकाशमहसा हसति स्म ॥ ५८ ॥

यद्वनीषु चलखञ्जननेत्रा
सर्वतः शरदसौ विललास ।
तद्बभार भुवि तत्पदलेखा-
विभ्रमं स्थलमहोत्पलवीथी ॥ ५९ ॥

षट्पदो मुहुरयुक्छदपुष्पं
सेवते स्म गजदानसुगन्धि ।
शङ्कितश्रवणतालनिपात-
स्तत्कुलादपि चलादतिबिभ्यत् ॥ ६० ॥

Digitized by Google

बाणपवनयनेऽसनपुष्प-
स्वर्णधामनि मुखे शरदोऽस्या: ।
कुङ्कुमस्तबकमण्डनलक्ष्मीं
बन्धुजीवकुसुमानि समीयु: ॥ ६१ ॥

षट्पदोऽधरदले दयितायाः
संपतन्नवजयेऽतिविलोल: ।
पञ्चभिश्चलकरै: कुरुवीरैः
शक्यते स्म विनिवारयितुं न ॥ ६२ ॥

जानती मधुनिधानसरोज-
श्रीरिवाभिरपराधपरं स्वम् ।
उत्थिते मधुविरोधिनि जाता
भूरिभीरिव शरद्गमनेच्छु: ॥ ६३ ॥

यामिनीं गुरुतरां तरुणीनां
सोष्म च स्तनयुगं तुहिनेऽपि ।
कल्पयन्नथ सह:समयोऽभूत्
कामिनीसुकृतपाकवशेन ॥ ६४ ॥

चिन्तयन् हृदि जपामनुरक्तां
षट्पदोऽधित पदं न फलिन्याम् ।
रोध्ररेणुभसितेन सिताङ्ग-
स्तद्दिने भ्रमतु सैष तपस्वी ॥ ६५ ॥

भास्करोऽपि हिमरुग्णा[1] इव द्यो-
सद्मकोणपथ एव चचार ।
वीक्ष्य भानुमिति भानुमखिन्न्य:
पावकोऽपि हि वह्निर्न बभूव ॥ ६६ ॥

स्म क्रियाव हि पराभवपात्रं
मा हिमैरहमयं च समेतौ ।
इत्यवाप्य हृदि मन्त्रमचालीत्
पावकस्य हरिते खरतेजा: ॥ ६७ ॥

इन्दुरम्बतलेऽम्बुनि पद्मं
म्लानिमापतुरतीव तुषारैः ।
एतयोर्द्युतिरलोकि निलीना
पाण्डवेन्दुपदजामुख एव ॥ ६८ ॥

उद्यतेन जगदेव मयेदं
दूनमित्यनुशयीव सहस्य: ।
संस्मृतागततप:समयोऽसौ
वार्द्धके सति परिव्रजति स्म ॥ ६९ ॥

अनिललोललवङ्गरजोभर-
च्छलसुकोमलकेशलवाञ्चित: ।
शिथिलपद्मपद: शिशिर: शिशु-
नेवहमुद्गतकुन्दरदोऽभवत् ॥ ७० ॥

निशि खलु द्युमणि: फणिविष्टपे
व्रजति तच्चिरसङ्गवशादिव ।
उदकमन्धुषु तापगुणं हिमे
भजति शैत्यमिहापरथा तपे ॥ ७१ ॥

हिमभयादुषसि स्फुटमात्मना
स्तुदनलो वपुरन्तरदीप्यत ।
अजनि तज्जनिधूमसखीमुखे
तनुमतामतिबाष्पततिस्तता ॥ ७२ ॥

हिमगुणैरजयज्जगदप्यद:
समय एष कुचौ न तु योषिताम् ।
इति तयोस्तनुमानिव कुङ्कुम-
स्तबकमूर्तिरदीपि मह:शिखी ॥ ७३ ॥

शिखिधिया कपिभिर्नवकृष्णाला-
समुदयोऽनुपदं परिपुञ्जित: ।
वनमहीभिरपि स्फुटकुङ्कुम-
स्तबकवत् कलितस्तुहिनागमे ॥ ७४ ॥

अहह चुल्लिगृहेषु वधूकर-
प्रथितभस्ममहावसना अपि ।
गुरुतरामपि जाग्रति यामिनीं
हुतभुजोऽपि हिमै: स्म दुता इव ॥ ७५ ॥

हिमभयान्मदनोऽपि हसन्तिका-
मकृत सद्मनि पद्मदृशां हृदि ।
अपरथा कथमूष्ममनोरमं
प्रियसुखाय तदीयकुचद्वयम् ॥ ७६ ॥

द्रौपदी हिमगिरौ शिशिरार्ता
वीक्ष्य रात्रिषु महौषधिमालाम् ।
अग्निविष्टरधियाभिपतन्ती
पर्यहासि दयितैरनुवेलम् ॥ ७७ ॥

१–मग्न इति पाठान्तरम् ।

हिमदग्धपुष्पजनिहेतुवनी-
तरुवल्लिपद्धतिरितः शिशिरः ।
कुसुमाकरस्य ऋतुभर्तुरथा-
गमनं विभाव्य चकितश्चलितः ॥ ७८ ॥

पाञ्चाल्या वाचि पुंस्कोकिलकलगिरि तद्रोमपङ्क्तौ शिरीषे
तत्केशान्ते कलापिच्छदमहसि च तल्लोचने खञ्जरीटे ।
तद्धास्ये रोध्रपुष्पोल्लसितरजसि तद्दन्तपङ्क्तौ च कुन्द-
स्तोमे च प्राप्तहर्षैः कुरुभिरिति चतुर्वर्षिका तत्र निन्ये॥७९॥

मत्वा द्यूतदिनादथो दशसमापूर्तिं समापृच्छ्य तं
शैलेन्द्रं बदरीवनाश्रममहीमासाद्य मासं स्थिताः ।
उत्तीर्णास्तदतः सुबाहुनगरन्यस्तान् गृहीत्वा रथान्
भैमिं प्रेष्य च यामुनाचलतटीं ते पञ्च वीरा ययुः ॥ ८० ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के आरण्यकपर्वण्यर्जुन-
संगमो नाम तृतीयः सर्गः ॥ ३ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ चतुर्थः सर्गः ॥

दृशोराधाय यत्कायकान्तिमिद्धाञ्जनं जनः ।
द्राक् त्रिलोकीविलोकी स्यात् तं सेवे कृष्णयोगिनम् ॥ १ ॥

मिथोलीलास्मितज्योत्स्नालसत्कुसुमसंपदम् ।
खेलैः सफलतां निन्युस्ते यामुनवनावनिम् ॥ २ ॥

तत्र तेषु तलं प्राप्य तन्वानेषु मिथः कथाः ।
कृतार्थं मेनिरे धाम महौषध्यो निजं निशि ॥ ३ ॥

आहूय नूपुरारावैः शिक्षयन्तीव तद्गिरा ।
कृष्णालीलागतिस्तत्र मरालीनामभूद्गुरुः ॥ ४ ॥

कृष्णालीलोक्तिमाकर्ण्य मधुरां वनदेवताः ।
उद्यन्मधुधिया तत्र सदापुः संभ्रमान्मुदम् ॥ ५ ॥

ऋतूपयुक्तपुष्पस्रग्वती तत्र कृता प्रियैः ।
अलंचकार कान्तारं कृष्णा वल्लीव जङ्गमा ॥ ६ ॥

इह तैर्विहितानेकविनोदैरिन्दुनन्दनैः ।
इत्येकादशमुत्कर्षवद्भिर्वर्षमनीयत ॥ ७ ॥

मृगयायै गतोऽन्येद्युर्महाकायमलोकत ।
कंचिद्वृकोदरः काकोदरं* कन्दरगं गिरेः ॥ ८ ॥

कीनाशनगरीलोहप्राकाराकारविग्रहम् ।
ययौ तं निकषा भीमः कुतूहलितकौतुकः ॥ ९ ॥

दशमद्वारनिर्धूतक्रोधानलसदृग्विषः ।
सोऽप्यधावत दुःप्रेक्ष्यः प्रेक्ष्य भीमं भुजंगमः ॥१०॥

मुखोदरस्फुरत्कालदोःकल्परसनायुगम् ।
तं हन्तुमुद्गदभुजः क्रुधा भीमोऽप्यधावत ॥ ११ ॥

तत्फूत्कृन्मारुतेनैव पातिता मारुतेर्गदा ।
द्विषद्वर्ती द्विषद्वृत्तिं स्वजनोऽपि हि गच्छति ॥ १२ ॥

दोर्दण्डेनैव तं हन्तुं प्रवृत्तोऽथ वृकोदरः ।
आपादकण्ठमावेष्टि स्वेन भोगेन भोगिना ॥ १३ ॥

महाबलयुजा तेन बद्धो धुन्वन् बलाद्वपुः ।
महाबलसुतोऽप्येष नासीन्निर्गन्तुमीश्वरः ॥ १४ ॥

अथोत्पातैरिहायातो भीमं भोगिनियन्त्रितम् ।
धर्मसूर्मूर्तिसर्वाङ्गालिङ्गिताङ्गमवैक्षत ॥ १५ ॥

भोगी मल्लः क्व भीमैतत् कोऽप्ययं कोपितः सुरः ।
ध्यात्वेत्यूचे नृपो नागं कस्त्वं बद्धस्तथैष किम् ॥ १६ ॥

सरीसृपो नृपोत्तंसमथोचे मर्त्यभाषया ।
महाभुजभुजंगोऽहमेतद्वननिकेतनः ॥ १७ ॥

जीवाः सर्वेऽत्र मद्भक्ष्यं तान् निघ्नन्नपराधवान् ।
बद्धो मयैष यद्वैरमेकद्रव्यस्पृहा महत्[1] ॥ १८ ॥

केनाप्येकेन जीवेन नाहं तृप्तः पुराभवम् ।
अद्यामुनातिकायेन शेष्ये कुक्षिंभरिः चिरम् ॥ १९ ॥

अमुं ददामि वा तस्मै स्वभक्ष्यं पारितोषिकम् ।
भवत्युत्तरबुद्धिर्मत्प्रश्नानामुत्तरेषु यः ॥ २० ॥

अवोचदथ पृथ्वीन्दुरित्थं यदि तदुच्यताम् ।
कुर्वे दर्वीकर प्रश्नगर्वं खर्वमहं तव ॥ २१ ॥

किं विषादपि पीयूषं स्यादिति भ्रान्तिदं वचः ।
अथ भूपं प्रति व्यालपतिरालपति स्म सः ॥ २२ ॥

को विप्रः किल कः शूद्रः को मित्रं कश्च शात्रवः ।
कः सुधीः कश्च वैधेयः कः शूरः कश्च कातरः ॥२३॥

किं सत्यं किमसत्यं च को धर्मः किं च पातकम् ।
किं सुखं किमु दुःखं च का मुक्तिः का च संसृतिः ॥२४॥

द्विजिह्वत्वादिव प्रश्नद्वितयीमिति पृच्छति ।
तस्मिन् भुजंगमे धीमानभ्यधत्त स्मिताननः ॥ २५ ॥

---

* काकोदरः फणीत्यमरः ।

१–मगात् इति पाठान्तरम् ।

तं जानामि द्विजं नाग यस्य निष्कपटं तपः ।
तपोभिर्द्विजतां याति शूद्रोऽप्युन्मुद्रसंयमः ॥ २६ ॥

विद्धि भोगीन्द्र तं शूद्रं यो रौद्रश्चारुवृत्तमुक् ।
दुर्वृत्ता यान्ति शूद्रत्वं चिवेदीवेदिनोऽपि हि ॥२७॥

श्लाघ्यकर्मोद्यमो मित्रं प्रमादः परमो रिपुः ।
धीमान् भवेद्विरक्तात्मा वेधेयो नास्तिकः पुनः ॥ २८ ॥

स्वकीयेन्द्रियसंकेतादपि प्रविशतोऽन्तरा ।
यः शत्रून् हन्ति कामादीन् स शूर इति मे मतिः ॥२९॥

भीरूणामपि नेत्रान्तललितालोकनेन यः ।
कम्पते नाग निर्मुक्तधैर्यः स खलु कातरः ॥ ३० ॥

सत्यं तच्च हितं जन्तोरसत्यमपि यद्वचः ।
असत्यमेव तत् सत्यमपि यत् परदुःखकृत् ॥३१॥

देवे परेषामद्वेषो रागो वंशक्रमागते ।
सुपात्रदुःस्थयोर्दानं क्षान्तिर्धर्मोऽयमुत्तमः ॥ ३२ ॥

उपकारिण्यपि द्रोहः स्वविश्वस्तेऽपि वञ्चना ।
पूज्येऽपि प्रभुतादर्पः सर्वं[1] तद्विद्धि पातकम् ॥३३॥

सुखं सर्वत्र माध्यस्थ्यं दुःखमिच्छाविजृम्भणम् ।
मुक्तिः शिवात्मनोरैक्यं संसृतिर्द्वेषरागधीः ॥३४॥

नरेन्द्रोऽयमिति प्रश्नोत्तरैर्मन्त्राक्षरैरिव ।
अपश्यन्मुक्तमेवाग्रे भीमं न तु भुजंगमम् ॥ ३५ ॥

राजन् जय जयेत्युक्त्वा मुक्त्वा पुष्पाणि मूर्धनि ।
सुरः कोऽपि विमानस्थः स्वस्थं भूपमथावदत् ॥ ३६ ॥

रागद्वेषोग्रकौरव्यशतग्रन्थिविसंष्ठुले ।
वत्स त्वमेक एवास्मद्वंशे मुक्तामणीयसे ॥ ३७ ॥

अहं स नहुषो नाम नृहंस तव पूर्वजः ।
तपोभिरर्जयामास वासवश्रियमुज्ज्वलाम् ॥ ३८ ॥

ऊढेन सर्वगन्धर्वसुपर्वपरमर्षिभिः ।
चलितोऽस्मि विमानेन शचीसंभोगसंविदा ॥३९॥

अथाशु सर्प सर्पेति मयोक्तः कुम्भजो मुनिः ।
सर्पो भवेति मां कोपसंतप्तः शप्तवानसौ ॥ ४० ॥

अनुग्रहं मया राद्धः स मुनिर्मे तदा ददौ ।
स ते प्रश्नोत्तरैरेव प्रत्यक्षो मम मुक्तिदः ॥ ४१ ॥

तद्वत्स गच्छ कार्येषु यतस्व विजयस्व च ।
इत्युदीर्य ययौ नाकलोकं नहुषनिर्जरः ॥ ४२ ॥

इति तच्चरितानन्दमण्डनाः पाण्डुनन्दनाः ।
काम्यकं वनदेवीभिरापृष्टकुशला ययुः ॥ ४३ ॥

हरिनारदमार्कण्डैरथागत्य कथाततिम् ।
कथयित्वा चिरं तेषां गतमेभिर्यथागतम् ॥ ४४ ॥

पितरं घोषगोवीक्षाच्छलेनापृच्छ्य कौरवः ।
तद्धर्षणाय कर्णाद्यैः सैन्यैर्द्वैतवनं ययौ ॥ ४५ ॥

स च द्वैतसरस्तीरनिवासेच्छुर्निवारितः ।
तत्क्रीडाबन्धुगन्धर्वचित्रसेनानुचारिभिः ॥ ४६ ॥

द्रागविरण्यातिरण्यादीनथ तत्कारणे रणे ।
सानुजं भूभुजं चित्रसेनः सेनाग्रतोऽहरत् ॥ ४७ ॥

पार्थशमथ राजर्षियज्ञे तद्दिनदीक्षितम् ।
आश्रित्य द्वैतवनगं चक्रन्दुः कौरवप्रियाः ॥ ४८ ॥

अथासौ तत्कथां मत्वा हास्यमुन्मोच्य मारुतिम् ।
आदिक्षत् कुल्यमोक्षाय धनंजययमान्वितम् ॥ ४९ ॥

भीमार्जुनयमैः शत्रुयमैरथ दिवं प्रति ।
वृष्टं नाराचधाराभिर्विपरीताम्बुदैरिव ॥ ५० ॥

तद्भियाभूदतापोऽर्कः स्वैरेव स्वेदवारिभिः ।
सारथिस्तद्रथात् त्रस्तमनाः पङ्गुः करोतु किम् ॥ ५१ ॥

घ्नन्ति त्वद्वंशजाः स्वामिन्निति वक्तुमिवोडुपम् ।
तुल्यमध्यायि नक्षत्रैर्गन्तुं मेरोः परां तटीम् ॥५२॥

धावत्क्रोधान्धगन्धर्वसैन्यदैन्यकरान् शरान् ।
खण्डयन् पाण्डुपुत्राणां चित्रसेनो न्यवर्तत ॥ ५३ ॥

विद्राव्य पावकास्त्रेण शत्रुमायामयं तमः ।
अवधीद्दशगन्धर्वलक्षीं मघवतः सुतः ॥ ५४ ॥

चित्रसेनं गदाचित्रगतिं मित्रमथार्जुनः ।
पुष्पशलक्ष्णैरपि शरैश्चक्रे काम इवाकुलम् ॥ ५५ ॥

ऊचेऽथ चित्रसेनस्तं पार्थ स्वार्थेऽपि मा मुहः ।
हन्त कर्षति हन्तव्यसर्पं कः पङ्कतः कृती ॥ ५६ ॥

श्रीमानपश्रियो युष्मान् न्यक् कर्तुं रिपुरापतत् ।
मया शक्राज्ञया जह्रे तन्मुक्त्यै किमु ताम्यसि ॥ ५७ ॥

किंच युष्मासु यन्मूलः प्रतिकूलत्वपादपः ।
नालाभि स तदास्माभिः कर्णस्तूर्णपलायनः ॥ ५८ ॥

---

[1] सर्प इति पाठान्तरम् ।

पार्थोऽप्यूचे जितं नान्यैः सहन्तेऽरिं जिगीषवः ।
नित्यं भोजनमुच्छिष्टीकृतमन्यैः समेत कः ॥५९॥
परस्परापराधेषु वयं पञ्च शतं च ते ।
अपरैः परिभूतास्तु प्रयामः काममेकताम् ॥६०॥
किंवा बहूक्तिभङ्गीभिरङ्गीकृतमिदं मया ।
राज्ञः कृपापयोराशेराज्ञया तद्विमोचनम् ॥ ६१ ॥
मुक्तोऽथ चित्रसेनेन यक्षोर्व्यां सानुजो नृपः ।
नतास्यो मयि तिष्ठेति त्रपामनुनयन्निव ॥ ६२ ॥
द्यां गते चित्रसेनेऽथ वीरान् पार्थहतान् हरिः ।
अजीजिवद्द्रवत्पृष्ठान् निर्दृष्ट्येवाम्बुदस्तरून् ॥ ६३ ॥
वत्स नेदृक् पुनः कृत्यमित्युक्ते धर्मसूनुना ।
दुर्योधनो ह्रिया दीर्यमाणहृच्चलितस्ततः ॥ ६४ ॥
द्वेषिभिर्मोचितोऽस्मीति मानी मृत्यून्मुखः पथि ।
स्थितोऽसौ निर्भरं दर्भास्तरणेऽस्तरणोज्झितः ॥ ६५ ॥
कुतोऽप्यागत्य विज्ञातवृत्तेनादित्यसूनुना ।
दुःशासनशकुन्याद्यैर्बोधितोऽपि स नोत्थितः ॥ ६६ ॥
कृत्यया हारयित्वाथ निशि तं निशितौजसः ।
जगदुर्जगदुन्मादभेदिनः शुभ्रदानवाः ॥ ६७ ॥
मा भूर्विषादभूर्भूप रणाय प्रगुणाशय ।
वयं ते हन्त गन्तारो विग्रहाय सहायताम् ॥६८॥
इत्युदीर्य ज्वलद्वीर्यैः प्रहितस्त्रिदशाहितैः ।
संपरायपरायत्तचित्तः पुरि ययौ नृपः ॥ ६९ ॥
तं भीष्मोऽथ सदस्यूचे दिष्ट्यासि कुशली नृप ।
दृष्टस्त्वया स्वयं तादृग्विक्रमः कर्णपार्थयोः ॥७०॥
ततोऽधुनापि संधेहि विभागं देहि भागिषु ।
विरोधक्रोधकीलाभिर्मा कुलं व्याकुलं कृथाः ॥७१॥
इत्युक्तियुक्तेऽवज्ञाते याते सिन्धुसुते नृपः ।
दैत्योक्तिस्मरणस्मेरवैरो वैरोचनिं जगौ ॥ ७२ ॥
सर्वदिग्जैत्रयात्रस्त्वं भव भीमार्जुनादिवत् ।
सूत धर्मात्मजासूयं राजसूयं तनोम्यथ ॥ ७३ ॥
दुरोदरजितो युद्धजेतव्यो जीयतेऽधुना ।
राजसूयमखोत्थेन धर्मसूर्धर्मकर्मणा ॥ ७४ ॥
अथ प्रारब्धसंरब्धनिर्व्यूढप्रौढदिग्जये ।
राधेये राजसूयेच्छुं पुरोधा नृपमभ्यधात् ॥ ७५ ॥

एकस्मिन् सति सम्राजि नान्यः सम्राड्भवेदिति ।
तद्राजन् राजसूयस्य मा भूः कर्मणि कर्मठः ॥७६॥
परीतपुरुहूतार्थं हूतानागतपाण्डवम् ।
ततः प्रतेने राजासौ राजसूयसमं मखम् ॥ ७७ ॥
यज्ञान्ते तं जगौ कर्णो हते युधि युधिष्ठिरे ।
राजसूये त्वया प्राप्ते भजिष्ये हृदि संमदम् ॥ ७८ ॥
करिष्ये पादशौचं तु नाहत्वाहं रणेऽर्जुनम् ।
श्रुत्वेति हस्तगं मूढो मेने दुर्योधनो जयम् ॥ ७९ ॥
इतश्च मृगयाक्षीणैर्विक्षिप्रः स्वप्नगैर्मृगैः ।
कृपालुः काम्यके पार्थस्तृणबिन्दुसरो ययौ ॥ ८० ॥
युद्धाभ्यासेऽथ ते लक्ष्याभ्यासाय मृगयामिषात् ।
तृणबिन्द्वाश्रमे न्यस्य प्रियां पार्था वनेऽचरन् ॥८१॥
विवाहार्थमथानेन पथा शाल्वं जयद्रथः ।
व्रजन् जहार पाञ्चालीं हारगौरं जहौ यशः ॥ ८२ ॥
ततोऽनुपातिभिः पार्थैः पात्यमानचमूचयः ।
चचलेऽत्यवलेपेन धृतराष्ट्रसुतापतिः ॥ ८३ ॥
ततोऽर्जुनशरासारैर्निपेतुस्ते चमूभटाः ।
धाराधराम्बुधाराभिर्निराधारा मृगा इव ॥ ८४ ॥
तदाद्भुतगदापातैर्द्राग्विरथ्य जयद्रथम् ।
त्वद्दासोऽस्मीति वाचालं मुदामुञ्चद्वृकोदरः ॥ ८५ ॥
प्रकटप्रियसामर्थ्यपुलकाङ्कुरमालिनीम् ।
आदाय दयितामीयुरथ पार्था निजस्थितिम् ॥ ८६ ॥
तपो भागीरथीतीरे चरन्नथ जयद्रथः ।
साक्षाद्भूते स भूतेशेऽयाचत् पार्थजये वरम् ॥ ८७ ॥
तं शंभुरभ्यधाज्जेता त्वं चतुःपाण्डवीं युधि ।
कृष्णमित्रं तु केनैन्द्रिर्जेयो येन वयं जिताः ॥८८॥
इत्यादिश्य तिरोभूते शिरोभूते दिवौकसाम् ।
पुरं जयद्रथः पूर्णमनोरथ इवागमत् ॥ ८९ ॥
इतोऽप्यूचे द्विजः कश्चिद्धर्मिं द्वैतवनागतम् ।
एष शृङ्गाग्रलग्नां मे हरते हरिणोऽरणीम् ॥ ९० ॥
अथाशु पाण्डवाश्चण्डचापास्तदनुगामिनः ।
नालोकन्त मृगं सौख्यमिव दुःस्वामिसेवकाः ॥ ९१ ॥
भूभृत्तटेऽवटे क्वापि विश्रान्ता नकुलोऽम्भसे ।
गतश्चिरादनागच्छन्नन्वीये बन्धुभिः क्रमात् ॥ ९२ ॥

Digitized by Google

क्रमानुगो नृपस्तत्र सरस्तीरे चतुर्मितान् ।
पतितान् दिग्जयस्तम्भानिव भ्रातॄनलोकत ॥ ९३ ॥
ततः किमेतदित्यस्य चिन्तासंतापितेतसः ।
संभ्रमाय भुवो भर्तुर्भारती नभसोऽभवत् ॥ ९४ ॥
राजन् यक्षोऽस्मि मत्प्रश्नानभित्त्वेहाम्बुपायिनाम् ।
मृत्युः स्यादिति तान् भिन्धि पिब चाम्बु यदृच्छया ॥९५॥
राज्ञोचे बान्धवध्वंसेऽधुना किं मेऽम्बुनामुना ।
तथापि त्वत्प्रियान् प्रश्नान् भेत्स्यामि स्वेच्छया वद ॥९६॥
इत्युक्ते सति राज्ञेति व्योम्नः प्रश्नगिरोऽभवन् ।
इत्युत्तरगिरश्चाशु जगाद जगतीपतिः ॥ ९७ ॥
को देवः स्वीय एवात्मा सद्गुरुक्तिप्रकाशतः ।
किं दैवं प्राक्तनं कर्म सुदुर्लङ्घ्यं सुरासुरैः ॥ ९८ ॥
को धन्यः क्रियते दास्यं यस्यार्थोविषयाधिपैः ।
कः शुचिः स्नाति यः शश्वत् सत्यवाग्जाह्नवीजलैः ॥ ९९ ॥
का लक्ष्मीः सर्वसंतोषः का विपद्विपुला स्पृहा ।
मोक्षः कश्चित्तमेव स्वं सर्वबुद्धिवियोजितम् ॥ १०० ॥
प्रीतः प्रश्नोत्तरैरेभिरहं जीवतु मद्वरात् ।
तवैकः संमतो भ्राता जाताथ व्योमवागियम् ॥१०१॥
मृत्युधीर्बन्धुदुःखेन कुललालनकाङ्क्षया ।
अथ भूपोऽभ्यधान्माद्रीपुत्रो जीवतु मत्प्रियः ॥१०२॥
सोदर्यतोऽधिकप्रीतिर्वमाचेयेऽथ पार्थिवम् ।
प्रीतः प्रत्यक्षतामेत्य धर्मो निर्मलगीर्जगौ ॥१०३॥
धर्मोऽस्म्यहं स्वपुत्रस्य तवास्येन्दुत्विषा मयि ।
हृतौ पाण्डव माण्डव्यशापतापतमश्चयौ ॥१०४॥
अरणी हरिणीभूय मया त्वां वीक्षितुं हृता ।
सोदरेषु तृषार्तेषु पिबन्तोऽम्बु हतास्त्वमी ॥ १०५ ॥
आनृशंस्यं च सत्त्वं च दृष्ट्वा तुष्टोऽस्मि तेऽधुना ।
अवाप्नुहि जयं धर्म्यं जीवन्तु तव बान्धवाः ॥१०६॥
वर्षं वस विराटेषु मत्प्रसादादलक्षितः ।
इत्युदीर्यारणीं तां च दत्त्वा धर्मस्तिरोदधे ॥१०७॥
सहोदरैः सहोद्यद्भिर्धर्मसूः स्वाश्रमं ययौ ।
ब्राह्मणायारणीं तस्मै तज्जीवितमिवार्पयत् ॥१०८॥
पूर्णां द्वादशवत्सरीमथ परिज्ञाय क्षमानायकः
साग्निं धौम्यमुदीर्य पार्षतपुरीवासाय वर्षावधि ।
किंच द्वारवतीपुराभिगमने तानिन्द्रसेनादिकान्
वीरान् शिक्षयति स्म कर्तुमुदितो गुप्तं विहारं क्वचित् ॥ १०९ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मताहस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
तल्लीलागिरि बालभारतमहाकाव्ये तृतीयं मनो-
निर्वेदव्ययमेदुरश्रि निरगात् पर्वेदमारण्यकम् ॥ ११० ॥
सर्गैश्चतुर्भिरेतस्मिन् पर्वण्यारण्यकाह्वये ।
चतुःशती सप्तसप्तिविशिष्टासीदनुष्टुभाम् ॥ १११ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-बालभारतनाम्नि महाकाव्ये वीराङ्के आरण्यकपर्वणि धर्म-देशनो नाम चतुर्थः सर्गः ॥ ४ ॥ :: ::

॥ श्रीः ॥

॥ अथ खण्डप्रशस्तिः ॥

॥ तत्र कूर्माकृतेर्भगवतो वर्णनम् ॥

(११) यो धत्ते शेषनागं तदनु वसुमतीं स्वर्गपातालयुक्तां
युक्तां सर्वैः समुद्रैर्हिमगिरिकनकप्रस्थमुख्यैर्नगेन्द्रैः ।
एतद्ब्रह्माण्डमस्याऽमृतघटसदृशं भाति वंशे मुरारेः
पायाद्वः कूर्मदेहः प्रकटितमहिमा माधवः कामरूपी ॥ १ ॥

स कूर्मदेहो माधवो वो युष्मान्पायाद्रक्षतु, स किं विशिष्टः, प्रकटितमहिमा प्रकटितो महिमा माहात्म्यं यस्य सः, पुनः किं-विशिष्टः, कामरूपी कामेनेच्छया रूपमस्यास्तीति स्वेच्छा-चारीति भावः, स इति कः, यः शेषनागं धत्ते पृष्ठ इति शेषः, तदनु तदुपरि स्वर्गपातालयुक्तां वसुमतीं पृथ्वीं धत्ते, किं-विशिष्टां तां, सर्वैः समुद्रैः तथा हिमगिरिर्हिमाचलः कनक-प्रस्थः कनकाचलस्तावेव मुख्यो प्रधानौ येषां ते तैर्नगेन्द्रैः पर्वतराजैर्युक्तां सहितां, तथाऽस्य मुरारेर्वंशे पृष्ठे एतद्ब्रह्माण्ड-ममृतघटसदृशं भाति पीयूषकुम्भोपमं शोभते यतो हिमघन-समये किल सागरादमृतघटः समुत्पन्न इति प्रसिद्धिः स हरिः पायादिति ॥ ११ ॥

(१२) निष्प्रत्यूहमनल्पकल्पचरितस्त्रैलोक्यरक्षागुरुः
क्रीडाकूर्मकलेवरः स भगवान्दिश्यादमन्दां मुदम् ।
कल्पान्तोदधिमध्यमज्जनवशाद्यासर्पतः संलुठत्
पृष्ठे यस्य बभूव सैकतकणच्छायं धरित्रीतलम् ॥

Digitized by Google

क्रीडाकूर्मकलेवरं शरीरं यस्य सः भगवानमन्दाममतुच्छां मुदं हर्षं दिश्याद्देयात्, निष्प्रत्यूहं निर्विघ्नं यथा स्यात्तथेति क्रियाविशेषणम् । किंविशिष्टः, अनल्पकल्पचरितः अनल्पं बहुयुगान्ते चरितं यस्येति, पुनः कीदृशः, त्रैलोक्यरक्षागुरुः त्रैलोक्यस्य त्रिभुवनस्य रक्षायां गुरुरिव गुरुः, तथा यस्य कूर्माकारस्य पृष्ठे संलुठत् परिभ्रमत् धरित्रीतलं सैकतकणाच्छायं सिकता वालुका तस्या अयं सैकतो यः कणो लेशस्तच्छायं तच्छोभं बभूव, किंविशिष्टस्य हरेः, कल्पान्तोदधिमध्यमज्जनवशाद्व्यासर्पतः कल्पान्तोदधेर्यन्मध्यं तत्र यन्मज्जनं तद्वशाद्व्यासर्पतः प्रसरत इति ॥ १२ ॥

(१३) पुत्रिण्यः कति नाथ सन्ति भुवनेऽभूवन्कियन्त्योऽथवा
सौभाग्यैकमठी तथादिकमठी स्त्रीषु प्रशंसास्पदम् ।
भग्ने भोगिनि भङ्गुरेषु करिषु भ्रष्टोत्सवे दंष्ट्रिणि
क्षोणीं साहसिकाग्रणीस्तुलयितुं जागर्ति यस्याः सुतः ॥

यस्याः कमठ्याः सुतः कूर्मः क्षोणीं धरित्रीं तुलयितुं तुलायां रोपयितुं धारयितुमित्यर्थः जागर्ति, किं विशिष्टः कूर्मः, साहसिकाग्रणीः साहसिकानां महाबलानां मध्येऽग्रणीः मुख्यः, एतदेवाभिव्यनक्ति, यत् पुत्रिण्यः सुतजनन्यः कति कियन्त्यो नाथ भुवने सन्ति वर्तन्ते, अथ वा कियन्त्यः पुत्रिण्यो नाभूवन्, परं तासु स्त्रीषु यत्तदोर्नित्याभिसम्बन्धात्सा कमठी प्रशंसास्पदं श्लाघामन्दिरं किं विशिष्टा कमठी, सौभाग्यैकमठी सौभाग्यस्यकीर्तेरेका मठीव मठी या सा सौभाग्यैकमठी मठस्तापसाश्रमस्त्रिलिङ्गः, स्त्रियाः पुंवदिति पूर्वस्त्रीप्रत्ययस्य पुंवद्भावः, क्व सति धरित्रीं बभारेत्याह, भग्ने भोगिनि शेषे भूभारासहनाद्भग्ने सति, तथा करिषु दिग्गजेषु अष्टसु भङ्गुरेषु विनश्वरेषु भूभारमुद्धर्तुमिति, भञ्जभासमिदो घुरजिति घुरच्, तथा दंष्ट्रिणि वराहे भ्रष्टोत्सवे भ्रष्टोद्यमे जाते सतीति ॥ १३ ॥

(१४) पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयने-
र्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्तनवशाद्वेलाछलेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥

कमठाकृतेः कूर्माकृतेर्भगवतो विष्णोः श्वासानिलाः श्वासवायवो वो युष्मान्पान्तु रक्षन्तु, कीदृशस्य कमठाकृतेः, पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनैः स्वस्य पृष्ठे भ्राम्यन्योऽमन्दो मन्दरगिरिस्तस्य यानि ग्रावाग्राणि तेषु यानि कण्डूयनानि तैर्निद्रालोः शयालोः, तथा यत्संस्कारकलानुवर्तनवशात् येषांश्वासवायूनां संस्कारकला आकुञ्चनप्रसारणाद्यास्तस्यानुवर्तनमभ्यासस्तद्वशाद्वेलामिषेण जलनिधेः समुद्रस्याम्भसां नीराणां समुद्रस्य यातायातं गतप्रत्यागतं अतन्द्रितं सर्वदा स्फुरद्रूपं नाद्यापि विश्रान्तिं याति ॥ १४ ॥

(१५) नमस्कूर्मः कूर्मं नमदमरकोटीरनिकर-
प्रसर्पन्माणिक्यच्छविमिलितमाञ्जिष्ठवपुषम् ।
जरीजृम्भड्डिम्भद्युमणिरमणीयांशुलहरी-
परीरम्भस्फूर्जद्वलभिदुपलाद्रि प्रतिभटम् ॥

कूर्मं नमस्कूर्मः कारकविभक्तेर्बलीयस्त्वाद्द्वितीया, किंविशिष्टः सः, नमदमरकोटीरनिकरप्रसर्पन्माणिक्यच्छविमिलितमाञ्जिष्ठवपुषम् नमन्तो येऽमरास्तेषां यः कोटीरनिकरस्तस्मात्प्रसर्पन्ती उद्गच्छन्ती या माणिक्यच्छविस्तया मिलितं सत् माञ्जिष्ठं लोहितं वपुः शरीरं यस्य स तम्, पुनः किंविशिष्टम्, जरीजृम्भड्डिम्भद्युमणिरमणीयांशुलहरीपरीरम्भस्फूर्जद्वलभिदुपलाद्रिप्रतिभटम् जरीजृम्भन् अतिशयेन विकसन्यो डिम्भस्तरुणो द्युमणिः सूर्यस्तस्य रमणीया या अंशुलहर्यः किरणश्रीचयस्तासां यः परीरम्भ आश्लेषस्तेन स्फूर्जन् देदीप्यमानो बलभिदुपलाद्रिः इन्द्ररत्नगिरिरर्थात्पूर्वाचलः सुमेरुर्वा तत्प्रतिभटं तत्प्रतिमल्लं तत्सदृशमिति यावत्, जरीजृम्भदिति यङ्लुकि शतृप्रत्यये रूपम्, वृत्त्यन्तरे तु दरीजृम्भड्डिम्भ इति पाठो दृश्यते तत्र दर्यां गुहायां जृम्भनुदयं कुर्वन् योडिम्भ इत्यादिरर्थः, परमयं पाठोऽपपाठ आत्मनेपदित्वाद्धातोरिति ॥ १५ ॥

(१६) भ्रमति गिरिराट् पृष्ठे गर्जत्युपर्यतिसागरे
दहति विततज्वालाजालो जगन्ति विषानलः ।
सविनिहितग्रीवाकाण्डः कटाहकठोदरे
स्वपिति भगवान्कूर्मो निद्राभरालसलोचनः ॥

स कूर्मो निद्राभरालसलोचनो निद्राभरेण अलसे मन्थरे लोचने नेत्रे यस्य सः स्वपिति शेते, किंविशिष्टः सः, कटाहकठोदरे ब्रह्मकटाहतटे विनिहितग्रीवाकाण्डो विनिहितो न्यस्तो ग्रीवाकाण्डो गलनालं येन सः, तथा यस्य पृष्ठे गिरिराट् हिमगिरिर्भ्रमति, तथा यस्योपरि सागरः समुद्रोऽतिगर्जति गर्जारवं कुरुते, तथा यस्य पृष्ठे विषानलो युगान्तानलो जगन्ति त्रिभुवनं दहति ज्वालयति, किंभूतः सः विततज्वालाजालः विततो विस्तीर्णो ज्वालासमूहो यस्य सः, अत्र अतीत्युपसर्गस्य गर्जतीति क्रियापदोत्तरं पाठात्तत्र तस्यान्वयो यद्यप्यव्युत्पन्नस्तथापि छन्दोवत्कवयः कुर्वन्तीति महिम्ना तथा पाठेऽपि तथ्यान्वयबोधस्य सुघटत्वादिति शम् ॥ १६ ॥

इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवृत्तौ कूर्मावतारवर्णनम् ॥

Digitized by Google

THE APHORISMS
OF THE
YOGA PHILOSOPHY,
OF
PATAÑJALI.

(*Continued from p. 28.*)

a. He (now) states another Siddhi.*

The expedient for the knowledge of the person—Purusha.

पुरुषसत्त्वयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषात् भोगः परार्थान्यस्वार्थसंयमात् पुरुषज्ञानम् ॥ ३६ ॥

Aph. 36. From conceiving indifferently the knowledge of the person (soul) and sattva (purity or the principle of understanding Buddhitattva—) which are entirely different from each other, (a knowledge of joy and affliction arises and) that is enjoyment (Bhoga). This enjoyment is another's object (Parártha), and an object different from this is the proper object (Svártha)—of the principle of understanding) and from performing restraint with regard to this proper object, a knowledge of the person (arises in an ascetic).

b. "Sattva, (purity) is a particular modification of nature which consists of illumination and joy (and it is what is called the principle of understanding Buddhitattva).—The person (soul) is an experiencer—in the form of the ruler. These are entirely unmixed. The meaning is that, these are quite different (from each other) on account of their being severally experience and experiencer, conscious and unconscious. From sattva's acting the part of the agent (kartá), in consequence of conceiving identically the knowledge of these (two i. e. sattva and soul,) a knowledge (sanvit) or a modification consisting of joy and pain (arises) and it is (what is called) Bhoga (enjoyment). By sattva's not regarding this enjoyment as its own object, it is the object of another—Parártha—i. e. it is for the sake of soul, and an object different from this is sattva's own object (svártha). This object is clinging only to the nature of soul, the consciousness. That is, it is an object or reflection of consciousness (chichchháyásankránti) in sattva when it is free from egotism. When an ascetic performs his restraint with regard to that (svártha of soul) a knowledge concerning the soul arises (in him) i. e. the ascetic knows that the soul is conscious of only this sort of knowledge, the clinging to the consciousness which consists in the sattva; and it (the soul) being intelligent becomes not the object of knowledge inasmuch as there would arise a difficulty from its becoming knowable (jṇeya) as there is a total contrariety of the intelligent and knowable.*

* सिद्ध्यन्तरमाह ।

a. He (now) states the fruit of the same restraint.†

The fruit of the preceding superhuman faculty.

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ॥ ३७ ॥

Aph. 37. From that, Prátibha, (Táraka, a knowledge concerning all things, see Aph. 34. book 3, and the knowledges caused by the organs) hearing, touch, sight taste, and smell arises (in the ascetic.)

b. "From that" (i e.) from practising the restraint with regard to soul—.Purusha—(the following knowledges arise in the ascetic (when) he is even Vyutthita i. e. not devoted to meditation. In this case, from the manifestation of the aforesaid knowledge, Prátibha, he sees subtle objects, &c. He recognises the sound produced in heaven from the eminent practice, gained by the force of restraint, in the knowledge produced from the organ of hearing. A knowledge arises (in him) with regard to touch of the objects in heaven from Vadaná, an appellation, technically used in Tantra (science) for a faculty of mind by which a knowledge produced from the organ of touch or tangibility is meant. A knowledge about the divine form arises (in an ascetic) from the excellent A'darśa—a faculty of mind by which the forms (situated) all around are seen and consequently (it means) the knowledge caused by the organ of sight. Asváda a faculty of mind—by which (a thing) is tasted; and thus it means the knowledge caused by the organ of taste It being excellent, a knowledge about the divine taste arises (in the ascetic) Vártá, or Gandhasanvitti, is a knowledge caused by the organ of smell, because the organ of smell is called by the term Vritti in technical language of science (Tantra) as there is an object of smell in it; and this faculty being excellent, a divine odour is experienced (by the ascetic) ‡

* सत्त्वं प्रकाशसुखात्मकप्राधानिकः परिणामविशेषः पुरुषो भोक्ताऽधिष्ठानरूपस्तयोर्भोग्यभोक्तृत्वरूपत्वात् चेतनाचेतनत्वाच्चात्यन्तासंकीर्णत्वं भिन्नत्वमित्यर्थः । तयोः प्रत्ययस्याविशेषोऽभेदेना-प्रतिभासनं तस्मात्सत्त्वस्यैव कर्तृतापत्त्या या सुखदुःखसंवित्सा भोगः । सत्त्वस्य स्वार्थनैरपेक्षेण परार्थः पुरुषार्थनिमित्तस्तस्मादन्यो यः स्वार्थः पुरुषस्वरूपमात्रालम्बनः परित्यक्ताहङ्कारे सत्त्वे या चिच्छायासंक्रान्तिस्तत्र कृतसंयमस्य पुरुषविषयं ज्ञानमुत्पद्यते तदेवं रूपं स्वालम्बनं ज्ञानं सत्त्वनिष्ठं पुरुषो विजानाति न पुनः पुरुषो ज्ञाता ज्ञानस्य विषयभावमापद्यते ज्ञेयत्वापत्तेः। ज्ञातृज्ञेययोश्चात्यन्तविरोधात् ।

† अस्यैव संयमस्य फलमाह ।

‡ ततः पुरुषसंयमादभ्यस्यमानात् व्युत्थितस्यापि ज्ञानानि जायन्ते । तत्र प्रातिभं पूर्वोक्तं ज्ञानं तस्याविर्भावात्सूक्ष्मादिकमर्थं पश्यति । श्रावणं श्रोत्रेन्द्रियजं ज्ञानं तस्माच्च प्रकृष्टाद्दिव्यं दिवि भवं शब्दं जानाति। वेदना स्पर्शनेन्द्रियजं ज्ञानं विद्यतेऽनयेति कृत्वा तान्त्रिक्या संज्ञया व्यपदिश्यते तस्माद्दिव्यस्पर्शविषयज्ञानमुपजायते । आदर्शश्चक्षुरिन्द्रियजं ज्ञानं । आसमन्तात् दृश्यते रूपमनेनेति कृत्वा तस्य प्रकर्षाद्दिव्यरूपज्ञानमुत्पद्यते ।

Digitized by Google

a. He (now) states the respective provinces of these particular fruits.*

ते समाधावुपसर्गा व्युत्थानेसिद्धयः ॥ ३८ ॥

Aph. 73 These fruits are obstacles in the way of meditation and superhuman faculties (in the state of) non-meditation (Vyutthána).

b. The aforesaid particular fruits become obstacles to the ascetic closely devoted to meditation (because his) meditation becomes relaxed by reason of joy, wonder &c. but in the state of non-meditation Vyutthána—(that is) in the state of action, these fruits become the superhuman faculties on account of their yielding the particular fruits.†

a. He (now) states another Siddhi. ‡

The position when the ascetic knows the mind of another person.

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३९ ॥

Aph. 39. The mind of (the ascetic) enters the body of others by reason of the laxity of the cause of Bandha—bondage, and by the knowledge of the process—Prachára—(of mind).

b. A knowledge of the pervading soul and internal organ, entered into (a particular) body only by virtue of some fixed action, which arises in the form of their becoming experiencer and experience is called a bondage to the body (Sarírabandha). When this knowledge, the cause of bondage, i. e. the action called virtue and vice becomes relaxed or diminished, then the ascetic enters &c. The vein (called) chittavahá, by which the internal organ blows, is a knowledge (sanvedaná) of its course of the site of heart towards (external) objects by means of organs, and this vein is (quite) different from the veins through which the humour (Rasa) vital air &c. blow. Therefore, when the internal organ knows the course (just expounded) of its own body and that of others, it enters a living or dead body of another person by means of that course. The organs (too) follow the internal organ entering the body of another (person), as black bees follow the queen bee. After that, the ascetic who has (thus) entered the body of another person, deals with that body as if it were his own body, because, the internal organ and the soul are (at all times) pervading, (but a particular) action becomes the cause of the contraction of their enjoyment, and if it is destroyed by meditation, they then receive enjoyment everywhere in consequence of their being independent.*

a. He (now) states another Siddhi.†

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ४० ॥

Aph. 40. A disunion (Asanga) with and a rising (Utkránti) from water, mud, thorns &c. (take place) by conquering the Udána, one of the vital airs.

b. The state of the organs, arisen at once like a flame of burning chaff, is called by the word Jívana and it is denominated Práṇa &c. from the different actions. Of these, one is called Práṇa from its conducting the air through the mouth and nose from the heart; another Apána, from the region of the navel to the great toe; another, Samána, from conducting air everywhere having surrounded the region of the navel with it; another, Udána, from its conducting air the upwards from the back of the neck (Krikátiká) to the heart; and another Vyána, from its conducting the air which pervades the whole body. (The asectic) disjoins himself from water, (i. e.) with a large river &c. or a great (quantity) of mud or sharp thorns by the quality of going upwards (obtained) by hindrance of all the airs (effected) by his conquering the air Udána by means of restraint. The meaning (of disjunction with water is that the ascetic) being very light like a quantity of cotton, even if immerged in (deep) water, rises to the surface.‡ [He comes out even if placed under a large quantity of mud, and cannot be pricked with sharp thorns, by reason of his subduing the air Udána through the efficacy of his restraint.]

आस्वादो रसनेन्द्रियजं ज्ञानमास्वाद्यतेऽनेनेति कृत्वा तस्मिन् प्रकृष्टे दिव्ये रसे संविदुपजायते । वार्ता गन्धसंवित्तिर्वृत्तिशब्देन तान्त्रिक्या परिभाषया घ्राणेन्द्रियमुच्यते । वर्तते अन्धविषय इति कृत्वा । वृत्तेर्घ्राणेन्द्रियाज्जाता वार्ता गन्धसंवित्तिस्तस्यां प्रकृष्यमाणायां दिव्यो गन्धोऽनुभूयते ।

* एषां फलविशेषाणां विषयविभागमाह ।

† ते प्राक् प्रतिपादिताः फलविशेषाः समाधेः प्रकर्षं गच्छत उपसर्गा उपद्रवा विघ्नकारिणः । तत्र हर्षविस्मयादिकारणेन समाधिः शिथिलोभवति व्युत्थाने तु व्यवहारदशायां विशिष्टफलदायकत्वात् सिद्धयो भवन्ति

‡ सिद्ध्यन्तरमाह ।

* व्यापकत्वादात्मचित्तयोर्नियतकर्मवशादेव शरीरान्तर्गतयोरेव भोक्तृभोग्यभावेन यत्संवेदनमुपजायते स एव शरीरबन्ध इत्युच्यते । तद्यदा समाधिवशाद्बन्धकारणं धर्माधर्माख्यं कर्म शिथिलं भवति तानवमापद्यते । चित्तस्य योऽसौ प्रचारो हृदयप्रदेशादिन्द्रियद्वारेण विषयाभिमुख्येन प्रसरस्तस्य संवेदनं ज्ञानमियं चित्तवहा नाडी । अनया चित्तं वहति । इयं च रसप्राणादिवहान्याभ्यो नाडीभ्यो विलक्षणा इति स्वपरशरीरयोर्यदा संचारं जनाति तदा परकीयं शरीरं मृतं जीवच्छरीरं वा चित्तसंचारद्वारेण प्रविशति चित्तं च परशरीरं प्रविशदिन्द्रियाण्यनुवर्तन्ते मधुकरराज इव मधुमक्षिकास्ततः परशरीरप्रविष्टो योगी स्वशरीरवत्तेन व्यवहरति । यतो व्यापकयोश्चित्तपुरुषयोर्भोगसंकोचे कारणं कर्माभूत् तच्चेत्समाधिना क्षीणं तदा स्वातन्त्र्यात्सर्वत्रैव भोगनिष्पत्तिः ।

† सिद्ध्यन्तरमाह ।

‡ समस्तानामिन्द्रियाणां तुषज्वालावद्या युगपदुत्थिता वृत्तिः सा जीवनशब्दवाच्या तस्याःक्रियाभेदात्प्राणादिभिर्व्यपदेशस्तत्र हृदयान्मुखनासिकाद्वारेण वायोः प्रणयनात्प्राण इत्युच्यते । नाभिप्रदेशात्पादाङ्गुष्ठपर्यन्तमपनयनादपानः । नाभिप्रदेशं परिवेष्ट्यासमन्तान्नयनात्समानः । कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः । व्याप्य नयनात्सर्वशरीरव्यापी व्यानः । उदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जले महानद्यादौ महति वा कर्दमे तीक्ष्णेषु कण्टकेषु वा न सज्जते । अतिलघुत्वात्तूलपिण्डवज्जलादौ मज्जतोऽप्युद्गच्छतीत्यर्थः ।

Digitized by Google

THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

THIRD BOOK, FIRST DAILY LESSON.

(Continued from page 57.)

नतु शरीरविशेषाद्यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः ॥ १७ ॥

Aph. 17. But the knowledge of Yajñadatta and Vishṇumitra does not, in consequence of the difference of their bodies, become an object.

[1] The word 'knowledge' implies the attributes of soul, sensible pleasure, pain and the like. As the bodies of Yajñadatta and Vishṇumitra are separate from one another, so are their knowledge, pleasure and the like separate. Accordingly as the knowledge, 'This is Yajñadatta's body,' is an object, so though no knowledge, pleasure &c. be produced in Yajñadatta, the knowledge &c. 'I feel pleasure,' 'I know,' 'I will,' 'I wish,' will be an object; because, the body being an object to the appropriate senses, its knowledge &c., like its colour &c., may be perceptible. But this is impossible. Therefore there is, such is the meaning, to be maintained a subject of knowledge, pleasure and the like, other than the body. U.

[2] The knowledge of Yajñadatta and Vishṇumitra does not in consequence of the difference of their bodies, in consequence that is of their bodies' being different objects become an object, in the observation of the body. The word 'knowledge' implies generally all the particular sensible attributes of the soul. Therefore, as in our realisation of soul &c., knowledge &c. is the object, it being universally allowed that there are such observations as 'I know,' 'I wish,' 'I will,' 'I feel pleasure.' 'I am in pain,' 'I hate' &c.; so would there be in like manner, were the body denoted by the word 'I,' and did it possess the attributes knowledge &c., a cognition of knowledge &c. even in the ocular perception of body. But no one has an ocular perception in the form, 'I, the stout Yajñadatta, know.' Therefore the use of the words 'I' &c. in reference to the body is only by metaphor, and accordingly we do not surrender the subject of our discussion. V.

अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ॥ १८ ॥

Aph. 18. The notion 'I' inasmuch as its particularity is established by the non-failure of an exclusive argument (as is the case with sound), from its original and appropriate attributes, does not depend upon revelation.

[3] The following objection might be raised. The soul is not an object of perception, since, like ether, it is a colourless, or a simple substance. Of the cogntion 'I am thin, or pale,' the body must be affirmed to be the object. Whereas there is sometimes the judgment 'I feel pleasure &c.,' it is proper to suppose that pleasure and the like, becoming manifest without a substratum, are attributed by metaphor to the body: as in the notion 'Hot, fragrant water,' heat and fragrance appearing without a substratum are metaphorically attributed to water. But in this case, on account of this attribution, in the notion of water there is not another

---

[1] ज्ञानमिति योग्यं सुखदुःखादिकमात्मगुणमुपलक्षयति यथा यज्ञदत्तविष्णुमित्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपि भिन्नमेव तथा च यथा यज्ञदत्तस्येदं शरीरं तथा यज्ञदत्तस्य ज्ञाने सुखादौ वा ऽनुत्पन्ने ऽहं सुखी जाने यते इच्छामीति ज्ञानादिकं विषयो भवति योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादीनामपि प्रत्यक्षसम्भवात् न च सम्भवति तस्मात् ज्ञानसुखादीनां शरीरादन्य एवाश्रयो वक्तव्य इति भावः ॥

[2] न तु न हि शरीरविशेषात् शरीरविशेषविषयकत्वात् यज्ञदत्तविष्णुमित्रयोर्ज्ञानमपि विषयो भवति शरीरसाक्षात्कारे इत्यर्थः ज्ञानपदं योग्यात्मविशेषगुणसामान्यपरम् तथा च यथास्माकमात्मसाक्षात्कारे ज्ञानादिकं विषयो भवति अहं जानामि इच्छामि यते सुखी दुःखी द्वेष्मीत्याद्यनुभवस्य सर्वसिद्धत्वात् तथा शरीरचाक्षुषादावपि ज्ञानादेर्भानं स्यात् यदि शरीरमहम्पदवाच्यं ज्ञानादिगुणकञ्च स्यात् न हि स्थूलो यज्ञदत्तो ऽहं जानामीति चाक्षुषप्रत्ययं कस्यचिद्भवति तस्माच्छरीरे ऽहमादिव्यवहार औपचारिक एवेति नास्माकं प्रतिज्ञाहानिरिति भावः ॥

[3] नन्वात्मा न प्रत्यक्षः नीरूपद्रव्यत्वात् निरवयवद्रव्यत्वाद्वा आकाशवत् तथाचाहं कृशो गौर इति बुद्धेः शरीरमेव विषयो वाच्यः क्वचिदहं सुखीत्यादि धीरपि यद्यप्यस्ति तथाप्याश्रयमन्तरेण भासमानानां सुखादीनां शरीरे समारोप इत्येव कल्पयितुमुचितम् यथोष्णं सुरभिजलम् इत्याश्रयमन्तरेण प्रतीयमानयोरौष्ण्यसौरभयोर्जले समारोपः नन्वेतदनुरोधेन जलप्रत्ययस्यापि प्रसिद्धजलमन्तरेणान्यविषयत्वम् तथा ऽहमित्यप्यहन्त्वं शरीर एव वास्तवम् सुखादिकन्तु कदाचित् तत्रारोप्यते तेनात्मनि प्रत्यक्षाकारं ज्ञानं नास्त्येव सुखाद्याधारत्वेन यत्कल्पनीयं तदागमसिद्धं भवतु न तत्रापि ग्रह इत्यत आह । अयमर्थः अहं दुःखीति प्रत्ययो नागमिको न शाब्दो नापि लैङ्गिकः शब्दलिङ्गयोरन्तरेणापि जायमानत्वात् प्रत्यक्षत्वे च नीरूपत्वं निरवयवत्वञ्च यद्बाधकमुक्तं तद्बहिरिन्द्रियप्रत्यक्षतायां भवति तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात् मानसप्रत्यक्षता च तदन्तरेणापि । ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेरिति यथा क्षित्यादिषु द्रव्येषु शब्दस्य व्यतिरेको ऽव्यभिचारी नियतस्तेन तदाश्रयस्याष्टद्रव्यातिरिक्तस्याकाशरूपस्य विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अष्टद्रव्यातिरिक्तेन भवितव्यम् । नन्वेतावता ऽप्यानुमानिक एव आत्मा न तु प्रत्यक्ष इत्यत आह अहमिति मुख्ययोग्याभ्यामिति अहमित्यनीतिकारेण ज्ञानाकारमाह तेनाहमिति ज्ञानं शब्दलिङ्गानुसन्धानमन्तरेण निर्मीलितचक्षुषो यदुत्पद्यते तन्मुख्येन अहन्त्ववता योग्येन प्रमाणसिद्धेन उपपादनीयम् न तु शरीरादिना तत्रेच्छाया व्यतिरेकाव्यभिचारात् मुख्ययोग्याभ्यामित्यनन्तरम् उपपादनीयमिति पूरणीयम् आत्मनि प्रमाणानि बहूनि ग्रन्थगौरवभिया त्यक्तानि मयूखे ऽन्वेष्टव्यानि ॥

object independent of common water. In the case, therefore, of the Ego, the notion 'I' is real only in reference to the body, but pleasure and the like is sometimes metaphorically attributed to it. There is, then, with reference to soul, no knowledge of it in the form of perception. That then which we must assume as the substratum of pleasure and the like must be established by revelation. There is no means of knowing it. In reply to this objection is the following. The cognition 'I feel pleasure,' 'I am in pain,' is not by revelation, by verbal communication, or by inference, for it arises independently of any attention to words or arguments. Whereas it has been said that colourlessness, and simplicity [or the not being an aggregate of constitutive elements], is preventive of perception, this holds true only in the case of perception of the external organs, for of this the possession of colour, and the existence of substances more than one, are the necessary conditions. Mental perception is independent of these. It may be objected that this would be the case were there any proof of the existence of the soul, but there is none. Accordingly the words 'Inasmuch as its particularity is established by the non-failure of an exclusive argument, as is the case with sound.' As in the case of the substances, earth &c., the exclusive or negative argument from sound does not fail, and is decisive, and there is thereby proof of a particular substance, viz. ether, as excluded from other eight substances, as the substratum of sound; in like manner, since the exclusive argument from desire does not fail by applicability to earth &c., the substratum of desire must be excluded from other eight substances. Lest it be argued that all this shows that the soul is a subject of inference, not an object of perception, the words 'The notion I, from its original and appropriate attributes' are employed. By the particle *iti* the form of the notion is stated. The notion 'I,' therefore, which arises, independently of any attention to words or arguments, in one whose eyes are closed, must be produced by an original attribute of egoity, appropriate or established by proof; but is not produced by the body, inasmuch at the exclusive argument from desire does not fail by applicability to it. After the words 'from its original and appropriate attributes,' the words 'to be established,' are to be supplied. Many proofs of the existence of soul, omitted for fear of encumbering this treatise, should be sought in the Mayúkha. U.

[1] The Vedántins maintain that soul is nothing but eternal knowledge, according to the sacred text, 'This imperishable soul is true knowledge, the infinite supreme spirit;' and that by resort to matter, being divided into the products of illusion, and the accidents of the form of the internal organ, it appears manifold, according to such texts as, 'One only without a second,' 'One, moreover, the inmost soul of all beings became the counterpart of every form (?)' This doctrine is here refuted. After 'the notion I,' the words 'Is the object of perception,' are to be supplied. The subject, therefore, of such common mental perceptions as 'I am happy,' is not proved by revelation, and inseparable from God who is declared in such texts as, 'True knowledge, the infinite supreme spirit.' The reason of this is stated in the words 'From its original and appropriate attributes' &c.: because of the proof of particularity, i. e. because of the proof of separateness from God, by that which is original and appropriate, i. e. by pleasure and pain. Pleasure is among objects of desire original, because it is the object of desire not dependent on other desires; and pain is original among objects of aversion, because it is the object of aversion not dependent on other aversions. Appropriateness is the being an object of perception. This is mentioned to remove doubt as to absence of proof of the argument, and to prevent a fallacious application in case of the assumption of eternal bliss in reference to God: for eternal bliss is not appropriate, and consequently generated pleasure and pain is the proof of the difference between the individual soul and God. This generated pleasure and pain implies something more, and generated knowledge, desire, volition, and aversion are to be regarded as proofs of the separateness of the individual soul and God. It may be urged that in such arguments as 'the soul, the

[1] वेदान्तिनस्तु नित्यविज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म इति श्रुतेः स च वस्तुगत्या एको ऽपि मायाकार्याणामन्तःकरणरूपोपाधीनां भेदान्नानेव प्रतिभाति एकमेवाद्वितीयम् इति एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव इत्यादिश्रुतेरित्याहुस्तन्मतं दूषयति । अहमितीति प्रत्यक्षविषय इति शेषः तथा चाह सुखीत्यादिलौकिकमानसप्रत्यक्षविषयः न आगमिकः सत्यं ज्ञानमनन्तं ब्रह्म इत्याद्यागमप्रतिपाद्येश्वराभिन्नः अत्र हेतुमाह मुख्ययोग्याभ्यामित्यादि मुख्यं सत् यद्योग्यं सुखं दुःखञ्च ताभ्यां विशेषसिद्धेरीश्वरभेदसिद्धेः इष्टेषु सुखस्य मुख्यत्वं अन्येच्छानधीनेच्छाविषयत्वात् दुःखस्य तु द्विष्टेषु मुख्यत्वम् अन्यद्वेषानधीनद्वेषविषयत्वात् योग्यत्वञ्च प्रत्यक्षविषयत्वम् एतत्कथनञ्च हेत्वसिद्धिशङ्कानिरासार्थम् ईश्वरे नित्यसुखाङ्गीकारपक्षे व्यभिचारवारणार्थञ्च नित्यसुखस्यायोग्यत्वात् तथाच जन्यं सुखं दुःखञ्च जीवस्येश्वरभेदसाधकम् । उपलक्षणञ्चैतत् जन्या ज्ञानेच्छायत्ना द्वेषश्च ईश्वरभेदसाधका द्रष्टव्याः । ननु अहमिति प्रत्यक्षविषय आत्मा ईश्वरभिन्नः जन्यसुखवत्त्वादित्यादौ दृष्टान्ताभावेन अन्वयसहचाराग्रहात् व्याप्तिज्ञानं दुर्घटमत उक्तं व्यतिरेकाव्यभिचारादिति व्यतिरेकव्याप्तेरित्यर्थः प्रयोज्यत्वं पञ्चम्यर्थस्तस्य च विशेषसिद्धावन्वयः तथाचान्वयदृष्टान्ताभावे ऽपि व्यतिरेकेण ईश्वरस्य दृष्टान्तत्वसम्भवेन व्यतिरेकसहचारग्रहाधीनव्यतिरेकव्याप्तिग्रहादेवोक्तस्थले ऽनुमितिः सम्भवतीति भावः ननु व्यतिरेकव्याप्त्येश्वरभेदसाधकत्वं न दृष्टचरमित्याशङ्कानिरासायोक्तं शब्दवदिति शब्दादिवेत्यर्थः आकाशस्य यथा शब्दरूपाद्धेतोर्व्यतिरेकव्याप्तिप्रकारेण ज्ञायमानादीश्वरभेदसिद्धिस्तथात्मनो जन्यसुखादिमत्त्वात् तत्सिद्धिरित्यर्थः ॥

Digitized by Google

object of the perception of the Ego is different from God, because it possesses generated pleasure &c.,' there being no example and consequently no observation of congruity [of similar instances] with the universal affirmation, the knowledge of a universal concomitance is impossible. Hence the words 'By non-failure of an exclusive argument,' i. e. because of the universality of the exclusion. The conditions [necessary to the proof] may be universally affirmed in the proof of the particular. Though, therefore, there be no example of the universal affirmation, since by exclusion God may be the example, an inference with respect to the matter in hand is possible, through observation of a universal exclusion, dependent on observation of concomitance with exclusion. To remove the doubt that the proof by a universally exclusive argument of the separateness from God is not applicable, the words 'As is the case with sound,' are added, meaning 'As is the case with sound and the like.' As ether is proved to exist by its mark, viz., sound, which is known by means of the form of universal exclusion; so the proof of the separateness of the individual soul from God, is from the possession by the soul of generated pleasure, &c. V.

Unity of soul.

सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ॥ १९ ॥

Aph. 19. Because of the non-particularity of the origin of pleasure, pain, and knowledge, soul is one.

[1] The section treating of the investigation of soul being completed, that treating of the multiplicity of soul is commenced. This aphorism sets forth an adverse doctrine. There is [according to this doctrine] but one soul, though the bodies of Chaitra, Maitra, and others be divided. Why? Because of the non-distinction of the origin of pleasure, pain, and knowledge; since the origin of pleasure, pain and knowledge, as determined by all bodies, is not particular. If there were another mark probative of the separateness of the soul, its separateness might be proved, but there is not; just as, in the production of sound, as determined in such and such places, its mark, sound, being non-particular, ether is one; as, its mark, the notions of simultaneity &c., being non-particular, time is one; and, as its mark, the notions of posteriority and priority being non-particular, space is one. U.

[1] आत्मपरीक्षाप्रकरणं समाप्य इदानीमात्मनानात्वप्रकरणमारभते तत्र पूर्वपक्षसूत्रम् । एक एव आत्मा चैत्रमैत्रादिदेहभेदे ऽपि कुतः सुखदुःखज्ञानानां निष्पत्तेरुत्पत्तेरविशेषात् सर्वशरीरावच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरविशिष्टैव यतः । यद्यात्मभेदसाधकं लिङ्गान्तरं भवेत् तदा सिद्ध्येदात्मभेदः न च तदस्ति यथा तत्तत्प्रदेशावच्छेदेन शब्दनिष्पत्तावपि शब्दलिङ्गाविशेषादेक एव कालः पूर्वापरादिप्रत्ययलिङ्गाविशेषादेकैव दिक् ॥

Multiplicity of soul.

व्यवस्थातो नाना ॥ २० ॥

Aph. 20. Because of its circumstances [soul is] manifold.

[1] The doctrine is stated. Souls are manifold. Why? Because of their circumstances. Circumstances are the several conditions, as one is rich, another mean, one is happy, another unhappy, one is of high, another of low birth, one is learned, another reads badly. These circumstances being impossible without a diversity of souls, prove a diversity of souls. It cannot be maintained that as are the circumstances of one soul, due to various states of being, to childhood, youth, and old age, so are the circumstances of one soul in the diverse bodies of Chaitra, Maitra &c., for it is by difference of time [only] that the existence [in one subject] of contradictory attributes is possible. U.

शास्त्रसामर्थ्याच्च ॥ २१ ॥

Aph. 21. And on the authority of the Śástra.

[2] The Śástra means revelation [Śruti]. For, in the delaration of diversity of soul, it is revealed, that 'Two spirits [Brahmau] are to be known,' &c. U.

FOURTH BOOK, FIRST DAILY LESSON.

सदकारणवन्नित्यम् ॥ १ ॥

Aph. 1. The external is existent and uncaused.

[3] Some say that the existent is produced from the non-existent. Their view is as follows. A seed &c. is not productive of a sprout &c. as its effect, for were this the case there would be produced a sprout &c. from a seed &c. in a granary. But inasmuch as the shoot is

[1] सिद्धान्तमाह नाना आत्मानः कुतः व्यवस्थातः व्यवस्था प्रतिनियमः यथा कश्चिदाढ्यः कश्चिद्रङ्कः कश्चित् सुखी कश्चिद्दुःखी कश्चिदुच्चाभिजनः कश्चिन्नीचाभिजनः कश्चिद्विद्वान् कश्चित् जाल्म इतीयं व्यवस्था आत्मभेदमन्तरेणानुत्पद्यमाना साधयत्यात्मनां भेदम् न च जन्मभेदेन बाल्यकौमारवार्धक्यभेदेन वा एकस्याप्यात्मनो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभेदे ऽपि स्यादिति वाच्यं कालभेदेन विरुद्धधर्माध्याससम्भवात् ॥

[2] शास्त्रं श्रुतिः तयाप्यात्मनो भेदप्रतिपादनात् श्रूयते हि द्वे ब्रह्मणी वेदितव्ये इत्यादि ॥

[3] असतः सज्जायते इति केचिद्वदन्ति तेषामयमभिप्रायः बीजादिर्नाङ्कुरादिकार्यजनकः तथा सति कुशूलस्थबीजादेरप्यङ्कुराद्यापत्तेः किन्तु क्षेत्रादौ स्थितस्य बीजस्यावयवविभागेन प्रध्वंसानन्तरमेवाङ्कुरोत्पादात् बीजादिप्रध्वंस एवाङ्कुरादेः कारणमिति तथा च गौतमीयं पूर्वपक्षसूत्रम् अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् इति तदेतन्मतं निराकुर्वन्नेव परमाण्वादिकमनारम्भवादं द्रढयति । सत् भावरूपं किञ्चित् अकारणवत् अजन्यं नित्यं विनाशाप्रतियोगि वस्तु अवयविनां मूलकारणं नासत् इत्यर्थः प्रध्वंसस्य कारणत्वे चूर्णीकृतादपि बीजादङ्कुरापत्तेरिति भावः ॥

Digitized by Google

produced after the destruction of the seed lying in the field by the disjunction of its constituent parts, it is the destruction of the seed &c. which is the cause of the sprout, &c. Accordingly the aphorism of Gautama enunciatory of an adverse doctrine, From non-existence is production of existence: for without destruction is no manifestation. In refutation of this doctrine a prefatory discourse is established by treating of atoms &c. The existent means anything which is; 'uncaused,' unproduced; 'the eternal,' matter which does not by destruction cease to exist. The sense is that the primary cause of complex wholes is not the non-existent; for were destruction [or subsequent non-existence] the cause, a sprout would be produced even from a seed which had been ground. V.

तस्य कार्यं लिङ्गम् ॥ २ ॥

Aph. 2. The effect thereof is the mark of its existence.

[1] Thereof—of an atom—an effect or product, a water-pot or the like, is the mark of existence. Accordingly the aphorism of Gautama, From the evolved is the production of the evolved, on the evidence of perception. Thus is the sequence of parts and the whole observed. If this sequence were unlimited there would be no difference in size between mount Meru and a grain of mustard seed, for they would be both without distinction originated by infinite parts. Nor can it be argued that the difference depends on an aggregation of extensions, for without a difference of number they would be impossible. If it be said that annihilation may be the limit [of the series of parts and wholes, we object that] in the indivisibility of some ultimate element annihilation is impossible for it is only disjunction of its constituent parts and destruction that can destroy matter. Nor is disjunction the limit, for it is impossible that it should have only one substratum. A substance, therefore, without parts, must be the limit, and this is an atom. A mote is not the limit for that has magnitude and is composed of substances more than one, being a visible substance. For magnitude is a cause of visual perception only as it presupposes multiplicity of substance. Else magnitude would not exist, and what would be the cause? Nor are the constituent parts of a mote atoms, for we must infer that those portions, as originative of a substance possessing magnitude, are composed of parts, like thread, and the half of a water-pot. Therefore whatever is a produced substance is composed of parts, and whatever is composed of parts is a produced substance. In whatever part, therefore, there ceases to be the nature of a product, there there ceases also to be that of containing parts; and this is the proof of the existence of invisible atoms. U.

[1] Thereof means of the primary cause; the effect, a mote or other produced substance; the mark, that which warrants an inference. If the series of parts and wholes were endless, it would follow that Meru and a grain of mustard seed would be equal, inasmuch as they would both indifferently originate in infinite constituent parts. We must, therefore, allow a cessation at some point. But the cessation cannot be in a mote, inasmuch as it is proved to have parts, aggregates of two atoms, according to the inference that a mote has parts, for it is a visible substance like a water-pot. Nor can the cessation be in an aggregate of two atoms, for by the inference that the constituent parts of a mote must have parts, because they are parts possessed of magnitude, like the halves of a water-pot, it is proved that of an aggregate of two atoms there is a part, an atom, a primary [material] cause. It cannot in like order be proved that this has a series of parts, for the hypothesis is impossible, involving an infinite regression, and being without any favourable argument. V.

---

[1] तस्य परिमाणोः कार्यं घटादि लिङ्गम् तथा च गौतमीयं सूत्रं व्यक्तात् व्यक्तस्य निष्पत्तिः प्रत्यक्षप्रामाण्यात् इति अवयवावयविप्रसङ्गस्तावदनुभूयते स यदि निरवधिः स्यात् तदा मेरुसर्षपयोः परिमाणभेदो न स्यात् अनन्तावयवारब्धत्वाविशेषात् न च परिमाणप्रचयविशेषाधीनो विशेषः स्यादिति वाच्यं संख्याविशेषाभावात् तयोरप्यनुपपत्तेः प्रलयावधिः स्यादिति चेत् अन्त्यस्य कस्यचिन्निरवयवत्वे प्रलयस्यैवानुपपत्तेः अवयवविभागविनाशयोरेव द्रव्यनाशकत्वात् विभागश्च नावधिः तस्यैकाश्रयत्वानुपपत्तेः तस्मान्निरवयवं द्रव्यमवधिः स एव परमाणुः । न च त्रसरेणुरेवावधिः तस्य चाक्षुषद्रव्यत्वेन महत्त्वादनेकद्रव्यवत्त्वाच्च महत्त्वस्य चाक्षुषप्रत्यक्षत्वे कारणत्वम् अनेकद्रव्यवत्त्वमादायैव अन्यथा महत्त्वमेव न स्यात् कस्य कारणत्वं भवेत् न च त्रसरेणोरवयवा एव परमाणवः महद्द्रव्यारम्भकत्वेन तेषामपि सावयवत्वानुमानात् तन्तुवत् कपालवच्च तस्मात् यत् कार्यद्रव्यं तत् सावयवं यच्च सावयवं तत् कार्यं द्रव्यम् तथा च यतो ऽवयवात् कार्यत्वं निवर्तते तत्र सावयवत्वमपीति निरवयवपरमाणुसिद्धिः ॥

[1] तस्य मूलकारणस्य कार्यं त्रसरेण्वादिकार्यद्रव्यम् लिङ्गमनुमापकम् तथाहि अवयवावयविधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः अनन्तावयवारब्धत्वाविशेषात् अतः क्वचिद्विश्रामो वाच्यः न च त्रसरेणौ विश्रामः त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन द्व्यणुकरूपतदवयवसिद्धेः नापि द्व्यणुक एव विश्रामः त्रसरेणोरवयवाः सावयवा महदवयवत्वात् कपालवदित्यनुमानेन द्व्यणुकावयवस्य परमाणुरूपस्य मूलकारणस्य सिद्धेः न चैवं क्रमेण तदवयवधारापि सिध्येत् अनवस्थाभयेनानुकूलतर्काभावेन च तत्कल्पनाया असम्भवात् ॥

Digitized by Google

कारणभावात् कार्यभावः ॥ ३ ॥

Aph. 3. From existence of the cause is existence of the effect.

[1] From the existence of colour &c. in the [material] cause, results its existence in the effect, for the qualities of the cause are antecedent to those of the effect, as is observed in the case of a water-pot, a piece of cloth, and the like. U.

[2] From the existence of the cause, of the primary cause, results the existence or being of the effects, compound substances. Otherwise, as the material cause of earth is earthy, it would in like manner follow that, by having the non-existent for a material cause, products or complex wholes would not exist. V.

अनित्य इति विशेषतः प्रतिषेधभावः ॥ ४ ॥

Aph. 4. The negation 'Non-eternal' is of the particular.

[3] The negation 'Not-eternal' is of the particular, relates to a particular thing, and hence arises the negation 'A compound substance is not eternal.' But a negation of the universal, 'Every thing is not eternal,' is impossible. V.

अविद्या ॥ ५ ॥

Aph. 5. [The supposition that atoms are non-eternal is] ignorance.

[1] The following objections may be raised. An atom is not eternal for it is matter, like a water-pot. Similarly the possession of colour, taste &c. may be adduced as arguments. So also, by simultaneous conjunction with six [other atoms] an atom has six parts; and consequently from its possession of parts, and from its being the substratum of conjunction partially inherent [we may infer that atoms are non-eternal.] Moreover if there be ether inside an atom, then inasmuch as it has a hollow, it has parts; but if there be not ether inside an atom, it follows that ether is not omnipresent.... Also the non-eternity of an atom follows from the inference which establishes the doctrine of transitoriness, that whatever is is momentary. If then, there be such a series of deductions, how can it be maintained that an atom is eternal? The answer is as follows. Every inference having for its subject the non-eternity of an atom is ignorance in the form of error, since it springs from a fallacy. This fallacy is occasionally prevention of proof including the subject; always absence of proof of inclusion due to want of evidence preventive of contrary instances; sometimes absence of proof as to the predicate. This and other matter may be sought in the Samána-tantra. U.

[2] 'Ignorance' is want of proof, viz. the inference of non-eternity of sound; for it arises from a fallacy, inasmuch as all the aforesaid arguments are many-sided. V.

A. E. G.

---

[1] रूपादीनां कारणे सद्भावात् कार्ये सद्भावः कारणगुणपूर्वका हि कार्यगुणा भवन्ति घटादौ तथा दर्शनादित्यर्थः ॥

[2] कारणस्य मुलकारणस्य भावात् कार्याणाम् अवयविनां भावः सत्ता अन्यथा मृदुपादानकस्य मृण्मयत्वात् असदुपादानकत्वेन कार्याणामवयविनामसत्त्वप्रसङ्गादित्यर्थः ॥

[3] न नित्य इति प्रतिषेधस्य भावो भवनं विशेषतः वस्तुविशेषमाश्रित्य तथाचावयवी न नित्य इति प्रतिषेधो भवति न तु सर्वः पदार्थो न नित्य इति सामान्यतः प्रतिषेधः सम्भवति ॥

---

[1] ननु परमाणुर्न नित्यः मूर्तत्वात् घटवत् एवं रूपवत्त्वरसवत्त्वादयः प्रत्येकं हेतव उन्नेयाः एवं षट्केन युगपद्योगात् परमाणोः षडंशता तथा च सावयवत्वात् अव्याप्यवृत्तिसंयोगाश्रयत्वात् । किञ्च परमाणोर्मध्ये यद्याकाशमस्ति तदा सच्छिद्रत्वेनैव सावयवत्वम् अथ नास्ति तदाकाशस्यासर्वगतत्वप्रसङ्गः । अपि च यत् सत् तत् क्षणिकमित्यादिक्षणिकत्वसाधकानुमानादपि परमाणोरनित्यता तथा चैतावती चेदनुमानपरम्परा तदा कथमुच्यते परमाणुर्नित्य इत्यत आह । परमाणोरनित्यत्वविषया सर्वाप्यनुमितिः अविद्या भ्रमरूपा आभासप्रभवत्वात् आपाततो धर्मिग्राहकमानबाधः सर्वत्र विपक्षबाधकप्रमाणशून्यत्वाद्व्याप्यत्वासिद्धिः क्वचित् स्वरूपासिद्धिरित्यादि समानतन्त्रे ऽन्वेष्टव्यम् ॥

[2] अविद्या अप्रमा अर्थात् परमाणोरनित्यत्वानुमितिः दुष्टहेतुजन्यत्वात् पूर्वोक्तानां हेतूनामनैकान्तिकत्वादिति भावः ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 52. Benares, September 1st, 1870. Vol. V.

॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

तदेवं संक्षेपविस्तराभ्यां तत्त्वंपदार्थपरिशोधनपूर्वकं ब्रह्मात्मैक्यलक्षणवाक्यार्थज्ञानं सफलं वेदान्तप्रत्ययं प्रमाणयुक्तिभ्यामुपपादितं, नित्यशुद्धबुद्धमुक्तसत्यज्ञानानन्तानन्दस्वभावस्य प्रत्यगात्मनो भेदविपर्यासाद्यनेकानर्थहेतुश्चाहंकारमनोबुद्धिचित्तवाच्यमन्तःकरणमिति च तत्रतत्रोक्तम् । इदानीं प्राधान्येन मनोऽध्यासनिबन्धन एवात्मनः संसारो ऽतो मनःस्वरूपतत्त्वेष्टानुसंधानेन तद्विलापने यत्नः कार्य इत्यभिप्रायेणात्ममनःसंवादरूपं प्रकरणमारभमाणो भगवान् भाष्यकारः प्रकरणप्रयोजनं तावदाह ।

(१) प्रयुज्य तृष्णाज्वरनाशकारणं
चिकित्सितं ज्ञानविरागभेषजम् ।
न याति कामज्वरसंनिपातजां
शरीरमालाशतयोगदुःखिताम् ॥ ६४६ ॥

प्रयुज्येति । चिकित्सितं चिकित्सां, भावे निष्ठा, ज्ञानं विवेकरूपं विराग औदासीन्यं मनोवृत्तिविषयेष्वनासक्तिलक्षणं च भेषजं यस्मिंस्तच्चिकित्सितं तृष्णारूपज्वरनाशकारणं प्रयुज्य दुःखितां दुःखित्वं न याति पुमानिति योजना । काम एव ज्वरस्तन्निमित्तः संनिपातो मूर्छा आत्मानात्मविवेकलक्षणा ततो जातां शरीरपरंपराशतयोगैः संबन्धैर्दुःखितामित्यर्थः । यद्वा चिकित्सितमिति भेषजविशेषणं योज्यं, सम्यग्यथाशास्त्रं साधितमित्यर्थः ॥ १ ॥

भेषजप्रयोगप्रकारमात्ममनःसंवादेन प्रपञ्चयति ।

(२) अहंममेति त्वमनर्थमीहसे
परार्थमिच्छन्ति तवान्यईहितम् ।
न ते ऽर्थबोधो नहि मे ऽस्ति चार्थिता
ततश्च युक्तः शम एव ते मनः ॥ ६४७ ॥

अहंममेत्यादिना । हे मनः अहंममेति, इदमित्यपि द्रष्टव्यं, त्वमनर्थं व्यर्थमीहसे चेष्टसे, ननु त्वदर्थमेवाहं चेष्टे ऽतः कथमानर्थक्यमिति चेत्ताहं सांख्या यं प्रत्येवमभिमानस्तत्वेदमित्युत्तरमाह । परार्थमिच्छन्तीति । तवेहितं परार्थं पुरुषस्य भोगापवर्गार्थमन्ये सांख्या इच्छन्ति, न वयं वेदान्तसिद्धान्तवेदिनः, विचार्यमाणे तन्मनीषितमपि मुधा यतस्ते ऽर्थबोधो न संभवत्यचेतनत्वान्नापि मे त्वय्यर्थिता ऽस्ति ततश्च ते शमो लय एव युक्त इत्यर्थः ॥ २ ॥

आत्मनो ऽर्थित्वाभावं साधयति ।

(३) यतो न चान्यः परमात्सनातनात्
सदैव तृप्तोहमतो न मे ऽर्थिता ।
सदैव तृप्तश्च न कामये हितं
यतस्व चेतः प्रशमाय ते ऽधिकम् ॥ ६४८ ॥

यत इति । सनातनात्पूर्णानन्दरूपात्परमादविकारात्परमात्मनो ऽन्यो नाहं यतो ऽतः सदैव तृप्त इत्यादिरूपस्तस्मात् हे चेतस्ते प्रशमाय यतस्व,मुमुक्षुणा मनोविलयने यत्नः कार्य इत्यभिप्रायः ॥ ३ ॥

परमात्माभेदेन स्वस्यार्थित्वाभाव उक्तस्तमेवाभेदमुपपादयति ।

Digitized by Google

(४) षडूर्मिमालाभ्यतिवृत्त एव यः
स एव चात्मा जगतश्च नः श्रुतेः ।
प्रमाणतश्चापि मया प्रवेद्यते
मुधैव तस्माच्च मनस्तवेहितम् ॥ ६४६ ॥

षडूर्मिमालेति । अशनाया पिपासा शोको मोहो जरा मृत्युरिति प्राणमनोदेहधर्माः षडूर्मयस्त्वाविर्भावतिरोभावरूपास्तेषां माला अविच्छिन्नाः परंपरास्ता अभ्यतीत्य सर्वात्मना पृथक्कृत्य वृत्तः सिद्धो निष्प्रपञ्च इति यावत्, य एवंविधः स एव जगतः सर्वस्यात्मा, चकारात्तव चाहमेवात्मा, श्रुतेः, "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर" इत्यादौ श्रवणादित्यर्थः ।

"अहमात्मा गुडाकेश सर्वभूताशयस्थितः"

इत्यादिस्मृतिप्रमाणतोपि चकारात्कार्यकारणोपाधिद्वयपरामर्शमन्तरेण स्वतो भेदानिरूपणादित्यादिन्यायाद्विद्वदनुभवाच्च मया प्रवेद्यते सम्यग् ज्ञायते, मुधैवेति सुगमम् ॥ ४ ॥

प्रत्यगात्मनः परमात्माभेदं प्रामाणिकमुक्त्वा भेदप्रतिभासस्य मनःकल्पितत्वेनाभासतामुपपादयति ।

(५) त्वयि प्रशान्ते नहि चास्ति भेदधी-
र्यतो जगन्मोहमुपैति मायया ।
ग्रहो हि मायाप्रभवस्य कारणं
ग्रहाद्विमोके नहि सास्ति कस्य चित् ॥ ६५० ॥

त्वयीति । यतो भेदधियो जगत्प्राणिजातं मोहमाकुलीभावमकृतार्थताभिमानलक्षणया मायया उपैति नित्यं संबध्यते सा भेदधीस्त्वयि मनसि प्रशान्ते न चास्ति, सुषुप्तौ त्वदभावे तदभावदर्शनादित्यर्थः । अन्वयव्यतिरेकाभ्यां भेदग्रहणस्यानर्थहेतुतामुपपादयति । ग्रहो हीति । सुषुप्त्यादौ भेदग्रहाभावे मायामोहयोरदर्शनादित्यर्थः ॥ ५ ॥

इतश्च मनश्चेष्टितं वृथेत्याह ।

(६) न मे ऽस्ति मोहस्तव चेष्टितेन हि
प्रबुद्धतत्त्वस्त्वसितो ह्यविक्रियः ।
न पूर्वतत्त्वोत्तरभेदता हि नो
वृथैव तस्माच्च मनस्तवेहितम् ॥ ६५१ ॥

न मेस्तीति । असितो बन्धरहितः, प्रबुद्धतत्त्वस्वभावमसितत्वमविक्रियत्वं च व्युत्पादयति । न पूर्वेति । पूर्वतत्त्वं पूर्वावस्था, पूर्वतत्त्वादुत्तरभेदता उत्तरकाले तत्त्वभेदता नोस्माकं नास्ति, तत्त्वप्रबोधात्पूर्वोत्तरकालयोर्न मे विशेषोस्तीत्यर्थः । हि यस्मादेवं तस्मात्त्वत्कृतातिशयाभावादित्यर्थः ॥ ६ ॥

सर्वदृश्यातिवर्तित्वाच्चात्मन आगन्तुकातिशयायोगं साधयति ।

(७) यतश्च नित्यो ऽहमतो न चान्यथा
विकारयोगे हि भवेदनित्यता ।
सदा प्रभातो ऽप्यमतो हि चाद्वयो
विकल्पितं चाप्यसदित्यवस्थितम् ॥ ६५२ ॥

यतश्चेति । अन्यथा अनित्यता, ननु कुतो ऽनित्यताप्राप्तिर्या निषिध्यते तत्राह । विकारेति । परिस्पन्दपरिणामादिरूपविक्रियाभावेपि प्रकाशाप्रकाशसंसर्गरूपविक्रिया स्यादित्याशङ्क्याह । सदेति । "सकृद्विभातो ह्येवैष ब्रह्मलोकः पश्यन्वै तन्न पश्यती"त्यादिश्रुतेरित्यर्थः । सति दृश्यभेदे कथमद्वयत्वमत आह । विकल्पितमिति । रज्जुसर्पादिवदागन्तुकत्वादसदित्यवस्थितं निश्चितमित्यर्थः ॥ ७ ॥

मनसैव सद्वितीयत्वमात्मन इत्याशङ्क्याह ।

(८) अभावरूपं त्वमसीह हे मनो
निरीक्ष्यमाणे नहि युक्तितो ऽस्तिता ।
सतो ह्यनाशादसतो ऽप्यजन्मतो
द्वयं च चेतस्तव नास्तितेष्यते ॥ ६५३ ॥

अभावरूपमिति । यद्वा भेदकल्पकस्य मनसो ऽभावाद्यपि सदा ऽद्वयत्वमात्मन इत्याह । अभावरूपमिति । युक्तितो निरीक्ष्यमाणे तवास्तिता नहीत्युक्तां युक्तिमाह । सतो हीति । तथा चाह भगवान्

"नासतो विद्यते भावो नाभावो विद्यते सतः"

इति । द्वयं जन्मविनाशाख्यं ते तव, अतस्तव नास्तितेष्यते परमार्थसत्त्वं नेष्यतइत्यर्थः ॥ ८ ॥

बीजाभावे कुतः फलमिति न्यायेनाद्वैतत्वमात्मनो विशदयति ।

(९) द्रष्टा च दृश्यं च तथा च दर्शनं
भ्रमस्तु सर्वस्तव कल्पितो हि सः ।
दृशेश्च भिन्नं नहि दृश्यमीक्ष्यते
स्वपन्प्रबोधेन तथा न भिद्यते ॥ ६५४ ॥

द्रष्टा चेति । तव कल्पितस्त्वत्कृतः, किं चागन्तुकस्याविज्ञातसत्त्वादप्यात्मा ऽद्वय इत्याह । दृशेश्चेति । जडस्य स्वतः स्फुरणाभावादस्फुरतश्च सत्त्वे प्रमाणाभावादित्यर्थः । तथा सति स्वपन्नात्मा प्रबोधेन जाग्रदादिना न भिद्यते यथा स्वापावस्थायामद्वितीय एव तथा ऽवस्थान्तरेपीत्यर्थः । स्वापे चाद्वितीयत्वं "सलिलएको द्रष्टा ऽद्वैतो भवति अथास्मिन्

Digitized by Google

प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येती”त्यादिश्रुतिसिद्धम् ॥ ९ ॥

एवं विकल्पाभावे ऽपि विकल्पना सत्या ऽस्तीति पुनरद्वैतानुपपत्तिरित्याशङ्क्याह ।

(१०) विकल्पना वापि तथा ऽद्वया भवे-
दवस्तुयोगादलातचक्रवत् ।
न शक्तिभेदोऽस्ति यतो न चात्मनां
ततो ऽद्वयत्वं श्रुतितो ऽवसीयते ॥ ६५५ ॥

विकल्पना वापीति । तथा दृश्यवदेव विकल्पनापि न भिद्यतइति पूर्वश्लोकगतानुकर्षणार्थो वाशब्दः, किं त्ववस्तुयोगादवस्तुविषयकतया तद्विरूप्यत्वादद्वयाधिष्ठानातिरिक्तस्वरूपरहिता भवेत्तत्र लोके ऽलातचक्रवद् भ्रमदुल्मुकस्य चक्राकारत्ववदिति योजना । यथा भ्रमतो ऽलातस्य चक्राकारता न पृथग्वस्तु तथा विकल्पनापि चिदात्मातिरेकेण पृथग्वस्तुसती न भवतीत्यर्थः । तथापि नात्मनो ऽद्वयत्वं दृष्टिश्रुतिमत्यादिशक्तिरूपस्य स्वगतभेदस्य सत्त्वात्तथा प्रतिशरीरमात्मभेदप्रथनात्सजातीयभेदोपपत्तेश्चेत्याशङ्क्य श्रुतिविरोधान्मैवमित्याह । न शक्तिभेद इति । तथा च श्रुतिः । “अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येवे”ति चिदात्मनो दृष्ट्यादिभेदस्यौपाधिकतां दर्शयति । तथा “एको देवो बहुधा निविष्टः एकं सन्तं बहुधा कल्पयन्ति एकस्तथा सर्वभूतान्तरात्मे”त्यादि श्रुतिरात्मनः सर्वत्रैकत्वमाह । तथा भेदनिषेधश्रुतिस्मृतयो ऽप्यत्रोदाहार्याः ॥ १० ॥

आगमबाह्यानामात्मभेदकल्पनां युक्त्या निराकरोति ।

(११) मिथश्च भिन्ना यदि ते हि चेतना
क्षयस्तु तेषां परिमाणयोगतः ॥
ध्रुवो भवेद्भेदवतां हि दृष्टतो
जगत्त्रयस्यापि समस्तमोक्षतः ॥ ६५६ ॥

मिथश्चेति । चेतना आत्मानो यदि मिथो भिन्नाः स्युस्तर्हि ये भिन्नास्ते परिमिता यथा मूलाङ्कुरादयो ये च परिमितास्ते विनाशिनस्तद्वदेवेत्यात्मनां विनाशित्वप्रसङ्ग इति समुदायार्थः, परिमाणयोगतस्तेषां क्षयस्तु ध्रुवो भवेद् भेदवतां हि दृष्टतो विनाशदर्शनादिति योजना । किं च भेदपक्षे एकैकस्मिन् कल्पे एकैकमुक्तावप्यनन्तेषु गतकल्पेष्वनन्तानां जीवानां मुक्तिसंभवादिदानीं समस्तमोक्षतो भोक्त्रभावे तदर्थानां भोग्यानां जगतां क्षयश्चापि भवेदतो भेदपक्षो दुर्युक्तिक इत्यर्थः ॥ ११ ॥

ननु तथापि जगज्जीवेश्वरादिभेदस्य विद्यमानत्वात्कथमुक्तदोषपरिहार इत्याशङ्क्याह ।

(१२) न मे ऽस्ति कश्चिन्न च सोऽस्मि कस्य चिद्
यतो ऽद्वयो ऽहं नहि चास्ति कल्पितम् ।
अकल्पितश्चास्मि पुरा प्रसिद्धितो
विकल्पनाया द्वयमेव कल्पितम् ॥ ६५७ ॥

न मेऽस्तीति । यतो ऽहमद्वयो वस्तुतो ऽतो मे गुणभूतः प्रधानभूतो वा ऽन्यदृशो वा न कश्चिदस्ति यस्यापि कस्य चिदहमस्मि सोपि न चास्तीति संबन्धः । यच्च कल्पितं जगत्तच्च नह्यस्ति तथा च जीवेश्वरजगद्भेदस्य मय्यद्वये कल्पितत्वात्कल्पितस्य प्रमाणासहिष्णुतायाऽलंकारत्वाच्चास्त्यस्मासूक्तदोषप्रसङ्ग इत्यर्थः । ननु द्वैतवदद्वैतस्यापि पदार्थत्वाविशेषात्कल्पितत्वं तदवस्थमित्याशङ्क्य निरधिष्ठानकल्पनायोगान्निरवधिकबाधायोगाच्च सर्वकल्पनायाः प्रागेव सिद्धं कल्पितबाधावधितया पश्चादप्यवशिष्यमाणं न कल्पितं, किं तु स्वतः सिद्धं वस्त्वद्वयशब्देनोच्यतइत्याह । अकल्पित इति । विकल्पनायाः पुरा प्रसिद्धितो ऽहमकल्पितं, चकारादूर्द्ध्वमप्यवधिभूतत्वान्मध्ये च तत्साक्षित्वादकल्पित एवास्मीति गृह्यते, परिशेषात्सापेक्षद्वयमेव कल्पितमित्यर्थः ॥ १२ ॥

उक्तमेव स्पष्टीकुर्वन्नात्मनो विकल्पनाद्यविषयत्वमाह ।

(१३) विकल्पना चाप्यभवे न विद्यते
सदन्यदित्येवमतो न नास्तिता ।
यतः प्रवृत्ता तव चापि कल्पना
पुरा प्रसिद्धेर्न च तद्विकल्पितम् ॥ ६५८ ॥

विकल्पना चापीति । नास्ति भव उत्पत्तिर्यस्य तदभवं तस्मिन्नभवे नित्ये सदन्यत्सतो ऽन्यदसदित्यपि विकल्पना न च विद्यते अत एवं सति न नास्तिता आत्मनो नित्यत्वादित्यर्थः । किं चामनस्कस्य कल्पनानुदयान्मनसश्चागन्तुकतया स्वरूपसत्ताभावात्तदपि सविलासं यत्र कल्पितं तच्च कल्पनात्मकं किं तु सर्वकल्पनासाक्षित्वेन पूर्वापरकालकल्पनाकल्पितं कूटस्थमेवात्मतत्त्वमित्याह । यत इति । तव मनस इत्यर्थः । त्वत्कल्पनाया अपि पुरा प्रसिद्धेरित्यर्थः ॥ १३ ॥

ननु यदुपलभ्यते तदस्तीत्यभ्युपगम्यते यन्नोपलभ्यते तन्नास्तीति, उपलभ्यते च द्वैतं माद्वैतमित्याशङ्क्य दर्शनादर्शने न वस्तुसत्त्वासत्त्वयोः कारणे, किं त्वन्य एव तन्निश्चयहेतुरित्यभिप्रेत्याह ।

(१४) असद् द्वयं ते ऽपि हि यद्यदीक्ष्यते
न दृष्टमित्येव न चैव नास्तिता ।

Digitized by Google

यतः प्रवृत्ता सदसद्विकल्पना
विचारवद्वापि तथाद्वयं च सत् ॥ ६५९ ॥

असद् द्वयमिति। हे मनस्ते तव गोचरीभूतं यदाद्दीत्यत तद् द्वयं द्वैतदृष्टमप्यसत् स्वप्नवद्दृष्टनष्टस्वरूपत्वात्तथा न दृष्टं न दृश्यतइत्येवमेतावता वस्तुनो नास्तिता न च, नहि नीरूपस्य वायोश्चक्षुषा ऽनुपलम्भेपि नास्तिता भवति, किं त्वस्तितैव, सतोपि वस्तुनो द्रष्टुरसामर्थ्याद्वा दर्शनायोग्यत्वाद्वाप्यदर्शनसंभवादित्यर्थः। नन्वदृष्टमपि नास्तीति शशशृङ्गादि प्रसिद्धं, सत्यं, तथापि

"लब्धरूपं क्व चित्किं चित्तादृगेव निषिध्यते।
विधानमन्तरेणातो न निषेधस्य संभवः" ॥

इति न्यायेन द्वैतमस्ति नास्तीति विप्रतिपत्त्यालम्बनं किमप्यास्थेयमेवान्यथा विकल्पप्रसरायोगादित्यभिप्रेत्याह। यतः प्रवृत्ता सदसद्विकल्पनेति। यतो यस्मिन्नधिष्ठाने प्रतीयमाना विकल्पना तदस्त्यकल्पितरूपमित्यर्थः। विकल्पालम्बनत्वेनाधिष्ठानसत्तामुक्त्वा ऽवधित्वेनापि तत्सत्त्वमाह। विचारवदिति। वाशब्दश्चार्थः। यथा विचारो निर्णयमन्तरेण न पर्यवस्यति तथा सदद्वयं विना न विकल्पः प्रशाम्यति, अतः सर्पधारादण्डमालादिविकल्पेष्वनुगम्यमानतया ऽधिष्ठानत्वेन पुनः सर्वविकल्पनिषेधावसानतया ऽवधित्वेनानुवर्त्तमाना ऽविकल्पिता ऽनिषिद्धरज्जुस्वरूपवदध्यात्मादिविकल्पाधिष्ठानसन्मात्रत्वेन तन्निषेधावधित्वेन चाविकल्पितमनपोह्यं चात्मतत्त्वमद्वयमस्तीत्येवोपलब्धव्यमिति तात्पर्यार्थः ॥ १४ ॥

किं चोक्तविधया दर्शनादर्शनमात्रात्सत्त्वासत्त्वनिश्चयासंभवाद्विचारो ऽभ्युपेयस्तस्मिंश्च क्रियमाणे सदेवाद्वयमवशिष्यतइत्यभिप्रेत्याह।

(१५) सदभ्युपेतं भवतोपकल्पितं
विचारहेतोर्यदि तस्य नास्तिता।
विचारहानाच्च तथैव संस्थितं
न चेत्तदिष्टं नितरां सदिष्यते ॥ ६६० ॥

सदभ्युपेतमिति। सद्वस्तु नास्तीति वदता तन्निर्णयाय विचारो ऽभ्युपगम्यते न वा, यदि सो ऽभ्युपगम्यते तदा भवता सद्वस्त्वभ्युपेतं यतो विचारहेतोर्विचारसिद्ध्यर्थमुपकल्पितमुपस्थापितं किमपि वस्तु सर्वैर्विचारकैरिति योजना। विचारो हि प्रमाणव्यापारस्य फलावसानत्वनिश्चयहेतुस्तर्कः,स च न प्रमेयमन्तरेण प्रसरमुपलभते, प्रमितं च न बाध्यते इति सद्वस्तुसिद्धिरित्यर्थः। विपक्षे बाधकमाह। यदीति। यदि तस्य सद्वस्तुनो नास्तिता तदा प्रमाणप्रमेयप्रमातृनिरूप्यस्य विचारस्य हानादप्रवृत्तेः,चकारात्सदभावनिर्णयहानाच्च, तथैव संस्थितमनिर्णीतमेव संस्थितं, तथा च वस्तुतत्त्वानवधारणादैहिकामुष्मिकार्थप्रवृत्तिहानिः स्यादिति भावः। एतेन विचारानभ्युपगमपक्षे च दोष उक्तो वेदितव्यः। अथाविचारितमनिर्णीतं च तत्किमपि नेष्टं चेत्तर्हि विचारनिर्णययोः सदवसानमन्तरेण पर्यवसानाभावान्नितरां सदिष्यते सद्वस्त्विष्यतएवेत्यर्थः। यद्वा हे मनो भवतोपकल्पितं द्वैतजातं विचारहेतोर्विचारसिद्ध्यर्थं सदभ्युपेतमात्मतत्त्वनिश्चयफलविचारप्रवृत्तये ऽस्तीति द्वैतमङ्गीकृतमित्यर्थः। यदि पुनस्तस्य नास्तिता शून्यतैव द्वैतस्य स्यात्तदा विचारहानाद्विचाराप्रवृत्तेश्चकारात्परमार्थनिर्णयाभावाच्च तथैवाविचारितमनिर्णीतं च तत्त्वं संस्थितं स्यात्, अथ तत्त्वानिर्णये पुरुषार्थासिद्धेस्तदनिर्णीतस्वभावमिष्टं न चेत्स्यात्तर्हि नितरां सदिष्यते विचार्य निर्णये सति सर्वस्य सदवसानत्वाव्यभिचारादित्यर्थः। कोट्यन्तरस्फुरणं विना न संशयावतारस्तेन विना न विचारप्रवृत्तिस्तामृते न वस्तुतत्त्वनिर्णयस्तेन च विना न पुरुषार्थलाभ इति विचारार्थतया यथा प्रतिपन्नं द्वैतमभ्युपगतं न प्रामाणिकत्वेन तथा च भुजङ्गं रज्जुत्वेन व्यवहरतइवातत्त्वं तत्त्वबुद्ध्या व्यवहरतो ऽनर्थप्राप्तिसंभवात् तत्परिहाराय विचारे ऽवश्यंभाविनि क्रियमाणे सर्वेषु विशेषेष्वस्तिताया अव्यभिचाराद्विशेषाणां व्यभिचारान्मिथो व्यभिचारिणां चानृतत्वात्सन्मात्रमेव सत्यं न द्वैतरूपो विशेषाकार इति नितरां सिद्ध्यतीति भावः ॥ १५ ॥

भवत्वेवं विचारान्यथानुपपत्त्या सद्वस्तुसिद्धि,स्तदर्थक्रियां करोति न वा, आद्ये क्षणिकत्वापत्तिरित्यभिप्रेत्य द्वितीये तस्य खरशृङ्गादेरविशेष इति बौद्धः शङ्कते।

(१६) असत्समं चेव सदित्यपीति चे-
दनर्थवत्त्वात्खरशृङ्गतुल्यतः।
अनर्थवत्त्वं त्वसति ह्यकारणं
न चेव तस्मान्न विपर्यये ऽन्यथा ॥ ६६१ ॥

असत्सममिति। अनर्थवत्त्वादर्थक्रियारहितत्वादित्यर्थः। श्रौतं सदसत्सममर्थक्रियाशून्यत्वात्खरशृङ्गवदित्यनुमानमप्रयोजकत्वेन दूषयति। अनर्थवत्त्वमिति। अनर्थवत्त्वं त्वसति असत्त्वे साध्ये न कारणं प्रयोजकं न भवति, स्वभावसत्त्वसंभवादित्यर्थः। अनर्थक्रियाकारित्वस्यासत्त्वव्याप्तौ संदिग्धानैकान्तताभुक्त्वा ऽर्थक्रियाकारित्वस्य सत्त्वव्याप्तावनैकान्ततामाह। न चेव तस्मादिति। तस्मादर्थक्रियाकारित्वादेव सत्त्वं यदन्यासावर्थक्रियाकारिणि कण्टकाद्यभावे सत्त्वव्यभिचारादित्यर्थः। हेतुनिरसनमुपसंहरति। न विपर्ययेन्यथेति। विपर्यये ऽर्थक्रियाकारित्वाभावे नान्यथा असत्त्वं न भवति, क्रियोत्पत्तेः पूर्व-

मुदासीनवस्तुदर्शनादन्यथा सत्त्वार्थक्रिययोरन्योन्याश्रयापातादित्यर्थः ॥ १६ ॥

असिद्धश्चायं हेतुरित्याह ।

(१७) असिद्धतश्चापि विचारकारणाद्
द्वयं च तस्मात्प्रसृतं हि मायया ।
श्रुतेः स्मृतेश्चापि तथा हि युक्तितः
प्रसिद्धतीत्थं न तु युज्यते ऽन्यथा ॥ ६६२ ॥

असिद्धतश्चापीति । न केवलमनैकान्तिकत्वादेरेवानुमानमप्रमाणम्, अपि त्वस्मदभिमते चात्मनि पक्षासिद्धश्चेत्यपेरर्थः । अर्थक्रियाकारित्वाभावमात्रं हेतुः परमार्थविशेषिततदभावो वा, आद्ये ऽसिद्धिमाह । विचारकारणादित्यादिना । कूटस्थस्यापि सतो धर्मित्वेन विचारप्रवृत्तिकरत्वान्मायया द्वयशब्दवाच्यभेदप्रपञ्चप्रसरणहेतुत्वाच्चेत्यर्थः । मायाया जगद्धेतुत्वं साधयति । श्रुतेरिति ।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"
इति श्रुतिः,
"मायाध्यक्षेण प्रकृतिः सूयते सचराचरम्"

इत्यादिस्मृतिः, कार्यस्य वाचारम्भणत्वप्रतिपत्तिसाधकन्यायो युक्तिः, इत्थं कूटस्थस्याप्यर्थक्रियाकारित्वं प्रसिद्धत्यतो हेत्वसिद्धिरित्यर्थः । द्वितीयं दृष्टान्तासिद्ध्या दूषयति । न त्विति । अन्यथा परमार्थतो ऽर्थक्रियाकारित्वं स्थिरस्य क्षणिकस्य वा न युज्यते, अक्रियस्याकारकत्वात्क्रियाकार्यं प्रत्यपि क्रियावत्त्वापत्तावनवस्थाप्रसङ्गादिति दिक् ॥ १७ ॥

ननु सर्वविकल्पहेतुत्वाद्द्वयस्य सर्वविकल्पयुक्तत्वमित्याशङ्क्याह ।

(१८) विकल्पनाच्चापि विधर्मकं श्रुतेः
पुरा प्रसिद्धेश्च विकल्पतो ऽद्वयम् ।
न चेति नेतीति तथा विकल्पितं
निषिध्यते ऽथाप्यवशेषसिद्धये ॥ ६६३ ॥

विकल्पनाच्चापीति । विधर्मकं विरुद्धस्वभावमित्यर्थः । निष्कलं निष्क्रियमित्यादिश्रुतेः, विकल्पतः पुरा प्रसिद्धेरिति युक्तेश्चेत्यर्थः । अद्वयमिति छेदः । नेदं यदिदमुपासते नेतिनेति च निषिध्यमानचेतनाचेतनविकल्पावसानसिद्धये ऽत्रापि निषेधवाक्येष्वपि विकल्पविधर्मकमद्वयं निर्विशेषं सिद्धमित्याह । न चेतीति । यथा विकल्पितं नेतिनेतीति निषिध्यते न च तथा ऽद्वयमात्मतत्त्वं निषिध्यतइति योजना ॥ १८ ॥

यथोक्ते श्रुत्यर्थे ये विकल्पयन्ति ते ऽनर्थं प्राप्नुवन्तीत्याह ।

(१६) अकल्पितेप्येवमजे ऽद्वये ऽक्षरे
विकल्पयन्तः सदसच्च जन्मभिः ।
स्वचितमायाप्रभवं च ते भवं
जरां च मृत्युं च नियान्ति संततम् ॥ ६६४ ॥

अकल्पितइति । कूटस्थे भेदविकारसंसर्गशून्ये श्रुतिसिद्धे इति यावत्, सदसदस्तिनास्ति,चकारात्कर्त्ता ऽकर्त्ता सविशेषो निर्विशेष इत्यादिप्रकारैः स्वचितमायाप्रभवं यथा स्यात्तथा विकल्पयन्तो ये ते जन्मभिस्तिर्यङ्मनुष्यजातिभिर्भवमुद्भवं जरां मृत्युं मरणं च संततं निरन्तरं नियान्ति नितरां गच्छन्तीति योजना । स्वचित्तमायाप्रभवमिति भवविशेषणं वा, बुद्धिभ्रमकल्पितमित्यर्थः ॥ १९ ॥

सद्वस्तुनः कूटस्थाद्वयत्वं श्रुत्यादिप्रमाणसिद्धं तदन्यथा विकल्पनं पुरुषापराधनिबन्धनमित्युक्तमिदानीं तदेव युक्तितो द्रढयितुमुपक्रमते ।

(२०) भवाभवत्वं तु न चेदवस्थिति-
र्न चास्य चान्यस्थितिजन्म नान्यथा ।
सतो ह्यसत्त्वादसतश्च सत्त्वतो
न च क्रियाकारकमित्यतो ऽप्यजम् ॥ ६६५ ॥

भवाभवत्वमिति । तुश्चार्थः किं चेत्यर्थे । अद्वैतमुत्पद्यमानस्वभावमनुत्पद्यमानस्वभावमुभयस्वभावं ह्यनुभयस्वभावं वा नाद्यस्तत्र सापेक्षत्वेन शुक्तिरजतादिवन्मिथ्यात्वापातात्, न द्वितीयः, सदातनत्वापत्तौ तदभावव्यवहारानुदयप्रसङ्गात्, न तृतीयः, एकस्य विरुद्धोभयस्वभावत्वायोगादित्यभिप्रेत्य चतुर्थं मनूद्य दूषयति । भवाभवत्वमिति । भवश्चाभवश्च भवाभवौ तयोर्भावः भवाभवत्वमस्य द्वैतस्य भवाभवत्वं चेद्विरोधाच्चेष्यते तदा ऽवस्थितिरवस्थानसत्त्वं न चास्य स्यादिति शेषः । नह्युभयस्वभावविलक्षणं क्व चित्सदुपलब्धमस्तीत्यर्थः । च अपरं यदि द्वैतस्य जन्मेष्यते तदा स्वत एव जन्मासंभवादन्यस्मात्तद्वक्तव्यं तदपि सत्स्वभावमसत्स्वभावं वा यतो द्वैतस्य जन्मेत्याकाङ्क्षायां सर्वथापि नोपपद्यतइत्याह । अन्यस्थितिजन्म नान्यथेति । अन्यस्मिन् स्थितौ सति न जन्म सतो न जन्मेत्यर्थः । अन्यथा ऽन्यास्थितौ जन्म नेत्युपरज्यते, असतोऽपि न जन्मेत्यर्थः । पक्षद्वयेपि दूषणमाह । सत इति । सत उपादानत्वे विकारित्वापत्तौ विनाशादसत्त्वप्रसङ्गादसतश्चोपादानत्वे सत्त्वतः सत्त्वापत्तेः, नहि शून्यमुपादानं स्यात्तस्य कार्येष्वननुगमादित्यर्थः । तथा च वस्तुनः स्वभाववैपरीत्यायोगाच्च सत्कार्यद्वैतात्मना जायते नाप्यसदित्युत्पत्तिपक्षोपि दुर्निरूप इति भावः । एवमुत्पाद्योत्पादकयोः

Digitized by Google

स्वभावनिरूपणे सत्युत्पत्तितत्कारकविशेषयोः सुतरामनिरूपिताकारता सिद्धेत्याह । न च क्रिया कारकमिति । उपसंहरत्यतो ऽप्यजमिति । उक्तयुक्तितो ऽप्यजं निर्विशेषमद्वयमात्मतत्त्वमित्यर्थः ॥ २० ॥

न च क्रिया कारकमित्युक्तमेव स्फुटयन्नजत्वं वस्तुनः साधयति ।

(२१) अकुर्वदिष्टं यदि चास्य कारकं
न किं चिदन्यन्ननु नास्त्यकारकम् ।
सतो ऽविशेषादसतश्च सच्च्युतौ
तुलां तयोर्यद्वदनिश्चयान्नहि ॥ ६६६ ॥

अकुर्वदिति । अस्य द्वैतजन्मनः कारकमकुर्वदिष्टं निर्व्यापारं कारकमिष्टं चेदित्यर्थः । अन्यदिति द्वितीयपादस्थं पदमादाय यदि वा ऽन्यत्कुर्वदिष्टं चेदित्यर्थः । तत्राद्ये ऽतिप्रसङ्गदोषमाह । न किं चिन्ननु नास्तीति । ननु निश्चितं किं चिदपि कारकं नास्तीति न, अपि तु सर्वं सर्वस्य सर्वदा कारकं स्यादित्यर्थः । द्वितीये कारकत्वानुपपत्तिदोषमाह । अकारकमिति । अक्रियस्य कुर्वत्त्वायोगात्क्रियावत्त्वे नित्ये सदा कार्यप्रसङ्गादनित्ये च क्रियावदन्तरापेक्षायामनवस्थाप्रसङ्गात्तदनपेक्षायामात्माश्रयापत्तेः कुर्वत्त्वायोगात्क्रियावत्त्वे नित्ये सदा कार्यप्रसङ्गादक्रिये न किं चिदकारकमिति निराकरणपदान्वयः, सर्वमेव कारकं स्यादित्यर्थः । द्वितीये दूषणं, ननु नास्तीति, कुर्वतः कारकत्वानिरूपणादित्यर्थः । कथमनिरूपणमिति चेत्तत्र वक्तव्यं, किं सदवस्थं कुर्वदसदवस्थं वा, नोभयथापीत्याह । सतो ऽविशेषादसतश्चेति । असतश्चाविशेषादिति संबध्यते, विशेषवत्त्वे वैरूप्यापत्तेरविशेषे च सदा कार्यं स्यान्न वा स्यादित्यर्थः । अथ सतो ऽसतो वा पूर्वसत्त्वासत्त्वप्रच्युत्यवस्थायां कार्यं स्यादिति भवेत्कारकत्वमिति मतं, तत्रावस्थाप्रच्युतिकार्ययोर्यौगपद्यमभिमतं क्रमो वा, नाद्य इत्याह । सच्च्युताविति । उपलक्षणमसच्च्युतौ च तुलाया अन्तयोः कोट्योर्यद्वन्नमनोन्नमनमनुभवतोः कार्यकारणभावो न निश्चीयते, तथा कार्यकारणस्वरूपभेदो नहि निश्चीयत इत्यर्थः । द्वितीये ऽनवस्थाप्रसङ्गो ऽवस्थाप्रच्युतेरपि कार्यतया तस्या अपि तथाविधपूर्वकत्वापेक्षणादिति द्रष्टव्यम् ॥ २१ ॥

वस्तुनो ऽवस्थान्तरापत्तिमभ्युपगम्यैतदवोचाम, वस्तुतस्तु सतो ऽसतो वा ऽवस्थान्तरं नोपपद्यत इति न कस्यापि कार्यत्वं कारणत्वं वा विद्यत इत्याह ।

(२२) न चेत्स दृष्टः सदसद्विपर्ययः
कथं भवः स्यात्सदसद्व्यवस्थितौ ।
विभक्तमेतद् द्वयमप्यवस्थितं
न जन्म तस्माच्च मनो हि कस्य चित् ॥ ६६७ ॥

न चेदिति । एवमुक्तदोषापरिहारात्सदसद्विपर्ययश्चेन्नेष्टस्तदा सदसतोः स्वरूपव्यवस्थितौ भवः कथं स्यात् कुतो, यत एतद् द्वयमपि सच्चासच्च परस्परसंसर्गशून्यं व्यवस्थितं न पूर्वापरीभावो ऽनयोर्मिथो वा ऽन्यापेक्षया वेत्यर्थः । हे मनो हि यस्मादेवं तस्मान्न कस्य चिदपि जन्म विद्यत इत्यवधारयेत्यर्थः ॥ २२ ॥

भवतु वा जन्म यस्य कस्यापि तथापि न मे ब्रह्मभूतस्य का चित् क्षतिर्वृद्धिर्वेत्याह ।

(२३) अथाभ्युपेत्यापि भवं तवेच्छतो
ब्रवीमि नार्थस्तव चेष्टितेन मे ।
न हानवृद्धी मे यतः स्वतो ऽसतो
भवो ऽन्यतो वा यदि वास्तिता तयोः ॥ ६६८ ॥

अथाभ्युपेत्यापीति । मनसश्चेष्टितेनात्मनो नार्थो ऽस्तीत्येतत् प्रपञ्चयति । न हानवृद्धी इति । मे स्त इति योज्यम् । कुत इत्यत आह । न यत इति । यतो यस्मादसत आत्मन्यविद्यमानस्य हानस्य वृद्धेर्वा भव उद्भवः स्वतो ऽन्यतो वा हेत्वन्तराद्वा न संभवतीति योजना । यदि वा तयोर्हानवृद्ध्योर्यद्यात्मन्यस्तिता तथापि तव चेष्टितेन मे नार्थ इति संबन्धः । सिद्धेर्थे त्वच्चेष्टाया अकिंचित्करत्वादित्यर्थः ॥ २३ ॥

हीयमानोपचीयमानयोरात्मनि संबन्धानिरूपणाच्च न हानवृद्धी स्त इत्याह ।

(२४) ध्रुवा ह्यनित्याश्च न चान्ययोगिनो
मिथश्च कार्यं न च तेषु युज्यते ।
अतो न कस्यापि हि किं चिदिष्यते
स्वयं च तत्त्वं न निरुक्तिगोचरः ॥ ६६९ ॥

ध्रुवा इति । ध्रुवाः स्थिराः कूटस्था अनित्याः क्षणिकाश्च पदार्था हि निश्चितमन्ययोगिनो न भवन्ति स्थिराणामविकारित्वात् क्षणिकानामन्यसंबन्धकालपर्यन्तमवस्थानासंभवादित्यर्थः । मिथश्चान्योन्यमपि स्थिरास्थिरयोर्न संबन्धिता संभवति संबन्धस्य संबन्धिसंबद्धत्वासंबद्धत्वविकल्पासहत्वादित्यर्थः । अत एव तेषु न कार्यं किमपि युज्यते घटते । विकारभेदसत्त्वनिराकरणमुपसंहरति । अत इति । न किमपि कस्यापि संबन्धि परमार्थत इष्यत इत्यर्थः । ननु कथमात्मनो ऽन्यसंबन्धाभावो वेदान्तवाक्यप्रमाणं प्रति प्रमेयत्वावगमादित्यत आह । स्वयं चेति । तत्त्वमात्मस्वरूपं स्वयं निरुपाधि-

Digitized by Google

क्तं न, निरुक्तेर्वाक्यस्य मुख्यया वृत्त्या गोचरो विषयः, शब्दप्रवृत्तिनिमित्तधर्माभावात्, किं तु लक्षणया शब्दस्य तत्र पर्यवसानमपेक्ष्य वेदान्तप्रमेयत्वं तस्याङ्गीकृतमिति न विरोध इत्यर्थः ॥ २४ ॥

तदेवं दुर्निरूपद्वैतसाक्षिणो ऽसङ्गाद्वयानन्दरूपस्य स्वप्रकाशतया प्रकाशमानं स्वरूपं श्रुतियुक्तिभ्यां निश्चित्य पुमान्कृतकृत्यो भवतीति द्वैताभासनिराकरणफलमुपसंहारव्याजेनाह ।

(२५) समं तु तस्मात्सततं विभा तव
द्वयाद्विमुक्तं सदसद्विकल्पितात् ।
निरीक्ष्य युक्त्या श्रुतितश्च बुद्धिमा-
नशेषनिर्वाणमुपैति दीपवत् ॥ ६७० ॥

समं त्विति । सत्त्वासत्त्वाभ्यां विकल्पिताद् द्वयाद् द्वैताभासाद् विमुक्तमिति संबन्धः । सततं समं विभा तव प्रकाशमानमिति योजना । दीपवत्सहसैवाशेषस्य बन्धस्य निर्वाणं परिसमाप्तिं पैति निरीक्षणनिर्वाणयोर्न व्यवधानं किमप्यस्तीत्यर्थः ॥ २५ ॥

उक्तलक्षणस्यात्मतत्त्वस्य निरीक्षणं किं विषयत्वेनाविषयत्वेन वेति जिज्ञासायामविषयत्वेनैवेत्याह ।

(२६) अवेद्यमेकं यदनन्यवेदिनां
कुतार्किकाणां च सुवेद्यमन्यथा ।
निरीक्ष्य चेत्थं त्वगुणग्रहो ऽगुणं
न याति मोहं ग्रहदोषमुक्तितः ॥ ६७१ ॥

अवेद्यमिति । सर्वसाक्षिप्रत्यगात्मनोऽन्यच्च भवत्यद्वयं ब्रह्मेति ये वेदिनस्तेषामनन्यवेदिनामवेद्यम्, अन्यथा भेदेन विषयतया वेदिनां कुतार्किकाणां सुवेद्यं परिच्छिन्नतया सुज्ञेयं शास्त्रयुक्तिविचारप्रयासं विना स्वमत्यनुसारेण सुखबोधमित्यर्थः । गुणेषु सत्त्वादिषु सविकारेषु ग्रहो ऽभिनिवेशो यस्य स गुणग्रहो न गुणग्रहो ऽगुणग्रहः पुमान् देहाद्यभिमानहीन इति यावत्, अगुणं निर्विशेषमात्मतत्त्वमित्थमवेद्यमित्याद्युक्तं रूपं निरीक्ष्यालोच्य चकारादपरोक्षतयानुभूय मोहं न याति, तत्र हेतुमाह । ग्रहदोषमुक्तित इति । ग्रहरूपाद्दोषान्मुक्तितो मुक्तेः मोहहेत्वज्ञानतत्कार्यबाधादित्यर्थः ॥ २६ ॥

कस्मादेवं महता यत्नेनाविषयतया ब्रह्मात्मनो वेदनमिष्यते तत्राह ।

(२७) अतो ऽन्यथा न ग्रहनाश इष्यते
विमोहबुद्धेर्ग्रह एव कारणम् ।
ग्रहोऽप्यहेतुस्त्वनलस्त्वनिन्धनो
यथा प्रशान्तिं परमां तथा व्रजेत् ॥ ६७२ ॥

अतो ऽन्यथेति । अत उक्तविधादात्मज्ञानादन्यथा ऽन्यस्माद्वृत्त्यन्तरात्प्रकारान्तराद्वा न ग्रहनाशो मिथ्याज्ञाननिवृत्तिरिष्यते, "नान्यः पन्था विद्यते ऽयनाये"ति श्रुतेः । मास्तु तर्हि ग्रहनाश इत्यत आह । विमोहेति । ग्रहे सकारणे सति विमोहबुद्धेर्देहगेहादावहंममेत्याद्यभिनिवेशधियः सर्वानर्थबीजभूताया अनिवृत्तिः स्यादित्यनिर्मोक्षप्रसङ्ग इत्यर्थः । ननु भवतु ग्रहनाशान्मोहनाशो ग्रहनाश एव कुतो ब्रह्मात्मज्ञानादितिचेद्, न, ज्ञानादज्ञानस्यैव निवृत्तिसंभवाद्ग्रहं निवृत्तिकारणमन्यद्द्रेष्टव्यमित्याशङ्क्याज्ञानकार्यत्वाद्ग्रहस्य तन्निवृत्तौ स्वयमेव निवर्त्ततइति सदृष्टान्तमाह । ग्रहोपीति । अहेतुर्निरुपादानः उपादाननिवृत्तौ पुनः प्ररोहहेत्वभावात्परमां निरतिशयां शान्तिमुपशान्तिं मोक्षलक्षणां व्रजेदित्यर्थः ॥ २७ ॥

प्रकरणसमाप्तौ गुरुनमस्काररूपं मङ्गलमाचरति ।

(२८) विमथ्य वेदोदधितः समुद्धृतं
सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथा ऽमृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितं च यैः ॥ ६७३ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादपूज्यशिष्यस्य श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्ता ॥

विमथ्येति । यथा सुरैर्देवैर्महात्मभिर्महाब्धेः क्षीरसागरादमृतं समुद्धृतं पुरा पूर्वं तथा यैर्महात्मभिर्गुरुभिर्वेदरूपादुदधितो विमथ्यालोड्येदं प्रकरणरूपेण मया प्रकाशितं ज्ञानामृतं ज्ञानरूपममृतं समुद्धृतं पुरा पूर्व तथा यैः परमात्मतत्त्वं चेक्षितमपरोक्षीकृतं तेभ्यो गुरुभ्यो नम इति योजना । अथ वा यैर्गुरुभिर्निमित्तभूतैर्मया परं चेक्षितमिति योजना । "तस्मादात्मज्ञं ह्यर्चयेद् भूतिकाम"इति श्रुतेः ।

"निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूतयेद् यो ऽङ्घ्रिरेणुभिः" ॥

इति भगवद्वचनाच्च युक्तमत्र गुरुपूजनमित्यर्थः ॥ २८ ॥

उपदेशसहस्रीयं विवृता हि महात्मभिः ।
श्रद्धावेशाद् मया ऽप्यस्याः पदयोजनिका कृता ॥ १ ॥
समस्तवेदार्थरहस्यगद्य-
पद्यप्रबन्धार्थतया ऽवबोधः ।
कथं नु मादृङ्मतिर्बालिशतः स्या-
दथापि भक्त्या ऽहमिहास्मि नुन्नः ॥ २ ॥
हृद्यन्तराविष्कृतरामपूर्त-
स्त्या गुरूणां विपुलप्रसादात् ।
यथाकथं चिद् रचितेन विष्णु-
रनेन तुष्यत्वखिलान्तरात्मा ॥ ३ ॥

इति श्रीशंकराचार्यकृतोपदेशसहस्र्या व्याख्या कृष्णतीर्थशिष्यश्रीरामतीर्थविरचिता पदयोजनिकाख्या संपूर्णा ॥

॥ अथ बालभारतस्य विराटपर्वारम्भः ॥

॥ तत्र प्रथमः सर्गः ॥

कर्ता जगत्पापविषाहृतीनां
स्तात् स श्रिये सत्यवतीसुतो वः ।
जगच्चमत्कारकमुज्जगार
श्रीभारतं नाम सुधारसं यः ॥ १ ॥

पप्रच्छ पृथ्वीशमथो किरीटी-
कुर्वन् किरीटी करकुड्मलाग्रम् ।
छन्नः प्रभो[1] स्थास्यसि कैः प्रकारै-
रिहाब्दभारैर्नभसीव भानुः ॥ २ ॥

द्विजं सभास्तारमवेहि धर्म-
सुतस्य मां कङ्क इति प्रतीतम् ।
इत्युक्तिभाक् संसदि मत्स्यभर्तुः
स्थाताहमित्याह महीमहेन्द्रः ॥ ३ ॥

भीमोऽभ्यधादित्यथ वल्लवाख्यः
सूदो भविष्यामि नृपस्य तस्य ।
जयो जगौ राजसुतागुरुत्वं
नृत्ते गमिष्यामि बृहन्नलाख्यः ॥ ४ ॥

स्थास्यामि गोस्वामितयाथ तन्ति*-
पालाख्ययैवं सहदेव ऊचे ।
अश्वाधिभूर्ग्रन्थिकसंज्ञयेह
स्थाताहमित्थं नकुलोऽप्यवोचत् ॥ ५ ॥

उवाच कृष्णाप्यथ मालिनीति
सैरन्ध्यहं तव विराटपत्न्याः ।
ध्रुवं भविष्याम्यनवद्यकर्म-
कदम्बसंबद्धमिदं पदं हि ॥ ६ ॥

इत्थं मिथो मन्त्रकथेषु तेषु
मुनीन् विनम्याभ्युदितेषु गन्तुम् ।
धौम्यो धियां धाम सुधामयीभि-
रुवाच वाग्भिर्नयवागुराभिः ॥ ७ ॥

भवद्भिरुद्भिन्ननयैर्विधेया
ध्येयावधानैर्नरदेवसेवा ।
या मृत्यवे शैलशिरोऽधिरोह-
पद्येव सद्यः स्खलितक्रमाणाम् ॥ ८ ॥

अहो अहीनामपि खेलनेभ्यो
दुःखानि दूरं नृपसेवनानि ।
एकोऽहिना मृत्युमुपैति दष्टः
क्ष्मापेन दष्टस्तु सगोत्रमित्रः ॥ ९ ॥

आदौ मयैवायमदीपि नूनं
न तद्दहेन्मामवहेलितोऽपि ।
इति भ्रमादङ्गुलिपर्वणापि
स्पृश्येत नो दीप इवावनीपः ॥ १० ॥

सौरभ्यमेवाप्य सदाप्यहीना-
मानन्दनश्चन्दनपादपोऽभूत् ।
गुणेन केनापि न भूपतीनां
सदा मुदे कोऽपि कथंचन स्यात् ॥ ११ ॥

कुतोऽप्यनासादितजीवनस्य
संदेहदोलागतजीवितस्य ।
तृष्णातिरेकोत्तरलस्य कूप-
झम्पेव सेवा जगतीपतीनाम् ॥ १२ ॥

यद्ब्रूते भात्यशुभं शुभं वा
तदेव धूर्तः सततं प्रतन्वन् ।
स्पर्धाभिमानोज्झित एव सेवा-
फलं क्वचित् क्वापि लभेत किंचित् ॥ १३ ॥

इत्युक्तवानात्तदयोऽग्निहोत्री[1]
गुप्तं स पञ्चालपुरं प्रपेदे ।
नृपाज्ञया सौरिपुरीं स चेन्द्र-
सेनादिकः सर्वपरिच्छदोऽगात् ॥ १४ ॥

पङ्क्त्या पदानां द्रुतरक्तयाध्व-
महीषु पद्मप्रकरं किरन्तः ।
कृष्णां पुरस्कृत्य ययुर्विराट-
पुरीं स्वयं पाण्डुसुताः सुगुप्ताः ॥ १५ ॥

---

१ छन्नप्रभः इति पा॰ ।

* तन्तिर्नाम बलीवर्दा यस्यां दीर्घस्थूलरज्ज्वां वणिग्भि-रल्पैर्दामभिर्बध्यन्ते सा गूढाभिसंधौ तु तन्तिर्वाक् तत्पालः, युष्मद्वचनार्थानुष्ठातेत्यर्थः ।

१—सतदग्निहोत्रो इति पा॰ ।

विलम्बमानेन शवेन गुप्ता-
न्यमी शमीस्कन्धमनु श्मशाने ।
निधाय तान्यायुधमण्डलानि
च्युतांशुचण्डांशुतुलामवापुः ॥ १६ ॥

जयो जयन्तो विजयश्च पार्था
यमौ जयत्सेनजयद्बलाङ्कौ ।
इत्थं मिथःकल्पितगुप्तसंज्ञाः
पृथग्ययुस्ते परिगुप्तवेषाः ॥ १७ ॥

रुद्राक्षधारी धृतविप्ररूपः
कौन्तेयभूपः सदसि प्रविष्टः ।
कोऽसीति मत्स्यक्षितिपेन पृष्टो
वाग्भिः सुधास्रीवसुधाभिरूचे ॥ १८ ॥

विप्रः प्रियः सत्यसुतस्य कङ्का-
भिधः सभास्तार इति प्रतीतः ।
तद्राज्यविभ्रंशवशान्नृरत्न
जिजीविषुस्त्वामहमभ्युपेतः ॥ १९ ॥

हर्षादथादत्त गिरं विराट-
श्चिरान्मयादर्शि युधिष्ठिरोऽद्य ।
तन्मैत्र्यभावोचितचारुमूर्ति-
र्यद्दृश्यसे तस्य कृती वयस्यः ॥ २० ॥

इदं यथेन्दौ कुमुदं मुदं मे
चक्षुश्च चक्षुस्त्वयि संदधाति ।
ममापि तद्द्यूतसहायभूतः
खेलन् सुखं भुङ्क्ष्व विभूतिमेताम् ॥ २१ ॥

इति क्षितीन्द्रेण वितीर्णपूजे
तपस्तनूजे स्थितिभाजि तत्र ।
दर्वीखजाङ्कः* प्रययौ परेऽह्नि
सूदस्वरूपी बकसूदनोऽपि ॥ २२ ॥

स्वं बल्लवाख्यं स दिशन् नृपेण
सूदः कृतो बाहुबले च योधः ।
कृष्णाप्युपागत्य विराटपत्नीं
चकार सैरन्ध्र्यधिकारयाच्ञाम् ॥ २३ ॥

* खजा मन्थनदण्डः, खजा मन्थप्रहस्तयोरिति विश्वः ।

कृष्णां सुदेष्णाथ नृपस्य पत्नी
विलोक्य तां विस्मयिनी जगाद ।
इयं तनुस्तन्वि तवातिरम्या
सम्यङ्न सैरन्ध्र्यधिकारपात्रम् ॥ २४ ॥

भाग्यावधिर्विश्वविलोचनानां
निर्माणकर्मावधिरब्जयोनेः ।
इयत्यशेषोपमितीः प्रतीक-
प्रभाभिरेषा तव रूपरेखा ॥ २५ ॥

सामुद्रिकोक्तैरखिलैः प्रधान-
स्त्रीलक्षणैर्लक्षितमूर्तिमब्धिः ।
चक्रे खलु त्वां प्रतिकल्पलक्ष्मी-
शिल्पादनल्पाभ्यसनो मनोज्ञाम् ॥ २६ ॥

अल्पप्रभाणां प्रभवत्प्रभौघ-
मयोऽयमुच्चैर्मणिमण्डनानाम् ।
वदत्यलंकारमतस्तवालं-
कारस्तवानेव तवाङ्गमेतत् ॥ २७ ॥

त्वां वीक्ष्य पुंस्त्वं मनसा श्रयन्ति
स्त्रियोऽपि तद्ध्यानतयेव देवी ।
शक्तिः स्वयं विष्णुरभून्न लेभे
त्वद्भर्तृतां तु क्व नु भाग्यमीदृक् ॥ २८ ॥

न दासवृत्त्यै तव रूपमीदृ-
ग्रूपासि तन्नूनमनूनशीला ।
ततः कथं स्थास्यसि भर्तृहीना
श्रीमत्तमद्भर्तरि मद्गृहेऽस्मिन् ॥ २९ ॥

गन्धर्वदेवा नृपपत्नि पञ्च
रक्षन्त्यलक्ष्याः पतयोऽन्वहं माम् ।
क्लिश्नाति तत् कोऽपि न तेषु सत्सु
भास्वत्करेष्वम्बुजिनीमिवेन्दुः ॥ ३० ॥

इतीरितोक्तिं नरपालपत्नी
तां मालिनीति प्रथिताभिधानाम् ।
चकार गन्धाधिकृतां कृताङ्घ्रि-
प्रक्षालनोच्छिष्टनिषेधबन्धाम् ॥ ३१ ॥

युग्मम् ।

तत्रागतोऽन्येद्युरुदीर्णतन्ति-
पालाभिधानो नकुलाग्रजन्मा ।
परीक्ष्य दक्षो वृषलक्षणेषु
गोशीभुजाकारि वृषाधिकारी ॥ ३२ ॥

आबद्धवेणिर्धृतकञ्चुकः स्त्री-
जनोचितालंकरणः किरीटी ।
अन्येद्युराच्छाद्य किरीटमागा-
द्विराटसंसद्भुवि षण्डवेषः ॥ ३३ ॥

बृहन्नलास्मीति वदो द्युलोक-
गन्धर्वमैत्र्याप्ततदीयशिक्षः ।
मत्स्याधिनाथेन कृतः सुतायाः
संगीतशिक्षागुरुरुत्तरायाः ॥ ३४ ॥

समेत्य भूपं नकुलस्तुरंग-
कुलस्य तत्त्वे कलितावबोधः ।
अवाप वाहाधिकृतिं रथानां
बन्धे सुधीर्ग्रन्थिकनामधेयः ॥ ३५ ॥

इत्येषु गुप्तेषु सुखं स्थितेषु
गतेषु मासेषु चतुर्मितेषु ।
दिग्भ्योऽखिलाभ्यः पुरि तत्र यात्रा-
महोत्सवे मल्लभटाः समीयुः ॥ ३६ ॥

भटः प्रतापार्कयशःशशाङ्को
गुणौघनच्छपिधानहेतुः ।
जीमूत इत्यूर्जितगर्जितश्री-
र्मल्लाधिपस्तेषु समुल्ललास ॥ ३७ ॥

लीलासमुल्लङ्घितमल्लपङ्क्ति-
स्तस्य प्रतापैकनिधेर्न कश्चित् ।
रवेरिवास्तंगमितान्यतेज-
स्तते: पुरोऽभूत् प्रतिमल्लभूतः ॥ ३८ ॥

तस्मिन्नलङ्घ्यप्रधने मदेक-
धनेऽधिकं रङ्गति रङ्गभूमौ ।
भीमं ह्रियाचष्ट चिराद्विराटो
निधार्यतां वल्लव मल्लमल्लः ॥ ३९ ॥

इत्याज्ञया तस्य च कौतुकेश्च
दोर्दण्डकण्डूलतया च नुन्नः ।
विधोद्यदुत्साहरसः ससर्प
तद्दर्पमुच्छेत्तुमसौ पृथाभूः ॥ ४० ॥

भीमस्य दोःस्फालनजस्तदाभू-
न्नादो विदीर्णान्तरशैलशृङ्गः ।
किमत्र चित्रं यदभञ्जि तेन
जीमूतगर्वग्रहपर्वतोऽपि ॥ ४१ ॥

मल्लेन्द्रमुद्गर्जमथो सयुद्धं
प्रपात्य दोष्णेव ममर्द भीमः ।
दन्तोरुदन्तप्रहतिच्युतेन
महोपलेनेव महेभमद्रिः ॥ ४२ ॥

विद्रावयत्येव समानकालं
जीमूतजालं जनको यदीयः ।
स एकजीमूतजयस्तवेन
व्यलज्जि लोकैः पवनाङ्गजन्मा ॥ ४३ ॥

भीमं प्रति प्रीतिरसप्रसत्त्या
सुवर्णवृष्टिं नृपतिर्वितेने ।
को वेत्ति देवैस्त्रपया तदानीं
प्रसूनवृष्टिर्न कृता कृता वा ॥ ४४ ॥

गजाश्च सिंहाश्च युधे पुरोऽन्तः-
पुरस्य राज्ञा कुतुकान्नियुक्ताः ।
भीमे ययुर्भङ्गमुदर्णसिंह-
नादे दवार्चिर्निभनेत्रभासि ॥ ४५ ॥

इत्थं लसत्कौतुककौशलाभि-
र्लीलाभिरामोदयतां नरेन्द्रम् ।
मासा दशासन् कुरुकुञ्जराणां
तेषां विशेषार्चनहर्षितानाम् ॥ ४६ ॥

तत्र च पुरि सेनानी-
र्मत्स्यनृपालस्य बलनिधिः श्यालः ।
षष्ठ्युत्तरशतबन्धु-
ज्येष्ठोऽजनि कीचको नाम ॥ ४७ ॥

स कदाचिद्द्रुपदसुतां
ददर्श सदने स्वसुः सुदेष्णायाः ।
नियमितवेणीं मलयज-
लतिकामिव कलितकालाहिम् ॥ ४८ ॥

Digitized by Google

रूपं निरूप्य निरुपम-
मस्याः स्वशिरः प्रकम्पयांचक्रे ।
दुर्मदमदनप्रस्मर-
शरविसरैरुरसि विद्ध इव ॥ ४९ ॥

अनिमिषदृक् तां पश्यन्
स पञ्चबाणेन पञ्चभिर्बाणैः ।
एकैकेनेव हतो
हृदि तस्या हृद्गतैर्दयितैः ॥ ५० ॥

तस्या नवप्रवेशात्
तस्योरसि रतिरसः खलूद्भ्रान्तः ।
उल्लसति स्म स लोचन-
युगलीविगलितजलच्छलतः ॥ ५१ ॥

सुमुखी सुललितनयना
कोमलतरचरणाथाखिरिह केयम् ।
अलिमिव हृदयं भ्रमयति
मम अङ्गमकल्पवल्लिरिव ॥ ५२ ॥

इति पृष्ट्वैव सुदेष्णां
मुदितो विदितेन तत्स्वरूपेण ।
भृशमधिकाधिकविकसित-
रसरभसाकुलितहृदयोऽभूत् ॥ ५३ ॥
युग्मम् ।

अथ तेन द्रुपदसुता
जगदे जगदेकनयनपीयूषम् ।
परिकलितशीललीला
स्मरशिखिकीलाभितप्तेन ॥ ५४ ॥

इन्दुमुखी कुमुदाक्षी
रम्भोरुः कमलचारुकरचरणा ।
अमृतद्रवलावण्या
हृदयगता देवि किं दहसि ॥ ५५ ॥

त्वं कण्ठगा मुदेऽमी
ददति मृतिं त्वं च पञ्चशरविभवा ।
एते तृणं तदतुले
तुलयामि शुभे किमसुभिस्त्वाम् ॥ ५६ ॥

अयि दयिते हृदयस्य
द्वारे भवतीं विधातुमुत्कोऽस्मि ।
यदिहान्तरा चरन्ती
शल्यमिव व्यथयसि दृढं माम् ॥ ५७ ॥

यदि भुजयुगलेन दृढं
सुतनो न तनोषि मम तनौ बन्धम् ।
उत्कण्ठाभरपूर्णः
स्फुटितोऽस्मि तदूर्ध्वं शवायम् ॥ ५८ ॥

तदिह कुरु तरुणि करुणां
मदसुषु मदनाभितापितं भज माम् ।
रमणी रमणेन विना
न विभाति विभावरीव चन्द्रेण ॥ ५९ ॥

अथ रोषरूक्षपदमिति
वदति स्म द्रुपदनन्दिनी वचनम् ।
दुर्नयमधिरोहसि धी-
धिक् ते दशकन्धरस्येव ॥ ६० ॥

गन्धर्वास्त्रिदशेर-
प्यशमितगर्वा भवन्तमुद्भ्रान्तम् ।
मत्पतयो बत गुप्ता
नेष्यन्ते पञ्च पञ्चत्वम् ॥ ६१ ॥

अथ मन्मथविस्मरशर-
दूनमनस्त्वमुन्निबिडव्रीडः ।
सपदि सुदेष्णायै स
न्यवेदयत् तद्गतं भावम् ॥ ६२ ॥

मदनासहं सहोदर-
मवलोक्य ततोऽवदत् सुदेष्णा तम् ।
प्रेष्या महोत्सवमिषा-
न्मदिरार्थं मन्दिरमियं ते ॥ ६३ ॥

मधुमधुरवचनरचना
विविधवाग्भिस्तथैवमनुनेया ।
अलिनो नलिनीव यथा
सुमुखी विमुखी न ते भवति ॥ ६४ ॥

इत्येष सहोदरया
विहिताश्वासो ययौ निजावासम् ।
पशुरिव गुरुणा तरुणी-
रूपगुणेन प्रबद्धोऽपि ॥ ६५ ॥

तेन मनोऽतिमनोज्ञां
रमणीमभियोजितं ततो मनसा ।
साधु कृतमनेन कृतं
तस्य पुरस्तन्मयं भुवनम् ॥ ६६ ॥
शिशिरैः पदार्थविसरै-
र्हरो न तस्यावसाद शिशिरत्वम् ।
तस्योरसा रयात् पुन-
रासनशिशिराण्यशिशिराणि ॥ ६७ ॥
शिशिरोपचारतरलं
परिवारजनं जगाद स तदानीम् ।
मृदुमन्थरशिथिलोदित-
वर्णपदं समदमदनार्त्तः ॥ ६८ ॥
अन्तःपरितापभिदे
तथ्यं पथ्यं हि न बहिरुपचारः ।
अमृतमधुमधुरतदधर-
संमुखरसनौषधं कुरुत ॥ ६९ ॥
कदलीदलपटलमद-
श्चालयत कथं पटस्य पवनेन ।
वर्धेत दावपावक
इव हृदि ननु दीप इव विरहः ॥ ७० ॥
हृदि घृततत्कुचकलशे
स्मरशररन्ध्रेषु चञ्चलैः प्राणैः ।
ज्वलितवियोगानलजुषि
मलयजपङ्कोऽपि तापाय ॥ ७१ ॥
इति दीनतदीयवचः-
प्रचयविलीनावलेपदृढलेपाः ।
जलतरलकातरदृशोऽ-
भूवन्नवरोधसुदृशोऽपि ॥ ७२ ॥
परिवृढदृढविकलतया-
कुलितस्वान्तेन परिजनजनेन ।
दूती सपदि नियुक्ता
गत्वा निजगाद सैरन्ध्रीम् ॥ ७३ ॥
देवि यदादि विलोचन-
गोचरतां कीचकेन गमितासि ।
स तदादि हृच्छयशिली-
मुखविद्धाङ्गो विसंज्ञोऽभूत् ॥ ७४ ॥
स्मरशरभरपरिविद्धे
तितउतुलां सुदति तस्य हृदि याते ।
भवदाशाबद्धपथे-
र्न निर्गमोऽलाभि भृशमसुभिः ॥ ७५ ॥
अबलापि बलवती त्वं
यस्या भुजपञ्जरानुसरणरसः ।
विग्रहरिपुशूर्पकरिपु-
विशिखभयात् कीचकोऽप्यभवत् ॥ ७६ ॥
तव मुखमिति बत चुम्बति
कमलं चक्रौ कुचाविति स्पृशति ।
कर इति कुमुदं दत्ते
हृदि विकलः स किल वापीषु ॥ ७७ ॥
सैरन्ध्रीपदपदवीं
दवीयसीं सपदि देवि परिमुञ्च ।
नमतु पदाम्बुजयोस्तव
तदङ्गनावदनचन्द्रोऽपि ॥ ७८ ॥
परिरम्भदम्भनिभृतं
रचय प्रेमामृतं समं तेन ।
त्रुटदमलहारविगलित-
मुक्तामिषमुक्तबिन्दुचयम् ॥ ७९ ॥
किसलयकमलकुलैर-
प्यगलितमुरुमुरसि तस्य परितापम् ।
स्पर्शगुणेन हरन्ती
निरुपमपाणिर्न किं भवसि ॥ ८० ॥
अनुबन्धं रचय स्वय-
मयमर्थः सिद्धिमेष्यति मृगाक्षि ।
सोदरपरितापभिदे-
ऽभ्युदितसुदेष्णावचोभिरपि ॥ ८१ ॥
स्मरशरनिकरव्यतिकर-
ताडनपरिपीडितस्य तस्य भृशम् ।
यदि जीवितं भवत्कुच-
दुर्गमदुर्गाधिरोहेण ॥ ८२ ॥

* शूर्पकः कामरिपू राक्षसः ।

Digitized by Google

अमृदितमलयजरसमिव
राजतु तदुरो दृढेऽपि परिरम्भे ।
सुमुखि स्वेदलवार्दित-
विदलितनवहारचूर्णेन ॥ ८३ ॥
स्मरतापभेदनौषध-
पिण्डवदात्मीयकुचयुगं सुमुखि ।
तदुरसि बधान धन्ये
पृष्ठदृढग्रन्थिभुजपाशम् ॥ ८४ ॥
ईदृक्तापभयं परि-
रम्भेऽपि न सुभ्रु तस्य कर्तव्यम् ।
स प्रथमं त्वद्वेधा-
स्वेदजलैर्यास्यति जडत्वम् ॥ ८५ ॥
गणयिष्यति न सुदेष्णां
न महीपालं निषेधमपि न तव ।
अबले बलेन स बली
ग्रहीष्यति स्वयमिदं रचय ॥ ८६ ॥
हारं तदुरसि रसिके
परिरम्भनिषेधकं सखि द्वेषात् ।
अन्तःकठिनघनस्तन-
संरम्भेण स्वयं दलय ॥ ८७ ॥
कण्ठोपकण्ठमधुना
प्राणाः सुदति स्वयं समायाताः ।
अपि भवती कण्ठगता
प्राणसमा भवतु तस्य जवात् ॥ ८८ ॥
अन्तर्गतया तदुरः
पीडितमेव त्वयैव पूर्वमपि ।
अधुनापि पीनहृत्याद्
बहिर्गता पीडय न दोषः ॥ ८९ ॥
इति विरतायां तस्या-
मश्यामलचरितया तयोक्तमिदम् ।
दूति बिभेमि स भेद्यो
गन्धर्वैः पञ्चभिः पतिभिः ॥ ९० ॥
इत्यफलीकृतमस्या
वाचां पटलं तदेकवचनेन ।
मलिनतममममलहृचिना
गृहमणिना तिमिरजालमिव ॥ ९१ ॥
इति गतया दूतिकया
तस्या वचने यथातथं कथिते ।
नलिनतलिनस्थितोऽप्यय-
मतीव समवाप कीचकस्तापम् ॥ ९२ ॥
एह्येहि वल्लभे लघु
विनय कपोलाद् घनाञ्जनं बाष्पम् ।
इति स जगौ मृगलाञ्छन-
मागच्छन्मालिनीमुखभ्रान्त्या ॥ ९३ ॥
देववशेन स्वप्ने
सैरन्ध्रीमेकवेलयासाद्य ।
स मुहुर्मीलितनयनः
सुष्वाप प्राप न पुनस्ताम् ॥ ९४ ॥
धातस्तात तवासन-
सरोजसंकोचहेतुरयमिन्दुः ।
कुरु राहोर्वपुरखिलं
गिलितो न यथा पुनरुदेति ॥ ९५ ॥
शंकर किं करवाणि
त्वमेव देवः सदा मया महितः ।
वहसि किमु शिरसि चन्द्रं
न दहसि पुनरप्यमुं कामम् ॥ ९६ ॥
इति विकलवचनरचना-
परिचयविधुरीकृताखिलस्वजनः ।
गमयामास तमिस्रां
कष्टमसौ कल्पशतकल्पाम् ॥ ९७ ॥
विशेषकम् ।
मद्यकृते सच्छलया
तद्वत्सलया सुदेष्णया बलतः ।
सैरन्ध्री दुर्नयभय-
विहितनिषेधाप्यथ प्रहिता ॥ ९८ ॥
तरणिं विधाय शरणं
कीचकसदनाय तदनु यायाह्ने ।
कृष्णा चचाल तस्यां
रक्षायै राक्षसं व्यधादर्कः ॥ ९९ ॥

तस्या विलोक्य वदनं
भासां सदनं स चन्द्रबिम्बमिव ।
उद्भ्रान्तो जलधिरिव
द्विगुणोच्छलदच्छहर्षोर्मिः ॥ १०० ॥

रोमाञ्चद्विगुणतरौ
तरसा बाहू तदा तदीयौ तौ ।
अदलयतां केयूरे
किल दयिताश्लेषविघ्नभयात् ॥ १०१ ॥

तामवदन्मदनार्तः
स सतीं क्षितिवलयमिलितनयनयुगाम् ।
सुमुखि समेहि समेहि
त्यज लज्जां रचय[1] परिरम्भम् ॥ १०२ ॥

अयमहमियं च संपत्
परिजनजनतेयमेतदपि सदनम् ।
उररीकुरु सकलमदः
कलमदशीलो भवामि यथा ॥ १०३ ॥

इति निगदन्तमनन्तर-
मवलोक्य समुत्सुकं प्रसह्याय ।
मणिभूषणकपिशतरं
शीललतादवमसौ मेने ॥ १०४ ॥

दुरितद्विरदोन्मूलित-
मिव कीचकमंशुकातिकर्षेण ।
तं भुवि परिणात्य ययौ
राजनिकेताजिरं कृष्णा ॥ १०५ ॥

अभिसृत्य कामकोप-
द्विगुणिततापः कचैरथाकृष्य ।
द्रुपदात्मजां पदासौ
श्रियमिव मूर्ध्ना जघान स्वाम् ॥ १०६ ॥

द्रुपदसुतादेहादथ
रक्षारक्षस्तदाशु निर्गत्य ।
दुरितमिव तस्य मूर्ते
गतचेष्टमपातयद्भुवि तम् ॥ १०७ ॥

१ सुमुखि समेहि परित्यज लज्जां रचयस्व इति पा० ।

इति नृपतिसभायां भीमसेनोऽथ तिष्ठन्
परिभवमवलोक्य स्वप्रियायाः प्रवीरः ।
शमितसमयरोधो बोधयन् क्रोधबाहुं
लघु सुकृतसुतेनारोधि संज्ञाश्रयासौ ॥ १०८ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के विराटपर्वणि पाण्डवगुप्तिर्नाम प्रथमः सर्गः ॥ १ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

स पराशरनन्दनो मुदे
रिपुनारीनयनाञ्जनाशनैः ।
असिभिर्व्रततीव्रताजिते-
रिव यः कान्तिमिषान्निषेव्यते ॥ १ ॥

अथ पाण्डवजीवितेश्वरी
द्रुतमुत्थाय कृतातुरस्वरा ।
रजसा वृतविग्रहा ययौ
जगतीपालसभां सवल्लभाम् ॥ २ ॥

विकटाक्षिकटाक्षितानिलिः
करुणक्रोधगिराच सा जगौ ।
नयमद्य विलोकयामि ते
प्रहतां पश्यसि मत्स्यराज माम् ॥ ३ ॥

युवयोः कलहो रहोऽभवद्
वद किंकारण एष मालिनि ।
इति जल्पति मत्स्यभूपतौ
पुनरप्यादित पार्षती गिरम् ॥ ४ ॥

सुररूपिषु वल्लभेषु मे
जगतामप्रकटेषु पञ्चसु ।
न महान् यदि जायते शमी
बलवान् कः कुरुते तदीदृशम् ॥ ५ ॥

युधि भीम जयन्तमुत्कटं
दयित त्वां कथयन्ति बान्धवाः ।
अवगण्य गुरोर्गिरं रया-
दहितं संहर मद्विडम्बिनम् ॥ ६ ॥

Digitized by Google

इति तामतिकोपसंभ्रम-
स्फुटगुप्ताक्षरभाषिणीं बलात् ।
निजगाद युधिष्ठिरो गिरा
विकसत्कृत्रिमरोषरूक्षया ॥ ७ ॥

यदि ते विदितः प्रभावभाग्-
युधि भीमः पतिरस्ति कश्चन ।
परिपूरयतात् स ते स्पृहां
व्रज विघ्नीभव मा दुरोदरे ॥ ८ ॥

इति धार्मिगिरा चिरादगा-
द्दधती मन्युभरं कुरङ्गदृक् ।
अभि भूपतिवल्लभामथा-
कथयत् कीचकदुष्टचेष्टितम् ॥ ९ ॥

परपूरुषपाणिदूषिते
समभिक्षाल्य जलेन वाससी ।
जनितस्नपना च सागमन्-
निशि किर्मीरहरं महानसे ॥ १० ॥

स महानसवेदिकातले
नवनिद्रापरिमुद्रितेक्षणः ।
हृदये लुठनं दधानया
परिरब्धो हृदयेश्वरस्तया ॥ ११ ॥

तदनिद्रविलोचनः प्रिया-
मवलोक्य स्वयमागतां चिरात् ।
भुजयुग्मनिपीडनच्युता-
न्तरदुःखव्यसनां चकार सः ॥ १२ ॥

अथ दुःखजबाष्पगद्गदी-
कृतकण्ठस्फुरदस्फुटाक्षरम् ।
द्रुपदक्षितिपालनन्दिनी
प्रतिवक्ति स्म जटासुरद्विषम् ॥ १३ ॥

यदुपेक्षितवान् पुरा भवा-
नपि दुःशासनमुग्रशासनः ।
इति पश्यतु गन्धकारिका-
पदसंकीर्णकिणौ करौ मम ॥ १४ ॥

अधुनापि चकर्ष कीचकः
कचपाशं निजघान च क्रमैः ।
द्रुतमप्रतिकुर्वतोऽयतः
किमुरोऽपि स्फुटितं न ते पते ॥ १५ ॥

इति वल्लभया स भाषितः
स्मृतबन्धुव्रजदुःखकम्पितः ।
निजगाद तदा विनिश्वसन्
भुजयोरक्षियुगं मुहुः क्षिपन् ॥ १६ ॥

हृदयेश्वरि धर्मजन्मनः
शममन्त्रेण दृढं नियन्त्रिताः ।
उपलक्षिदया इवास्त्रिणोऽ-
प्यभिभूतौ किमु कुर्महे वयम् ॥ १७ ॥

सह तेन विलाससंविदं
कुरु मिथ्या निशि नृत्तमण्डपे ।
कमलाक्षि यथा क्षिपामि तं
यमवक्त्रे परिपिण्डितं बलात् ॥ १८ ॥

इति भीमवचःसुधाचय-
च्युतदुःखौघविषा मखाङ्गभूः ।
द्रुतमाट विराटवल्लभा-
भवनं गुप्तगतागतिर्मुदा ॥ १९ ॥

अपरेद्युरुपागतं गृहं
रहसि स्नेहपरेव कीचकम् ।
वचनैर्मधुवादसादरै-
र्निजगाद द्रुपदस्य नन्दिनी ॥ २० ॥

सजने सुभग त्वया कथं
पृथिवीमन्मथ भाषिता तथा ।
विजने निशि नृत्तमण्डपे
समुपेतव्यमहो मदिच्छया ॥ २१ ॥

इति तद्वचनैर्मुदं वह-
न्निदमूचे नरपालश्यालकः ।
स्वपदागतसुस्थजीवित-
स्फुटकण्ठास्खलदक्षरोदयम् ॥ २२ ॥

सुकृतैः समवाधि मामकै-
र्विनिपेते द्रुतमद्य पातकैः ।
तृणितत्रिजगत्प्रभुत्वया
स्मितया मां यदवेक्षसे दृशा ॥ २३ ॥

BIBLIOTHECA REGIA MONACENSIS

Digitized by Google

मदिराक्षि मदङ्गसंगम-
भ्रमविभ्राजितशुभ्रकान्तिनोः ।
तव लोचनयोः पयोरुहां
ततिमुत्तारणकं करोमि किम् ॥ २४ ॥
नयनप्रतिमा सरोरुहं
वदनस्य प्रतिहस्तकः शशी ।
चलचारुचकोरलोचने
वरमेकं तव वर्णयामि किम् ॥ २५ ॥
अयमद्य सुधासहोदरः
सुमुखि त्वन्मुखचन्द्रमा वदन् ।
अभवद्विषसोदरोऽपि यः
किमपि ह्यस्तनवासरे ह हा ॥ २६ ॥
सफलं मम जन्म जीवितं
विभुतारूपमदो मदोऽप्यभूत् ।
अमृतप्रतिवन्मयि त्वया
वचनं लोचनमप्यरोचि यत् ॥ २७ ॥
हृदयं विचकास नेशिवान्
परितापः प्रससार संमदः ।
परिरम्भगिरापि ते ततः
परिरम्भे किमहो भविष्यति ॥ २८ ॥
स्फुटितेव कृतार्थिता मिथो
मनसोर्मेलनखेलनेन नौ ।
स भविष्यति कीदृशः क्षणः
खलु सा यत्र शरीरयोरपि ॥ २९ ॥
इति स प्रलपन् घनं तया
प्रहितो लोचनलोलनश्रिया ।
दृढतद्गुणबद्धमानसः
शनकैर्धाम जगाम कीचकः ॥ ३० ॥
प्रहरे प्रथमेऽपि मूढधी-
र्व्ययमह्नः स मुहुः स्म पृच्छति ।
वचनैर्गृहकेलिदीर्घिका-
श्रयकोकद्वयशोककारिभिः ॥ ३१ ॥
निशि तस्य मृतिं विचिन्तयन्
कृपया नूनमहो दिवाकरः ।
अकरोद्दिवसं गुरुं हृदा
विकृपं तं स तु मन्यते स्म हा ॥ ३२ ॥
समदावसरेण मृत्युना
खलु तस्य प्रसभं नभोऽन्तरात् ।
हृदिनीहृदयाधिपान्तरे
पतिरह्नां परिपातितस्ततः ॥ ३३ ॥
न विधेयमतः परं मये-
त्यतुलं भूषणमेव तन्वतः ।
सह तस्य मुदा स्म वर्धते
रजनी चन्द्रमरीचिनिर्मला ॥ ३४ ॥
दयितावचने रणक्रिया-
गमभीमस्थितिभीमकोटरम् ।
निशि यामयुगक्षणे यया-
वथ संकेतनिकेतनं प्रति ॥ ३५ ॥
पथि दुःशकुना न तेन ते
गणिता नूनमसंख्यतां गताः ।
श्रुतमाप्रभुजंगसंपदा
मदनान्धेन वचः सतां न च ॥ ३६ ॥
परिवारजनं विसर्जयन्
दृढमौत्सुक्यपरिस्खलत्पदः ।
प्रविवेश स रङ्गमण्डपं
क्व मृगाक्षि त्वमसीति भाषकः ॥ ३७ ॥
अयमन्ध इवाग्रपाणिना
तमभिस्पृश्य बकान्तकं जगौ ।
न मया कमलाक्षि मण्डनं
विदधे तादृशमुत्सुकात्मना ॥ ३८ ॥
मदशाग्निमनोलयात् प्रिये
परुषं स्पर्शगुणं गताक्षि किम् ।
रणदारुणवैरिदारण-
क्षणकष्टैः कठिनं हि मद्वपुः ॥ ३९ ॥
दयिताभिभवेन सौरभे-
र्दयिताभोगकृते धृतेरपि ।
प्रधनप्रथया च पावने-
स्त्रिगुणं कोपशिखी तदाज्वलत् ॥ ४० ॥

Digitized by Google

ददृशे तव रूपमद्भुतं
विभुताबोधि मृधं प्रकाशय ।
इति मन्दमथालपन्मरु-
तनुभूर्न्यस्य तदंसयोर्भुजम् ॥ ४१ ॥
पदपातविकम्पितक्षितिः
करघातध्वनदम्बरस्ततः ।
चकितखगदाचरः परः
समरस्तत्र तयोरजायत ॥ ४२ ॥
अथ भीमभुजामहार्गल-
प्रबलाघातचयेन कीचकः ।
रुधिरं वमति स्म हृद्गत-
क्रतुपुत्रीनिविडानुरागवत् ॥ ४३ ॥
अखिलैरपि कीचकाङ्गकैः
समरे भीमकरैरितैर्द्रुतम् ।
हृदि यातमहो बहिः प्रिया-
मनवाप्तां समवाप्तुमुत्सुकैः ॥ ४४ ॥
सुरभीरुविलासविस्मृत-
द्रुपदापत्यरसेऽथ कीचके ।
दयितामभिभाष्य मारुति-
र्मुदितोऽयेत महानसं गतः ॥ ४५ ॥
तदनु प्रहतं प्रहर्षित-
क्रतुजादिष्टमवेत्य कीचकम् ।
अजनिष्ट जनोऽखिलः खलू-
दितविश्वासविषादविस्मयः ॥ ४६ ॥
अथ तत्र समं सुदेष्णया
सुदृशस्तस्य सहोदराश्च ते ।
कृतहाकृतिदुःसहस्वनाः
सहसा नृत्तनिकेतने ययुः ॥ ४७ ॥
प्रतिशब्दमिषेण देहिनां
निविडाक्रन्दभृतां पदे पदे ।
अपि कुट्टिमकेलिपर्वत-
त्रिदशावासभरैररुद्यत ॥ ४८ ॥
विजयिन् बलिनः सुधर्मणः
स्मरवीरप्रतिवीरविग्रह ।
अनिमेषकरालचोचनाः
सुरनार्यः स्वदिताः किमद्य ते ॥ ४९ ॥
हरिणा स्वयमर्थितो यदि
प्रिय जेतुं दिवि दानवान् भवान् ।
अवचः परिभाषणो यथा-
वपरीरम्भभरोऽपि नः कथम् ॥ ५० ॥
विलसन्तमनङ्गमङ्गिनं
सुदृशस्त्वामिह मेनिरे भुवि ।
अधुना तपसार्जितं प्रिय
क्व वधूस्तादृशमेव मन्यताम् ॥ ५१ ॥
कृतमेतदहो द्युवासिनां
मनसा सिद्धिमुपैति वाञ्छितम् ।
सुरभीरुभिरन्यथा कथं
त्वमकस्मात् परिरभ्यसेऽधिप ॥ ५२ ॥
अनिमेषविलोचनासु चेत्
तव रागः सुरकामिनीष्विह ।
द्रुतमेहि महाशय स्वयं
न निमेषो नयनेषु नः शुचा ॥ ५३ ॥
इति तस्य नितम्बिनीजन-
प्रबलाक्रन्दितगाढदुःखतः ।
स्फुटति स्म किल द्विधा नभः
ककुभो भङ्गमिवाययुस्तदा ॥ ५४ ॥
उपरि स्फुरितस्य दुःखिनः
स्वजनस्य स्वयमश्रुवारिभिः ।
तमपस्नपयद्भिरेव तैः
ततजं क्षालितमत्र मण्डपे ॥ ५५ ॥
रुधिरेऽधिकपङ्क्ते कीचकाः
शतमस्याग्निहुतौ ततो मतिम् ।
पुरतोऽङ्गुलिगुप्तनासिकां
ददृशुस्तं च शुचं च मालिनीम् ॥ ५६ ॥
अभिघात्य निजैः प्रियैरमुं
मुदिता द्रष्टुमिहैयमाययौ ।
इति रोषरसेन कीचका
दहने दग्धुमिमां समाकृषन् ॥ ५७ ॥

Digitized by Google

समनायि ततोऽयतश्चितां
रुदितोद्गर्जनशोकसागरैः ।
निगदन्त्यपि गुप्तनामभिः
स्वपतीन् सा रुदती च कीचकैः ॥ ५८ ॥

द्रुतलङ्घितवप्रमण्डलः
करशस्त्रीकृतमार्गपादपः ।
पदधूतरजोमये तम-
स्यथ भीमस्तदिलातलं ययौ ॥ ५९ ॥

तमवेत्य कृतान्तभीषणं
गुरुगन्धर्वभियोऽथ कीचकाः ।
मुमुचुः सह जीविताशया
द्रुतमेव द्रुपदस्य नन्दिनीम् ॥ ६० ॥

प्रणिहत्य हठेन कीचकान्
सदृशव्याममितेन शाखिना ।
तनयः पवनस्य वल्लभा-
मथ संभाष्य यथागतं गतः ॥ ६१ ॥

विज्ञाय गन्धर्वहतान् नृपस्तान्
नोवाच किंचिच्चकितः स्वयं ताम् ।
सुदेष्णाया भूपगिरा तु गेहा-
न्निर्वास्यमानेयमिदं जगाद ॥ ६२ ॥

क्ष्मानाथः क्षमतां त्रयोदशदिनीं देवि प्रवीरास्तदा
भर्तारः स्वपदान्यवाप्य मुदिता नेष्यन्ति मामुत्सुकाः ।
तैर्युक्तश्च जवादवाप्स्यति जयं राजा विराटोऽप्ययं
तद्भीरेव भवेति तद्वचसि सा तूष्णीं सुदेष्णा स्थिता ॥ ६३ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के विराटपर्वणि कीचकवधो नाम द्वितीयः सर्गः ॥ २ ॥ :: ::

॥ खण्डप्रशस्तिः ॥

॥ तिलकयुता ॥

॥ अथ वराहावतारवर्णनम् ॥

(१७) न पङ्कैरालेपं कलयति धरित्रीव्ययभया-
न्न मुस्तामादत्तेऽप्युरगनगरभ्रंशभयतः ।
न धत्ते ब्रह्माण्डस्फुटनसघृणो घर्घररवं
महाक्रोडः पायादिति सकलसङ्कोचितमुखः ॥

महांश्चासौ क्रोडश्च महाक्रोडः "आन्महत इत्यात्वम्,, पायाद्रक्षतु, इति हेतोः, सकलसङ्कोचितमुखः सकलात्समस्तात्कृत्यात्सङ्कोचितं पराक् कृतं मुखं येन, सः, इतीति किम्, यो धरित्रीव्ययभयाद् भूविनाशभयात् पङ्कैः कर्दमैः आलेपं विलेपं न कलयति न कुरुते, यद्यहं धरित्र्यां सामुद्रे पङ्के लुठिष्यामि तदेयं भूर्मद्रुपुष्पेव विलयं यास्यतीति विचार्य कृपया न यः पङ्कालेपं तनुत इति, तथा यो मुस्तां नादत्ते न गृह्णाति, अपिशब्दो निश्चये, कस्मात्, उरगनगरभ्रंशभयतः चेदहं भुवो मुस्तामुत्खनिष्यामि तदा पन्नगनगरोत्खननमपि भविष्यतीति विमृश्य न तामदात्, तथा यो घर्घररवं घर्घरशब्दं न धत्ते, कीदृशः, ब्रह्माण्डस्फुटनसघृणः ब्रह्माण्डस्य यत् स्फुटनं तत्र सघृणः स दयः यद्यहमन्यवराहवद् घर्घररवं विधास्ये तदा ब्रह्माण्डस्फोटो भविष्यतीति, अतएव विश्वस्योपरि दयासत्त्वादितरदपि वराहचरितं तावन्नादृतवानिति ॥ १७ ॥

(१८) पातु त्रीणि जगन्ति सन्ततमकूपारात्समभ्युद्धरन्
धात्रीं कोलकलेवरः स भगवान्यस्यैकदंष्ट्राङ्कुरे ।
कूर्मः कन्दति नालति द्विरसनः पत्रन्ति दिग्दन्तिनो
मेरुः कोशति मेदिनी जलजति व्योमापि रोलम्बति ॥

कोलकलेवरो वराहावतारः स भगवांस्त्रीणि जगन्ति भूर्भुवस्स्वर्लक्षणानि सन्ततं निरन्तरं पातु, किं कुर्वन्, धात्रीं भुवमकूपारात्समुद्रात्समभ्युद्धरन्, स इति कः, यस्य क्रोडस्य एकदंष्ट्राङ्कुरे एकोऽद्वितीयो दंष्ट्राङ्कुरो दंष्ट्रैवाङ्कुरो दंष्ट्राङ्कुरस्तस्मिन्, कूर्मः कन्दति कन्दइवाचरति कन्दति, कूर्मस्य सकलभूभारोद्धारकत्वादधःस्थित्याङ्कुरंप्रति कन्दकल्पना घटत इति, तथा यस्य दंष्ट्राङ्कुरे द्विरसनः द्वे रसने जिह्वे यस्य स द्विरसनः सामान्यतः सर्पवाच्ययमत्र प्रकरणाच्छेषाहेर्वाचकः स नालति नालमिवाचरति नालति, तथैव यस्य दंष्ट्राङ्कुरे दिग्दन्तिनो दिग्दन्ताः पत्रन्ति पत्राणी वाचरन्ति पत्रन्ति, तथा तत्रैव मेरुः कनकाचलः कोशति कोशः कोरकः स इवाचरति कोशति, तथा तत्रैव मेदिनी जलजति जलजं कमलं तदिवाचरति जलजति, तथा यस्य दंष्ट्राङ्कुरे व्योमाप्याकाशमपि रोलम्बति रोलम्बो भ्रमरः स इवाचरति रोलम्बतीति, अत्र कन्दतीत्यादिषु सर्वत्र सर्वप्रातिपदिकेभ्यः क्विबिति क्विपि तस्य लोपो ध्येयः ॥ १८ ॥

(१९) पातु श्रीस्तनपत्रभङ्गिमकरीमुद्राङ्कितोरःस्थलो
देवो वः स जगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः ।
क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू-
र्भाति स्म प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः ॥

स देवो जगतां पतिर्जगत्पतिर्विष्णुर्वा युष्मान्पातु रक्षतु, कीदृशः, श्रीस्तनपत्रभङ्गिमकरीमुद्राङ्कितोरःस्थलः श्रिया लक्ष्म्या ये स्तने कुचौ तयोर्याः पत्रभङ्ग्यः पत्रलताः कस्तूरिकाविरचितास्तासु या मकर्यस्तासां मुद्रया प्रतिबिम्बेनाङ्कितं चिह्नितमुरःस्थलं हृदयस्थलं यस्य सः यदा हरिणा श्रीःसमालिङ्गिता तदा तत्स्तनाश्लेषे तद्गतमृगमदपत्रलतामकर्यः उरःस्थले प्रतिबिम्बिता इति भावः, पुनः कीदृशः, मधुवधूवक्त्राब्जचन्द्रोदयः मधोर्मधुनाम्नो दैत्यस्य या वध्वो ललनास्तासां यानि वक्त्राब्जानि मुखकमलानि तत्र चन्द्रोदय इव चन्द्रोद्गमइव यः सः, यथा चन्द्रोदयेऽब्जानि सङ्कोचमाप्नुवन्ति तथा हरेरुदयात्तद्वधूवक्त्राम्भोरुहाणि निःश्रीकाण्यभवन्निति भावः, स इति कः, यस्य क्रीडाक्रोडतनोः क्रीडया लीलया धृता क्रोडाकारा तनुः शरीरं येन सः तस्य लीलासूकररूपस्य दंष्ट्राङ्कुरे भूर्भूमिः प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः प्रलयाब्धिरेव पल्वलतलमल्पसरोऽधोभागस्तस्मादुत्खाता उत्पाटिता एका अद्वितीया मुस्ताकारा भाति स्म शुशुभे, किंविशिष्टे दंष्ट्राङ्कुरे, नवेन्दुविशदे नवेन्दुवद्बालचन्द्रवद्विशदे निर्मले अर्धचन्द्राकारत्वात्तद्दंष्ट्राया इति ॥ १९ ॥

(२०) निःकन्दामरविन्दिनीं स्थपुटितोद्देशां कसेरुस्थलीं
जम्बालाविलमम्बु कर्तुमितरा सूते वराही सुतान् ।
दंष्ट्रायां प्रलयार्णवोर्मिसलिलैराप्लावितायामियं
यस्या एव शिशोः स्थिता विपदि भूः सा पुत्रिणी पोत्रिणी ॥

सा पोत्रिणी वराही पुत्रिणी पुत्रोऽस्यास्तीति पुत्रिणी पुत्रवतीत्यर्थः पोत्रं वराहमुखाग्रं तदस्या अस्तीति पोत्रिणीति, अथ कथमियमेव पुत्रिणीत्याह, यस्या एव वराह्याः शिशोर्बालकस्य दंष्ट्रायां विपदि प्रलयकाले भूर्वसुमती स्थिता, अन्यथा प्रलयार्णवकल्लोलैर्भूः पातालमगमिष्यद्वयं स्वदंष्ट्रायां नाधारयिष्यत्, अत एव महापदि येन भूर्धृता, बालकेनाप्येतावद्भारोद्वहनं कृतमितिमहच्चित्रम्, किंविशिष्टायां तस्यां, प्रलयार्णवोर्मिसलिलैराप्लावितायां प्रलयार्णवस्योर्मयः कल्लोलास्तेषां यानि सलिलानि तैराप्लावितायां, स्नानं सवनमाप्लव इति हेमकोशः, अथान्यवराहीसुतानामसत्कृत्य समुद्भावनेनेतरस्यैव विशेषं द्योतयन्नाह, इतरा अन्या, वराही सुतान् सूते जनयति, किं कर्तुम्, अरविन्दिनीमम्भोजिनीं, निःकन्दां समूलोन्मूलितकन्दां कर्तुं, तथा कसेरुस्थलीं कन्दविशेषवतीं, स्थपुटितोद्देशांस्थपुटत्वं विषमोन्नतत्वं विद्यते येषु तेस्थपुटिताः, अत्र भावप्रधानो निर्देशो द्व्येकयोरितिवत्, ईदृग्विधा उद्देशा यस्याः सा तां विषमोन्नतां भूमिं विधातुमित्यर्थः, तथा अम्बु पानीयं जम्बालाविलं जम्बालेन पङ्केनाविलं कलुषं कर्तुं यतोऽन्वहं सरसि मज्जनमेव कुर्वते क्रोडा इति तेषां स्वभाव इति, दंष्ट्रायां पुनरर्णवोर्मिसलिलैरिति वा पाठस्तत्र पुनःशब्दो विशेषार्थे शेषं तथैवेति ॥ २० ॥

(२१) दृप्यद्दैत्यनितम्बिनीजनमनः सन्तोषसङ्कोचनः
कुर्याद्विश्वमनीश्वरं स भगवान्क्रोडावतारो हरिः ।
यद्दंष्ट्राङ्कुरकोटिकोटरकुटीकोणान्तरस्थेयसी
पृथ्वी भात्यवदातकेतकदलालीनेव भृङ्गाङ्गना ॥

स भगवान्क्रोडावतारो हरिर्विश्वं जगत् अनीश्वरं न विद्यते ईश्वरः स्वामी यस्य तादृशं कुर्यात् सर्वेषामपि जगज्जन्तूनां स्वतः स्वामित्वं विदध्यात् न कस्यचित्कश्चिदनुचरः स्यादिति भावः, अनश्वरमिति पाठेत्वनश्वरमक्षयि विश्वं कुर्यादित्यर्थः, किंविशिष्टः, सः, दृप्यद्दैत्यनितम्बिनीजनमनः संतोषसंकोचनः दृप्यन्यौवनमदोत्कटो यो दैत्यनितम्बिनीजनस्तस्य यो मनःसंतोषश्चित्ताल्हादस्तं संकोचयतीतितथाभूतः, स इति कः, यद्दंष्ट्राङ्कुरकोटिकोटरकुटीकोणान्तरस्थेयसी यस्य क्रोडस्य यो दंष्ट्राङ्कुरस्तस्य या कोटिरग्रं सैव कोटरकुटी निष्कुहभवनं तस्या यत्कोणान्तरं गृहैकदेशान्तरालं तस्मिन्स्थेयसी अतिशयेन स्थिरा स्थेयसी ईयसि प्रियस्थिरेतिस्थादेशः, पृथ्वी अवदातकेतकदलालीना अवदातमुज्वलं यत्केतकस्य दलं पत्रं तस्मिन्नालीना श्रिता भृङ्गाङ्गनेव भृङ्गीव नातिशोभते, तद्दंष्ट्राङ्कुरस्य श्वेतत्वात्केतकदलसदृशत्त्वं तत्र स्थितायाः पृथ्व्या भृङ्गाङ्गनासमानत्वमिति भावः ॥ २१ ॥

(२२) लीने श्वोत्रैकदेशे नभसि नयनयोस्तेजसि क्वापि नष्टे
श्वासग्रासोपभुक्ते मरुति जलनिधौ पादरन्ध्रार्धपीते ।
पोत्रप्रान्तैकरोमान्तरविवरगतां मार्गतश्चक्रपाणेः
क्रोडाकारस्य पृथ्वीमकलितविभवं वैभवं वः पुनातु ॥

क्रोडाकारस्य चक्रपाणेर्विष्णोरकलितविभवमनवगतसमृद्धिं वैभवं विभुत्त्वं वो युष्मान्पुनातु पवित्रयतु, तदेव भगवतो विभुत्वमभिव्यनक्ति, किंविशिष्टस्य तस्य, पोत्रप्रान्तैकरोमान्तरविवरगतां विष्णोः पोत्रप्रान्ते वराहमुखाग्रे यदेकरोमान्तरं लोमान्तरालं तद्विवरगतां तद्रन्ध्रान्तः प्राप्तां पृथ्वीं मार्गतः अवलोकयतः गवेषयत इति यावत् मार्गअन्वेषणे, कदा गवेषणमित्याह, नभस्याकाशे श्वोत्रैकदेशे लीने प्रविष्टे सति, तथा तेजसि सूर्याचन्द्रमसोरतिशेषः नयनयोर्विषये क्वापि नष्टे सति, तथा महति वायौ श्वासग्रासोपभुक्ते श्वासग्रासः श्वासग्रहणं तेनोपभुक्तस्तस्मिन्सति, तथा जलनिधौ समुद्रे

Digitized by Google

पादरन्ध्रार्धपीते पादरन्ध्रं पादविवरं तदर्धेन पीतस्तस्मिन्सति, एवं पञ्चापि महाभूतानि वपुष्येव लीनानि एतावता तद्देहस्यातिगुरुत्वं निवेदितम् ॥ २२ ॥

(२३) अष्टौ यस्य दिशो दलानि विपुलः कोशः सुवर्णाचलः
कान्तं केसरजालमर्ककिरणा भृङ्गाः पयोदावली ।
नालं शेषमहोरगः प्रविततं वारांनिधेर्लीलया
तद्वः पातु समुद्धरन्कुवलयं क्रोडाकृतिः केशवः ॥

वारांनिधेः समुद्रात्तत्कुवलयं पृथ्वीमण्डलं पक्षे नलिनं समुद्धरन्क्रोडाकृतिः केशवो वो युष्मान्पातु, किंविशिष्टं तत्, प्रविततं विस्तीर्णं, अथ भूमण्डले नलिनतौल्यं समुद्भावयति तदिति, यस्य कुवलयस्याष्टदिशो दलानि पत्राणि वर्त्तन्ते नलिनदलवत्, तथा सुवर्णाचलो मेरुर्यस्य विपुलो विस्तीर्णः कोशः कोरकः, तथा यस्य कुवलयस्यार्ककिरणाः सौराः किरणाः कान्तं मनोज्ञं केसरजालं परागवृन्दमभूत्, तथा यस्य पयोदावली मेघश्रेणिः भृङ्गा अभूवन् मेघानां कृष्णत्वाद् भृङ्गसाम्यम्, तथा शेषमहोरगः शेषनागो यस्य नालमभूत्, यतः कुवलये नालेन भाव्यं तथैतस्यापीति भावः ॥ २३ ॥

(२४) बिभ्राणोऽभिनवेन्दुकोटिकुटिलं दंष्ट्राङ्कुरं लीलया
क्रोडाकारधरो हरिः स भगवान्भूयाद्विभूतिप्रदः ।
यस्योत्क्षिप्तवतः क्षमाकमलिनीमालम्बमानः क्षणं
लोलद्वालमृणालनालतुलनां भेजे भुजङ्गेश्वरः ॥

स भगवान्क्रोडाकारधरो हरिर्विभूतिप्रदः श्रीदायको भूयात्, किंकुर्वाणः, लीलया क्रीडया अभिनवेन्दुकोटिकुटिलं अभिनवो य इन्दुस्तस्य या कोटिरग्रं तस्यातीववक्रत्वात्तद्वत्कुटिलं दंष्ट्राङ्कुरं बिभ्राणो धारयन्, किं च, यस्य क्रोडाकारस्य विष्णोः क्षमाकमलिनीं पृथ्वीसरोजिनीमुत्क्षिप्तवत उत्पाटितवतः सतः क्षणं यावदालम्बमान आसमन्ताल्लम्बमान उपनमन्सन् भुजङ्गेश्वरः शेषाहिः लोलद्वालमृणालनालतुलनां साम्यं भेजे इति, ॥ २४ ॥

(२५) मुक्तैर्यास्यति कुत्रचिद्वसुमती दंष्ट्राङ्कुरस्थेयसी
कुक्षौ क्षोभमवाप्स्यति त्रिभुवनं रुद्धैरमीभिः क्रमात् ।
इत्यस्वल्पविकल्पमीलितमतेः कण्ठे लुठन्तो मुहुः
क्रोडाकारधरस्य कैटभजितः श्वासानिलाः पान्तु वः ॥

क्रोडाकारधरस्य कैटभजितः कैटभनामानं दैत्यं जयतीति स तस्य विष्णोः श्वासानिलाः श्वासवायवो वो युष्मान्पान्तु रक्षन्तु, किंविशिष्टास्ते, इत्यस्वल्पविकल्पमीलितमतेः इति हेतोः अस्वल्पैर्बहुभिर्विकल्पैः कल्पनाभिः कृत्वामीलिता संकोचमापादिता मतिर्येन स तस्य कण्ठे गलकुहरे मुहुर्वारंवारं लुठन्तोऽन्तर्घोलनामासादयन्तः, इतीतिकिम्, अमीभिः श्वासानिलैर्मुक्तैर्बहिर्मुक्तैः सद्भिर्वसुमती भूः कुत्रचिदुड्डीय यास्यति अदृष्टा भविष्यतीत्यर्थः, किंविशिष्टा सा, दंष्ट्राङ्कुरस्थेयसी दंष्ट्राङ्कुरेऽतिशयेन स्थिरा, अयं भावः, मया यदि श्वासवायवो मोक्ष्यन्ते तदेयं भूःपतङ्गवदुच्छलिता क्व यास्यतीति न जानामि, तथा क्रमात् क्रमेण अमीभिः श्वासानिलैर्मध्ये रुद्धैः सद्भिः कुक्षौ त्रिभुवनं क्षोभमवाप्स्यति अतः श्वासानिलाः कण्ठे एव लुठन्तीति भावः ॥ २५ ॥

(२६) पातु वः कपटकोलकेशवो
यस्य निश्वसितमारुतोद्धुता ।
उच्छ्रितिप्रपतनैरचीकॢप-
त्केलिकन्दुकतुलामिला मुहुः ॥

स कपटकोलकेशवः कपटेन कोलः कोलाकृतिः कपटकोलः स चासौ केशवश्च कपटकोलकेशवो वो युष्मान्पातु रक्षतु, स कः, यस्य निश्वसितमारुतोद्धुता निश्वसितमारुतौ श्वासवायुभिरुद्धुता उच्छलिता इला भूमिर्मुहुर्वारंवारं केलिकन्दुकतुलां केलेः क्रीडाया यः कन्दुकस्तस्य तुलां साम्यमचीकॢपत् अकरोदित्यर्थः, कैः कृत्वा, उच्छ्रितिप्रपतनैः उच्छ्रितिरुत्पतनं प्रपतनमधः पतनं तैः, यथाऽन्यः कन्दुकः क्रीडया शिशुभिरुत्क्षिप्यतेऽपक्षिप्यते च तथेयं भूरपि श्वासवायुप्रेरितोर्ध्वाधःपतनैः कन्दुकतुलां तुलयतीति भावः ॥ २६ ॥

(२७) सिन्धुष्वङ्गावगाहः खुरविवरविशत्तुच्छतोयेषु नाप्तः
प्राप्ताः पातालपङ्के न लुठितरुचयः पोत्रमात्रोपयोगात् ।
दंष्ट्रा विष्टेषु नाप्तः शिखरिषु च पुनः स्कन्धकण्डूविनोदो
येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः ॥

स विभुताविघ्नितेच्छो वराहो जयति, विभुतया व्यापकत्वेन विघ्निता विघ्नं प्राप्ता इच्छा यस्य सः, यद्ययं वराहो विभुर्न स्यात्तर्हि सिन्धुष्ववगाहादिसुखमप्याप्नुयात्परं तु विभुत्वान्नाप्तं तेनेति, कथंभूतः सः, येन धरित्र्या भूमेरुद्धारे सिन्धुष्वङ्गावगाहः समुद्रेषु शरीरेण जलक्रीडावगाहनं नाप्तः न लब्धः, किंविशिष्टेषु तेषु, खुरविवरविशत्तुच्छतोयेषु खुरविवरेषु शफरन्ध्रेषु विशत्प्रविशदत एव तुच्छमल्पं तोयं जलं येषु ते तेषु अतोऽङ्गक्षालने जलं न पर्याप्तमिति भावः, तथा च पुनः पातालपङ्के पोत्रमात्रोपयोगात्केवलं तन्मुखाग्रमात्रविलेपाच्च लुठितरुचय इतस्ततः पृष्ठपरावर्तनेच्छा न प्राप्ताः, यतः,

पोत्रमित्युच्यते प्राज्ञैर्हलसूकरयोर्मुखम् ।

पङ्कस्य मुखमात्र एवोप योगो जात इत्यर्थः, किं च, स्कन्धकण्डूविनोदः स्कन्धयोरंशयोर्या कण्डूः खर्जूस्तस्या विनोद उपरामः स्फोटनमिति यावत् स शिखरिषु गिरिषु नाप्तो नलब्धः, किंविशिष्टेषु गिरिषु दंष्ट्राविष्टेषु दंष्ट्रास्वाविष्टाः प्रविष्टा ये तेषु, यतः सर्वेऽपि शिखरिणस्तद्दंष्ट्रायामेवाविशंस्तः क्व स स्वस्कन्धखर्जूविनोदमापादयेदिति भावः ॥ २७ ॥

॥ इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवि‌वृतौ वराहावतारवर्णनम् ॥

॥ श्रीः ॥

॥ श्रीदशङ्कराचार्यसभाजितपुण्यग्रामस्थसभावृत्तान्तवर्णनम् ॥

अथ गिरीन्द्रनिकेतनगिरीन्द्रतनयाधिष्ठितवामाङ्गपरिचर्यासङ्गिचेतसः शास्त्रगम्भीरवारिधेः सकलसच्छात्रनिकरमनोगताविद्यातिमिरापसारणैकतरणेः श्रीगुरुचरणस्य परिचर्यया परिचितशास्त्रलेशावावां पुण्याख्यनगरे सभायां वृत्तं वृत्तं धर्ममार्गप्रचारसमुत्सुकरसिकजनमनःकुतूहलाय वर्णयावः । मुम्बय्याख्यनगरनिवासिना भट्टविष्णुशास्त्रिनामकेन परमगुरुचरणविरचितविधवोद्वाहशङ्कासमाधिस्थशङ्कायन्याचनुनचेत्यादिपदरहितान्स्वसिद्धान्तकोटित्वेन पुनःपुन“र्नष्टेमृते”इति वचनं च स्वसिद्धान्तसाधकतयोपन्यस्य विरचितं मूर्खजनप्रतारणैकफलकं विधवोद्वाहविवेकाख्यं ग्रन्थं यथार्थशास्त्रतत्त्वैकपक्षपातिभ्यः काशिकपाठशालाप्रधानाध्यक्षश्रीमद्ग्रिफिथसाहिबाभिधप्रभुवर्येभ्यः प्राप्य परमगुरुचरणकृतविधवोद्वाहशङ्कासमाधेर्विद्वत्कृतविचारस्यैव तद्ग्रन्थखण्डनसमर्थत्वेपि सकलजनमनःसन्तोषाय दावानलमिव दुर्वृत्तविधवाहृदयकाननेङ्कुरितसंतोषाणां, हिमांशुमिव मुकुलितसतीमानससरोजातसुखानां, दोषाभासनिरासनामकं परमगुरुवरश्रीराजारामशास्त्रिभिर्विरचितग्रन्थस्य तिलकं समुपन्यबध्नवस्मद्गुरुवर्याः श्रीमद्बालशास्त्रिणः । तमिमं मुद्रितं ग्रन्थं बहुतरविद्वज्जननयनचकोरचन्द्रीभूतं विज्ञाय संजातस्वचिकीर्षितभङ्गविस्रम्भोपि भट्टविष्णुशास्त्री स्वदेशे संस्कृतविद्याह्रासं विलोक्य केवलमपण्डितजनसमाजे यः कोपि पुनर्विवाहस्य शास्त्रसंमतत्वविषये विवदेत तेन सह विवादं करिष्यामीत्येवं प्रालपत् । अथ तत्प्रलापेन संदिहानैः श्रुतिस्मृतिसदाचारशिष्टधर्मतत्त्वनिर्णिनीषुभिस्तद्देशीयैर्महाधनिकैर्नास्तिकमतप्रचारकालिकं श्रीदमज्जगद्गुरुशङ्कराचार्यवर्याणामनुष्ठानं स्मरद्भिः परमप्रार्थनया स्वदेशमानीताः श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीश्यशृङ्गपुरपड्दर्शनसंस्थापकश्रीकमलानिकेतकरवीरसिंहासनेश्वरश्रीमच्छङ्कराचार्यान्वयसंजाताभिनवश्रीविद्याशङ्करभारतीकरकञ्जोद्भवश्रीविद्यानरसिंहभारतीस्वामिचरणाः स्वागमनमार्गप्रान्तवर्तिनगराणि पत्तनानि च भगीरथानीतगाङ्गौघइव पुनन्तः पुण्यग्रामं प्राप्य काशीप्रभृतिविविधक्षेत्रराजधानीस्थपण्डितान् नानादेशीयान् भूपालान् धनिकांश्चाहूय सुधर्मामिव धर्माभासनिरासपूर्वकसनातनसद्धर्मविवेचनाय सभां सभाजयामासुः । तस्यां च वादी भट्टविष्णुशास्त्री प्रतिवादिनो गञ्जेन्द्रगडकरोपनामकनारायणाचार्याः । उभयपक्षीयाः पञ्चपञ्च मध्यस्था इमे, गोडबोलेइत्युपनामकभिकूशास्त्री, खांबेटेइत्युपनामकदिनकरशास्त्री, खाडिलकरोपनामकबापाशास्त्री, ऐनापुरोपनामकभिकाचार्याः, कोलटकरोपनामकगणेशशास्त्री, इति । चिपुलकरोपाह्वकृष्णशास्त्री, माटेइत्युपाह्वव्यङ्कटशास्त्री, चागाशेइत्युपाह्वरावजीशास्त्री, शेंडेइत्युपाह्वरघुनाथशास्त्री, गाडीगिलोपाह्वकेशवशास्त्री, इति च वादिप्रतिवादिलिखितशास्त्रार्थपत्राणां सारासारौ विविच्योचितार्थस्य संमन्तारः यत्पक्षेऽधिका मध्यस्थसंमतयस्तत्पक्षस्य जयः संमतीनां साम्ये उचितपक्षनिर्णायकस्योभयपक्षीयमध्यस्थानुमतमध्यस्थाऽध्यक्षस्य पण्डितवरगोपालाचार्यस्य संमत्या पक्षजयनिर्णयः अन्ये च सर्वे निषेधकपक्षीया नारायणाचार्यलिखितलेखसहायकाः । उत्तेजकपक्षीयाश्च भट्टविष्णुशास्त्रिलेखसहकारिणः, इत्येवं नियमपुरःसरं कृतशास्त्रार्थस्यायं सारांशाभिप्रायः । उत्तेजकपक्षीयाणां मूर्द्धाभिषिक्तं मनुनारदपराशराणां समानानुपूर्वीकं नष्टे मृते इत्येकं वचनं, तत्र नारदस्मृतिस्थं तूपक्रमोपसंहारानुरोधेन नियोगपरमेव, मनुपराशरोक्तं त्वद्य यावन्मनुभाष्यकृन्मेधातिथिमारभ्य न केनापि ग्रन्थकृता एकदेशिमताभिप्रायेणाप्युत्तेजकपक्षीयानुगुणार्थपरतया व्याख्यातं तादृशार्थपरत्वे न तु नामापीत्यादिबहूनां निषेधकस्मृतिवचसां विपरीतार्थकल्पनाप्रसङ्गाद् इति निषेधकवचनार्थानुसृतार्थपरतया सुयोजत्वे ऽस्य विपरीतार्थं परिकल्प्य परःशतानां पुनर्विवाहनिषेधकवचनानां स्वारसिकार्थपरित्यागो ऽनुचित इति न कथमपि विधवापुनर्विवाहस्य शास्त्रविहितत्वसंभव इति निषेधकपक्षीयाणां मतम् । श्रुतिस्मृतिवचसां तात्पर्यनिर्णयो बाधकश्रुत्याद्यनुगुण एव कर्त्तव्यो न पुनः केवलमापाततः प्रतीयमानेर्थे तात्पर्यमवधार्य तत्तद्विरुद्धवचसां स्वविषयातिरिक्तत्वेन संकोचो युक्तः । अन्यथा “असीवरुणयोर्मध्ये बालरण्डां तपस्विनीम् । बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदम्” । इत्यादिवचनानां पदैराभासमानमर्थं स्वीकृत्य रण्डाभिगमननिषेधकवचसामसीवरुणान्तःप्रदेशातिरिक्तदेशविषयकत्वेन व्याख्याने महानधर्मः प्रवर्त्ततेत्याशयस्तेषाम् । मनुनारदपराशरेतरस्मृतिवचसां पुनर्विवाहविधायक-

त्वेनाभासमानानां तात्पर्यं तु तैस्तैरेव ऋषिभिः स्वयं स्पष्टमेव प्रतिपादितम् । यथा कात्यायनः स तु यद्यन्यजातीय इत्याद्युक्तेतद्वचनस्य धर्म्यविवाहबोधकत्वशङ्कानिराकरणाय क्लीबं विहाय पतितं या पुनर्लभते पतिम् । तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य स इत्यनेन पुनर्विवाहोत्पन्नसन्ततेः पौनर्भवत्वजात्यन्तरं प्राह । एवं वसिष्ठोपि क्लैब्यपातित्यादिदोषविशिष्टपतिकायाः पुनर्विवाहं विधाय, या वा क्लीबं पतितमुन्मत्तं वा भर्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवति इति वचनेन पुनर्विवाहसंस्कृतायाः पुनर्भूत्वरूपजात्यन्तरकथनात् पुनर्विवाहस्य धर्म्यत्वं निराकरोत् । एवमन्येपि । ननु व्यभिचारप्रवृत्तानां विधवास्त्रीणां ज्ञातिदण्डादिभयेन गुप्तबालहत्यादिकरणापेक्षयेदृशपुनर्भूत्वरूपाजात्यन्तरं स्वीकृत्य पुनर्विवाहकरणमुचितमिति चेत्सत्यम् । न वयं बालहत्यादिपातकमङ्गीकृत्यापि तादृशविधवानां पुनर्विवाहो न कर्त्तव्य इति ब्रूमः, अपि तु व्यभिचाररता विधवास्तत्समशीलैर्व्यभिचारिपुरुषैरवश्यं विवाह्याः । परं तु तस्या अन्नं नभोक्तव्यं पुनर्भूः सा प्रकीर्त्तितेति वचनेन तया सहाचारादिव्यवहारस्य निषिद्धत्वात् सनातनधर्ममार्गमनुसिसीर्षुभिस्तज्जातीयेन सह भोजनादिव्यवहारो न विधेय इति । परलोकाकाङ्क्षिणीभिः सतीभिर्विधवाभिश्चेदृशशास्त्रविरुद्धमधर्म्यं विवाहमकृत्वा ब्रह्मचर्यव्रतमनुतिष्ठन्तीभिः फलमूलाशनेनायुः क्षपणीयमिति । अयमेवार्थः कामं तु क्षपयेद्देहं फलमूलाशनैः शुभैः न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु इतिवचनेन स्पष्टमभिहितो मनुना । इत्थं संजातविवादोत्तरं षण्णां मध्यस्थानां मध्यस्थाध्यक्षस्य च संमतिः पुनर्विवाहः शास्त्रविरुद्ध इति ब्राह्मणादिष्वेषु वर्णेषु विधवानां पुनर्विवाहो नैव कार्य इत्येतदर्थे ऽभूत् । अवशिष्टेषु तत्पक्षीयेषु चतुर्ष्वेकः केवलं नष्टे मृते इत्यस्य पुनर्विवाहोत्तेजकपक्षीयैः कल्पितेनार्थेन शास्त्रसिद्धो भवति । परं तु अद्य यावत् केनाप्यकृतत्वादनेकनिषेधकवचनानुरोधाच्च कलौ न कर्त्तव्य इत्येतदभिप्रायं सममंस्त । अन्यैस्त्रिभिर्नष्टे मृते इतिवचनेन सिद्ध्यति पुनर्विवाहस्तथापि तस्य गौणत्वादेकदेशीयमतानुसार्यापद्धर्मत्वादद्य यावदप्रचाराच्च संप्रति स आचारविषयो विधेयो न वेत्यस्य तत्त्वनिर्णयोप्यतिगहनो भयंकरश्चेतीदृशतत्त्वनिर्णये तत्र भवन्तः श्रीमज्जगद्गुरुस्वामिचरणा एव प्रमाणमित्येतदर्थः सममानि । इत्येवं संमतिपत्राणि वादपत्राणि च विलोक्य श्रीमज्जगद्गुरुस्वामिचरणाः अधिकतरसंमतिकत्वात्सयुक्तिकत्वाच्च निषेधपक्षस्य ब्राह्मणक्षत्रियवैश्येषु विधवानां पुनर्विवाहो नैव कर्तव्यः अज्ञानतः कृते तां पुनरूढां हित्वा परित्यज्याश्वलायनोक्तं प्रायश्चित्तं कुर्यादित्यनुशासनं सनातनधर्मपथमनुसंचरतां स्वीयसच्छिष्यवर्गाणां कर्णपथं डिण्डिमघोषपुरस्सरं प्रापयित्वा सभाप्रारम्भदिनमारभ्यासमाप्ति संजातं वृत्तं स्वीयानुशासनसहितं संक्षेपतो महाराष्ट्रभाषया संमुद्र्य देशेदेशे प्रेषयामासुः । ततो भवत्कृतस्यास्मद्गुरुचरणकृतविधवोद्वाहशङ्कासमाधेः खण्डनाभासस्यावलोकनेनैव विद्वद्भिर्मेरुसर्षपयोरिव गुरुचरणानां भवतश्च बोधस्य तारतम्यं स्पष्टं ज्ञायते तथाप्यस्मिन्नानादेशीयपण्डितसमाजे ऽस्मदभिमुखं गुरुचरणग्रन्थस्य द्वित्रस्थलानामुपपादनमेवालं भवतो बोधपरीक्षायै खण्डनं तु दूरे । अन्यथा यथेष्टं कानि चित् संस्कृतवाक्यानि संयोज्य केवलं मूर्खजनप्रतारणायैवायं ग्रन्थ उपनिबद्ध इति प्रसिद्धिर्दुर्निवारा वर्त्ततएवेत्येतदर्थबोधकं महाराष्ट्रभाषायां मुद्रितं पत्रं भट्टविष्णुशास्त्रिसमीपमावाभ्यां प्रेषितमवलोक्यापि स विवादाय सभायां नैवागत इति द्वितीयः पराभवस्तस्येति । ततः सर्वे पण्डिताः प्रत्येकं लब्धमहार्हौर्णवस्त्रयुगलसहितशतमुद्रापारितोषिकास्तत्रागतैस्तद्देशीयैश्च धनिकैर्यथायथं कृतसंमाना गृहीतश्रीमज्जगद्गुरुस्वामिचरणप्रसादाशीर्वचनाः स्वंस्वं नगरं ययुरिति शम् ॥

धर्माधिकार्युपाख्यकुण्ठिराजपन्तः
पण्डितशालिग्राममिश्रः

THE APHORISMS

OF THE

YOGA PHILOSOPHY,

OF

PATAÑJALI.

(Continued from p. 77.)

a. He (now) states another Siddhi.*

समानजयात्प्रज्वलनम् ॥ ४१ ॥

Aph. 41. A blazing (takes place) from conquering the air Samána.

b. The ascetic appears as if wonderfully blazing by light of the fire of the stomach (Jaṭharágni) being uncovered from conquering, i. e., from subduing with restraint, the air called Samána which exists (in the body) surrounding the fire of the stomach.†

a. He (now) states another Siddhi. ‡

---

* सिद्ध्यन्तरमाह ।

† अग्निमावेष्ट्य व्यवस्थितस्य समानाख्यस्य वायोर्जयात् संयमेन वशीकारान्निरावरणस्याग्नेरद्भुतं तेजसा प्रज्वलन्निव योगी प्रतिभाति ।

‡ सिद्ध्यन्तरमाह ।

Digitized by Google

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥ ४२ ॥

Aph. 42. A divine organ of hearing (is developed in the ascetic) by his performing restraint with regard to the connection between (Śrotra) the organ of hearing and (Ákáśa) the ether.

b. "Śrotra" the organ caused by selfishness which apprehends sound and Ákáśa, ether, the object of which is the subtle rudiment of Sound (Śabda-tanmatra). "The connection between these," the characteristic of this connection is becoming site and situated object, i. e., having place. Such is the meaning of the compound word Deśadeśibhávalakshaṇa. [Or Avachchedyávachchedakalakshaṇa, that is, the characteristic of which is being inclosed and encloser. The true meaning of this is that when sound takes place in the ether enclosed by the space of the ear, then only the organ of hearing catches the sound, otherwise not. Such is the connection between ether and the organ of hearing] And, when the ascetic performs his restraint with regard to that connection, a divine organ of hearing is developed in him,—an organ of hearing which is capable of catching simultaneously subtle, concealed and distant sound—Such is the meaning. *

a. He (now) states another Siddhi.†

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४३ ॥

Aph. 43. (A power) of walking through the air (is developed in the ascetic) by his obtaining a state of lightness like a light piece of cotton, &c., from performing his restraint with regard to the connection which a (man's) body has with air.

b. The ascetic having performed restraint with regard to the connection of a body consisting of five elements with air by its yielding a space to the body, forms an identity with loose cotton &c. and thus having obtained a state of extreme lightness, he walks at will, on the earth at first, and subsequently being able to walk along the spider's threads, sports with the sun's rays and then walks through the air in anyway he likes. ‡

G. D. Ś.

* श्रोत्रं शब्दग्राहकमाहङ्कारिकमिन्द्रियमाकाशं व्योम शब्दतन्मात्रकार्यं तयोः संबन्धो देशदेशिभावलक्षणस्तस्मिन् कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते । युगपत्सूक्ष्मव्यवहितविप्रकृष्टग्रहणसमर्थं भवतीत्यर्थः ।

† सिद्ध्यन्तरमाह ।

‡ कायः पञ्चभौतिकं शरीरं तस्याकाशेनाकाशेनावकाशदानात्मकः संबन्धस्तत्र संयमं विधाय लघुनि तूलादौ समापत्तिस्तन्मयीभावलक्षणा तां च विधाय प्राप्तात्यन्तलघुभावो योगी प्रथमं भुवि यथारुचि संचरन् क्रमेणोर्णनाभतन्तुजालेन संचरमाण आदित्यरश्मिभिश्च विहरन् यथेष्टमाकाशेन गच्छति ॥

THE VAIŚESHIKA APHORISMS OF KANÁDA.

FOURTH BOOK, FIRST DAILY LESSON.

(*Continued from page* 82.)

Conditions of perception.

महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः ॥ ६ ॥

Aph. 6. Perception is of the great, in consequence of its possessing substances more than one, and in consequence of colour.

[1] Perception—ocular and tactual presentation—takes place (for these words are to be supplied) in relation to the great, that is, in relation to that which has great extension. It is meant that there is accordingly no perception of an atom inasmuch as it has no magnitude. It might be asked why there is no perception of air &c., there being great extension; accordingly the words 'In consequence of colour,'—that is in consequence of appreciable colour, and thus though there be colour in the eye &c. there is no perception of it. It might be asked how there is greatness in a mote whereas there is none in an atom; accordingly the words 'In consequence of its possessing substances more than one.' Since then possession of substances more than one is the positive condition with regard to produced greatness, and this does not exist in an atom &c., therefore greatness does not exist in an atom, &c. Possession of substances more than one is the being a substratum in which a plurality of substances co-inhere. V.

सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः ॥ ७ ॥

Aph. 7. The non-perception of air, though there is substantiality and magnitude, is in consequence of the non-existence of the impression of colour.

[2] Such being the case there should (it may be urged)

[1] उपलब्धिः चाक्षुषं स्पार्शनञ्च प्रत्यक्षम् महति महत्परिमाणवति भवतीति शेषः तथा च परमाणोर्महत्त्वाभावान्न प्रत्यक्षमिति भावः । ननु वाय्वादेरपि महत्परिमाणसत्त्वात् कथं न प्रत्यक्षमत उक्तं रूपादिति उद्भूतरूपादित्यर्थः तेन चक्षुरादौ रूपसत्त्वेऽपि न प्रत्यक्षम् ननु त्रसरेण्वादावेव कथं महत्त्वं न परमाणावित्यत उक्तम् अनेकद्रव्यवत्त्वादिति तथा च जन्यमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् परमाण्वादौ च तदभावान्न महत्त्वम् अनेकद्रव्यवत्त्वञ्च अनेकसमवेतसमवेतत्वमिति ॥

[2] नन्वेवमपि मध्यन्दिनोल्काप्रकाशस्य चाक्षुषस्य रश्मेर्वायोर्वा स्पर्शसमवायेन रूपसमवायिनो महतश्चोपलम्भः स्यात् अत आह । रूपसंस्कारपदेन रूपसमवायो रूपोद्भवो रूपानभिभवश्च विवक्षितः । तेन यद्यपि वायौ य एव स्पर्शसमवायः स एव रूपसमवायः तथापि रूपनिरूपितो नास्ति रूपात्यन्ताभावसत्त्वात् चाक्षुषे च रश्मौ रूपसंस्कारः रूपोद्भवो नास्ति मध्यन्दिनोल्काप्रकाशे च रूपसंस्कारो रूपानभिभवो नास्ति इति न तेषां प्रत्यक्षता एवं ग्रीष्मोष्मभर्जनकपालानलकनकादिषु रूपसंस्कार उह्यः ॥

Digitized by Google

also be perception of the light of a torch at midday, or of the light of the eye, in which colour inheres in consequence of the inhesion of touch, and which has magnitude. The answer is as follows.:—By the term 'impression of colour' is intended inhesion, or appreciability, or non-obscuration, of colour. Though, therefore, the selfsame inhesion in air of touch is inhesion of colour, yet it is not qualified by colour, for there is in it absolute nonexistence of colour. In the light of the eye there is no impression, that is no appreciability, of colour. In the light of the torch at midday there is no impression, that is no non-obscuration, of colour. Of these, therefore, there is no perceptibility. In like manner impression of colour is to be analogously applied to the hot season, heat, fire within a cooking utensil, gold, &c. U.

[1] Impression of colour, or impressed colour (according to the argument that a past passive participle is predicated), amounts to appreciable or to unobscured colour. This not existing, or in other words there being non-existence of the nature of a substratum having such colour for its essential property, there is no perception or sensuous presentation of air. Nor can it be urged, why is there not in air the nature of a substratum of colour, inasmuch as the existence of a connection determines the existence of the connected object? For this is contradictory to the non-existence of colour delivered by the sensuous presentation that in air there is no colour; and there is nothing to prove that air is a substratum of colour, there being no cognition that air possesses colour. It must be understood that existence of a connection determines the existence of the connected object in such cases only where there is no impossibility and where there is another proof. In fine, to affirm the existence of substantiality is to imply the existence of connection with colour. To affirm the existence of great extension is to imply the existence of a cause of perception. To predicate affirmatively appreciability is to deny perception of fire within culinary utensils &c., and of the hot weather, heat, &c. To predicate affirmatively inappreciability is to deny perception of the light of a torch at midday and the like. V.

Conditions of perception of colour. **अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः ॥ ८ ॥**

Aph. 8. Perception of colour is consequent on co-inhesion of substances more than one, and on particularity of colour.

[1] Particularity of colour is particularity residing in colour. This is appreciability and non-obscuration. On it perception is consequent. The words 'co-inhension of substances more than one' are added to anticipate the objection that the colour of an atom and of a binary aggregation of atoms would be likewise perceived. The term 'more than one' indicates plurality. Perception, therefore, is consequent on the co-inhesion of plural substances from a tertiary atomic aggregate and upwards, of which, as their substratum, are substances more than one or a plurality of substances. Water-pots and the like, originating in two constituent parts, are in regressive succession substrata of a plurality of substances. Visual perceptibility has no relation to taste, touch &c., inasmuch as there does not exist therein the essence of colours. It has no relation to the light of the eye, in consequence of the absence of appreciability. Appreciability is a kind of universal entity residing in a particular quality of colour &c. and included in the essence of colour. U.

Minimum sensible. **तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ॥ ९ ॥**

Aph. 9. By this is explained cognition in the case of taste, smell, and touch.

[2] Of the senses other than touch co-inhesion in the same substratum with colour is the positive condition of perceptibility to the external organ. For this reason the conditions of perception of colour being stated, are here extended to other cases. 'By this' means by knowledge given by perception of colour. As perception of colour is consequent on particularity of colour, that is on non-obscuration and appreciability in the essence of

---

[1] रूपसंस्कारः संस्कृतं रूपं क्तविहित इति न्यायात् उद्भूतानभिभूतरूपमिति यावत् तादृशरूपत्वावच्छिन्नाधिकरणत्वाभावाच्च वायोः उपलब्धिः प्रत्यक्षमित्यर्थः न च सम्बन्धसत्तायाः सम्बन्धिसत्तानियामकत्वात् कथं न वायो रूपाधिकरणत्वमिति वाच्यं वायो रूपं नास्तीति प्रत्यक्षसिद्धेन रूपाभावेन विरोधित्वात् वायू रूपवानिति प्रत्ययासत्त्वेन तदधिकरणतायां साधकाभावाच्च यत्र तु न बाधकं किन्तु साधकान्तरं तत्रैव सम्बन्धसत्ता सम्बन्धिसत्तानियामका इत्यभ्युपगमस्यावश्यकत्वात् द्रव्यत्वस्य सत्त्वकथनन्तु रूपसम्बन्धसत्त्वज्ञापनार्थम् महत्परिमाणसत्त्वाभिधानं प्रत्यक्षकारणसत्त्वार्थम् उद्भूतत्वविशेषणं भर्जनकपालादिस्थवह्निग्रीष्मोष्मचक्षुराद्युपलब्धिवारणार्थम् अनभिभूतत्वविशेषणम् मध्यन्दिनोल्काप्रकाशादि प्रत्यक्षवारणार्थमिति संक्षेपः ॥

[1] रूपगतो विशेषो रूपविशेषः तच्चोद्भूतत्वमनभिभूतत्वं रूपत्वञ्च तस्माद्रूपस्योपलब्धिः । नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं गृह्येतेत्यत उक्तमनेकद्रव्यसमवायादिति अनेकपदं भूयस्त्वपरं तेनानेकानि भूयांसि द्रव्याणि आश्रयतया यस्य तदनेकद्रव्यं त्रसरेणुप्रभृति तत्समवायात् घटादयोऽप्यवयवद्वयारब्धाः परम्परयाऽनेकद्रव्याश्रया एव रसस्पर्शादौ रूपत्वविरहात् उद्भवः रूपादिविशेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः ॥

[2] स्पर्शातिरिक्तानां रूपसामानाधिकरण्यमेव बहिरिन्द्रियग्राह्यता प्रयोजकमिति रूपप्रत्यक्षसामग्रीमभिधाय तामन्यत्रातिदिशन्नाह । तेनेति रूपप्रत्यक्षज्ञानेनेत्यर्थः यथा रूपविशेषात् रूपत्वानभिभूतत्वोद्भूतत्वाद्रूपोपलब्धिस्तथा रसविशेषात् रसत्वानभिभूतत्वोद्भूतत्वलक्षणात् रसोपलब्धिः एवमितरत्रापि योज्यम् अनेकद्रव्यसमवायश्चातिदेश्यः घ्राणरसनत्वगिन्द्रियाणामनुद्भवाद्गन्धरसस्पर्शानामग्रहणम् पाषाणादावनुद्भवाद्गन्धरसयोः तद्भस्मनि तयोरुपलम्भात् तयोः पाषाणादावुपलम्भ एव न तु स्पष्ट इत्येके । विभक्तावयवाव्यव्यद्रव्यरूपानुद्भवात्तदग्रहणम् एवं रसस्यापि उष्णजले तेजोरूपस्यानुद्भवात् स्पर्शस्य चाभिभवात् विततकर्पूरचम्पकादौ रूपरसस्पर्शानामनुद्भवादनुपलम्भः ॥

Digitized by Google

colour so perception of taste is contingent upon particularity of savour, that is, upon the distinctive qualities of non-obscuration and appreciability in the essence of taste. This remark is to be applied in the other cases [viz. those of smell, and touch], and the co-inhesion of plural substances is to be analogously extended to them. From inappreciability to the organs of smell, taste, and touch, results non-apprehension of smells, tastes and touches. It is from their inappreciability in a stone and the like, that smell and taste are not there perceived; for they are perceived in the ashes of the stone, &c. Some maintain that they are perceived indeed in the stone &c. but not distinctly. From inappreciability of colour in a substance, included in its disjunct elements, results its non-perception. This the case likewise with taste. In hot water in consequence of inappreciability of light [or fire], and of its obscuration by touch, is non-perception of light [or fire.] In comminuted camphor, champaka perfume, &c. in consequence of their inappreciability is non-perception of colour, taste and touch. U.

तस्याभावादव्यभिचारः ॥ १० ॥

Aph. 10. Because of the non-existence of this, there is no deviation.

[1] Gravity also is inherent in a plurality of substances, and has a common substratum with colour and magnitude. Why is it not perceptible? This objection is obviated. Because of the non-existence in gravity of the universal appreciability of the essence of colour, gravity is not perceptible.

It might be said that granted that the essence of colour &c. does not exist, yet there may be perception. Accordingly the words 'no deviation' are added; for it is a law that there is no deviation [too wide or too narrow assertion] of the five universal entities, the essences of colour &c., in relation to apprehensibility by the respective organs of sense. For there only where there is one of the five classes, colour &c., is there apprehensibility by the respective exterior organs, according to the exclusive argument [that where the former are not, there the latter does not exist.] Gravity, by reason of the obscurity of the subject of the aphorism, by Praśastadeva classed among things transcendental is by Vallabhácharya said to be perceived by touch. U.

[1] It might be asked why there is no perception of gravity &c., since magnitude and appreciable colour there exist by the connection of inhesion in a common substratum. Accordingly the answer is given. In this place by the word 'this' there is reflection upon a number of causes not stated in the text, but which are well known as positive conditions of realisation of the effect. From the non-existence of this complement of causes results non-deviation, [i. e., neither excess nor defect of predication]; that is, on the hypothesis of the causal relation of appreciable colour &c. there is no deviation of affirmation in relation to gravity &c. By reason therefore of the relation of common objectivity to perception in general, and the necessity of admitting that the essencess of gravity &c. are preventive of the presentation of gravity and the like which are transcendental, and by reason of the non-existence in gravity of the mutually exclusive non existence of these, there being no instrument, there is no perception of gravity, &c. By Vallabhácharya this aphorism is otherwise explained and maintained, viz., that of gravity &c. there is tactual perception. V.

Entities perceived by both sight and touch.

संख्याःपरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म्म च रूपिद्रव्यसमवायात् चाक्षुषाणि ॥ ११ ॥

Aph. 11. Numbers, extensions, separateness, conjunction and disjunction, priority and posteriority, and action, as inhering in coloured substance, are visible.

Things perceptible by one organ of sense having being discussed, those perceptible by two are enumerated. The absence of compounds is to indicate the mutual independence of these as visible and tangible. Though magnitude is supposed, it is not by the essence of extension. The word 'and' involves the addition of viscidity, fluidity, and velocity. The term visible implies tangibility, or the particle 'and' may be applicable here after 'visible.' The word 'numbers' in the

---

[1] ननु गुरुत्वादेः कथं न प्रत्यक्षं महत्त्वस्य उद्भूतरूपस्य च सामानाधिकरण्यसम्बन्धेन तत्र सत्त्वादित्यत आह । अत्र तत्पदेन अपक्रान्तस्यापि कारणकलापस्य परामर्शः कार्य्योत्पत्तिप्रयोजकतया तस्य प्रसिद्धत्वात् तथा च तस्य कारणकलापस्य अभावात् असत्त्वात् अव्यभिचारः उद्भूतरूपाभावः कार्य्यकारणभावकल्पनायां गुरुत्वादौ नान्वयव्यभिचार इत्यर्थः तथा च लौकिकविषयतासम्बन्धेन प्रत्यक्षसामान्यं प्रत्येवातीन्द्रियाणां गुरुत्वादीनां गुरुत्वत्वादीनां प्रतिबन्धकतास्वीकारस्यावश्यकत्वेन तदन्योन्याभावस्य गुरुत्वादावसत्त्वेन सामग्र्यभावाच्च गुरुत्वादेः प्रत्यक्षमिति भावः वल्लभाचार्य्यस्तु एतत्सूत्रमन्यथैव व्याख्यातं स्वीकृतञ्च गुरुत्वादेः स्पार्शनप्रत्यक्षमिति संक्षेपः ॥

[1] एवमेकैकेन्द्रियग्राह्यानभिधाय द्वीन्द्रियग्राह्यानाह । एतेषां चाक्षुषत्वे स्पार्शनत्वे वा परस्परानपेक्षत्वसूचनाय समासः यद्यपि महत्त्वापेक्षाऽस्ति तथापि न परिमाणत्वेन चकारः स्नेहद्रवत्ववेगानामुपसंग्रहार्थः चाक्षुषाणीति स्पार्शनत्वमप्युपलक्षयति यद्वा चकार एव चाक्षुषाणि चेत्यत्रापि योज्यः सङ्ख्या इति बहुवचनम् एकत्वादिकाः सर्व्वा एव सङ्ख्या संगृह्णाति एकत्वं सामान्यमेव न तु गुण इति चेत् तद् यदि द्रव्यमात्रवृत्ति तद्द्रव्यत्वेन सहान्यूनानतिरिक्तवृत्तित्वम् अथ गुणकर्म्मणोरपि वर्त्तते तदा सत्तया सहान्यूनानतिरिक्तवृत्तित्वम् कथं तर्हि गुणादावप्येकत्वादि प्रत्यय इति चेत् आरोपितेनैकत्वेन एकार्थसमवायप्रत्यासत्त्या सम्यगेकत्वप्रत्ययो वा तदेतदेकत्वं नित्यद्रव्येषु नित्यम् अनित्येषु च कारणैकत्वासमवायिका ॥

Digitized by Google

plural comprehends all numbers, from unity upwards. If it be held that unity is a universal entity, and not a quality, then if it exist in substance only, it is existence as neither less nor greater than the essence of substance; if, on the other hand, it exist in qualities and actions also, it is existence as neither less nor greater than existence. If it be asked how then in the former case there is the notion of unity &c., in quality &c., it may be answered that it is by means of attributed unity; or that by reason of the notion of inhesion in one substance, the notion of unity is just. This unity is eternal in eternal substances, in non-eternal substances it has for its non-coinhesive cause causal unity. Duality &c is resultant from relative conception. Relative conception is the mental basis of various unities, when two homogeneous or heterogeneous substances are in contact with the organ of vision. U.

[1] Things perceptible by two organs of sense are enumerated. After the word 'visible' the preceding particle 'and' is to be construed. The meaning is, then, that these entities, beginning with sound and ending with action, inherent in coloured substance, are visible and tangible. The particle 'and' after the word 'action,' includes by implication viscidity, velocity, fluidity and their universal essences. The word 'coloured' indicates appropriateness, and consequently there is no incongruity in the fact that these entities, when existent in atoms &c., are not perceptible. V.

अरूपिष्वचाक्षुषाणि ॥ १२ ॥

Aph. 12. In uncoloured substances they are imperceptible to sight.

[2] The invisibility of these when existing in inappropriate [i. e. uncoloured] substances, though involved [in the preceding aphorism] is stated for the sake of perspicuity. The meaning is that these are invisible and intangible in uncoloured or inappropriate subjects. It is not said that they are imperecptible, because of the arising of an internal perception of the unity of soul. V.

एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम् ॥ १३ ॥

Aph. 13. By this it is explained that knowledge in regard to quality and existence is of all the senses.

---

[1] द्वीन्द्रियग्राह्यानाह । चाक्षुषाणीत्यत्रापि पूर्वचकारो योजनीयः तेन सङ्ख्यादीनि कर्म्मपर्य्यन्तानि रूपवद्द्रव्यसमवेतानि चाक्षुषाणि स्पार्शनानि चेत्यर्थः कर्म्म चेति चकारात् उद्भूतरूपवद्द्रव्याणां योग्यगतानां स्नेहवेगद्रवत्वानां जातीनाञ्च संग्रहः ।

[2] रूपिपदं योग्यपरं तेन परमाण्वादिगतानामेतेषामप्रत्यक्षत्वे ऽपि नासङ्गतिः अयोग्यसमवेतानामेतेषामचाक्षुषत्वमर्थयातमपि स्पष्टार्थमाह । अरूपिषु अयोग्येषु एतानि अचाक्षुषाणि अस्पार्शनानि चेत्यर्थः आत्मैकत्वस्य मानसप्रत्यक्षोदयात् अप्रत्यक्षाणीति नोक्तम् ॥

[1] Existence means being; of all the senses, produced by all the senses; knowledge, perception. The sense is, therefore, that these inasmuch as they are appropriate to, are cognised by, all the senses. V.

SECOND DAILY LESSON.

Three-fold division of matter.

तत् पुनः पृथिव्यादिकार्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयकसंज्ञम् ॥ १ ॥

Aph. 1. The aforesaid product substance, earth and the like, is three-fold, under the names of body, organ, and object.

[2] Of these corporeity is a kind of universal attribute, an absolute whole possessing action, and having for its non-co-inhesive cause conjunction with soul endowed with volition, but corporeity is not a universal entity, for terrestriality does not admit of the generic and specific. The organic is the being a substratum of mind causative of knowledge productive of reminiscence; or the being a substratum of conjunction with mind causative of knowledge, not being the substratum of the appreciable particular qualities other than sound. In regard to the light of the eye of animals that prowl at night another kind of light must be admitted, and in regard to visuality the words 'not being a substratum of appreciable particular qualities other than sound and colour' are to be added. Objectivity is although being the means of phæomenal experience, that is to say, the being an object of ordinary mental presentation common to substance, quality, action, generality, and non-existence,—yet, in accordance with the aphorism, product substantiality the object of common mental presentation for it is stated in the aphorism that earth and other product substances are threefold. Objectivity also, then, is not a universal entity. U.

---

[1] भावः सत्ता सर्व्वेन्द्रियं सर्व्वेन्द्रियजन्यम् ज्ञानं प्रत्यक्षं तथा च तयोः सर्व्वेन्द्रिययोग्यवृत्तित्वात् सर्व्वैरेवेन्द्रियैस्ते गृह्येते इति भावः ॥

[2] तत्र शरीरत्वं प्रयत्नवदात्मसंयोगासमवायिकारणवत्क्रियावदन्त्यावयवित्वम् उपाधिभेदः न तु शरीरत्वं जातिः पृथिवीत्वादीनां परापरभावानुपपत्तेः इन्द्रियत्वञ्च स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वम् शब्देतरोद्भूतविशेषविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं वा नक्तञ्चरनयनरश्मिस्तु तेजोन्तरमेव चक्षुष्ट्वे तु शब्दरूपेतरोद्भूतविशेषगुणानाश्रयत्वे सतीति देयम् न त्विन्द्रियत्वं जातिः पृथिवीत्वादिना परापरभावानुपपत्तेः विषयत्वञ्च यद्यपि प्रतीयमानभोगसाधनत्वम् तच्च लौकिकसाक्षात्कारविषयत्वमेव द्रव्यगुणकर्म्मसामान्याभावसाधारणम् तथापि सूत्रानुरोधात् लौकिकसाक्षात्कारविषयकार्य्यद्रव्यत्वं द्रष्टव्यम् पृथिव्यादिकार्य्यद्रव्यम् त्रिविधमिति हि सूत्रम् तथा च विषयत्वमपि न जातिः ॥

Digitized by Google

¹ Of these corporeity is universality existing in that which possesses muscular motion existing only in an absolute whole. In this definition the second 'existing' is intended to exclude existence as a hand, terrestriality, substantiality, existence &c. The term 'existing in that which possesses muscular motion, is intended to exclude conjunction of water-pots, bodies, &c. 'A class' therefore the definition is applicable to human and other bodies, by consideration of humanity, the being Chaitra, and other universal entities. There exists in trees &c. organic motion through connection with divine air, otherwise fractures and wounds in them would not close up. From the multiplicity of the man-lion's [Vishnu's] body, according to the division of æons, the definition may be applied to it by consideration of the universal entity existence as man-lion. But corporeity is not a class for there would be confusion with terrestriality &c.; nor is it existence as the substratum of muscular motion, for the definition would be too narrow in relation to body deprived of organic movement. The organic also, is not a class, for there would result a confusion with terrestriality &c. but existence as a substratum of conjunction with mind causative of cognitions, and the not being a substratum of appreciable particular qualities other than sound. The words 'the not being a substratum' &c. are intended to prevent an unduly wide predication in regard to the cuticle, and the soul; the causes of cognitions being conjunction of the mind and the external organs of sense, conjunction of the cuticle and the internal organ, and conjunction of the soul and the internal organ.......Objectivity is product substantiality, being the means of experience in an immediate succession. Though it exists [is included] in body and organs, it is separately enumerated to give a more distinct conception to the learner. V.

प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते ॥ २ ॥

Aph. 2. The body is not composed of the five [elements], for the conjunction of things perceptible and imperceptible is imperceptible.

¹ The author now proceeds to refute the assertion that the body is composed of three or four elements. Were the body, by reason of its odour, moisture, [digestive] heat, breath, and compressibility, composed of five elements, the body would be imperceptible in the same manner in which conjunction of wind with trees is imperceptible. The aphorism employs an example. After the word 'is' [*vidyate*], the word 'body' is to be supplied. Moisture, [digestive] heat and the other qualities exist only in their basis, water, fire, &c. Such is the case also with regard to four elements. Let it then (it may be urged) consist of three elements, for three elements are perceptible. This is not the case for an origination out of heterogeneous elements is denied. One quality in a whole is not originative of other qualities. If therefore the commencement were from earth and water, that which they originate would be void of odour and taste. In like manner if it originated in earth and air, it would be destitute of smell, taste, colour, and touch. Such and other inferences may be drawn. U.

---

¹ अत्र शरीरत्वम् अन्त्यावयविमात्रचेष्टावद्वृत्तिजातिमत्त्वं हस्तत्वपृथिवीत्वद्रव्यत्वसत्त्वादिवारणाय प्रथमवृत्त्यन्तम् घटत्वादिवारणाय चेष्टावद्वृत्तीति घटशरीरसंयोगादिवारणाय जातीति मनुष्यत्वचैत्रत्वादिजातिमादाय मानुषादिशरीरे लक्षणसमन्वयः वृक्षादावपि चेष्टा ऽस्त्येव आध्यात्मिकवायुसम्बन्धात् अन्यथा भग्नक्षतसंरोहणादिकं न स्यात् कल्पभेदेन नृसिंहशरीरस्य नानात्वात् नृसिंहत्वजातिमादाय तत्र लक्षणसमन्वयः न तु शरीरत्वं जातिः पृथिवीत्वादिना सङ्करात् नापि चेष्टाश्रयत्वम् निश्चेष्टशरीरे ऽव्याप्तेः । इन्द्रियत्वमपि न जातिः पृथिवीत्वादिना सङ्करप्रसङ्गात् किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियमनःसंयोगचर्ममनःसंयोगात्ममनःसंयोगाज्ज्ञानकारणानीति चर्मण्यात्मनि चातिव्याप्तिवारणाय सत्यन्तम् श्रोत्रे ऽव्याप्तिवारणाय शब्देतरेति व्याघ्रादिनयनरश्मेश्चक्षुष्ट्वस्वीकारे तु रूपेतरेत्यपि वक्तव्यम् घ्राणादौ गन्धादिसत्त्वादुद्भूतेति शुक्लत्वादिव्याप्यम् अनुद्भूतत्वं जातिर्नानैव तदभावकूटत्वमुद्भूतत्वं तच्च संयोगे ऽप्यस्तीत्यसम्भववारणाय विशेषेति कालदिगादावतिव्याप्तिवारणाय ज्ञानकारणेति चक्षुरवयवविषयसंयोगस्यापि चक्षुर्विषयसंयोगद्वारा ज्ञानजनकत्वस्वीकारात् चक्षुरवयवादौ चक्षुःसंयुक्तकालविशेषणतायाः कालादौ रूपाभावचाक्षुषस्य जनकतया तद्घटकसंयोगस्यापि स्वाश्रयविशेषणतासम्बन्धेन चाक्षुषकारणत्वात् तमादाय कालादौ चातिव्याप्तिवारणाय मनःपदम् विषयत्वञ्च साक्षात् परम्परया वोपभोगसाधनत्वे सति जन्यद्रव्यत्वम् तस्य शरीरेन्द्रियवृत्तित्वे ऽपि शिष्यबुद्धिवैशद्यार्थं तयोः पृथगुत्कीर्त्तनमिति संक्षेपः ॥

¹ इदानीं शरीरस्य त्रैभौतिकत्वचातुर्भौतिकत्वप्रवादं निराकर्तुमाह ।

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं यदि शरीरं भवेत् तदा अप्रत्यक्षं भवेत् यथा प्रत्यक्षाप्रत्यक्षाणां वायुवनस्पतीनां संयोगो ऽप्रत्यक्षस्तथा शरीरमप्यप्रत्यक्षं स्यादिति दृष्टान्तद्वारकं सूत्रं पञ्चात्मकं न विद्यत इति शरीरमिति शेषः क्लेदपाकादयस्तु उपष्टम्भकजलानलगता एव चातुर्भौतिके ऽप्येवम् नन्वस्तु त्रैभौतिकम् त्रयाणां भूतानां प्रत्यक्षत्वादिति चेन्न विजातीयारम्भस्य प्रतिषेधात् एकस्य गुणस्यावयविनि गुणानारम्भकत्वात् तद् यदि पृथिवीजलाभ्यामारम्भः स्यात् तदा तदारब्धमगन्धमरसञ्च स्यात् एवं पृथिव्यनलाभ्यामगन्धमरूपमरसञ्च स्यात् पृथिव्यनिलाभ्यामगन्धमरसमरूपमस्पर्शञ्च स्यादित्याद्यूह्यम् ॥

Digitized by Google

गुणान्तराप्रादुर्भावाच्च न त्र्यात्मकम् ॥ ३ ॥

Aph. 3. The body is not composed of three elements, because there is not manifested another.

[1] A body originated by quality, perceptible earth water, and light, might be perceptible, if there were manifested in it another quality having for its antecedent a quality of the cause. This is not the case, for it has been already stated that a single odour &c. is not originative. Therefore the body is not composed of three elements nor originated by three coloured substances. U.

अणुसंयोगस्त्वप्रतिषिद्धः ॥ ४ ॥

Aph. 4. A conjunction of atoms is not denied.

[2] How then do we observe [digestive] heat &c. in one single body? The answer is given in the text. A mutual conjunction of the five elements as the basis of one another is not denied. But it is not affirmed that two heterogeneous atoms are the non-co-inhesive cause of a substance. It is, therefore, in consequence of the basis of those that [digestive] heat &c. is observed in the body. If it be asked then, of what nature the human body is, we cite the aphorism of Gautama:—'That [the body] is terrestrial, for the particular quality [of earth] is observed.' Odour the particular quality of earth is observed in the human body as not departing from it till its dissolution, [Digestive] heat &c. is not observed in the decayed body. These qualities, therefore, are accidental, but its odour is essential according to the constitution of terrestriality. U.

तत्र शरीरं द्विविधं योनिजमयोनिजञ्च ॥ ५ ॥

Aph. 5. Of these, body is twofold born from the womb, and not born from the womb.

---

[1] पृथिव्यप्तेजसां प्रत्यक्षाणामेवारब्धं शरीरं प्रत्यक्षंस्यादपि यदि तत्र गुणान्तरं कारणगुणपूर्व्वकं प्रादुर्भवेत् नत्वेतदस्ति एकस्य गन्धादेरनारम्भकत्वस्योक्तत्वात् तथा च न त्र्यात्मकमपि शरीरं न रूपवद्भूतत्रयारब्धमपीत्यर्थः ॥

[2] कथं तर्ह्येकस्मिन्नेव शरीरे पाकादीनामुपलम्भ इत्यत आह ।

मिथः पञ्चानां भूतानां परस्परमुपष्टम्भकतया संयोगो न निषिध्यते किन्तु विजातीययोरणश्रोर्द्रव्यं प्रत्यसमवायिकारणं संयोगो नेष्यते तथा च तदुपष्टम्भात् पाकादीनां शरीरे भवत्युपलम्भ इति तर्हि किम्प्रकृतिकमिदं मानुषशरीरमित्यत्र गौतमीयं सूत्रमुपतिष्ठते पार्थिवं तद् विशेषगुणोपलब्धेः पृथिवीविशेषगुणो गन्धो मानुषशरीरे आनाशमनपायी दृश्यते पाकादयस्तु शुष्कशरीरे नोपलभ्यन्ते इति तेषामौपाधिकत्वं गन्धस्य स्वाभाविकत्वमिति पार्थिवत्वव्यवस्थितेः ॥

[1] Of these—among terrestrial, aqueous, and other bodies—the terrestrial body is twofold. What are the two kinds? It is answered in the text that they are uterine and non-uterine. Aqueous, igneous, and aërial bodies known in the spheres of Varuṇa, the sun, and the air, are exclusively non-uterine. The bodies of gods and sages are non-uterine, according to the text of revelation: 'Manu and others the mind-born of Brahman.' If it be asked how there can be an effect without a cause, we reply that the womb is not a cause essential to corporeity; for the affirmation that is was so would be erroneous in regard to the bodies of worms, mosquitoes &c., generated by warmth. Peculiarity of constitution is not known, for our bodies are not different in appearance from those of the divine sages. The uterine is twofold, viviparous and oviparous. Viviparous are the bodies of men and animals wild and domestic. The bodies of birds and reptiles are oviparous. Snakes, worms, fishes &c. are called reptiles, because it is their nature to creep about. Though trees &c. are a kind of bodies being substrata of fruition,—for life, death, sleep, waking the use of medicine seminal propagation, desire of the agreeable, aversion from the disagreeable, &c. are impossible without a substratum of fruition [or sentient subject];—and growth, and the closing up of fractures are manifest means of fruition; and there is the sacred text, 'The Śarala and Arjuna trees which grow on the banks of the Narmadá, from contact with the waters of the river attain to the highest state hereafter' &c.; and such as 'In the cemetery grows a tree haunted by herons and vultures;' yet germinant bodies do not evidently possess muscular motion and sensitive organs, and they are not therefore, in common usage called bodies. U.

A. E. G.

---

[1] तत्र पार्थिवाप्यादिशरीरेषु मध्ये पार्थिवं शरीरं द्विविधम् के ते द्वे विधे इत्यत्राह । योनिजमयोनिजञ्चेति आप्यतैजसवायवीयशरीराणां वरुणादित्यवायुलोकेषु प्रसिद्धानामयोनिजत्वमेव अयोनिजत्वं शुक्रशोणितसन्निपातानपेक्षत्वम् अयोनिजञ्च देवानामृषीणाञ्च श्रूयते हि ब्रह्मणो मानसा मन्वादय इति कारणमन्तरेण कथं कार्य्यमिति चेत् योनेः शरीरत्वावच्छेदेनाकारणत्वात् उष्मजकृमिमशकादिशरीरे व्यभिचारात् संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरापेक्षया ऽस्मदादिशरीराणामन्यादृशत्वात् योनिजम् द्विविधं जरायुजमण्डजञ्च जरायुजमानुषपशुमृगाणां गर्भाशयस्य जरायुजत्वात् सर्पकीटमत्स्यादयो ऽपि सरीसृपा एव यद्यपि वृक्षादयो ऽपि शरीरभेदा एव भोगाधिष्ठानत्वात् न खलु भोगाधिष्ठानत्वमन्तरेण जीवनमरणस्वप्नजागरणभेषजप्रयोगबीजसजातीयानुबन्धानुकूलोपगमप्रतिकूलापगमादयः सम्भवति वृद्धिक्षतभग्नसंरोहणे च भोगोपपादके स्फुटे एव आगमो ऽप्यस्ति नर्म्मदातीरसम्भूताः शरलार्ज्जुनपादपाः नर्म्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम् इत्यादिः श्मशाने जायते वृक्षः कङ्कगृध्रादिसेवितः इत्यादिश्च तथापि चेष्टावत्त्वमिन्द्रियवत्त्वञ्च नोद्भिदां स्फुटतरमतो न शरीरव्यवहारः ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 53. Benares, October 1st, 1870. Vol. V.

॥ उपदेशसहस्र्या उपसंहारः ॥

आलोकालोक आलोकान्तरं नापेक्षते यथा ।
एवं वृत्त्याप्तिमात्रेण यत्स्फूर्तिस्तत्परं महः ॥

सर्वस्य जगतस्तावद् दुःखं मे मा भूदिति प्रार्थनाया निर्विवादत्वेन समूलदुःखनिवृत्तेः केनाप्यनिष्यमाणताया वक्तुमशक्यत्वेन तदात्मा मोक्ष इच्छाऽजन्येच्छाविषयत्वात् स्वतः पुरुषार्थो भवितुमर्हति । तदसाधारणकारणं च दुःखादीनामविद्यामूलकत्वादविद्यायाश्च विपरीतज्ञानरूपाया यथार्थज्ञानैकनिवर्त्यत्वात् तत्त्वज्ञानमेवेति ब्रह्ममीमांसायां सिद्धान्तितम् । तस्य च तत्त्वज्ञानस्य मोक्षहेतोर्हेतुतया श्रवणं मननं निदिध्यासनं चेति त्रयं क्रमेणाप्रतिपत्तिसंदेहविपर्यासानामुन्मूलकमागमादौ बोधितम् । तदिदं श्रवणादित्रयं संक्षेपतः सोपस्कारं निरूपयितुं क्रमेण तत्त्रयप्रदर्शकैः 'शिष्यप्रतिबोधविधि' 'कूटस्थाद्वयात्मबोध' 'परिसंख्यानविधाना'भिधानैस्त्रिभिः प्रकरणैरुल्लसितो गद्यप्रबन्धो नामोपदेशसहस्र्याः पूर्वदलं भगवता श्रीशंकराचार्येणोपनिबबन्धे ।

(३३) (३४) (३५) तत्र तावत् प्रथमे प्रकरणे गुरुशिष्ययोरध्यात्मविद्याग्रहणप्रवचनाधिकारनिरूपणाय मुमुक्षुत्वशुचित्वश्रद्धाधानत्वादीञ्छिष्यगुणानूहापोहादीन् गुरुगुणाञ्छमदयादींश्चोभयगुणान् प्रदर्श्य प्रश्नप्रतिवचनमुखेनाविनाशित्वापरिच्छिन्नत्वादिभिरात्मनो देहवैधर्म्यस्य व्यवस्थापनेन देहधर्मिकामहंमतिमुत्सार्य संसारित्वासंसारित्वादीनां जीवब्रह्मभेदोपपादकत्वेनाभासस्याविद्याप्रयुक्तत्वोपपादनेन जीवब्रह्मणोरभेदं संसाध्य ब्रह्मभावदशायां कर्मणां तत्साधनानां च त्यागस्य न्यायसिद्धत्वं निरूप्य साध्यसाधनादेर्दृश्यमानस्य श्रूयमाणस्य वाऽविद्याकृतत्वादत्यन्ततुच्छत्वमिति प्रतिपादितम् । अत्र च प्रकरणे मुख्यप्रतिपाद्याद्वैतोपपादकयुक्तीनां प्रदर्शनस्य प्रासङ्गिकत्वादुत्तरप्रकरण एव प्राधान्येन तत्प्रदर्शनात् प्रकृतार्थप्रतिपादकानां वचनानामेवात्र बहूनां संग्रहेण श्रवणस्वरूपनिरूपणपरतैवास्य प्रकरणस्यावसीयते ।

(३५) (३६) (३७) द्वितीये तु प्रकरणे प्रथमं संसारस्य रोगवन्नैमित्तिकत्वं प्रतिपाद्य नैमित्तिकनिवृत्तेर्निमित्तनिवृत्त्यधीनत्वात्संसारनिमित्तचिन्तायामविद्यायास्तन्निमित्तत्वं व्यवस्थाप्य तत्स्वरूपं च मिथ्याध्यारोपणात्मकं सम्यग् ग्राहयित्वाऽनर्थबीजत्वेन जानन्नप्यन्येन केन चित् प्रयुक्तः करोमि तां परतन्त्र इति शिष्यप्रश्नमुखेनात्मनः पारतन्त्र्यमाक्षिप्य चैतन्यान्यथाऽनुपपत्त्या स्वातन्त्र्यमङ्गीकारितम्, अथ च शब्दाद्याकारनिरूप्यत्वात्प्रत्ययानां संहतत्वाच्चैतन्यानात्मकत्वात्तेषामुपलब्धुर्विक्रियावतः कथं कूटस्थत्वमिति संदिह्य सर्वप्रत्ययानां नियमत उपलब्धृत्वं वा परिणामित्वं तत एव च कूटस्थत्वं संसाध्योपलब्ध्रुपलब्ध्योर्भेदनिराकरणपुरःसरं नित्योपलब्धिस्वरूपतामात्मनः संसाध्यावस्थात्रयसाक्षितयाऽवस्थाधर्मास्पर्शित्वोपपादनेन पुनः कूटस्थतां द्रढयित्वा मीमांसकलौकायतिकाद्याक्षेपप्रतिक्षेपपुरःसरमवगतेः सदा स्वतः सिद्धत्वरूपामलुप्तचिद्रूपतां तदन्यस्य दृश्यजातस्य तुच्छत्वमङ्गीकार्य प्रकरणोपक्रमे पृष्टं विद्याऽविद्ययोः स्वरूपविभागादिकं विस्तरेणोपपादितमुपसंहृतमविद्या संसारहेतुर्विद्या तन्निवर्तिका ततोऽभयं प्राप्नोति येन पुनर्जाग्रत्स्वप्नदुःखं नानुभविष्यतीति संसारदुःखान्मुक्तः भवतीति । तदिदं प्रकरणं नानाविधसंदेहापा-

Digitized by Google

करणोपयोगियुक्तिशतप्रदर्शकत्वान्मननप्रयोजनकमेवेति स्पष्टमेव ।

(३७) तृतीये तु प्रकरणे संजातमपि ज्ञानं भेददर्शनवासनावशान्निश्चलं यदि न भवति तदा यत् पुनःपुनरनुचिन्तनीयमात्मनः शब्दादिभिरस्पृष्टत्वादिकं येन चिन्तितेन ज्ञानदार्ढ्यं संपद्यते तत् सोपस्कारं निरूपितमिति स्फुटा तस्य निदिध्यासनार्थतैवेति ।

तदनेन सर्वोपनिषत्सारांशप्रतिपादकेन गद्यप्रबन्धेन प्रतिपादितोऽप्यर्थो मध्यमाधिकार्यनुग्रहधिया पुनः किं चिद्विस्तरेणोपदेशसहस्र्या उत्तरदलेन पद्यप्रबन्धनामधेयेनैकोनविंशत्या प्रकरणैर्निरूप्यते ।

तानि च प्रकरणानि तत्तद्घटितैतत्पत्राङ्कप्रदर्शनपुरःसरं निरूप्यन्ते ।

तथाहि ।

(३७) (३८) प्रथमं प्रकरणमुपोद्घातो नाम वेदान्तशास्त्रारम्भस्यावश्यकतोपपादकम् ।

(३८) द्वितीयं प्रतिषेधो नाम यदितरप्रतिषेधमुखेनात्मज्ञानोत्पत्तिं प्रतिपादयति ।

(३८) तृतीयं त्वीश्वरो नाम यत्र जीवभेदप्रतिपादकानां तदभेदप्रतिपादकानां च श्रुतिवचसां विरोधपरिहारपुरःसरमद्वितीयः प्रत्यगात्मा व्यवस्थाप्यते ।

(३८) चतुर्थमहंप्रत्ययो नाम यत्र ज्ञानिनः कर्मप्रतिबन्धाभाव उपपाद्यते ।

(३९) पञ्चमं मूत्राशङ्का नामाविवेकस्यात्मस्वरूपाग्रहणकारणत्वोपपादनपूर्वकमिदमंशप्रहाणेनात्मानुभवो भवतीति प्रतिपादयति ।

(३९) षष्ठं छित्त्वाप्रकरणं यत्र पदार्थपरिशोधने सुकर उपायो निर्दिष्टः ।

(३९) सप्तमं बुद्ध्यारूढो नाम यत्र संपादितविवेकस्य तत्त्वज्ञानं वाक्यादेवानायासं जायतइत्यत्रोपोद्बलकतया स्वानुभवो दर्शितः ।

(३९) अष्टमं मतिविलापनं नाम यत्रात्ममत्योः संवादेनाज्ञानविध्वंसनं विहितम् ।

(३९) नवमं सूक्ष्मता नाम यत्रात्मनो निरतिशयसूक्ष्मत्वं व्यापित्वं चोच्यते ।

(४०) दशमं दृशिर्नाम निर्विषयज्ञानात्मन आत्मनः पारमार्थिकस्वरूपप्रदर्शनपरम् ।

(४०) एकादशमीक्षितृत्वं नाम यत्र कर्मणः कर्मसमुच्चितज्ञानस्य वा मोक्षहेतुत्वं वेदान्तविनिश्चयस्य तर्केणान्यथासिद्धिश्च निराक्रियेते ।

(४१) द्वादशं प्रकाशो नाम त्वंपदार्थशोधनप्रधानम् ।

(४१) त्रयोदशमचक्षुष्ट्वं नाम यत्रात्मनः शुद्धत्वमचलत्वं च विस्तरेण निरूप्यते ।

(४२) चतुर्दशं स्वप्नस्मृतिप्रकरणमन्तःकरणस्यापरोक्षताप्रतिपादनपूर्वकमात्मनस्तद्धर्मास्पर्शं प्रतिपादयति ।

(४३) पञ्चदशं नान्यदन्यन्नाम यत्रात्मनः संसारिस्वभावत्वमेकदेश्युपक्षिप्तं प्रतिक्षिप्तम् ।

(४४) (४५) षोडशं पार्थिवं नाम यत्र वैशेषिकादिसकलतार्किकमतनिराकरणेन ब्रह्मैकत्वज्ञानस्य स्वरूपावस्थानलक्षणमोक्षहेतुत्वं प्रपञ्चितम् ।

(४६) (४७) सप्तदशं सम्यङ्मतिर्नाम वेदान्तशास्त्रानुसारिण्या आत्मज्ञानप्रक्रियाया विस्तरेण प्रदर्शकम् ।

(४८) (४९) (५०) (५१) अष्टादशं तत्त्वमसि नाम यत्र कूटस्थं चिदेकतानं साक्षिणं नित्यापरोक्षमेवात्मानं शास्त्रं ब्रह्मेति प्रतिपादयतीत्येतदर्थस्य स्पष्टप्रतिपत्तये तत्त्वंपदार्थपरिशोधनपूर्वकं ब्रह्मात्मैक्यलक्षणवाक्यार्थनिरूपणपुरःसरं प्रत्यगात्मनः सकला अनर्था अन्तःकरणचतुष्टयोपाधिका इति महता विस्तरेण प्रतिपादितम् ।

(५२) एकोनविंशमात्ममनःसंवादो नाम यत्र मनसः स्वरूपं व्यापारं चानुसंधाय तद्विलापने यत्नः कार्य इति बोधयित्वा निबन्ध उपसंहृतः ।

तदित्थमनुपमगद्यपद्यमयैर्ब्रह्ममीमांसासारांशस्य साकल्येन संग्राहकैर्भूयोभिरुपदेशैरयं निबन्धः समुल्लसतीत्युपदेशसहस्रीति नामधेयमस्य सान्वयम् । यद्यपि समाहारे द्विगौ सहस्रोपदेशीति युक्तमभिधानं तथापि

"उपदेशसहस्र्याः स गद्यबन्धो यथामति"

"उपदेशसहस्रीयं विवृता हि महात्मभिः"

इत्येतट्टीकाकाररचितप्रबन्धद्वयान्तिमपद्याभ्यामुपदेशसहस्रीत्यभिधानस्यैवटीकाकारसंमततया निश्चयेन लोकेप्येतद्ग्रन्थस्योपदेशसहस्रीत्येव व्यवहारस्य दर्शनेन चास्माभिरपि तथैव व्यवहृतम् । तदुपपत्तिश्च सिद्धगतिन्यायेनोपदेशाः सहस्रमस्यामुपदेशानां सहस्रमिति वा बहुव्रीहिषष्ठीतत्पुरुषाभ्यां चिन्तनीया । तत्र बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानमित्यस्याप्रवृत्तिः पूर्वनिपातप्रकरणस्यानित्यत्वाद्वाच्या, तत्पुरुषे तु परवल्लिङ्गताया अप्रवृत्तिः कथं चिद् वाच्या, उभयथापि ङीष् तु पिप्पल्यादेराकृतिगणत्वादेव वाच्यः । प्रयोगाश्चैवंजातीयाः पुराणादौ बहवो दृश्यन्ते । यथा

"चिन्तितं समवाप्नोति पठञ्छ्लोकशतीमिमाम्"

Digitized by Google

इत्यादयः ॥ सेयं मया महता परिश्रमेण संशोध्य काशीविद्यासुधानिधेस्त्रयस्त्रिंशमङ्कमारभ्य द्वापञ्चाशाङ्कपर्यन्तैर्विंशत्याङ्कैः संप्रकाशिता ज्योत्स्नेव विद्वज्जनमानसकुमुदानि विकासयन्ती मामकान् संशोधनादिपरिश्रमान् सफलयतादिति सर्वान्तर्यामिणमुपयाचते ।

सांख्यशा॰ बालशास्त्री

॥ श्रीः ॥

॥ शालिकनाथीयप्रकरणपञ्चिकाया उपलब्धस्यान्तिमभागस्य वर्णनम् ॥

पूर्वमेतत्पत्रारम्भे महाशयविट्ठलशास्त्रिणा प्रकरणपञ्चिकायाः (७८) पत्राण्यादित उपलब्धानि तदनुसारेण तद्वर्णनमकारि । संप्रति च तस्यैव जीर्णपुस्तकस्य कस्य चिन्महाराष्ट्रस्य वेश्मनि शततमपत्रप्रभृतिषड्विंशत्युत्तरशततमपर्यन्तानि (२७) पत्राणि मयोपलब्धानि । चरमे च पत्रे (समाप्ता चेयं प्रकरणपञ्चिका) इति पुस्तकलिपिसदृशाक्षरैव पङ्क्तिर्दृश्यते, तेन चेयत्ताप्यस्य स्पष्टमेवावधार्यते । एवं तदनुरूपयैव (संवत् १६४१) इति लिप्या लिपिकालोपि । एवमेतच्चरमपृष्ठे (१२६) इत्यङ्कस्य दर्शनेनारम्भपृष्ठे यद् (१०२६) इति लिखितमस्ति तत्र बिन्दुर्लेखकप्रमादपतितः पत्रसंख्याङ्कश्चायमित्यपि व्यक्तं निश्चीयते। यद्यप्युपलब्धेभ्यः पत्रेभ्यः पूर्वाणि (२१) पत्राणि न लब्धानि लब्धेष्वपि वाक्यार्थमातृकानामकप्रकरणं किंचित्खण्डितद्वितीयपरिच्छेदप्रभृत्येव लब्धं तथाप्यतिप्राचीनः परमप्रौढसंस्कृतो दुर्लभतमो ऽयं निबन्धराज इति तावानेव प्रकाशमर्हतीति श्रीमन्महाशयप्रभुवरग्रिफिथसाहिबवर्याणामनुमत्या संशोधनपुरस्सरं तं प्रकाशयितुमुत्सहते ।

सांख्य॰बालशास्त्री

॥ श्रीपरमेश्वरो जयति ॥

प्रकरणपञ्चिकायां वाक्यार्थमातृकाया

द्वितीयः परिच्छेदः ।

लिङादिशब्द एव प्रमाणमिति साहसम्, अगृहीतसंबन्धस्य शब्दस्यावाचकत्वात् । अनवधारिते हि संबन्धिनि संबन्धबोधवैधुर्यात् । यत् च तत्र स्वाध्यायाध्ययनविधिना सर्वे विधायका आत्मा च नियुज्यन्ते, पुरुषं हि विधिः प्रेरयति यश्च येन प्रेर्यते ते ऽचेतना न युज्यन्ते न चाचेतनानां नियोज्यत्वमपि संभवति, अनियोज्यत्वे किं तत्र युज्यते । तदप्यनुपपन्नम् । शब्दभावनासु सर्वशब्दानां स्वत एव सकर्तृत्वाद्विनियोगानपेक्षणात् । अथ न पुरुषप्रेरणे विनियुज्यन्ते किं त्वर्थविबोधने । तदपि न घटते । तत्रापि नियोज्यानपेक्षायास्तुल्यत्वात् । अध्ययनविधेश्चाक्षरसंस्काररूपाध्ययनविधायकत्वाभ्युपगमः । तथा चाहुः ।

> द्रव्यादीनां पुनः कस्मिन् स्वाध्यायेन्तर्गतो भवेत् ।
> त्रिधापि प्रतिभात्यस्मिन् संस्कार्यत्वस्य निर्णयः ॥
> संस्कार्यगणनायां च युक्तवाक्षरसंस्क्रिया ।
> स्वाध्यायो हि स्फुटं कर्म साक्षात्संस्क्रियते हि सः ॥

इति । संस्कारविधिश्च न संस्कार्यं नियुङ्क्ते, प्रमाणान्तरावसितोपयोगस्य शेषित्वात् । संस्कारपर्यवसायी तु संस्कारविधिर्न संस्कार्यस्य कार्यं कल्पयेतेति । आत्मा चाध्ययनविधिना नियुज्यते विनियुज्यते वेति प्रतिपत्तिद्वयस्याप्यसंभवाद् अनुपपन्नम् । कथं च पुरुषप्रवृत्तिस्तस्या भाव्या । न तावदनन्तरनिष्पत्तेः विधिज्ञानस्य करणत्वाभावे ऽप्रसङ्गात् । क्रियाफलं हि तदा पुरुषप्रवृत्तिः स्यात् । न च क्रिया स्वफलप्रसवाय करणमपेक्षते । न च गमनं संयोगविभागारम्भे करणापेक्षम् । स्यान्मतम् । शब्दो विधिज्ञानं जनयित्वा तत्करणानुगृहीतः प्रेरणारूपं स्वव्यापारमारभते इति, न करणत्वाभावः क्रियानिष्पत्तावेव करणत्वात् । तदिदमलौकिकम् । नहि कस्य चिद्वस्तुनः स्वज्ञानमुत्पादहेतुः प्रतीतम् । एवं चार्थवादोदितप्राशस्त्यस्यापीतिकर्तव्यतात्वं विध्वस्तम् । योग्यतया हि तस्य तथाभावः । न च प्रेरणोत्पत्तौ शब्दकर्तृकायां करणीभूतज्ञानानुग्रहयोग्यता तस्य शक्यतेवगन्तुम् । पुरुषकर्तृकायां प्रवृत्तौ तस्य योग्यतावगमः, प्रशस्ते प्रवृत्तिदर्शनात् । स्यान्मतम् । अप्रशस्ते पुरुषप्रवृत्त्यसंभवे प्रेरणैव नोपपद्यते । तदसत्, च फलसंभवायत्ता क्रियानिष्पत्तिः, क्रियानिष्पत्त्यायत्तैव फलसिद्धिरिति लोके प्रतीतम्, अत एव तस्मिन् पक्षे निष्फलेपि प्रेरणासिद्धेः प्रवृत्तिः स्यात् । अथ फलमपीतिकर्तव्यतापदनिवेशि प्राशस्त्यवदतस्तदभावे प्रेरणा निष्पद्यतइति चेत् । तर्हि फलमेवास्त्वितिकर्तव्यतांशपरिपूरकं किं प्राशस्त्येन । सत्यमेतद्, अस्ति तावत् तदपीति न त्यज्यते । एवं तर्ह्यश्रुतप्राशस्त्ये तदपेक्षा माभूत् । ततश्च तदपि देशादिकल्पनमघटमानं केवलस्य विधेर्दार्विहोमवत्करणेतिकर्तव्यताकल्पना कल्पनामात्रमेव दर्विहोमवदिति च सिद्धो दृष्टान्तः । तत्र श्रौतद्रव्यदेवतास्मृत्याचारप्राप्ताचमनादीतिकर्तव्यतामात्रेणोपकारप्राप्तेरभिमतत्वात् । नह्येकस्यैव वस्तुनो ऽनुग्राहकता ऽनुग्राह्यता च स्वात्मन्युपपद्यते । अथ शब्दः प्रेरणां करोत्येव, प्रवृत्तिस्तु न तावन्मात्रेण, किं तु तज्ज्ञाने सति । एवं तर्हि ज्ञानफलमेव प्रवृत्तिरस्तु न प्रेरणाफलं, तस्मिन्सति भावादसति च अभावात् । तथा च सति

शब्दभावनाविधिरिति न सिद्धम्। किं च शब्दोऽम्बरगुण इति प्राप्यकारीन्द्रियवादिनाभ्युपेयम्, अन्यथा नभसः श्रोत्रभूतस्य शब्दस्य च प्राप्त्यसंभवात्संयोगसमवाययोरन्यतरस्य प्राप्तिरूपत्वात्, संयोगस्यान्यतरकर्मजस्योभयकर्मजस्य संयोगजस्य द्रव्यत्वे शब्दस्य नभसा सहासंभवात्, तस्य त्रैविध्यनियमात्, पारिशेष्यात्समवायः प्राप्तिरित्याकाशगुणः शब्दः। न च तस्य व्यापारसंभवो, द्रव्याश्रितत्वाद्व्यापाराणाम्। कथं तर्हि शब्दस्याभिधानलक्षणो व्यापार आश्रीयते। यथा तत्तथा श्रूयताम्। यत्तदात्मन्यर्थविषयज्ञानं शब्दविषयज्ञानानन्तरं जायते तच्छब्दकर्त्रार्थतया यदा विवक्ष्यते तदा तदभिधानमित्युच्यते। परस्य व्यापारे भवत्येव कर्तृता परिस्पन्द इवात्मन इति न कश्चिद्दोषः। कथं चासौ शब्दव्यापारोऽर्थभावनाविषयः। एकप्रत्ययवाच्यत्वादिति चेत्। तदुक्तम्।

विधिभावनयोश्चैकप्रत्ययग्राह्यताकृतः।
धात्वर्थात्प्रथमं तावत्संबन्धोऽध्यवसीयते॥

इति। तच्च। प्रत्ययस्य भावनाभिधानमस्मिन्पक्षे दुर्घटं यतः। ननु च सर्वाख्यातानां भावनावचनता करोतिसामानाधिकरण्याद्व्यवसीयते। तथाहि। भवत्यर्थस्य कर्तुः प्रयोजकव्यापारो भावना। सैव च कृतिः। भाव्यमानस्य क्रियमाणत्वात्तस्य कृतिकर्मत्वात्। किमकार्षीदपाक्षीत् करोति पचति किं करिष्यति पक्ष्यति इति प्रश्नोत्तरदर्शनात्। करोत्यर्थः सर्वाख्यातैरभिधीयते इति गम्यते। अन्यथा करोत्यर्थविषयप्रश्ने तदुत्तरानुपपत्तिः। तत्रापि सत्यामपि प्रकृतौ यजन्त्यादिषु करोत्यर्थानवबोधात्। आख्यातप्रत्ययसन्निधाने च तदवगमाद् आख्यातानामेव सोऽर्थ इति निश्चीयते। तदसत्। किं करोतीत्यस्य प्रश्नस्य यद्ययमर्थः यत्करोति तत्किमिति तत्र चेत्पचतीत्युत्तरं स्यात्। तदा पाकं करोतीति स्यात्तस्मिन्नर्थे पचतीति वर्तते। तथा च सिद्ध्येदाख्यातानां करोत्यर्थता। न चैतदेवमनवगते हि धातुवाच्ये व्यापारविशेषे तद्विशेष एवैवं पृच्छ्यते, तत्र पचतीत्युत्तरं, तथा च न सिद्ध्यति धात्वर्थातिरिक्तकरोत्यर्थवचनता आख्यातानाम्। सर्वधात्वर्थाश्च कस्य चिदभूतस्य भवनेऽनुकूलतां भजन्तः करोत्यर्थतामापन्नाः करोतिना प्रष्टुं निर्देष्टुं च शक्यन्त इति तद्विषयप्रश्नोत्तरे एवेति। किं च धातुवाच्यव्यापारविशेषविषयत्वेनापि प्रश्नोत्तरयोरुपपत्तौ तद्व्यतिरिक्तकरोत्यर्थवाचकता ऽऽख्यातानां न शक्यते वक्तुम्। अपि च समप्रयत्नक्रियेषु देवदत्तादिषु व्यापारभेदसंभवाद् घटेतां प्रश्नोत्तरे, व्यतिरिक्तकरोत्यर्थविषये किं करोति अथ गच्छति इति प्रश्ने गच्छतीति चोत्तरे गमनातिरिक्तव्यापाराभावादनुपपत्तिरेव स्यात्। धात्वर्थविशेषविषयत्वे तत्राप्युपपत्तिः। अथ संयोगविभागौ धात्वर्थः परिस्पन्दस्तु विभक्त्यर्थ इति तत्रापि धात्वर्थव्यतिरिक्तव्यापारसंभवाभावानुपपत्तिः। तच्च। परिस्पन्दस्यैव गमिवाच्यत्वाच्च केवले संयोगे विभागे वा गमेः प्रयोगः। स्थाणौ श्येनेन वियुक्ते संयुक्ते वा अप्रयोगात्। नापि द्वयोरुत्पत्य निपतिते श्येने स्थाणौ प्रयोगप्रसङ्गात्। एकक्रियाक्षणजन्यौ संयोगविभागौ गमिवाच्याविति यद्युच्येत तर्हि क्रियैवास्तु वाच्या, किमसावुपाधिकोटौ निवेश्यते। एवं ह्युपाधिसमाश्रयणगौरवमेव परिहृतं भवति। अपि च वृद्धव्यवहाराच्छब्दार्थनिर्णयः। न चाख्यातानां भावनावचनत्वमन्तरेण कस्य चिद्वृद्धव्यवहारस्यानुपपत्तिः। प्रश्नोत्तरे तु संबन्धज्ञानोत्तरकालभाविनी। अतो न तद्वशेन संबन्धिनिरूपणा, कर्त्रादिसंख्यामात्रवाचितया आख्यातप्रयोगोपपत्तौ नाधिकं वाच्यं शक्यं कल्पयितुम्। अपि च पाकं करोति देवदत्त इत्यत्र तावत्पच्यर्थं पाकशब्दो ब्रवीति तदनुगुणं प्रयत्नं करोतिराचष्टे। आख्यातं तु केवलकर्तृसंख्यां धक्तीति सिद्धं तन्मात्रवाचित्वम्। अतोऽन्यत्रापि तथैव वर्तत इति युक्तम्, एवं च पचति देवदत्त इत्यस्य यद्विवरणं पाकं करोतीति तदप्यनुपपन्नम्। पचतीत्यत्र यः पुरुषप्रयत्नो यत्संबन्धेन पच्यर्थः साध्यभूतः तं करोतिना प्रकृतिभूतेनोपादाय विवरणोपपत्तिः। यत्रापि प्रयोगो गमनं करोतीति न प्रयत्नोऽपरोऽस्ति तत्रापि गमनस्य साध्यतां दर्शयितुं गौणः करोतिप्रयोगो द्रष्टव्यः, पक्षद्वयेऽपि तुल्यत्वात्। यस्तु देवदत्त ओदनं पचतीत्यादौ वृद्धव्यवहार एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगादाख्यातानां तदर्थतामाह। स इत्थं शिक्षयितव्यः। वत्स किं न वेत्सि। अनन्यलभ्यः शब्दार्थ इति। इह च प्रकृत्यर्थोत्क्षेपेणापि प्रयत्नप्रतिपत्त्युपपत्तेर्न शक्यते तद्वाचकताख्यातानामाश्रयितुमिति। ननु प्राभाकरा अपि भावनावाचकतां कथमाख्यातप्रत्ययस्येच्छन्ति। उच्यते। न सर्वाख्यातप्रत्ययानां भावनावचनत्वमभ्युपेमः, किं तु कार्याभिधायिनो लिङादयः कार्यस्यान्यथानभिधानात् कृत्यभिधायिन इष्यन्ते। कृतिसंबन्धि हि कार्यं कृत्यनभिधाने नाभिहितं स्यान्न ह्यस्ति संभवः कृतिश्च नाभिधीयते कार्यं च नाभिधीयत इति। अथ मतम्। यथा दण्डीत्यत्र प्रत्ययेन दण्डो नाभिधीयते, अथ च तद्विशिष्टपुरुषप्रतीतिरित्येवमिहापि भवेदिति। तच्च। तत्राप्यप्रतीते दण्डे न तद्वति प्रत्ययः। अस्ति च तत्र प्रकृतिभूतो दण्डशब्दः। स च तस्य प्रत्याययिता, न चेह तथा संभवति, प्रकृतीनां पुरुषव्यापाराभिधाननियमात्। पुरुषो हि चेतनः कार्यं लिङादिभिरवबुध्यते। न चासौ परकृतिसंबन्धि स्वयं कार्यं बोद्धुमलमिति तदीयकृत्यभिधानमेषितव्यम्। तस्य

च कृतिः प्रयत्नरूपा न च संबन्ध्यननुभवे तदभिधायिन इति न दण्डिन्यायस्यायं विषयः । स्यान्मतं, यथा तिङां कर्त्रादिसंख्यामात्रवचनता क्रियाक्षेपेण च कर्त्रादीनां प्रतीतिः तथेहापि क्रियाप्रयत्नमाक्षिपति माभूत्तस्य लिङ्वाच्यतेति । तदसत् । यद्यपि प्रकृत्यर्थभूतया क्रियया प्रयत्न आक्षिप्यते तथापि तदायत्तसिद्धिकतया कथमपूर्वं गम्यते । प्रयत्नाभिधाने तदवच्छिन्नतयाभिधीयमानं तदायत्तसिद्धिकमवगम्यते नान्यथा । न च कृत्यनवच्छिन्नं स्वरूपमात्रेणापूर्वमभिहितं कृतिमाक्षेप्तुमलम् । अवगतसंबन्धं हि वस्त्वाक्षिप्यते । न च शब्दमन्तरेणापूर्वस्य प्रयत्नसंबन्धावगमे कारणान्तरमस्ति । अतः कथं तत्प्रयत्नमाक्षिपेत् । तस्मादपूर्वकार्याभिधायिनां प्रयत्नाभिधानमवश्याश्रयणीयमिति विषयकरणीये निपुणतरमुपपादितमित्यलमतिप्रसङ्गेन ॥

तत्र न क्रियामात्रकं तावदहं बुद्ध्वा प्रवृत्तो, न चापि फलमात्रकं, न क्रियाफलसंबन्धमात्रं वा । क्रियाफलयोः साध्यसाधनतावगमेऽपि न प्रवृत्तिरुपपद्यते । तृप्तिर्मेभोजनेतीते वर्त्तमाने वा ऽप्रवृत्तिर्भविष्यत्यपि तत्साधने सामुद्रविद्राव्यातद्वानुष्ठानाभावात् । पुरुषाशयावगमस्तु प्रवृत्तिहेतुतया माशङ्कितोपि स्वतन्त्रप्रवृत्तौ व्युत्पित्सोर्दूरोत्सारितत्वात् । किं तु कार्यतां बुद्ध्वा प्रवृत्तो ममेदं कार्यमिति प्रतीत्याहं सर्वत्र प्रवृत्तः । तथाहि ।

आस्तां तावत्क्रिया लोके गमनागमनादिका ।
अन्ततः स्तनपानादिस्तृप्तिकार्यपि या क्रिया ॥
सा यावन्मम कार्येयमिति नैवावधार्यते ।
तावत्कदापि मे तत्र प्रवृत्तिरभवन्नहि ॥

अत्रापर आह । सत्यं कार्यावगमादेव प्रवृत्तिरिष्टसाधनतैव तु कार्यता । न परा का चित्सैव प्रवृत्तिहेतुर्विधिरुच्यते । तदाह ।

अपेक्षितोपायतैव विधिरिष्टो मनीषिभिः ।
ततो ह्यध्यवसायादिर्वा कस्मान्नाभिधास्तः ॥

तथा ।

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ॥
कर्त्तुरिष्टाभ्युपाये हि कर्त्तव्यमिति लोकधीः ।
विपरीतं त्वकर्त्तव्यमिति तद्विषये ततः ॥

तत्र तावदिदमेव वक्तव्यम् । अतीतस्य वर्त्तमानस्य चेष्टसाधनतास्ति न च तत्कार्यतया ऽवसीयते । तेनान्या कार्यता ऽन्या चेष्टसाधनतेति । तथा च प्रवृत्तिरपि तन्मात्रावगमायत्ता न भवतीति उपेत्यैव तावत्तं फलसाधनताकार्यतयोर्भेदं विनिर्दिशति फलसाधनता नाम या सा नैव च कर्त्तव्या ।

कार्यता कृतिसाध्यत्वं फलसाधनता पुनः ।
कारणत्वं फलोत्पादे भिद्येते ते परस्परम् ॥

यद्यप्येकवस्तुनिवेशिता द्वयोः तथापि स्वरूपभेदो ऽस्त्येव । तदेव हि वस्तु फलं प्रत्युपायभावात्फलसाधनमित्युच्यते । कृत्यधीनात्मलाभतया च कार्यमिति । किमिति दृष्टाभ्युपायेष्वेव कर्त्तव्यतावगमो ऽन्यत्र नेति । तत्राह ।

किं तु स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत् ।
फलसाधनता तत्र कारणं तेन कार्यता ॥
तद्भावभाविनी नित्यं तदात्मेव प्रतीयते ।

स्वभावेन हि कर्माणि दुःखोत्पादहेतुभूतानि । तेषु कार्यत्वावगमः फलसाधनतावगमनिबन्धनः । कार्यता हि न कृत्यधीनसिद्धिमात्ररूपा, किं तु कृतिं प्रति प्रधानभूतं सद्यत्तदधीनसत्ताकं तत्कार्यमुच्यते । तच्च कृतेः प्रधानं यदधिकृत्य कृतिः प्रवर्त्तते । न च दुःखं दुःखहेतुभूतं वाधिकृत्य कृतेर्वृत्तिरुपपन्ना । नाप्यदुःखमदुःखहेतुं वा । किं तु सुखं सुखहेतुं वा । तत्र न तावत्स्वयं सुखरूपं कर्म । सुखसाधनमपि चेन्न स्याद् न तस्य कृतिं प्रति प्राधान्याभ्युपगमो घटते । अतः कर्मसु कार्यत्वावगमः फलसाधनतावगमनिबन्धन इति ज्ञापककोटिनिविष्टां फलसाधनतां कार्यतानुरुध्यते । न त्वसौ तदात्मैव । तथा चासाधनस्यापि सुखस्यैवास्ति कार्यता । सुखं हि सर्वः कार्यतयावैति । न तस्य फलसाधनतामपेक्षते । तेन साधनताक्षीणकार्यतावगमेन मे प्रवृत्तिरिति निश्चित्य व्युत्पित्समानश्चैत्रं प्रवर्त्तमानं दृष्ट्वा ऽनुमिनोति, चैत्रोपि कार्यबोधात्प्रवर्त्तत इति चैत्रस्य प्रवृत्तिर्धर्मिणी कार्यबोधनपूर्विकेति साध्यो धर्मः बुद्धिपूर्वकत्वे सति प्रवृत्तित्वान्मदीयप्रवृत्तिवदिति । लिङादयश्च प्रवृत्तिहेतुभूतार्थाभिधायिनः कार्यमेवाभिदधते । तस्यैवावगतस्य प्रवृत्त्यनन्तरकारणत्वात् । इच्छा यद्यपि प्रवृत्तिहेतुस्तथापि सा लिङादिवाच्या न भवति तदवगमस्य प्रवृत्तावनपेक्षितत्वात् । उत्पन्ना हि सा प्रवृत्तिकारणं नावगता । नन्वेवमपि कथं लिङादीनां कार्ये व्युत्पत्तिरिति । अत आह ।

शब्दान्तराणि स्वार्थेषु व्युत्पद्यन्ते यथैव हि ।
आवापोद्वापभेदेन तथा कार्ये लिङादयः ॥

लिङादियुक्तवाक्यश्रवणे तद्भावभाविन्या प्रवृत्त्या विशिष्टकार्यावगतिमनुमाय वाक्यस्य तावद्धेतुतामध्यवस्यति । तत्रापि कोर्थभागः केन शब्दांशेनाभिहित इति विवेचने लि-

ङाद्याव्वापेन कार्यावगतिदर्शनात्तदुच्चारे चादर्शनात्तएव कार्यावगतिं कुर्वन्तीति शब्दान्तरवल्लिङादीनां कार्यवाचकत्वव्युत्पत्तिसिद्धिः । ननु लोकव्यवहाराल्लिङादयो वाचकतया व्युत्पाद्यमानाः प्रैषादिष्वेव वाचकतया व्युत्पत्तिमर्हन्ति । तत्रैव तेषां प्रयोगदर्शनादिति ।

कार्यमेव हि कर्तॄणां ज्यायः समकनीयसाम् ।
प्रवृत्त्यापेक्षया भेदात्प्रैषादिव्यपदेशभाक् ॥

प्रवर्त्यपुरुषापेक्षया ज्यायसा वक्त्रा प्रतिपाद्यमानं कार्यं प्रैष इति व्यपदिश्यते । समेनामन्त्रणं हीनेनाध्येषणमिति प्रैषादिप्रतिपादका अपि च लिङादयः ।

कार्यमेव हि सर्वत्र प्रवृत्तावेककारणम् ।
प्रवृत्त्यव्यभिचारित्वाल्लिङाद्यर्थोऽवधार्यते ॥

प्रवृत्तिर्हि बालेन स्वात्मनि कार्यावगमपूर्विका प्रतिपन्नेति मन्त्रपुरुषानपि प्रवर्त्तमानान्दृष्ट्वा कार्यावगममेव बालः कल्पयतीति प्रैष्यादीनामपि प्रवृत्तिः कार्यावगमनिबन्धनेति कर्त्तव्यमेव हि प्रैषादिव्यपदेशयोगीति सिद्धम् ॥ वस्तुतस्तु प्रैषादीनामपि प्रवृत्त्यव्यभिचारित्वात्कार्यस्य च प्रवृत्तिषु सर्वासु हेतुभूतत्वात्प्रैषादिष्वपि लिङादीनां कार्यमेवार्थ इति निश्चीयते । केन पुनः प्रमाणेन बालः स्वयं कार्यमवगच्छति यतः प्रवर्त्ततइति, अत आह ।

कृतिसाध्यं प्रधानं यत्तत्कार्यमवसीयते ।
तच्च मानान्तरेणापि वेद्यमोदनपाकवत् ॥

कृतौ सत्यां च भावादसत्यां चाभावादनुमानतः कृतिसाध्यता तावदवगम्यते । यदधिकृत्य कृतिः प्रवर्त्तते तत्कृतिः प्रधानम् । प्रयत्नश्च कृतिः । स च मानसप्रत्यक्षवेद्य इति विशिष्टे प्रयोजनतापि प्रयत्नस्य प्रत्यक्षवेद्यैव तेन प्रत्यक्षानुमानाभ्यामवमन्यते । यथा चौदनः पाकस्येति न किं चिदनुपपन्नम् । उपसंहरति ।

एवं कार्यात्मके ऽप्यर्थे व्युत्पद्यन्ते लिङादयः ।
तदन्वितेषु स्वार्थेषु तथा शब्दान्तराण्यपि ॥

एवमपि कथं मानान्तरावेद्यकार्यवाचिता लिङादीनामित्याशङ्क्य मीमांसामवतारयति ।

सन्दिग्धार्थमिदं त्वत्र तत्कार्यं किं क्रियात्मकम् ।
यद्वा तद्व्यतिरेकीति ।
को नु निर्णय इत्यत्राह ।
तत्र लोकानुसारतः ॥
प्रमाणान्तरविज्ञेया क्रिया कार्येति यद्यपि ।
प्रतिभाति ।

लोके हि लिङादियुक्तवाक्यश्रवणे विशिष्टक्रियानुष्ठानदर्शनात्तद्विषया कार्यावगतिर्लिङादिभिः क्रियतइति युक्तम् । अवगतिप्रवृत्त्योरेकविषयत्वात् । नहि अन्यत्कार्यतयावगम्यान्यत्र बालः प्रवर्त्तते । किं च क्रियायां कार्यभूतायां लिङादियुक्तवाक्यप्रतिपाद्यमानायां शक्तिकल्पनालाघवं स्यात् । तथाहि, धातुरेव कार्यभूतं स्वार्थं ब्रवीतु । तथाभूतार्थवाचिनस्तु धातोः परे लिङादयो भवन्तीत्याश्रीयताम् । लिङादिश्रवणे तु तथाभूतार्थतया धातुः प्रयुक्त इत्यवगम्य कार्यभूतधात्वर्थावगमः संपद्यते । यथा लिङादिभ्यो वर्त्तमानाद्यध्यवसायः, तेष्वपि वर्त्तमानेर्थं वर्त्तमानाद्धातोर्लडित्येव सूत्रार्थः । कर्त्रादिसंख्यामात्रवाचित्वमेव केवलं लडादीनामिव लिङादीनामप्यर्थ इति क्रियैव कार्यतया वेदे ऽप्यवगम्यतइति यद्यपि विवेकसमर्थानामवगतिर्भवति ।

तथा वेदे सिद्धान्ते ऽवस्थिते सति ॥
स्वर्गकामादयः कार्ये नियोज्यत्वेन संगताः ।
स्वर्गकामादयः शब्दैर्वक्तव्या इत्यवस्थितम् ॥

षष्ठाद्ये ह्येतदुक्तम् । लिङादिप्रयोगे तावत्कार्यावगतिरस्तीति निर्विवादम् । कृतिसाध्यं च कार्यं भवति । सति कर्तरि तस्यात्मलाभः । कर्तृलाभश्च स्वसंबन्धिकार्यविबोधे सति भवति नान्यथा । तेन यद्यपि लोकानुसारेण क्रियाया एव कार्यतया बोध्यमानाया वाक्यार्थत्वात्तदन्वयित्वाच्चेतरेषामपि पदार्थानां कारकत्वादृते चान्यस्य क्रियान्वयित्वासंभवाल्लोहितोष्णीषन्यायेन विशेषणभूतस्वर्गकामनासमर्पणपरतया कर्तृविशेषणत्वेन स्वर्गकामस्यान्वयो ऽवगम्यते, तथापि स्वसंबन्धिकार्यबोद्धृत्वेनैवान्वयो वर्णनीय इति नियोज्यसमर्पकत्वमेवाश्रीयतइति ॥ एवमपि किमित्याह ।

नियोज्यः सर्वकार्ये यः स्वकीयत्वेन बुध्यते ।
तथापि किमित्याह ।
स्वर्गादिः कामयोगाच्च साध्यत्वेनैव गम्यते ॥

साध्यविषयैव हि सर्वत्र कामना भवति । तेन तत्संबन्धात्साध्यभूतं स्वर्गादि काम्यमानतया पुरुषं विशिनष्टि ।

तेन साध्यत्वपर्यन्तस्वर्गादीच्छाविशेषितः ।
तदेव शक्नुयात्कार्यं बोद्धुं यत्काम्यसाधकम् ॥

अत्र कश्चिदाह । यद्यपि कामनायोगात्साध्यता स्वर्गादीनामवगम्यते । तथापि प्रकृतकार्यसाध्यत्वावगमो निष्प्रमाणक एव । अन्यसाध्यस्यापि साध्यत्वसंभवात् । न च यत्काम्यते

तस्यावश्यं साधनमस्ति मनोरथपरंपराहृतचेतसो हि तत्रास्ति यत्र कामनाविषयीभवति । न च तस्य सर्वस्य साधनं भवति सर्वज्ञत्वमपि के चित्कामयन्ति न च तस्योपायसंभवः । अथ तदिच्छावतो ऽतत्साधने कर्तृता नोपपद्यते । तत्र । दृश्यन्ते हि ग्रामाभिगमनकामा हि यादृच्छिकीषु क्रियासु प्रवर्त्तमानाः । अपि च सर्वोभ्युपायार्थ्येव पुरुषस्तथापि प्रायशस्तद्विरोधिष्वे-वेन्द्रियार्थेषु पवर्त्तमाना दृश्यन्ते । अत्रोच्यते । स्वर्गादिकं कामयमानस्य तदेव कार्यतया बोद्धुमवकल्पते । यदेव तस्य काम्यमानस्य सिद्ध्यनुगुणमन्यथा हि तत्कामिना सता तत्का-र्यतया ऽनवबुद्धं स्यात् । अपरित्यक्ततत्कामनासंबन्धो हि त-त्साधनं कार्यतया ऽवबुध्यते । तस्माद्यत्कामिनो यत्कार्यतयो-पदिश्यते तत्तस्य काम्यस्य साधकमिति नियोज्यकार्यान्वया-नुपपत्त्यैव गम्यते । एवं सति किं फलमित्याह ।

लिङादिस्तत्र कार्यं चेत् क्रियामेवावबोधयेत् ।
समन्वयो नियोज्येन तदानीमेव हीयते ॥

कथमित्याह ।

क्रिया हि क्षणिकत्वेन न कालान्तरभाविनः ।
स्वर्गादेः साध्यमानस्य न शक्ता जननं प्रति ॥
इष्टस्याजनिका सा च नियोज्येन फलार्थिना ।
कार्यत्वेन न संबन्धमर्हति क्षणभङ्गिनी ॥

कार्यविरोधि कर्मेति प्रमाणान्तरसिद्धम् । परिस्पन्दो ह्युत्तर-देशसंयोगोदयापवर्गीत्याशुतरविनाशिनी । स्वर्गश्च नियतदे-शान्तरकालान्तरभोगः । ननु प्रीतिमात्रवचनः स्वर्ग इति षष्ठाद्ये साधितं प्रतीतिसाधनेषु द्रव्येषु स्वर्गशब्दप्रयोगात्, न च तेषु स्वरूपनिबन्धन एव तत्प्रयोगः । प्रीत्यपगमे तदभावात् । न च तत्साधनवचनता तदनभिधाने घटते । तदभिधानाभ्युपगमे न तद्वाचकतैव, लक्षणया तत्साधने प्रयोगोपपत्तेः । तत्र शक्तिकल्पनापरिक्षयात् । अखण्डशब्दतया च दण्डिन्यायस्या-संभवात्तदन्तर्गतस्य दण्डशब्दस्य दण्डप्रत्यायकत्वसंभवात् प्रीतेश्च कर्मानन्तरभावित्वमपि संभवत्येव । उच्यते, न प्रीति-मात्रवचनतया ज्योतिष्टोमादिचोदनासु स्वर्गशब्दस्य प्रयोगो-ऽवगम्यते । अर्थवादेषु दुःखासंभिन्नचिरतरोपभोग्याभिलाषोप-नेयप्रीतिश्रवणात् । तत्र यदि विध्युद्देशगतः स्वर्गशब्दस्तथा-विधप्रीतिपरप्रयोगतया वर्ण्यते तदातिपरोक्षार्थवादपदानां वृत्तिरादृता न भवेदिति तदानुगुण्येन तादृश्यामेव प्रीतौ स्व-र्गशब्दः प्रयुक्त इति निश्चीयते । तथावस्था नियतमेवं देशान्त-रभोग्या । अतो न कर्मानन्तरभाविनीति न तत्र कर्मण आ-शुतरविनाशिनः साधनतावकल्पते । यस्मिन्हि पूर्ववर्त्तिनि यत्निष्पाद्यते तत्तस्य साधनमितिलोकप्रतीतिरत एव च चिर-ध्वस्यापि कर्मणः शास्त्रेण साधनत्वं बोध्यते इति ये ब्रुवते तेपि निरस्ताः । एवं चासावाशुतरविनाशिनी क्रिया स्वर्गकामिना नियोज्येन सह कार्यतया संबन्धुं नार्हति । स्वर्गं प्रति साधनत्वा-नुपपत्तेः ॥

शेष उत्तराङ्के

॥ अथ बालभारतस्य ॥

॥ तृतीयः सर्गः ॥

सुस्वादुशीतविशदः सुधारसो
यद्वक्त्रपद्मगतिसारसौरभः ।
कर्णप्रियोऽप्यजनि भारतीभवन्
कृष्णं तमानमत योगिनं जनाः ॥ १ ॥
दृष्टा न ते क्वचन पाण्डवा इति
ख्याते चरैः कुरुनरेश्वरस्तदा ।
लक्ष्ये क्व तानिति स चिन्तयाकुलः
पप्रच्छ संसदि नदीसुतादिकान् ॥ २ ॥
भीष्मोऽभ्यधत्त सुलभः शुभैकभू-
र्भूखण्डभूषणमणिर्युधिष्ठिरः ।
एभिश्चरैरमितिभिः स वीक्षितः
सर्वत्र पर्वतधुनीवनादिषु ॥ ३ ॥
यत्रातिशुद्धविधिविप्रमण्डली-
घुष्टत्रयीप्रमुदितस्त्रयीतनुः ।
काले जलं च तुहिनं च शक्तिमान्
धर्मं च मुञ्चति नृणामदुःखदम् ॥ ४ ॥
दुग्धैः सहर्षसुरभीस्तनच्युतै-
रामूलमद्भुतरसासु भूमिषु ।
वापीषु यत्र जलमुद्भवत्यहो
पातालनिर्यदमृतौघसंनिभम् ॥ ५ ॥
सत्कर्मकान्तवपुषाद्भुताद्भुत-
श्रीलक्षणेन सुतवत्सलात्मना ।
धर्मेण सत्यशुचिनाङ्घ्रिणान्वितो
देशोऽस्ति तत्र खलु धर्मनन्दनः ॥ ६ ॥
ऊचे सुशर्मनृपतिस्त्रिगर्तभू-
नाथस्तदा कुरुपतिं कृताञ्जलिः ।

ख्यातं चरेमेम समस्तभूमिभाग्-
देशेषु मत्स्यविषयोऽद्य वर्ण्यते ॥ ७ ॥
तन्निश्चितं चरति गुप्तचर्यया
तत्रैव धर्मतनुजः सहानुजः ।
दृश्यश्च केश्चन कदाप्युपक्रमैः
स्यान्नैष वो हरिरयोगिनामिव ॥ ८ ॥
तन्मत्स्यराजनगराद्धरामहे
वृन्दं गवां तदिह चेद् द्विषः स्थिताः ।
तद्गोपरीभवरुषा गमिष्यति
प्रत्यक्षतामसमयेऽपि फाल्गुनः ॥ ९ ॥
तथापि ते यदि भवन्ति न ध्रुवं
वीरप्रकाण्ड तदपाण्डवं जगत् ।
तत् तादृगद्भुतविभूतिभूषणं
मत्स्याधिभूर्ननु विगृह्य गृह्यते ॥ १० ॥
यो नाम धामचयधाम कीचक-
स्तस्याजनि क्षितिपतेश्चमूपतिः ।
दैवाज्जगाम जगतां स दुर्जयो
गन्धर्वकोपहुतभुक्पतङ्गताम् ॥ ११ ॥
तन्मत्स्यभूमिविभुरस्तकीचकोऽ-
स्माकं सशल्यरहितेव शर्करा ।
आत्मप्रतापपरितापितात्मना
तं वीर कीर्तिपयसा समं पिब ॥ १२ ॥
गोचद्विषं सकलबन्धुमेकतो
दूरेण गोहरणतो हरामि तम् ।
तत्पतनं त्रिभवमतमन्यतः
स्वामिन् गृहाण विहितोद्यमः स्वयम् ॥ १३ ॥
आदाय संविदमिमां सुशर्मणः
प्रोत्साहितस्तपनरन्दनादिभिः ।
राजा रजःकलुषकीर्तिसिन्धुना
सैन्येन गोहृतिमतिस्ततोऽचलत् ॥ १४ ॥
दिग्भ्यो यशः स्वमिव देहतः स्वतः
पुण्यप्रतानमिव पावनं ततः ।
भर्ता त्रिगर्तविषयस्य याम्यदि-
ङ्मुक्ता विराटनगराज्जहार गाः ॥ १५ ॥

पूर्णेऽथ धर्मतनयस्य वत्सरे
गुप्ते तदा कलकलाकुलाननः ।
गोपालजालपतिरेत्य संसदि
श्वासोर्मिजर्जरितगीर्जगौ नृपम् ॥ १६ ॥
यः कीचकेन करिणेव पल्वल-
श्चक्रे पुरा स्फुरदकीर्तिकर्दमः ।
देव त्रिगर्तनृपतिः स एव ते
जह्रे पुरस्य सुरभीरभीलुकः ॥ १७ ॥
क्रोधोद्धुरः स धरणीधवो धनु-
र्ध्वानौघरुद्धमरुदध्वकन्दरः ।
प्रच्छन्नपाण्डुसुतसंयुतस्ततः
संनद्धदुर्धरचमूचयोऽचलत् ॥ १८ ॥
तैः सूर्यशङ्खमदिराश्वनामभिः
पुत्रैर्युतः स नृपतिर्द्विषां बलम् ।
प्रापेन्दुशुक्रबुधबद्धसंनिधि-
र्ध्वान्तं प्रगे प्रतिपदंशुमानिव ॥ १९ ॥
भोक्तुं रसेन चतुरङ्गतां गतं
सैन्यं समानसमयं सुशर्मणः ।
तत्कृष्टकार्मुकचतुष्टयच्छला-
ज्जज्ञे यमस्ततचतुर्मिताननः ॥ २० ॥
वीरोत्करेऽवनिविलासशालिनि
स्वर्गाङ्गनासमुदये वियज्जुषि ।
अन्तःपटाभमिषुमण्डपं व्यधु-
स्ते पाणिपीडनमहोत्सवे तयोः ॥ २१ ॥
स्पर्धानुबन्धिसुरसिन्धुमत्सरा-
न्नेतुं सहस्रमुखतां निजं यशः ।
युद्धक्रियानिरवधीन् क्रुधावधीद्
वीरान् सहस्रमथ मत्स्यपार्थिवः ॥ २२ ॥
तादृक्सहस्रमितवीरमर्दन-
प्रोद्भूतदुःसहमहःसहस्रकम् ।
मत्स्यावनीशमवलोक्य लज्जया
झम्पां सहस्ररुचिरम्बुधौ व्यधात् ॥ २३ ॥
उद्दण्डकाण्डकृतवैरिमण्डला-
वर्तस्त्रिगर्तनृपतिस्ततः क्रुधा ।

भ्रूभङ्गभीषणमुखः करालदृग्-
द्राङ्गुत्स्यभूमिविभुमभ्यधावत ॥ २४ ॥

कुन्तं रयेण करमुक्तमाहवे
दूरात् प्रविश्य हृदयेन विद्विषाम् ।
पृष्ठेषु निःसृतमहो मुहुः करे
वेगाय यस्य जगृहुस्तुरङ्गिणः ॥ २५ ॥

दूरे पुरः स्थितमपि द्विषं प्रति
क्रुद्धा विमुच्य विशिखं महारथाः ।
पश्चाद्विमुक्तममुमश्ववेगतोऽ-
पश्यन् मृतं वलितकन्धरा यदि ॥ २६ ॥

निर्भर्त्सितेव भटरक्तसिन्धुभिः
संध्या जगाम विलयं स्वयं तदा ।
अप्यन्धकारनिकरान्निकारवान्
क्षीणः क्षणेन रणरेणुडम्बरः ॥ २७ ॥

वीरासिपातधुतकुम्भिमण्डली-
कुम्भोत्थमौक्तिकगणानुकारिभिः ।
छिन्नोच्छलद्भटशिरोऽर्दिताम्बर-
स्वेदोदबिन्दुभिरिवोडुभिर्बभे ॥ २८ ॥

भ्रश्यत्कृपाणततयोऽसिधेनुभि-
स्तद्भेदतः प्रबलमुष्टिलीलया ।
तस्यामशक्तिजुषि दन्तिवद्रदै-
स्तेनुस्ततोऽतिबलिनः कलिं भटाः ॥ २९ ॥

एवं बलेन बलिनः सुशर्मण-
स्त्रासं जवेन गमिते बले स्थितः ।
एको विराटजगतीपतिः प्रगे
निस्तारकाततिरिवौषधीपतिः ॥ ३० ॥

स्वस्वाङ्गभूषणमणिप्रभाभर-
ध्वस्तान्धकारविशदं मदात् तदा ।
उत्तालकालचरणं रणोत्सवं
मत्स्यत्रिगर्तनृपती वितेनतुः ॥ ३१ ॥

वर्षत्यमर्षजुषि बाणधोरणीं
क्रुद्धे त्रिगर्तनरभर्तरि क्षणम् ।
वृष्ट्याकुलच्छग इवाथ संकुचन्
कष्टां दशामधित मत्स्यभूपतिः ॥ ३२ ॥

वर्षं यदोकसि यदन्नभोजिनो
यूयं स्थिताः स किमुपेक्ष्यते युधि ।
इत्यात्मवंशतिलकान् कुरूद्वहान्
वक्तुं कृतोद्यम इवेन्दुरुद्ययौ ॥ ३३ ॥

वीरेन्द्रमस्तकमणेः सुशर्मणो
मूर्तेव कीर्तिरुदियाय चन्द्रमाः ।
प्रेम्णेव पर्यरभतैनमङ्कन-
व्याजादकीर्तिरपि मत्स्यभूपतेः ॥ ३४ ॥

बाणोत्करैर्वरथितस्तिरस्कृतः
खड्गादिशस्त्रसमरैरपि क्षणात् ।
मल्लोपमल्लकलया धृतः श्वसन्
बद्धोऽथ मत्स्यनृपतिः सुशर्मणा ॥ ३५ ॥

क्षिप्त्वा रथे तमथ याति वैरिणि
व्याचष्ट मारुतसुतं तपःसुतः ।
अस्मासु सत्सु यदयं द्विषा जित-
स्तद्योरिवेन्दुमहसा हसत्यहो ॥ ३६ ॥

एवं निगद्य शरपद्यया दिवं
वीरान् सहस्रमनयद् युधिष्ठिरः ।
भीमः शतानि युधि सप्त तत्क्षणं
माद्रीसुतौ दशशतीं सुशर्मणः ॥ ३७ ॥

क्रुद्धस्य योद्धुमभिधावतस्ततो
निर्मथ्य रथ्यरथसारथीन् पदा ।
मौलिं त्रिगर्तनृपतेरलोडयद्
भीमो महेभ इव मूर्च्छितात्मनः ॥ ३८ ॥

मत्स्याधिनाथमभिमोच्य मारुतिः
कारुण्यपुण्यसुकृतात्मजोक्तिभिः ।
वीरोऽमुचत् तमपि वैरिणं हसन्
दासस्तवाहमिति दीनवादिनम् ॥ ३९ ॥

गृह्णीत राज्यमपि मे भवद्बलात्
कीर्तौ च संपदि च संचराम्यहम् ।
अस्माकमेतदिति मत्स्यभूपतेः
कङ्कादिभिः सह मुदोक्तयोऽभवन् ॥ ४० ॥

एवं विमोच्य सुरभी मिलत्प्रमू-
हर्षस्मितौघमिषमूर्तकीर्तिभाक् ।

दूतैर्निदिश्य नगरे जयोत्सवं
तत्रैव शाचिमवसद्विराटराट् ॥ ४१ ॥

इति दक्षिणगोग्रहः ॥

एत्य प्रगेऽथ पुरि गोकुलाधिपः
शुद्धान्तधामनि कुमारमुत्तरम् ।
व्याचष्ट पुष्टभयकोपसंचय-
व्याकम्पसंपदपरिस्फुटं वचः ॥ ४२ ॥

एकार्णवं क्षितितलं बलोत्करैः
कुर्वन् कुबेरहरितो जहार गाः ।
शीतद्युतो द्विगुणयन् सुयोधनः
स्वामिन् कलङ्कमलमात्मपूर्वजे ॥ ४३ ॥

युद्धेऽन्यतश्चरति तत्र भूमिभृ-
त्सिंहेऽस्तभीरिभ इवेह सोऽस्फुरत् ।
जानात्यसौ खलु कुमारसिंह न
त्वामत्र गोत्रतिलकायितश्रियम् ॥ ४४ ॥

चतुर्भुजापरिघयोर्मुहुः क्षिपन्
दन्तांशुभिर्विशदयन् मुहुः सभाम् ।
मातुः पुरः प्रणयिनीजनस्य च
प्रोचेऽथ मत्स्यनृपसूनुरुत्तरः ॥ ४५ ॥

तावत् क्रुधेह युधि जायतु द्विषो
यावन्न मे प्रविलसन्ति सायकाः ।
स्यादद्य यद्यनुगुणस्तु सारथि-
स्तत् तान् करोम्युदितपार्थशङ्कितान् ॥ ४६ ॥

इत्थं धराधरभुवा धनंजय-
स्पर्धोद्धुरं निगदिते वधूपुरः ।
मन्यूद्भवां बहुलमन्युरग्रही-
दन्तर्विहस्य वचनं मनस्विनी ॥ ४७ ॥

ख्यातः क्षितीन्द्रभव यस्तव स्वसु-
र्नृत्ये गुरुत्वमवहद्बृहन्नला ।
पूर्वं पुरन्दरभवस्य खाण्डव-
प्लोषे स सारथिपदं प्रपेदिवान् ॥ ४८ ॥

यस्तस्य गाण्डिवविखण्डितद्विषो
यन्ताजनिष्ट स न ते किमु क्षमः ।
सारथ्यमर्थयतरां तमुत्तरां
संप्रेष्य नेष यदि मां न मानयेत् ॥ ४९ ॥

श्रुत्वेति तद्वचनमुत्तरोऽनुजां
प्रेष्यानिनाय रयतो बृहन्नलाम् ।
तेनातियत्नमयमर्थितो जयः
सारथ्यभारमुररीचकार तम् ॥ ५० ॥

अन्तःपुरेऽथ परितः कुमारिका
मिथ्यानभिज्ञ इव हासयन्मुहुः ।
पर्यादधार विविधैर्विचेष्टितैः
सौवर्णवर्म शतमन्युनन्दनः ॥ ५१ ॥

इत्युत्तराभ्यर्थित सस्मिताधरा
तं सज्जितध्वजपटे रथे स्थितम् ।
संख्येंऽशुकान्यरुहृदां बृहन्नले
हार्याणि मत्कृतकपुत्रिकाकृते ॥ ५२ ॥

इत्थं तदुक्तिमभिगत्य पाण्डुभू-
रारूढवत्यथ रथान्तमुत्तरे ।
तारांस्तथैष तुरगानतत्वरत्
क्ष्मामस्पृशन्त इव ते ययुर्यथा ॥ ५३ ॥

पृष्ठानुयायिजवनानिलत्वरा-
संप्रेरितैरपि निजाश्वपादजैः ।
अग्राग्र एव रजसां भरै रथ-
स्तूर्णं ययौ रिपुसमीपमौत्तरः ॥ ५४ ॥

अथ शमीतरुसमीपगः पुरी-
प्रान्तश्मशानभुवि मत्स्यभूपभूः ।
विद्वेषिणां भुवनभीषणारवं
व्यालोकते स्म विपुलं बलार्णवम् ॥ ५५ ॥

विश्वान्तरालचरकालशर्वरी-
संध्यायमानकरिकुम्भवर्णकम् ।
रङ्गत्तुरङ्गखुरपातघातज-
क्षोणीरजःस्थपुटदिक्पुटस्थितिम् ॥ ५६ ॥

चञ्चद्रथोच्चयचलध्वजाञ्चल-
प्रज्वालितप्रबलपौरुषानलम् ।
व्यात्तप्रमत्तयमकिंकरावली-
तुण्डाभकुण्डलितचापमण्डलम् ॥ ५७ ॥

दृष्ट्वा नदीजकृपकुम्भभूकृपी-
संभूतसूतसुतकौरवेश्वरैः ।

सैन्यं निभाल्य पुरतो भयातुरः
प्रोचे शचीवरतनूजमुत्तरः ॥ ५८ ॥

विशेषकम् ।

एतां निरूप्य पृतनां दिनेशदृग्-
दोःप्रासिदण्डनिबिडां बृहन्नले ।
आकम्पतेऽद्य हृदयं भयाश्रयं
व्यावर्तयान्तकपुरीपथाद्रथम् ॥ ५९ ॥

श्रुत्वेति तस्य वचनं धनंजयो
व्याचष्ट तं भ्रमितभीरुलोचनम् ।
संग्रामकातरतया त्रपामहे
क्षोणीमहेशसुत शूरसंसदि ॥ ६० ॥

कीर्तिर्युगान्तशतसाक्षिणी नृणां
कायस्तु मत्तकरिकर्णचञ्चलः ।
धैर्यं भजस्व युधि भङ्गसंगमा-
न्मा मा कुलं कुरु कलङ्कसंकुलम् ॥ ६१ ॥

आत्मायुधैर्युधि विशोधितो न चेत्
तन्नामृतद्युतिकपोलदंशकः ।
स्वाद्येत नन्दनवनान्तकेलिषु
प्रेम्णार्पितोऽमरवधूजनाधरः ॥ ६२ ॥

मातुः स्वसुश्च दयिताततेश्च तां
संस्थां विधाय पुरतस्तथाविधाम् ।
धिग्धिक् पलायनपरायणोऽधुना
ह्रीमानहीनमनसां जिजीविषाम् ॥ ६३ ॥

श्रुत्वेत्यभाषत सुतः क्षितीशितु-
र्विस्रस्तहस्तगधनुर्विहस्तधीः ।
पश्यन् पुरः कुरुपतेर्वरूथिनीं
दृप्यद्रथीन्द्रवरभैरवारवाम् ॥ ६४ ॥

या कीर्तिरुल्लसति देहनाशत-
स्तां वेसरीसुतजनुःसहोदरीम् ।
रम्भाफलोद्भवसवर्णिनीं जनः
को मूलनाशनकरीं परीप्सति ॥ ६५ ॥

कीर्त्यापि किं तु परलोकगामिनो
या न स्फुटा श्रुतिपुटामृतीभवेत् ।
किं कण्ठपीठलुठिता गतात्मनः
पुंसः सुखं सृजति हारवल्लरी ॥ ६६ ॥

के नाम वामनयनाजनाग्रतो
न स्फोरयन्ति निजबाहुबाहुलम् ।
शक्यं न निष्कृपकृपाणपाटन-
प्राणप्रहारकरणं रणं पुनः ॥ ६७ ॥

द्रोणापगेयकृपकर्णकौरवाः
सर्वे स्फुरन्ति शरदन्तुराम्बराः ।
एकैकमेषु समरे सहेत कः
स्याद्यत्पुरोऽशनिधरोऽप्यधीरधीः ॥ ६८ ॥

उक्त्वेति शुष्यदधराननो रथा-
दुत्प्लुत्य तूर्णपदपातमत्रसत् ।
पृष्ठे शराहतिमसौ श्लथीभव-
द्धम्मिल्लपुष्पततिपाततोऽविदन् ॥ ६९ ॥

तं पाण्डुसूरनुससार वेगतो-
व्याधूतवेणिलतिकारुणांशुकः ।
तं चित्ररूपमविचारगोचरं
वीक्ष्यारवैरहसिषुः कुरूद्वहाः ॥ ७० ॥

स्त्रीवेषगुप्ततनुरेष फाल्गुनो
नूनं गजेन्द्रगमनो महाभुजः ।
रोषं विमोक्ष्यति रुषा शरोत्करै-
रित्यूचिरे गुरुकृपापगाङ्गजाः ॥ ७१ ॥

पश्चाद्गतेन रयतः किरीटिना
केशेर्धृतः कृपणमुत्तरोऽवदत् ।
मां मुञ्च मुञ्च रदिनो रथान् हयान्
हेमानि रत्ननिचयं तवार्पये ॥ ७२ ॥

आक्रोशनानि शतमन्युसूनुना
श्रुत्वास्य सस्मितमितीरितं वचः ।
मा भीतिमाश्रय हयास्त्वया निय-
म्यन्तां तनोमि रिपुदारणं रणम् ॥ ७३ ॥

अस्मिन् शमीतरुशिखान्तरन्तर
न्यस्तास्ति पाण्डुसुतशस्त्रमण्डली ।
अस्याः शुभं मम भुजार्गलोपमं
गाण्डीवमिन्द्रतनयास्त्रमर्पय ॥ ७४ ॥

Digitized by Google

शङ्कां विलम्बिनि शवेऽत्र मा कृथा
माया हि गूढमियमाहिता मया ।
मूर्धाभिषिक्ततनुजं न योजये
त्वां कर्मणि ध्रुवममङ्गलक्रमे ॥ ७५ ॥
इत्यर्जुनोक्तिमवधार्य मत्स्यभू-
रारोहति स्म तमसौ शमीद्रुमम् ।
तत्रासिसायकधनूंषि चित्रभा-
ञ्जूंषि न्यभालयद्बालविस्मयः ॥ ७६ ॥
संख्याक्षयेषुधियुतं ततोऽग्रही-
द्गाण्डीवमर्जुनगिरोपलक्ष्य सः ।
तत्रावतीर्य तरुतः क्व ते गताः
पञ्चेति पृष्टवति फाल्गुनो जगौ ॥ ७७ ॥
कङ्कद्विजः सुकृततो मरुद्भवः
सूदो यमौ तुरगगोपती त्वहम् ।
बीभत्सुरस्मि निरवाहि वत्सरो
गुप्तस्थितिः कृतपणो भवद्गृहे ॥ ७८ ॥
बीभत्सुफाल्गुनकिरीटिजिष्णवः
कृष्णार्जुनौ विजयसव्यसाचिनौ ।
विश्वे धनंजयबलक्षवाहना-
वित्याह्वयान् दश दिशन्त्यहो मम ॥ ७९ ॥
धैर्यं भजस्व विनयस्व वाजिनः
पश्यार्दितां कुरुचमूं शरैर्मम ।
इत्युक्तिभाजि विजये रथाश्रये
हृष्टो हयान् नृपतिभूरथेरयत् ॥ ८० ॥
साकं ततोऽनुगतभूतपङ्क्तिभिः
केतौ निकेतमकरोत् कपीश्वरः ।
यस्यांशुभिर्जययशःश्रियोर्वियद्-
वैदूर्यपुष्पमहणार्करत्नयुक् ॥ ८१ ॥
दिक्कुम्भिनो निभृतकर्णतालतां
शैलान् प्रतिध्वनितकुञ्जपुञ्जताम् ।
चक्षुःश्रुतीन् विधुरितावतां नयन्
शङ्खं ततो द्युपतिभूरपूरयत् ॥ ८२ ॥
आश्वास्य शङ्खनिनदेन मूर्च्छितं
मत्स्यक्षितीन्द्रतनयं किरीटिना ।
दिव्यास्त्रदेवतततिं यतात्मना
ध्यात्वाधिरोपितमनुद्धतं धनुः ॥ ८३ ॥
विश्वे कुटुम्बयति कम्पमुत्कटै-
र्ज्याटङ्कृतिव्यतिकरैः किरीटिनः ।
उद्यन्नदात्वकुनिमित्तकोटिभि-
र्भीतोऽभ्यभाषत गुरुः कुरूद्वहम् ॥ ८४ ॥
यत् कौरवप्रवर विष्टपान्तरे
दृष्टाऽद्य माद्यति निमित्तमण्डली ।
तल्लक्षयामि भटलक्षमांसभुग्-
रक्षोगणभ्रमणभीषणं रणम् ॥ ८५ ॥
दुर्योधन प्रधनकेलिकौतुकी
पार्थः स एष कपिकेतुरीक्ष्यते ।
कोपानले बहुलहेतिहेलया
कक्षीकरिष्यति कुरूत्तमानसौ ॥ ८६ ॥
एते किरातरणकर्मसाक्षिणः
क्षीवन्निवातकवचान्तकारिणः ।
दृप्यद्धिरण्यपुरदैत्यदारणाः
प्रेङ्खन्ति ते क्षितिप पार्थमार्गणाः ॥ ८७ ॥
एतां गुरूक्तिमुपकर्ण्य कौरवोऽ-
भाषिष्ट भीष्ममिति भूरिमन्युभूः ।
मत्स्याधिपेन सह विग्रहेऽद्य नः
कस्मात् प्रहर्तुमयमेति फाल्गुनः ॥ ८८ ॥
विस्मृत्य संश्रवमुपैति चेत् ततः
का नः क्षतिः स्फुरतु कानने पुनः ।
किंतूद्यते गुरुरयं स्वयं रणा-
रम्भे प्रगल्भयति यो रिपुस्तुतिम् ॥ ८९ ॥
इत्थं प्रजल्पति नृपे नदीजनिः
शृण्वन् जगौ नरशरासनः स्वयम् ।
कालो यथा नियमितः सहाधिकै-
र्मासैर्नरेश निरतारि पाण्डवैः ॥ ९० ॥
पार्थः स एष समितौ समुद्यतः
प्रोद्भूतकेतुकपिभीषणारवः ।
मन्यस्व संधिममुनाधुनाप्यहो
भूयान्महोत्सवमयं जगत्त्रयम् ॥ ९१ ॥

Digitized by Google

नैवं भवेदिति गिरं तमब्रवीद्
दैवं विरुद्धमवबुध्य सिन्धुभूः ।
यत्ता भवन्तु सुभटा घटामहे
येनामुना समिति सव्यसाचिना ॥ ९२ ॥

किंतु व्रजन्तु नगराय गोव्रजाः
क्षोणीशसैन्यचतुरंगरक्षिताः ।
पूर्वं हि विग्रहनिमित्तवस्तुनः
शंसन्ति रक्षणविधिं विचक्षणाः ॥ ९३ ॥

अन्येन गच्छतु वृतश्चमूचतु-
र्भागेन नागनगरं नरेश्वरः ।
येनैष एव विजयो रणक्षये
यत् स्वामिरक्षणविधिर्यथातथा ॥ ९४ ॥

द्रोणादिभिस्तु सुभटैर्युतोऽ-
र्जुनं क्ष्माभृद्गुणीरयमिवैष धारये ।
इत्युक्तवत्यथ पितामहे तथा
चक्रे भयातुरतया नृपो रयात् ॥ ९५ ॥

वेगाद्व्रजन्तमथ तं पृथङ्करः
प्रेक्ष्योत्तरं प्रहसितोत्तरं जगौ ।
संगृह्य याति सुरभीः सभीरसौ
यातेऽत्र मेऽत्र समरेण किं फलम् ॥ ९६ ॥

एनं प्रति त्वरयतूत्तरङ्गमान्
दूरं कुरङ्ग इव मा पलायताम् ।
श्रुत्वेत्यथ त्वरितमुत्तरो रिपुं
पक्षान्वितैरिव हयैरुपाद्रवत् ॥ ९७ ॥

अप्राप्य सत्वरखुरैस्तुरङ्गमै-
र्वेगेन संगतिमुपागते रथे ।
हन्त व्रजन्तमिदमब्रवीदथो
दुर्योधनं हठधनो धनंजयः ॥ ९८ ॥

भो तिष्ठ तिष्ठ निभृतं भवादृशैः
कुल्यैः कलङ्कविधुरः कृतो विधुः ।
पूर्वं जहार सुरभीर्भवान् ह हा
दृष्ट्वा मयाधम पलायसेऽधुना ॥ ९९ ॥

चापं गृहाण विगृहाण विग्रहिन्
साकं मया समय एष दुर्लभः ।
एकोऽस्मि संगरनियुक्तसंगरो
यूयं पुनः शतमिता धनुर्धराः ॥ १०० ॥

निर्भर्त्सकैरिति गिरां भरै रया-
दुत्साहकैरपि तदा कुरूद्वहः ।
युद्धाय नैव वलते स्म तत्क्रुधा
पार्थो रथस्य रयतो गतोऽग्रतः ॥ १०१ ॥

वामे विमुच्य पृतनामभिद्रुतं
दुर्योधनाय विनिभाल्य फाल्गुनम् ।
भीष्मादिभिः सपदि पर्यवारि तै-
र्व्यावर्तितत्वरितवाहनैर्नृपः ॥ १०२ ॥

एकत्र तत्र मिलितां पताकिनीं
दृष्ट्वा प्रहृष्टहृदयो धनंजयः ।
आकम्पितक्षुभितदेवदानवं
द्राग्देवदत्तमथ पर्यपूरयत् ॥ १०३ ॥

ध्वानैर्ध्वजे कपिवरस्य तत्परी-
वारप्रभूततरभूतबूत्कृतैः ।
तैर्देवदत्तनिनदैश्च विस्फुटद्-
ब्रह्माण्डमण्डलमशङ्कि विष्टपैः ॥ १०४ ॥

आस्फालयंस्तदनु धन्व शिञ्जिनी-
टङ्कारभारमतनोत् तथार्जुनः ।
गावो यथा सपदि पुच्छदण्डका-
मुत्पाद्य मत्स्यपुरमीयुरुत्सुकाः ॥ १०५ ॥

व्यावृत्तिमीयुषि गवां गणे द्विषां
सैन्येषु तेषु विशिखोत्करं क्षिपन् ।
तत्तत्प्रियापरिभवादिदुःखजं
वर्षन्नमर्षमिव शक्रसूर्बभौ ॥ १०६ ॥

एकेन मार्गणगणः किरीटिना
यावानमोचि पिहितार्कमण्डलः ।
तावान् न भूरिभिरपि द्विषां बलै-
र्भिन्नारिणा भृशमभिन्नगण्डभिः ॥ १०७ ॥

लक्ष्याप्रिलालसतमानुपेयुष-
स्तीव्रागतीनपरमार्गणव्रजान् ।
दत्तार्धचन्द्रवशतः प्रपातयन्
किं वर्ण्यते स्वकुलमौलिरर्जुनः ॥ १०८ ॥

नाश्वः स कोऽपि न स कोऽपि वारणो
वीरः स कोऽपि न रथः स कोऽपि न ।
तेषां स कोऽप्यवयवोऽस्ति न द्विषां
यत्रार्जुनस्य न शरा व्यधुर्व्यथाम् ॥ १०९ ॥

एकोऽपि सिंह इव केतुकेतव-
व्यालोलपुच्छवलयो महायतिः ।
आसीद्धनंजयरथस्तदा द्विषद्-
भूपालकुञ्जरमदैकशोषकृत् ॥ ११० ॥

साटोपरत्नमुकुटोरुमण्डलं
लोलभ्रु भीषणकनीनिकेक्षणम् ।
आवेशदष्टदशनच्छदं शरैः
शत्रुंतपस्य मुखमैन्द्रिरच्छिदत् ॥ १११ ॥

कौन्तेयकुन्तगणरुग्णविग्रहः
संग्रामजिन्निपतितो विवस्वता ।
मत्पुत्रकर्णपितृभूतसूतसू-
रित्यस्तशङ्कमयमङ्कगः कृतः ॥ ११२ ॥

तस्या विदग्धपृतनामृगीदृशः
कर्णावतंससितपद्मवद्यशः ।
भीमानुजन्मकरपङ्कजोत्थितै-
स्तेने सितेतरतरं शिलीमुखैः ॥ ११३ ॥

शारद्वतोऽपि गुरुरिन्द्रनन्दने
शिष्ये पुरः स्फुरति संगराङ्गणे ।
तत्संगमेच्छुरपि नो जयश्रिया
संश्लिष्यते स्म किल सज्जलज्जया ॥ ११४ ॥

प्रौढप्रतापरविनाशतस्तम-
स्तोमे प्रसर्पति विरोधिना धुतः ।
द्रोणो मलीमसतमाकृतिः क्षणा-
दुड्डीनपक्षततिरातनोतु किम् ॥ ११५ ॥

युद्धाङ्गणे गुणनिबन्धतः क्षणा-
दपस्यतो मरणमेव काङ्क्षतः ।
चक्रे धनुर्धरधुरंधरोऽङ्कगं
द्रोणस्य लोचनमिवैकमाकुलम् ॥ ११६ ॥

सेनासरोरुहदृशो विभूषणं
गाङ्गेयमुत्कटमहोर्मिनिर्मलम् ।
पार्थेन पौरुषमणौ हृते तदा
विच्छायमेव जनता व्यलोकत ॥ ११७ ॥

धारोद्धुरान् शरभरान् धनंजयो
वर्षन् घनः प्रकटितोन्नरोन्नतिः ।
त्रासोन्मुखं समरपल्वलान्तरे
तं धार्तराष्ट्रमकरोत् किलाकुलम् ॥ ११८ ॥

एकैकशोऽपि मिलितानविभ्रमद्
दिव्यास्त्रजालजटिलीकृताम्बरान् ।
एतान् जिगाय युधि वासवाङ्गभू-
राविष्कृतप्रतिमहास्त्रपङ्क्तिभिः ॥ ११९ ॥

कौन्तेयकुन्ततनिपातपातिता
भान्ति स्म भूमिपतिवक्त्रपङ्क्तयः ।
शौर्यश्रियः प्रधनपल्वलोदरे
केलिक्रमाय कमलाकरा इव ॥ १२० ॥

भिन्नप्रभिन्नकरिकुम्भमण्डली-
मुक्ताफलानि विगलन्ति भेजिरे ।
जम्भारिजन्मपरिरम्भसंभवत्-
स्वेदोदबिन्दुसमतां जयश्रियः ॥ १२१ ॥

दुःशासनप्रभृतयस्ततो व्यधुः
सौवर्णपुङ्खविशिखोत्करैर्नरम् ।
नक्तंप्रदीप्तपरितोमहौषधी-
मालोज्ज्वलाञ्जनमहीध्रमञ्जुलम् ॥ १२२ ॥

तानेक एव स शिलीमुखोच्चये-
श्चक्रे विलीनमहसो महेन्द्रसूः ।
धिष्ण्यव्रजानिव दिवाकरो दिवा-
रम्भे क्षणात् खरतरैः करोत्करैः ॥ १२३ ॥

छिन्नैर्नरेषुनिचयेन चामरै-
श्छत्रैर्ध्वजैश्च निपतद्भिराबभे ।
स्पष्टं पलग्रसनपुष्टिहृष्टिम-
द्रक्षोघटाट्टहसितैरिवाहवे ॥ १२४ ॥

एकास्तुरङ्गनिकरैस्तरङ्गिता
बाणोत्करेण परिशोष्य वाहिनीः ।
अन्या द्विषां क्षतमुखाम्बुजार्चिताः
प्रावर्तयद् युधि जयोऽस्रवाहिनीः ॥ १२५ ॥

एवं पराजयविवृद्धमन्यव:
शौर्याभिभूतशतमन्यवस्तत: ।
सर्वेऽपि सिन्धुतनयादयोऽर्जुनं
संभूय तत्र रुरुधुर्धनुर्धरा: ॥ १२६ ॥
तान् संहतान् पुनरवेक्ष्य रोषत:
स्वं स्वं विभज्य बहुधेव बल्गत: ।
जिष्णोरपूज्यत पराक्रमश्चम-
त्कारोत्तरं सुरवरै: सुमोत्करै: ॥ १२७ ॥
एकोऽप्यनेकवदयं भयंकरो
राज्ञां शिरांसि शरित: शरै: क्षिपन् ।
नूनं सहस्रभुजनेत्रतां जना-
दृश्यां गतोऽयमिति तर्कितोऽपरै: ॥ १२८ ॥
कुन्तीसुतोऽथ मरणैककाङ्क्षिषु
क्ष्मापेषु तेषु विलसद्दयारस: ।
अस्त्रं युधि प्रियमनङ्गधन्विन:
संमोहनाभिधमधाद्धनुर्गुणे ॥ १२९ ॥
निद्रासमागमनहेतुदूतिका
जृम्भा समेत्य वदनेषु विद्विषाम् ।
बाष्पेण सात्त्विकरसादिवोदयं
संबिभ्रताशु नयनान्यपूरयत् ॥ १३० ॥
निद्राधिदैवतनवावतारतो
व्याघूर्णयंश्च वदनं विरोधिन: ।
आलोकयंश्च निखिला: पुनर्दिशो
दृग्भिर्मुहूर्तधृतचेतना मुहु: ॥ १३१ ॥
मुक्तेऽर्जुनेन विशिखे सिषेविरे
निद्रारसं सपदि वैरिणो रणे ।
मांसाशनव्यसनसङ्गसङ्गत:
प्रेतप्रणाशकरघोरघोरिण: ॥ १३२ ॥
सुप्ता: परस्परशरीरसंभ्रमा-
वष्टम्भवेदिसुखशालिनो द्विपा: ।
तेषां च कुम्भयुगलोपरिस्थिता:
प्राप्तप्रियोरसिजविभ्रमा भटा: ॥ १३३ ॥
निद्रारस: समजनिष्ट वाजिनां
कश्चित् तदा स किल फाल्गुनास्त्रत: ।
अद्यापि येन गमनेऽपि तेऽन्वहं
नो यान्ति जागरणकेलिकौतुकम् ॥ १३४ ॥
आसन्नधोमुखनतास्तुरङ्गिण:
स्कन्धेषु वाहनिकरस्य निद्रया ।
वक्ष:स्थितं विजयरत्नमर्जुन-
व्याकृष्यमाणमिव रक्षितुं जवात् ॥ १३५ ॥
निद्रावशेन रथिनां करद्वयात्
कर्णान्तनीतगुणमेव कार्मुकम् ।
भूमौ पपात विशिखैस्तु वेध्यगै-
र्विश्वे निजा सफलता स्म दृश्यते ॥ १३६ ॥
तत्कालमेकसमयं पदातिभि:
प्रौढै: पतद्भिरवनीधरोद्धुरै: ।
दुर्वारभारनतभूमिवञ्चित-
स्वाङ्गो बभौ कमठवत् फणीश्वर: ॥ १३७ ॥
स्मृत्वोत्तरावचनमर्जुनस्ततो
मत्स्येन्द्रसूनुमिदमब्रवीन्मुदा ।
दुर्योधनस्य कदलीदलप्रभे
कर्णस्य काञ्चनरुची हरांशुके ॥ १३८ ॥
एतेषु न स्वपिति सिन्धुसूरसौ
मुक्त्वा तदेनमितरक्ष्माभृताम् ।
अस्त्रैर्विचित्रवसनान्युपाहरे-
त्युक्ते नरेण स तथाकरोद्द्रुतम् ॥ १३९ ॥
आत्तांशुक: स्थितरथोऽथ मत्स्यभू:
पार्थाज्ञयाशु तुरगानतत्वरत् ।
भीष्मे शरैस्तुदति पृष्ठत: परा-
वृत्तो निहत्य तुरगान् जयी ययौ ॥ १४० ॥
मुक्तो रिपु: किमिति कौरवो वदन्
सुप्तोत्थित: स्वयमबुद्धविप्लव: ।
ज्ञात्वांशुकान्यपहृतानि भीतिमान्
भीष्मोक्तिभि: सह चमूभिरव्रजत् ॥ १४१ ॥
बाणै: किरीटशिखरं किरीटिना
दुर्योधनस्य समहारि नश्यत: ।
तस्मिन् शमीतरुवरेऽस्त्रमण्डलं
मुक्तं तथैव ववले पुरं प्रति ॥ १४२ ॥

इत्युत्तरगोग्रहः ॥

जित्वा रिपूनथ समागतः पुरे
मत्वा सुतं सपदि षण्डसारथिम् ।
भीष्मादिभिः समरहेतवे गतं
दुःखी विराटनृपतिर्न धर्मसूः ॥ १४३ ॥

यावद्बलानि समनीनहच्चरे-
स्तावत् कुमारविजये निवेदिते ।
भूपः प्रवर्त्य नगरोत्सवं ततः
कङ्कान्वितो व्यधित शारिखेलनम् ॥ १४४ ॥

क्रीडन् नृपोऽभ्यधित कङ्क पश्य मत्-
पुत्रो जिगाय युधि तं सुयोधनम् ।
कङ्को जगाद खलु जीयते सुखा-
द्येनैव सारथिरभूद्बृहन्नला ॥ १४५ ॥

षण्डस्य सारथिपदं वदन्
जये हेतुं रुषा क्षितिभृताक्षताडनात् ।
कङ्कद्विजः स विदधे सभालङ्कृ-
क्षीलो महेश इव दृश्यशोणितः ॥ १४६ ॥

मानिष्टमत्र विषये प्रवर्तितां
भूषक्ष्मिमद्रुधिरलीलयेत्ययम् ।
कीलालपाणिरवनीपतिर्बभा-
वागन्तवे घुसृणवानिव श्रिये ॥ १४७ ॥

तूर्णागतद्रुपदनन्दिनीधृते
पात्रे सुवर्णघटिते युधिष्ठिरः ।
चिक्षेप रागमिव मूर्तमात्मनः
प्रेम्णा चिरात् क्षतजनिर्भरं स तम् ॥ १४८ ॥

ज्ञेया वयं प्रकटतां दिनत्रये-
णैवेति दत्तदृढशिक्षमुत्तरम् ।
पार्थो विधाय रथिनं तमात्मनो
धात्रीशसौधमनयद्रथं रयात् ॥ १४९ ॥

संसद्भुवि क्षितिपतिं प्रति प्रती-
हारो व्यजिज्ञपदुपेतमुत्तरम् ।
षण्डेन सार्धमतिवर्धिसंमदं
तूर्णं नृपोऽपि तमवीविशत् तदा ॥ १५० ॥

यो मे करोति वपुषि क्षतं क्षितौ
तं प्रेषयेत सकुटुम्बकं दिवि ।
षण्डोऽयमत्र न विमुच्यतामतो
दौवारिकेऽवददिदं युधिष्ठिरः ॥ १५१ ॥

इत्येक एव वचनेन वेत्रिणः
प्रीतः सभान्तरमवापदुत्तरः ।
तं प्रेक्ष्य क्षतजनिर्झरच्छला-
च्छुण्डालमत्र च नरेन्द्रकुञ्जरम् ॥ १५२ ॥

वृत्तान्तमेतमवगत्य भूपभू-
स्तातं जगाद किमु कोप्यते द्विजः ।
संमान्यतामयमतः सुतोक्तिभिः
कङ्कं नृपः क्षमयति स्म मङ्क्षु तम् ॥ १५३ ॥

कोपावलोकनवशेन पाण्डवः
कर्तुं क्षमोऽपि भुवनानि भस्मसात् ।
यं पट्टबन्धमतनोत् क्षतार्थकं
तेनैव सोऽजनि धुरि क्षमावताम् ॥ १५४ ॥

मौलिक्षते द्विजवरस्य गोपिते
षण्डः सभाभुवि नृपेण मोचितः ।
विद्विषिशाखिशतदावपावकः
प्रापात्मनन्दनविलासमादृतः ॥ १५५ ॥

पप्रच्छ मत्स्यनृपतिस्ततः सुतं
ते वत्स शंतनुसुतादयस्त्वया ।
युद्धे जगत्त्रयजयक्षमाः कथं
ध्वान्तोत्करा दिनकृतेव निर्जिताः ॥ १५६ ॥

केनापि दिव्यपुरुषेण पौरुषं
पुण्येन मे विदधता जिता द्विषः ।
गन्ता दिनैः प्रकटतां स तु त्रिभिः
श्रुत्वा सुतोत्तरमिति स्मितो नृपः ॥ १५७ ॥

कामः काममयं करोति जगति क्रीडोत्सवानेकया
रत्या साक्रमितीव पाकविषयप्राप्तेरसूयारसैः ।
प्रीतिर्वीरकुमारवीरविजयश्रीसंभ्रमप्रेरिता
तां निष्कास्य तदा चकार सदनं चित्ते पुरीवासिनाम् ॥ १५८ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के विराटपर्वणि दक्षिणोत्तरगोग्रहे पाण्डवजयो नाम तृतीयः सर्गः ॥ ३ ॥:: ::

॥ अथ बालभारतस्य ॥

॥ चतुर्थः सर्गः ॥

मुदेऽस्तु वः कृष्णमुनिर्यदीय-
भास्वद्वपुर्दन्तनखप्रभाभिः ।
विचित्ररत्नाभरणा न के के
विमुक्तिकान्तासुभगीभवन्ति ॥ १ ॥

स्वयं तृतीयेऽथ दिने दिनादौ
स्नातो विशुद्धाम्बरमाल्यधारी ।
धर्माङ्गजः स्वैरनुजैश्चतुर्भिः
सिंहासने मत्स्यविभोर्न्यवेशि ॥ २ ॥

वृत्तान्तमावेदितमुत्तरेण
मत्वाथ तोषाब्धिविधुर्विराटः ।
आगत्य धर्मात्मजपादयुग्मे
लग्नः क्षमस्वेति मुहुर्ब्रुवाणः ॥ ३ ॥

मग्नस्तदा धर्मतनूजपाद-
नखप्रभावारिणि वीरमुख्यैः ।
उत्थापितो भूमिपतिश्चतुर्भि-
र्भीमादिभिर्भूरिभुजप्रभावैः ॥ ४ ॥

करौ किरीटे नवरत्नराजि-
विराजितौ हेमविधौ विधाय ।
हारं सृजन् वक्षसि दन्तकान्त्या
प्रति प्रभुं वाचमुवाच राजा ॥ ५ ॥

अहं च देशश्च पुरी च नाथ
वर्तामहे स्मस्त्रिजगत्पवित्राः ।
त्वदीयसङ्गादधुना कुलं मे
पुनीहि कन्यां जयिने ददामि ॥ ६ ॥

इत्येतया तोषविशेषसान्द्रो
गिरा विराटस्य धराधिनाथः ।
दृशं भृशं शाक्रिमुखारविन्दे
चिक्षेप लोलभ्रमराभिरामम् ॥ ७ ॥

रदैः रुचा प्रत्युपकारगौरै-
रदाम्बरस्याम्बरमास्रजद्भिः ।
विवेकभूर्वासवभूर्बभाषे
शिष्यां सुताषद्गणयन्ति धीराः ॥ ८ ॥

यद्याग्रहः स्नेहविवृद्धिहेतो-
श्चिराद्विराटस्य चकास्ति चेति ।
सुताय दत्तामभिमन्यवे तत्
सुतां मदीयाय सदृग्वराय ॥ ९ ॥

आलोच्य निश्चित्य सुकृत्यमेत-
च्चरं हृषीकेशपुरे न्ययुङ्क्त ।
भूपः सुभद्रातनयस्य तूर्ण-
माकारणायाकृतिदर्पकस्य ॥ १० ॥

अथागतं द्वारि धनुर्विमुक्त-
बाणात्वराजित्वरनौसवेगम् ।
विज्ञापितो वेत्रिगिरा मुरारि-
रवीविशत् संसदि दूतमेतम् ॥ ११ ॥

कृतप्रणामस्तदयं जगाद
चरः सभायां तिलकानि तन्वन् ।
द्विजन्मचञ्चुत्करचन्दनेन
मुरारितेजोमृगनाभिभाञ्जि ॥ १२ ॥

अयुङ्क्त मां युक्तमते मतेन
सहोदराणामिह धर्मसूनुः ।
प्रत्यक्षतां पूरितगोप्यकाल-
स्तन्वन् विवस्वानिव तीव्रतेजाः ॥ १३ ॥

किरीटिने गोग्रहगाढगर्व-
दुर्योधनक्ष्मापजयोज्ज्वलाय ।
दातुं सुतां धर्मसुताङ्घ्रियुग्मे
लग्नो विराटः सह नन्दनेन ॥ १४ ॥

सुतेव शिष्येति धनंजयेन
नैवादृता पार्थिवपुत्रिकेयम् ।
स्नुषा तु पुत्रीव सतां विभाति
ततः सुतार्थं स्वयमर्थिता सा ॥ १५ ॥

ततस्तदाकारणकारणेन
समागतोऽहं जगदेकनाथ ।
स्वामिन् सुभद्रातनयं नयस्व
क्षणान्निजं प्रेषय भागिनेयम् ॥ १६ ॥

१ मोदाम्बुनिधिर्विराटः इति पा० ।

सखीसमक्षं मुकुरे मुखं या
निरीक्षितुं चेतसि लज्जमाना ।
मुहुः कुमारी मणिकङ्कणेषु
लीलाविलोलं क्षिपति स्म चक्षुः ॥ १७ ॥

उरःस्थले मन्मथपार्थिवस्य
मत्वा निवासं कुचदूष्यचिह्नम् ।
विमुच्य यस्याः सरलप्रचारं
कर्णान्तरे दृग्युगममागात् ॥ १८ ॥

अन्तर्गता शैशवयौवनाभ्यां
या पीड्यमानेव मुहुर्दृढाभ्याम् ।
पर्याकुला वाञ्छति लोलदृष्टिः
कस्यापि पाणिग्रहणं कुमारी ॥ १९ ॥

कुतूहलात् काञ्चनकन्दुके च
करं करोति श्रुतिकुण्डले च ।
मुहुर्विभूषाजुषि या विनोद-
गेहे च देहे च करोति दृष्टिम् ॥ २० ॥

इमां कुमारीं परिणीय राज-
न्नयं कुमारो भुवने विभातु ।
अभ्युन्नतः केतुरिवान्ववाय-
प्रासादमौलौ विलसत्पताकः ॥ २१ ॥

आकर्ण्य मत्वाथ तथेति विष्णु-
र्दत्ताङ्गभूषं विससर्ज दूतम् ।
सोऽधं मतीनामभिमन्युशिक्षा-
कृते कृती मन्त्रिणमादिदेश ॥ २२ ॥

राज्ञस्तदाज्ञामधिगम्य सम्यग्-
विशुद्धधीरुद्धवमन्त्रिराजः ।
उवाच वाचः सितकान्तिकान्ति-
भद्राः सुभद्रातनये नयेच्छुः ॥ २३ ॥

मा विश्वसीर्विश्वजनीनशक्तेः
स्त्रियाः श्रिया वा भृशचञ्चलायाः ।
ददाति गाढं व्यसनं जनानां
रक्ता विरक्तापि पदे पदे या ॥ २४ ॥

यतो महात्मन्यपि लम्पटत्व-
मामन्यते लम्पटसंगमेन ।
लोलः शशाङ्कोऽपि विभाति तात
वातप्रणुन्नाम्बुदमध्यवर्ती ॥ २५ ॥

कृतिन्नमात्येषु पुरातनेषु
चिरं स्थिरा राजति राजनीतिः ।
यतः शरावेषु नवेषु वारि
न्यस्तं समस्तं प्रलयं प्रयाति ॥ २६ ॥

ध्वस्ताः समस्ता रिपवो मयेति
निरुद्यमो वीरवरेण्य मा भूः ।
मुक्तोदये भास्वति भूरिशोऽपि
भिन्नं तमोऽभ्येति पुनः कुतोऽपि ॥ २७ ॥

तात प्रतापप्रसराय धीराः
कुर्वन्ति धैर्यं न पुनर्धनाय ।
न केसरी मौक्तिकपङ्क्तिहेतो-
राहन्ति दन्तिप्रकरं कराग्रैः ॥ २८ ॥

दुरोदरारम्भकथाः कथंचि-
दार्या न कार्यान्तरतोऽपि कुर्युः ।
दुरोदरस्य व्यसनेन पेतु-
र्विपत्पयोधौ पितरस्त्वदीयाः ॥ २९ ॥

प्रभुप्रवृत्तिप्रतिमं चरन्ति
प्रजाश्चिरं चण्डतमं हिमं वा ।
सूर्योपला वह्निमुचः स्वकाले
चन्द्रोपलाः पश्य सुधामुचः स्युः ॥ ३० ॥

अत्यर्थभावेन निषेव्यमाण-
मप्यार्यं कार्यं व्यसनं वदन्ति ।
तन्वन् पितुर्वाचमवाप रामो
वनं बलिर्न्यग्गमनं च दानात् ॥ ३१ ॥

इत्यादिभिर्मन्त्रिपतेर्वचोभि-
र्मत्वा विदग्धं भुवि भागिनेयम् ।
विधाय दिव्यास्त्रभरप्रवीणं
हरिः पितुः सद्मनि तं न्ययुङ्क्त ॥ ३२ ॥

रङ्गत्तुरङ्गक्षतभूमिभाग-
रजोभरच्छन्नदिनाधिनाथैः ।
कैश्चित् प्रयाणैरगमत् कुमारो
विराटभूपालपुरोपकण्ठम् ॥ ३३ ॥

नदीप्रवाहप्रमितस्य तस्य
कुमारसैन्यस्य समागतस्य ।
विराटभूपालबलाम्बुराशि-
र्वेलाकुलः संमुखमाचचाल ॥ ३४ ॥

युधिष्ठिरं वीक्ष्य दृशा कृशानु-
तेजाः कुमारस्तुरगं विमुच्य ।
नमश्चकार क्षितिनम्रमौलि-
स्तथा च भीमप्रमुखान् क्रमेण ॥ ३५ ॥

न्युब्जद्वपुः किंचिदुदञ्चिताङ्ग-
भागेन सार्धं पुरपार्थिवेन ।
कटीतटन्यस्तकरश्चकार
कृती परीरम्भभरं[1] विधिज्ञः ॥ ३६ ॥

समानरूपप्रतिपत्तिमेव
विधाय सङ्गं सममुत्तरेण ।
युधिष्ठिरादेशवशात् कुमार-
स्तुङ्गं तुरङ्गं पुनरारुरोह ॥ ३७ ॥

प्रत्यालयद्वारविमुक्तमुक्ता-
कदम्बकस्वस्तिककैतवेन ।
सर्वाङ्गमानन्दमनोरमश्रीः
प्रस्वेदबिन्दुप्रकरान् बभार ॥ ३८ ॥

परिस्फुरद्वाहसमूहपाद-
प्रपातभिन्नावनिमण्डलोत्थैः ।
वातप्रणुन्ने रजसां विताने-
र्विवर्णतामप्युररीचकार ॥ ३९ ॥

सा देशदेशप्रसरत्प्रमत्त-
मातङ्गचक्रक्रमसंभ्रमेण ।
वसुंधरायां परिकम्पितायां
कम्पानुभावं बिभरांबभूव ॥ ४० ॥

तत्कालसज्जीकृतनीलरत्न-
द्वास्तोरणस्तम्भसमुद्भवेन ।
मरीचिवीचिप्रसरेण भूरि
रोमाञ्चमङ्गे रचयांचकार ॥ ४१ ॥

उच्चैःशिरःसंगतलोकघट्ट-
प्रभ्रष्टहारच्युतमौक्तिकौघैः ।
स्फीतप्रतोलीनयनान्तराला-
दश्रुप्रपातं परितस्ततान ॥ ४२ ॥

आयाति सौभाग्यनिधौ कुमारे
विस्तारयामास च बाहुपाशौ ।
द्विधाभवत्संमुखपौरलोक-
व्याजेन नारीव पुरी तदासौ ॥ ४३ ॥

कुलकम् ।

मूर्त्या स मूर्तः किल कामदेवः
कामं विभूषाभरभासमानः ।
स्मितप्रतोलीनयनाध्वनेव
पुरीपुरन्ध्रीहृदयं विवेश ॥ ४४ ॥

आकीर्यमाणा नवतूर्यनादै-
र्नार्यः स्वकार्यप्रसरं विमुच्य ।
कुमारमालोकयितुं विलोला
जालान्तरालाभिमुखं प्रचेलुः ॥ ४५ ॥

औत्सुक्यतः काचन चित्रकार्थं
करे गृहीतां मृगनाभिमेव ।
स्निग्धाञ्जनभ्रान्तिवशात् किरन्ती
नेत्रद्वये तत्र ददौ मृगत्वम् ॥ ४६ ॥

ताडङ्कमेकं कर एव काचित्
तदा वहन्ती चपलं चचाल ।
त्रैलोक्यजैत्रस्मरचक्रवर्ति-
पताकिनीवाग्रविलासिचक्रा ॥ ४७ ॥

क्षिप्रं श्रुतौ कुण्डलमेकमेव
कस्याश्चिदास्यं दधदाबभासे ।
हर्षप्रकर्षाद्रुतमाससाद
द्रष्टुं कुमारं स रविः किमिन्दुः ॥ ४८ ॥

चचाल हारस्य पदे निवेश्य
समुत्सुका काचन काञ्चिदाम ।
सकिङ्किणीध्वानमिदं वहन्ती
सा मूर्तकामद्विपवद्बभासे ॥ ४९ ॥

१—विधिं इति पा० ।

चतुर्गवाक्षं सुदृशां मनोभूः
स्वसद्मनां कौतुकतोऽधिरूढः ।
तदेकतानप्रविलोक्यमान-
किरीटिसूनुप्रतिमानदम्भात् ॥ ५० ॥

आलोकयन् वंश्यममुं कुमारं
भूरीणि रूपाणि विधुर्विधाय ।
स्मितेक्षणाश्चन्द्रमुखीमुखानां
मिषेण हर्षो न समाप तृप्तिम् ॥ ५१ ॥

निपीयमानः स्मरविह्वलाभि-
रेवं सुकेशीभिरसौ कुमारः ।
अन्तः प्रविश्याशु मनोऽपहृत्य
तासां क्रमादप्रकटो बभूव ॥ ५२ ॥

निपीय नेत्राञ्जलिसंपुटेन
क्षणेन सौन्दर्यरसं सुकेश्यः ।
चिरादतृप्ता इव नैव जग्मुः
पुरोविभागाद्विगतेऽपि वीरे ॥ ५३ ॥

विनिर्जितेनेव तनुप्रभाभि-
रयं स्वकीयप्रतिमाच्छलेन ।
स्मरेण संवेशितपादमूलः
सौधान्तरं रत्नधरं विवेश ॥ ५४ ॥

बहुश्रुतैः कुण्डलितं द्विजेन्द्रै-
र्निश्चित्य लग्नं शुभभावसूचि ।
पाणिग्रहारम्भमहोत्सवानां
कृते नृपावुत्सुकतां प्रपन्नौ ॥ ५५ ॥

स्वाजन्यजन्यप्रमदावदाताः
स्वयं तदा तारतरत्वराभिः ।
मत्स्यावनीन्दोः पुरि विश्वभूपाः
श्रीविश्वरूपप्रमुखाः समीयुः ॥ ५६ ॥

भ्रान्तभ्रुवो वन्दनमालिकाभि-
श्चलत्कराः केतनचक्रवालैः ।
महोत्सवेऽस्मिन् सदनश्रियोऽपि
नृत्यं वितेनुर्धृतरत्नभूषाः ॥ ५७ ॥

तनूजशुभ्रच्छदजाह्नवीभिः
पतिक्रमाम्भोजमधुव्रतीभिः ।
तिथौ शुभायां द्रुतमुत्तरायां
नितम्बिनीभिः प्रतिकर्म चक्रे ॥ ५८ ॥

साभ्यङ्गभूषा सुभगा बभासे
सिद्धार्थदूर्वाङ्कुरकर्बुराङ्गी ।
उपात्तबाणा ध्वजशोभिहेम-
नीलाश्मचेतोभवचैत्यचारुः ॥ ५९ ॥

रोध्रेण निर्नाशिततैलमङ्ग-
माबिभ्रती कुङ्कुमपङ्कसङ्गम् ।
स्नानक्षणे तूर्यरवप्रमोदैः
सा मूर्तरागप्रसरेव रेजे ॥ ६० ॥

एणीदृशां श्रेणिरिमां कुमारीं
सकुङ्कुमामस्नपयत् पयोभिः ।
शुभ्रांशुकुम्भप्रभवैर्विभाभिः
ससांध्यरागां रजनीं यथाद्याम् ॥ ६१ ॥

सा चन्द्रिकाभं परिधाय वास-
श्चन्द्रानना प्राप विभावरीव ।
भास्वन्मणिस्तम्भचतुर्दिगद्रि-
नभोनिभं केलिवितर्दिमध्यम् । ६२ ॥

प्राचीमुखीं चन्द्रमुखीमथैनां
निवेश्य नेपथ्यविधिर्व्यधायि ।
यस्तोषिणा बन्धुवधूजनेन
स प्राप नेपथ्यमिदं तदङ्गम् ॥ ६३ ॥

विभूषणाभोगधरा वराङ्गी
विलोक्य रूपं मणिदर्पणे सा ।
आकाङ्क्षदात्मन्यभिमन्युभावं
मुदाभिमन्यो च तदात्मभावम् ॥ ६४ ॥

ततान दीक्षातिलकं सवित्री
तस्या यदास्येऽर्पितचन्द्रदास्ये ।
तत्रैव पर्यङ्कसमे समेत्य
चकार केलिं सरतिर्मनोभूः ॥ ६५ ॥

पूर्णं यदूर्णामयसूत्रमस्या
हस्ते जनन्या जनितं तदानीम् ।
पाणिग्रहारम्भजुषां लभन्ते
न तेन साम्यं मणिकङ्कणानि ॥ ६६ ॥

Digitized by Google

आबिम्बिता रत्नमयीभिरङ्के
सा गोपदेवीभिरपि व्यधायि ।
मातुर्गिरा तारतमं नमन्ती
किमुच्यते बन्धुजनाङ्गनाभिः ॥ ६७ ॥

इतश्च पुत्र्या द्रुपदस्य हर्षात्
तदाभिमन्युः शतमन्युतेजाः ।
अलंकृतो नव्यविभूषणानां
गणेन पाणिग्रहणोचितेन ॥ ६८ ॥

स्फुटाननच्छन्नसमग्रदेहे
चीरे स वीरः कलयन् रराज ।
शुभ्रीकृतश्चन्द्रिकया विकाशि-
शशाङ्कबिम्बः किल पूर्वशैलः ॥ ६९ ॥

यन्निर्ममे निर्मलचन्दनेन
विशेषकं भालतले जनन्या ।
मृगाङ्कबिम्बात् कलयाधिकश्रि
तेनाननं तस्य तदा बभासे ॥ ७० ॥

जितं गुरुत्वेन तदान्तरिक्षं
जगाम तस्यानुचरत्वमेव ।
श्यामं लघूभूय विविक्ततारं
सपुष्पधम्मिल्लनिबन्धदम्भात् ॥ ७१ ॥

मुखेन्दुसङ्गच्युतचन्द्रकान्त-
ताडङ्कयुग्मामृतनिर्झराभाम् ।
बभार हारः शतसंख्यदामा
नृकण्ठधामा घनसारधामा ॥ ७२ ॥

मुखे मृगाङ्कः कुलवत्सलत्वात्
प्रेम्णा च पौत्रस्य हरिर्विभुत्वे ।
चक्रेऽवतारं पितृभागिनेय-
स्नेहेन देहे मदनोऽपि तस्य ॥ ७३ ॥

उद्दण्डदण्डातपवारणस्य
नानामणिश्रेणिभृतो मिषेण ।
तस्मिन् नियुक्तः स्ववशः सशेषः
संपिण्ड्य सिन्धुः किल मातुलेन ॥ ७४ ॥

द्विपं चतुर्दन्तमिवोरुदन्तं
मिथःप्रतिच्छन्दवशाद्विशालम् ।
आरुह्य मुक्ताधवलं स पौत्र-
स्नेहेन दत्तं किल वासवेन ॥ ७५ ॥

उत्तार्यमाणस्य तदा भगिन्या
शुभ्रस्य दम्भाद्वरकुम्भकस्य ।
मुहुः परिभ्रम्य विलोक्यमानः
कुल्यप्रमोदाद्विधुना चचाल ॥ ७६ ॥

युग्मम् ।

दूतेन तूर्यध्वनिनेव तस्य
पुरो वरस्यागमने निदिष्टे ।
विराटगोत्रप्रमदाकुलस्य
मदाकुलस्य स्फुरितं प्रमोदैः ॥ ७७ ॥

स पूर्वशैलादिव दन्तिराजा-
दुत्तीर्य मार्तण्ड इवोरुतेजाः ।
पादप्रचारेण विराटधाम
धाराधराध्वानमिवाविवेश ॥ ७८ ॥

बृहज्जनैः संमुखमापतद्भि-
र्निन्येऽभिमन्युः सविधे स वध्वाः ।
प्राग्गन्धवाहैरिव गन्धवाहे-
रम्भोरुहिण्या मधुपः समीपम् ॥ ७९ ॥

मौनावलम्बिन्यखिलेऽपि लोके
वर्णं लिपिन्यस्त इव स्थितेऽस्मिन् ।
पदं पदं चाक्षरमक्षरं च
स्फुटं नियुक्तेषु समुच्चरत्सु ॥ ८० ॥

संसाध्य लग्नं सजनोघतालं
स्थालं विशालं परिवादयत्सु ।
संमेलयामास करौ तदीयौ
गुरुर्विराटस्य धृतौ कराभ्याम् ॥ ८१ ॥

युग्मम् ।

ह्रिया मुहुः संप्रसरापसारं
मिथस्तयोर्नेत्रयुगं तदानीम् ।
विश्रम्य विश्रम्य विभां प्रियाङ्गा-
दपादतृप्तं चिरतृष्णयेव ॥ ८२ ॥

प्रदक्षिणास्तौ शिखिनः सृजन्तौ
जायापती निर्मलचीरचारू ।

समापतु: शोणसरोरुहान्त:-
संभ्रान्तशुभ्रच्छदयुग्मशोभाम् ॥ ८३ ॥
गुरोर्नियोगादपि लाजमुष्टिं
निक्षिप्य बाला ज्वलिते कृशानौ ।
आचारधूमं भृशमाददे यं
स चिह्नलीलामगमन्मुखेन्दौ ॥ ८४ ॥
ततः सौभद्रेयः सकलकुलवीरव्रततता-
नताम्भोदो रोदोजलधिजलपूरायतयशाः ।
प्रियायुक्तो मुक्ताविशदगुणराशिर्गुरुजनं
नमश्चक्रे वक्रेतरहृदयवृत्तिर्द्विजगिरा ॥ ८५ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरार्हन्मताईस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
पर्वैतद्विकटं विराटनृपतेस्तद्बुद्धिसिद्धापमा-
शुद्धोर्मित्विषि बालभारतमहाकाव्ये तुरीयं ययौ ॥ ८६ ॥
सर्गैश्चतुर्भिरप्यासीदस्मिन् वैराटपर्वणि ।
अनुष्टुभां पञ्चशती षडशीतिश्च निश्चिता ॥ ८७ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के विराटपर्वण्यभिमन्युपाणिग्रहणो नाम चतुर्थः सर्गः ॥ ४ ॥ :: ::

॥ श्रीः ॥

॥ खण्डप्रशस्तौ ॥

॥ नृसिंहावतारवर्णनम् ॥

(२८) किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो
नैतादृक् क्वापि जीवोऽद्भुतमुपनयमे देव संप्राप्त एषः ।
चापं चापं न चापीत्यह ह ह ह ह हा कर्कशत्वं नखाना-
मित्थं दैत्येन्द्रवक्षः खरनखमुखरैर्जघ्निवान्यः स वोऽव्यात् ॥

इत्थममुना प्रकारेण यो नृसिंहो दैत्येन्द्रवक्षः खरनखमुखरैः कठोरनखाग्रैर्जघ्निवान्हतवान्स देवोऽव्याद्रक्षतु, इत्थमिति कथम्, यदा हरिर्नृसिंहाकृत्या हिरण्यकशिपुं दैत्यं हन्तुमाजगाम तदा तत्स्वर्वैर्यागमनमाकलय्य दैत्येन प्रोक्तं रे अनुचर त्वं वद किं किमिति, ततः सिंहोऽयमिति तेन प्रत्युक्ते पुनराह दैत्यस्ततः किमिति ततः किं भयमित्यर्थः, ततोऽनुचरः प्राह नरसदृशवपुर्देवविचित्रं गृहीतो नैतादृक् क्वापि जीवोऽद्भुतमिति, हे देव न केवलं सिंहो न च केवलं मानवः किन्तु विलक्षणरूपं प्राप्तो यच्चेदृशो जीवः क्वापि संसारे दृष्टोऽतोऽद्भुतमेतदित्यर्थः, ततस्तर्हि तं मत्समीपं प्रापयेति दैत्येनोक्तेऽनुचरेणोक्तं स एष स्वयमेवागत इति, ततो दैत्यो विस्मयाद्भीत्या च चापं चापमिति झटिति धनुरानयेत्याह, ततः केनचिद्वृद्धानुचरेणोक्तं हे महाराज नायं चापी किंतु निरस्त्रो यदि च भवांश्चापी तदा न्याययुद्धं न भवेत्वहि शूरा अन्यायेन युयुत्सन्ते सास्त्रनिरस्त्रयोरन्याययुद्धमिति हि सुप्रसिद्धमिति, तत इत्थं तयोर्जल्पतोरेव हरिणा खरनखैस्तद्वक्षसि विदार्यमाणे नखानां कर्कशत्वं काठिन्यमित्थं लोके न क्वापि दृष्टमद्भुतमेतत्काठिन्यमित्यहहहहहहेत्यादिशब्दैर्लोके आश्चर्यं ध्वनितमभूदिति शेषः ॥ २८ ॥

(२९) चञ्चच्चण्डनखाग्रभेदविगलद्दैत्येन्द्रवक्षःक्षर-
द्रक्ताभ्यक्तसुपाटलोद्भटसटासंभ्रान्तभीमाननः ।
तिर्यक्कण्ठकठोरघोषघटनासर्वाङ्गखर्वीभव-
द्दिङ्मातङ्गनिरीक्षितो विजयते वैकुण्ठकण्ठीरवः ॥

स वैकुण्ठश्चासौ कण्ठीरवश्च वैकुण्ठकण्ठीरवो नृसिंहाकृतिर्विष्णुर्विजयते, कीदृशः सः, चञ्चच्चण्डनखाग्रैर्दीप्यमानरौद्रकरजकोटिभिः कृतो यो भेदो विदारणं तेन विगलद्यद्दैत्येन्द्रवक्षस्तस्मात्क्षरद्यद्रुधिरं तेनाभ्यक्ताः सिक्ताः सुपाटलाः सुष्ठु स्पष्टा लोहिता उद्भटा याः सटास्ताभिः संभ्रान्तं सभयं भीममाननं मुखं यस्य सः, यद्यपि केवलस्याञ्जधातोर्म्रक्षणे घृतादिसेकेऽर्थे वृत्तिः सोपसृष्टस्य तु व्यक्तिगत्योरिति भेदो लोके दृश्यतेऽतोऽत्र सोपसर्गस्याञ्जेः सेकार्थता न घटते तथापि महाकविप्रयोगात्तादृशनियमस्य प्रायिकत्वमनुमीयत इति बोध्यम्, पुनः किंविशिष्टः, तिर्यक्कण्ठेन कठोरा या घोषघटना महाध्वनिविलासः सिंहनादस्तया सर्वाङ्गेण सर्वशरीरेण खर्वीभवन्तो नीचैर्नमन्तो ये दिङ्मातङ्गास्तैर्निरीक्षितोऽवलोकितः ॥ २९ ॥

(३०) वपुर्दलनसंभ्रमात्स्वनखरन्ध्रनष्टे रिपौ
क्व यात इति विस्मयात्प्रहितलोचनः सर्वतः ।
वृथेति करताडनान्निपतितं पुरो दानवं
निरीक्ष्य भुवि रेणुवज्जयति जातहासो हरिः ॥

रिपौ हिरण्यकशिपौ वपुषो देहस्य दलनं विदारणं तस्य संभ्रमाद्भयात्सिंहनखच्छिद्रान्तः प्रविष्टे सति क्व प्रदेशे यातो गत इति विस्मयादाश्चर्यात्सर्वतः सर्वासु दिक्षु प्रहिते प्रेषिते लोचने नेत्रे येन स नृसिंहस्तं रिपुं क्वचिदप्यनवलोकयन्नृ-
घेति मुधैव मयैतावन्तमनेहसं प्रयासः कृत इति सखेदं करताडनादुभाभ्यां पाणिभ्यां तालिकादानात्स्वनखरन्ध्रात्पुरोऽग्रे

भुवि रेणुश्चिपतितं दानवं निरीक्ष्य दृष्ट्वा जातहासः समुत्पन्नहास्यो हरिर्जयति ॥ ३० ॥

(३१) दंष्ट्रासंकटवक्त्रकन्दरलसल्लज्जिह्वस्य हव्याशन-
ज्वालाभासुरभूरिकेसरसटाभारस्य दैत्यद्रुहः ।
व्यावल्गद्बलवद्धिरण्यकशिपुक्रोडस्थलास्फालन-
स्फारप्रस्फुटदस्थिपञ्जरवक्रूरानखाः पान्तु वः ॥

दैत्याय हिरण्यकशिपवे द्रुह्यतीति दैत्यद्रुट् तस्य हरेर्नखा वो युष्मान्पान्तु रक्षन्तु, किंविशिष्टस्य तस्य, दंष्ट्राभिः संकटः संकीर्णो यो वक्त्रकन्दरो मुखगह्वरं तस्मिन् ललन्ती विलसन्ती जिह्वा यस्येति, पुनः किंविशिष्टस्य, हव्याशनोऽग्निस्तस्य ज्वाला अर्चिषस्ताइव भासुरा देदीप्यमाना भूरि बह्व्यो याः केसरसटाः सिंहस्कन्धस्फुरज्जटास्तासां भारः समूहो यस्य स तस्येति, पुनः किंविशिष्टा नखाः, व्यावल्गन् कूर्दन् बलवानत्यो हिरण्यकशिपुर्दैत्यविशेषस्तस्य यत्क्रोडस्थलमुत्सङ्गस्थलं तस्य यन्नखैः कृतमास्फालनं विदारणं तेन स्फारो विस्तीर्णः प्रस्फुटन्योऽस्थिपञ्जरं कङ्कालं तस्य यो रवः शब्दस्तेन क्रूरा उग्रा इति ॥ ३१ ॥

(३२) भूयः कण्ठावधूतिव्यतिकरतरलोत्तंसनक्षत्रमाला-
बालेन्दुक्षुद्रघण्टारणितदशदिशादन्तिचीत्कारकारी ।
अव्याद्वो दैत्यराजप्रथमयमपुरीयानघण्टानिनादो
नादो दिग्भित्तिभेदप्रसरसरभसः कूटकण्ठीरवस्य ॥

कूटेन छद्मना कण्ठीरवः सिंहः प्रकृत्या च यो ना हरिरेव तस्य नृसिंहस्य भगवतो नादः क्ष्वेडो वो युष्मान् भूयो स्मावत्तु, किंविशिष्टो नादः, दिश एव भित्तयस्तासां भेदप्रसरे भेदप्रवृत्तौ सरभसो राभस्ययुक्तस्त्वरोत्सुकइति भावः, पुनः किंविशिष्टः, कण्ठावधूतिव्यतिकरे गलकुहरान्दोलनप्रस्तावे तरला चपलोत्तंसोच्चैः स्थायिनी या नक्षत्रमाला नक्षत्रश्रेणिः सा च बालेन्दुर्नवचन्द्रश्च तावेव क्षुद्रघण्टा लघुकिङ्किण्यस्तासां यद्रणितं शब्दितं तेन दशसु दिक्षु ये दिग्दन्तिनो दिग्गजास्तेषां चीत्कारं कारयतीति सः, पुनः किंविशिष्टः, दैत्यराजस्य हिरण्यकशिपोः प्रथमो यमपुरीयाने गमने यो घण्टानिनादः स इवेति ॥ ३२ ॥

(३३) अन्तःक्रोधोज्जिहानज्वलनभवशिखाकारजिव्ह व-
लोढप्रोढब्रह्माण्डभाण्डः पृथुभुवनगुहागर्भगम्भीरनादः ।
दृप्यत्पारीन्द्रमूर्तिर्मुरजिदवतु वः सुप्रभामण्डलोभिः
कुर्वन्निर्धूमधूमध्वजनिचितमिव व्योमरोमच्छटानाम् ॥

दर्पयुक्तसिंहमूर्तिर्मुरजिद्विष्णुर्वो युष्मानवतु रक्षतु, स किंविशिष्टः, अन्तश्चित्ते क्रोधएवोज्जिहान उत्पद्यमानो यो ज्वलनोऽग्निस्तस्मादुद्भवोत्पन्ना शिखाकारा रक्तत्वसाधर्म्यात्सा जिह्वा तयाऽवलीढमोषद्रास्वादितं प्रौढं गरिष्ठं ब्रह्माण्डभाण्डं येन सः, पुनः किंविशिष्टः, पृथुर्विस्तीर्णा या भुवनगुहा त्रिजगद्गह्वरं तस्या यो गर्भो मध्यं तत्र गम्भीरो नादो यस्य सः, किंकुर्वन्निव, रोमच्छटानां स्कन्धस्फुरत्केसराणां सुप्रभामण्डलोभिः शोभनकान्तिश्रेणीभिर्व्योमाकाशं निर्धूमधूमध्वजनिचितं निर्धूमाग्निव्याप्तं कुर्वन्निव, यतस्तद्रोम्णां प्रभारक्ता भवन्ति ततश्चाकाशं गच्छन्त्यो निर्धूमाग्निभ्रान्तिं जनयन्तीति भावः ॥ ३३ ॥

(३४) सोमार्धायितनिष्पिधानदशनः सन्ध्यायितान्तर्मुखो
बालार्कायितलोचनः सुरधनुर्लेखायितभ्रूलतः ।
अन्तर्नादनिरोधपीवरगलत्वक्कूपनिर्यत्तडि-
त्तारस्फारसटावरुद्धगगनः पायान्नृसिंहः स वः ॥

स नृसिंहो वः पायात्, किंविशिष्टः सः, सोमार्धं चन्द्रार्धमिवाचरन्ति ते सोमार्धायिताः निष्पिधानाः पिधानरहिताश्च ते दशना दन्ता यस्य सः दन्तानामर्धचन्द्राकृतित्वं प्रसिद्धमेव क्रोधसमये ओष्ठपुटाभ्यामनाच्छादनं च तथेति भावः, पुनः किंविशिष्टः, सन्ध्येव रक्तत्वसाधर्म्यादाचरत् सन्ध्यायितमन्तर्मुखं यस्य सः, पुनः किंविशिष्टः, बालार्कइवाचरन्ती लोचने यस्य सः, पुनः किंविशिष्टः, सुरधनुर्लेखेवेन्द्रचापलेखेवाचरति भ्रूलताऽस्येति, अत्राचारार्थकक्यङन्तात् क्तप्रत्ययो ज्ञेयः, पुनःकथंभूतः, अन्तर्मध्ये यो नादनिरोधः शब्दावरोधनं तेन यः पीवरो गलस्तस्मिन् ये त्वक्कूपा रोमकूपास्तेभ्यो निर्यन्ती निस्सरन्ती तडिद्विद्युत्तत्तारोज्ज्वला स्फाराविस्तीर्णा या सटा केसरच्छटा तयाऽवरुद्धं व्याप्तं गगनं येन स इति ॥ ३४ ॥

(३५) चटच्चुटिति चर्मणिच्छमिति चोच्छलच्छोणिते
धगद्धगिति मेदसि स्फुटरवोऽस्थनि ष्टागिति ।
पुनातु भवतो हरेरमरवैरिवीरोरसि
क्वणत्करजपञ्जरक्रकचघर्षजन्मानलः ॥

अमराणां देवानां वैरी शत्रुर्हिरण्यकशिपुनामा दैत्यः सएव वीरः सुभटस्तस्योरसि हृदये, अथ वा अमरवैरिषु वीरो दैत्यस्तस्योरसि हरेर्विष्णोः क्वणन् शब्दं कुर्वन् यः करजपञ्जरो नखपञ्जरः स एव क्रकचं करपत्रकं तेन यो घर्षो हृदयस्य घर्षणं तस्माज्जन्मोत्पत्तिर्यस्य स इदृग्विधो योऽनलोऽग्निः स भवतो युष्मान्पुनातु पवित्रयतु, तथा चर्मणि त्वचि जायमान-

श्चटच्चटिति प्रकटरवो वः पुनातु, तथा उच्छलद्रुधिरे छमच्छमिति स्फुटरवः पुनातु, तथा मेदसि वपायां धगद्धगिति स्फुटरवः, अस्थिनि च ष्टागिति यः स्फुटरवः स पुनातु, पुनात्विति क्रियापदसंबन्धः सर्वत्र, अत्र चटच्चटिति धगद्धगिति तु अनुकरणे नातोत्र नाम्रेडितस्येति प्रवर्तत इति ॥ ३५ ॥

(३६) शत्रोः प्राणानिलाः पञ्च वयं दश जयोऽत्र कः ।
इति कोपादिवाताम्राः पान्तु वो नृहरेर्नखाः ॥

नृहरेर्नखा वः पान्तु, किंभूतास्ते, इति हेतोः कोपात्क्रोधाद्विवाऽऽताम्रा ईषद्रक्ताः, यद्यपि स्वत एव नखा रक्ता भवन्ति परंतु कविभिरुत्प्रेक्ष्यन्ते, अथ कोपकारणमाह शत्रोरिति, शत्रोर्हिरण्यकशिपोः प्राणानिलाः प्राणवायवस्तावत्पञ्चैव वयं च दश नखा अतोऽत्रवैरिविदारणे को जयः यदि चाल्पैर्बहवो जीयन्ते तदा जयः परमोत्कृष्टः प्रतिभाति यदा चाल्पे जय्या बहवश्च जेतारस्तदा लोके हास्यमेवेतिकोपोत्पत्तिकारणमिति भावः ॥ ३६ ॥

(३७) ससत्वरमितस्ततस्ततविहस्तहस्ताटवी-
निकृत्तसुरशत्रुहृत्तलजसिक्तवक्षस्थलः ।
स्फुरद्वरगभस्तिभिः स्थगितसप्तसप्तिद्युतिः
समस्तनिगमस्तुतो नृहरिरस्तु नः स्वस्तये ॥

नृहरिर्नृसिंहाकृतिर्हरिर्नोऽस्मभ्यं स्वस्तये कल्याणायास्तु, अनव्ययस्यापि स्वस्तिशब्दस्य सत्वात्स्वस्तये इति, किंविशिष्टो नृहरिः, ससत्वरं सशीघ्रं यथा भवति तथा इतस्ततः सर्वत्र ततौ विस्तीर्णौ विहस्तौ वैरिहनने व्याकुलौ यौ हस्तौ तावेव अटव्यरण्यं तस्यां निकृत्तं छिन्नं यत्सुरशत्रोर्हिरण्यकशिपोर्हृद्धृदयं तस्मादुत्पन्नं रुधिरं तेन सिक्तं परिक्लिन्नं वक्षस्थलं यस्य सः, पुनः किंविशिष्टः, स्फुरन्तो देदीप्यमाना वराः प्रधाना ये गभस्तयः किरणास्तैः स्थगिताच्छादिता सप्तसप्तेः सूर्यस्य द्युतिर्येन सः, पुनः किंविशिष्टः, समस्तैर्निगमैरधिष्ठानैस्तात्स्थ्यात्तद्व्यपदेश इतिन्यायात्तद्वासिभिर्जनैः स्तुतः यद्वा समस्तेषु सर्वेषु निगमेषु वेदेषु स्तुतो वर्णित इति ॥ ३७ ॥

(३८) विद्युच्चक्रकरालकेसरसटाभारस्य दैत्यद्रुहः
शोणान्नेत्रहुताशडम्बरभृतः सिंहाकृतेः शार्ङ्गिणः ।
विस्फूर्जद्गलगर्जितर्जितककुम्मातङ्गदर्पोदयाः
संरम्भाः सुखयन्तु वः खरनखतुण्णद्विषद्वक्षसः ॥

सिंहाकृतेर्भगवतः शार्ङ्गिणश्चक्रिणो विष्णोः संरम्भा रिपुविनाशनव्यापारा वो युष्मान्पान्तु सुखयन्तु सुखी कुर्वन्तु, किंविशिष्टस्य तस्य, विद्युच्चक्रं तडित्समूहस्तद्वत्कराला भयजनका याः केसरसटास्तासां भारः समूहो यस्मिन्स तस्य, पुनः किंविशिष्टस्य, दैत्यद्रुहः दैत्याय द्रुह्यतीति दैत्यद्रुट् तस्य, पुनः किंविशिष्टस्य, शोणान् रक्तीभवन्यो नेत्रहुताशो नयनाग्निस्तस्य यो डम्बर आडम्बरस्तं बिभर्तीति यः स तस्य, किंविशिष्टाः संरम्भाः, विस्फूर्जन्दीप्यमानो यो गलकण्ठस्तेन यो गर्जिः सिंहनादरूपः शब्दस्तेन तर्जितः ककुम्मातङ्गानां दर्पोदयो यैस्ते, गर्जधातोरिप्रत्यये गर्जिः पुल्लिङ्गः यद्यपि गर्जिशब्दो मेघध्वनिवाचकः उक्तं च हेमकोशे, यथा

जलदस्य तु स्तनितंगर्जितं गर्जिः ।

इति तथाप्यत्रगाम्भीर्याद्यनेकधर्मसाधर्म्यात्तच्छब्दप्रयोगः, कीदृशस्य नृहरेः, खरनखैः तुण्णानि विदारितानि द्विषतां वैरिणां वक्षांसि येन स तस्येति ॥ ३८ ॥

(३९) यत्राखण्डलदन्तिदन्तमुशलान्याखण्डितान्याहवे
धारा यत्र पिनाकपाणिपरशोराकुण्ठिता वक्षसि ।
तन्मे तावदुरो नृसिंहकरजैर्व्यादीर्यते सत्वरं
दैवेदुर्जनतां गते तृणमपि प्रायेण वज्रायते ॥

नृसिंहेन वक्षसि विदार्यमाणो हिरण्यकशिपुरित्थमवदत्, तथाहि, यत्रोरसि आखण्डलस्येन्द्रस्य दन्तिन ऐरावतस्य दन्तमुसलान्याखण्डितान्यासमन्तात्खण्डितानि भग्नानीति यावत्, यत्रोरसि पिनाकपाणेरीश्वरस्य परशोः कुठारस्य धारा आकुण्ठतां प्राप्ता तन्मे ममोरो हृदयमेतादृशकाठिन्ययुक्तं सत्वरं शीघ्रं नृसिंहकरजैर्नृसिंहनखैर्व्यादीर्यते, यतो दैवे भाग्ये दुर्जनतां गते प्रातिकूल्यं प्राप्ते सति प्रायेण स्वभावतस्तृणमपि वज्रायते, वज्रशब्दादाचारक्यङिति बोध्यम् एवंविधो नृसिंहोऽस्मान्युष्मांश्च रक्षत्विति भावः ॥ ३९ ॥

॥ इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवृत्तौ नृसिंहावतारवर्णनम् ॥

THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

FOURTH BOOK, SECOND DAILY LESSON.

(*Continued from page* 110.)

Non-uterine bodies exist.

अनियतदिग्देशपूर्वकत्वात् ॥ ६ ॥

Aph. 6. Because [the non-uterine body] has antecedents of indeterminate time and space;—

[1] It might be asked how the non-uterine body of Manu and others is produced, seeing that it is atoms originative of semen and blood that are originative of a particular body, and that these do not there exist. In anticipation of this difficulty the aphorism is stated. Atoms indeterminate in time and space are those of which the time and space are not determined. From having these for their antecedents or conditions 'there exist non-uterine bodies,' such being the connection of the four aphorisms succeeding the fifth with the tenth. There exist, therefore, in the sphere of Varuṇa &c. non-uterine bodies, aqueous, igneous, aerial, and mental. To obviate the difficulty as to whence come the atoms originative of beings whose production is independent of semen, blood &c., it being seen that in the case of uterine bodies it is only seminal and sanguineous, atoms that are originative, the following statement has been made. Atoms terrene, aqueous, igneous, and aerial exist in all quarters and are in all places, and there being no local determination of these, there is no lack of atoms in the production of non-uterine bodies. For it is not true that no atoms other than seminal or sanguineous are originative of bodies, since, were it so, it would follow that there was no production of the bodies of gnats, musquitoes, trees, shrubs, &c. V.

धर्मविशेषाच्च ॥ ७ ॥

Aph. 7. Also because of peculiar merit ;—

[2] The sense is that in creation &c., motion arises in the atoms in consequence only of conjunction of soul and the fruits of actions done in a former state of being, and that the atoms having by that action come together originate, in the order of binary atomic aggregates &c., the non-uterine bodies of divine sages, &c. The following implication is also to be considered, that it is in consequence of peculiar demerit that the tortured bodies of musquitoes and other insects generated by heat are produced. U.

[1] ननु मन्वादीनामयोनिजं शरीरं कथमुत्पद्यते शुक्रशोणितारम्भकपरमाणूनामेव विशिष्टशरीरारम्भकत्वेन तत्र तदभावादित्याशङ्कायामाह । अनियतौ दिग्देशौ येषां ते अनियतदिग्देशाः परमाणवस्तत्पूर्व्वकत्वात् तदधीनत्वात् सन्त्ययोनिजाः इति दशमसूत्रेण पञ्चमान्तानां चतुर्णां सूत्राणामन्वयः तथा च वरुणलोकादौ अयोनिजा आप्याः तैजसा वायवीया मानसाश्च देहाः सन्ति तेषां शुक्रशोणिताद्यनपेक्षोत्पत्तिकानामारम्भकाः परमाणवः कुत आगच्छन्ति योनिजेषु शुक्रशोणितपरमाणव एवारम्भका दृष्टा इत्याशंकानिरासार्थमुक्तमिदम् पार्थिवा जलीयाः तैजसा वायवीयाश्च परमाणवः सर्व्वासु दिक्षु सर्व्वेषु देशेषु च सन्ति तेषां दिग्देशनियमाभावात् अयोनिजशरीरोत्पत्तौ न परमाणुदुर्भिक्षम् न हि शुक्रशोणितपरमाणुभिन्नाः परमाणवो न देहारम्भकाः दंशमशकतरुगुल्मादिदेहानुपपत्तिप्रसङ्गादित्यर्थः ॥

[2] अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म्म तेन च कर्म्मणा सम्भूय परमाणवो द्व्यणुकक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्ते इत्यर्थः उपलक्षणञ्चैतत् अधर्म्मविशेषाच्च क्षुद्रजन्तूनामूष्मजानां मशकादीनां यातनामयानि शरीराण्युत्पद्यन्ते इत्यपि द्रष्टव्यं ॥

समाख्याभावाच्च ॥ ८ ॥

Aph. 8. Also because names exist ;—

[1] Because names or terms are or exist, 'without an ancestor or father [to bestow them]', for these words, are to be supplied. For not all names are imposed by a father &c., for such terms as water-pot, cloth, are not such. It is therefore the same God who imposed names on water-pots, cloth, and other inanimate things, that imposed the names Manu, Maríchi &c. on non-uterine. bodies. V.

संज्ञाया आदित्वात् ॥ ९ ॥

Aph. 9. Because of the primitiveness of the term ;—

[2] By means of the primordial name Brahman &c. which became manifest in creation &c. it is known that non-uterine body exists. For there are not parents of Brahman, by whom the name Brahman should be invented. U.

सन्त्ययोनिजाः ॥ १० ॥

Aph. 10. There exist non-uterine [bodies.]

[3] Here is pointed out that which is established by the four preceding aphorisms. The words 'peculiar bodies of Manu, Maríchi, and others' are to be supplied. V.

वेदलिङ्गाच्च ॥ ११ ॥

Aph. 11. [This follows] also from the evidence of the Veda.

[4] It is known from evidence or information in the

[1] समाख्या संज्ञा तस्या भावात् सत्त्वात् बीजी पित्रादिकं विनैवेति शेषः न हि सर्व्वाः संज्ञाः पित्रादिनैव निवेशिताः घटपटादिसंज्ञानान्तथात्वाभावात् तथा च येनेश्वरेण घटपटाद्यचेतनेषु संज्ञा निवेशितास्तेनैव मनुमरीच्यादिसंज्ञा अयोनिजेषु शरीरेषु निवेशिता इति भावः ॥

[2] सर्गादौ या ब्रह्मादिसंज्ञा आदिभूता प्राथमिकी तया ज्ञायते अस्त्ययोनिजं शरीरमिति न हि तदा ब्रह्मणो मातापितरौ स्तः याभ्यां ब्रह्मादिसंज्ञा कृता स्यादिति भावः ॥

[3] इदानीं चतुर्णामुक्तानां सूत्राणां साध्यं निर्दिशति मनुमरीच्यादीनां देहविशेषा इति शेषः ॥

[4] वेदरूपं यल्लिङ्गं ज्ञापकं तस्मात् तथा ब्राह्मणो ऽस्य मुखमासीत् स मुखतो ब्राह्मणमसृजत् इत्यादिकेभ्यो वेदेभ्य एव अजोनिजाः शरीरविशेषाः सन्तीति ज्ञायते परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगसाधनत्वम् पार्थिवं इन्द्रियं घ्राणं तच्च गन्धस्य गन्धगतजातीनाञ्च ग्राहकम् घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादिवत् वायूपनीतसुरभिभागवद्वा रसनेन्द्रियं जलीयं परकीयरूपाद्यव्यञ्जकत्वे सति परकीयरसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् एतच्च रसस्य तद्गतजातीनाञ्च ग्राहकं द्रव्यग्रहणे घ्राणरसनयोर्न सामर्थ्यम् चक्षुरिन्द्रियं तैजसं गन्धाद्यव्यञ्जकत्वे सति रूपव्यञ्जकत्वात् दीपप्रभावत् इदञ्च इन्द्रियं संयोगरूपसन्निकर्षेण उद्भूतरूपवन्ति महत्त्वविशिष्टानि च द्रव्याणि गृह्णाति संयुक्तसमवेतसमवायरूपसन्निकर्षेण तादृशद्रव्यवृत्तीनि रूपसंख्यापरिमितिपृथक्त्वसंयोगविभागपरत्वापरत्ववेगस्नेहद्रवत्वकर्म्मसामान्यानि च गृह्णाति संयुक्तसमवेतसमवायरूपसन्निकर्षेण योग्यवृत्तिवृत्तीनि सामान्यानि गृह्णाति संयुक्तविशेषणतासंयुक्तसमवेतविशेष-

Digitized by Google

form of the Veda, from such texts as 'The Bráhman was his mouth'; 'He created the Bráhman from his mouth'; that there exist particular non-uterine bodies. But aqueous, igneous, and aerial bodies possess a sensitive apparatus, having the support of terrene particles. The terrene organ is that of smell, and this apprehends odour and the classes contained in odour. The organ of smell is earthy because in the midst of colours &c it manifests odour only, in the same manner as clarified butter &c. manifests the scent of saffron, or like the fragrant particles wafted by the wind. The organ of taste is aqueous, because, while it does not manifest extraneous colour &c., it does reveal extraneous taste, in the same manner as water which reveals the flavour of grain fried and ground. This is cognisant of taste and the classes contained under it. Smell and taste have no power to cognise matter. The organ of vision is igneous, for whereas it does not manifest odour &c. it does manifest colour, in the same manner as the light of a lamp. This organ, by contact in the form of conjunction, cognises substances of appreciable colour and possessed of magnitude. It cognises also, by contact in the form of coinhesion in the conjunct, colour, number, extension, individuality, conjunction, disjunction, priority, posteriority, velocity, viscidity, fluidity, motion, and generality existing in such substances. By contact in the form of coinhesion in the coinherent in the conjunct it cognises universal entities existent in that which exists in the existent [such as the idea of the class 'cow,' such idea existing in the class which exists in its constituent members.] By being qualitative of the conjunct, by being qualitative of the coinherent in the conjunct &c. it cognises universal non-existences [viz. antecedent, subsequent, and absolute non-existence] which are non-existent in the existent, and also reciprocal non-existences [such as the non-existence of a water-pot as a piece of cloth] which are non-existent in the non-existent residing in the existent. According to the

णतादिभिर्य्योग्यप्रतियोगिकान् संसर्गाभावान् योग्यगतान् अयोग्यप्रतियोगिकान् अन्योन्याभावान् गृह्णाति काणादनये समवायस्य प्रत्यक्षं न भवति त्वगिन्द्रियं देहव्यापी उद्भूतस्पर्शग्राहकं तद्गतसामान्यग्राहकञ्च एवं रूपभिन्नान् रूपमात्रगतसामान्यभिन्नांश्च चक्षुर्ग्राह्यान् गृह्णाति वायुमपि गृह्णातीति नव्याः सन्निकर्षस्तु पूर्व्ववत् तदेतदिन्द्रियं वायवीयं रूपाव्यञ्जकत्वे सति स्पर्शव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवदित्यादिरनुमानप्रकारः सर्व्वेषूक्तानुमानेषु आत्मनः प्रभृतिषु व्यभिचारवारणाय सत्यन्तम् एवं सन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणं देयम् कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमिन्द्रियम् तच्च समवायेन शब्दान् समवायेन तद्गतानि सामान्यानि च गृह्णाति यदिन्द्रियं यद्ग्राहकं तत्प्रतियोगिकसंसर्गाभावानां तद्गतानामन्योन्याभावानाञ्च ग्राहकमपि तदिन्द्रियं भवति इति बाह्येन्द्रियाणि पञ्च मनस्तु अन्तरिन्द्रियं तच्च संयोगेन आत्मानं विशेषगुणोपरक्तमेव गृह्णाति संयुक्तसमवायेन बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नान् आत्मत्वजातिञ्च गृह्णाति संयुक्तसमवेतसमवायेन बुद्ध्यादिगतानि सामान्यानि गृह्णातीत्यन्यत्र विस्तरः ॥

system of Kaṇáda there is no perception of coinhesion. The organ of touch pervades the body, and is cognisant of appreciable feels and the classes therein contained. It thus cognises the objects cognisable to the eye, with the exception of colour and the universal entities residing in colour only. According to the moderns it also cognises air. Its contact [with the tactile object] is as described above. The form of inference respecting it is, therefore, as follows:—This organ is aerial, for while it does not manifest colour &c. it does manifest touch, like the wind from a fan which manifests coldness in the perspiration adhering to the limbs. In all the aforesaid inferences the clause beginning with 'while' or 'whereas,' is inserted to prevent an undue applicability to soul, the internal organ, &c. So also, to prevent undue applicability to contact, we must add the qualification 'there being substantiality.' The organ of hearing is ether limited to the outer part of the ear. This cognises sounds by coinhesion, and the universal entities contained in sounds by coinhesion in the coinherent. Whatever organ is cognisant of anything, is cognisant also of the universal non-existences in it non-existent, and of the reciprocal non-existences residing in it. So much for the five external organs. The mind is an internal organ, and by conjunction cognises soul tinged with its peculiar attributes. By coinhesion in the conjunct it cognises thought, pleasure, pain, desire, aversion, and volition, and the universal entity, the idea of soul. By coinhesion in the coinherent in the conjunct it cognises the universal entities existent in thought, &c. A full discussion of the subject may be sought elsewhere. V.

FIFTH BOOK, FIRST DAILY LESSON.

Action investigated. **आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥ १ ॥**

Aph. 1. Action in the hand is by means of conjunction with, and volition of, soul.

[1] The subject of the fifth chapter is the investigation of action. The investigation of action determinable by volition is that of the first daily lesson. In this there are sections treating of (1) throwing upwards, (2) throwing upwards effected without volition, (3) of action which has merit for its cause, (4) of actions good, bad, and indifferent. The aphorism is propounded in rela-

[1] कर्म्मपरीक्षा पञ्चमाध्यायार्थः प्रयत्ननिष्पाद्यकर्म्मपरीक्षा प्रथमाह्निकार्थः तत्राप्युत्क्षेपणप्रकरणम् पुण्यहेतुकर्म्मप्रकरणम् पुण्यपापोदासीनकर्म्मप्रकरणञ्च चेष्टाविशेषमधिकृत्याह । संयोगप्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म्म तस्य च कर्म्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम् प्रयत्नश्च निमित्तकारणम् इयमेव चेष्टा प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियाया चेष्टात्वात् स्वासमवेतस्वातिरिक्तस्पर्शवदन्यप्रयत्नजन्यक्रियाया वा ॥

Digitized by Google

tion to a particular kind of muscular action. Action in the hand as its coinhesive cause is by means of conjunction with, and volition of, soul. Of this action the non-coinhesive cause is conjunction with soul possessing volition. Volition is the efficient cause. This is muscular action; for muscular action is action whose non-coinhesive cause is conjunction with soul possessing volition, or action produced by volition other than that which possesses touch of that which is not coinhesive in, or excluded from, self. U.

तथा हस्तसंयोगाच्च मुसले कर्म ॥ २ ॥

Aph. 2. In like manner, and from conjunction with the hand, is action in the pestle.

[1] By the particle 'and' gravity is additionally implied as another efficient cause. 'In like manner from conjunction with the hand' may also mean 'from conjunction with the hand possessed of upward motion.' In this instance the non-coinhesive cause is conjunction of the pestle with the hand conjunct with soul possessing volition. The coinhesive cause is the pestle. The efficient causes are volition and gravity. U.

अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥ ३ ॥

Aph. 3. In the action produced in a pestle and the like by impact, conjunction with the hand is not a cause, being excluded from it.

[2] The cause of the sudden upward motion which is produced in the pestle when struck by the mortar, is stated. In this instance though there is conjunction of the hand with the rising pestle, such conjunction is superfluous if regarded as a cause. The impact of the mortar is only the non-coinhesive cause. It may be asked why this is the case. It is therefore stated that it is so because of the exclusion, that is, because volition would be improperly predicated. If there were volition in this case, there would be no sudden upward motion in the pestle. By a volition to hold [the pestle and mortar] apart there would be a mere sustention of the pestle; or the upward motion of the pestle would depend upon volition. U.

तथात्मसंयोगो हस्तकर्मणि ॥ ४ ॥

Aph. 4. In like manner conjunction with soul in relation to action in the hand [is not a cause.]

[1] The aphorism is stated with the purpose of specifying a particular cause of the action of the hand as it flies upwards with the pestle, and of disproving the non-coinhesive causality of conjunction with soul possessing volition. The meaning is that conjunction with soul, that is conjunction with soul possessing volition, is likewise not a cause of action in the hand as it suddenly rises with the pestle. The term 'not a cause' is in the preceding aphorism. The words 'in like manner' are used to imply analogy. U.

अभिघातान्मुसलसंयोगाद्धस्ते कर्म ॥ ५ ॥

Aph. 5. The action in the hand is from impact, and from conjunction with the pestle.

[2] An answer is furnished to the question, 'Whence then at that time the upward motion of the hand'? The hand rises at that time in the same manner in which the metal at the end of the pestle rises. By the word 'impact,' is elliptically expressed recoil produced by impact. A recoil is produced in the pestle as its substratum by the vigorous action in the pestle accompanied with the impact. The upward motion in the hand also is consequent upon conjunction of the hand and pestle in relation to the recoil so effected, as its non-coinhesive cause. But this upward motion has not for its non-coinhesive cause conjunction with soul possessing volition, for the hand rises involuntarily together with the pestle. U.

आत्मकर्म हस्तसंयोगाच्च ॥ ६ ॥

Aph. 6. Action of the soul is also from conjunction with the hand.

[3] An answer is furnished to the objection, 'In the case of the action which is produced in the body or in a part

---

[1] चकारेण गुरुत्वं निमित्तकारणान्तरं समुच्चिनोति तथेति तादृशमुत्क्षेपणरूपमेवेत्यर्थः यद्वा तथा हस्तसंयोगादुत्क्षेपणवद्धस्तसंयोगादित्यर्थः अत्र च प्रयत्नवदात्मसंयुक्तेन हस्तेन मुसलस्य संयोगो ऽसमवायिकारणम् मुसलं समवायिकारणम् प्रयत्नगुरुत्वे निमित्तकारणे ॥

[2] उदूखलाभिहतस्य मुसलस्याकस्माद् यदुत्पतनं जायते तत्र कारणमाह । अत्र यद्यपि मुसलेन उत्पतता हस्तस्य संयोगो ऽप्यस्ति तथा ऽपि स संयोगो ऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम् कुत एवमित्यत आह । व्यतिरेकादिति प्रयत्नस्य व्यभिचारादित्यर्थः यदि यदा प्रयत्नः स्यात् मुसलस्यैवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुसलस्य धारणमेव भवेत् चेष्टाधीनं मुसलस्य पुनरुत्पतनं वा भवेत् इति भावः ॥

[1] मुसलेन सहोत्पततो हस्तस्य कर्मणि कारणे विशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्त्तुमाह । मुसलेन सहोत्पततो हस्तस्य कर्म्मणि आत्मसंयोगः प्रयत्नवदात्मसंयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्व्वसूत्रस्थं तथेत्यतिदिश्यते ॥

[2] कुतस्तर्हि हस्ते तदोत्पतनमत आह । यथा मुसले उत्पतति मुसलमुखस्थं लोहमुत्पतति तथा हस्तो ऽपि तदोत्पतति अत्राभिघातशब्देन अभिघातजनितः संस्कार उच्यते उपचारात् उत्पततो मुसलस्य पटुतरेण कर्म्मणा अभिघातसहकृतेन स्वाश्रये मुसले संस्कारो जनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुसलसंयोगादसमवायिकारणाद्धस्ते ऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणम् अवशो हि हस्तो मुसलेन सहोत्पततीति भावः ॥

[3] ननु शरीरे शरीरावयवे वायत्कर्म्मोपपद्यते तत्र प्रयत्नवदात्मसंयोगः कारणम् प्रकृते कथं न तथेत्यत आह । आत्मशब्दः शरीरावयवपर उपचारात् अन्वयानुपपत्तिरेवोपचारबीजम् तथा चात्मनः शरीरावयवस्यापि हस्तस्य यत्कर्म्म तत् हस्तमुसलसंयोगात् चकाराच्च वेगसमुच्चयः हस्तकर्म्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति स च क्वचित् प्रयत्नवदात्मसंयोगः क्वचिद्वेगवन्मुसलादिहस्तसंयोगो यथा वातुलस्य शरीरावयवकर्म्मेति भावः ॥

Digitized by Google

of the body, conjunction with soul possessing volition is the cause, why is it not so in the present instance'? The term soul by a metaphor signifies a portion of the body. The impossibility of the connection [of the words of a sentence if taken literally] is the germ of metaphor. The action then of the soul, that is of a member of the body, that is of the hand, results from conjunction of the hand and pestle. The word 'and' implies also velocity. In the action of the hand conjunction with the hand is the non-coinhesive cause. There is here no improper predication. This conjunction is at some times conjunction with the soul willing, at others conjunction with the pestle possessed of velocity, as is the case with the limbs of one that has the gout. U.

संयोगाभावे गुरुत्वात् पतनम् ॥ ७ ॥

Aph. 7. In the absence of conjunction falling [results] from gravity.

[1] By the term 'conjunction' impediments of whatever kind are also implied. In the absence, therefore, of impediments, in consequence of gravity as its non-coinhesive cause, falling, an action resulting in conjunction below, is produced. Here in fruit &c. possessing gravity the impediment is conjunction; in a bird &c. regulative volition is the impediment to falling; in an arrow discharged it is the recoil that is the impediment to falling. The sense is that falling is dependent on gravity in the absence of these. U.

[2] In the case of a body resting upon a tree or other high place, falling in consequence of the breaking of the bough &c. which supports it, or by accidentally slipping, it is gravity which is the cause, not conjunction with soul possessing volition, for that does not occasion falling but sometimes prevents it. Hence it is that in the case of birds &c. soaring in the sky, in consequence of conjunction with soul possessing volition, as an impediment, there is no fall. In like manner it is from conjunction with God possessing volition as an impediment that the earth and other worlds do not fall. V.

नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ॥ ८ ॥

Aph. 8. No upward or sideward motion takes place without a particular impulse.

---

[1] संयोगपदेन प्रतिबन्धकमात्रमुपलक्षयति प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम् अधःसंयोगफलिका क्रिया जायते तत्र गुरुत्ववति फलादौ प्रतिबन्धकः संयोगः विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः काण्डादौ क्षिप्ते संस्कार एव पतनप्रतिबन्धकः एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः ॥

[2] वृक्षाद्युच्चदेशारूढस्य देहस्य अवलम्बनशाखादिभङ्गेन दैवात् स्खलनादिना यत् पतनं भवति तत्र गुरुत्वमेव कारणं न तु प्रयत्नवदात्मसंयोगः तस्य पतनाप्रयोजकत्वात् क्वचित् प्रतिबन्धकत्वाच्च अत एव विहायसि विहरतां विहङ्गमादीनां प्रयत्नवदात्मसंयोगादेव प्रतिबन्धाच्च पतनम् एवं प्रयत्नवदीश्वरसंयोगात् प्रतिबन्धादेव भूरादिलोकानां न पतनम् ॥

[1] The perpendicular or horizontal motion which takes place in a clod of earth, an arrow &c., though they possess gravity, results from a particular, that is a violent, impulse. In the case of the falling, therefore, of a fruit, a bird, an arrow &c., in the absence of conjunction, volition, and recoil, there does not exist a particular impulse and consequently there is no upward or sideward motion. U.

प्रयत्नविशेषान्नोदनविशेषः ॥ ९ ॥

Aph. 9. Particular impulse [results] from particular volition.

नोदनविशेषादुदसनविशेषः ॥ १० ॥

Aph. 10. From particular impulse [results] particular casting upward.

[2] As for particular impulse, whence is it produced? This objection is answered. Particular impulse is produced by particular volition of which the cause is the desire 'I will throw sidewards or upwards, far or near.' By this impulse &c., perpendicular or horizontal movement is produced in a substance such as a clod of earth. Casting upwards is throwing far upwards. U.

हस्तकर्मणा दारककर्म व्याख्यातम् ॥ ११ ॥

Aph. 11. By the action of the hand, the action of a child is explained.

[3] The action which is produced in the hand together with the pestle by the impact of the mortar, is not preceded by volition, or a cause of merit and demerit. The analogy of this motion to a child's movement in the play of its hands and feet is pointed out. Though a child's movement of its hands and feet be preceded by volition, it has no good or evil result, and is not a cause of merit or demerit. Such is the meaning of the analogy. U.

A. E. G.

(To be continued.)

---

[1] गुरुत्ववतो ऽपि लोष्ठकाण्डादेर्यदूर्ध्वं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतराच्चोदनात् तथा च फलपक्षिबाणादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यङ् न चोर्ध्वं गमनमिति भावः ॥

[2] ननु नोदनविशेष एव कुत उत्पद्यते तत्राह । तिर्य्यक् उर्ध्वं दूरम् आसन्नं वा क्षिपामीतीच्छाकारणकः प्रयत्नविशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादेरूर्ध्वं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरोत्क्षेपणम् ॥

[3] उदूखलाभिघातात् मुसलेन सह हस्ते यत्कर्म्म उत्पन्नं तत्तावत् प्रयत्नपूर्व्वकं न भवति नापि पुण्यपापहेतुरतस्तत्तुल्यतां बालकस्य क्रीडाकरचरणादिचालनं यत्तत्रातिदिशति बालकस्य यद्यपि करचरणादिचालनं प्रयत्नपूर्व्वकमेव तथापि हिताहितफलप्राप्तिफलकं न भवति न वा पुण्यपापहेतुरित्यतिदेशार्थः ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 54. Benares, November 1st, 1870. Vol. V.

॥ प्रकरणपञ्चिकायां ॥

वाक्यार्थमातृकाया द्वितीयपरिच्छेदस्य पूर्वाङ्कप्रक्रान्तस्य शेषांशः,

॥ विषयकरणीयं च प्रकरणम् ॥

तस्मान्नियोज्यसंबन्धसमर्थं विधिवाचिभिः ।
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते ॥

ननु क्रियैव कार्यतयोच्यताम् । अस्तु सैव, स्वर्गसाधनतां कथमवलम्बिष्यते । उच्यते । वरं तस्या एव तदनुपपत्त्या चिरतरावस्थायिताकल्पना । न पुनरदृष्टस्याश्रुतस्य तदतिरेकिणोऽर्थस्य कल्पना । यदि कर्मण एव शक्तिरवस्थायिनीत्यभ्युपगम्यताम् । तदिदमुभयमपि प्रमाणान्तरविरोधान्न कल्पनामर्हति । अविरोधि हि प्रतीतिसिद्ध्यर्थं कल्पयितुं शक्यम् । कर्मणां त्वाशुतरनाशिनः चिरतरावस्थायिता प्रमाणान्तरनिरस्ता । शक्तिमति चातीते शक्तिरप्यतीतेति प्रमाणान्तरसिद्धमिति न सापि स्थायिनी शक्या कल्पयितुम् । अपि च आश्रये निवृत्ते किमाश्रया शक्तिरवतिष्ठताम् । अस्तु सैव स्वर्गसाधनमाश्रितेति चेत्, नान्यदीया शक्तिरन्यत्र वर्तते । प्रमाणान्तरविरोधादेव । किं च शक्तिमत्यसति शक्तिः फलं न युक्तम् । शक्तिमद्धि साधनं न शक्तिः । अन्यथा शक्तित्वं न स्यात् । ननु यागादिक्रिया देवताराधनोपायभूता सती कार्यतयोच्यतां, सा तत्प्रसादद्वारेण कालान्तरेऽपि फलं जनयितुमलमेव । देवता फलदानसमर्था कर्मभिराराध्यते । साऽऽराधिता प्रसीदति, प्रसन्ना च कर्तॄन्कालान्तरेऽपि फलेन योजयत्येवेति । नैतदेवम् । यागादीनां देवताराधनहेतुत्वे प्रमाणाभावात् । नहि देवताराधनोपायहेतुभूतो याग इत्यत्र किं चित्प्रमाणमस्ति । ननु देवतापूजार्थ एव यज्ञः स्मर्यते । पूजा च सर्वा पूज्यमानार्थेत्यवगतम् । उच्यते । न स्मृतिः प्रमाणं, स्मृतित्वादेव । प्रमाणान्तरापेक्षया च स्मृतीनामर्थवर्णनम् । तदनुवर्तित्वात्तासाम् । न च प्रमाणान्तरेण देवताराधनोपायता यागस्येत्युक्तम् । अतो देवतोद्देशेन द्रव्यत्यागो याग इति गौणं देवतापूजात्मकत्वमवगमयितव्यं, पूजापि पूज्योद्देशेनैव हि प्रवर्तत इति । अपि च सा कर्मभिराराध्यते या ऽऽराधनं प्रतिपद्यते । नानादिग्देशगामिना पुरुषेणानुष्ठीयमानयागात्मकपूजावगमश्च देवताया इति प्रमाणान्तरविरुद्धमेव, तस्यानादित्वानुपपत्तेः । देवताधिकरणे च प्रपञ्चेनायं ग्रन्थो निरस्त इति नातीव यतितव्यम् । अथापि स्यात्पुरुषसंस्कारहेतुभूतैव क्रिया शब्देन कार्यतयोच्यते तस्याश्च स्वर्गकामादिपुरुषसंबन्धात्पुरुषसंस्कारादेव कालान्तरे फलं भविष्यतीति । तच्च । पुरुषसंस्कारकत्वे प्रमाणाभावात् । नहि प्रमाणान्तरतः शब्दतो वा पुरुषसंस्कारहेतुता यागादीनामवसीयत इति कर्मण्यारम्भभाव्यत्वादित्यत्रोक्तम् । ननु क्रियैव कार्यतयोच्यतां फलसाधनता च तस्या एवाश्रीयतां, तदन्यथानुपपत्त्या तु किंचिदप्यपरं तज्जन्यं फलोदयानुगुणं कालान्तरस्थाय्यात्माश्रयं परिकल्प्यतां, मा भूत्तस्य लिङादिवाच्यतेति । उच्यते । तद्धि तदनुपपत्त्या कल्प्यते यदस्योपपादकम् । न च क्रियाजन्येनान्येन फलजनकेन कल्पितेन क्रियायाः साधनतोपपादिता भवति । नहि साधनसाधनं तस्य साधनं भवति । अवान्तरव्यापारो वा शक्तिर्वा तत्साधनतां निर्वाहयति । व्यापारयोगितयैव शक्तिमतां साधनता यतः । न चात्मसमवाय्यर्थोन्तरं कर्मणामवान्तरव्यापारो नापि शक्तिरिति न तस्यार्थापत्तिग-

म्यता युक्ता । किं त्वन्विताभिधाने स्थिते नियोज्यानुगुणयाच्छब्दवाच्यतैवोचितेति सूक्तम् । "नियोज्यसंबन्धसामर्थ्यकालान्तरस्थायि कार्यं क्रियातिरिक्तं लिङादिभिरेवोच्यते" इति ।

अत्रैषा प्रक्रिया । चोदनासूत्रे कार्यार्थता प्रतिपादिता । षष्ठाद्ये तस्यैव कार्यस्य स्वसंबन्धितया बोध्यः स्वर्गकामादिर्नियोज्य इति व्युत्पादितम् । तस्य च कार्यस्य नियोज्यविशेषणीभूतकाम्योत्पत्तिहेतुत्वमिति बादर्यधिकरणे राद्धान्तितम् । तच्च तथाभूतं क्रियारूपं न भवति, तस्याः फलसाधनत्वायोगात्, देवताराधनमुखेन तावत्फलसाधनता नास्तीति देवताधिकरणे व्युत्पादितम् । पुरुषसंस्कारमुखेन नास्तीति कर्मण्यारम्भभाव्यत्वादित्यत्रोक्तम् । कर्मणस्तच्छक्तेर्वा स्थायिता नेतीति चापूर्वाधिकरणे नियोज्यान्वयमुखेन मानान्तरापूर्वमात्मसमवायिकार्यं लिङादिरभिधीयतइति अनेकन्यायसाध्यम् । कार्यं च कृतिसाध्यम् । कृतिश्च पुंसां प्रयत्न एव । नत्वासौ भावार्थमन्तरेणास्तीति तत्संबन्धनियोग एवोच्यतइति भावार्थाधिकरणे स्थितम् । स च भावार्थः संबध्यमानस्तमवच्छिनत्तीति शब्दान्तराधिकरणे निर्णीतम् । विषयभूतश्च भावार्थः करणीभवतीति बादर्यधिकरणे एवोक्तम् । स्वकार्यसाधने भावार्थे पुरुषस्यैश्वर्यमिति तत्रैवोक्तम् ।

कालान्तरावस्थायिनः कार्यस्य नियोज्यान्वययोग्यतामाह ।

तद्धि कालान्तरस्थानाच्छक्तं स्वर्गादिसिद्धये ।
संबन्धोप्युपपद्येत नियोज्येनास्य कामिना ॥

ननु "भाष्यकारः प्रत्ययार्थतयाऽपूर्वमित्याह न क्रियादिभिन्नं कार्यमिति" यो मन्यते तं प्रत्याह ।

क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत् ।
अतो मानान्तरापूर्वमपूर्वमिति गीयते ॥

नन्वेवमपि अपूर्वं वाक्यार्थः स्याद्, न नियोगः । नियोगश्च वाक्यार्थ इति प्राभाकराणामुल्लाप इत्यत्राह ।

कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ ।
नियोज्य इति मीमांसानिष्क्रान्तैरभिधीयते ॥

एवमपि कथं वाक्यार्थत्वमित्याह ।

कार्यस्यैव प्रधानत्वाद्वाक्यार्थत्वं च युज्यते ।
वाक्यं तदेव हि प्राह नियोज्यविषयान्वितम् ॥

उक्तं ह्येतत्, यत्प्रधानतया प्रतिपाद्यते तद्वाक्यार्थ इति, कार्यं च प्रधानतयोच्यतइति इह तस्यैव वाक्यार्थत्वम् । नियोज्यान्विताभिधानं च प्रायिकमाधानाध्ययनाङ्गप्रधानोत्पत्तिनियोगानां नियोज्यशून्यानामभिधानाभ्युपगमात् । विवरणकारा ह्याधानविषयमपि नियोगान्तरमिच्छन्ति । क्रतुनियोगप्रत्यभिज्ञानाभावाद्, असन्निधाने हि तन्नियोगप्रत्यभिज्ञानं नोपपद्यते । नापि वर्णनादिविधिवदव्यभिचरितक्रतुसंबन्धात्तन्मुखेन प्रत्यभिज्ञोपपत्तिः, प्रागाधानादाहवनीयादिशब्दानामर्थापत्तिज्ञाने क्रतुसंबन्धानवगमात् । जुह्वादीनां त्वाकृतिवचनत्वात् प्रागेव विनियोगात्प्रत्यभिज्ञासंभवः । नन्वग्नीनामपि साध्यत्वात्साध्यद्वयं कथमेकस्मिन्वाक्ये ऽन्वीयते । उच्यते । नियोग एवात्रापि प्रधानं साध्यम् । अनीप्सितकर्मता त्वग्नीनामनीप्सितकर्मत्वेपि यत्तदाधानजन्यं फलमग्निसमवायि तद्योगिन्याहवनीयादिशब्दे प्रयोगादाहवनीयादीनां च क्रतूपयोगित्वात्तत्सिद्ध्यर्थतयैव पुरुषप्रवृत्त्युपपत्तेरनुष्ठानलाभादलं प्रयोज्याभिधानेनेति । तथाध्ययनविधावपि आचार्यकरणविधिप्रयुक्त्यैवानुष्ठानलाभान्नियोज्यशून्याभिधानमिति स्थितम् । प्रधानोत्पत्तिनियोगा अधिकारनियोगाक्षिप्तस्वविषयानुष्ठानेनैव लब्धसिद्धय इति न तत्र नियोज्याभिधानान्वेषणम् । अङ्गोत्पत्तिनियोगा अपि विनियुक्तप्रयाजादिविषयत्वादधिकारनियोगा एव सिध्यन्तीति किं तेषु नियोज्यान्विताभिधानेन । कथं पुनः प्रयाजादिविधीनां विनियुक्तविषयत्वम्, उच्यते । साधिकारनियोगसंनिधौ प्रयाजादिवाक्यानि श्रुतानि, न तावत्स्वयागविषयनियोगान्तरमवगमयितुमीशते । अवघातादिवदनुवादकत्वसंभवात्किं तु स्वरूपमात्रमेव यागस्य स्वपदार्थविशिष्टमुपपादयन्ति, तच्च प्रयोजनाकाङ्क्षितया प्रयोजनीभूतेन साधिकारेण नियोगेनान्वीयतइति । अधिकारवाक्यगत एव लिङ्शब्दस्तदन्वितं स्वार्थमभिधत्ते । स चान्वयः प्रयाजादीनामिदमर्थ्यमात्रेण ग्राहकग्रहणमित्युच्यते । करणोपकाराकाङ्क्षस्य च अपूर्वस्य यत्करणोपकारकत्वपरिकल्पनं सप्रकरणव्यापार इति । तत्र यत्तेषां करणोपकारजनकत्वकल्पनं तदौपादानिकं, नास्ति बहिःप्रयाजादिषु नियोगान्तरम् । न च नास्ति । क्षणिकानां तेषां संभूयेतिकर्तव्यतात्वानुपपत्तेर्नियोगान्तरस्यावश्याश्रयणीयत्वात् । योऽसौ लिङादिः प्रागनुमानार्थतया शङ्कितः । स इदानीं नियोगान्तरमभिधत्ते । अत एव चावघातादिवदेषां यज्यादिशब्दानामेवाङ्गवाक्यगतानामधिकारनियोगान्वितस्वार्थाभिधानं नाभ्युपगम्यते । तथा हि सति उत्पत्तावेवाङ्गतयाङ्गस्वरूपस्यान्यतिरश्चीनत्वान्नियोगान्तरविषयता न स्यात् । उत्पत्तिदशायां त्वनन्यनिष्ठतयाभिधानाद्युक्तं नियोगान्तरविषयत्वम् । कस्मात्पुनरन्यतिरश्चीनस्य नियोगान्तराविषयत्वम् । कार्यद्वयसंबन्धावगमानुपपत्तेः । न ह्येकं वस्तु युगपत्कार्यद्वयसंबन्धि शक्यमवगन्तुम् । यच्च त-

विनियोगान्तरं प्रयाजादिषु तत्पश्चादभिधीयमानमधिकारनियोगाङ्गतयैव शब्देनाभिधीयते। अन्यथा विषयद्वयविनियोगविरोधादित्यलमतिप्रसङ्गेन।

ननु नियोगस्य काम्यमानफलसाधनत्वाभ्युपगमात्फलस्यैव प्राधान्यात्तस्यैव वाक्यार्थत्वमित्यत आह।

आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।
कुर्वन्स्वर्गादिकमपि प्रधानं कार्यमेव नः॥

यत्तदपूर्वं कार्यं तस्य नियोज्यान्वयं विना कार्यत्वानुपपत्तिः। अनुष्ठानं विना तदसंभवात् कर्त्रा च विना तदनुपपत्तेः। अधिकारिणा च विना कर्तुरभावान्नियोज्यत्वं विना तद्योगादकामसाधने च नियोगानवगमादित्यात्मसिद्ध्यर्थमेव नियोगः काम्यमानफलसिद्धिहेतुत्वमवलम्बते स्वामिवत्। यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति, तथा नियोगोपि नियोज्यस्येति न प्राधान्यपदप्रच्युतिः।

ननु नियोगस्य फलसाधनत्वात्तस्य च सेतिकर्त्तव्यताककरणनिबन्धनसिद्धत्वात्तदनुष्ठानानन्तरं नियोगसिद्धेः फलसिद्धिः स्या,द्यथानन्तरनियोगो निष्पद्यते तर्हि क्रियायामतीतायां कुतस्तत्सिद्धिरित्याह।

विषयानुष्ठितौ सत्यां सिद्धो नहि विधिः फलम्।
तदानीमेव कुरुते सहकारिव्यपेक्षया॥

एषात्र दर्शनस्थितिः। प्रधानोत्पत्तिनियोगा अङ्गोत्पत्तिनियोगाश्च यथायथं संनिपत्योपकाराद्व्युक्तस्वविषयमात्रानुष्ठानेनैव सिद्ध्यन्ति, तत्र यान्यङ्गापूर्वाणि तानि संभूय प्रधानोत्पत्त्यपूर्वमुपकुर्वन्ति तस्माच्च परमापूर्वं निष्पद्यते। यान्यपि चाङ्गापूर्वाणि दीक्षणीयादीनां तेषामप्यारादुपकारकातिदेशिकाङ्गभाजामेकमुत्पत्त्यपूर्वमपरमप्यङ्गापूर्वं प्रधानवद्वेदितव्यमिति। अनया दिशा सकलमूहनीयम्। इत्थं यद्यपि कर्मानुष्ठानानन्तरमेव विनियोगसिद्धिः। तथा यत्फलस्यानन्तराभवनं तदुपपत्त्या कल्प्यते। अस्ति किं चिदपेक्षणीयमपरं यदसंनिधेः फलं नोत्पद्यते इति। नन्वेवं सति फलहेतुता ऽपूर्वस्य बाध्येतेत्यत्राह।

सहकारिव्यपेक्षा च कारणत्वं न बाधते।
मा वा बाधिष्ट सर्वेषु कार्ये पाकादिके यथा॥

तथेत्यर्थः।

"अतः पुरुषकारश्च दैवं च फलसाधनम्"

इत्याचार्याः, दैवमपूर्वमपेक्षणीयं सहकारि च पुरुषकारपदवेद्यम्।

नन्वेवं भवतु काम्येष्वपूर्वकार्याभिधानं लिङादीनां, नित्यनैमित्तिकनिषेधाधिकारेषु कथं तेषु फलोदयं प्राभाकरा अनुमन्यन्ते। नहि फलं फलतया ऽन्वीयते किं त्वधिकारिविशेषणतया, लब्धे तु जीवनादौ अधिकारिविशेषणे किं फलान्वेषणेन। न च फलमन्तरेण प्रवृत्त्यसंभवः। स्वसंबन्धिकार्यावगममात्रायत्तत्वात्प्रवृत्तेः। निरपेक्षः शब्दात्फलमन्तरेणापि स्वसंबन्धिकार्यावगमः। तावन्मात्रस्य लोके प्रवृत्तिहेतुत्वावगमात्। कार्यावगमोत्पादनायैव फलमुपयुज्यत इत्युक्तम्। ननु यथा शब्दात्कार्यावगतिः। तथा निष्फलत्वादनुमानेनाकार्यताप्रतीतिरपीति कथं प्रवृत्त्युपपत्तिः। न। आगमविरोधेनानुमानस्यात्मलाभाभावात्। एतावानेव प्रमाणव्यापारः,। तत्प्रवृत्तियोग्यार्थदर्शनम्। अन्यथा यदि कश्चित्कल्पिते फले न प्रवर्त्तेत तदा किं कर्त्तव्यं तेन फलोदयानभ्युपगमे च प्राच्यमार्गासंभवान्नित्यादिषु अपूर्वकार्याभिधानमप्रमाणकं तत्राह।

एवं कामाधिकारार्थपर्यालोचनयोत्थिता।
व्युत्पत्तिः सर्ववाक्यार्थप्रतिपत्तिनिबन्धनम्॥

उक्तमिदमन्यायश्चानेकार्थत्वमिति। तेन कामाधिकारे सिद्धे ऽपूर्वकार्याभिधायकत्वे नित्यादिष्वपि स एवार्थो विरोधाभावादाश्रीयते। नित्याधिकारानुगुण्येन तु क्रियाकार्यत्वाभिधानं काम्येष्वनुपपन्नमिति सर्वत्रापूर्वमेव वाक्यार्थः।

नन्वेवं वेदादेव व्युत्पत्तिः स्थिता स्यादित्याशङ्क्याह।

व्युत्पत्तिरिह कार्यार्थे व्यवहारानुसारिणी।
किं तु निर्धारणामात्रं वेदवाक्यविमर्शजम्॥

तत्रैतदेव तावदुक्तव्यम्। न केवलं वेदे लोकव्यवहारादेव शब्दार्थावधारणं किं तु प्रसिद्धार्थपदसंबन्धादपि पदार्थान्तरान्वययोग्यार्थाभिधायकत्वे स्थिते तदनुरूपार्थाभिधायकता निर्णीयत एव। एतच्च यववराहाधिकरणे व्युत्पादितं, व्यवहारत एव संबन्धावधारणादुभयथापि व्यवहारदर्शनात्समा विप्रतिपत्तिरिति पूर्वः पक्षः। पदान्तरसंबन्धादपि पदान्तरार्थाध्यवसानं भवत्येव तेन वैदिकवाक्यशेषान्वयार्हतालोचनेन दीर्घशूकार्थमेवेति राद्धान्तः। तथा त्रिवृच्छब्दे यूपाहवनीयादिषु शक्त्यवधारणाल्लोकेपि चायं व्यवहारो बहुलमुपलभ्यते। तथा च सति वैदिकनियोज्यान्वययोग्यतया लिङादीनामपूर्वकार्याभिधायकत्वनिर्णयो नानुपपन्नः। अयं चापरो विशेषो यल्लिङादियुक्तानां वाक्यानां कार्यार्थत्वं तत्तावद् वृद्धव्यवहार एव सिद्धं, किं तु लिङादिप्रत्ययानां तद्वाचकता तच्चापूर्वमित्येतावन्मात्रं वैदिकपदसंबन्धादवसीयत इति॥

एकदेशिनमधुना निराकर्त्तुमुपन्यस्यति।

व्यवहारत एवाहुर्व्युत्पत्तिमपरे पुनः ।
कार्ये मानान्तरावेद्ये क्रियादिव्यतिरेकिणि ॥

अस्यार्थः । केचिदेवमाहुः । लिङादियुक्तवाक्यश्रवणे प्रवृत्तिदर्शनात्कार्यावगतिनिबन्धनत्वात्प्रवृत्तेः कार्यमात्रमेव तेषामर्थः । न क्रियादिरूपता, तस्यां शब्दस्य प्रवृत्त्यनुपयोगित्वादिति क्रियानिष्कृष्टकार्याभिधायिता लौकिकव्यवहारादेव निर्णीयते इति ।

तदिदमयुक्तमिति प्रतिजानीते ।

सितेतरइव त्वेष पक्षश्चित्तं न कर्षति ।
चन्द्रातपामलन्यायप्रवाहमलिनीकृतः ॥

कथमित्याह ।

कार्ये मानान्तरावेद्ये पार्श्वस्थस्तन्निबन्धनम् ।
व्यवहारं कथंकारं शब्दात्प्रागवबुध्यताम् ॥
व्यवहारमविज्ञाय तन्निबन्धनतद्गता ।
प्रतिपत्तिः कथं ज्ञेया शब्दशक्तिः कथंतराम् ॥

इदमत्राकूतम् । यद्यपि कार्यमात्रमेव प्रवृत्त्युपयोगीति तावन्मात्रमेव शब्दार्थः, तथापि तस्य लोके क्रियागतस्यैव प्रवर्त्तकत्वदर्शनाद् शक्यते क्रियाश्रितता प्रत्येतुम् । यथा जातिमात्रस्य शब्दार्थत्वेऽपि व्यक्त्याश्रिततापि न प्रतिक्षिप्यते । तथा क्रियाश्रितत्वं प्रमाणान्तरप्रमितं न प्रतिक्षेपमर्हति । तेन क्रियातिरिक्तकार्याभिधायि न प्रसिद्धम् । यदि परं तन्निबन्धनव्यवहारदर्शनमेव स्यात् । तदा तद्दर्शनात्तद्धेतुभूतप्रतिपत्त्यन्यथानुपपत्त्या अनुमानेन शब्दस्य वाचकत्वाध्यवसानं भवेत् । न चैतदस्ति, तस्य शब्दादन्यतः प्रागनवगमात्तन्निबन्धनव्यवहाराप्रतिपत्तेः । तदप्रतिपत्तौ च तद्धेतुभूतप्रतिपत्त्यनुमानाच्च शक्तिकल्पनोपपत्तिः ।

तत्राकूतं विवृणोति ।

कार्यप्रतीतिमात्रं च प्रवृत्तेरनुमीयताम् ।
किं तु कार्या क्रियैवेह लोकदृष्ट्यावसीयते ॥

लोकप्रतीतं क्रियारूपत्वं च न शक्यते ऽपह्नोतुमिति कार्यमात्रार्थत्वे क्रियैव कार्यतया लिङाद्यर्थ इति निश्चीयते । न पुनः प्रमाणान्तरादपूर्वमिति । अन्य पुनर्वेदार्थबोधकस्वार्थवचननिबन्धनप्रवृत्तिदर्शनेनातीन्द्रिये कार्ये लिङादयो व्युत्पद्यन्तइत्याहुः । यदि आचार्यवचनादपि क्रियैव कार्यतयावगम्यते । तदा तस्याः स्वयं दुःखरूपत्वात्पुरुषार्थान्तरानुबन्धनं विना प्रवृत्त्यसंभवान्नियमेन सुखार्थिनः प्रवृत्तिर्न स्यात्ततश्च संध्योपासनादौ कथं प्रवृत्तिः, न च तत्र पुरुषार्थोऽस्ति । तस्मात्क्रियातिरिक्तकार्यमाचार्यवचनेभ्यो ऽवगम्यतइति ।

तान्प्रत्याह ।

वेदार्थाचार्यवाक्येषु प्रवृत्तिर्यापि दृश्यते ।
तत्राप्येषैव संबन्धपरिज्ञानविधा भवेत् ॥

आचार्यवाक्यश्रवणादपि शिष्याणां या संध्योपासनादौ प्रवृत्तिः तत्रापि बालः स्वविषयनिरूपितं क्रियाकार्यत्वावगममेव कारणत्वेन परिकल्पयेत् । फलं विना च तदनुपपत्तेः फलावगममपि संभावयेत् । व्युत्पत्त्यनुसारेण वेदार्थमपि प्रतिपद्यमानो नित्यनैमित्तिकाधिकारयोरपि फलं कल्पयेत् । स एवं बाल्यदशायां व्युत्पन्नः स्वयमाचार्यपदवीमधिरूढो वेदार्थं प्रतीत्य शिष्येभ्य उपदिशन्क्रियामेव कार्यतया प्रतिपादयेत् नापूर्वं कार्यम् ।

उपसंहरति ।

तस्माल्लोकानुसारेण व्युत्पत्तिः कार्यमात्रके ।
तस्य त्वपूर्वरूपत्वं वेदवाक्यानुसारतः ॥

एवमपूर्वकार्याभिधायित्वे सिद्धे चोदयति ।

ननु लोकविरोधित्वं पक्षेऽस्मिन्नपि दृश्यते ।
सर्वदैव यतो लोके क्रिया कार्यैव गम्यते ॥

परिहरति ।

भवेदेवं विरुध्येते कार्ये पूर्वेऽपि लौकिके ।
प्रतिपत्तिवियोगौ चेत्क्रियाकार्यत्वगोचरौ ॥

यदि क्रियाकार्यत्वगोचरौ लौकिकत्वप्रतिपत्तिप्रयोगौ अपूर्वकार्याभिधायित्वपक्षाङ्गीकारे विरुध्येते ततो लोकविरुद्धत्वं स्याद् अस्मत्पक्षस्य न चैतदस्तीत्याह ।

अपूर्वं हि क्रियासाध्यं साधिता साधनं क्रिया ।
तस्मादपूर्वसाध्यत्वं क्रियासाध्यत्वसंगतम् ॥
प्रमाणान्तरगम्यं हि लोकः शब्दैर्विवक्षति ।
क्रियाकार्यत्वएवातः प्रयोगो लक्षणान्वितः ॥

प्रतिपत्तिप्रयोगौ हि नावश्यं श्रौतवृत्त्यनुसारिणावेव । लक्षणयापि लोके दर्शनात् । तेन यद्यप्युक्तेन न्यायेनापूर्वमेव कार्यं लिङादीनामभिधेयम् । तथापि तस्य क्रियाकार्यत्वाव्यभिचारात्तत्र लक्षणया तयोर्नानुपपत्तिः । क्रियासाध्यं त्वपूर्वं साधिता च सती क्रिया साधनं भवतीत्यपूर्वेण सह क्रियाकार्यत्वं नित्यसंबद्धमिति शक्यते तल्लक्षयितुम् । यत्तु श्रौतपदार्थे लोके लिङादि न प्रयुज्यतइति, तत्तस्यापूर्वात्मनः प्रमाणान्तराप्रतीतत्वात्प्रतीतविषयत्वाच्च लौकिकप्रयोगस्य ।

यद्येषा लक्षणा किमिति तर्हि लोको नावगच्छतीत्याह ।

लक्षणानभिमानं तु मुख्यार्थानवधारणात् ।
ये तु मुख्यार्थकुशलास्तेषां लाक्षणिकत्वधीः ॥

इति । मुख्यमर्थमविदित्वा लाक्षणिकमपि अर्थं श्रौतमिव मन्यन्ते । म्लेच्छा इव यववराहाद्यर्थम् । मुख्यार्थविवेकिनां तु परीक्षकाणां लाक्षणिकत्वधीरिति ।

उपसंहरति ।

तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम् ।
वेदवाक्यं ब्रवीतीति संक्षेपोऽयमुदाहृतः ॥

ग्रन्थस्य कर्तुश्च संज्ञां प्रयोजनं चाह ।

वाक्यार्थमातृकेयं प्रभाकरगुरुदर्शनानुसारेण ।
अनसूयबोधनार्थं शालिकनाथेन संग्रथिता ॥
रचिता सच्चरितानामनुग्रहं कर्तुकामेन ।
वाक्यार्थमातृकाया वृत्तिरियं शालिकेनैव ॥

इति श्रीशालिकनाथमिश्रकृतायां वाक्यार्थमातृकावृत्तौ द्वितीयः परिच्छेदः ॥

॥ समाप्ता चेयं प्रकरणपञ्चिकायां वाक्यार्थमातृकावृत्तिः ॥

॥ श्रीमहागणपतये नमः ॥

प्रभाकरमतं सम्यगालोच्य क्रियते मया ।
विषयं करणं चैव विवेक्तुं युक्तिवर्णना ।

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिषु स्वर्गकामादिर्नियोज्यत्वेन संबध्यमानो नास्वर्गसाधने कार्ये बोध्यतया नेतुमलम् । क्रिया क्षणभाविनी न कालान्तरभाविनः स्वर्गादेः साधनायोपपद्यते इति कालान्तरावस्थायि क्रियातो भिन्नं कार्यमपूर्वं लिङादयो बोधयन्तीति स्थितम् । कार्यं च कृतीप्सितमुच्यते इति । कृतिरात्मव्यापारः पुरुषप्रयत्न इत्यनर्थान्तरम् । चेतनश्चात्मा कार्यं बोध्यतयान्वयमुपैति । न चान्यव्यापाराभिनिर्वर्त्त्यमन्यः स्वसंबन्धितया कार्यत्वेन संवेदयितुमर्लमित्यात्मनो मानमप्रत्यक्षसमधिगमनीयः प्रयत्नः स्वव्यापारः । अतस्तन्निर्वर्त्त्यमेवापूर्वं कार्यमात्मा मन्यते । प्रयत्न एव भवितव्येऽपूर्वे प्रयोजकभूतस्य भावयितुरात्मनो व्यापार इति भावनाशब्देनोच्यते । न च कार्याभिधानं कृतिमनभिदधतां लिङादीनामुपपद्यतइति कृतिमप्यभिदधति । अपूर्वं च । न च युगपदनेकाभिधानं दोषः । तथाऽवगमात् । आनुगुण्याच्च । अवगता हि प्रमाणेन लिङादीनां कार्याभिधायिता आनुगुण्यात् । कृतिर्गुणभूता प्रधानपदवर्त्तिन्यपूर्वात्मनि कार्ये, ऽविवादा च कर्त्रादिसंख्यावाचिता लिङादीनां कार्याभिधायिनामपि । न चाभिधेयतामात्रेण भावनाया एव वाक्यार्थत्वं, भाव्यमपूर्वं प्रति गुणभावेनाभिधानात् । प्रधानभावेनापूर्वस्याभिधानात् । तदेव वाक्यार्थ इति न किंचिदनुपपन्नम् । अत एव भगवतो भाष्यकारस्य तत्रतत्र व्यवहारः पुरुषप्रयत्नः प्रकरणतोऽपूर्वस्य नोच्यतइति । तस्य तथाविधस्य कार्यस्य नूनं केन चिद्भावार्थेनावच्छेदः । नहि प्रयत्नो भावार्थमन्तरेणास्ति । सर्वो हि पुरुषप्रयत्नः कं चिद्भावार्थमवश्यमाश्रयति । तेन विना तदभावात् । तेन प्रयत्नाविनाभावी भावार्थः प्रयत्नाभिनिर्वर्त्त्यमपूर्वमवच्छिनत्ति । अवच्छेदकतयैव विषयभावम् । यत्रैव हि यो भवति नान्यत्र स तस्य विषय इति विषयविदः, अनन्यत्र भावो विषयार्थः । अत एव भाव्य एवार्थो विषयः । भाव्यस्यैव पुरुषप्रयत्नगोचरत्वात् । तेन कार्याभिधायिभिः सह विषयबोधकतयैव भावार्थः कर्मशब्दः समभिव्याहारं प्रथममर्हति । तस्य प्रतिपत्त्यनुबन्धत्वात् । अविषयं ह्यपूर्वं कार्यं प्रत्येतुमशक्यम् । प्रतीतस्य च कार्यस्य साधनाकाङ्क्षा । तेन न जघन्यया साधनतया भावार्थानामपूर्वेण सहान्वयः । किं तु प्रतीत्त्युपायतामेव मन्यमानो भगवानेवं ब्रूते । नह्यविषयान्नियोगान्नियोगज्ञानमुत्पद्यतइति । स च विषयीभूतभावार्थावच्छिन्नो विध्यर्थः कार्यात्मा प्रतीतः करणमितिकर्त्तव्यतां चापेक्षते । अन्यत्रापि साध्ये दर्शनात् । तत्र स एव भावार्थो विषयीभूतः करणमित्यवसीयते । कृतिव्याप्यत्वात् । यो हि यया कृत्याऽन्यार्थप्रवृत्तया विषयीक्रियते स एव तत्र करणम् । यथा परशूद्यमननिपतनाभ्यां काष्ठगतद्वैधीभवनलक्षणकार्ये प्रवृत्ताभ्यां व्याप्यमानस्तयोरेव द्विधाभवनलक्षणफलावच्छेदलब्धद्वैधीकरणव्यपदेश्ययोश्छिदिधातुवाच्ययोः करणं, तथेहापि अपूर्वार्थप्रवृत्तपुरुषप्रयत्नव्याप्यमानो भावार्थस्तस्मिन्नेव प्रयत्ने अपूर्वभावनारूपे करणम् । ननु कथं प्रयत्नलब्धात्मा भावार्थो भावनायां करणम् । भाव्यमानतया हि कर्मैव स्यात् । उच्यते, तत्र न कर्म तावदपूर्वार्थकृतिविषयत्वात् । सर्वस्यैव हि कारकाणि कर्तृव्यतिरिक्तानि तद्व्यापारव्याप्यानि न चैतावता तानि कर्मतां प्रतिभजन्ते । अनीप्सितत्वात् । क्व चिच्चानीप्सिते कर्मता दृश्यतएव । यथाऽग्निहोत्रं जुहोतीति । करणं तु यद्यपि स्वरूपनिर्वृत्तौ न संभवति । तथाप्यपूर्वभावनारूपता तदधीनेति नानुपपन्नम् । यथा परशोरेव । नहि परशुः कर्म । करणं तु भवति, अनीप्सितत्वात् । उद्यमननिपतनयोर्द्वैधीकरणभवनरूपतायास्तदधीनत्वात् । परशुसंबन्धप्रभावेन ह्युद्यमननिपतने द्विधाभवनफलनिष्पादकतया द्विधाभवने कारणतां भजेते । अत उद्भिदा यजेतेति तृतीयानिर्देशोपपत्तेः । अपूर्वभावनायां कारणत्वाद्यागस्य तन्नामत्वाच्चोद्भिच्छब्दस्य । एवं चापूर्वफलयोरेकैकभावना, एकत्वात्पुरुषप्रयत्नस्य, एकमेव च कारणं तद्भावना-

Digitized by Google

व्याप्यत्वादेकैव भाव्यतेति । अत एव च साध्यविशुद्धिरिति प्राभाकराः । यदि विषयीभूतस्य करणता, हन्त तर्हि दर्शपूर्णमासाभ्यामित्यत्र तन्त्राभिहितानां तन्त्रेणैव प्रतिपत्त्यनुबन्धत्वाद्विषयभावस्यैकत्वादेकमेव करणं स्यात् । ततश्च भेदेनेतिकर्त्तव्यतासंबन्धो न स्यात् । उच्यते । न सम्यगवधृतमायुष्मता श्रुतिशालिनां वचः । यदेव विषयीभूतं तदेव करणं नान्यदिति । तस्यार्थः । प्रतीत्यनुबन्धतया च विषयभावः स यथाभिधानमवकल्पते प्रतिपत्त्युपायत्वादभिधानस्य । अतस्तन्त्राभिधानात्सहितानां विषयभावः करणं सिद्ध्यनुबन्धो नियोगस्य यथास्वभावं वेदितव्यम् । स्वभावाधीना हि साधकानां साधकतेति स्वभावभेदे हि भिन्ना साधकता । साधकत्वे च कृतिविषयत्वात्कारणतेति भेदेन करणभावः । नन्वेवं प्रत्येकं करणभावाश्रयणे करणान्तरनिरपेक्षणा किमिति नियोगसिद्धिहेतुना न भवति । नैवम् । यथाश्रुतकरणाधीनसिद्धित्वान्नियोगस्य । तत्र बहूनि करणानि तस्य श्रूयन्ते इति तथैव तस्य सिद्धिः । अनेककरणसंपाद्यतापि एकस्य दृष्टा, यथा गमनस्याश्वेन शिबिकया वा । गच्छतीति भिन्नस्तत्र करणव्यापार इति यद्युच्येत । अत्राप्युत्पत्त्यपूर्वावान्तरव्यापारभूतानि भिन्नानि संगिरामहे एव । अत एव तद्भेदेन भिन्नत्वात्करणभावस्य परमापूर्वप्रयुक्तत्वेऽप्याज्यौषधसांनाय्यधर्माणामसंकरः । अपूर्वसाधननिवेशितत्वाद्धर्माणां तस्य च भेदात्, ये पुनर्यागादीनामपूर्वं चान्तरा भावनां नानुमन्यन्ते । तेषां यागादीनां करणभावो दुर्घटः । अव्यापाररूपत्वादपूर्वस्य, व्यापारसंबन्धप्रसवत्वाच्च करणभावस्य । गौणं करणत्वमिति चेत् । कथं तर्हि इतिकर्त्तव्यतासंबन्धः । करणं हि इतिकर्त्तव्यतया संबध्यते । गौणं च न करणं, नहि गौणे मुख्यधर्मः संभवति । ये ऽपि सर्वाख्यातेष्वेव भावनाभिधानमाहुः, तेषामपि मतमस्मभ्यं न रोचते । नहि कार्यानभिधायिषु लिङादिषु भावनाभिधाने प्रमाणमस्ति । यदपि करोति पचतीति उत्तरदर्शनं प्रमाणमुपन्यस्तं, तदपि न । साधकव्यापारविशेषप्रश्नो ह्ययं किं करोतीति तत्र पचतीत्युत्तरेणापि तदेव निर्दिश्यते । यत्तु व्यापारमात्रवाचिधातूच्चारणमात्रं न क्रियते । तत्र तावन्मात्रस्यापभ्रंशत्वात्प्रत्ययान्तरोच्चारणे च प्रश्नेन सहासंबन्धः । अत एवाचेतने व्यापारे वर्त्तमानापदेशादीनां प्रयोगः । लिङादयस्तु चेतनमेवाधिकृत्य प्रयुज्यन्ते । न चाचेतनेषु गौणः प्रयोगः । मुख्यत्वे ऽप्यविरोधात्कर्त्रादिसंख्यादिमात्रवचनत्वेन रथो गच्छतीत्यादिषु लडर्थः, तेनाचेतनेष्वपि मुख्य एव लडर्थ इति । धातूनामेव क्रियावाचित्वात्प्रथमोपनिपाती व्यापार एव धात्वर्थो युक्तः । जघन्यौ संयोगविभागौ । किं चानेकार्थता ऽप्यापद्येत । केवलस्य संयोगस्यावाच्यत्वात्संयोगजेऽपि संयोगे ऽच्छ गच्छतीत्यप्रयोगाद्विभागजेऽपि विभागे प्रयोगानुपलब्धेः न केवलस्य विभागस्य गमिवाच्यतेति किमनेन स्वमनीषिकानिर्मितेन बालजल्पितेन मनोहारिणा निर्बन्धेन ।

शालिकनाथेन कृतं कृतिनामुपकारसिद्धये सम्यक् ।
समुदीत्यवरगुरुमतं सम्यग्विषयकरणीयमिदम् ॥

॥ अथ बालभारतस्योद्योगपर्वारम्भः ॥

॥ तत्र प्रथमः सर्गः ॥

संसारवारिधिद्वीपं द्वैपायनमुनिर्मुदे ।
मध्यस्थोऽप्याश्रितान् शास्त्रैः प्रीणात्यमृतोपमैः ॥ १ ॥
अथारिमन्त्रमाधाय राजा सह सहोदरैः ।
आससाद सदः सार्धं सौरिश्रीजानिसृञ्जयैः ॥ २ ॥
अष्टभिर्विष्टपाधीशैरभिहृत्कीर्तिसिन्धुभिः ।
सभेयं शुशुभे तुङ्गैरचलेव कुलाचलैः ॥ ३ ॥
दन्तांशुदम्भाद्दधतीं सुधाविजयजं यशः ।
ज्ञातनीतिपथो वाचमथोवाच तपःसुतः ॥ ४ ॥
ज्ञातनिःशेषशास्त्रस्य व्याहरे यत् पुरो हरेः ।
रत्नाचलस्य तत् काचलवढौकनिकायते ॥ ५ ॥
प्रीत्यैव वच्मि वा किंचित् पुरोऽपि त्रिजगद्गुरोः ।
स्नानं तन्याद्धुनीमूर्ध्नः शंभोरम्भोमयं न कः ॥ ६ ॥
बन्धुवर्गेण न समं समरो मम रोचते ।
जये पराजयेऽपि स्यान्नश्वरं कुलमेन्दवम् ॥ ७ ॥
संप्रहारः सहामीभिः स्वकैः क्व कुशलाय नः ।
स्वैरेव बिम्बितैः साकं रणः केसरिणामिव ॥ ८ ॥
स्वीया हन्त न हन्तव्यास्तेऽपराधपरा अपि ।
कश्छिन्ते रभसोत्कीर्णदृषं नखमपि स्वकम् ॥ ९ ॥
जितेषु तेष्वकीर्तिर्या सास्मानपि हि लिम्पति ।
लिप्तेऽङ्गे कर्दमैर्बिम्बमलिप्तमपि लिप्तवत् ॥ १० ॥
नीतिद्विषापि सार्धं न योद्धव्यं कुसुमैरपि ।
तत् किं युध्यामहे सार्धं बन्धुभिर्दुर्धरायुधाः ॥ ११ ॥
हरानङ्गितपुष्पेषुरणोदाहरणादिना ।
शिथिलीकृतसंधानः संधानविधये मतिः ॥ १२ ॥

Digitized by Google

दत्तां स बन्धुरस्माकं पञ्चानां ग्रामपञ्चकम् ।
भोगमात्रं फलं राज्ञामपि क्लेशस्ततोऽधिकः ॥ १३ ॥

का रक्तिर्भूरिभोग्यायां गणिकायामिव क्षितौ ।
भाग्यहीनं पतिं त्यक्त्वा रज्यते भाग्यभाजि या ॥ १४ ॥

श्रियं पुष्यन्तु नित्यं मद्बान्धवास्तेषु बान्धवाः ।
पञ्चानां कष्टतोऽस्माकं सन्तु ते सुखिताः शतम् ॥ १५ ॥

अथ वक्तुं लसत्तृष्णे कृष्णे हर्षोज्ज्वले बले ।
कोपानलस्फुलिङ्गाभवर्णः सात्यकिरुज्जगौ ॥ १६ ॥

नीतिशास्त्रान्धपट्टेन नियन्त्रितदृशां भृशम् ।
शूरः किरति गास्तापकृतोऽनालोकहेतुकाः ॥ १७ ॥

तथापि ब्रूमहे नीतिलतावनगतः शिखी ॥
अस्फुरद्विक्रमः को न द्विषद्दावेन दह्यते ॥ १८ ॥

सौम्ये नीतिक्रमोऽप्यास्तामपमाने तु विक्रमः ।
सुखं खेलन् कराग्रेण हतः स्यादुत्फणः फणी ॥ १९ ॥

चारु निश्चेतनं दारु यज्ज्वलत्येव घर्षणैः ।
अपमानेष्वनुद्युक्तान् वीक्ष्यापि ग्लान्ति सात्त्विकाः ॥ २० ॥

न सत्त्वं नाभिमानश्च येषां तेषां द्विषद्भवे ।
पराभवेऽपि स्वस्थानां नीतिरुत्तरमुत्तरम् ॥ २१ ॥

नीतिश्चेद्वः प्रमाणं तत् कुलजः सहजो रिपुः ।
स भवन् कृतकारातिरातिथ्यं क्रियते मृतेः ॥ २२ ॥

विरुद्धान् सहसा हन्ति नीतिज्ञोऽपि गुरूनपि ।
ज्वलन्तं शमयन्त्यङ्ग किमग्निं नाग्निहोत्रिणः ॥ २३ ॥

इति जातेऽथ संधाने न धीरपि विधीयते ।
तैर्भीमैकगदासाध्यैश्छलिभिर्वैरिभिः सह ॥ २४ ॥

एवं वाग्वृष्टिजीमूते सृञ्जयेऽथ विरामिणि ।
बभार भारतीं विष्णुर्मराल इव कोमलाम् ॥ २५ ॥ ॥

नीतिसारं नृप स्माह शौर्यसारं च सृञ्जयः ।
क्व स्थानं मद्गिरां वच्मि यदौदासीन्यदोषभीः ॥ २६ ॥

खण्डा निर्विक्रमा नीतिरनीतिर्विक्रमोऽप्यसन् ।
कीर्तिं जनयतो गौरीं मिथुनं नीतिविक्रमौ ॥ २७ ॥

धावन् क्रोधान्धकारेषु नीतिदीपिकया विना ।
स्खलित्वा क्ष्माभृति प्रौढे भज्यते विक्रमः क्वचित् ॥ २८ ॥

शौर्येण स्मेरिता नीतिः सूर्येणेव सरोजिनी ।
राजहंससमूहस्य वशीकरणकारणम् ॥ २९ ॥

तदस्ति हस्तगं शौर्यमिह नीतिः प्रयुज्यताम् ।
भजन्ते यदि संधानमन्धावनिपनन्दनाः ॥ ३० ॥

इंदृग्गिरि हरौ भूपपादपीठोपवेशिनी ।
शोणदृक्कोणकारीषपदं द्रुपदजावदत् ॥ ३१ ॥

नीतिः पततु वो मूर्ध्नि वयं व्रजतु वो मतिः ।
पातालं यातु वो मन्त्रः शास्त्रं वस्तत् प्रलीयताम् ॥ ३२ ॥

तदा सदसि मां वीक्ष्य तैः कृष्टकचवाससम् ।
प्रलीनं चेद्बलं तत् किं स्फुटितं न ह्रियापि हृत् ॥ ३३ ॥

संधिं निर्मत्तु निर्मानः सह तैरहितैर्नृपः ।
अहं तु हन्तुमद्य स्वमुद्यतास्मि हुताशने ॥ ३४ ॥

इतिवाचालपाञ्चालीनिश्वासानिलवीचिभिः ।
ततः क्रोधानलो भीमो गाढमुद्बलतां गतः ॥ ३५ ॥

वयोद्यत्कालरुद्राग्निवाडवायितदृग्युगः ।
ग्रसन्नोष्ठं रदैर्भालं भ्रुवा वाचमुवाच सः ॥ ३६ ॥

कालकूटैर्व्यथाद्यापि तद्वत्तैर्बालकेलिषु ।
दहत्यद्यापि मद्देहं दहनो जतुगेहजः ॥ ३७ ॥

तैः कूटसारषाट्कारैर्निद्राद्यापि ममैति न ।
क्लिश्यमानां परैः प्रेक्षे तथैवाद्यापि वल्लभाम् ॥ ३८ ॥

पिबामि रक्तमद्यापि न दुःशासनवक्षसः ।
तं नो सुयोधनस्योरुं गदयाद्यापि चूरये ॥ ३९ ॥

यावत् स्वक्रियामन्दः संदधात्यसको नृपः ।
क्षिपामि खण्डशः क्ष्मायां द्विषस्तावद्गदासखः ॥ ४० ॥

इति हस्ताहतक्षोणीचमत्कृतफणीश्वरः ।
भ्रमिध्वनद्गदाभीमो भीमो रोषाद्विरुत्थितः ॥ ४१ ॥

द्विषदम्भोनिधिक्षोभसमर्थमथ सीरभृत् ।
अधारयदमुं दोर्भ्यां गोविन्द इव मन्दरम्[1] ॥ ४२ ॥

असौ कुसुमयन् दन्तप्रभामधरपल्लवे ।
बभाषे च सभाकर्णपीयूषायणं वचः ॥ ४३ ॥

भीम स्थाम्ना च नाम्ना च जयत्येव जगद्भवान् ।
कुलीनगुरुगीः किंतु लङ्घिता लाघवाय ते ॥ ४४ ॥

यथा तथापि नो जेया बलिनश्छलिनश्च ते ।
भेदस्तु क्रियते कोऽपि संधिच्छलबलेश्चरैः ॥ ४५ ॥

---

१ क्षीराब्धिमन्थनावसर इति भावः ।

तुल्यः पितामहस्तुल्यो गुरुस्तुल्यो गुरोः सुतः ।
तेषां च भवतां चेते दधते यद्युदासताम् ॥ ४६ ॥

अर्जुनेषुमरुद्धुतकर्णादितुषपङ्क्तयः ।
अमी तथा त्वदायत्तगदावल्येव कौरवाः ॥ ४७ ॥

प्रमाणय गुरोर्वाणीं रुचिं च रचयात्मनः ।
तेऽपि त्वमिव दर्पिष्ठा न संधौ दधते धियम् ॥ ४८ ॥

इति सीरिवचःशान्तरुषि तस्थुषि मारुतौ ।
वाचमाचष्ट शौण्डीर्यशमोद्दामर्जुमर्जुनः ॥ ४९ ॥

संघट्यन्ते रणोद्घुष्टप्रबलानि बलानि च ।
नियुज्यते यथार्थोक्तिपूतो दूतश्च वैरिषु ॥ ५० ॥

चेन्न संदधते मूढधियो वध्यास्तदाशु ते ।
अपातितो न तोषाय मुख्यः स्वोऽपि चलो रदः ॥५१ ॥

सेवन्ते यदि तु ज्येष्ठमेवं ते जीवितानि नः ।
सेवमानो मुखद्वारं श्वासो मुक्तोऽपि गृह्यते ॥ ५२ ॥

कार्यं महदिहादीर्घसूचिता सूच्यतां परम् ।
राहुः पूर्णमपूर्णाङ्गो जयतीन्दुं जडक्रियम् ॥ ५३ ॥

स्रुतः स्मितमुखैर्भूपद्रोपदीभीमयादवैः ।
यमाभ्यामपि मन्त्रोऽयमेवातिप्रस्तुतः स्तुतः ॥ ५४ ॥

अथारिषु पृथापुत्रैर्द्रुपदस्य पुरोहितः ।
संधेर्वा युद्धबुद्धेर्वा स्थैर्याय विनियोजितः ॥ ५५ ॥

निश्चित्य कृत्यमित्यात्मपुरं मुररिपौ गते ।
अमी अमीमिलन् पार्था नृपसार्थान् रणार्थिनः ॥ ५६ ॥

रिपुद्विरदपञ्चत्वे पञ्चास्यः पञ्चभिः सुतैः ।
पञ्चावरीतुं जामातॄन् पञ्चालपतिराययौ ॥ ५७ ॥

विराटद्रुपदोर्वीशाक्षौहिणीद्वयसंगमम् ॥
प्राप्तस्य सात्यकेरक्षौहिणी निन्ये चिवेणिताम् ॥ ५८ ॥

पाण्डवानीयतुर्धृष्टकेतुश्चेदिधराधवः ।
सहदेवो जरासंधसूनुश्चाक्षौहिणीपती ॥ ५९ ॥

माहिष्मतीपतिर्नीलो भ्रातरः पञ्च केकयाः ।
वार्द्धक्षेमिकुन्तिभोजौ श्रेणिमान् शिविपौरवौ ॥ ६० ॥

एते चान्ये च नानाद्रिविषयक्षोणिनायकाः ।
संदध्य विदधुः सप्ताक्षौहिणीशं युधिष्ठिरम् ॥ ६१ ॥

समं जग्मतुराह्वातुं हरिं दुर्योधनार्जुनौ ।
पश्यतः स्म स्वपन्तं तमन्तरन्तःपुरं च तौ ॥ ६२ ॥

कौरवस्तस्य शीर्षान्ते पादान्ते फाल्गुनः स्थितः ।
ततः श्रीपतिना प्रेक्षि प्रबुद्धेन पुरोऽर्जुनः ॥ ६३ ॥

पृष्ट्वा हृष्टमनाः पार्थमनामयमथैक्षत ।
शय्योपधानलग्नांसं केशवः कौरवेश्वरम् ॥ ६४ ॥

संपरायसहायत्वमाभ्यामभ्यर्थितस्ततः ।
मुराराति: परावृत्य कौरवप्रभुमभ्यधात् ॥ ६५ ॥

त्वं प्राप्तः प्रथमं पार्थश्चरमं नृप यद्यपि ।
तथापि वृणुते पूर्वदर्शनादयमेव माम् ॥ ६६ ॥

एकतो युद्धमुक्तोऽहमेकतोऽक्षौहिणी च मे ।
समाविमावुभौ भागौ गृहाणाक्षौहिणीमतः ॥ ६७ ॥

इत्युक्तः शौरिणा हृष्टोऽधिष्ठितां कृतवर्मणा ।
क्षमापतिः समादाय यादवाक्षौहिणीं ययौ ॥ ६८ ॥

सारथ्यतथ्यस्वीकारकारिणा हरिणा सह ।
जितानेव रिपून् जानन् पार्थोऽपि प्राप पार्थिवम् ॥ ६९ ॥

शल्यं पार्थेषु गच्छन्तमन्तर्गत्वा सुयोधनः ।
संतोष्य भक्तिभिर्दक्षः स्वपक्षत्वमयाचत ॥ ७० ॥

इत्यावेदयितुं मद्रनरेन्द्रोऽयमुपागतः ।
जगदे पार्थनाथेन यात यूयं यथेप्सितम् ॥ ७१ ॥

अस्माकं तु प्रियाकर्तुं कुरुपक्षाश्रयेऽपि वः ।
निन्दावचोभिः कर्णस्य कार्यस्तेजोवधो युधि ॥ ७२ ॥

तथेत्ययं प्रतिज्ञाय प्रति दुर्योधनं ययौ ।
तमाजग्मुश्च मित्राणि क्षत्राणि कति नाभितः ॥ ७३ ॥

भगदत्तो जगद्दत्ताभयः सुरविभोः सुहृत् ।
अरिद्रुसिन्धुरः सिन्धुपृथ्वीनाथो जयद्रथः ॥ ७४ ॥

अवन्तीशोऽनुविन्दाग्रजन्मा बिन्दोऽस्त्रकोविदः ।
द्विषिक्ष्मापमनःशल्यं शल्यो मद्रमहीपतिः ॥ ७५ ॥

कृतवर्मा वृष्णिवरः काम्बोजेशः सुदक्षिणः ।
सोमदत्तसुतो भूरिश्रवा भूरिबलः शलः ॥ ७६ ॥

एते प्रत्येकमक्षौहिण्यधिपाः समुपाययुः ।
अक्षौहिण्यश्च तिस्रोऽन्यैरिलानाथैः किलामिलन् ॥ ७७ ॥

आक्षौहिणीभिरित्येकादशभिः शुशुभे नृपः ।
पातुं स्वदेशं जेतुं च दशाशा इव सोद्यमः ॥ ७८ ॥

धृतराष्ट्रे सभाभाजि राजराजिविराजिनि ।
स युक्तमुक्तवान् पार्थप्रहितोऽथ पुरोहितः ॥ ७९ ॥

वंशवर्गेयथायुक्तप्रणामानामयोक्तिभाक् ।
वक्ति पाण्डवराजन्यः स्वाजन्यं विशदं वचः ॥ ८० ॥
धन्योऽस्मि बन्धुभिस्तुङ्गमङ्गीकृत्य धराभरम् ।
कृतोऽस्मि सुकृतोत्कण्ठी तीर्थयात्रोत्सवेन यः ॥ ८१ ॥
दूतोपदिष्टा गमयामासिरे वासरा मया ।
इदानीं दीयतां युक्तो भागः सागरवाससः ॥ ८२ ॥
जानामि नामितरिपुर्विपुलं विपुलातलम् ।
शमेन च चतुर्भिश्च बन्धुभिर्बन्धुरं भजे ॥ ८३ ॥
स्वयमेकेन केनापि भूमिर्भोक्तुं न शक्यते ।
सहते सत्सु कुल्येषु कोऽन्यं तद्भागभोगिनम् ॥ ८४ ॥
इति हृद्भिः सुहृद्भिश्च विचार्य सुकृतोचितम् ॥
कृत्यं कृत्यबुधैर्विश्वानन्दि संदिश्यतां मयि ॥ ८५ ॥
इत्युक्तस्वेशसंदेशभङ्गिरिङ्गितवित्तमः ।
सर्वेषु स्वान्तबोधाय पुरोधाश्चतुरश्चिपत् ॥ ८६ ॥
जनिकृत्प्रकृतिः सर्वैः स्यादिति स्पष्टतां नयन् ।
भेजे शुभ्रतरङ्गाभामथ गङ्गासुतो गिरम् ॥ ८७ ॥
दिष्ट्या बाहुबलोदस्तप्रत्यूहव्यूहवीचयः ।
विपन्नीरनिधेस्तीरमीयुस्ते वीरशेखराः ॥ ८८ ॥
ऐन्द्रेर्दोर्वंशवीराणां दिष्ट्या तेषां शमार्थिता ।
दिष्ट्या प्रविष्टास्तत्कोपदहनं न महीभुजः ॥ ८९ ॥
इदं गदति गाङ्गेये भ्रूभङ्गाभोगभीमदृक् ।
तापनिस्तापनिर्बन्धविधुरां व्याहरद्गिरम् ॥ ९० ॥
रणचस्तहृदो दैन्यप्रार्थिनो बलवानपि ।
भीष्म भीष्मानिवाख्यासि कस्मादस्मासु पाण्डवान् ॥ ९१ ॥
सन्त्येभ्यो वीरकोटीरा गुणकोटीभिरुत्तराः ।
तत् किं न पलितापीड व्रीडसे पाण्डवस्तवैः ॥ ९२ ॥
यद्वा सुतेषु शक्तो यः स पितॄणां प्रियो भवेत् ।
निन्दां करोषि कुरुषु स्तुतिं पाण्डुसुतेषु यत् ॥ ९३ ॥
अथावदन्नदीसुनुः स्मितैः कुसुमितं वचः ।
पार्थस्तुतिषु राधेय बाधेयमिति किं तव ॥ ९४ ॥
गणयन्ति तृणं प्राणान् ये प्रवीरा रणाङ्गणे ।
चण्डैरुड्डाययन्त्येतान् पाण्डवाः काण्डवायुभिः ॥ ९५ ॥
निरीक्ष्य गोग्रहे घोषविग्रहे च बलं तव ।
नेदानीं वच्मि दैन्येन यदि ते दधते भयम् ॥ ९६ ॥

इत्युक्तिभासुरे भीष्मे सान्तर्हासे सभाजने ।
सद्यः कर्णौ विवर्णौ च वाचमूचे विचित्रभूः ॥ ९७ ॥
हितमाहितचिन्तानां निखिलानामिलाभृताम् ।
भीष्मो यदाह वंशैकदाहनीरं हि तद्वचः ॥ ९८ ॥
जगदुद्धारसंहारसत्ये सत्यपि तेजसि ।
स्पृहयन्ति श्रिये कुल्यनिग्रहं विग्रहं न ये ॥ ९९ ॥
तेऽतिमन्योल्लसत्कोपा न क्रियन्ते पृथाभुवः ।
उदग्द्वरा इव क्षीरसागरा लोकलुप्तये ॥ १०० ॥
तद्यातु संजयस्तत्र प्रसादयतु पाण्डवान् ।
प्रसादप्रकृतीनिन्दुकरानिव घनात्ययः ॥ १०१ ॥
इत्युक्त्या सभ्यचेतांसि रञ्जयन् संजयं नृपः ।
पार्थेषु संधये प्रैषीत् तं पुरोगपुरोहितम् ॥ १०२ ॥
उपप्लव्यपुरे गत्वा मित्रमन्त्रिवृतं नृपम् ।
ननाम संजयो नामप्रथनेन पृथासुतम् ॥ १०३ ॥
पृष्टः कुलस्य कुशलं वाचिकं च स भूभुजा ।
गिरां गतिषु पीयूषं खञ्जयन् संजयो जगौ ॥ १०४ ॥
यद्भाति त्वादृशैर्धर्मो जागरं गुणसागरैः ।
भूप संभाव्यतां कस्मात् तस्मिन् न कुशलं कुले । १०५ ॥
इदं तु मन्तुसंतानमन्दनन्दनदुःखितः ।
संदिदेश त्वयि श्रीमानग्रजः पाण्डुभूभुजः ॥ १०६ ॥
धर्ममर्मविदो वन्द्या भवभाजां भवादृशाः ।
न ये कृतान्यलोभेण लक्ष्मीलोभेन लङ्घिताः ॥ १०७ ॥
भवान् भवानुकारी न याति कस्य नमस्यताम् ।
अभङ्गि वनभाजोऽपि यस्यैश्वर्यं न केनचित् ॥ १०८ ॥
धूलिस्थामस्थिरां भूमिमिच्छन् बन्धुबधोद्यतः ।
सुधांशुशुद्धया कीर्त्या को न मुच्येत नित्यया ॥ १०९ ॥
सुकृतामृतकल्लोलसंतानस्नानमालिनः ।
नेच्छन्ति दूषितां रक्तैः शुचयो विजयश्रियम् ॥ ११० ॥
सन्तो भजन्ति संतोषं सुलभं विश्ववैभवम् ।
वाञ्छन्ति भूलवैश्वर्यं जडास्तु प्राणसंशयात् ॥ १११ ॥
न कुलीनसमं कुल्यैः श्रिये नाश्रीयते रणः ।
बुद्धिं युद्धाय कः कुर्याद्भाग्यायत्तासु भूमिषु ॥ ११२ ॥
इत्युदीर्यात्तमौनेऽस्मिन् रसनावल्लिमञ्जरीम् ।
निनाय भारतीं भूपः संसत्कर्णावतंसताम् ॥ ११३ ॥

Digitized by Google

कदा कलहवार्तापि धार्तराष्ट्रै: कृता मया ।
यदित्थमभ्यर्थयते मां मुहु: शान्तये पिता ॥ ११४ ॥

संगरस्य गिरामस्ति प्रस्तावोऽपि न संप्रति ।
यतो मे पूर्वशाम्बद्ध: पिता दातेव मेदिनीम् ॥ ११५ ॥

न चेद्दाता भुवं वृद्धो वात्सल्यलताश्रित: ।
तत् कार्येऽस्मिन् प्रमाणं न: पुरातनपुमानयम् ॥ ११६ ॥

ततो मतिलतापुष्पै: सभेकहृदयंगमाम् ।
वितेने विमलैर्वर्णैर्मालिकां वनमालिक: ॥ ११७ ॥

ददते यदि ते भूमिभागमाग:शतानि तत् ।
मत्सखीचिकुराकर्षमुख्यान्यपि सहामहे ॥ ११८ ॥

इन्द्रप्रस्थं वृकप्रस्थं माकन्दीं वारणावतम् ।
किंचिच्च पञ्चमं पञ्चपुरीयं दीयतामिति ॥ ११९ ॥

इदमप्यददानेषु तेषु कृत्यविधौ पुन: ।
मन्त्र: प्रमाणं सामीरिसैनासीरिगदास्त्रयो: ॥ १२० ॥

इति कृष्णोक्तिमाकर्ण्य कौन्तेयानां च वाचिकम् ।
मनोऽपि रथवेगेन लङ्घयन् संजयो ययौ ॥ १२१ ॥

कथ्यं स्थितेषु भूपेषु स्वरूपं सदसि त्वया ।
इत्युक्त्वा बुद्धिदृक् सायमायातं विससर्ज तम् ॥ १२२ ॥

ततो विचिन्त्य पार्थानां धर्मं संग्रामधाम च ।
आर्तोऽम्बिकासुतस्तत्त्वविदुरं विदुरं जगौ ॥ १२३ ॥

यो नयी स जयीत्यच धर्मसूनुरुदाहृति: ।
व्यावृत्त्युदाहृति: किंतु भविष्यति सुतो मम ॥ १२४ ॥

किं करोमि क्व गच्छामि वत्सो मे दुर्नयाश्रय: ।
इदं तु व्यसनं कुल्यं व्याकुल्यकृतमात्मन: ॥ १२५ ॥

इति व्यथावशीभूतं भूपं बोधयितुं सुधी: ।
गिरास्यं विदुरो निन्ये दृशाममृतकुण्डताम् ॥ १२६ ॥

मा विषादविषान्मोहं व्रज धैर्यं भज प्रभो ।
ते हि धीरा धरायां ये व्यसनेभ्यो न बिभ्यति ॥ १२७ ॥

सत्त्ववन्तो हि नात्मानं ज्ञापयन्ति विपद्गतम् ।
उड्डीना इव धावन्ति पक्षच्छेदेऽपि वाजिन: ॥ १२८ ॥

ध्मानीव तेजस्तमसोर्यस्तुल्य: संपदापदो: ।
तमर्दयितुकामानां मुग्धा धी: कर्मणामपि ॥ १२९ ॥

य: संपदापदोर्भेदं न वेद स्वान्ययोरिव ।
स सेव्य: स महातीर्थं स स्तुत्य: स तप:शुचि: ॥ १३० ॥

प्रीयतां व्यथ्यतां वा स्वै: संपदा मत्कथै: स किम् ।
पश्यत्यात्मानमिव य: संपदापन्मयं जगत् ॥ १३१ ॥

ते शूरा व्यसने दूरादायाति सति विद्विषि ।
हसन्तो हर्षसंलीना: संमुखीना भवन्ति ये ॥ १३२ ॥

अप्येत एव विद्वांसो ये हर्षाद्वैतवादिन: ।
व्यसनेन विधीयन्ते न दु:खाद्वैतवादिना ॥ १३३ ॥

स धीमान् स विविक्तात्मा प्राक् पुण्याय व्यपोह्य ताम् ।
संपदं विपदं वेत्ति विपदं संपदं च य: ॥ १३४ ॥

किंचात्मनो न कस्यापि संबन्धी नास्य कश्चन ।
वृथा ममायमस्याहमित्यतत्त्वविदां मति: ॥ १३५ ॥

राजन्नात्मानमात्मीयमेव त्वं विद्धि बुद्धित: ।
पाण्डुपुत्रेण मत्पुत्रो जेतव्य इति मा मुह: ॥ १३६ ॥

इत्युक्त्वा विदुरेणान्तर्ध्यानादानीय दर्शित: ।
राज्ञे सनत्सुजातीयमुनिरध्यात्ममादिशत् ॥ १३७ ॥

तदुक्त्याध्यात्मवाक्पूरदूरितान्तर्व्यथानल: ।
स तमीं गमयामास वसुधावासव: सुधी: ॥ १३८ ॥

अथास्मिन् भूपतौ प्रात: सर्वैरुर्वीधवैर्वृते ।
यथोक्तं धार्मिकृष्णोक्तं सभायां संजयोऽभ्यधात् ॥ १३९ ॥

तत्र दुर्योधने राजन्यभिमान इवाङ्गिनि ।
पृथाभुवां च संदेशान् संदिदेश पृथक् पृथक् ॥ १४० ॥

वक्ति त्वां धर्मभू: प्रीतो गृहीते भूभरे त्वया ।
वयं तीर्थेषु विश्रान्तास्त्वमिव त्वं प्रियोऽसि न: ॥ १४१ ॥

भ्रात: खेदो यदि भ्रातश्चिरकालेन कोऽपि ते ।
तन्मुञ्च तं भरं पञ्च तद्ग्रहप्रगुणा वयम् ॥ १४२ ॥

ऊचे भीमो न चेद्भारं मोक्तुं शक्तोऽसि तं स्वयम् ।
तदादिश भृशं बाहुबलादुत्तारयामि ते ॥ १४३ ॥

ब्रूतेऽर्जुन: स्पृहाद्यापि भूभारं भर्तुमस्ति चेत् ।
तद्विश्राममधियाहं ते[1] कर्णान्ते स्थातुमुत्सुक: ॥ १४४ ॥

अतिपूरयितुं कर्णावथ तद्वचनोच्चयै: ।
मूर्धानमधुना धुन्या: सूनुर्धर्मसुतं स्तुवन् ॥ १४५ ॥

आचष्ट धृतराष्ट्रं च वचनै: कोपकल्मषै: ।
कटाक्षवीचिताशेषधराधीशो धुनीसुत: ॥ १४६ ॥

---

१ विश्रामभेषा इन्तीते इति पा० ।

शक्तिं द्यूतापमाने त्वल्लज्जयाशञ्जयन्न ते ।
ननु निर्व्रीड पीडा तेऽभूत् तेषु वनयायिषु ॥ १४७ ॥
मुञ्चन्त्यद्यापि मर्यादां न ते त्वद्बहुमानतः ।
यस्त्वं च पाण्डुर्यः पाण्डुः स त्वं तेषां सदा हृदि ॥ १४८ ॥
अद्यापि नीतिमद्भिस्तैः सार्धं संधिः खलूचितः ।
जीयन्ते केन ते पञ्चेन्द्रियार्था इव चर्यमिव ॥ १४९ ॥
बध्यमाना गलन्माना भीमेन तव सूनवः ।
रक्षिष्यन्ते क्व कर्णाद्यैर्वायिव्यानिलतूलकैः ॥ १५० ॥
इति विरचितवाचं भीष्ममाचष्ट कर्णो
रणभुवि कुरुवीरा रक्षणीयास्त्वयामी ।
त्वयि तु अधिशरालीतल्पसुप्ते तनोमि
प्रधनमहमितीर्ष्यातापतश्चापमोज्झत् ॥ १५१ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वाराङ्के उद्योगपर्वणि सैन्यसंवर्णनो नाम प्रथमः सर्गः ॥ १ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

अप्रमेयमहिमा हिमाचल-
श्रीः पराशरसुतः श्रियेऽस्तु सः ।
यस्य विश्ववलयैकपावनी
स्वर्धुनीव विससार भारती ॥ १ ॥
संधिबन्धविधयेऽथ धार्मिणा
धार्मिकेण दधता दयाधियम् ।
मुग्धबुद्धिविधुरेषु बन्धुषु
प्रेषि बोधमधुरो मधो रिपुः ॥ २ ॥
षट्सहस्रसुभटीं सहायुतां[1]
सादिनो दश महारथान् वहन् ।
केशवो निशि वृकस्थले पुरे
तस्थिवान् कुरुपुरीमथासदत् ॥ ३ ॥
पुण्यवानहमहं महानिति
ध्यायता विभुरभोजि तद्दिने ।
इन्दिरापतिरुदारभक्तिधी-
सुन्दरेण विदुरेण मन्दिरे ॥ ४ ॥

[1] सहावहन् इति पा० ।

भक्तितुष्टमनसो हरेरथ
यच्छतोऽथ विदुरो मुदाऽवदत् ।
अस्तु मे त्वयि रतिः कुलाकुलं
भोज्यमप्यलिविसंकुलं कुलम् ॥ ५ ॥
संभ्रमादभिमुखोत्थितैः स्मितैः
पूजितः सुरसरित्सुतादिभिः ।
आससाद तदयं गदाग्रभू-
रम्बिकासुतविकासितं सदः ॥ ६ ॥
विक्रमैर्निरुपमान् निरूपयन्
भूपकुञ्जरचयानवज्ञया ।
सानुसिंह इव सिंहविष्टरं
विष्टपप्रभुरभूषयत् ततः ॥ ७ ॥
माधवः सह महामहौषधैः
संहतैरवहितेऽम्बिकासुते ।
पाण्डवीयकमुवाच वाचिकं
वाचि कंचिदमृतद्रवं किरन् ॥ ८ ॥
के न पूर्वमभवन् भुवो धवा
मेदिनी कमपि नेयमन्वगात् ।
व्रीडमप्यधृत नाथभर्तरि
भ्रंशभाजि दधती नवं नवम् ॥ ९ ॥
नेतया कति पतिन्वधारिणो
मारिता बत परेषु सक्तया ।
रागिणो गुणनिधीन् यदृच्छया
जीवतोऽपि कति नेयमत्यजत् ॥ १० ॥
यत्तदर्थमपि यः कदर्थय-
त्यर्थवादकणधीरिपूनपि ।
श्लाघ्यते न खलु सोऽपि यः पुनः
कुल्यमस्यति नमस्य एव सः ॥ ११ ॥
वैभवेऽपि भुवनस्य भोग्यता-
मेति तल्पमितमेव भूतलम् ।
श्रीभरेऽपि सति भोग्यतोऽधिकं
स्वस्य किंचिदपि नोपकारकम् ॥ १२ ॥
वैभवैर्भवति भोगतोऽधिकैः
संमदो यदि ममत्वमागतः ।

क्ष्मा ममेयमखिलाप्यदो वदन्
प्रीयते न तदकिंचनोऽपि किम् ॥ १३ ॥
मन्मुखादपि तपःसुतो नृप
त्वां प्रणम्य परिरभ्य बान्धवान् ।
भोगमात्रफलमात्मपञ्चमो
ग्रामपञ्चकमयाचत स्वयम् ॥ १४ ॥
तद्धुनीवनबिलागसागरे
रुद्धमस्ति न कियद्धरातलम् ।
भूलवोऽयमपि तद्वदुच्यतां
मुच्यतां सह कुलेन विग्रहः ॥ १५ ॥
विग्रहः सह कुलेन नोचितीं
यात्यरातिकुलकल्पपादपः ।
कश्चिरं रणभरेण सिंहयोः
प्रीतिमेति न वने वनेचरः ॥ १६ ॥
गोत्रजः सहजशत्रुरित्यसौ
नीतिरस्तु धनलोभदुर्धियाम् ।
वृद्धतुल्यलघुपुंवृतं जग-
द्धीधनस्य पितृमित्रपुत्रवत् ॥ १७ ॥
धारयन्ति धनलुब्धचेतसां
बन्धवोऽपि निभृतं विरोधिताम् ।
लूनलोभमधुरस्य धीमतो
बन्धुतां स्पृशति विश्वमप्यदः ॥ १८ ॥
देहिनामहह लोभतः परः
कश्चिदस्ति न परो भुवस्तले ।
आगमय्य निजपक्षतां क्षणाद्
यो विपक्षयति बान्धवानपि ॥ १९ ॥
तद्वयं क्षितिभृतो भुजाभृता-
मालिभिः परिवृता इति स्मयात् ।
लोभतो[1]ऽवनिलवस्य विग्रहे
मा ग्रहोऽस्तु जयसंशये निजैः ॥ २० ॥
व्योममार्गभृदनेकमार्गणो-
ष्वेकमार्गणवशं विरोधिषु ।
एकमेव गणयन्ति कोविदा
भूरिभिर्वृतमपि स्वमाहवे ॥ २१ ॥

१ लाभत इति पा० ।

नैकमप्यरिमनन्तपक्षयोऽ-
प्याहवेऽवगणयन्ति धीधनाः ।
सत्सु तारकगणेषु राहुणा
ग्रस्यते किमु न तारकाधिपः ॥ २२ ॥
आधिपत्यमपि न स्थिरं भुवः
सुस्थिरं च यदि जीवितावधि ।
जीवितं तु रणकारिणां नृणां
चापमुक्तशरतुल्यचापलम् ॥ २३ ॥
तन्मृधाय बत मा विधा धियं
बन्धुभिः सममिला विलास्यताम् ।
धाम्नि भोज्यसमये समागतान्
भोजयन्ति कृतिनो रिपूनपि ॥ २४ ॥
बधुवर्गमवधूय निष्ठुरो
यो बलिं गिलति भूतलेऽन्धधीः ।
नित्यमुद्धुरशिरोधरैर्मदा-
देकदृग्भिरपि स प्रहस्यते ॥ २५ ॥
हस्यमानवचसः पदे पदे
बालिशैरपि पराङ्मुखश्रियः ।
क्ष्मामटन्ति निजपक्षविद्विषः
खण्डिता[1] इव न पण्डिता नृपाः ॥ २६ ॥
यः स्वबान्धवगणस्य पृष्ठगो
भोगकर्मणि रणोत्सवेऽग्रगः ।
तं वियोगलवकातरा धरा
सेवते सुचरितं पतिव्रता ॥ २७ ॥
यो धुनोति निजबन्धुतां निज-
स्तस्य कोऽस्तु पर एव यः परः ।
क्वापि यान्त्यमलपक्षिणो जलैः
शेवलं क्षिति सहैव शुष्यति ॥ २८ ॥
ये स्वबन्धुपरिरम्भसंभव-
प्रीतयो धनलवात्तसंमदाः ।
ते हतेन्दुरवयो वयोमणि-
द्योतिनोऽतिमलिना घना इव ॥ २९ ॥

१ पण्डिता इति पा० ।

Digitized by Google

बन्धुनातिकटुनापि संगमः
संमदं सृजति यं न तं सुधा ।
यत् सुधाकरकरेषु सत्सु न
प्रीयतेऽस्तभृति भास्करेऽम्बुजम् ॥ ३० ॥

तेन बन्धुषु निजेषु संधये
ढौक्यतां किमपि पत्त्रकं पुराम् ।
सर्वथापि विषयेऽत्र वो हिते
सोऽहमप्युपरुणध्मि मध्यगः ॥ ३१ ॥

प्राक्चरित्रनिचयैर्निबोधितो
नारदादिभिरपि द्रुतागतैः ।
ऊचिवानिति हरिं प्रति क्रुधा-
रब्धबोधनिधनः सुयोधनः ॥ ३२ ॥

सौहृदेन जयिनश्चटूनि किं
दैत्यबन्धन दधासि संधये ।
तान् महाप्रहरणान् रणावनी-
सीम्नि सज्जय लसज्जयश्रियः ॥ ३३ ॥

याच्यतेऽवनिलवोऽद्य धीधनै-
रेभिरूढदृढगूढमत्सरैः ।
तत्र रोपितपदा हि मद्भ्रमू-
दाहि सैन्यमतिमेलयन्ति ते ॥ ३४ ॥

अद्य बान्धवमिषान् द्विषः कथं
तान् महत्त्वमधिरोपये पुनः ।
मृत्युदानपरमङ्गसंगतं
कः प्रवर्धयति रोगमात्मनः ॥ ३५ ॥

एवमालपति कौरवे रवैः
साम्यमिन्दुमपि नायनं नयन् ।
भारतीमभजदुल्लसद्भुजः
क्रोधनः क्रमकटुं त्रिविक्रमः ॥ ३६ ॥

ऐन्द्रिरेव परमः सुहृन्मम
त्यज्यते स्वरपि यत्कृते मया ।
सान्द्रमैन्द्रमपि तस्य निष्फलं
यस्य न स्फुरति तादृशः सुहृत् ॥ ३७ ॥

संगतोऽङ्ग सुहृदां सुधा मुधे-
त्यादिशन्ति ह दयालवः सदा ।
यं रसाद्रसयतां मनीषिणां
न प्रियाधररसेऽपि हि स्पृहा ॥ ३८ ॥[1]

नो सुहृत्परिचयात् परं क्वचित्
किंचिदस्त्यमृतमित्यहं ब्रुवे ।
यन्निपातघटमानदृष्टयो
दृष्टयो दधति निर्निमेषताम् ॥ ३९ ॥

इत्थमिन्द्रसुतसौहृदादहं
किं करोमि न विना त्वदुक्तिभिः ।
पूर्वकर्मवशगे शुभाशुभे
चाटु कर्म कुरुते न कोविदः ॥ ४० ॥

युष्मदर्थमयमर्थितो मया
संधिरस्तु यदि वो युधीप्सिता ।
भीमदोष्णि निहितेव तद्द्विषां
कालरात्रिरिव सर्वदा गदा ॥ ४१ ॥

अस्तु पाण्डुतनुजन्मनां पुनः
को विरोधिषु भवत्सु मत्सरः ।
मौलिदत्तचरणासु केसरी
मक्षिकासु न कदापि कुप्यति ॥ ४२ ॥

को भवत्परिभवाय पाण्डवैः
सैनिकव्यतिकरः करिष्यते ।
वल्गदेणगणगर्वखर्वणे
सैन्यमानयति केसरी कियत् ॥ ४३ ॥

उत्तरार्थहृतमौलिचीवरो
मौलिजालमहरद्द्वयाभरात् ।
कां चमूमरचयच्चमूभृतां
गोग्रहे स विजयी जयाय वः ॥ ४४ ॥

पश्यतां निजभुजाभृतां कृप-
द्रोणतत्तनयकर्णभूभुजाम् ।
त्वां बलाद्दिविहृतं व्यमोचयत्
फाल्गुनस्तदपि विस्मृतं तव ॥ ४५ ॥

यस्तु दुष्टजनपुष्टसंनिधिः
साधुबन्धुवचनेषु रोषणः ।
स ध्रुवं त्वमिव दुश्चरित्रधीः
क्रोधनेन विधिना कटाक्षितः ॥ ४६ ॥

१–नय इति पा० ।

यद्विदुः प्रकृतितो विपर्ययं
मृत्युसीम्नि तदसत्यमेव ते ।
आजनुः प्रकृतिदुष्ट साधुतां
नाधुनापि मृतिदुष्ट यद्बुधाः ॥ ४७ ॥

ते त्वया समधिरोपिताः पदं
किं महत्तममवाप्तुमिच्छवः ।
ऊर्णनाभमुखलालया लता-
रोहधीः क इव काङ्क्षति ग्रहम् ॥ ४८ ॥

किंच नीचगति वारि तत्पतेः
शौरपत्यमधिगत्य तां जडः ।
द्रागधो जिगमिषुर्महोन्नतेः
क्वाधिरोपयतु बान्धवान् पदे ॥ ४९ ॥

निर्मलोऽपि मलिनीभवन् जले-
रुन्नतो भजति वैरितां निजे ।
धूमयोनिरिह धूमकेतन-
ग्लानिदर्शितरसो निदर्शनम् ॥ ५० ॥

अप्रणाशितकुलं न शाम्यति
स्वैः सह ध्रुवममर्षजं महः ।
वेणुयुग्मघनघट्टजः शिखी
सर्वतोऽपि विपिनं दहत्यहो ॥ ५१ ॥

तन्मुधा दधति संधये धियं
मादृशा इह भवादृशे मुहुः ।
अत्तु वः सकलमप्यदः कुलं
भीमदोर्विटपिभोगिनी गदा ॥ ५२ ॥

इत्युदारतरभारतीभरे
कैटभद्विषि तदा बभौ सभा ।
कोपतः कपिशदीधितिर्मृति-
स्त्रीकटाक्षचयचुम्बितेव सा ॥ ५३ ॥

क्रूरकोपकपिशः परिज्वलन्
कौरवप्रभुमुखप्रभाभरः ।
भूपरिभ्रमणनिर्भरो बभौ
खाण्डवं इवाशुशुक्षणिः ॥ ५४ ॥

ऊरुमाहत तथा सुयोधनः
क्रोधनः करतलेन नादिना ।
तद्व्यशङ्कत यथा विभुः स्वयं
भीमसेनगदयाप्यभङ्गुरम् ॥ ५५ ॥

स्वौ भुजावधित कोपकण्टक-
षट्पदङ्गदसमुच्छलन्मणी ।
दुःसहोष्मदहनस्फुलिङ्गक-
स्फूर्जितावित्र सुयोधनानुजः ॥ ५६ ॥

कोपवानवतरः स्मरद्विष-
स्तं स्मरस्य पितरं पुरः स्मरन् ।
आदधेऽलिकदृशं[1] भृशं कृपी-
योनिरुल्वणकृपीटयोनिकाम् ॥ ५७ ॥

विस्फुलिङ्गपटलीं मुखान्मिथः
कोपपिष्टरदराजिजां क्षिपन् ।
इन्दुतो दहनवृष्टिमङ्गलं
संसदि व्यधित कर्णनन्दनः ॥ ५८ ॥

इत्यलोक्यत कुतूहलोल्लस-
ल्लोचनेन दनुनन्दनद्विषा ।
रोषरूक्षरवसंभ्रमभ्रम-
द्भूरिभूरमणरासभा सभा ॥ ५९ ॥

स्वग्रहार्थमथ कौरवाग्रजं
पाशपाणिमतिकोपिनं पुरः ।
प्रेक्ष्य सात्यकिनिवेदितं तदा
दिव्यरूपमधित क्रुधा विभुः ॥ ६० ॥

भालभागगतपद्मभूविभा-
भारभासुरनभाः सभाचरैः ।
मस्तकोपगतकोपपावको
ज्वालयन्नयमशङ्कि शङ्किभिः ॥ ६१ ॥

हृद्विहारिहरहारहारिणा
भीषणः फणभृतां गणेन सः ।
बाहुदण्डनिवहानहो बहू-
कुर्वता क्षणबहूकृतानपि ॥ ६२ ॥

अस्त्रमुल्लसदभीषुभीषणं
दोष्णि दोष्णि स दधौ नवं नवम् ।
मारिभिर्नवनवाभिरेकको
हन्तुकाम इव वैरिणः क्षणात् ॥ ६३ ॥

---

1 क्लिल दृशं इति पा० ।

क्रूरकौरवचमूविमूलन-
स्फीतदुःसहमहःप्रतानिव ।
वृष्णिपार्थनिवहान् मुहुर्मुखा-
दक्षिपत् सहचराशुशुक्षणीन् ॥ ६४ ॥

व्यात्तवक्त्रपटुकण्ठकन्दर-
स्पष्टदृष्टजठरत्रिविष्टपम् ।
तं निरीक्ष्य भयभीतचक्षुषः
कौरवा विधुरमारवं व्यधुः ॥ ६५ ॥

द्रोणभीष्मविदुरर्षिसंजयै-
रेव हर्षिभिरसौ निरीक्षितः ।
द्रागमर्षशमनाय नाकिभि-
र्नाकनायकमुखैरिति स्तुतः ॥ ६६ ॥

उद्गतस्त्वदुदराद्विरञ्चन-
स्तत्सुता च वचसामधीश्वरी ।
तत्प्रसादलवकोविदाकृति-
र्वेत्तु वास्तवमपि स्तवं क्व ते ॥ ६७ ॥

गर्भितत्रिभुवनोऽपि वा यथा
नाथ संवससि नो मनोऽणुषु ।
त्वं प्रसीदसि तथैव चेद्वचो-
गोचरीभवसि तन्मुदा नुमः ॥ ६८ ॥

रोचते परकृताप्यहो सतां
न स्तुतिः स्वमिह नौति कः स्वयम् ।
शेमुखीं स्वमयविष्टपत्रय
स्वस्तवार्थमिति न प्रयच्छसि ॥ ६९ ॥

किं तव स्तवगिरा प्रसीदतु
श्रीतडिज्जलद भक्तवत्सल ।
मुञ्चतु क्रुधमिमां भवान् भवा-
भोगदुःखसुखतारतुन्दिलः ॥ ७० ॥

कौरवेष्वपि करोषि बाणदोः-
खण्डखण्डनकुठारं[1] किं रुषा ।
वर्ज्यसे युधि य एव भालदृ-
ग्दृष्टभाललिपिना पिनाकिना ॥ ७१ ॥

ज्वालयन् हुतभुगेकमालयं
पत्तनस्य परितोऽपि भीतिदः ।
एषु कुप्यसि भृशं वयं भयं
मन्महे हृदि महेश मा कुपः ॥ ७२ ॥

एवमाशु गमितः शमं सुरै-
र्वज्रभृत्प्रभृतिभिः सुभक्तिभिः ।
द्रोणभीष्मविदुरान्वितो ययौ
संसदः स दनुसूनुसूदनः ॥ ७३ ॥

पृथामथामन्त्र्य हरिः पुरस्य
बहिर्गतः प्रागुपहूय कर्णम् ।
तदग्रतस्तज्जनिकिंवदन्ती-
मुवाच दन्ती दनुजद्रुमाणाम् ॥ ७४ ॥

अथ स्वजन्मप्रथया पृथायाः
कौमार्यसूनुर्निजगाद कष्टी ।
धिङ्मां मयैवेदमकारि दुःख-
मजानता तेषु सहोदरेषु ॥ ७५ ॥

धिङ्मां मया सापि तदा वधूटी
दृष्टातिहृष्टेन कदर्थ्यमाना ।
धिङ्मां मया तान् परिहृत्य बन्धून्
बन्धूकृतास्तत्परिपन्थिनोऽपि ॥ ७६ ॥

इत्यनुस्मरणकश्मलवर्णं
कर्णमर्णवशयोऽनुशयार्तम् ।
आन्तरत्रिजगतीगतगङ्गा-
वीचिचारुभिरुवाच वचोभिः ॥ ७७ ॥

कर्ण मा स्वमपवर्णय वृत्तं
बन्धुवर्गमधुनापि भज स्वम् ।
राज्यभाजमिह धर्मजमुख्या-
स्त्वां नमन्तु तव कोऽपि न मन्तुः । ॥ ७८ ॥

अग्रजं विभुमवाप्य भवन्तं
दुर्जयेषु खलु तेषु विपक्षैः ।
वीर जीवदखिलात्मतनूज-
प्रीतिमेतु जननी तव कुन्ती ॥ ७९ ॥

परस्परोन्मूलनयुद्धसंधा-
बन्धान्निवृत्ते त्वयि फाल्गुने च ।
अविग्रहं वीर सहस्रदृष्टेः
सहस्रभासा सह मैत्र्यमस्तु ॥ ८० ॥

१—क्तोऽत्र इति पा० ।

इति वदति रिपौ दितेः सुतानां
गिरमधिते।च्छ्वसदङ्गमङ्गराजः ।
कथय कथमिवाश्रये सगर्भा-
नहमधुना प्रधनावतारकाले ॥ ८१ ॥

तैः सार्धमीश जयिभिर्विदधे विरोधं
मामेव यो मनसिकृत्य मृधैकधुर्यम् ।
आबालकालसहृदं व्यसनोदयेऽद्य
तं मुञ्चतः स्फुटति मे हृदयं ह्रियेव ॥ ८२ ॥

दुर्योधनादपि युधिष्ठिरमभ्युपेत-
मद्यादि मां स्खलितसख्यमुदाहरन्तः ।
मा प्रीतिपूर्णमपि नीतिविदो वदन्तु
मित्रं कलत्रमिव विश्वसनस्य बाह्यम् ॥ ८३ ॥

बन्धवोऽपि विरुद्धाः स्युर्लक्ष्मीलेशस्य लोभतः ।
जगतोऽपि जयत्येको जीवितालम्बनं सुहृत् ॥ ८४ ॥

मुञ्चे दुर्योधनं चेत् तद्विश्वे मित्रपराङ्मुखे ।
हा कः कस्य मनःशल्यदुःखोद्धारं करिष्यति ॥ ८५ ॥

इति कृतगिरमङ्गाधीशमीशप्रशंसा-
शुचिरुचिरचरित्रं वीरमापृच्छ्य विष्णुः ।
द्रुततरगति गत्वा कारयामास धर्मा-
ङ्गजमसहनवर्गश्रीप्रहाणं प्रयाणम् ॥ ८६ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के उद्योगपर्वणि दुर्बोधदुर्योधनो नाम द्वितीयः सर्गः ॥ २ ॥ :: ::

॥ श्रीः ॥

अथ खण्डप्रशस्तौ

वामनावतारवर्णनम् ॥

(४०) किं छत्रं किंनु रत्नं तिलकमुत तथा कुण्डलं कौस्तुभो वा
चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्बलिद्वेषिदेहे ।
ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं
पायात्तद्वोऽर्कबिम्बं स च दनुजरिपुर्वर्धमानः क्रमेण ॥

स दनुजरिपुर्विष्णुस्तदर्कबिम्बं च वः पायात्, किंभूतः सः, क्रमेण वर्धमानो वृद्धिं प्राप्नुवन्, यत्तदोर्नित्यसम्बन्धात्स इति कः, यस्य श्रीविष्णोर्बलिद्वेषिदेहे बलेर्बलिनाम्नो दैत्यस्य द्वेषी द्रोही वामनाकृत्या यो देहस्तस्मिन्, तदितिकिम्, यदर्कबिम्बं सूर्यमण्डलममरयुवतिभिरप्सरोभिरित्यमुना वक्ष्यमाणप्रकारेण दृष्टम्, इतीतिकिम्, यदेतद्देहे ऊर्ध्वमर्कबिम्बं तत्किमिति वितर्के तादृग्वर्तुलत्वभासुरत्वादिगुणसाम्याच्छत्रं वर्तते, तथा पुनस्तच्छरीरे वृद्धिं प्राप्ते सति तदर्कबिम्बं मौलौ मुकुटे रत्नं चूडामणिर्वा वर्तते, किंस्विति विकल्पे, तथा पुनर्वृद्धौ तदर्कबिम्बं ललाटे भाले तिलकं वर्तते, उतेति वार्थे, ततोऽपि वृद्धिं प्राप्ते तच्छ्रवसि कर्णे कुण्डलं वा, श्रवसोर्द्वित्वेप्येकत्वोक्तिरर्कबिम्बस्यैकत्वाभिप्रायेणेति ध्येयम्, तथा तथैव देहवृद्धौ तदर्कबिम्बं हृदि हृदये किं कौस्तुभो मणिर्वा वर्तते, हरेर्हृदये कौस्तुभमणेः सद्भावात्, ततोऽपि देहे समुच्छ्रयं प्राप्ते सति तदर्कबिम्बं करे हस्ते चक्रं वा वर्तते, तथा ततोऽपि वृद्धौ तदर्कबिम्बं नाभिदेशे किं वारिजं कमलमस्ति, यतो हरेर्नाभौ कमलं वर्तते, अत्रेयं कथा श्रूयते, यदा हरिर्वामनाकृतिर्बटुरूपो बलिं दैत्यं हन्तुमाजगाम तदा तेनापि बलिना समायातं ब्राह्मणं भिक्षार्थिनमवगम्य प्रोक्तं रे वराक मां याचस्व यदीप्सितमित्युक्ते हरिणा स्वचरणत्रयावस्थितिहेतोः स बलिर्भुवमयाचि, ततस्तेन दत्तेत्युक्ते हरिर्वामनाकृतिरपि प्रवर्धमानदेहः क्रमेण बभूव, तदानीमियं कल्पना ताभिः सुरवनिताभिः कृता किं छत्रमित्यादीति ॥

(४१) खर्वग्रन्थिविमुक्तसन्धिविलसद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलपुटीगम्भीरसामध्वनि ।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥

मुरारेर्विष्णोर्वपुर्वो युष्मान्पायाद्रक्षतु, किंविशिष्टं वपुः, क्रमवर्धमानमहिमाश्चर्यं क्रमेण वर्धमानो यो महिमा महित्वं तेन कारणेनाश्चर्यं यस्मिन् तत्, पुनः किंविशिष्टं, खर्वग्रन्थिविमुक्तसन्धि खर्वग्रन्थीनां विमुक्ताः सन्धयो येन तत्, पुनः किंविशिष्टं, विलसद्वक्षःस्फुरत्कौस्तुभं विलसद्दीप्यमानं यद्वक्षो हृदयं तस्मिंस्स्फुरत्कौस्तुभं यस्मिन् तत्, पुनः किंविशिष्टं, निर्यन्नाभिसरोजकुड्मलपुटीगम्भीरसामध्वनि निर्यन्निस्सरन्नाभिसरोजकुड्मलपुट्या नाभिकमलकुड्मलपुटाद्गम्भीरः सामध्वनिर्ब्रह्मणः सामवेदध्वनिर्यस्मिन् तत्, पुनः किंविशिष्टं, पात्रावाप्तिसमुत्सुकेन पात्रस्य कपटद्विजाकारस्य हरेर्याऽवाप्तिस्तस्यां समुत्सुकेन बलिना, यतः पात्रं दातृभिर्बहुभिः पुण्यैरवाप्यतेऽतः सानन्दं साल्हादं यथा स्यात्तथाऽऽलोकितं दृष्टमिति ॥ ४१ ॥

(४२) ब्रह्माण्डच्छत्रदण्डः
शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः
क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्ड-
स्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते
वितरतु विबुधद्वेषिणां कालदण्डः ॥

त्रिविक्रमस्त्रयो विक्रमा विशिष्टाः क्रमाः सृष्टिस्थितिप्रलयलक्षणाः शक्तयोऽस्य त्रिषु लोकेषु विक्रमः पादन्यासोऽस्येति वा त्रिविक्रमस्त्रिविक्रमस्यायं त्रैविक्रमः, यतो बलिसंहारे हरिस्त्रिविक्रमो बभूवेति सभ्याः, स त्रैविक्रमोऽङ्घ्रिदण्डश्चरणदण्डस्ते तुभ्यं श्रेयः कल्याणं वितरतु ददातु, कीदृशः सः, ब्रह्माण्डच्छत्रदण्डः ब्रह्माण्डमेव छत्रं ब्रह्माण्डच्छत्रं तस्य दण्ड इव तदाधारो यः सः, पुनः कीदृशः, शतधृतिभवनाम्भोरुहो नालदण्डः शतधृतेर्ब्रह्मणो यद्भवनाम्भोरुट् निवासपद्मं तस्य नालदण्ड इव यः सः पुनः किंविशिष्टः, क्षोणीनौकूपदण्डः क्षोणी भूः सैव नौर्नौका तस्यां कूपदण्डो गुणवृक्ष इव यः सः, पुनः कीदृशः, क्षरदमरसरित्पट्टिकाकेतुदण्डः क्षरन्ती पानीयं वहन्ती याऽमरसरिद्गङ्गा सैव पट्टिका तस्याः केतुदण्डो ध्वजदण्ड इव यः सः, पुनः किंविशिष्टः, ज्योतिश्चक्राक्षदण्डः ज्योतिश्चक्रस्याक्षदण्डो नाभिक्षेप्यदारुदण्ड इव यः सः, पुनः किंविशिष्टः, त्रिभुवनविजयस्तम्भदण्डः त्रिजगत्कीर्तिस्तम्भदण्ड इव यः सः, पुनः किंविशिष्टः, विबुधद्वेषिणां कालदण्डः विबुधद्वेषिणां देवविरोधिनां दैत्यानां कालदण्डो मृत्युदण्ड इव यः स इति ॥ ४२ ॥

(४३) हस्ते शस्त्रकिणाङ्कितोऽरुणविभाकिर्मीरितोरःस्थलो
नाभिप्रेङ्खदलिर्विलोचनयुगप्रादुर्भूतशीतातपः ।
बाहूर्मिश्रितवन्हिरेष तदिति व्याक्षिप्य वाक्यं कवे-
स्तारैरध्ययनैर्हरन्बलिमनः पायाज्जगद्वामनः ॥

वामनो वामनावतारो हरिर्जगत्पायाद्रक्षतु, किंविशिष्टः हस्ते पाणौ शस्त्रकिणाङ्कितः शस्त्रकिणैः शस्त्रव्रणैरङ्कितश्चिह्नितः, पुनः किंविशिष्टः, अरुणविभाकिर्मीरितोरःस्थलः अरुणविभाभिर्लोहितकान्तिभिः किर्मीरितं कर्बुरितमुरःस्थलं यस्य सः, यतो हरेर्भगवतो हृदये कौस्तुभमणिर्लोहितच्छविरस्त्यतस्तत्प्रभाभिः किर्मीरितत्वं वक्षस्थलस्यास्तीति भावः, पुनः किंविशिष्टः, नाभिप्रेङ्खदलिः नाभौ प्रेङ्खन्दीप्यमानोऽलिर्भ्रमरो यस्य सः, यतो हरेर्नाभौ कमलं वर्ततेऽतस्तत्र तत्सुरभिगन्धलोलुपतया भ्रमरागमनं घटत एवेति भावः, पुनः किंविशिष्टः, विलोचनयुगप्रादुर्भूतशीतातपः विलोचनयुगाद्विशिष्टनेत्रद्वन्द्वात्प्रादुर्भूतौ शीतातपौ यस्य सः, वामनः किंकुर्वन् कवेः शुक्रस्यासुरगुरोरिति तद्वाक्यं व्याक्षिप्य तिरस्कृत्य तारैरुच्चस्वरैरध्ययनैर्वेदपाठैर्बलिमनो बलिदैत्यचित्तं हरन्, तदिति किम्, रे मूढमते न जानास्येनं वामनावतारं हरिं यतस्त्वं चर्मचक्षुरतो नावजानासि अहं तु दिव्यचक्षुषा वेद्मि यदेष वामनो बाहूर्मिश्रितवह्निः समागतोस्तीति बाहूर्मौ बाहुरक्षे श्रितोऽवस्थितो वह्निरग्निर्यस्य सः । अत्रेयं कथा, असुरगुरुणा बलिहितैषिणा कविना तदानीमेव बलिसभायां समायातं हरिं वामनरूपधरं ज्ञानेनावबुध्य तं बलिं हरिस्वरूपमवबोधयितुमभाणि, रे बले एष बाहुरक्षश्रिताग्निर्वर्तते इत्येवं प्रवदतः शुक्रस्य वाक्यं निराकृत्य यदा सामध्वनयो हरिणा समुद्गीर्णास्तदा व्याक्षेपस्तत्कथाया अभवदिति भावः ॥ ४४ ॥

(४४) यस्मादाक्रामतो द्यां गरुडमणिशिलाकेतुदण्डायमाना-
दाद्योतन्त्याबभासे सुरसरिदमला वैजयन्तीव कान्ता ।
भूमिष्ठो यस्तथान्यो भुवनगृहमहास्तम्भशोभां दधानः
पातामेतौ पयोजोदरललिततलौ पङ्कजाक्षस्य पादौ ॥

पङ्कजाक्षस्य पङ्कजवदक्षिणी नेत्रे यस्य स तस्य कमलनयनस्य श्रीत्रिविक्रममूर्तेः पादौ चरणौ वो युष्मान्पातां रक्षताम्, कथंभूतौ पादौ, पयोजोदरललिततलौ पयसि जले जायते यत्तत्पयोजं पद्मं तस्योदरं गर्भो मध्यमन्तर्भाग इति यावत् तद्वल्ललिते तले तलभागौ ययोस्तौ आरक्ततलाविति भावः । तयोर्मध्ये यस्मादेकस्माच्चरणाद्द्यां व्योमाक्रामतः सतः सुरसरिद्गङ्गा आद्योतन्ती गच्छन्ती वैजयन्ती पताकेवाबभासे समन्ताच्छुशुभे, अत्र द्युतेरात्मनेपदित्वेऽप्यनुदात्तेत्त्वनिबन्धनस्यात्मनेपदस्यानित्यतया तस्माच्छतरि रूपं, शुभ्यर्थकं धात्वन्तरमेव परस्मैपदीति वा स्वीकरणीयम् । किंविशिष्टाद्यस्मात्, गरुडमणिशिलाकेतुदण्डायमानात् मणिकेत्वादिर्ज्योतिःशास्त्रप्रसिद्धो गगने प्रत्यक्षदृश्य उत्पातरूपो गरुडमणिशिलाकेतुस्तस्येव दण्डायमानो लम्बायमानस्तस्मात्, कथंभूता सुरसरित् कान्ता मनोज्ञा, तथा तयोर्मध्ये योऽन्यो द्वितीयो भूमिष्ठश्चरणः स भुवनगृहमहास्तम्भशोभां दधानः भुवनं जगत्तदेव गृहं तस्य यो महान्स्तम्भ आधारस्तस्य शोभां कान्तिं दधानो बिभ्राण इति, भूमिष्ठ इत्यत्राम्बाम्बगोभूमीति षत्वमिति बोध्यम् ॥ ४४ ॥

॥ इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवृत्तौ
श्रीवामनावतारवर्णनविवरणम् ॥

Digitized by Google

॥ अथ श्रीपरशुरामावतारवर्णनम् ॥

(४५) गोत्राचारविचारपारगतया वृद्धानिरादिष्टया
मात्रा वस्तुषु तेषु तेषु पुरतः प्रस्तारितेषु क्रमात् ।
अन्नप्राशनवासरे सरभसं वक्षोभरोत्सर्पिणा
येनात्तं धनुरीक्षिताश्च सपदि क्षत्रावतंसा दिशः ॥

येन परशुरामेणान्नप्राशनवासरे प्रथमान्नग्रहणादिने मात्रा वृद्धानिरादिष्टया वृद्धाभिः श्वश्रूप्रभृतिभिर्निरादिष्टयोक्तया यथा च हे रेणुके सर्वाण्यपि क्रीडनकानि त्वमेतत्पुरतः संरचय किमवलोक्यायं हस्तमादातुं व्यापारयिष्यतीत्येवं वृद्धाभिः स्त्रीभिरुक्तया तेषु तेष्वद्भुतेषु कन्दुकादिषु वस्तुषु पुरतः क्रमेण प्रस्तारितेषु विस्तारितेषु सरभसं सवेगं धनुरात्तं गृहीतं नत्वन्यद्वस्तुजगृह इत्यर्थः । कीदृश्या मात्रा, गोत्राचारविचारपारगतया गोत्रस्यान्वयस्य य आचारविचारास्तत्तत्स्वक्रियाकलापविमर्शनानि तेषां पारं गतया परां कोटिं प्राप्तया, किंविशिष्टेन येन, वक्षोभरोत्सर्पिणा वक्षोभरेण हृदयबलेनोत्सर्पति गच्छति तच्छीलो वक्षोभरोत्सर्पी तेन, पुनः सपदि शीघ्रं क्षत्रावतंसाः क्षत्राणि क्षत्रियराजास्त एवावतंसाः शिखरीभूता यासु ता दिशो निरीक्षिता अवलोकिताः, यतस्तेन सर्वत्रापि क्षत्रिया एवावलोकितास्ततस्तान्हन्तुं वृथा धनुरेवात्तमिति भावः ॥ ४५ ॥

(४६) देवे दिग्विजयोद्यते धृतधनुष्प्रत्यर्थिसीमन्तिनी-
वैधव्यव्रतदायिनि प्रतिदिशं क्रुद्धे परिभ्राम्यति ।
आस्तामन्यनितम्बिना रतिरपि त्रासान्न पौष्पं करे
भर्तुर्धर्तुमदान्मदान्धमधुपीनीलीनिचोलं धनुः ॥

देवे रामे दिग्विजयोद्यते दिग्विजयाय सज्जीभूते प्रतिदिशं क्रुद्धे ईर्ष्यालौ परिभ्राम्यतीतस्ततः पर्यटनं कुर्वति सत्यन्यनितम्बिन्यन्येषां वैरिणां नितम्बिन्यास्तां दूरे तिष्ठतु, या रतिरपि त्रासाद्भयात्पौष्पं पुष्पाणामिदं पौष्पं पुष्पविरचितमित्यर्थः धनुः कार्मुकं भर्तुः कामस्य करे धर्तुं धारयितुं नादात् न ददौ, कथं तयेति तर्कितं चेन्मम भर्ता कामो यदि धनुर्धारयिष्यति तदाऽयं राम एनं मद्भर्तारं कामं धनुर्धरत्वाद्धनिष्यतीति तद्भयात्स्वभर्त्रा धनुर्नोपाहृयत्, किंविशिष्टे रामे, धृतधनुष्प्रत्यर्थिसीमन्तिनीवैधव्यव्रतदायिनि, धृतं धनुश्चापो यैस्ते च ते प्रत्यर्थिनः शत्रवस्तेषां याः सीमन्तिन्यो वध्वस्ताभ्यो वैधव्यव्रतं ददाति यः स तस्मिन्, यतः सर्वेऽपि धृतचापा रामेण हता अतस्तत्स्त्रियो वैधव्यभाजो जाता इति भावः, किंविशिष्टं धनुः, मदान्धमधुपीनीलीनिचोलं मदान्धा या मधुप्यस्ता एव नीलीनिचोलो नीलप्रच्छदपटो विद्यते यस्मिन् तत्, पुष्पमकरन्दास्वादनशीला नीलभ्रमर्योऽभितः परिभ्रमन्तीति भावः, दायिनीति दाधातोर्ग्रहादित्वाण्णिनिरिति ज्ञेयम् ॥ ४६ ॥

(४७) किं दोर्भ्यां किमु कार्मुकोपनिषदा भर्गप्रसादेन किं
किं वेदाधिगमेन भास्वति भृगोर्वंशे च किं जन्मना ।
किं वाऽनेन ममाद्भुतेन तपसा पीडां कृतान्तोऽपि चे-
द्विप्राणां कुरुते किमप्यनुशयो रामस्य पुष्णातु वः ॥

रामस्य किमप्यनिर्वचनीयं यदनुशयः पश्चात्तापो वो युष्मान् पुष्णातु पुष्टिं विधत्ताम्, अथ तत्रैव पश्चात्तापकारणमाविर्भावयन्नाह, चेद्यदि मयि सति कृतान्तो यमोऽपि विप्राणां पीडां व्यथां कुरुते तदा दोर्भ्यां बाहुभ्यां किं, तत्पीडाया अनिवर्तितत्वान्न किंचिदित्यर्थः । तथा कार्मुकोपनिषदा धनुर्वेदविद्याज्ञानरहस्येन किम्, उत वा भर्गप्रसादेनेश्वरप्रसन्नतया किम्, यतो महतामनुग्रहस्तदा सफलः स्याद्यद्युपकारः कस्यचित्कर्तुं शक्येत परं मया तत्पीडाऽपि निवारिता न भवत्यतः शम्भुप्रसादेन किमित्यर्थः । तथा वेदाधिगमेन चतुर्णामपि वेदानां ज्ञानेन किं न किमपीत्यर्थः । तथा भास्वति भास्वरे भृगोर्जमदग्नेर्वंशे पुनर्जन्मना किम्, अथवाऽनेन ममाद्भुतेनाश्चर्यकारिणा तपसा चान्द्रायणादिना किं, यतस्तपसाऽसाध्यमपि साध्यते परं यदि मया तत्कृत्यं नासाधि तदाऽनेन तपसा किमिति भावः ॥ ४७ ॥

(४८) नाशिष्यः किमभूद्भवः किमभवन्नापुत्रिणी रेणुका
नाभूद्विश्वमकार्मुकं किमिति वः प्रीणातु रामत्रपा ।
विप्राणां प्रतिमन्दिरं मणिगणोन्मिश्राणि दण्डाहतो
नाब्धीनां स मया यमोऽपि महिषेणाम्भांसि नोद्ग्राहितः ॥

इत्येवं रामत्रपा परशुरामलज्जा वो युष्मान्प्रीणातु, इतीति किम्, भव ईश्वरोऽशिष्यः शिष्यरहितः किं नाभूत्, यस्य शिष्यत्वेऽपि तत्कृत्यसाधनासमर्थोऽहं जातः स चेदशिष्योऽभविष्यत्तदा चारुजातमभविष्यत् । उक्तं च चाणक्ये । तथाहि

वरं ह्यशिष्यो न वरं कुशिष्य इति ।

तथा रेणुकाऽपुत्रिणी पुत्ररहिता किं नाभवत्, किमिति प्राक्ता गर्भ एव मामधत्त धृतोऽपि किं न स्राविता यतस्तस्यां समुत्पन्नोऽहं न कां चित्परोपकृतिमकार्षमिति, तथा विश्वमकार्मुकं धनुर्विरहितं नाभूत्, चेद्विश्वे कार्मुकं नाभविष्यत्तदाऽहं धनुः कथमाधास्यं तथात्वे तत्कथं संभाव्यते, अथ लज्जायाः कारणमाह । मया विप्राणां प्रतिमन्दिरं प्रतिगृहमब्धीनां चतुर्णामपि समुद्राणामम्भांसि जलानि मणिगणोन्मि-

ग्राणि मणिगणैरन्निग्राणि व्याप्तानि न कृतानि, अपि च महि-
षेण हत्वा दण्डाहतो यमोऽपि नोद्वाहितो न पलायित इति
रामनृपो वः प्रीणात्विति भावः ॥ ४८ ॥

(४६) कुलाचला यस्य महीं द्विजेभ्यः
प्रयच्छतः सीमदृषत्त्वमापुः ।
बभूवुरुत्सर्गजलं समुद्राः
स रैणुकेयः श्रियमातनोतु ॥

स रैणुकेयो रेणुकाया अपत्यं श्रियं लक्ष्मीमातनोतु, स इति कः, यस्य रामस्य द्विजेभ्यो महीं प्रयच्छतो ददतः कुलाचलाः सप्त कुलपर्वताः सीमदृषत्त्वं सीम्नो मर्यादाया दृषत्त्वं दृषद्भावं प्रस्तरभावमापुः प्राप्ताः, यदा ब्राह्मणेभ्यो भूर्दत्ता तदा तेषां स्वस्वभूमिसीमार्थं कुलाचला एवासन् ।

तेच यथा ।

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यः पारियात्रश्च सप्तैते कुलपर्वताः ॥ १ ॥

तथा समुद्रा उत्सर्गजलं बभूवुर्यदा याचकेभ्यो दानं दीयते तदा दानात्प्राग्दातृभिरुत्सर्गजलं दीयते, अतस्तेनैतावद्दानं दत्तं येन समुद्रा उत्सर्गजलतयाऽभूवन्निति भावः ॥ ४९ ॥

(५०) पायाद्वो जमदग्निवंशतिलको वीरव्रतालङ्कृतो
रामो नाम मुनीश्वरो नृपवधे भास्वत्कुठारायुधः ।
येनाशेषहताहिताङ्गरुधिरैः संतर्पिताः पूर्वजा
भक्त्या चाश्वमखे समुद्रवसना भूर्हन्तकारीकृता ॥

नामेति कोमलामन्त्रणे. रामो मुनीश्वरस्तापसव्रतधारित्वाद्वो युष्मान्पायाद्रक्षतु. किंविशिष्टः सः, जमदग्निवंशतिलकः जमदग्नेर्भृगोर्वंशे तिलकमिव यः सः, पुनः किंविशिष्टः, नृपवधे क्षत्रियराजवधे भास्वत्कुठारायुधः भास्वद्दीप्यमानं कुठारायुधं परशुरूपं शस्त्रं यस्य सः, तथा येन भगवताऽशेषहताहिताङ्गरुधिरैः अशेषाः समस्ता हता मारिता येऽहिताः शत्रवस्तेषां यान्यङ्गरुधिराणि तैः पूर्वजाः संतर्पिताः प्रीणिता इत्यनेनास्य रणे शूरत्वमाविष्कृतम् । अथ स्वधर्मपालनपुरस्सरमस्य दानशौण्डीरत्वं प्रकटयन्नाह, येन रामेण भक्त्याऽश्वमखेऽश्वमेधे यागे समुद्रवसना भूः पृथ्वी हन्तकारीकृता ब्राह्मणेभ्यो देयत्वेन विहितेत्यर्थः । हन्तकारलक्षणं मार्कण्डेयपुराणे ।

षोडश ग्रासा हन्तकारमिति ।

लिङ्गानुशासनवृत्तौ तु ।

ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम् ।
अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः ॥ १ ॥

इत्युक्तमिति ज्ञेयम् ।

॥ इति श्रीगुणविनयविरचितायां खण्डप्रशस्तिवृत्तौ
श्रीपरशुरामवतारवर्णनं समाप्तम् ॥

॥ श्रीः ॥

॥ दाक्षिणात्यमतिः ॥

अथ काशीस्थपंडितनामनिवार्तापत्रे काशीस्थाभ्यां द्वाभ्यां पंडिताभ्यां लिखितं पुनर्विवाहनिर्णायकपुण्यग्रामस्थसभाविषयकं पत्रं दृष्टं मया । तस्योत्तरं दातुं यथामतिप्रयतेऽत्राहम् । तत्पत्रध्वनितविषया एते ॥ १ ॥ अस्मासु दाक्षिणात्येषु संस्कृतविद्याह्रासः ॥ २ ॥ करवीरसिंहासनेश्वरश्रीमच्छंकराचार्याणां विजयो माहात्म्यं च ॥ ३ ॥ श्रीमद्राजारामशास्त्रिणां पुनर्विवाहखंडकपुस्तकस्य प्रभावः ॥ ४ ॥ भट्टविष्णुशास्त्रिणां विद्याहीनत्वम् । कंचित्पुरुषमनुलक्ष्य किंचिदपि लेखनं मे न रोचते । अत एव श्रीमद्राजारामशास्त्रिणां विद्याप्रभावं भट्टविष्णुशास्त्रिणां विद्याहीनत्वं च वर्जयित्वाऽन्यान् विषयानुद्दिश्य किंचिद् वच्मि । सर्वे दाक्षिणात्याः श्रीमद्राजारामशास्त्रिणां सदाचरणमार्दवप्रियभाषितादिगुणपरिष्कृतमहाविद्वत्तामंगीकुर्वंति । तथापि नास्त्यस्मासु विद्याह्रासः । श्रीमच्छंकराचार्याणां नास्ति विजयो माहात्म्यं च ॥

प्रथमप्रकरणम् । अस्माकं भरतखंडनिवासिनां का विद्या किं सामर्थ्यं च ॥

सांख्ययोगादिषड्दर्शनानि क्वचिदध्याप्यन्ते क्वचिदधीयन्ते च । फलमाधुर्याद्वृक्षमाहात्म्यम् । शौर्यप्रदर्शनात्क्षत्रिययोग्यता । रसादिपरिपाकात्काव्यसाफल्यं । एतैः सामान्यन्यायैरुपमानप्रमाणबलादस्माकं भरतखंडनिवासिनां समीचीनैकदर्शनज्ञानमपि नास्तीति सिध्यति । गौतमकणादप्रणीतन्यायवैशेषिकशास्त्रसाहाय्येनास्माकमिदानीं तनामवस्थामुदाहरामि । प्रमाणचतुष्टयजन्यसृष्टपदार्थविज्ञानसामर्थ्याच्छेषवत्पूर्ववदनुमानलापनाच्चानेकोपयोगि विषयोपपादकसिद्धांतसमर्थकव्याप्तयः संग्रहीतव्याः । ईदृग्व्याप्तीनां विवेचनं करणीयम् । अनेन सत्यासत्यमंडनखंडनशौंडपंडितालंबितपथेनोपयुक्तज्ञानवर्धनात्स्वदेशस्यैहिकपारमार्थिकसुखसंपादनात्स्वदेशविभववर्धनं भवेदिति प्रयत्नाः करणीयाः । सर्वमिदं त्यक्त्वाधुनिकनैय्यायिकैः किंक्रियते । अवच्छेदकावच्छिन्नव्यासज्यवृत्तिप्रकारकत्वप्रतियोगिताव्यधिकरणसमानाधिकरणादिपदजालसंजातविफलनिःसारस्वपांडित्यदर्शनम् । किमनेन । आंग्लदेशस्थाः एतद् दृष्ट्वा यदुपहसंति तत्सत्यम् । पुनरपि पातंजलपस्पशान्हिकप्रतिपादितोपयोगव्याकरणशास्त्रविवेचनं सांप्रति

कम् । सर्वजगत्पूज्यपाणिनीयशास्त्राध्ययनाद्वैदिकपदप्रयोगज्ञानाच्च वेदार्थमीमांसनं करणीयम् । शास्त्रीयलक्षणघटकपदनिर्वचनान्नवीनपदप्रयोगशक्तत्वाच्चापयुक्तविषयसमर्थननिबंधारचनीयाः । तथा च नवरसादिज्ञानाच्छौर्यादिगुणवर्णनान्वितनवीनकाव्यानि नाटकानि च निर्मेयानि । सर्वमिदं त्यक्त्वा कंठगतकोटिरिक्तज्ञानप्रदर्शनेन विजिगीषवो वैय्याकरणा वादं वादं स्वस्य स्वयजमानानां च कपालशूलाय व्याघ्रायंते । एषैवास्माकं दाक्षिणात्यानां काशीस्थपंडितानां च स्थितिरिदानीं तना । किंविस्तरेण ॥

द्वितीयप्रकरणम् । कुतः शंकराचार्यत्वम् । चतुर्वेदषट्शास्त्रसज्ज्ञानात्सदाचरणाच्चिस्पृहित्वाद्ब्राम्हणादिजातिचतुष्टयकल्याणेच्छुत्वात्सद्भयासंगात् सदुपदेशित्वाच्चिष्पक्षपातित्वाद्ब्रम्हण्यत्वाच्चैव नान्यथा । करवीरसिंहासनेश्वरशंकराचार्याटेशस्थब्राम्हणाः । ते किंचिदपि शास्त्रं न जानन्ति । स्वामपि महाराष्ट्रभाषां व्यक्तं वक्तुं न शक्नुवन्ति । सुलभव्यवहारविषयेप्यभिचरितामानं कर्तुं न प्रसहन्ते । एतादृशां भगवतो नास्तिकमतखंडकस्य सद्विद्या सच्छास्त्रप्रकाशकस्यादिशंकराचार्यस्येव पूजनं वर्णनं च सर्वथैवायोग्यमज्ञानमूलकं च । एतदपेक्षया मुग्धपाषाणपूजनं समीचीनम् । ईदृशाः शंकराचार्याः "स्वागमनमार्गप्रान्तवर्तिनगराणि पत्तनानि च भगीरथानीतगंगौघइव पुनंतः पुण्यग्रामं प्राप्य काशीप्रभृति विविधक्षेत्रराजधानीस्थपंडिताच्चानादेशीयान् भूपालान् धनिकांश्चाहूय सुधर्मामिव धर्माभासनिरासपूर्वकसनातनसद्धर्मविवेचनाय सभां सभाजयामासुरिति" वर्णनमसत्यम् । मूर्खजनप्रतारणैकफलकं चैव । नात्रसंशयः । क्व भोजराजः क्व गांगातैलिकः । क्व सुधर्मा क्व पुण्यग्रामस्थ सभा ।

तृतीयप्रकरणम् । वैदिकब्राम्हणानां का स्थितिः । एते दशग्रंथात्संहितादीन् कंठगतान्कुर्वन्ति । परंत्वेकस्यापि पदस्यार्थं न जानन्ति । व्यवहारज्ञानशून्यानां शास्त्रद्वेष्टृणां वेदार्थाशक्यत्वप्रतिपादयितृणामेतेषां ब्राम्हणानां किं वच्मि । तेषामये नानावेदार्थप्रकाशकसाधनानि गर्दभस्यायेगुडइव व्यर्थानि । व्यर्थं च भगवद्भास्कराचार्यकृतनिरुक्तम् । व्यर्थानि च पाणिनीयानि सूत्राणि । व्यर्थं च माधवीयं भाष्यम् ।

चतुर्थप्रकरणम् । अर्वाचीनास्तरुणा आंग्लभाषां पश्यन्ति । तया व्याकरणन्यायाद्यनेकशास्त्राणां शिल्पाद्यनेककलानां च ज्ञानं भवति । चतुरवाक्पटवः सदाचरणैकदृष्टयः स्वदेशहितपरायणा एकेश्वरपूजनरता उदारचेतसः स्वजनदुःखनिरासोद्यताः संस्कृतभाषानिपुणाः केचित्सुज्ञनवीना मुग्धजनांमीकृतांधपरंपराप्राप्ता वैदिकाचरणनिरासपूर्वकश्रुत्यादिप्रतिपादितसनातनधर्मप्रवृत्तिं चिकीर्षवः सन्ति । एतेषां मतखंडनेन किं फलं जायते । एते पुराणपथ्यानुसारि शास्त्रिणामुपदेशं न गृह्णन्ति । अत एव तेषामुपदेशः केवलं ब्राम्हणजातिकलहाय भवति । मिथो बहिष्कारेण द्वेषोत्पादकशब्दप्रयोगेणास्माकं ध्वंसः स्वहस्तैः सुंदोपसुंदयोरिवमाभूदिति मे दीनस्य विज्ञप्तिः । यतः खिस्तधर्मानुयायिनो महमूदधर्मानुयायिनो ब्रम्हधर्मानुयायिनः पुरातनधर्मध्वंसं कर्तुमनस इत्यलम् ।

म· भो· कु· नामा दाक्षिणात्यकरवीरस्थशास्त्री ।

RAMAYAN

BOOK I.

CANTO XLV.

THE BIRTH OF LAKSHMI'.

At length when many a year had fled,
Up floated, on her lotus bed,
A maiden fair and tender-eyed,
In the young flush of beauty's pride.
She shone with pearl and golden sheen,
And seals of glory stamped her queen.
On each round arm glowed many a gem,
On her smooth brows, a diadem.
Rolling in waves beneath her crown
The glory of her hair flowed down.
Pearls on her neck of price untold,
The lady shone like burnisht gold.
Queen of the Gods, she leapt to land,
A lotus in her perfect hand,
And fondly, of the lotus sprung,
To lotus-bearing Vishṇu clung.
Her, Gods above and men below
As Beauty's Queen and Fortune know.*

* 'That this story of the birth of Lakshmí is of considerable antiquity is evident from one of her names *Kshírábdhi-tanayá*, daughter of the Milky Sea, which is found in *Amarasinha* the most ancient of Indian lexicographers. The similarity to the Greek myth of Venus being born faom the foam of the sea is remarkable.'

'In this description of Lakshmí one thing only offends me, that she is said to have four arms. Each of Vishṇu's arms, single as far as the elbow, there branches into two; but Lakshmí in all the brass seals that I possess or remember to have seen has two arms only. Nor does this deformity of redundant limbs suit the pattern of perfect beauty.' SCHLEGEL. I have omitted the offensive epithet.

(To be continued.)

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 55. Benares, December 1st, 1870. Vol. V.

॥ प्रकरणपञ्चिकायाम् ॥

॥ अङ्गपारायणम् ॥

व्याख्याविकल्पसंभवमङ्गान्यधिकृत्य संशयं छेत्तुम् ।
परमं प्रभाकरगुरोर्गम्भीरं भावमभिधास्ये ॥

इह चतुर्विधमङ्गजातं जातिगुणद्रव्यभावार्थात्मकं, तत्र भावार्थात्मकमपि द्विविधं, संनिपत्त्योपकारकमारादुपकारकं च, तत्र संनिपत्त्योपकारकं चतुर्विधं, साध्यभूतोत्पत्तिप्राप्तिविकृतिसंस्कृतिभेदात् । यथाक्रमं संयवनदोहनविलापनप्रोक्षणादिरूपम्, संयवनेन प्रागभूतः पिण्ड उत्पद्यते । सदेव क्षीरं दोहनेन प्राप्यते । विलापनेन प्राचीं संहतावस्थामपबाध्येतरा द्रवावस्थाज्यस्योत्पद्यते । पार्थिवं ह्याज्यं गन्धवत्वात्स्वभावतः संहतरूपमग्नियोगेन द्रवीभवति । तदाह भगवान्काश्यपः । "सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्य"मिति । तथा च शाब्दैरप्युक्तम् । अग्निसंयोगेनाज्यं द्रवीभवतीति च्विप्रत्ययप्रयोगादिति । प्रोक्षणं तु द्रव्यस्य न प्रागवस्थाध्वंसेन दशान्तरमादधातीति । श्लोकश्चात्र भवति ।

पूर्वावस्थाप्रहाणेन दशान्तरपरिग्रहः ।
विकारमाहुः संस्कारं केवलातिशयोदये ॥

इति । किं पुनरेषां चतुर्णामपि सन्निपत्त्योपकारित्वलक्षणं, यत्कारकविध्यपेक्षं फलं जनयति तत्संनिपत्त्योपकारकम् । यथा कर्तरि स्थानं, कर्मण्यवघातादि, अधिकरणे दध्यानयनमित्यूहनीयं, तत्र सन्निपत्त्योपकारकाङ्गवाक्येषु केचित्पृथग्विधीनभ्युपगच्छन्ति । ते हि मन्यन्ते । यद्यत्र पृथग्विधयो नाभ्युपगम्येरंस्तदाऽधिकृताधिकारादङ्गतैवावघातादीनां न स्यात् । न च द्रव्यसंबन्धमुखेन प्रकृताधिकारापूर्वसंबन्धादङ्गतासिद्धिः । व्रीह्यादिशब्दानामाकृतिवचनत्वात्, यद्यपि कार्यप्रत्यासन्नतया व्यक्तीनां तल्लक्षणार्थो जातिशब्दः । तथापि व्यक्तिमात्रं लक्ष्येत, नापूर्वविशेषसंबद्धा व्यक्तिः । न च प्रकृताग्नेयीवत्तदपूर्वसंबन्धव्यक्तिवशेनापूर्वसंबन्धस्तथापि यथाग्नेयीन्यायेन सन्निहितव्यक्तिपरिग्रहः, तथापि स्वरूपेणैव तासां प्रकृतव्यक्तिपरिग्रहेण प्रतीतिः, न पुनरपूर्वविशेषसाधनतया तस्य स्वरूपस्य लाक्षणिकत्वात् । न च लक्षितलक्षणायां प्रमाणमस्ति । तथाहि, जात्या व्यक्तिर्लक्ष्यते । व्यक्त्या च साधनविशेष इति लक्षितलक्षणा प्रकरणाभावादयुक्ता । अत एव चाग्नेय्याग्नीध्रमुपतिष्ठते इति सत्यपि प्रकृतपरिग्रहे न ऋगन्तरेणाग्नीध्र उपस्थातव्यः । अत एव च न तत्र विनियुक्तविनियोगविरोधः । कार्यान्तरसाधनतया चाग्नीध्रोपस्थानेऽविनियोगात् । एवं च स्वरूपमात्रेणावघातादीनां संबन्धाच्चापूर्वविशेषसंबन्धासिद्धिः । दीक्षणीयावाङ्नियमनवत् । यथा स्वावान्तरापूर्वसंबन्धाद्वाङ्नियमो नाधिकारापूर्वानुप्रवेशी तथाऽवघातोऽपि स्यात् । ततश्चाधिकारापूर्वं प्रत्यवघातादीनामङ्गता न स्यात्तदनङ्गत्वे च तत्प्रयुक्त्यभावादवघातादीनामनुष्ठानं न स्यात् । अतोऽवघातादिपूर्वोत्पत्तिनियोगोऽङ्गीकरणीयः । तस्मिन् खल्वाश्रितेऽधिकाराभावेन तस्यानुष्ठानानुपपत्तेरधिकारिणि कल्पयितव्ये प्रकृताधिकारापूर्वाधिकृत एव प्रयाजादिष्विवाधिक्रियतइति उपायोपेयभावात्तदङ्गत्वसिद्धिरिति । तदिदं तत्र भवानुपाध्यायो न मृष्यति । अनभिज्ञो भवान्विषयनियोज्यानामिति । अवघातादिषु शब्दतो वस्तुतो वस्तुस्वभावतश्च प्रोक्षणादिषु शब्दत एव तुषकरणोन्मोचनादिदृष्टमदृष्टं च कार्यमङ्गीक्रियते । तत्र

Digitized by Google

यदि नियोगो ऽप्यपूर्व आश्रीयेत कार्यभूतस्तदा कार्यद्वयमेकस्मिन्कार्ये नान्वीयते। न च यथा स्वर्गादिकं फलं तथाभूतमेव तद्भवितुमर्हति। तस्य च नियोज्यविशेषणत्वेनान्वयसंभवात्। न च तुषकणविमोचनादि नियोज्यविशेषणं, क्रियाफलत्वात्। यदेव नियोगात्फलं तदेव नियोज्यविशेषणतामनुभवति। साध्यविशिष्टो हि नियोज्यस्तदेव कार्यतया प्रतिपत्तुमर्हति यदेव तस्य साध्यं साधयति इति नियोज्यविशेषणस्य सिद्धिरवसीयते। यच्च क्रियाफलं न तन्नियोगात्सिध्यतीति न तद्विशिष्टो नियोगे नियोज्यतामश्नुते। न च प्रतीततुषकणविमोचनादिकार्यत्यागो युक्तः, प्रतीतहानादेव। ननु च नियोगाभिधायिलिङादिप्रयोगवशेन नियोगो ऽपि प्रतीत एवेति तुल्यो दोषः। उच्यते। सन्निहिते विधौ विधिरवगम्यमानः स एव तावदवगन्तुमुचितः। तत्र यदि तद्विषयानुप्रवेशिता विषयस्य न स्यात्। अवेद्विध्यन्तरम्। अनुप्रविशति चावघातादि प्रकृतविषये तदर्थव्रीह्यादिसंबन्धात्। तथाहि सन्निहिताधिकारिनियोगपरतयैवावहन्त्यादिभिः पदैरवघातादय उच्यन्ते। तथाभूतानां तेषां क्रियाकारकभावोपदेशात्। यदि स्वरूपमात्रावस्थितैर्व्रीह्यादिभिः सह संबन्धः स्यात्तदा तदधिकारसंबन्धो न स्यात्तदीयसाधनविशेषलक्षणया व्रीह्यादिभिः पदैरवस्थापितो ऽवघातादिभिरन्वीयते न स्वरूपमात्रम्। एवं चोपदेश एव यवेष्वप्यवघातादयः सिद्धा भवन्ति, साधनभावस्याविशेषात्। अत एव चावघातादयो नियोगसाधनतया ऽप्राप्ता एव विधीयन्ते। नियमस्तु प्रयोजनम्। यदि नियोगाङ्गतया ऽवघातादयो न विधीयेरन् तदा पुरोडाशमात्रसिद्ध्यर्थतया नखदलनाद्यप्याक्षिप्येत, नियोगाङ्गतया त्ववघातादिषु विहितेषु तैर्विना नियोगसिद्ध्यनुपपत्तेर्नियमेन त एवाक्षिप्यन्ते। नियोगाङ्गता तु पक्षे ऽप्यप्राप्ता। नियोगस्यालौकिकतया तदङ्गस्यापि शब्दादन्यतो ऽनवगमात्। नियोगाङ्गत्वाच्चावघातादीनां नियोगसंबन्धः प्राप्तः स लिङादिभिरनूद्यते। ननु यद्यवघातादीनां नियोगसंबन्धोऽस्ति कथं तर्हि तेषां नियोगाविषयत्वम्, उच्यते। किं तु यस्य नियोगस्य सिद्धिरेव कार्यः स विषयः, अवघातादीनां च तुषकणविमोचनाद्यवान्तरकार्यं कुर्वतां नियोगाविषयत्वं, तेन नियोगाविषयत्वमङ्गताचेति सिद्धम्। विधेयास्त्ववघातादयो नियोगसिद्ध्यर्थतयोपादीयमानत्वात्तदुक्तं, "यत्तु तत्सिद्ध्यर्थमुपादीयते तद्विधेयमिति तन्त्रव्यवहार" इति॥ तदेवं नियोगप्रत्यभिज्ञोपबृंहितसन्निधानमात्रेणैवावघातादीनां नियोगाङ्गता न पदार्थान्वयमुखेनेति सिद्धम्। येषां पुनः पदार्थान्वयमुखेनानुप्रवेशो ऽभिमतस्तेषां प्रकरणाधीनस्य पाञ्चदश्यस्यानारभ्याधीतस्य च साप्तदश्यस्य सामिधेनीसंबन्धमुखेनानुप्रवेशिनोरविशेषादुभयोरपि प्रकृतावेव नियोगो विकल्पश्च स्यात्। सन्निधानमात्रेण तु प्रकरणाधीनस्य ग्रहणे शीघ्रं पाञ्चदश्यमधिकारानुप्रविष्टमिति तदवरुद्धे साप्तदश्यमधिकारविधौ नानुप्रविशति, तेन विकृतावेव तस्य निवेश इति॥ यदि सन्निधानतो ऽधिकारविधावनुप्रवेशः तर्हि पर्णतादीनामनारभ्याधीतानां कथमनुप्रवेशः। उच्यते। जुह्वादयो ऽव्यभिचरितक्रतुसंबन्धा इति तत्संबन्धमुखेन क्रतुसंबन्धसिद्धिः। तत्संबन्धेनैव च जुह्वादिषु पर्णतादिसंबन्धात्। अत एव हिरण्यं भार्यमितिस्वतन्त्रमेवाधिकारनियोगविषयः। हिरण्यस्य क्रतुसंबन्धव्यभिचारात्। ये च पदार्थस्वरूपानर्थक्यापत्तेस्तत्संबन्धावस्थान्वयपूर्वकं वाक्यकान्वयमाहुः। तेषामिदमेव तावत्कथम्, आनर्थक्येन न भवितव्यमिति, वेदवाक्यत्वादिति चेत्, वेदेनानर्थकेन न भवितव्यमिति न राज्ञा ज्ञापितं, यस्यार्थो गम्यते तस्य मा भूदानर्थक्यम्। अनवसीयमानार्थस्य त्वर्थवत्त्वं मनोरथमात्रविजृम्भितम्। पक्षान्तरालम्बनेनाप्यर्थवत्ता भवत्येवेति परं संनिधानवशेन नियोगाङ्गताभ्युपगमः। सन्निधानमपि संबन्धे कारणमिति वाक्यविदः। संबन्धश्च गुणप्रधानभावमन्तरेण न स्यात्। तत्र न च कार्यमन्यथा भवतीति नियोग एव प्रधानम्। अङ्गमवघातादयः। यदि वा ऽनर्थको न नियोगसंबन्धः तदा च सूच उत्तमः पर्यास इति द्वादशाहविधिविरोधात्, क्रतुसंबन्धे सूष पर्यास उच्यते। तेन तत्र पदार्थमात्रसंबन्धे एवातिक्रान्तमिति आनर्थक्यं नास्ति। तथा हिरण्मय्यः स्रुचो भवन्ति इति स्रुचामव्यभिचरितक्रतुसंबन्धानां धर्मविधेरानर्थक्यं नास्तीति न प्रकृताधिकारसंबन्धः स्यात्। किं चानर्थक्यपरिहाराय पूर्वसंबन्धो ऽभ्युपेयेत किमिति सन्निहितापूर्वसंबन्धे न आश्रीयते। यदि सन्निधानमात्रेण ततश्च अग्नेस्तृणान्यपचिनोतीति नाग्निहोत्रे एव व्यवतिष्ठेत। अथ संनिधानविशेषात्तदपूर्वसंबन्धिनामन्वादीनां परिग्रहः तदा वरं संनिधानविशेषात्तदपूर्वसंबन्ध एवास्तु किं परंपराश्रयणेन। यथा क्रियाकारकभावेनान्विताभिधानं यथा प्रयोजनप्रयोजनिभावेन लोके प्रतिपन्नम् नहि व्रीह्यादयः प्रयोजनतां प्रतिपत्तुमर्हन्ति इति तत्परित्यागेनापूर्वेण सह प्रयोजनप्रयोजनिभावेन संबन्धः। ये चावघातादिष्ववान्तरापूर्वाणि संगिरन्ते तेषां मते प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति प्रोक्षणं दीक्षणीयावाङ्क्यमवदवान्तरापूर्वप्रयुक्तं स्यात्ततः स त्रैधातवीयायां वाङ्क्यमो न स्यात्तथा नखनिर्भिन्नैः प्रोक्षणं न स्यात्तत्प्रयोजकं रूपं तत्र नास्तीति। नचैतद्वाच्यं, तुषकणविवेचनाधिकार्यमुखेनाधिकारापूर्वमेव प्रयोजकमिति। वाङ्क्यमेपि तथा प्रसङ्गाद्दीक्षणीयायामपि क्रत्वपेक्षितत्वोत्पत्तिरिति तदधिकार्यता नास्तीति

Digitized by Google

ज्योतिष्टोम एव प्रयोजको वाङ्मयस्य स्यात्। तद्गृहीतत्वोत्पत्तिकायां चैधातवीयायामपि स्यात्। ननु चावघातादिष्वपूर्वकार्यविधयो नेष्यन्ते, कथं तर्हि "न चाविहितमङ्गं भवती" ति मङ्गत्ववाक्यान्तरविध्यवगमो भाष्यकारस्य। उच्यते। आरादुपकारके ऽङ्गत्ववदप्रतिषेधे वाक्यान्तरविधिरङ्गीकृतः। तद्व्यतिरेकेणाङ्गत्वानुपपत्तेः। स्वरूपेण क्षणिकत्वात्कर्मणामुपकारजननकाले तदनवस्थानादङ्गत्वं न घटत इति इहैव वक्ष्यामः। अत एव "संहन्यमानमप्यवघातो ऽसन्निपत्योपकारित्वेन पुरुषप्रयत्नमनुवर्तते" इति वदति भाष्यकारो, यत्र वाक्यान्तरविधिरस्ति तत्र पुरुषप्रयत्नश्रवणं नानुवादः। यदेव तद्वाक्यान्तरापूर्वं तत्कार्यतया लिङादिवाच्यम्। न च कृतिरूपपुरुषप्रयत्नानभिधाने कृत्यवच्छिन्नस्वभावस्य कार्याभिधानोपपत्तिरिति तदर्थं पुरुषप्रयत्नाभिधानं युक्तमिति नाविवक्षितः पुरुषप्रयत्नः। एवं नियोगप्रत्यभिज्ञोपबृंहितसंनिधिसमाम्नानादवघातादयोऽवहन्त्यादिपदैरधिकारनियोगैदमर्थ्येनान्वयिनोऽवगताः सन्तस्तदन्वितावस्थव्रीह्यादिभिः सह क्रियाकारकभावेनान्विता न प्रतिशेषतां प्रतिपद्यन्ते। किं पुनरवघातस्य व्रीह्यादिशेषत्वे प्रमाणम्। कार्यमिति ब्रूमः। तदा हि न कार्यमन्यार्थं भवति। कार्यत्वादेव। तेन यत्कार्येण संबद्धं तत्तावत्तदर्थम्। यदपि च कार्यैदमर्थ्यापन्नेन संबद्धं तेनापि सह यस्य साध्यसाधनभावस्तदपि तदर्थमेव। कार्यैदमर्थ्यापन्नस्यान्यैदमर्थ्ये प्रमाणाभावात्। एवं च सर्वेष्वशेषशेषित्वं वेदितव्यम्। यदि कार्यत एवैदमर्थ्यावगमः। कथं तर्हि श्रुत्यादीनां विनियोगकारणत्वम्। द्वारविशेषसमर्पकतया कार्यविशेषकतया हि शेषः शेषिणि शेषतामापद्यते। नान्यथा। अकिंचित्करस्य शेषत्वानुपपत्तेः। तत्र श्रुतिः व्रीहीनवहन्तीति द्वितीयात्मिका व्रीह्यादिगतं तुषकणविमोचनादि समभिव्याहृतक्रियासाध्यभूतं समर्पयन्ती विनियोगकारणतामनुभवति। न पुनरन्विततयैव शेषितां व्रीह्यादीनामवघातस्य च शेषतामाह। गां ददातीत्यादिषु व्यभिचारात्। क्रियाजन्यफलभागिता हि सर्वत्राव्यभिचारिणी द्वितीयावाच्या। न शेषिता, व्यभिचारित्वात्। क्रियाजन्यस्य फलस्य भागि कारकमेव तत्कर्म तच्च किं चिदीप्सितं भूतभाव्युपयोगात्। किं चिच्चानीप्सितमनुपयोगात्। तेनैव विशेषेण भगवतः पाणिनेः सूत्रद्वयम्। कर्तुरीप्सिततमं कर्म। तथायुक्तं चानीप्सितमिति। येषां मते शेषितैव द्वितीयादीनामर्थः। तेषां मते सुवर्णं भार्यमिति क्रतुधर्म एव स्यात्। श्रुतानुगुणाधिकारानुप्रवेशितैव न्याय्या यतः। न स्वतन्त्राधिकारकल्पना एव मतः सुवर्णशेषित्वत्यागप्रसङ्गात्। क्रियाजन्यफलभागित्वे तु शब्दार्थे न श्रुतहानिरिति स्वतन्त्रकर्तृतावगमात् तत्कारणभूताधिकारत्वेनैव न्याय्या प्रकृतनियोगप्रत्यभिज्ञानाद् नियोगान्तरे स्थिरे प्रजापतिव्रताधिकारवत् कल्पनेनाधिकारकल्पनैवोचितेति स्नानादिषु वस्तुस्वभावपर्यालोचनया लिङ्गात्कर्तृसंस्काररूपकार्याङ्गीकारः। तेन कर्तरि शेषितामानादीनां सामर्थ्यात्सामर्थ्यमात्रं च लिङ्गं नाभिधानसामर्थ्यमेवं सति आज्यं जुहोतीत्यादिषु वाक्यादनिक्रमस्य होमः कार्यतया प्रतीयत इति वाक्येनापि न विनियोगः सन्निपत्योपकारकाणाम्। न च प्रकरणेन विनियोगः संभवति। येषां प्रकरणं कल्पयति तेषां प्रकरणाधीनो विनियोगः। इतिकर्तव्यताकाङ्क्षा प्रकरणम्। तया च करणोपकारः कार्यभूतः कल्प्यते, तथासौ सन्निपत्योपकारिणां द्वारमिति न तेषां प्रकरणेन विनियोगः। स्थानसमाख्ययोरपि सन्निपत्योपकारकाणं प्रति न कार्यकल्पकतेति न विनियोगकारणत्वम्। एवं सन्निपत्योपकारकाणां नियोगैदमर्थ्यमभिदधानतो विनियोगतश्च कारकैदमर्थ्यमुपादानतश्चाधिकारनियोगकरणीभूतयागाद्यैदमर्थ्यं विनियोगाक्षेपो ह्युपादानम्। तत्कृतं प्रोक्षणादेः क्रत्वर्थत्वम्। यदि यदीयप्रकरणोपकारता प्रोक्षणादेर्न स्यात् तदा केनापरेण प्रकारेण तदन्विता विनियोगप्रतीतिर्निर्वहतीति नियोग एव तदन्वितः प्रतिपन्नस्तस्य करणोपकारकताकल्प्यं करणैदमर्थ्यमाक्षिपतीति तत्कृतमेव प्रोक्षणादेः क्रत्वर्थत्वं विनियोगात्पुनः करणैदमर्थ्यमेवेति। कथं पुनस्तेषां करणोपकारकता। तुषकणविमोचनादिकार्यपरंपरादानेनोपकार्यविशेषादायकतया। नन्वेवं सति कारकानुप्रवेशिनामवघातादीनां करणशरीरविशेषादायकतया करणोपकारकत्वं, प्रयाजादीनां तु व्यतिरिक्तकारकानुग्रहजनकतेति न सर्वैरेक उपकारः क्रियते। ततश्च सर्वैरेकेतिकर्तव्यतेति न स्यात्। उच्यते, उपकार्यविशेषायत्तत्वादुपकारसिद्धेरुपपन्नमुपकार्यस्य हि विशेषस्योपकारकं कलयितुं शक्यते नान्यस्यत्यवघातादिविनियोगादवगम्यते। एवं चेदुपपन्नमवघातादेरपि प्रयाजादिभिः सह करणोपकारजनकत्वम्। कस्मात्पुनः प्रयाजादिवदवघातादयोऽप्युपकारका नाभ्युपेयन्ते। प्रकृताधिकारनियोगप्रत्यभिज्ञानात्। संभवति चात्र नियोगैक्यं तदीयव्रीहिसंस्कारगुणेनेत्युक्तम्। प्रयाजादितुल्यत्वे हि अवघातादीनामङ्गीक्रियमाणे उत्पत्तिनियोगान्तरमाश्रयणीयमिति वक्ष्यामः। तत्र संग्रहश्लोकाः।

सन्निधानवशोत्पन्ना प्रकृता पूर्वभाविनी।
भावाधिष्ठा त्वभिज्ञेति तदनुग्रहकाङ्क्षया॥
अवहन्त्यादिभिः शब्दैः कार्यान्वितपदार्थकैः
प्रकृतापूर्वसंबन्ध एव स्वार्थोऽभिधीयते॥
तथा सति तदीयत्वं तेषां रक्षितुमिच्छता।
व्रीह्यादिभिः पदैर्युक्ता कार्यसाधनलक्षणा॥

Digitized by Google

क्रियाकारकसंबन्धो ह्यतत्साधनगोचरः ।
शेषिबोधोपि तस्यैव श्रौतत्वाद्यनुसारतः ॥

इति प्रकरणपञ्चिकायामङ्गपारायणे सन्निपत्योपकारकपरिच्छेदः ॥ ॥

आरादुपकारकं च द्विविधम् । अदृष्टप्रयोजनं दृष्टादृष्टप्रयोजनं च । समिधो यजतीत्यादिष्वस्य कारकगतं किं चित्प्रयोजनं न दृश्यते । तत्र के चित्तावदधिकारापूर्वसिद्ध्यर्थमेषामधिकृताधिकारमिच्छन्ति । ते हि मन्यन्ते उत्पत्तिनियोगास्तावत्समिदादिषु निर्विवादं संमताः । न च नियोगो नियोज्यमन्तरेणाभिधीयते । तथा च सति विश्वजिदादिषु नियोज्यपरिकल्पना न स्यात्तत्र च नियोज्ये कल्पयितव्ये यद्यनुषङ्गः फलपदस्य कल्प्येत यदि वा विश्वजिन्न्यायेन चाधिकारी कल्प्यते तदाधिकारापूर्वस्येतिकर्तव्यताकाङ्क्षा न परिपूर्यते । न परमापूर्वाधिकारकत्वेनाधिकारिणि सत्युपायोपेयभावो गम्यते । नह्यन्यथाधिकृताधिकारभाव उपपद्यते । यस्य न परमापूर्वसाध्यश्च परमापूर्वाधिकारः । न च यथा स्वर्गकामो यजेतेत्यादौ साध्यस्वर्गविशिष्टाधिकारिणि स्वर्गयागयोरुपायोपेयभावः तथेहापि समिदादिपरमापूर्वयोः । तत्र च न कार्यमन्यार्थमिति न्यायेनाधिकारनियोगैदमर्थ्यमेव समिदादीनामवसीयते । तदिदं ग्राहकग्रहणमिति गीयते, तत्रोत्पत्तिविशिष्टाग्नेयादिकरणावरुद्धे परमापूर्वे प्रकारान्तरेणैदमर्थ्यानुपपत्तेरितिकर्त्तव्यतात्वेनैव संबन्ध इति । तदिदमनुपपन्नमिति प्राभाकराः । यदि सर्वस्य नियोगस्य नियोज्यान्विताभिधानमाश्रीयते तत्र राजसूयिकानामिज्याविशेषाणामुत्पत्तिविनियोगानामपि साधिकारत्वं स्यात् । ततोभिषेचनीयतन्त्रमध्ये पठितानां देवनादीनामभिषेचनीयावान्तरापूर्वप्रकरणेन तदङ्गतैव न स्यात् । अथोच्येत नादृष्टार्थं नियोगो नियोज्यान्वितोभिधीयते किं त्वनुष्ठानलब्धये । अभिषेचनीयादयश्च परमापूर्वप्रयुक्त्यैव लब्धानुष्ठानाः परमापूर्वस्यापि तद्विषयत्वात्तेनैव स्वसिद्ध्यर्थं विषयीभूतास्विज्यासु प्रयुज्यमानासु तद्विषयोत्पत्तिनियोगा अपि लब्धसिद्धयो न स्वसिद्धये नियोज्यान्तरमाकाङ्क्षन्तीति । तर्हि प्रयाजादिनियोगा अपि विनियुक्तविषयत्वान्नाधिकारान्तरमपेक्षेरन् । स्यान्मतं विनियोग एव तेषामधिकृताधिकारमन्तरेणानुपपन्न इति । तदसत् । नियोगैदमर्थ्यमात्रेण प्रथमशब्देनावगताधिकारसंबन्धानां प्रकरणेनेतिकर्तव्यतात्वेन विनियोगात् । तथाहि, अधिकारविधिसंनिधौ यजतीत्यादयो निरधिकारा एव तावदाम्नायन्ते । [illegible]सावधिकारविधिः स एव प्रयोजनभूतो निरधिकारैः समिदादिभिः स्वयमप्रयोजनभूतैरन्वितः शब्देनाभिधीयते । समिदादिवाक्यानि च द्रव्यदेवताविशिष्टानि यागस्वरूपाण्येव संनिधापयन्ति सन्निधापनमात्रेण तैः सहाधिकारनियोगस्यान्वयः । यदि च सन्निधानं नाद्रियेत तदा समिदादिष्वपि किमिति परमापूर्वाधिकारी कल्प्यते । तदेवं संनिधानमात्रतः सिद्धमुपकारैदमर्थ्यं कथं भवतीत्यपेक्षा । तथा साध्यभूतस्याधिकारापूर्वस्य कथमित्याकाङ्क्षा । तेन करणोपकार एव तेषां द्वारमाश्रीयते । तत्र यदैदमर्थ्येनान्विताभिधानं तद्ग्राहकग्रहणम् । यच्च तेषां करणोपकारद्वारपरिकल्पनं स एव प्रकरणविनियोगः । नन्वेवमवान्तरापूर्वाण्यपह्नुतानि । नापह्नुमहे । यद्यपि प्रथमं लिङादयो न व्यतिरिक्तं नियोगं प्रतिपादयितुमीशते । अवहन्त्यादिष्विव शङ्क्यमानाधिकारनियोगानुवादकत्वात् । तथाप्यधिकारनियोगं प्रति एषां क्षणभङ्गिनामवान्तरापूर्वाण्यजनयतामङ्गतोपपद्यत इति पश्चादधिकारापूर्वाङ्गभावोपपादनायाश्रयणीया अवान्तरापूर्वाणि लिङाभिधेयान्युपेयन्ते । तदेतद्दीक्षणीयावाङ्यमाधिकरणे व्युत्पादितम् । नत्वेवमाश्रयिष्ववान्तरापूर्वाभ्युपगमो यथा तथा तत्रैव वक्ष्यामः । यानि च तान्यवान्तरापूर्वान्वितानि शब्देनाङ्गभूतानि अधिकारापूर्वं प्रत्युपनीयन्ते । नन्वेवं तर्हि दीक्षणीयादिषु प्राङ्यमस्यावान्तरापूर्वप्रयुक्तता न स्यात् । किं तु प्रोक्षिताभ्यामवहन्तीति तदपूर्वप्रयुक्ततैवापद्येत । न । तत्स्वरूपनिष्पत्त्यर्थत्वात्, यद्यप्यवान्तरापूर्वाणां परमापूर्वाङ्गतया भावः तथापि स्वरूपनिष्पत्त्यर्थ एव वाङ्यमादिको धर्मः । न दीक्षणीयायामनुब्रूयादिति दीक्षणीयासंबद्धावान्तरापूर्वस्वरूपसंबन्धावगमात् । न च तेषां स्वरूपपरित्यागेनाङ्गाङ्गिभावलक्षणा युक्ता । लक्षणैव यतः, न च स्वरूपार्थत्वनानुमानम् । स्वरूपस्यैवानन्यगम्यसिद्धित्वात् । शब्दैकगम्यसिद्धिकं सर्वमपूर्वमवघातादीनां तु प्रमाणान्तरावसेयसिद्धीनां विनापि प्रोक्षणं स्वरूपसिद्धेः स्वरूपार्थत्वे ऽयुक्तं नियमनियोगस्यानुष्ठानम् । तदेवं स्वयमङ्गत्वाल्लब्धानुष्ठानेषु प्रयाजादिषु नाधिकारकल्पनावकाशः । तेनैव प्रकारेण प्रधानविषयेष्वप्युत्पत्तिनियोगेषु करणावान्तराभावो वेदितव्यः । यो हि तमवान्तरव्यापारं नाभ्युपगच्छति तस्य कारणभेदो न स्यात् । दर्शपूर्णमासादिषु तथाग्नेयादिधर्मा उपांशुयाजादिषु भवेयुः । परमापूर्वप्रयुक्तत्वात्तत्प्रतिसन्धानभावाविशेषात् । अवान्तरव्यापारभेदे तु युक्ता व्यवस्था । अन्यथा आग्नेयस्य करणता, अन्यथा उपांशुयाजादीनामिति । बृहद्रथन्तरयोः स्तुतिसाधनयोरपि अन्यथासाधनतेति धर्मव्यवस्था । तथापार्वणहोमयोरपि । अत एव विकृतिषु बाधः । नहि यथाग्नेयस्यापूर्वसाधनता तथा सौर्यस्येति प्रकृतद्वाराभावेन पार्वणहोमयोर्बाधः । ये च सन्त्यवान्तरापूर्वाणि न साधनरूपाणीत्याचक्षते । न तेषामवान्तरव्यापारतेति प्राचीनसकलदोषप्रसङ्गः । कार्योत्पत्तिनिमित्ताभावेन हि अवान्तर-

Digitized by Google

व्यापारता । अन्यथा आग्नेयादेरपि क्षुधितसमुत्थाप्यविलेखनवपनसस्याधिगमेवान्तरव्यापारतापत्तेः । नन्वेवमधिकारशून्यत्वे दीक्षणीयादिष्वतिदेशो न स्यात् । उच्यते । निरधिकाराणामपि कार्यत्वाविशेषादनिर्ज्ञातोपायत्वाच्च युक्तैव कथमित्याकाङ्क्षा । नन्वेवमङ्गीकृतमवान्तरप्रकरणम् । कर्तव्यस्य कथमित्याकाङ्क्षाप्रकरणमिति मीमांसकप्रसिद्धिः । नावान्तरप्रकरणं नाम प्रमाणमस्ति प्रमेयाभावे प्रमाणत्वानुपपत्तेः । यावदेव तान्यवान्तरापूर्वाणि नावगम्यन्ते तावदेव सर्वस्यारादुपकारकस्य पदार्थजातस्याविशेषेण प्रधानविधिपरिगृहीतत्वात् । पश्चात्तु सर्वेषामधिकारानुप्रवेशाविशेषादन्योन्यं तादर्थ्यमस्तीति नावान्तरप्रकरणविनियोज्यसंभवः । यानि तु वाक्यादिभिस्तेष्ववान्तरापूर्वाणि निवेशितानि तत्र प्रतिष्ठितानि न परमापूर्वं संक्रमिष्यन्ति । नन्वेवं प्रयाजादिषु सौमिकविध्यन्तप्रसङ्गः । नायं दोषः । यदि निरधिकाराणामपि साधिकाराणामिव स्वारसिकाकाङ्क्षा भवेत् । भवेदेवम् । अननुष्ठेयत्वाच्च स्वाभाविकीतिकर्तव्यताकाङ्क्षा । कथं पुनरकार्यता ऽननुष्ठेयता च । नूनं भवान् अश्रुतपूर्वः सप्रमादः विविक्तं हि तत्रेदं गुरुणा । यदेव हि पुरुषेण मयेदं कार्यमिति निरपेक्षमेवावगम्यते तदनुष्ठेयम् । यत्तु तत्सिद्ध्यर्थं प्रागसिद्धं सद्विनियुज्यते तत्कार्यम् । परमापूर्वं च निरपेक्षं कार्यमवगम्यते । कार्यावगमाद्धि फलावगतिः । न फलावगतेः कार्यतेति षष्ठाद्ये लक्षणम् । अतः सिद्धो ऽनुष्ठेयकार्यविवेकः । यदेव चानुष्ठेयं तत्रैव कथमित्याकाङ्क्षा न कार्यमात्रे । अवहीनस्तर्हि प्रयाजादीनामेव दीक्षणीयादिषु आकाङ्क्षापकृष्टेनातिदेशः । न सम्यगवगतं मतमस्माकं भवता । अयं हि नो राद्धान्तः । स्वारसिकीतिकर्तव्यताकाङ्क्षा निरधिकाराणां नास्ति । कारणान्तरसमुत्था तु नापन्हूयते । तत्र दीक्षणीयादिषु प्रयाजादिदर्शनेनेतिकर्तव्यताकाङ्क्षा कल्प्यते स्वरसतोऽप्याकाङ्क्षाशून्यस्य कारणान्तरोपनिपातनिबन्धनाकाङ्क्षा । यथा पटो भवतीति निराकाङ्क्षस्यापि पदद्वयस्य रक्तपटोच्चारणादुक्तं प्रत्याकाङ्क्षा, अन्यथा रक्तः पटो भवतीत्यनन्वयप्रसङ्गः । एवं प्रयाजादिषु न किंचिदाकाङ्क्षोत्थापने कारणान्तरमस्तीति न सौमिकधर्मातिदेशः । सिद्धश्च दीक्षणीयादिष्वैष्टिकविध्यन्तलाभः । ये त्वधिकृताधिकाराभ्युपगमेन साधिकारतामङ्गनियोगानामाहुः । तेषां प्रयाजादिषु रात्रिसत्रन्यायेनार्थवादिकफलकाम एवाधिकारी प्राप्नोति इति नाधिकृताधिकारसंभवः । स्यान्मतमितिकर्तव्यताकाङ्क्षा प्रधानविधेर्न परिपूर्यतइति । मा परिपूरि प्रयोजनं तु परिपूर्णम् । न प्रमाणम् अर्थवादपदानि प्रमाणांशोपनिपातीनि तेषां परोक्षा वृत्तिर्माभूदिति तत्प्रतिपाद्यफलकाम एवाधिकारी युक्तः । साधिकारविधिसंनिधिमात्रेण तु निरधिकाराणां प्रतीते तादर्थ्ये ऽधिकाराकाङ्क्षा नास्तीत्यर्थवादपदानि अर्थवादमात्रपर्यवसायीन्येव । तथा पयोव्रतं ब्राह्मणस्येत्यादिषु भोजनाय प्रवृत्तस्य द्रव्यार्जननियमवत्स्ववाक्येनैवाधिकारिणो लब्धत्वान्न प्रधानप्रवृत्तस्याधिकारकल्पना शक्यते कल्पयितुम् । अथ स्यानन्त्यं पयोव्रतादीनाममपद्यते । तथा नानृतं वदेदिति प्रकरणाधीतेपि विधीयमानक्रियाकर्तुरधिकारावगमाच्च प्रकरणानुप्रवेशसंभवः । तथा भिन्ने जुहोतीति निमित्तस्याधिकारिविशेषणत्वाद्विना निमित्तकल्पनादधिकारिविशेषणालाभाच्च होमस्य दर्शपूर्णमासाङ्गत्वलाभः । न चेदमिह साधनम् । भिन्नशब्दस्य यौगिकत्वात्प्रकृतिगामित्वे सति निमित्तवतोऽप्यधिकारोऽधिकृतस्याधिकार इति । प्रकरणे भिन्नस्य विनियोगात्तद्धि प्रकरणं संनिहितं यत्तत्र विनियुक्तम् । न च भिन्नस्य विनियोगोऽस्ति । अपि चाधिकाराकाङ्क्षायामधिकारे कल्पयितुमुपक्रान्ते किमित्यार्थेन संनिधानेनाधिकारः कल्प्यते वरं भवत्वनुषङ्गः साक्षाच्छ्रुतस्याधिकारपदस्य । प्रधानवाक्ये तु श्रुतेऽधिकारपदे प्रधानेन सहसंबन्धे सति संनिहितानामश्रुताधिकाराणां साधिकारैदमर्थ्येनान्वितानामधिकाराकाङ्क्षैव नास्तीति अनुषङ्गनिराकरणे मूलयुक्तिः । अभ्युच्चयमात्रं तु वरमनुषङ्गः । इतिकर्तव्यताकाङ्क्षापरिपूरणमेवेति । अपि च प्रत्येकं समिधो यजतीत्यादिषु प्रधानाधिकृतस्याधिकारावगमात्प्रत्येकमेव समिदादीनां प्रधानोपायभावात् प्रत्येकमितिकर्तव्यताभावः स्यात् । अवान्तरविधयो हि तदा स्वविषयाणामुपायभावं प्रकल्पयन्ति । करणावरुद्धे परमापूर्वे करणतासंभवात्करणोपकारजनकतयैवोपायभावकल्पनम् । ततश्चानपेक्ष्योपायभावमाश्रित्यैकस्यैव करणोपकारसंपादकत्वाद् विकल्पः समिदादीनां स्यादधिकारिविधिना तु तावत्तादर्थ्यमात्रग्रहणे तस्य तदन्वितस्यान्यथानुपपत्तेस्तादर्थ्यसिद्ध्यर्थं करणोपकारजनकता स्यात्तदा विकल्पे सति नित्यवदन्वयो नोपसंह्रियेत । मिलितानां तज्जनकताश्रयणे सर्वेषां तदन्वयोपसंहार इति न प्रत्येकमितिकर्तव्यताभावः । उपायोपेयभावे तु तादर्थ्येनान्वये सति वैकल्पिकत्वादुपायभावस्य तथैवान्वयोपीति युक्तम् । किं चाधिकृताधिकारेण सर्वेषु साधिकारेषु सत्सु प्रयाजादेरितिकर्तव्यताकाङ्क्षा स्वारसिकीति सौमिकधर्मातिदेशस्तेषु स्यात् । न च वाच्यं सत्यामप्याकाङ्क्षायामितरेतराश्रयतया न तेषु सौमिकधर्मातिदेशः, सोमो हि दीक्षणीयाभिरङ्गवान् दीक्षणीयादीन्यैष्टिकधर्मग्राहीणि, यदि चेष्टावपि प्रयाजादिषु सौमिकधर्माः प्रवर्तेरन् तदा स्फुटतरमितरेतराश्रयत्वमिति । तदिदं बालजनजल्पितम् । सोमे हि विनाप्यैष्टिकधर्मप्राप्त्या दीक्षणीयादिमात्रनिबन्धन एवोपकारः तथेष्टावपि सौमिक-

Digitized by Google

धर्मनिरपेक्ष एवोपकारः । यदि परमेतयोरङ्गनिबद्धयोरुपकारं गृह्णाति अत्र चोपकारक्लृप्तेरविशेषाच्च कश्चिद्दोषः । निरधिकारेष्वङ्गेषु न स्वारसिकीतिकर्तव्यताकाङ्क्षा । किं तु लिङ्गबलोत्थापनीयेति दर्शितमादौ । तेन लिङ्गरहितेषु नाकाङ्क्षोदय इति न प्रयाजादिषु सौमिकधर्मातिदेशः । के चिदाहुः यदि संनिधिसमाम्नातमात्रेण प्रकृताधिकारानुप्रवेशो न भवति तदा ज्योतिष्टोमप्रकरणे समाम्नातस्य षोडशिन उत्तरेऽहनि त्रिरात्रस्य गृह्यतइति वैकृतत्वमेव स्यात् । तदसत्, ग्रहणस्यावाच्यतया ग्राह्यमपेक्षणीयम्, तत्र प्रकृततया लोकतश्च स एव ग्राह्यत्वेनान्वयं याति स च ज्योतिष्टोमाधिकारसंबद्ध इति तदनुप्रवेशः, पश्चात्तु तस्य वाक्येन पुनर्द्विरात्रसंबन्ध इति नानुपपन्नं किंचित् । तदेवमारादुपकारकेषु प्रथमं तादर्थ्येनाधिकारनियोगं प्रत्यन्वितेषु साधिकारेण विधिनानुष्ठेयभूतेन करणोपकारे क्लृप्ते तं प्रति नाधिकारनियोगेन जनकत्वकल्पनम् । न च क्षणिकभावे तेषां परस्परं स्वरूपेणासंभवतां संभूयोपकारजनकता समापद्यते इति अवान्तरापूर्वाणि स्वीक्रियन्ते । एवमाश्रयिषु विनाप्यपूर्वेण द्रव्यदेवतासंस्कारमुखेन करणोपकारजननसिद्धिरिति नापूर्वसमाश्रयणे किं चन प्रमाणम् । किं च दृङ्मालायां न तव दृष्टम् । दर्शितं हि तत्रेदं चतुर्धा । तुर्यं न साक्षाद् द्रव्यदेवतोपकारो यागः किं तु स्वाङ्गभूतमन्त्राद्यंशमुखेन । न च योगेऽधिकारानुप्रविष्टे तयोस्तत्र विनियोगोपपत्तिः । न चापूर्वमन्तरेण यागस्याधिकारानुप्रवेश इति अवश्यमाश्रयणीयमवान्तरापूर्वम् । तेषां चादृष्टतया न प्रयोजनत्वम् । दृष्टतया च द्रव्यदेवतासंस्कार एव प्रयोजकः । तत्रापि द्रव्यदेवतासंस्कारयोर्द्रव्यप्रतिपत्तिरेव प्रयोजिका योगे द्रव्यस्य साक्षाद्व्यापारादिति मन्तव्यम् । द्रव्यस्य तु न श्रुतिविनियोगः । न क्वचिद्द्रव्यस्यद्वारं श्रुतिः समर्पयति । नन्वप्राकरणिकोपि द्रव्यस्य विनियोगः साक्षात्करणोपकारजनकत्वाभावात्तस्य लिङ्गेन समाख्यया स्थानेन भावार्थ एव जनकतया संबन्धः । गुणदेवतयोस्तु वाक्येन विनियोगः । नानाव्यापारत्वात्कारणानाम् । अङ्गसाधनतद्द्रव्योपादाने तदवच्छेदकतयाऽस्त्येव तयोरुपयोग इति न कारकतया विनियोगो विरुध्यते । या तु संख्या उत्पन्नकर्मसमवायीया एकादश प्रयाजान्यजतीति । उत्पन्नानां कर्मणां विधानासंभवात्कर्माश्रिता विधीयते । यद्यपि चोद्देश्यगतं विशेषणं वाक्यभेदभयेन विवक्षां नार्हतीति प्रयाजादीनां साहित्यमविवक्षितम्, तथापि तस्य पृथक्त्वनिवेशित्वाच्च प्रत्येकमभिसंबन्धः, किं तु समुदायेनैव । न चाभ्यासं विना तस्य प्रतिपत्तिरित्यर्थादभ्यासाश्रयणम् । प्राकृतक्रमानुग्रहाल्लब्धाधिकारविधौ च परिपूरणम् । यः पुनरुत्पद्यमानकर्मसमवेतः नासौ विधेयः, स हि विधीयमानानि कर्माण्यवच्छिनत्ति । न च तथा विधेयत्वसंभवः । बहुषु विहितेषु स प्रयोगेण परिलभ्यते एवेति न पृथग्विधेयत्वमवलम्बते । अविधेयभूतावपि तौ भावार्थावभिन्नश्च विधावुपकरोतीति स नान्वयी । यस्तु भिन्नप्रातिपदिकाभिधेयः सोऽरुणिमादिवच्च कर्मणि कारकतया विधीयते । यः पुनरयं विभक्त्यभिधेयः तस्य यद्यपि शक्त्या प्रातिपदिकार्थसंबन्धः तथापि तस्य तन्मात्रसंबन्धे प्रकरणसमाम्नानापादितो ग्रहसंबन्धो नोपपद्यतइति ग्राहकीयावस्थासंबन्धितैवोपादानिकीति निर्णीयते । विनियुक्तस्य पश्वादेरुपादानमनवच्छिन्नस्य न संभवतीत्यस्ति तदवच्छेदकभूतसंख्यापेक्षा संख्यायाश्च प्रतीतग्राहकान्वयनिर्वाहायाश्रयापेक्षेति तदवस्थासंनिधिता विधिः कल्पयति । उपादानलक्षणो विधिव्यापार आक्षेपापरपर्यायो मीमांसकैः प्रतिपन्नः । उत्पत्त्यधिकारनियोगप्रयोगविषयः प्रतिज्ञायते । तस्य च यथा प्रतीतविध्यनुपपत्तिरेव बीजम् । सोऽयं चरुं निर्वपेदित्यादौ साधिकारो विधिः प्रसङ्गत उत्पत्तिं विनानुपपद्यमान उत्पत्तिमाक्षिपति । नहि क्षणिकं यागमात्रमुत्पत्तिनियोगानपेक्षमधिकारसिद्धिसमर्थमिति बहुधोक्तं विश्वजिदादिष्वधिकारमन्तरेणानुष्ठानासंभवात्कार्यरूपस्य विधेरवगतस्यानुपपत्तिरधिकारकल्पनाबीजम् । संख्यान्वितश्चर्विध्यर्थः प्रतीतः तदन्वयोपपत्तये ग्राहकीयदशासंबन्धितामापादयति । निमित्त एवेति योऽधिकारे साध्यभूतो विधिरनुष्ठानापरनामा ऽलंकरणस्य प्रयोजनमाक्षिपति । कामाधिकारे तु कामसिद्धिस्तदायत्तत्वान्मानसी प्रवृत्तिः प्रागेव प्राप्तानुष्ठानप्रवृत्तावप्रतिहता निमित्ततास्तीति विधिरप्रयोजकः । उभयत्राङ्गेषु क्रतुरेव प्रयोजकः । क्रतूपकारद्वारत्वात्तेषाम् । यदेव हि यस्य कार्यं तदेव तस्य प्रयोजकम् । क्रतूपकारश्चाङ्गानां कार्यमतस्तदेवानुष्ठाननिमित्तं यच्च विधिना स्वसिद्ध्यर्थमाक्षिप्यते तद्विधेयमिति तत्त्वज्ञाः ॥

॥ शेषउत्तराङ्के ॥

॥ अथ बालभारतस्य ॥

॥ तृतीयः सर्गः ॥

धराधृतिद्वेषिहतिप्रतिष्ठिता-
वतारसंसारसमुद्भवश्रमः ।
शमामृते विश्रमधीर्विवेश यः
स पातु पाराशरविग्रहो हरिः ॥ १ ॥
कृती कुरुक्षेत्रगमाय विष्णुना
स्वयं प्रयाणाय कृताभिषेचनः ।

परोपरोधादधिरूढवानथो
रथं पृथाभूपृथिवीपुरंदर: ॥ २ ॥
वृकोदराद्या: सहसा महस्विन:
सहोदरास्तं परिवव्रिरे नृपम् ।
द्युहस्तिनो हस्तमिवासुहृद्गण-
च्छिदानिदानं रणपारदा रदा: ॥ ३ ॥
विराटपाण्ड्यद्रुपदादयो नृपा-
स्तमन्वगुर्धन्वविराजिभिर्भुजै: ।
विरोधिवीरध्वजिनीवधक्रुधा-
धिरोपितभ्रूविकटैरिवोत्कटा: ॥ ४ ॥
निजां निजां कीर्तिमिव द्युवाहिनी-
जलैर्मिलन्तीं शिशुसोमकोमलाम् ।
वितत्य केतुप्रचलाञ्चलच्छला-
च्चतुर्बलाङ्गीं भुजशालिनोऽमिलन् ॥ ५ ॥
शितिद्युति: संमदभासुरै: सुरै:
पुरश्चरोऽदर्शि सुदर्शनायुध: ।
द्विषद्वधध्यानमयो महश्चय-
श्चमूसमूहस्य गतो नु पिण्डताम् ॥ ६ ॥
तनोतु केनैष तुलां बलोच्चय:
परौघदाहेन च गौरवेण च ।
ययौ यदग्रेसरतां स वाडवो-
ऽर्णवोल्लसच्चक्रमुकुन्दकेतवात् ॥ ७ ॥
जिते प्रतापैरिव पृष्ठगे रवौ
स्वकुल्यहर्षादिव संमुखे विधौ ।
भयादिवापत्यजि राहुयोगिनी-
युगे गते दक्षिणवामपक्षयो: ॥ ८ ॥
अदक्षिणस्यां रथतोऽथ तत्त्वत-
स्तदोर्ध्वगं श्वासमवेक्ष्य विष्णुना ।
अवादि शङ्खश्च सुमङ्गलोत्सवा-
दचालि सूतेन रथश्च भूपते: ॥ ९ ॥
तदात्वसंपूजितहर्षितद्विज-
व्रजोरुवेदध्वननादवीचिभि: ।
प्रतिध्वनत्स्यन्दनकन्दरोदरो
दधौ यथार्थामभिधां त्रयीतनु: ॥ १० ॥

पटु: प्रयाणे पटहस्य निस्वन:
प्रविश्य कर्णद्वितयेषु दोष्मताम् ।
स निर्जगाम द्विगुणोदय: क्षणा-
न्मुखैकमार्गैर्मदशब्दकैतव: ॥ ११ ॥
धृतेभकुम्भस्तनयुग्मविभ्रमा
चमूर्भ्रमत्स्यन्दनचक्रकुण्डला ।
चचाल भूपं परितोऽनुरागिणी
प्रियेव पारिप्लवराजिलोचना ॥ १२ ॥
विलुप्तविश्वावयवा सुनागरै:
स्थितैरुपप्लव्यपुराट्टपङ्क्तिषु ।
नृपावलोकादनिमेषतां भृशं
भजद्भिरभ्राजि नभश्चरैरिव ॥ १३ ॥
समुत्पतद्भि: स्खलितैर्महांसयो-
र्मुहुर्महासौधवधूकरोज्झितै: ।
अराजि लाजै: सुकृतोज्ज्वले नृपे
वियच्चरैरामरचामरैरिव ॥ १४ ॥
ययौ प्रतोलीपथसंकटाकुल:
क्रमेण वप्रस्य बहिर्बलोच्चय: ।
महासर:पूर इवातिपूरण-
क्षतस्य सेतोर्बहुबाह्यविस्तर: ॥ १५ ॥
पुरोऽपि पश्चादपि विस्तृताकृति-
र्गताल्पतां गोपुरमध्यवर्त्मनि ।
विनि:सरन्ती रिपुजीवितापहा
चमूरियं शक्तिरिव व्यराजत ॥ १६ ॥
शमीव तत्त्वं परमन्तरुद्वहन्
युधिष्ठिरं धर्ममयं चमूचय: ।
अखण्डयन् पूस्तरुखण्डशाखिनां
शिखाग्रमप्येष शनै: शनैर्ययौ ॥ १७ ॥
उदित्वरैर्वप्रगिरिप्रतोलिका-
गुहाशतेभ्यो गुरुवाहिनीगणै: ।
अपूरि दूरादपि पूरविस्तृतै:
स भूरिभिर्भूविभुसैन्यसागर: ॥ १८ ॥
गतेऽक्षिमार्गान्नृपतावियं वियो-
गिनीव शून्यत्वमवाप किंचन ।

Digitized by Google

तदात्ववल्गावलरद्विलोकन-
प्रजामिषर्संपिशिरोंऽशुका पुरी ॥ १९ ॥
समुल्ललङ्घे निगमः क्रियानिति
प्रतिक्षणं ध्यानपरश्चमूभरः ।
विलोचने वक्रितकन्धरं पुरीं
प्रति प्रतेने च शनैश्चचाल च ॥ २० ॥
मिथोऽपि बिम्बद्विगुणां रदद्वयीं
मणिप्रणद्धां दधतो महोन्नताः ।
सुरासुरैरक्षुभिते बलाम्बुधौ
विलेसुरैरावतवन्मतङ्गजाः ॥ २१ ॥
विषाणिनां गर्जिभिरद्रिभेदिनां
बले चले तत्रसुराशु दिग्गजाः ।
भुजंगराजैककलोलमौलिम-
स्ततो विलोलः क्षितिगोलकोऽभवत् ॥ २२ ॥
अवाप्य सेकं करिणां मदोदकै-
र्महत्तरङ्गानपि कर्णवीजनैः ।
सुयोधनक्रूरचरित्रमूर्च्छिता
चिराद्धरा किंचिदचालयद्वपुः ॥ २३ ॥
मृतो मृतोऽसाविति भाषुके जने
गृहीतमात्मानमपायुधः सुधीः ।
गजेन शुण्डाङ्गुलिपर्वचर्वणा-
दमूमुचत् कोऽपि चमूचमत्कृतः ॥ २४ ॥
समेत्य पश्चान्निभृतं धृतः क्रुधा
गजेन विस्तीर्णकरेण संधृताम् ।
तदात्वकृष्टच्छुरिकाग्रधारया
विवर्ध्य बालान् द्रुतमच्छुटत् परः ॥ २५ ॥
महाबलः कोऽपि करं करेणुना
धृतं करेणान्यकरादमोचयत् ।
स तेन गाढग्रहतो धृते करे
वराक एवैककरः करोतु किम् ॥ २६ ॥
समेतमासन्नमिभं विभीः परः
पुरो वलन् दक्षिणगात्रलीलया ।
पटेन शुण्डां परिमृज्य संभ्रम-
न्नविभ्रमन्नेककसीम्नि चाङ्किकः ॥ २७ ॥

न यावदुर्वी करिभारमङ्कुरा
प्रयाति दर्वीकरमन्दिरोदरम् ।
खुरक्षतोद्धूतरजश्छलया लघु
वितेनिरे तावदमूं चमूहयाः ॥ २८ ॥
स्थली पयोधिर्जलधिर्वसुंधरा
भविष्यतीति त्रिदशेष्वभूत् कथा ।
स्फुरत्तुरंगप्रकरक्रमाहति-
क्षणोच्छलद्धूलिभरावलोकनः ॥ २९ ॥
हरिः परस्पर्धिनि वर्धितोद्यम-
स्तुरंगमे धावति वेगदुर्धरः ।
अनष्टमूर्ध्वं पुरुषं पुरः परो
व्यलङ्घतापीडितमेव फालया ॥ ३० ॥
परो हरिः कूपमपह्नुतं तृणै-
रलङ्घ्यमुल्लङ्घ्य विशालफालया ।
व्यथां न लेभे कशयापि ताडितो
हृदि स्तुवन् धैर्यगुणं तुरंगिणः ॥ ३१ ॥
उदञ्चितैकक्रमलीलया त्रिभिः
पदैस्तथा कोऽपि हयो गतिं व्यधात् ।
यथाभवच्चेतसि चित्रकारिणा-
मपि क्षणं चित्रकृतो चमत्कृतिः ॥ ३२ ॥
समं मया धावथ यूयमित्यहो
भृशं दृशः कौतुकिनां विलोकिनाम् ।
विलुप्य पश्चात्पदधूतधूलिभि-
र्हरिः परोऽधावत वाजिजित्वरः ॥ ३३ ॥
हरिर्निषिद्धोऽप्यपराश्ववर्जित-
स्त्वरामभुञ्जन्नहि यः स तस्थिवान् ।
प्रतापिनः पादकरान्तरस्फुर-
त्पदस्य पीडां निदधत् तुरंगिणः ॥ ३४ ॥
विवर्धितस्पर्धमहो महानिधौ
समं चलन्तौ त्वरया परौ हरी ।
पताकिनीलोलदृशो दृशोर्भृशं
समानतामापतुरग्रतो गतौ ॥ ३५ ॥
जितेऽपि वेगादितरे तुरंगमे
न कोऽपि तत्याज रयं स्वयं हयः ।

Digitized by Google

निजं तनुच्छायमवेक्ष्य च क्षितौ
निशम्य पादध्वनितं च दुर्धरः ॥ ३६ ॥

हयाङ्घ्रिकुट्टालकखातखातस्थलो-
च्छलद्रजःपूर्णततेषु वर्त्मसु ।
अलब्धनेमिस्खलना मनागपि
प्रससुरभ्रान्ततुरंगमं रथाः ॥ ३७ ॥

रथाङ्गरेखानिवहैर्महीं रथा
विभूषयन्तो नवहारहारिभिः ।
दिशां दिशन्तस्तिलकानिव ध्वजा-
ञ्चलैः किलातन्वत कामचारिताम् ॥ ३८ ॥

शरप्रबाणेन विभिद्य दूरतः
पतन्ति पक्वानि फलानि भूरुहाम् ।
अधो गतः कोऽपि रथाश्ववेगतो
रथी करेणेव सहेलमग्रहीत् ॥ ३९ ॥

परो रथं सारथिरन्यसारथे-
र्जयाय संतर्ज्य धुरीणवाजिनः ।
जवेन योक्त्रेत्रुटितेऽपि धीधनोऽ-
ध्यिरुह्य वंशान्नितरामदुद्रुवत् ॥ ४० ॥

च्युतेऽपि चक्रे चिरमेकपक्षत-
स्तदक्षमुत्तीर्य करेण धारयन् ।
मरुत्त्वराङ्घ्रिस्त्वरयन् रथे हयान्
जिगाय यन्तापरसारथिं परः ॥ ४१ ॥

महाबलः कश्चन सारथिः पथि
स्थितेषु खिन्नेषु निजेषु वाजिषु ।
जवेन यान्तं प्रतिवादिनो रथं
करेण धृत्वेव हठादतिष्ठिपत् ॥ ४२ ॥

परः समीरत्वरया समीरयन्
हयान् नियन्ता जितवांश्च वादिनः ।
ररक्ष चासन्नलताशिखाततेः
पतिं चलत्प्राजनवेगलीलया ॥ ४३ ॥

चरिष्णुचक्रारगृहीतचीवर-
प्रपातिनः कृष्टतनोर्ध्वनिं प्रभोः ।
उदारचीत्कारभरैरकर्णय-
न्नबोधि कोऽप्यन्यजनेन सारथिः ॥ ४४ ॥

महारथो कोऽपि च कोपहुंकृति-
प्रवादरौद्रो रथसंकटे पथि ।
युधे धृतासी चटुलो चटूक्तिभिः
प्रविश्य मध्यं प्रभुरभ्यचारयत् ॥ ४५ ॥

पुरः प्रचेलुश्चतुरं तुरंगम-
त्वरापरिभ्रान्तपदाः पदातयः ।
रथा इवोन्नम्रभुजदण्डमण्डली-
भवत्पताकायितखड्गवल्लयः ॥ ४६ ॥

समुत्पतन्तोऽधिकमुन्नकैः समु-
ल्लसत्कृपाणद्युतिहृद्यपाणयः ।
बभुर्भटाः स्वप्रभुकीर्तिविस्तृति-
प्रवृत्तये कृत्तविपल्लवा इव ॥ ४७ ॥

विचित्रचारीकुसबर्बरं स्फुर-
त्स्फुटस्वनाः शून्यभिदोऽसिखेलया ।
मुहुर्नदन्तो मदविभ्रमाद्वजी-
गणांस्तृणाभं चिजयत् पदातयः ॥ ४८ ॥

भयं दधानो हृदि चिष्टपत्रय-
व्ययप्रगल्भोऽपि लुलायलाञ्छनः ।
रणे सहायीभवितुं भुजाभृता-
मसिच्छलो दक्षिणपाणिमग्रहीत् ॥ ४९ ॥

स्फरापदेशात् कलितैककुण्डलो
विनीलवासाः कटिशस्त्रिकांशुभिः ।
अनन्ततां पत्तिचयो ययावसि-
च्छलेन कर्षन् यमुनां समन्ततः ॥ ५० ॥

उदस्य कोऽप्याशु समं मुहुर्मुहुः
करेण वामेन च दक्षिणेन च ।
स्फरं च खड्गं च दधद्विपर्यया-
न्महत्त्वमभ्यासकृतां कृती ललौ ॥ ५१ ॥

उपेत्य पश्चान्मृततातभृत्यकः
कृताद्भुतध्यानपरेण कौतुकात् ।
परेण बालः सहसापि तापित-
श्चलन् धृतासिर्नै भटानतचपत् ॥ ५२ ॥

उदस्य कुन्तं दिवि कोऽपि लीलया
सकौतुकैः सैन्यजनैर्विलोकितः ।

चमः समुत्पत्य रयेण पाणिना
तमूर्ध्वमेव प्रसरन्तमग्रहीत् ॥ ५३ ॥

जनौघमाक्षिप्य पुरश्चरं भटः
स्फुटं परिक्षिप्य रयेण कुन्तकम् ।
परेण निर्मुक्तमिवाग्रतोऽग्रतः
करेऽग्रहीत् कश्चन वञ्चयन् मुखम् ॥ ५४ ॥

इति स्फुरत्कृत्स्नचमूसमुत्थिते
रजोभिराच्छादितभानुभानुभिः ।
कृतप्रयाणे जयभाजि राजनि
व्यराजदेकातपवारणं जगत् ॥ ५५ ॥

अवाप्य दैन्यं खलु सैन्यभारत-
श्चिरान्निरस्ता फणिकूर्मशूकरैः ।
महीयसां मूर्ध्नि मही महीभृतां
समारुरोह च्छलतो रजस्ततेः ॥ ५६ ॥

तटेषु खातेषु तुरंगरङ्गणै-
रुपर्युपेतेषु रजश्चयेषु च ।
स्फुटीभवन्मूलविवृद्धमौलयो
गणा गिरीणां त्रिगुणोन्नता भुव[1]: ॥ ५७ ॥

बलाभिषङ्गादधिकाधिकोत्थिते
रजोभिरुच्चैर्दिवि सान्द्रतां गतैः ।
रवेरवष्टब्धखुरास्तुरंगमा-
श्चिरं महीचारसुखं सिषेविरे ५८ ॥

प्रपूरितानां परितो बलोद्धुतै
रजोभिरास्कन्धतलं महीरुहाम् ।
समुन्नतानामपि पाणिलीलया
फलान्यगृह्णादपि वामनो जनः ॥ ५९ ॥

विधेः कृतं क्वापि न जायतेऽन्यथा
तथाहि शून्यं गतयापि रेणुभिः ।
विभावरीवासररत्नगर्भया
न किं भुवाभूयत रत्नगर्भया ॥ ६० ॥

इलातले पङ्किलतां प्रपेदुषि
प्रभिन्नकुम्भीन्द्रमदाम्भसां भरैः ।
अधारयद्वृष्टिनिवृत्तनीरद-
प्रभां नभोऽन्तः प्रथमोत्थितं रजः ॥ ६१ ॥

नभःसरित्केतनभासुरे शिरः-
सुवर्णकुम्भायितभानुमण्डले ।
सुखं लसन्ती पृतनेह जङ्गमे
नृपस्य धाम्नीव रजस्यराजत ॥ ६२ ॥

रथं नयन् वर्त्म विनीतवाजिनं
भुजिष्यभग्नस्थपुटं शनैः शनैः ।
जगाद यन्ता कुतुकस्पृशा दृशा
निरूपयन्तं नृपतिं पताकिनीम् ॥ ६३ ॥

अधीश पश्याश्व हयेऽनुपातिनि
द्रुतं भिया वक्रितकन्धरा वधूः ।
व्यधाद्विलोलं नयनं तथा यथा
स्थिरो ह्रियेवायमभूत् समीपगः ॥ ६४ ॥

अयं मयस्यानुयतः स्वनं घनं
निशम्य कोपाद्द्रवले मृगद्विपः ।
निरीक्ष्य तद्वर्तिवधूकुचद्वयं
प्रतीभकुम्भभ्रमतो भियात्रसत् ॥ ६५ ॥

तरोस्तलेऽसौ खिदया निषेदिवान्
नृपस्य वाचा प्रथमं समुत्थितः ।
तमप्यनालोच्य सखायमग्रतोऽ-
त्रसन्निरीक्ष्यागतमुन्मदं गजम् ॥ ६६ ॥

न हत्यया हन्त कदापि गृह्यते
करी परं पापशिखा निषादिनाम् ।
इति प्रलापेषु जनस्य दन्तिना
व्यमोचि नारीयमनेन सादिता ॥ ६७ ॥

पुरो मुखस्य भ्रमयन् शिखां तरोः
प्रकोपयन् कोऽपि गजं कुतूहली ।
उदस्तहस्तं परिवञ्च्य यात्यसौ
चतुष्पदाभ्यन्तरवर्त्मना मुहुः । ६८ ॥

विलङ्घ्य लङ्घी त्वरया रथोच्चयं
गतोऽग्रतोऽस्मीत्ययमुद्धुरो मदात् ।
पुरःकरिश्वासवलन्मयद्वयः
महासभांराविणमीक्षितो बलैः ॥ ६९ ॥

1 बभुः इति पा० ।

अवेत्य मार्गं शकटातिसंकटं
रथी पथीह स्थपुटे प्रयात्ययम् ।
परिस्खलच्चक्रविलोलवल्लभा-
मुहुःपरिष्वङ्गसुखाभिलाषुकः ॥ ७० ॥

अयं दवीयःपदवीगतामिभी-
मिभभ्रमात् तूर्णमुपेत्य कोपनः ।
अमूं विनिश्चित्य ततः स्पृशत्यहो
मुहुर्महेभस्तनहस्तलीलया ॥ ७१ ॥

अवाप्रजन्मा जननीवधादसौ
ततः कृतोच्चैर्बहुभारवाहकः ।
शुचा खराश्वो निजपूर्वपक्षको
निरीक्ष्य तुल्यध्वनि रौति वेसरः ॥ ७२ ॥

इति प्रसक्तिप्रसराध्यया चमूं
दृशाभिषिञ्चन्निव धर्मनन्दनः ।
पदे पदे संमिलितैः कुतूहला-
दलोकि लोकैः शनथापि वीक्षितः ॥ ७३ ॥

द्विपेन्द्रदानोदकनिर्भरच्छटा-
भिषेकसान्द्रोभयपक्षधान्यया ।
अचल्यत ग्रामतटेषु सेनया
निरन्तरक्षेत्रविशङ्कटे पथि ॥ ७४ ॥

अमी महान्तः किरयो बृहत्त्वरा
मृगास्तथैते प्रसभेन रक्षितुम् ।
अहो क्व शक्या इति भीतविस्मितै-
र्गजाश्वमालोक्यत वप्रगोपकैः ॥ ७५ ॥

अपि श्रियं भूमिरभूषितोज्ज्वला
विलोकयन् शालिषु गोपबालिकाः ।
स्वकामकेलीविशदाय केशवो
न शैशवाय स्पृहयांबभूव किम् ॥ ७६ ॥

इदं किमेतत् किमिति स्त्रियं तथा
शिशो मुहुः पृच्छति दन्तिवाजिकम् ।
कृताक्षमूल्याकुलितः किलाविदन्
ददौ जरद्ग्रामटिकोऽपि नोत्तरम् ॥ ७७ ॥

इतीक्ष्यमाणाः क्षणकौतुकोल्लस-
द्विलोचनैर्ग्रामनिवासिभिर्जनैः ।
चमूचयः काननभूषु भूषणी-
बभूव विस्तारमहीदिदृक्षया ॥ ७८ ॥

पुरः शिशूनां गललम्बिनां कपि-
स्त्रियः परिभ्रम्य तृणं यदत्यजन् ।
तदङ्गनानां कटकोचितीभृता-
मपुच्छिणीनां हृदि शल्यतामधात् ॥ ७९ ॥

सुखं गतायाः शयनं सुलम्पटा
विघट्य सिंह्यास्तनतः स्तनंधयाः ।
गजेष्वधावंश्च मुहुर्भटार्भके-
र्मुदा व्यमुच्यन्त च मातुरन्तिके ॥ ८० ॥

फलं करेणाग्रमना मुहुर्मयं
निनाय चूतं रवणाधिरोहणः ।
मयस्तु निम्बाय मुहुर्गतः कुतः
क्रियैक्यमन्योन्यमनोऽभिलाषयोः ॥ ८१ ॥

हयोच्चयोद्धूतरजःपरंपरा-
विलुप्तवैषम्यसुखाधिरोहणाः ।
पथि प्रथीयःस्थललीलया रयाद्-
बलावलीभिर्गिरयो ललङ्घिरे ॥ ८२ ॥

विलङ्घ्य कुल्याममुकां पुरोऽमुके
क्रमेण गन्तव्यमिति श्रुते पथि ।
पुरः पुराणैव बलैर्निदध्यिरे
न सिन्धवो धूलिततिस्थलीकृताः ॥ ८३ ॥

पुरामुपान्तेषु तुरंगमक्रम-
प्रपातखातेषु निखातसंपदः ।
चमूचरैश्चञ्चलया ललोकिरे
दृशा रजोदर्शननिर्विशेषया ॥ ८४ ॥

पुरः स्त्रिया सैन्यलसद्दृशा रसा-
द्युवा निषादी सकटाक्षमीक्षितः ।
व्यधात् परीरम्भमिभेन्द्रकुम्भयोः
स तद्गताक्षः पुलकान्यधत्त सा ॥ ८५ ॥

युवा तुरंगी लसदङ्गचङ्गिमा
तुरंगमं चारुगतानि कारयन् ।
पुरः पुरस्त्रीभिरदर्शि सस्पृहं
परस्परेर्ष्याकलुषेण चेतसा ॥ ८६ ॥

---

१ पुंयोगविवक्षायामनुक्रीमिन्यपि पा० ।

उदारशृङ्गारभृतां पदे पदे
विलोकिनीनां पुरयोषितां पुरः ।
समुन्नतायां भवि नम्रलोचनो
मिथः स्खलन्मन्दपदं ययौ जनः ॥ ८७ ॥

इति ग्रामारण्यक्षितिधरसरित्पत्तनततीर्विलङ्घ्य प्रस्थानैः कतिभिरपि धर्मस्य तनयः ।
स्वयं स्थाने स्थाने मिलदतुलवीरौघकटकः
कुरुक्षेत्रोपान्ते द्रुहिणदुहितुस्तीरमगमत् ॥ ८८ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के उद्योगपर्वणि प्रयाणवर्णनो नाम तृतीयः सर्गः ॥ ३ ॥ :: :: ॥

॥ अथ बालभारतस्य ॥

॥ चतुर्थः सर्गः ॥

अमृतवृष्टिरिवाजनि हृष्टिदा
जगति यस्य पुराणपरंपरा ।
भवदवार्तिभिदे जलदद्युतिने किमिवास्तु स सत्यवतीसुतः ॥ १ ॥

लसदनेकपयोधवलप्रभा
बहुलपक्षरथा पृथुवाहभृत् ।
अथ चमूः क्षितिपस्य सरस्वतीमनुससार निवासविधित्सया ॥ २ ॥

गतिजितः पवनो निजकिङ्करीकृत इवाम्बुलवाम्बुजगन्धभृत् ।
अभि चमूं प्रहितः सरिता तया
सुकृतनन्दनसत्कृतिकर्मणि ॥ ३ ॥

अथ विजित्य तनूषु चमूभृतां
सपदि घर्मजवारिलवव्रजम् ।
भ्रमरः पवनः स्म सरस्वतीजलकणप्रकरं प्रति तिष्ठति ॥ ४ ॥

नलिनरेणुलवैः कनकद्युतिः
भ्रमरसौरभषट्पदगीतिभाक् ।
मधुरशीतगुणाम्बुकणैः सरिन्महदभूद्दयितो बलयोषिताम् ॥ ५ ॥

अपि सरित्परिरम्भभवन्नवोदकलवं परिरभ्य समीरणम् ।
अजनि मीलितदृग्यदियं चमूस्तदबला खलु कामिलकामिनी ॥ ६ ॥

मृदुसमीरविलासविकम्पिनीं
कुसुमसात्त्विकवारिकणैर्वृताम् ।
अभजदाशु रसेन सरस्वतीतटवनीमवनीशचमूचयः ॥ ० ॥

जलनिधौ निहितो वडवानलः
पविमचिक्षिपदेव मदाय नः ।
इति विरञ्चिसुतां परितो बलच्छलकुलाद्रिकुलानि सिषेविरे ॥ ८ ॥

अविदितोत्सृतिरोपणकं नृपैः
कथमपि द्युपथेन किलागतम् ।
समवलोकि यथाक्रमरोपितं
कुतुकिभिः स्थलमण्डलमण्डपः ॥ ९ ॥

सुकृतसूनुनिकेतचलध्वजाञ्चलभुजा कथितेष्विव वेश्मसु ।
विनिहितेषु यथाक्रममक्रमान्निजनिजेषु ययुर्जगतीभुजः ॥ १० ॥

कमपि सारथिरात्मनृपालयं
पथिषु पृच्छति यावदधिभ्रमः ।
निजगृहाङ्गणमेव रथो हयैः
सपदि तावदनायि गतभ्रमैः ॥ ११ ॥

गजतुरंगवरंचयपीठिकावलयिमूलभुवः स्थलसंचयाः ।
रुरुचिरे परितो नृपसेविताः
सुरगृहा इव दिग्विजयश्रियाम् ॥ १२ ॥

शिरसि ताडकृतोऽपि निषादिनः
समधिरोपयति स्म यथा नमन् ।
इह तथैव रयादुदतीतरत्
करिपतिर्महतां चरितं नुमः ॥ १३ ॥

स्फुरितमापि सपल्ययनो हयः
पथि यथा न निरस्तभरस्तथा ।

सहजसौम्यभृतो हि पराक्रमे
सति महांसि वहन्ति मनस्विन: ॥ १४ ॥
स्थिरपदा निजसारथिसंश्रया
रथिनि पार्श्वगते रथवाजिन:
बहुमहीगमनेऽप्यखिदस्तदा
प्रथमयुक्तमिव स्वमबोधिषु: ॥ १५ ॥
समधिरोहति यन्त्रभरे यथा
रथभरं रथगा विधुरं व्यधु: ।
अवतरत्यपि हन्त तथैव ते
क्क मतिरूर्ध्वमुस्य खलूचिता ॥ १६
पुलकिभिर्मुकुलायितलोचना:
सरभसं कुचमूलमिलद्भुजे: ।
गलविलम्बिकुचद्वितया हयात्
प्रियतमैरुदतारिषत प्रिया: ॥ १७ ॥
वितिरगृह्यत सत्यमसौ युधे
तदिह नच सतामुचिता हति: ।
इति विचार्य भटैर्न मृगादयो
ववधिरे विधुराश्चपलायिन: ॥ १८ ॥
पटमयानि वितत्य निकेतना-
न्यभिपतज्जनसत्कृतितत्परा: ।
रुरुचिरे वणिजो गणिका इवो-
तरलकङ्कणकुण्डलसद्रुच: ॥ १९ ॥
कणजलेन्धनवह्निजिघृक्षया
परिजने निखिलेऽपि गतेऽभित: ।
वसनवेश्मसु संमदमद्भुतं
वणमधु: पतयो दयितासखा: ॥ २० ॥
पतितसैन्यरज:पटलं पटू-
भवति यावदुदात्तदिवाकरम् ।
सपदि तावदिदं पिहितं बहू-
दितमहानसधूमचयैर्वियत् ॥ २१ ॥
विधिसुताम्भसि सत्तरलं मलं
दलयितुं बहिरेव चमूचरा: ।
मुमुचुरान्तरमप्यहह स्पृहा-
धिकृदमेव हि सुप्रभुसेवनम् ॥ २२ ॥

सुमधुरं शिशिरं रसयन् पयो
जनचयो मनसा समचिन्तयत् ।
सरिति वारिधिवज्जलभूरितां
कलशयोनिवदात्मनि शक्तिताम् ॥ २३ ॥
तरलहस्तमहालहरीभरो-
च्छलितशीकरहृद्गनभा ध्वनन् ।
तनुरुचेव तमांसि सृजन् धुनी-
मभिससार गजव्रजवारिधि: ॥ २४ ॥
प्रतिशरीरभृत: कति नो वन-
द्विपकपोलकषैर्मदगन्धिता: ।
स्रुतहरिद्गिरिहरिध्वनित: क्रुधा
मदकल: करटी बिभिदे तटी: ॥ २५ ॥
पथिजखेदवशोऽपि करी तरुं
प्रहृतवान् वनदन्तिमदक्रुधा ।
अहह साहसिकस्य शिरस्यत:
कुसुमवृष्टिरमुष्य दिवोऽपतत् ॥ २६ ॥
दलितमौक्तिककान्तिनि सैकते
करिकुलस्य बभौ पदपद्धति: ।
सुकृतसूनुयश:समतार्थिनी
शशिघटानुसृतेव सरस्वतीम् ॥ २७ ॥
करिघटामवलोक्य घनभ्रमा-
द्वयभृतेरथवा गतिनिर्जितै: ।
सुकृतसूनुयशोजलपल्वलं
वियदभाजि सरिद्वरटावरै: ॥ २८ ॥
विविशुरम्भसि भूधरडिम्भका:
स्फुरितपक्षतया हरिभीरव: ।
प्रचलकर्णदलद्विपमण्डल-
च्छलभृतो विगलन्मदनिर्झरा: ॥ २९ ।
स्फुटतरायकर: परितोऽम्भसि
ब्रुडितवानुदमज्जदथ द्विप: ।
धुतमुख: कृतचीत्कृतिरम्बुज-
भ्रमपतन्मधुपाकुलपुष्कर: ॥ ३० ॥
उदयदान्तरशैत्यगुणो पर-
स्परभवत्परिरम्भविजृम्भणे: ।

१—ऽपि इति पा० ।

वरसरित्करिणो परितः परां
मुमुचतुः परितापपरंपराम् ॥ ३१ ॥

मधुपगीतगुणानि जलस्य य-
ज्वलरुहाणि जहार महागजः ।
तदिदमप्यहरन्मुहुरूर्मिभि-
र्मदममुष्य विसृत्वरसौरभम् ॥ ३२ ॥

तिमिविलोलदृशः सरितो मदै-
र्मृगमदैरिव पत्त्रलतातनिम् ।
विकटकुम्भयुगप्रतिबिम्बन-
स्तनतटीषु ततान मतङ्गजः ॥ ३३ ॥

उदितबुद्बुदवृन्दभृशस्विदं
बहु विलस्य नदीं नलिनाननाम् ।
पुनरुदित्वरदानवशेर्वृतः
सहचरैरलिभिर्निरगाद्दिभः ॥ ३४ ॥

गजगणे गतवत्यथ तत्क्षणा-
दभिगतासु कुतोऽपि सखीष्विव ।
अकथयद्दुरटासु नदी मदा-
विलजलालिरवैरिभविभ्रमान् ॥ ३५ ॥

तरुतलेषु निषण्णमथो पथो
गमनखिन्नमशक्तमितो गतौ ।
जनमपास्य विनिश्वसदाननं
द्विरदराजिरवध्यत सादिभिः ॥ ३६ ॥

कुसुमसंचयवृष्टमधुच्छटा-
सुरभिपृष्ठनिविष्टषडङ्घ्रिभिः ।
कुथवृतैरिव मुक्तकुथैरपि
द्रुमतलेषु तदा करिभिर्बभे ॥ ३७ ॥

तदलसंहतितो जलवर्षणं
तलममुष्य भजेदिति मूलगैः ।
जलधरैरिव मुक्तमदाम्बुभि-
र्भृशमिभैः समसिञ्चि तरुव्रजः ॥ ३८ ॥

सुखनिमीलितदृग्रसनाशिखा-
मिलिततालुविघूर्णितविग्रहम् ।
पदमतन्यत शाखिषु योगिवत्
करिभिराहृतपिण्डनिरादरैः ॥ ३९ ॥

क्षुधितमप्यलसं परिचारकाः
करधृतैः कवलैर्घृतपङ्किलैः ।
विदधतः परितः परिताडनं
चटु च डिम्भमिवेभमभोजयन् ॥ ४० ॥

गजघटागतिकुट्टमितं खुरैः
स्थपुटतामनयन् पुलिनं हयाः ।
अपि महद्भिरतीव समीकृतं
विषमयन्तितरां तरला न किम् ॥ ४१ ॥

नखविलासजुषः कृतशिञ्जन-
श्वसितलोलरजःकणकम्पिनीम् ।
सरभसं परिवेल्लनकैतवा-
द्वसुमतीं हरयः परिरेभिरे ॥ ४२ ॥

विपरिवर्तरयोर्ध्वमुखाङ्घ्रयः
क्षणमतिप्रचलत्वभृतो हयाः ।
स्फटिककुट्टिमकान्तिनि सैकते
रवितुरंगमबिम्बनिभा बभुः ॥ ४३ ॥

चिररजोलुठनैर्मलिनं श्रियः
सुतमपि द्रुतमङ्कमुपागतम् ।
स्वयमसिन्नपदेव सरस्वती
स्व इव भाति परोऽपि सतां श्रितः ॥ ४४ ॥

अपि तनूषु न भेदमदीदृशन्
मधुरधीरगभीरमधुध्वनिम् ।
चपलतैकपराः परिरेभिरे
लहरयो हरयोऽपि परस्परम् ॥ ४५ ॥

अवतरन्तममुं सरितो हरि-
प्रकरमाशुविलङ्घितरोधसम् ।
लहरिपूरमिवैक्षत दूरत-
श्चलितमुच्चमियं चकिता चमूः ॥ ४६ ॥

पुरुषमानपटूकृतकीलक-
व्यतिकरग्रथिताजिनवल्लिषु ।
करयुगान्तरिता परितो हया-
वलिरवध्यत वल्लवपालकैः ॥ ४७ ॥

प्रमदनादभृतां परिवल्गता-
मित इतोऽपि खुरैः खनतां क्षितिम् ।

तृणमुखां वदनेष्वथ वाजिनां
सपदि खाद्यमबाध्यत किङ्करैः ॥ ४८
अविरलोच्चदलोच्चयखादने-
मेयगणः क्षणतो धरणीरुहाम् ।
असृजदादिशिरोऽवयवोत्सवा-
निव स गीतिषु दिक्षु खगारवैः ॥ ४९ ॥
जीवः क्व एष किमु नाम विलोकतेऽसा-
वुत्कन्धरः प्रकुपितः पटुदीर्घदन्तः ।
एवं विलोक्य रवणं वनमेदिनीषु
दूरं पलायत भयादिभसूदनोऽपि ॥ ५० ॥
शीकरार्द्रतृणाच्छद्मस्वेदरोमाञ्चकञ्चुकम् ।
प्रहर्षो वृषभं चुम्बन् नदीतीरभुवं युवा ॥ ५१ ॥
स्वस्मै यदाज्जनितमशनं तेन तेनातिखिन्नान्
पश्चात् पश्चादभिगतवतो भोजयामासुराशु ।
आसंध्यं ये स्वयमविदितचुन्नराः सत्त्वधीरा-
स्तेषां धीराकृति यश इव प्रोदगादिन्दुरोचिः ॥ ५२ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के उद्योगपर्वणि निवासनिवेशो नाम चतुर्थः सर्गः ॥ ४ ॥ :: :: ॥

॥ श्रीः ॥

अथ खण्डप्रशस्तौ ।

रामावतारवर्णनम् ॥

(५१) कल्याणानां निधानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥

रामनाम भवतां भूतये लक्ष्म्यै प्रभवतु समर्थीभवतु, किंविशिष्टं रामनाम, कल्याणानां शुभानां निधानं निधिः, पुनः किंविशिष्टम्, कलिमलमथनं कलेः कलियुगस्य मलं पापं मथ्नातीति तत्, पुनः किंभूतम्, पावनानां पवित्राणां मध्ये पावनं पवित्रम्, पुनर्यन्नाम मुमुक्षोर्मोक्षमिच्छोर्मुनेः पाथेयं शम्बलम्, किंविशिष्टस्य मुमुक्षोः, सपदि शीघ्रं परपदप्राप्तये मोक्षप्राप्त्यै प्रस्थितस्य प्रवृत्तस्य, पुनः किंभूतम्, सज्जनानां जीवनं प्राणनम्, पुनः किंभूतम्, धर्मद्रुमस्य पुण्यवृक्षस्य बीजं हेतुरिति ॥ ५१ ॥

(५२) उत्फुल्लामलकोमलोत्पलदलश्यामाय रामामनः-
कामाय प्रथमाननिर्मलगुणग्रामाय रामात्मने ।
योगारूढमुनीन्द्रमानससरोहंसाय संसारवि-
ध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥

तस्मै रामात्मने रामस्वरूपाय पुंसे परमपुरुषाय नमः, किंविशिष्टाय तस्मै, उत्फुल्लामलकोमलोत्पलदलश्यामाय उत्फुल्लानि विकस्वराण्यमलानि निर्मलानि कोमलानि यान्युत्पलानां दलानि पत्राणि तद्वच्छ्यामः कृष्णस्तस्मै, पुनः किंविशिष्टाय, रामामनःकामाय रामाणां रमणीनां यानि मनांसि तेषां कामोऽभिलाषो यस्मिन्स तस्मै, यद्वा रामाणां मनसि काम इव कन्दर्प इव यस्तस्मै, पुनः किंविशिष्टाय, प्रथमाननिर्मलगुणग्रामाय प्रथमानो विस्तरन्निर्मलो गुणग्रामो धैर्यौदार्यादिगुणसमूहो यस्य स तस्मै, ग्रामशब्दः समूहार्थकः कोशादौ प्रसिद्धः, पुनः किंविशिष्टाय, योगारूढमुनीन्द्रमानससरोहंसाय योगारूढा अष्टाङ्गयोगसाधनावस्थां प्राप्ता ये मुनीन्द्रास्तेषां मानससरसि हंस इव हंसो यस्तस्मै, पुनः किंविशिष्टाय, संसारविध्वंसाय संसारस्य जगतो विध्वंसो नाशो यस्मात्स तस्मै, पुनः किंविशिष्टाय, स्फुरदोजसे स्फुरदोजः पराक्रमो यस्य स तस्मै, पुनः किंविशिष्टाय, रघुकुलोत्तंसाय रघोः कुलेऽन्वये उत्तंस इव शेखर इव यस्तस्मै ॥ ५२ ॥

(५३) ये मज्जन्ति निमज्जयन्ति च परांस्ते प्रस्तरा दुस्तरे
वार्धौ वीर तरन्ति वानरभटान् संतारयन्तेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः
श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ॥

ये प्रस्तरा ग्रावाणः स्वयं गुरुत्वान्मज्जन्ति जलातर्गच्छन्ति किं चान्यानपि स्वपृष्ठस्थान् जले निमज्जयन्ति ते च पुनः प्रस्तरा दुस्तरे दुःखेन तीर्यतेऽसौ दुस्तरस्तस्मिन्वार्धौ समुद्रे हे वीर शूर यत्तरन्ति मज्जन्ति अपि च वानरभटान्वानरजनान्संतारयन्ते स कस्य महिमेति विचारयेति शेषः, यतो नैते तरणतारणलक्षणा ग्रावगुणाः प्रस्तरगुणास्तथा न वारिधिगुणा वारिधेः समुद्रस्य गुणास्तथा नो वानराणां गुणाः किं तु श्रीमद्दाशरथेर्दशरथापत्यस्य यः प्रतापमहिमा प्रतापस्य माहात्म्यं सोऽयं समुज्जृम्भते यत्प्रभावतो ग्रावाणस्तरन्ति तारयन्ति च तद्रामचन्द्रमाहात्म्यं समुल्लसतीति भावः ॥ ५३ ॥

(५३) श्रीराम त्वदनेकचित्रचरितप्रोद्दामकीर्तिश्रुति-
प्रल्हादादवधूतमूर्ध्नि सकलत्रैलोक्यलोकेऽपि यत् ।
अश्रोषाः फणिनस्तदेतदुचितं नो चेदहिस्वामिना
व्याधूते शिरसि क्व भूः क्व गिरयः क्वामीदिशामीश्वराः ॥

हे श्रीराम सकलत्रैलोक्यलोके समस्तत्रिजगज्जने ऽपि त्वदनेकचित्रचरितप्रोद्दामकीर्त्तिश्रुतिप्रल्हादात् तत्रानेकान्यनल्पानि यानि विचित्रचरितान्याश्चर्यकृत्यानि तैः प्रोद्दामोत्कटा या कीर्त्तिस्तस्या या श्रुतिः श्रवणं तस्याः समुत्पन्नो यः प्रल्हादस्तस्मादवधूतमूर्ध्नि अवधूतः कम्पितो रामकीर्तिश्रवणान्मूर्धा शिरो येन स तस्मिन् जाते सति यत्फणिनः सर्पाः अश्रोत्राः कर्णरहिता जातास्तदेतदुचितं युक्तमित्यर्थः, किमत्रौचित्यमत आह, नोचेदिति, चेद्यदि ते फणिनोऽकर्णा नाभविष्यंस्तदाहिस्वामिना शेषेण तद्गुणकीर्तिश्रवणादन्यलोकवच्छिरसि व्याधूते कम्पिते सतीयं भूर्भूमिः क्वाभविष्यत् कुत्रास्थास्यत्, तथाऽमी गिरयः कनकाचलाद्याः क्वाभविष्यन्, तथाऽमी दिशामीश्वरा दिक्पालाः क्वाभविष्यन्, शेषशिरोवधूनेन च भूमेः पात एव स्यात्ततस्तेषां गिर्यादिवस्तूनां क्वावस्थानं भवेद्यतस्तेषां भूम्याश्रितत्वात्तस्याश्च शेषाश्रितत्वादिति भावः ॥ ५४ ॥

(५५) राम त्वत्तरुणप्रतापतपनत्रासादिव त्र्यम्बको
नो गङ्गां विजहाति निःसरति न क्षीराम्बुधेर्माधवः ।
ताम्यंस्तामरसान्तरालवसतिर्देवः स्वयंभूरभू-
त्पातालावधिपङ्कलग्नवपुषस्तिष्ठन्ति कूर्मादयः ॥

हे राम त्र्यम्बको महेशो गङ्गां न विजहाति न त्यजति, कस्मादिव, त्वत्तरुणप्रतापतपनत्रासादिव त्वदीयो यस्तरुणः प्रत्यग्रः प्रताप एव तपनः सूर्यस्तस्माद्यस्त्रासो भयमाकस्मिकं तस्मादिव, यद्यपि निसर्गत एव भर्गः शिरसि सुरसरितमुद्वहति तथापि कविभिरुत्प्रेक्ष्यते, एवमग्रेऽपि, नहि रामप्रतापभयाच्छीतलत्वार्थिभिर्भर्गङ्गोद्वहनादिकं क्रियत इति युक्तम्, तथैव माधवो विष्णुः क्षीराम्बुधेः क्षीरसमुद्रान्न निस्सरति, तथैव च स्वयंभूर्देवो ब्रह्मा ताम्यन् त्वत्प्रतापतापाग्लानिं प्राप्नुवन्, अतएव तामरसान्तरालवसतिः तामरसान्तरालं कमलमध्यं तत्र वसतिर्निवासोस्येतीदृग्विधोऽभूत् हरिनाभिकमलस्यातिशीतलत्वात्तत्र निवसतीति भावः, तथा कूर्मादयः कमठप्रमुखा जलजन्तवः पातालावधिपङ्कलग्नवपुषः यावत्पातालं यः पङ्कः कर्दमस्तस्मिन्मग्नानि निविष्टानि वपूंषि शरीराणि येषां ते अभूवन् जाता इति ज्ञेयम् ॥ ५५ ॥

(५६) कीर्तिः श्रीरघुवंशरत्न भवतः स्वर्वाहिनीगाहिनी
दिक्पालान्परितः परीत्य दधती पाण्योः प्रतापानलम् ।
सप्ताम्भोनिधिमण्डलान्यधिगता त्वय्येकपत्नीव्रत-
ख्यात्यै विष्णुपदं स्पृशत्यनुदिनं शेषस्य शीर्षाण्यपि ॥

हे श्रीरघुवंशरत्न श्रीरघुराजान्वये रत्नमिव यः स तत्संबुद्धौ तथा, भवतस्तव कीर्तिर्विष्णुपदं स्पृशति, तथा शेषस्य नागाधिपतेरनुदिनं प्रतिदिनं शीर्षाण्यपि शिरांस्यपि स्पृशति, किंभूता सा, स्वर्वाहिनीगाहिनी स्वर्वाहिनी गङ्गा तां गाहते तच्छीला सा, किं कुर्वती सा, दिक्पालान्परितः परीत्य प्रदक्षिणीकृत्य प्रतापानलं प्रताप एवानलोऽग्निस्तं पाण्योर्हस्तयोर्दधती बिभ्रती, पुनः कथं भूता, सप्ताम्भोनिधिमण्डलानि सप्तसमुद्रमण्डलान्यधिगता प्राप्ता, किमर्थम्, त्वयि रामे एकपत्नीव्रतख्यात्यै एकस्यैव पत्नी सैव व्रतं एकपत्नीव्रतं तस्य ख्यात्यै प्रसिद्ध्यै स्वसतीत्वव्रतज्ञापनाय दिव्यकरणं युक्तमेव, अयं भावः, याहि स्त्री दिव्यं कर्तुमिच्छति सा पूर्वं गङ्गां गाहते अपरं देवताः प्रदक्षिणीकृत्य पाण्योरनलं दधती सप्त मण्डलान्यतिक्रामति ततो विष्णुपदं स्पृशति तथा सर्पं कर्षति तद्वदियं त्वत्कीर्तिरपि जलाग्निराजपदविष्णुपदसर्पस्पर्शनाख्यानि पञ्च दिव्यानि स्वसतीत्वनिर्वाहाय विधत्त इति ॥ अत्रायं गर्भार्थः । यस्त्वत्कीर्त्तिर्भुवनत्रयमभिव्याप्य वर्ततइति ॥ ५६ ॥

(५७) कीर्तिः श्रीरघुवंशदीप भवतो दूती मुरारेः प्रियां
यस्मात्तुभ्यमदात्तदादि गिरिशोऽभूदर्धनारीश्वरः ।
ब्रह्माभूच्चतुराननः सुरपतिश्चक्षुःसहस्रं दधौ
स्कन्दोमन्दमतिश्चकार न करं स्पर्शं स्त्रियाः शङ्कितः ॥

हे श्रीरघुवंशदीप रघुवंशप्रकाशक भवतस्तव कीर्तिः कीर्तिरूपा दूती मुरारेर्विष्णोः प्रियां लक्ष्मीं यस्माद्धेतोस्तुभ्यमदाद्ददौ, तदादि तत्प्रभृति गिरिशो महेशोऽर्द्धनारीश्वरोऽभूद्बभूव, महेश्वरेणेत्थं तर्कितम्, यद्यहमुमां स्वपार्श्वे न स्थापयिष्यामि तदेयं कीर्तिदूती लक्ष्मीमिवापहृत्य मम कामिनीं गौरीमपि रामाय प्रदास्यतीति भिया स्वाङ्गएव गौरी स्थापिता तत्प्रभृत्यर्द्धनारीश्वरो हर इति ख्यातिः, तथा ब्रह्मा तत्प्रभृत्येव चतुराननश्चतुर्मुखोऽभूत् यतस्तेन स्वपत्नीरक्षणार्थं चतसृष्वपि दिक्षु मुखानि निर्मितानि, तथा सुरपतिरिन्द्रोपि चक्षुषां नेत्राणां सहस्रं तत्प्रभृत्येव दधौ बभार, यतो बहूनि चक्षूंषि मम चेद्भविष्यन्ति तदा स्वाप्सरसः प्रलोभ्यापहर्तुमागच्छन्तीं कीर्तिदूतीमवलोकयामीति, तथा स्कन्दः कुमारः शङ्कितः शङ्का जातास्येति शङ्कितस्त्वत्कीर्तिदूतीभयविह्वलः सन् स्त्रियाः करस्पर्शं पाणिग्रहणं न चकार यतश्चेदहं क्षुच्छ्रेण प्राक् स्त्रियं परिणेष्यामि तथापि तदपहरणे मम तस्या वियोग एव भावी ततः किमनेन परिणयनारम्भेणेति विचारादिति भावः, अतएव सोऽद्यापि कुमार एवावस्थितः कीर्त्यते च कुमार इति, किंविशिष्टः सः, मन्दमतिः मन्दाविवाहे ऽलसा मतिर्यस्य स इति ॥ ५७ ॥

Digitized by Google

(५८) अब्दैर्वारिजिघृक्षयाऽर्णवगतैः साकं व्रजन्ती मुहुः
संसर्गाद्बडवानलस्य समभूदापन्नसत्त्वा तडित् ।
मन्ये राम तया क्रमेण जनितो युष्मत्प्रतापानलो
येनारातिवधूविलोचनजलैः सिक्तोऽपि संवर्द्धते ॥

अब्दैर्मेघैः साकं सार्द्धं व्रजन्ती गच्छन्ती तडिद्विद्युद्बडवानलस्य बाडवाग्नेर्मुहुर्वारंवारं संसर्गात्संयोगादापन्नसत्त्वा गुर्विण्यभूत् जाता, किंविशिष्टैरब्दैः, वारिजिघृक्षया पानीयग्रहणेच्छयाऽर्णवगतैः समुद्रं प्राप्तैः, रिक्ता मेघाः पानीयानयनार्थं समुद्रं गच्छन्तीति, यदुक्तं वृद्धैः,

दोषजालमवधूयमानसे
धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय वारिधे-
र्गृह्णते सलिलमेव वारिदाः ॥ १ ॥

हे राम अहमेवं मन्ये यत्तया तडिता क्रमेण युष्मत्प्रतापानलो भवत्प्रतापाग्निर्जनितः समुत्पादितः यतः स्वानुरूपमपत्यं जन्यते मात्रेत्यतोऽग्निनाग्निरेवोत्पादित इति भावः । अथ तडिता त्वत्प्रतापाग्निरेव जनित इति कथं ज्ञायत इत्याह, येन कारणेन युष्मत्प्रतापानलोऽरातिवधूविलोचनजलैः अरातिवधूनां वैरिस्त्रीणां विलोचनजलैर्नेत्राम्बुभिः सिक्तोपि संवर्धते, अयं भावः । वैरिस्त्रियः स्वभर्तृमरणाद्यथायथाऽधिकं रुदन्ति तथातथाधिकं तन्नेत्राम्बुभिस्त्वत्प्रतापाग्निः संवर्धते त्वत्प्रतापोऽधिको भवतीति यावत्, यतः स प्रतापाग्निर्बडवानलात्पितुस्तडितश्च मातुः समुत्पन्नस्तौ च पितरौ पानीययोगादेवोज्जृम्भेतेऽतस्तत्पुत्रोपि त्वत्प्रतापो भवद्वैरिरमणीनेत्राम्बुभिः सिच्यमानो वृद्धिमाप्नोतीत्येतदुचितमेवेति, जिघृक्षयेति ग्रहधातोः सन्नन्ताद्भावे स्त्रियामः प्रत्यय इति ॥ ५८ ॥

(५९) शत्रुत्वत्कलत्रनेत्रसलिलैर्जम्बालजालस्पृशि
भ्रान्त्वा भूपतिभालभूषणभवत्कीर्तिर्भुवो मण्डले ।
यद्यान्ती विबुधालयं प्रति सुधाकुण्डे सुधांशोर्व्यधा-
दङ्घ्रिक्षालनमित्ययं किल मलस्तस्मिन् गतः स्मेरताम् ॥

भूपतीनां राज्ञां भालानि ललाटानि भूष्यन्त्यनेनेति करणे ल्युट् तत्संबोधने हे भूपतिभालभूषण भवत्कीर्तिस्त्वद्यशो भुवो मण्डले भ्रान्त्वा पर्यटनं विधाय विबुधालयं स्वर्गलोकं प्रति यान्ती गच्छन्ती यद्यस्माद्धेतोः सुधांशोश्चन्द्रस्य सुधाकुण्डेऽमृतकुण्डेऽङ्घ्रिक्षालनं चरणयोर्धावनं व्यधाच्चक्रे, इति हेतोरयं मलो भूभ्रमणसंजातचरणपङ्कस्तस्मिंश्चन्द्रे स्मेरतां प्रकटस्वरूपतां चिह्नतामिति वा किलेति संभावने गतः प्राप्तः, किंविशिष्टे मण्डले, शत्रुत्वत्कलत्रनेत्रसलिलैः वैरिराजरमणीनेत्राश्रुभिर्जम्बालजालस्पृशि जम्बालजालं कर्दमजालं स्पृशतीति तस्मिन् । अयं भावः । यच्चन्द्रान्तः कालुष्यमवलोक्यते तत्पङ्किलभूभ्रमणेन कर्दमाङ्कितचरणया त्वत्कीर्त्या चन्द्रामृतकुण्डे स्वमलिनपादक्षालनतो जनितमिति, अन्योपि हि यो देवतालयं याति स जलपूर्णकुण्डे चरणौ प्रक्षाल्य याति तथेयमप्रोति, तस्मिन्नित्यनेन सकलवैरिविनाशनद्वारात्वत्कीर्तिः सुरालये जागर्तीति सूचितम् ॥ ५९ ॥

॥ शेषउत्तराङ्के ॥

॥ श्रीः ॥

वर्त्तते सम्प्रति प्रशियाफ्रांसदेशयोर्मध्ये प्रवर्त्तमानः सङ्गमः । तत्र सिनंबरमासस्य प्रथमदिवसे घोरतरमेकं युद्धमभूत् । तस्य द्वितीयदिवस एव प्रशियादेशवासिना सङ्ग्रामभूमिस्थितेन केनचिदश्वसादिना स्वमित्रं प्रति संस्कृतभाषया पत्रमेकं व्यलेखि । तत्र ऋग्वेदीयसंहितास्थैका ऋग् दृष्टान्तपरतयोपन्यस्ता । सच विद्वत्तमो जुरिस वोन थीलमान समभिधः प्रशियादेशान्तर्गतबर्लिननगरे न्यायाधीशपदनियुक्तोपि वाहिन्यधिकारविनियुक्तत्वात्सेनया सह युद्धार्थं च गच्छति यथावसरं संस्कृतभाषाध्ययनमपि करोति ॥

धन्यः सभूपतिर्यस्य देश ईदृग्विलक्षणव्यवसायिनः पुरुषाः सन्ति । अतस्तस्य जयः सम्भाव्यत एव । अत्रत्यजना ईदृग्विषय आश्चर्ययुक्ता भविष्यन्ति । अस्माकन्तु महाविस्मयकरमिदं यदेतद्देशवासिन ईदृग्गुणगणसमलङ्कृतैर्यूरोपखण्डीयमहानुभावैः साम्यमिच्छन्तीति ॥

तल्लिखितपत्रन्तु

ह्यो महायुद्धम् अभवत् । शत्रवः सर्वे निर्जिताः, सर्वा तेषां सेना, महाराजश्च स्वयं, बद्धः । त्वष्टास्मै वज्रं स्वर्यं ततक्ष; अहन्नहिं स्वबिले शिश्रियाणम् । (ऋग्वेद १, ३२) अहं सुकुशलोस्मि; युद्धे न महद् भयं गतोहम्, यद् एतस्मिन् क्षेत्रे सुपार्वते पदातय एव योद्धुं शक्नुवन्ति, तुरङ्गिणस्तु नार्हन्ति । महत्यां सेवायां भवतः शिष्य इति ॥

शिवप्रसादः

॥ श्रीः ॥

॥ श्री१०८मद्गोस्वामिश्रीजीवनजीमहाराजस्यौदार्यम् ॥

अस्ति किल श्रीमद्देवकीनन्दनपादारविन्दमिलिन्दायमानमानसानेकभूमिपालमौलिमालालालितचरणकमलविमलतरय-

Digitized by Google

शोराशिधवलिताखिलदिङ्मण्डलविद्वत्कुलाखण्डलभक्तजनाज्ञानतमोनिवारणैकभास्करश्रीमद्वल्लभाचार्यान्वयरत्नाकरसुधाकरो मुंबापुरीनिवासी श्रीजीवनजीमहाराजेतिनाम्ना ख्यातिमुपगतो गोस्वामितिलकः ।

तेन च परमौदार्य्यशालिना महानुभावेन स्वनिर्मिता भगवन्नन्दनन्दनाद्भुतचरितवर्णनप्रधाना खाडिल्करोपनामात्मारामशास्त्रिविरचितात्युत्कृष्टव्याख्यानसंवलिता बालकृष्णाभिधाना चम्पूः, श्रीमद्विद्वद्वर्य्येण गट्टूजीतिनाम्ना प्रसिद्धेन गोवर्द्धनशर्म्मणा रचितः प्रश्नोत्तरव्याजेन प्रायः सर्वेषां वैष्णवसिद्धान्तानां स्वसम्प्रदायस्य चोपयुक्तानां विषयाणां प्रकाशकः सत्सिद्धान्तमार्तण्डाभिधः प्रबन्धः, तथा विद्वच्चूडामणिना श्रीगोवर्द्धनाशुकविना प्रणीतो वेदान्तचिन्तामणिसमाख्यो ग्रन्थ, इत्येतत्पुस्तकत्रयं वाराणसीनिवासिभ्यः कतिपयेभ्यः संख्यावद्भ्यः प्रत्येकं श्रीमद्वाराणसीनिवासिसकलविद्यासम्पन्नवैश्यवंशावतंसश्रीबाबूहरिश्चन्द्रद्वारा समर्पितम् । एतेन चातिसन्तुष्टैस्तैस्तैर्विद्वद्वर्य्यैस्तस्य महात्मनो धन्यवादपुरस्सरमुत्तरोत्तरं तदीययशस्सम्पदाद्यभिवृद्धये प्रार्थ्यते भगवान् वृन्दावनचन्द्रः श्रीकृष्णचन्द्र इति ॥

रामेश्वरदत्त त्रिपाठी ।

THE APHORISMS
OF THE
YOGA PHILOSOPHY,
OF
PATAÑJALI.

(Continued from page 105.)

He [now] states another Siddhi.

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४४ ॥

Aph. 44. The external modification [of the internal organ] akalpitá, thoughtless, is [called] the great incorporeal [modification, mahávidehá]: therefrom [results] the destruction of the obscuration of the illumination [of intellect.]

The modification which arises outside the body without having dependence thereon, is, by means of the removal of the steadfastness of the selfishness with regard to the body, called, "the great incorporeal" [modification, "mahávidehá"].

"Therefrom"—from the asceticism performed with regard to it; "the destruction of the obscuration of the illumination" that is—the annihilation of the obscuration—the afflictions, works &c. [i. e. fructification]—of the light of intellect [or thinking principle] characterised by purity [the quality, sattwa], takes place; the meaning is this—the external modification of the mind, which takes place while selfishness in regard to the body [śaríráhankára] exists, is called, kalpitá, or thoughtful, and when the modification of the mind arises independently, having laid aside the selfishness with regard to the body, then it is called "akalpitá" or thoughtless [modification]: from the restraint performed with regard to this, [akalpitá vrittih] all the impurities of the mind of the ascetic are removed.

In order to exhibit various methods for the perfection of the meditations [both] with a germ [sabíja] and without a germ [nirbíja], which are conducive to the discernment of the truth, he states as follows:

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ ४५ ॥

Aph. 45. The conquering of the elements [takes place] from the asceticism [performed with regard to the five forms of the elements] gross [sthúla]—nature, [swarúpa], subtile [súkshma], concomitant [anwaya] and possession of objects [arthavattwa].

The ascetic attains victory [over] the elements, that is the elements become subject to him, from the restraint performed in regard to the five properties, grossness &c., [i. e. grossness, nature, subtility, concomitance and possession of objects] of the elements,—earth &c. [It should be borne in mind that each and all of the five elements possess these five properties—forms]: "gross" [or the 1st form] is the phenomenal having appreciable form, of the elements [including in it gross qualities, gross sound &c.]; the "nature" [or second form] of these, [that is of the elements] is characterised respectively by tenuity, viscidity, heat, impulsion and giving space; the "subtile" [or third form] is, the subtile elements, odour &c. [gandháditanmátrá, that is, odour flavour, colour, tangibility and sound], which are determined to be the respective causes of the elements;

सिद्ध्यन्तरमाह ।

शरीराद्बहिर्या मनसः शरीरनैरपेक्ष्येण वृत्तिः सा महाविदेहा नाम विगतशरीराहङ्कारदार्ढ्यद्वारेणोच्यते ततस्तस्याः कृतात् संयमात्प्रकाशावरणक्षयः सात्त्विकस्य चित्तस्य यः प्रकाशस्तस्य यदावरणं क्लेशकर्म्मादि तस्य क्षयः प्रविलयो भवति अयमर्थः शरीराहङ्कारे सति या मनसो बहिर्वृत्तिः सा कल्पितेत्युच्यते या पुनः शरीराहङ्कारभावम्परित्यज्य स्वातन्त्र्येण मनसो वृत्तिः साऽकल्पिता तस्यां संयमाद्योगिनः सर्वे चित्तमलाः क्षीयन्ते ॥

इदानीं तत्त्वदर्शनोपयोगिसबीजनिर्बीजसमाधिसिद्धये विविधोपायप्रदर्शनायाह । पञ्चानाम्पृथिव्यादीनां भूतानां ये पञ्चावस्था विशेषरूपा धर्म्माः स्थूलत्वादयस्तत्र कृतसंयमस्य भूतजयो भवति भूतानि वश्यान्यस्य भवन्तीत्यर्थः । तथाहि भूतानाम्परिदृश्यमानं विशिष्टाकारवत् स्थूलम् । स्वरूपञ्चैषां यथाक्रमङ्काठिन्यस्नेहोष्णताप्रेरणावकाशदानलक्षणम् । सूक्ष्मन्तु यथाक्रमम्भूतानाङ्कारणभावेन व्यवस्थितानि गन्धादितन्मात्राणि ।

Digitized by Google

"concomitants" [or the fourth form] are qualities, which are observed as everywhere co-existing, in the form or shape of light, action and rest, [or revealing, exertion and fixation]; "possession of objects" [or the fifth form] means the power, existing in these qualities, [or in the five elements earth &c.] called the power of procuring fruition, and emancipation, [bhogápavarga sampádanákhyá śaktih], [and as this power exists in the qualities, and as the qualities, exist in the subtile and other elements &c., every thing is endowed with fruition and emancipation].

Thus [this being the case] the ascetic performing the asceticism in regard to each of the five forms of the five elements differing by the [five] shapes characterised by the [particular] states above described, conquers the elements. For example, the natures of the elements become obedient like cows following their calves, to his [the ascetic's] resolves, who has finished the performing of the restraint [with regard to each of the five forms] —i. e. (who has) first performed [restraint] with regard to gross form [sthúla], afterwards with regard to subtile form [súkshma] and so forth in due order, [that is in regard to the remaining successive forms].

(To be continued.)

NOTICE.

In preparation, to be ready in 1872, by Pandits Rájárám Sástri and Bál Sástri, Professor in the Sanskrit College, Benares. The *Mahábháshya*. With commentary and notes. Lithographed. Price to subscribers paying in advance Rs. 20—To non-subscribers—Rs. 24.

Applications may be addressed to the Editor of the Pandit, Sanskrit College, Benares.

THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

FIFTH BOOK, FIRST DAILY LESSON.

(Continued from page 138.)

तथा दग्धस्य विस्फोटने ॥ १२ ॥

Aph. 12. In like manner in the case of the bursting open of one burnt.

[1] In a house which has been set on fire by a felon, when a man has there been burnt, and his body torn open by the fire, the action which is produced in the hand &c., by the will to kill the felon, is neither a cause of merit, nor a cause of demerit; as it has been said, 'In the slaying of a felon there is no sin in him that slays openly or covertly: wrath encounters wrath. An incendiary, a poisoner, an assasin, a thief, a ravisher of wife or field,—these six are felons.' U.

Involuntary motion. **प्रयत्नाभावे प्रसुप्तस्य चलनम् ॥ १३ ॥**

Aph. 13. Movement of the sleeping (takes place) in the absence of volition.

[2] Movement, action such as the sideward or upward moving of the limbs takes place in the sleeping, in the body possessing a state of profound slumber, even in the absence of volition generated by such desire as 'I will throw upwards.' A particular volition is not, therefore, always the cause [of such motion.] V.

तृणे कर्म वायुसंयोगात् ॥ १४ ॥

Aph. 14. Action [takes place] in grass from conjunction with wind.

[3] The actions of the body being explained, those of other objects are treated of. All such objects as trees, shrubs, climbing plants, are implied in the term grass. U.

मणिगमनं सूच्यभिसर्पणमदृष्टकारणम् ॥ १५ ॥

Aph. 15. The movement of the gem, and the approach of the needle, are caused by destiny.

[4] By the term gem are intended vessels made of

अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रैवान्वयित्वेन समुपलभ्यन्ते । अर्थवत्त्वं तेष्वेव गुणेषु भोगापवर्गसम्पादनाख्या शक्तिः ॥

तदेवम्भूतेषु पञ्चसूक्तलक्षणावस्थाभिन्नेषु प्रत्यवस्थं संयमङ्कुर्वन् योगी भूतजयी भवति तद्यथा प्रथमं स्थूले रूपे संयमं विधाय तदनुसूक्ष्मरूपे इत्येवङ्क्रमेण तस्य कृतसंयमस्य सङ्कल्पानुविधायिन्यो वत्सानुसारिण्य इव गावो भूतप्रकृतयो भवन्ति ॥

[1] आततायिना केनाप्यगारे दाह्यमाने तत्र दग्धस्य पुरुषस्य विस्फोटे वह्निकृते जाते सति तस्याततायिनो वधानुकूलेन प्रयत्नेन हस्तादौ यत्कर्म्म जनितं तन्न पुण्यहेतुर्न वा पापहेतुः यथाहुः नाततायिवधे दोषो हन्तुर्भवति कश्चन प्रकाशं वा ऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति । अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः ॥

[2] उर्ध्वं क्षिपामीत्यादीच्छाजनितप्रयत्नाभावे ऽपि प्रसुप्तस्य सुषुप्त्यवस्थान्वितस्य शरीरस्य चलनं तिर्य्यगूर्ध्वाङ्गचालनादिकर्म्म उत्पद्यते इत्यर्थः तथा च प्रयत्नविशेषो न सर्वत्र हेतुरिति भावः ॥

[3] शरीरकर्म्माणि व्याख्याय तदितराण्याह । तृणपदेन वृक्षगुल्मलतावितानादिकं सर्व्वमुपलक्षयति ॥

[4] मणिपदेन जलपूर्णकाञ्चनादिमयपात्राण्यभिप्रेतानि चौर्य्यधनलब्धये तादृशपात्रे मान्त्रिकैर्मन्त्रप्रयोगः क्रियते तादृशपात्रन्तु भूमौ तिष्ठति तदुपरि अपरेण केनचिद्दक्षिणहस्तः स्थाप्यते मन्त्रसामर्थ्यात्तत्पात्रं तादृशहस्तसहितमेव चौर्य्यधनावस्थानाभिमुखं गच्छति तत्र स्थाने गत्वा स्थिरं भवतीति प्राचां किंवदन्ती तादृशपात्रगमनेन प्रयत्नविशेषो हेतुः किन्तु पूर्व्वस्वामिनः सुकृतं चोरस्य दुष्कृतं वा निमित्तकारणम् तादृशपात्रन्तु समवायिकारणम् एवं अयस्कान्तसन्निधाने सति सूचीनां लोहशलाकानां यदयस्कान्ताभिमुखगमनं भवति तत्रापि अदृष्टमेव हेतुः ननु कस्यादृष्टेन सूच्यादीनां गमनमितिचेत् तद्गमनेन यस्य हितमहितं वा भवति तददृष्टस्यैव तत्र हेतुत्वम् सूचीत्युपलक्षणम् अयस्कान्ताकृष्टलोहमात्रमभिप्रेतम् तृणकान्तमणयाकृष्टानां तृणानां गमने वह्नेरूर्ध्वज्वलने वायोस्तिर्य्यग्गमने सर्गाद्यकालीनपरमाणुकर्म्मणि चादृष्टकारणकत्वमूहनीयमिति संक्षेपः ॥

Digitized by Google

gold &c. and filled with water. To such a vessel magicians apply incantations for the recovery of stolen property. The tradition of the ancients is that the vessel is set on the ground, and some other person lays his hand upon it. The vessel accompanied with the hand, in consequence of the efficacy of the incantation, turns towards the spot where the stolen property has been deposited. The reason of the movement of such a vessel is not a particular volition, but the efficient cause is the merit of the former possessor or the demerit of the thief. The non-coinhesive cause is conjunction of such a vessel with soul possessing such destiny [or results of actions done in previous states of existence]; and the co-inhesive cause is such a vessel. In like manner destiny is also the cause of the attraction towards a loadstone which takes place in needles or metallic rods when in proximity with the magnet. If it be asked in consequence of whose destiny [or previous merits and demerits] motion takes place in needles &c., the reply is that it is the destiny of him to whom benefit or injury accrues by the motion that is the cause. The term needle implies other objects, iron in general attracted by the loadstone being intended. It is to be inferred that destiny is the cause of the motion of pieces of grass attracted by amber, of the upward flaming of fire, of the horizontal motion of wind and of the action of the primordial atoms at creation. V.

इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे हेतुः ॥ १६ ॥

Aph. 16. Particular non-simultaneous conjunctions in an arrow are the cause of the diversity of its action.

[1] The sense of this aphorism is as follows. After conjunction of arrows &c. moving with velocity with a wall and the like, a cessation of motion is observed though the arrows &c. continue to exist. In this case it is not destruction of the substratum that is destructive of motion, for the substratum continues to exist. Also no other contrary property is observed. It therefore follows that it is a self-produced conjunction that destroys the action [of the arrow.] This conjunction produced in the fourth moment destroys the action in the fifth moment. The meaning, therefore, is that the production of the action, then disjunction, next the destruction of the prior conjunction, the subsequent conjunction, and the destruction of the action, make known the diversity of the action. 'Particular conjunctions,'—peculiarity in conjunction, self-production. Otherwise, were conjunction in general destructive of action, action could not abide anywhere. U.

नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च ॥ १७ ॥

Aph. 17. The first action of the arrow is from impulse, the next is from self-reproduction caused by that action, and in like manner the next and the next.

[1] The first action in an arrow when discharged is produced by a bowstring drawn by human volition. In this case the impulse is the non-coinhesive cause; the arrow is the co-inhesive cause; volition and gravity are the efficient causes. By this first action self-reproduction termed velocity and having a common substratum is produced. This is established by the perception that it [the arrow] moves with velocity. By this self-reproduction action is produced in the arrow. Of this the non-coinhesive cause is the self reproduction; the co-inhesive cause is the arrow; and the efficient cause is a particular keen impetus. In like manner a succession of actions one after the other is produced by the self-reproduction which continues until the arrow falls. A single self-reproduction produces a succession of actions, for when an action is destroyed by subsequent conjunction produced by itself, the self-reproduction produces another action. It is not proper to suppose a succession of self-reproductions like the succession of actions, for the hypothesis is unnecessary. To show this the words 'In like manner the next and the next,' are added, and term, 'Self-production caused by that action' is in the singular number. In the Nyáya doctrine which affirms a succession of self-reproductions like the succession of actions, there is complexity. The reason that of two arrows simultaneously discharged the velocity of the one is swift and that of the other slow, is the swiftness or slowness of the impetus. U.

---

[1] इदमत्राकूतं वेगेन गच्छतां शरादीनां कुड्यादिसंयोगानन्तरं शरादौ सत्स्वेव गत्युपरमो दृश्यते अत्राश्रयनाशस्तावन्नतन्नाशकः आश्रयस्य विद्यमानत्वात् विरोधिगुणान्तरञ्च नोपलभ्यते तेन स्वजन्यः संयोग एव कर्म्मनाशक इत्युन्नीयते स च संयोगश्चतुर्थक्षणे जातः पञ्चमक्षणे कर्म्म नाशयति तथाहि कर्म्मोत्पत्तिरथ विभागः अथ पूर्व्वसंयोगनाशः उत्तरसंयोगः कर्म्मनाशः तेनायुगपत् संयोगविशेषाः कर्म्मनानात्वज्ञापका इत्यर्थः संयोगविशेषा इति संयोगविशेषः स्वजन्यत्वमेव अन्यथा संयोगमात्रस्य कर्म्मनाशकत्वे कर्म्म क्वचिदपि न तिष्ठेत् ॥

[1] पुरुषप्रयत्नेनाकृष्टया पतञ्जिकया नुन्नस्येषोराद्यं कर्म्म जायते तत्र नोदनमसमवायिकारणम् इषुः समवायिकारणम् प्रयत्नगुरुत्वे निमित्तकारणे तेन चाद्येन कर्म्मणा समानाधिकरणो वेगाख्यः संस्कारो जन्यते स च वेगेन गच्छतीति प्रत्यक्षसिद्ध एव तेन संस्कारेण तत्रैषौ कर्म्म जायते तत्रासमवायिकारणं संस्कारः समवायिकारणमिषुः निमित्तकारणन्तु तीव्रो नोदनविशेषः एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेणोत्तरोत्तरः कर्म्मसन्तानो जायते स्वजन्योत्तरसंयोगेन कर्म्मणि नष्टे संस्कारेण कर्म्मान्तरजननात् एक एव संस्कारः कर्म्मसन्तानजनकः न तु कर्म्मसंतानवत् संस्कारसन्तानोऽप्यभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह। तथोत्तरमुत्तरञ्चेति तत्कर्म्मकारिताच्च संस्कारादित्येकवचनञ्च न्यायनये तु कर्म्मसन्तानवत् संस्कारसन्तानस्वीकारे गौरवम् यत्तु युगपत् प्रक्षिप्तशरयोरेकस्य तीव्रो वेगोऽपरस्य तु मन्दस्तत्र नोदनतीव्रत्वमन्दत्वे निमित्तम् ॥

Digitized by Google

संस्काराभावे गुरुत्वात् पतनम् ॥ १८ ॥

Aph. 18. Falling [results] from gravity in the absence of self-reproduction.

[1] It might be objected that in such a case the arrow would continue going, and never fall. The answer is as follows. There being absence, destruction, of the self-reproduction, the velocity produced by the first action, from gravity as its cause, there results falling in an arrow &c.; that is, the time during which the particular velocity lasts, determined as the final moment, destroys such velocity. In some cases also conjunction with another substance is destructive of velocity. It was in consequence, then, of the existence of a preventive velocity that there was no previous fall of the arrow &c., but a succession of motions. There was in consequence of the destruction of the cause of the action of moving no subsequent movement, but falling results from the absence of anything to prevent it. In this there is no impossibility. V.

SECOND DAILY LESSON.

नोदनापीडनात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १ ॥

Aph. 1. Action in earth [results] from impulse, impact, and conjunction with the conjunct.

[2] In earth, in a bamboo &c., action is sometimes produced by the impulse of fire &c., and sometimes from the impact of an axe &c. Similarly action is produced in a chariot &c. through conjunction with the conjunct, through conjunction with the harness conjunct with the horses as they move. In the first of these instances, that of action in a bamboo &c., the impulse of fire &c., is the non-coinhesive cause, the bamboo &c., the co-inhesive cause, destiny the efficient cause. In the second, the blow with the hatchet &c. is the non-co-inherent cause. In the third, conjunction with the harness conjunct with the horses is the non-coinherent cause. V.

तद्विशेषेणादृष्टकारितम् ॥ २ ॥

Aph. 2. [That action which is produced] in a different manner from these is caused by destiny.

[1] That which, as an earthquake &c., is produced, in a different manner, to the exclusion of these, of impulse impact, and conjunction with the conjunct, is caused by destiny, i. e. has for its non-coinherent cause conjunction with soul destined; since it is the destiny of him to whom pleasure or pain results from the earthquake that is the particular cause of the earthquake. V.

अपां संयोगाभावे गुरुत्वात् पतनम् ॥ ३ ॥

Aph. 3. The falling of water [results] from gravity in the absence of conjunction.

[2] The section investigative of action co-inherent in fluids is here commenced. In this it is stated that the falling of water, in the form of rain, has gravity for its non-coinherent cause. This takes place when there is absence of conjunction, of conjunction with a cloud. The absence of conjunction is, therefore, the efficient cause. U.

द्रवत्वात् स्यन्दनम् ॥ ४ ॥

Aph. 4. Flowing [results] from fluidity.

[3] It may be asked how there is in drops of rain action productive of mutual conjunction. The answer is therefore given. The flowing or distant progression of the stream or great aqueous whole composed by mutual conjunction of the fallen waters or raindrops, is produced by fluidity as its non-coinherent cause, and by gravity as its efficient cause in the waters as its coinherent [or material] cause. U.

नाड्यो वायुसंयोगादारोहणम् ॥ ५ ॥

Aph. 5. The sun's rays [cause] the ascent [of water] through conjunction with air.

नोदनापीडनात् संयुक्तसंयोगाच्च ॥ ६ ॥

Aph. 6. Through the impress of the impulse, and conjunction with the conjunct.

---

[1] नन्वेवं शरश्चिरमेव गच्छेत् कदाचिदपि न पतेदित्यत आह । संस्कारस्याद्यकर्मजनितस्य वेगस्य अभावे नाशे सति गुरुत्वात् कारणादेव पतनं शरादौ जायते इत्यर्थः यादृशवेगविशेषो यावन्तं कालन्तिष्ठति तावानेव कालो ऽन्तिमक्षणावच्छिन्नस्तादृशं वेगं नाशयति क्वचित्तु द्रव्यान्तरसंयोगो ऽपि वेगनाशकः तथा च प्रतिबन्धकस्य वेगस्य सत्त्वादेव पूर्वं शरादेर्न पतनं किन्तु गतिसन्तान एवाभूत् उत्तरकालन्तु गमनकर्म्मणः कारणविनाशान्न गमनं किन्तु प्रतिबन्धकाभावात् पतनमेव भवतीति न किञ्चिदनुपपन्नम् ॥

[2] पृथिव्यां वंशादौ कदाचिद्वह्न्यादिनोदनात् कर्म्म जायते कदाचिच्च कुठाराद्यभिघातात् एवं संयुक्तसंयोगात् चलदश्वादिसंयुक्तरज्जुसंयोगात् रथादौ कर्म्म जायते तत्र प्रथमे वंशादिकर्म्मणि वह्न्यादिनोदनमसमवायिकारणम् वंशादिः समवायिकारणम् अदृष्टादिकं निमित्तकारणम् द्वितीये कुठाराद्यभिघातो ऽसमवायिकारणम् तृतीये ऽश्वसंयुक्तरज्जुसंयोगो ऽसमवायिकारणमिति ॥

[1] तेषां नोदनाभिघातसंयुक्तसंयोगानां विशेषे ण व्यतिरेकेण जातं यत् भूकम्पादिकं कर्म्म तत् अदृष्टकारितं अदृष्टवदात्मसंयोगासमवायिकारणकमित्यर्थः भूकम्पेन यस्य सुखं दुःखं वा भवति तददृष्टस्य तत्रासाधारणकारणत्वादिति भावः ॥

[2] इदानीं द्रवद्रव्यसमवेतकर्म्मपरीक्षाप्रकरणम् तत्राह । अपां यत् पतनं वर्षणरूपं तद् गुरुत्वासमवायिकारणकम् तत् संयोगस्य मेघसंयोगस्याभावे सति भवति तेन संयोगाभावस्तन्निमित्तकारणमित्यर्थः ॥

[3] क्षितौ पतितानामपांबिन्दूनां परस्परं संयोगेन महज्जलावयवि स्रोतोरूपं यज्जायते तस्य यत् स्यन्दनं दूरसंसरणम् तत् द्रवत्वादसमवायिकारणादुत्पद्यते गुरुत्वान्निमित्तकारणादप्सु समवायिकारणेषु ॥

Digitized by Google

[1] It may be asked how the sun's rays have such power as to draw up waters situated on the earth. Through the impress, the congress by means of the impulse, the impulse of a strong wind, waters conjunct with the sun's rays conjunct with the wind, fly upwards; as the rays of fire driven by the wind draw up boiling water in a caldron. The particle 'and' means 'as;' and the example of water in a caldron is to be considered. U

वृक्षाभिसर्पणमित्यदृष्टकारितम् ॥ ७ ॥

Aph. 7. The circulation in trees is caused by destiny.

[2] The circulation in a tree of waters sprinkled on the root is caused by destiny. The action by which the waters rise and cause the growth of the tree results from conjunction of destiny and the souls of those in whose souls pleasure or pain is effected by the growth of the leaves, stem, fruit, flowers &c., as its non-coinherent cause; from destiny as its efficient cause; and in water as its coinherent cause. U.

अपां सङ्घातो विलयनञ्च तेजःसंयोगात् ॥ ८ ॥

Aph. 8. The freezing and thawing of water [results] from conjunction with light.

[3] Aqueous atoms originating a binary atomic aggregate, in consequence of being impeded by the light of the sky do not originate in these aggregates fluidity. Snow, hail &c. void of fluidity are thus originated by constituent elements void of fluidity and successively by binary and other aggregates. They are consequently observed to be hard. It might be asked what proof there is that snow, hail &c. are water. The words 'and thawing from conjunction with light' are therefore added. Action is produced in the atoms originative of snow, hail &c. by powerful conjunction with light. From this action results disjunction. Then in the course of destruction of the originative conjunction results destruction of the larger constituent parts of the snow, hail &c. Next in consequence of the departure of the conjunction with light, which prevents fluidity, these same atoms originate fluidity in the binary atomic aggregates, from which results the thawing of the snow, and hail &c. thus endowed with fluidity. Of this the efficient cause is the powerful ingress of light. U.

तत्र विस्फूर्जथुर्लिङ्गम् ॥ ९ ॥

Aph. 9. In these the rolling of thunder is a mark.

[1] In these—in the waters of the sky—the rolling of thunder is a mark of the ingress of the light of the sky; that is, it is the pealing of thunder which warrants the inference. The excessive brilliance of lightning is perceptible, and after that follows the thunder which also is perceptible. It is therefore inferred that lightning, the light of the sky, has entered into the cloud from which the hailstones appear. In consequence of this is the prevention of fluidity in the water originative of hail. U.

वैदिकञ्च ॥ १० ॥

Aph. 10. There is also Vedic [authority establishing this.]

अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥ ११ ॥

Aph. 11. [The rolling of thunder results] from conjunction with water and disjunction from a cloud.

[2] It may be asked how thunder is produced, for no impact nor any kind of disjunction causative of sound is observed. The answer is here given. Thunder results from conjunction with water, that is from its being struck by wind, and from disjunction from a cloud. V.

पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् ॥ १२ ॥

Aph. 12. The action of light and the action of air are explained by the action of earth.

---

[1] ननु यदि भूमिष्ठानामपाम् ऊर्ध्वं गमनं भवति तदा गुरुत्वात् पतनवर्षणं सम्भाव्यते तदेव तु कुत इत्यत आह कारयन्तीति शेषः यदपामूर्ध्वमारोहणं तत् नाड्यः सूर्य्यरश्मयो वायुसंयोगात् कारयन्ति ग्रीष्मे वाय्वभिहताः सूर्य्यरश्मय एव आरोहयन्त्यप इत्यर्थः क्वचित् पाठो नाड्या वायुसंयोगादिति स च नाड्यो नाडीसम्बन्धीयो वायुसंयोग इत्युपपादनीयः ॥

ननु सूर्य्यरश्मीनां कथमयं महिमा यत् भूमिष्ठा अपऊर्ध्वं नयन्तीत्यत आह। नोदनेन बलवद्वायुनोदनेन आपीडनादास्कन्दनात् वायुसंयुक्ता रश्मयस्तत्संयुक्ता आपऊर्ध्वंधावन्ति यथा स्थालीस्था अपः क्वथ्यमानाः वायुनुन्नवह्निरश्मयऊर्ध्वं नयन्ति चकार इवार्थस्तत्र च उपमानं स्थालीया एवापो द्रष्टव्याः ॥

[2] अभितः सर्पणमभिसर्पणं तदभिसर्पणं मूलेनिषिक्तानामपां वृक्षे तददृष्टकारितं पत्रकाण्डफलपुष्पादिवृद्धिकृतं सुखं दुःखं वा येषामात्मनां अदृष्टवत्तदात्मसंयोगादसमवायिकारणात् अदृष्टान्निमित्तादप्सु समवायिकारणेषु तत् कर्म्म भवति येन कर्म्मणा आपऊर्द्ध्वं गत्वा वृक्षं वर्द्धयन्तीत्यर्थः ॥

[3] दिव्येन तेजसा प्रतिबन्धादाप्याः परमाणवो द्व्यणुकमारभमाणा द्व्यणुकेषु द्रवत्वं नारभन्ते ततो द्रवत्वशून्यैरवयवैर्द्व्यणुकादिप्रक्रमेण द्रवत्वशून्या हिमकरकादय आरभ्यन्ते तेन तेषां काठिन्यमुपलभ्यते नन्वेवं हिमकरकादीनामाप्यत्वे किं प्रमाणमत उक्तं विलयनञ्च तेजः संयोगादिति तेजः संयोगेन बलवता हिमकरकारम्भकपरमाणूनां क्रिया क्रियातो विभागस्ततआरम्भकसंयोगनाशपरम्परया हिमकरकादिमहावयविनाशस्तत्र द्रवत्वप्रतिबन्धकतेजःसंयोगविगमात् तएव परमाणवः द्व्यणुकेषु द्रवत्वमारभन्ते ततो द्रवत्ववतां हिमकरकादीनां विलयनं तत्र च बलवत्तेजोनुप्रवेशो निमित्तम् ॥

[1] तत्र दिव्यासु अप्सु दिव्यानां तेजसामनुप्रवेशे विस्फूर्ज्जथुर्लिङ्गं वज्रनिर्घोष एव लिङ्गमित्यर्थः आत्यन्तिकविद्युत्प्रकाशस्तावत्प्रत्यक्ष एव तदनुपदञ्च स्फूर्ज्जथुः सोऽपि प्रत्यक्ष एव तेनानुमीयते यस्मान्मेघात् करकाः प्रादुर्भवन्ति तत्र दिव्यन्तेजो विद्युद्रूपमनुप्रविष्टं तदुपष्टम्भेन करकारम्भकाणामपां द्रवत्वप्रतिबन्ध इति ॥

[2] ननु शब्दकारणस्याभिघातस्य विभागविशेषस्य चाननुभवात् विस्फूर्ज्जथुः कथमुत्पद्यते इत्यत आह अपां जलानां संयोगात् अर्थाद्वायुना अभिघातात् स्तनयित्नोर्मेघाच्च विभागात् विस्फूर्ज्जथुर्भवतीत्यर्थः ॥

[1] Conjunction with soul destined has been pronounced the cause of earthquakes. In like manner in the case of the action which is produced in light which causes a sudden conflagration, and in wind which causes a sudden agitation of trees &c., the non-coinherent cause is conjunction with soul influenced by destiny; air and fire are the co-inherent causes; and destiny is the efficient cause. U.

अग्नेरूर्ध्वज्वलनं वायोस्तिर्य्यक्पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ॥ १३ ॥

Aph. 13. The upward flaming of fire, the sideward blowing of wind, and the first action of atoms and of the internal organ are caused by destiny.

[2] The word first means existing in the earliest time of creation. There being no impulse, impact &c. at that time, it is conjunction with soul influenced by destiny that is in these the non-coinherent cause. The word first applies also to blazing upwards and blowing sidewards. It is proper to hold that velocity is the cause of other actions of blazing and blowing, for there being a visible cause there is no occasion for an unseen cause [or destiny as a cause.] U.

हस्तकर्मणा मनसः कर्म व्याख्यातम् ॥ १४ ॥

Aph. 14. The action of the internal organ is explained by the action of the hand.

[3] As the action of the hand in the throwing upwards of a pestle &c. has for its non-coinherent cause conjunction with soul possessing will, in like manner the action of the mind, which has for its purpose contact with the organ percipient of the desired object, also has for its non-coinherent cause conjunction with soul exerting volition. Although mind as an organ is not an immediate object of volition, it is to be considered that action is produced in the mind by volition acting upon the vein which conveys the internal organ. It must be admitted that this vein is perceptible to the sense of touch, else the transmission of what is eaten and drunk by means of volition acting upon the vessel [or vein] which is the channel of the breath would be impossible. V.

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखम् ॥ १५ ॥

Aph. 15. Pleasure and pain [result] from contact of soul, sense, mind, and object.

[1] Pleasure and pain imply other states. Cognitions and volitions are also to be considered. The infinity of the internal organ has been previously disproved, and its atomic minuteness proved. It has been stated that the impossibility of simultaneous cognitions is the mark of the existence of an internal organ. There can, then, be no pleasure and pain without conjunction with mind determined to such and such an organ of sense. Were there no action in the internal organ there could be no feeling such as of pleasure in the foot, of pain in the head &c. Although every particular attribute of the soul depends upon contact with the external organ, pleasure and pain are [alone expressly] mentioned, being, in consequence of their producing violent affections, more remarkable [than the others.] U.

तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः संयोगः ॥ १६ ॥

Aph. 16. Absence of action in the mind fixed upon soul, non-existence of pain in the body,—this is union.

[2] It might be objected that if mind be of a mobile nature, it must be impossible to restrain it, and consequently a system of meditation must be useless, emancipation being impossible since a presentation of soul is impossible. To this an answer is furnished. When the mind abides in the soul, when by sixfold union the external organ quitting the senses &c. abides in the soul alone, there results the non-commencement or non-production of the action of the mind. The mind then becomes immovable. In this state there is non-existence

[1] भूकम्पं प्रत्यदृष्टवदात्मसंयोगः कारणमुक्तम् तेनैवाकस्मिकदिग्दाहहेतोस्तेजसः आकस्मिकवृक्षादिक्षोभहेतोश्च प्रभञ्जनस्य कर्म यत् संजायते तत्राप्यदृष्टवदात्मसंयोगो ऽसमवायिकारणम् वायुतेजसी समवायिकारणम् अदृष्टं निमित्तकारणमित्यर्थः ॥

[2] आद्यमिति सर्गाद्यकालीनमित्यर्थः तदानीं नोदनाभिघातादीनामभावात् अदृष्टवदात्मसंयोग एव तत्रासमवायिकारणम् आद्यमूर्ध्वज्वलनं आद्यं तिर्य्यक् पवनमिति इतरेषां ज्वलनपवनकर्म्मणां वेगासमवायिकारणकत्वमेव मन्तुमुचितं दृष्टे कारणे सत्यदृष्टकल्पनानवकाशात् ॥

[3] मुषलोत्क्षेपणादौ यथा प्रयत्नवदात्मसंयोगासमवायिकारणकं हस्तकर्म तथा ऽभिमतविषयग्राहिणीन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रयत्नवदात्मसंयोगासमवायिकारणकमेव यद्यपीन्द्रीयं मनो न साक्षात् प्रयत्नविषयस्तथापि मनोवहनाडीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या नाड्यास्तुत्वगिन्द्रियग्राह्यत्वमङ्गीकर्त्तव्यम् अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न सम्भवेत् ॥

[1] सुखदुःखे इत्युपलक्षणं ज्ञानप्रयत्नाद्यपि द्रष्टव्यं मनसो वैभवं पूर्व्वमेव निराकृतं अणुत्वञ्च साधितम् युगपत् ज्ञानानुत्पत्तिश्च मनसो लिङ्गमित्युक्तं तेन तत्तदिन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म्म न भवेत् न भवेच्च पादे मे सुखं शिरसि मे वेदनेत्याद्याकारो ऽनुभव इत्यर्थः यद्यपि मनःसन्निकर्षाधीनः सर्व्वोऽप्यात्मविशेषगुणस्तथापि सुखदुःखे तीव्रसंवेगितया ऽतिस्फुटत्वादुक्ते ॥

[2] ननु मनश्चेत् चञ्चलस्वभावं तदा तस्य निरोधो न सम्भवति तथा च योगमन्तरेणात्मसाक्षात्कारस्यासम्भ ऽादपवर्गस्यासम्भवेन मननशास्त्रं निष्प्रयोजनमापद्येतेत्याशङ्कायामाह । आत्मस्थे मनसि षडङ्गयोगेन इन्द्रियादिकं परित्यज्य मनो यदा आत्ममात्रे तिष्ठति तदा तदनारम्भः तस्य मनः कर्म्मणोऽनारम्भः अनुत्पादः तदा मनो निश्चलं भवति तदवस्थायां शरीरस्य दुःखाभावः शरीरावच्छेदेन दुःखं न जायते स आत्मना बाह्यव्यावृत्तमनसः संयोगो योग उच्यते तथा च तदनन्तरमात्मसाक्षात्कारोदयेन मिथ्याज्ञाननिवृत्तौ सत्यामपवर्गो निष्प्रत्यूह एवेति न मननशास्त्रं निष्फलमिति भावः ॥

of pain in the body; that is, pain is not produced in relation to the body. This is called the conjunction or union with soul of mind excluded from all things external. This is established by the words of the Skanda-puráṇa:—"The mind is smitten by the breath: he should not therefore sigh. He should therefore restrain his breath for the sake of immobility of mind. That he may restrain his breath, let him practise sixfold union. Sitting, checking the vital airs, abstraction, suspension of the faculties, meditation, and contemplation,—these are the six elements of union." After this, then, there being cessation of false cognition by the arising of a realization of soul, final emancipation is unimpeded; and a system of meditation is not therefore fruitless. V.

अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥ १७ ॥

Aph. 17. The egress and ingress [of minds from and into bodies], conjunctions with things eaten and drunk, and conjunctions with other effects,—all these things are caused by destiny.

[1] Egress, the issuing forth of the mind from the body at the time of death; ingress, the entrance of the mind into another body when it is produced; conjunctions of food and water eaten and drunk; and conjunctions with the body of other effects, that is, of the sensual organs and vital airs; the actions from which these conjunctions arise, (for these words are to be supplied),—these actions are caused by destiny, that is, have for their non-coinhesive cause conjunction with soul destined. V.

तदभावे संयोगाभावो ऽप्रादुर्भावश्च मोक्षः ॥ १८ ॥

Aph. 18. Where there is non-existence of this [that is, of destiny], there is non-existence of conjunction, and non-existence of manifestation, emancipation.

[2] Where there is non-existence of this—of destiny that is where there is destruction of future results of actions by presentation of soul, and of past results by fruition, there is non-existence of conjunction, a severance from connection with the stream [series] of bodies After this there is non-manifestation, that is to say non-production of pain; and from the absence of the body and of destiny as causes, at that time emancipation—liberation is possible. Emancipation, therefore, is not [chimerical] like the horns of a hare. V.

Darkness.

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः ॥ १९ ॥

Aph. 19. Darkness is non-existence, being dissimilar to the production of substance, quality, and action.

[1] It may be objected:—The action of a substance is observed also in darkness, there being such cognitions as 'The shadow moves.' In such cases there is no volition, no impulse or impact, and no gravity or fluidity: another efficient cause must therefore be enumerated, but this does not appear. The reply is here supplied. By this also is established the observation that there are only nine substances. The production of substances is dependent only on tangible substances, and no touch is observed in darkness. Nor is there in darkness a touch, but inappreciable touch; for where colour is appreciable touch must also needs be appreciable. If it be objected that this is the rule with regard to earth, but darkness is a tenth substance, we reply that this is not the case for no other substance is a substratum of blue colour, and gravity is inseparable from blue colour, as also are taste and smell. If it be urged that as ether has sound only as its distinctive attribute, and darkness may in like manner have blue colour for its specific property, we reply that it is not so, for there is a contradiction to visibility; for were darkness merely something possessing blue colour, or blue colour, it would not be perceived by the eye without an external act of vision. U.

तेजसो द्रव्यान्तरेणावरणाच्च ॥ २० ॥

Aph. 20. And because of the obscuration of light by another substance.

[2] It may be asked: What then occasions the notion

---

[1] अपसर्पणं मरणावस्थायां देहान्मनस उत्क्रमणम् उपसर्पणं देहान्तरोत्पत्तौ तत्र मनसः प्रवेशः अशितपीतयोरन्नजलयोः संयोगाः कार्यान्तराणामिन्द्रियप्राणानां देहेन सह संयोगाश्च यस्मात् कर्मणो भवन्ति इति पूरणीयम् इति एतानि कर्माणि अदृष्टकारितानि अदृष्टवदात्मसंयोगासमवायिकारणकाणि ॥

[2] तदभावे तस्यादृष्टस्याभावे सति प्रारब्धेतरादृष्टानात्मसाक्षात्कारेण प्रारब्धानाञ्च भोगेन क्षये सतीति यावत् संयोगाभावः देहप्रवाहसम्बन्धस्य विच्छेदस्तदनन्तरञ्च अप्रादुर्भावः अर्थाद्दुःखस्यानुत्पत्तिर्देहरूपस्यादृष्टरूपस्य च कारणस्य विरहादिति तदानीमेव मोक्षः अपवर्गः सम्भवतीति नापवर्गस्य शशविषाणसमानतेति भावः ॥

[1] ननु तमसोऽपि द्रव्यस्य कर्म दृश्यते चलति छायेति प्रत्ययात् तत्र न प्रयत्नो नवा नोदनाभिघातौ न वा गुरुत्वद्रवत्वे न वा संस्कारस्तथा च निमित्तान्तरं वक्तव्यं तच्च नानुभूयमानमित्यत आह । एतेन नवैवद्रव्याणीत्यवधारणमप्युपपादितं द्रव्यनिष्पत्तिस्तावत् स्पर्शवद्द्रव्याधीना न च तमसि स्पर्शोऽनुभूयते न चानुद्भूतएव स्पर्शः रूपोद्भवे स्पर्शोद्भवस्यावश्यकत्वात् पृथिव्यामयं नियमः तमस्तु दशमं द्रव्यमिति चेन्न द्रव्यान्तरस्य नीलरूपानधिकरणत्वात् नीलरूपस्य च गुरुत्वनान्तरीयकत्वात् रसगन्धनान्तरीयकत्वात् यथाकाशं शब्दमात्रविशेषगुणं तथा तमोऽपि नीलरूपमात्रविशेषगुणं स्यादितिचेन्न चाक्षुषत्वविरोधात् यदि हि नीलरूपवन्नीलं रूपमेव वा तमः स्यात् बाह्यालोकप्रग्रहमन्तरेण चक्षुषा न गृह्येत ॥

[2] तर्हि गतिप्रतीतिः किन्निबन्धनेत्यत आह गच्छता द्रव्यान्तरेणावृते तेजसि पूर्व्वदेशानुपलम्भादपरदेशे चोपलम्भात्तेजोऽभावस्य गच्छद्द्रव्यसाधर्म्याद् गतिभ्रमो नतु वास्तवो तत्र गतिरित्यर्थः अन्वयव्यतिरेकाभ्यां तथा प्रतीतेः उद्भूतरूपवद्यावत्तेजः संसर्गाभावस्तमः ॥

Digitized by Google

of motion [of darkness]? The reply is therefore furnished. Light being obscured by another substance in motion, and non-existence of light not being observed in the east and being observed in the west, and thus resembling a moving substance, an erroneous conception of motion results, but there is no real motion in the case, for this appears from an inclusive and exclusive argument. Darkness is absolute non-existence of all light in that which possesses appreciable colour. U.

दिक्कालावाकाशञ्च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥ २१ ॥

Aph. 21. Space, time, and ether are also inactive, being dissimilar to that which possesses action.

[1] The parenthetical section, comprising two aphorisms on darkness, being completed, the section treating of voidness of action is stated. The word 'also' implies the addition of soul. Dissimilarity from that which possesses action is the immateriality of space &c, for action resides only in matter. U.

एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २२ ॥

Aph. 22. By this are explained actions and qualities.

[2] The inactivity of qualities and actions is stated 'By this' means by dissimilarity from that which possesses action. Immateriality, the dissimilarity from that which possesses action, belongs also to qualities and actions, and they also are explained to be inactive. U.

निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २३ ॥

Aph. 23. The co-inhesion of things inactive is excluded from actions.

[3] It might be objected: If qualities and actions are inactive, how can there be any connection between them and substance? connection by conjunction would be possible but that depends on action only. Hence it is stated that co-inhesion is the only connection of qualities and actions which are inactive, and that this is excluded from actions. Of this connection there is not even the production, much less dependency upon action. U.

कारणं त्वसमवायिनो गुणाः ॥ २४ ॥

Aph. 24. But qualities as a cause are non-coinherent.

---

[1] एवं द्विसूत्रकं प्रासङ्गिकं तमःप्रकरणं समाप्य कर्मशून्यताप्रकरणमाह चकारादात्मसंग्रहः क्रियावतां वैधर्म्यं दिगादीनाममूर्त्तत्वं मूर्त्यनुविधानात् क्रियायाः ॥

[2] गुणकर्मणोर्निष्क्रियत्वमाह। एतेनेति क्रियावद्वैधर्म्येणेत्यर्थः क्रियावद्वैधर्म्यममूर्त्तत्वं गुणकर्मणोरप्यस्तीति ते अपि निष्क्रियत्वेन व्याख्याते इत्यर्थः ॥

[3] ननु गुणकर्मणी यदि निष्क्रिये तदा ताभ्यां द्रव्यस्य कथं सम्बन्धः संयोगसम्बन्धः सम्भाव्येत स च कर्माधीन एवेत्यत आह निष्क्रियाणां गुणकर्मणां समवाय एव सम्बन्धः स च कर्मभ्यो निषिद्धः तस्य सम्बन्धस्य उत्पत्तिरेव नास्ति दूरे तु कर्माधीनतेत्यर्थः ॥

[1] It might be objected: If qualities, as being immaterial, are not a co-inherent cause of actions, how are qualities and actions produced by qualities? For causation in the form of being something over and above a co-inherent cause is not possible. The reply to this is therefore furnished. Qualities are a non-coinherent cause, not a co-inherent cause also that they should be the sites of actions. Non-coinherent causality sometime results from co-inherence in the same object with the effect, as that of conjunction with soul in the particular attributes of sounds, or of sound of conjunction and disjunction in sound; in other cases it results from co-inherence in the same object with the cause, as that of the colours &c. of the parts of a water-pot &c. in the colour &c. of a water-pot &c. U

गुणैर्दिग्व्याख्याता ॥ २५ ॥

Aph. 25. By qualities space is explained.

[2] An objection might be raised. In virtue of such cognitions as, "Action is produced here," "Action is produced now," time and space also are causes co-inherent of action. Else how could they be its site? It is therefore stated that as the qualities gravity &c., being immaterial, are not co-inherent causes of action, so it follows also from its immateriality that space is not a co-inherent cause of action. That to be a site does not imply co-inherence is proved by such instances as those of cotton in a bowl, curdled milk in a bowl, the roaring of a lion in a forest. U.

कारणेन कालः ॥ २६ ॥

Aph. 26. By cause time [is explained.]

[3] The words 'is explained to be inactive' are to be supplied according to an altered construction. By the words 'by cause' existence is indicated. Time, then, as an efficient cause is merely the site of action, but not co-inherent with action. U.

---

[1] ननु यद्यमूर्त्तत्वात् गुणाः कर्मसमवायिकारणं न भवन्ति तदा गुणैर्गुणाः कर्माणि च कथमुत्पद्यन्ते न हि समवायिकारणातिरिक्तस्वरूपेणापि कारणता संभवतीत्यत आह गुणा असमवायिकारणं न तु समवायिकारणमपि येन कर्माधाराः स्युः सा चासमवायिकारणता क्वचित् कार्यैकार्थसमवायात् यथात्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागयोश्चान शब्दे क्वचित् कारणैकार्थसमवायात् यथा कपालादिरूपादीनां घटादिरूपादिषु ॥

[2] ननु इह कर्मोत्पद्यते इदानीं कर्मोत्पद्यते इत्यादि प्रतीतिबलात् दिक्कालावपि कर्मसमवायिकारणे एव कथमन्यथा तत्र तयोराधारतेत्यत आह। यथा गुरुत्वादयो गुणा न कर्मसमवायिकारणममूर्त्तत्वात् तथा दिगपि न कर्मसमवायिकारणममूर्त्तत्वादेवेत्यर्थः आधारता तु समवायितामन्तरेणापि कुण्डे वदराणि कुण्डे दधि वने सिंहनाद इत्यादिवदुपपद्य इति भावः ॥

[3] उक्तेनैवाभिप्रायेणाह निष्क्रियत्वेन व्याख्यात इति परिणम्यानुषङ्गः कारणेनेति भावप्रधानो निर्देशः तेन निमित्तकारणत्वेनाधारमात्रं कर्मणः कालो न तु समवायीत्यर्थः ॥

Digitized by Google

SIXTH BOOK, FIRST DAILY LESSON.

बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ १ ॥

Aph. I. There is in the Veda a composition of sentences consequent upon design.

[1] The subject matter of the sixth book is the investigation of merit and demerit the primary causes of transmigration. Merit and demerit may be conceived as existing in virtue of such precepts and prohibitions as "Let him that desires paradise offer sacrifices," "Let him not eat kalanja," assuming the authoritativeness of such injunctions and prohibitions. Such authoritativeness is established by the prior existence of the distinguishing attribute of accurate knowledge of the meaning of the speaker's words. Per se authoritativeness being denied, the author proceeds in the first place to prove the quality determinant of the authority of the Veda. Composition of sentences, framing of propositions, is consequent upon intention, preceded by the speaker's accurate knowledge of the meaning of the sentences, because it is a composition of sentences, like the composition by ourselves and others of such sentences as "There are five fruits on the river's bank." 'In the Veda' means in the aggregate of sentences. Of this the composition of the aggregated sentences is the subject; and there is no unduly assumed causality in the priority of ours and others' intention. For in such instances as "Let him that desires paradise offer sacrifices," the means of attaining the desired object or the fact of its being an effect are not objects of ours or other's intellect. Therefore there is established in the case of the Veda the prior existence of an Absolute Being, and the notion of the Veda is that of words of authority not derived from knowledge of the meaning of propositions derived from words, there being implied the notion of that which is not an object of certain knowledge derived from evidence other than of words and of the evidence upon them dependent. U.

ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २ ॥

Aph. 2. The formation of names in the Bráhmaṇa is an evidence of design.

[1] It is stated in another manner that the words of the Veda were preceded by intention. The Bráhmaṇa here denotes a portion of the Veda. The formation there of terms, or making of names, points to the intention of the derivatist, just as the making in ordinary language of such names as Long-ear, Long-nose, Long-neck. U.

बुद्धिपूर्वो ददातिः ॥ ३ ॥

Aph. 3. The words 'He gives' are preceded by intelligence.

[2] The injunction to make gifts in such precepts as, "He that desires paradise should give a cow," is derived from the knowledge that such giving effects the desired object. The particular employment of the root in the form "He gives" implies giving, the sense of the root. U

तथा प्रतिग्रहः ॥ ४ ॥

Aph. 4. Likewise reception.

[3] The sacred texts enjoining reception also are subsequent to intention. The word reception implies a sacred text of which it is the subject. Sacred texts enjoining acceptance of lands &c. imply its efficacy to the welfare of the receiver. Sacred texts enjoining the reception of the skin of the black antelope &c. imply efficacy to that which is undesired by the recipient. The efficacy to the desired and the undesired cannot be merely subjects in the minds of modern persons. U.

आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ॥ ५ ॥

Aph. 5. Because the attributes of one soul are not a cause with regard to another soul.

[4] Because the attributes of one soul, its merits and demerits such as sacrifices injuries &c. are not a cause of the attributes pleasure and pain in another soul, pleasure and pain are produced by such merit and demerit only as exist in each several soul, not by merit and demerit inhering in different substrata. Otherwise, inasmuch as one by whom a sacrifice was not offered nor a wrong done would receive its recompense, there would result a loss of what was done and consequences arising from what was not done. U.

A. E. G.

(To be continued.)

---

[1] संसारमूलकारणयोर्धर्म्माधर्म्मयोः परीक्षा षष्टाध्यायार्थः धर्म्माधर्म्मौ च स्वर्गकामो च यजेत न च कलञ्जं भक्षयेत् इत्यादिविधिनिषेधबलकल्पनीयौ विधिनिषेधवाक्ययोः प्रामाण्ये सति स्यातां तत्प्रामाण्यञ्च वक्तृयथार्थवाक्यार्थज्ञानलक्षणगुणपूर्वकत्वादुपपद्यते स्वतः प्रामाण्यस्य निषेधादतः प्रथमं वेदप्रामाण्यप्रयोजकगुणसाधनमुपक्रमते वाक्यकृतिर्वाक्यरचना सा बुद्धिपूर्व्वा वक्तृयथार्थवाक्यार्थज्ञानपूर्व्वा वाक्यरचनात्वात् नदीतीरे पञ्च फलानि सन्तीत्यस्मदादिवाक्यरचनावत् वेदइति वाक्यसमुदाय इत्यर्थः तत्र समुदायिनां वाक्यानां कृतिः पक्षः न चास्मदादिबुद्धिपूर्व्वकत्वेनान्यथा सिद्धिः स्वर्गकामो यजेत इत्यादाविष्टसाधनतायाः कार्य्यताया वास्मदादिबुद्धिगोचरत्वात् तेन स्वतन्त्रपुरुषपूर्वकत्वं वेदे सिध्यति वेदत्वञ्च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम् ॥

[1] प्रकारान्तरेण वेदवाक्यानां बुद्धिपूर्व्वकत्वमाह। ब्राह्मणमिह वेदभागस्तत्र यत् संज्ञाकर्म्म नामकरणं तत् व्युत्पादकस्य बुद्धिमाक्षिपति यथा लोके लम्बकर्णदीर्घनासलम्बग्रीवादिनामकरणम् ॥

[2] स्वर्गकामो गां दद्यात् इत्यादौ यद्दानप्रतिपादनं तद्दानेष्टसाधनताज्ञानजन्यं ददातिरिति धातुनिर्द्देशो धात्वर्थं दानमुपलक्षयति ॥

[3] प्रमाणान्तरमाह। प्रतिग्रहप्रतिपादिका अपि श्रुतयो बुद्धिपूर्व्विकाः प्रतिग्रह इदं स्वविषयां श्रुतिमुपलक्षयति तेन भूम्यादि ग्रहप्रतिपादिकाः श्रुतयः प्रतिग्रहीतुः श्रेयःसाधनतत्पराः कृष्णसारचर्म्मादिप्रतिग्रहप्रतिपादिकाः श्रुतयः प्रतिग्रहीतुरनिष्टसाधनताबोधिकाः न चेष्टानिष्टसाधनत्वं अर्वाचीनपुरुषबुद्धिगोचरो भवितुमर्हति ॥

[4] आत्मान्तरगुणानां यागहिंसादिपुण्यपापानां आत्मान्तरे यौ सुखदुःखात्मकौ गुणौ तयोरकारणत्वात् एवञ्च प्रत्यात्मनिष्ठाभ्यामेव धर्म्माधर्म्माभ्यां सुखदुःखेन व्यधिकरणाभ्यामन्यथा येन यागहिंसादिकं न कृतं तस्य तत्फलं स्यादिति कृतहानिरकृताभ्यागमश्च प्रसज्येत ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 56. Benares, January 2nd, 1871. Vol. V.

॥ प्रकरणपञ्चिकायाम् ॥

॥ पूर्वाङ्कप्रक्रान्तस्याङ्कपारायणस्य शेषः, अतिदेशपारायणं च चरमम् ॥

नन्वेवं विश्वजिदादावधिकारोऽप्याक्षिप्ततया विधेय एव स्यात् । उच्यते । नाधिकारस्य नियोगसिद्धौ व्यापारः, किं तु कर्तृत्वस्य, यत्प्रतिपत्त्यर्थश्चाधिकाराक्षेप इति । एवं च विधिना स्वसिद्ध्यर्थमनाक्षिप्यमाणत्वाच्च क्रमो विधेय इति मीमांसकानामुद्गारः । क्रमस्य पाञ्चमिकस्य न किं चिदभिधानमस्ति। न चानभिहितस्य तस्य वैनियोगिककर्मोपादानिकं वा शेषत्वं घटते । न वा शेषभूतस्य विधिराक्षेपाय प्रभवति । यस्तु वषट्कर्तुः प्रथमभक्ष इति प्रथमशब्दाभिधेयः क्रमः स हि विनियोज्यो विधेयश्चेति निबन्धनकारः । अत एवासौ न निलीयेतेति विततः । पञ्चमे हि यस्तावच्छ्रौतक्रमः अध्वर्युर्गृहपतिं दीक्षयित्वेत्यादौ न तस्य किं चिदभिधानमस्ति । कथं तर्हि प्रतीयते । क्त्वाप्रत्ययेऽपि हि समानकर्तृकेऽर्थे वर्तमानाद्धातोर्विधीयमानेऽपि य एव प्रथमं प्रयुज्यते तत एव विधीयते तत्र क्त्वाप्रत्ययश्रवणात् । अथ वा प्रयोज्यत्वे स्थितेर्थविक्तिरपि तथैव । यथाप्रयोगभावित्वादर्थावगतेर्यथावगति चानुष्ठानमिति क्रमोऽपि तथाविध एवावगम्यते। अर्थादिष्वभिधानशङ्का दूरपदेव। अनभिधीयमानस्याप्यवगत्युपायभावस्तत्रतत्र प्रमाणे चिन्तित एव । यदि विध्यर्थं प्रतिशेषत्वं क्रमस्य नास्ति, कथं तर्हि चोदनालक्षणत्वम् । न विधेयता चोदनालक्षणत्वे हेतुः । अधिकारस्य तदभावप्रसङ्गात् । अविध्यर्थस्तदन्वितः प्रतिपाद्येत इति चोदनालक्षणम् । तर्हि क्रमान्वितोऽपि प्रयोगविधिरवसीयते इति तस्यापि चोदनालक्षणत्वमविरुद्धम् । क्रमविशेषपरिगृहीतप्रयोगावच्छिन्नो हि प्रयोगविधिः प्रतीयते । अत एवानङ्गत्वेऽपि क्रमनियमस्य तदादरः । तदभावे प्रयोगानुपपत्तेः प्रयोगविधेश्च विशिष्टप्रयोगसाध्यत्वात् । तदेवं द्विविधमौपदेशिकत्वं वैनियोगिककर्मोपादानिकं च । तत्र न यथाधिकारं विनियुज्यते । अपि तु यथाविनियोगमधिकारः सामान्यतोऽप्यधिकाराश्रयणेन विनियोगसिद्धेः । यस्यापि प्रतिप्रकरणं व्यवस्थासिद्धये ग्राहकपूर्वको विनियोगः, यद्यपि च साधिकारस्यैव ग्राहकत्वम्, तथापि सामान्यतः स्वर्गकामादावधिकारिणि लब्धे साधिकारत्वे संपन्ने ग्राहकग्रहणे निवृत्ते नियुक्तेष्वङ्गेषु तदवच्छिन्ने विध्यर्थे कार्यात्मनि तदनुष्ठानसमर्थस्य स्वर्गकामिनोऽधिकार इति पश्चादधिकारिविशेषनियमः । अत एवान्धबधिरपङ्ग्वादीनामवेक्षणश्रवणातिक्रमणाद्यङ्गवति पञ्चावर्तीयाणामार्षेयत्र्यवरणलक्षणाङ्गभाजि आहवनीयादियोगिनि चानाहिताग्नीनामनधिकारः । तेषां तथाविधविध्यर्थसंपादने स्वाभाविकशक्त्ययोगादिति स्वयमूहनीयम् । येषां च न स्वाभाविकी शक्तिरपेता तेषामधिकारो भवत्येव । अद्रष्ट्याख्यामसमाधेयव्याधिविशेषपरवशेन्द्रियाणां च। ननु तेषामधिकारो न निर्वहत्येवापूर्वसिद्धिनिबन्धनत्वात्तस्य, तस्याः सकलाङ्गग्रामायत्तत्वात् । सत्यम् । कामाधिकारो न भवत्येव । तस्य सेतिकर्तव्यताकफलभावनाकरणविषयत्वात्फलकामस्य हि फलभावनां प्रति एककरणीभूते ऽधिकारो नावकल्पेत, सर्वं च करणं सेतिकर्तव्यताकं करणतामनुभवतीति संमतम् । ततः साङ्गानुष्ठाने सेतिकर्तव्यताकत्वव्याघाताद्विषयाभावाद्विषयिणोऽप्यनुपपत्तेरधिकारविलय एव कामिनाम् । निमित्ततश्च केवलभावार्थविषय एवाधिकार इत्यङ्गानुपसंहारेऽपि विषयप्रमोषा-

Digitized by Google

स्वाधिकारावगमः। अनपेतश्चाधिकारो यावदुपसंहरणमयाङ्गसंपाद्यतामेव तदानीमवगमयति। औत्सर्गिकी तु सकलाङ्गायत्तसिद्धिः सिद्धैव। अनेनैवाधिकारेण निमित्ताधिकारे गौणो मुख्यश्च शास्त्रार्थ इति प्राभाकराणामुल्लापः। अस्ति च किंचिदङ्गं निमित्तायत्तविधानम्। तत्सत्येव निमित्ते ऽङ्गं यथा भिन्ने जुहोतीति तत्र चैष शास्त्रार्थः। सति भेदने भेदनहोमसहितोऽङ्गकलापः करणोपकारं कुर्वन्कार्यमारूढ इति। तदल्पत्वे तु एकाङ्ग एवेति। यावच्च भेदादिकर्मावर्तते तावती होमस्यावृत्तिः। एष तावदौपदेशिकोऽङ्गकलापः। कार्यनिबन्धनं के चिदन्ये मीमांसकामन्यन्ते। उपदेशो हि प्रतिप्रकरणमङ्गानां व्यवस्थित एव। अपूर्वग्रहणपूर्वकत्वाद्विनियोगस्य। यदि हि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन साधिकारं यागमुद्दिश्य समिधो यजतीति समिदादिविधिः स्यात् तदानीमेवमुद्दिश्य विधानाद्यावद्यागमेव समिदादिविधिरिति यजिमत्सु सर्वापूर्वेषु समिदादिविधानादुपदेशो न व्यवतिष्ठेत। नहि तदा स्वर्गकामपदं दर्शपूर्णमासपदं च विशेषणतयात्तम्। उद्दिश्यमानविशेषणविशेषणविवक्षायां वाक्यभेदापत्तेः। संनिधानमात्रेण त्वन्विताभिधानसिद्धेर्दर्शपूर्णमासाभ्यामित्यस्याधिकारवाक्यत्वे सति समिदादीनां तदनुप्रवेशाद्विनियुक्तविषयतयाप्यनुष्ठानसंपत्तेर्दर्शपूर्णमासाभ्यामित्यधिकारद्वारपरिकल्पनम्। तच्च चोपादानलक्षणेन विभिन्नव्यापारेणाङ्गानां समुदितानामुपकारकत्वपरिकल्पनमिति प्रतिप्रकरणमङ्गव्यवस्था। क्व पुनः केषां कार्यनिबन्धनमङ्गत्वम्। प्राकृतानां वैकृतापूर्वेषु तदीयकरणे च यथायथमतिदेशमाचक्षते। प्राकृतानां प्राकृतस्यानप्रतीते ऽर्थान्तरसमूहमभिदधति द्विविधं शाब्दमुपदेशकं कार्यकं च। तत्र वैकृतापूर्वस्य साध्यभूतस्य सेतिकर्तव्यताकाङ्क्षस्य विषयीभूते भावार्थे करणे लब्धे या परेतिकर्तव्यताकाङ्क्षा तस्यां च न प्रकृतिवदुपकारान्तरकल्पनोपपद्यते। कॢप्तेप्युपकारान्तरे तज्जनकद्विविधपदार्थाकाङ्क्षा पश्चात्तनी सा प्रकरणानधीतपदार्थवर्गसंबन्धेन न परिपूर्यते। प्राकृते तूपकारे स्वीकृते तत्तन्मुखेन द्विविधप्राकृतपदार्थोपस्थापनादाकाङ्क्षा परिपूर्यते इति प्राकृतमेवोपकारं स्वीकरोति। कः पुनर्हेतुः स्वीकरणे। नानुमानम्। अव्यभिचरितलिङ्गसंबन्धाभावात्। नोपमानम्। तस्य सादृश्यमात्रविषयत्वात्सिद्धविषयावगाहिनोश्चानयोः कार्यप्रमाणानवतारात्। उच्यते। य एवासौ विनियोगाभिधायी लिङादिशब्दः स एव प्राकृतोपकारान्वितं स्वार्थमभिदधाति। प्रकृतावपि विध्यर्थपरिकल्पितोपकारिणान्वितं स्वार्थं लिङादिरेव वक्ति। अन्विताभिधाने चाकाङ्क्षा योग्यता संनिधिश्च कारणम्। इह च प्राकृतस्योपकारस्यैवैवाकाङ्क्षा योग्यता च तावदविवादा। संनिधानं तु बुद्धेन

प्राकृतेनैवापूर्वेण लिङ्गविशेषेण प्राकृतमपूर्वं बुद्धौ संनिधीयते तच्च स्वोपकारं संनिधापयति। अत एवोपकारसंबन्ध औपदेशिक इति तत्त्वविदः। यो हि यन्येन विध्यर्थेनैवोपस्थापितस्तस्मिन्नन्वयमेति स औपदेशिकः। प्रकृताविवोपकारः यथा विश्वजिदादावधिकारी। तदेवमुपकारसंबन्धमुपेतः केन पदार्थवर्गेण जन्यत इति पश्चात्तस्यैव वैकृतस्यापूर्वस्याकाङ्क्षा भवति। ननु प्रकृतावात्मोपकारो निर्ज्ञातजनकभूतपदार्थवर्ग इति नाकाङ्क्षोदये कारणमस्ति। अत एव पदार्थानामतिदेशो नेति मन्यते। यदि पदार्थेष्वपि पश्चाद्भाविन्याकाङ्क्षा तदा तद्धेतुके प्राकृतानां वैकृतापूर्वसंबन्धे सति को नामोपकारस्येव पदार्थानामतिदेशं वारयेत्। अन्यत उत्पन्नस्य ह्यन्येन संबन्धोऽतिदेश इत्यतिदेशविदः। अत्र ब्रूमः। यदि करणोपकारप्रयुक्ताः प्रकृतौ पदार्थाः स्युः तदा निर्ज्ञातेषु जनकेषु पदार्थाकाङ्क्षा नावतरेत्। अपूर्वप्रयुक्तास्तु धर्मा इति मीमांसकाः। तथा सति यदपूर्वप्रयुक्तास्ते धर्मास्तत्संबन्ध एवोपकारे तेषां जनकता कल्पिता नान्यसंबन्धे। अतो वैकृतापूर्वसंबन्धस्यानिर्ज्ञातोपायस्योपेयाकाङ्क्षा नानुपपन्ना। येषां न प्रकृतिसाधनभावेन पदार्थानामनुष्ठानमेव केवलम् तेषामौपदेशिकत्वादुपकारसाधनभावस्योहबाधौ न स्याताम्। आकाङ्क्षानिबन्धनेन प्रकृत्यपूर्वसंबन्धेन यथोहबाधौ सिद्ध्यतः तथा तत्रैव वक्ष्यामः। एवं च सत्यां पदार्थाकाङ्क्षायां पश्चादुपकारेण ये प्राकृताः पदार्था बुद्धिविषयतामापद्यन्ते ते ऽन्वयमासादयन्ति। केन पुनः संबन्धेनोपकारस्तानुपस्थापयति। उच्यते। प्रकृतौ तेषां पदार्थानां तस्य चोपकारस्य जन्यजनकभावः प्रतीत इति तथा पूर्वप्रतीत्या स्मृतिस्तेषु जायते। तेषु स्मृतिसंनिहितेषु लब्धान्वयेषु तथा प्रकरणाधीतेषु पश्चादुपकारसाधनत्वं मिलितानां साधनत्वं कल्प्यते। तदाहुः। वैकृतं पदार्थवर्गं प्राकृतमुपकाराढौकितं तथा ऽऽविकपकारे साधनमेकीकृत्य कल्पयति उपकारलक्षणकार्योपस्थापितप्राकृतपदार्थान्वयज्ञानं च विकृत्यपूर्वकार्यकं शाब्दमुच्यते। न च पदार्थानामपूर्वान्तरसंबन्धोऽनुपपन्नः। अन्यदीयस्यान्यसंबन्धाभावादिति। तद्भावेनोपकारेऽन्विते तज्जनकाकाङ्क्षायां कार्यतोऽन्वयावगमात्। अर्थश्चायमतिसुलभऋजुविमलादिषु। तत्र प्राकृतानां संस्काराणां प्राकृतद्रव्यस्थानपातितपदार्थसंबन्धनिश्चय ऊहापरनामापि कार्यरूपवशात्। प्रकृतौ यत्कार्यं प्रतीतमवघातादीनां तदेवेदमिति निश्चये सति यदपूर्वीयावघातादयस्तदीयतण्डुलोत्पत्तिप्रकृतिद्रव्यमवघातादिभिः संस्कार्यमिति प्रकृतौ शास्त्रार्थः। विकृतावपि तादृशा एव नीवारादय इति धर्माहस्तेषु। एवं कृष्णलादिष्ववघातादिषूहितेषु द्वारभूतकार्याभावे च यो बाधनिश्चयः

Digitized by Google

सोपि कार्यक एव। तदेवं तद्विना बाधिताभ्युचितपदार्थेऽन्यप्राकृत उपकारो विकृताविति स्थितम्। तेषां चौपदेशिकानां कार्यसंबद्धानामनेकप्रधानसंबन्धे प्रयोगविशेषे तन्त्रमनुष्ठानम्। तथा देशकालकर्तॄणां प्रयोगानुबन्धभूतानां भेदो नावसीयते कार्यस्य वा। भिद्यमाने तु कार्ये कार्यार्थमनुष्ठानमावर्तत एव। देशादिभेदेपि प्रयोगभेदावगमाद् आवृत्तिरेवानुष्ठानस्य। यस्य च परार्थमनुष्ठितस्यापि कार्यं तन्त्रमित्यवगम्यते तस्यान्यत्राप्युपकारकत्वमेवेति सकृदनुष्ठानमिति॥

नानामितविषयाणां विधिसंसिद्धौ निमज्जिताङ्गानाम्।
प्रविततगम्भीराणां पारायणमेतदाचरितम्॥

॥ इति प्रकरणपञ्चिकायामङ्गपारायणं समाप्तम् ॥

विकृतौ ये पदार्थानामतिदेशं न मन्वते ।
करणस्योपदेशं च तेषामुत्तरमुच्यते ॥ १ ॥
प्राकृतेनोपकारेण पदार्थैश्चैव वैकृतः ।
प्रयोगविधिना स्वेन विधिरन्वित उच्यते ॥ २ ॥
यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते ।
तेनान्वितो हि विध्यर्थः स्वशब्देनैव भण्यते ॥ ३ ॥
साध्यभूतश्च विध्यर्थ उपकारमपेक्षते ।
लिङादिभिः प्राकृतश्च स योग्यः सन्निधाप्यते ॥ ४ ॥
अन्यथा ऽनवगम्यत्वाद्यद्यप्यङ्गपुरःसरः ।
उपकारः प्राकृतोऽसौ विकृतौ संनिधाप्यते ॥ ५ ॥
तथा ऽप्यपेक्षितत्वेन प्रकारं प्रथमं विधिः ।
स्वीकरोति पदार्थांस्तु प्रतीतानप्यपेक्षते ॥ ६ ॥
पश्चात्तु तैरपि पुनरुपकारप्रसिद्धये ।
अपेक्षितैस्तद्द्वयेन प्राप्तेरन्वयमृच्छति ॥ ७ ॥
गुणप्रधानभावेन सर्वेषेवान्वयोमतः ।
प्रधानं च विधिर्धर्मो गुणास्तं प्रति संमताः ॥ ८ ॥
अन्वितस्याभिधानं च न शब्दोपस्थितेः परम् ।
दर्शनात्पितृयज्ञादौ कल्प्येनाप्यधिकारिणा ॥ ९ ॥
संबन्धिना न सर्वेण सहसैवान्विताभिधा ।
संबन्धिनां संनिधानक्रमेण तु यथायथम् ॥ १० ॥
प्रकृतौ तु स्वशब्दत्वात्पदार्थानां पुरोऽन्वयः ।
उपकारस्य कल्प्यस्य पश्चादिति परं भिदा ॥ ११ ॥
व्युत्क्रमेणोपकारेण पदार्थैश्चैव वैकृतः ।
प्राकृतैर्विधिरन्वेति सोऽतिदेशश्च सम्मतः ॥ १२ ॥
यस्य देशे विधिर्यस्मिंस्ततो ऽन्यत्रापि तद्गतिः ।
अतिदेशः प्रकारस्य धर्माणां चैव युज्यते ॥ १३ ॥
अन्यत्रत्यो यथा ऽन्यत्र प्रकारो ऽन्वयमृच्छति ।
तथा धर्मा अपीष्यन्ते तेषामप्यतिदेश्यता ॥ १४ ॥
नन्वेवं दशमाद्येन विरोधस्ते प्रसज्यते ।
नैवं कार्यानपेक्षो ऽसावतिदेशो निवारितः ॥ १५ ॥
तद्द्भावेन संबन्धो धर्माणामेव चेद्भवेत् ।
अनपेक्ष्यप्रकारत्वात्तदा बाधो न सिध्यति ॥ १६ ॥
प्रकृतौ हि पदार्थानां संबन्धे ऽवगते यथा ।
द्वारं दृष्टमदृष्टं वा संबन्धार्थं प्रकल्प्यते ॥ १७ ॥
कार्यानपेक्ष्यसंबन्धे तथैवावगते सति ।
द्वारं दृष्टमदृष्टं वा कल्प्यं स्याद्विकृतावपि ॥ १८ ॥
ततो न घटते बाधः कार्यलोपनिबन्धनः ।
दृष्टाभावेप्यदृष्टस्य द्वारस्य खलु संभवात् ॥ १९ ॥
कार्यापेक्षा यदा धर्मा विकृतौ यान्ति संगतिम् ।
तदा कार्यावलोपेन तेषां बाधः प्रसिद्ध्यति ॥ २० ॥
प्राप्नुवन्तो हि कार्येण धर्मा द्वारसमन्विताः ।
प्राप्नुवन्तीति न द्वारकल्पनावसरस्तदा ॥ २१ ॥
क्लृप्तद्वारावलोपेन तेषां बाधः प्रमाणवान् ।
अतिदेशेन धर्माणां प्राप्तानामपि सिद्ध्यति ॥ २२ ॥
कार्यानपेक्षसंबन्धो धर्माणामुच्यते यदि ।
दशमाद्यविरोधः स्यात्तदानीं न च तत्तथा ॥ २३ ॥
तद्भावेन न किं धर्माः प्रकारो वापि गृह्यते ।
इत्येषा दशमाद्ये हि चिन्ता बाधप्रसिद्धये ॥ २४ ॥
पूर्वपक्षी च तत्राह पदार्थानां परिग्रहम् ।
नोपकारे हि धर्मेभ्यो विना शक्यं निरूपणम् ॥ २५ ॥
यद्यप्याकाङ्क्षति विधिः प्रकारं प्रथमं स्वयम् ।
तथापि तस्य प्रकृतावपि नैव स्वरूपतः ॥ २६ ॥
परिज्ञानं किं तु यथाश्रुतैर्धर्मैस्तथैव हि ।
तस्मात्पदार्थपूर्वैव सदा तस्या निरूपणा ॥ २७ ॥
अतः पूर्वप्रतीतत्वात्पदार्थैरेव वैकृतः ।
विधिः संबन्धमाप्नोति तान्गृहीत्वा तु स स्वयम् ॥ २८ ॥
उपकारं प्रकृतिवत्कल्पयत्यात्मसिद्धये ।
अतश्च प्राकृते द्वारे लुप्ते बाधं तु नार्हति ॥ २९ ॥

Digitized by Google

राद्धान्ती तु वदत्येवं सत्यं धर्मा: पुर:सरा: ।
तथापि ते न गृह्यन्ते तदानीमनपेक्षणात् ॥ ३० ॥
प्रकारं हि पुन: साध्यरूपो विधिरुपेक्षते ।
न पदार्थानिति हि तान्प्रतीतेनाप्युपेक्षते ॥ ३१ ॥
प्रकारेणैव संबन्धं प्रथमं प्रतिपद्यते ।
प्रकारकल्पितै: पश्चात्पदार्थैरिति दर्शितम् ॥ ३२ ॥
धर्माणामन्यदीयानां कथमन्यत्र संगम: ।
इति चेदुपकारेपि तुल्यमेतदथोच्यते ॥ ३३ ॥
नोपकारस्य संबन्ध इति हास्यमिदं वच: ।
यद्यसौ नान्यदीय: स्यात्कथं तर्ह्यतिदिश्यते ॥ ३४ ॥
अन्यत्र ह्यन्यदीयस्य देशोतिदेश उच्यते ।
तद्भावेन तत्प्राप्तौ निरोधश्चेन्न विद्यते ॥ ३५ ॥
तद्भावोपपत्त्यर्थं पदार्थेष्वपि तत्समम् ।
प्रतिपत्तिविरोधोयमन्यदीयान्यसंगमे ॥ ३६ ॥
मुखान्तरेण संबन्धे सच नास्ति कथंचन ।
ये तु नेच्छन्ति धर्माणां संबन्धं वैकृतै: सह ॥ ३७ ॥
अपूर्वे प्राकृताङ्गानां ग्रन्थस्तेषां विरुद्ध्यते ।
सप्तमाष्टमयोस्तेषां प्रकारप्राप्तिचिन्तनम् ॥ ३८ ॥
न युक्तं तत्र चिन्ता हि षट्केस्मिन्कार्यबन्धना ।
नियोगो ऽप्यत्र कार्ये चेतदर्थमपि चिन्त्यते ॥ ३९ ॥
चतुर्थाध्यायचिन्तापि षट्केस्मिन्नापतेत्तथा ।
कार्यतो ह्युपदेशार्थाद्विध्यर्थाद्यत्प्रतीयते ॥ ४० ॥
यथा तस्योपदिष्टत्वं तथाध्यक्षेण वक्ष्यते ।
तेन विध्यर्थमुत्सृज्य कार्यमन्यत्समाश्रितम् ॥४१॥
द्वारभूतमियं चिन्ता कार्यषट्के विधीयते ।
अतिदेश: पदार्थानां तेन षट्के ऽत्र चिन्तित: ॥ ४२ ॥
तस्यैव हेतुभूत: स उपकारोऽपि दर्शित: ।
षड्भिर्दीक्षयतीत्यत्र प्राकृतानां च वैकृत: ॥ ४३ ॥
अङ्गभूतेरनङ्गानां बाधश्चैवं प्रसज्यते ।
प्रधानबोधबाह्यत्वादुपकारप्रसिद्धये ॥ ४४ ॥
नैव प्रयुक्तिमात्रेण क्रियते प्राकृतं पुन: ।
अत: कार्यातिदेशोयं संमतस्त्वौपदेशिक: ॥ ४५ ॥
उपदेशप्रमेयेण विध्यर्थेनोपकल्पित: ।
प्रकृतावुपकारस्य यदपूर्वेण कल्पना ॥ ४६ ॥
नियोज्यस्य च वृद्धानामुपदेशेन संमता ।
उपदेशो हि नामात्र ग्रन्थसंदर्भ उच्यते ॥ ४७ ॥
स च प्रमाणं विध्यर्थे कार्यरूपे ऽवधारित: ।
योर्थ: प्रतीयते यस्मात्स परं नोपदेशिक: ॥ ४८ ॥
विध्यर्थ: स्वप्रतीत्यर्थं यमाक्षिपति सोपि च ।
अपर्यवस्यन्विध्यर्थो यं प्रकल्पयितुं क्षम: ॥ ४९ ॥
औपदेशिकता युक्ता तस्याप्यक्षरबोध्यता ।
उपकारविशेषं च विधि: कल्पयितुं क्षम: ॥ ५० ॥
न पदार्थविशेषं तु वैकृत: प्राकृतो यथा ।
उपकारविशेषस्य कल्पनायां क्षमोपि यत् ॥ ५१ ॥
प्रकृतेरेव गृह्णाति लाघवं तत्र कारणम् ।
क्लृप्तकल्प्यविरोधे हि लघु: क्लृप्तपरिग्रह: ॥ ५२ ॥
स्ववाक्यनामलिङ्गैश्च क्लृप्तौ संनिधाप्यते ।
पदार्थभेदप्राप्तिस्तु नोपकारं विना भवेत् ॥ ५३ ॥
तत्प्राप्ते: कार्यतस्तेषां प्रकारश्चोपदेशत: ।
विकृतौ कार्यतो धर्मा: प्रकारश्चोपदेशत: ॥ ५४ ॥
उपदिष्टेपि चैतस्मिन्नतिदेशपदाभिधा ।
निवार्यतेस्ति तस्यार्थे देशेन्यत्वं निजाद्विधे: ॥ ५५ ॥
उपदिष्टातिदिष्टत्वं न त्वेकस्य विरुद्ध्यते ।
नोपदेशातिदेशौ हि प्रमाणे इति संमते ॥ ५६ ॥
उपदेशातिदेशौ हि प्रमाणे भवतो यदि ।
तदा विरोधो जायेत न चैवमिह संमतम् ॥ ५७ ॥
तेनोपदेशमेयत्वादुपदेशत्वमिष्यते ।
अन्यस्मिन्नन्यताभावादतिदेशोपि युज्यते ॥ ५८ ॥
उपदेश: कार्यरूपप्रमाणाद्वयसंश्रयो ।
षट्कावुभौ नोपदेशमतिदेशं च संश्रितौ ॥ ५९ ॥
अतिदेशाश्रयत्वे हि बाधे तन्त्रेच भूयसी ।
उपदिष्टार्थविषया चिन्ता नैवोपपद्यते ॥ ६० ॥
द्वारकार्याश्रयत्वे तु सर्वासामुपपन्नता ।
चिन्तानामिति चिन्तेह युक्ता कार्यसमाश्रया ॥ ६१ ॥
नन्वेवमुपदिष्टत्वं पदार्थानां प्रसज्यते ।
कार्यवत्तैरपि यतो विध्यर्थैरन्वित उच्यते ॥ ६२ ॥
उच्यते शाब्दतैवं स्यान्नोपदेशप्रमेयता ।
प्रमाणद्वयभेदोयमुपस्थाननिबन्धन: ॥ ६३ ॥

Digitized by Google

उपदेशोपस्थितो यो वाक्यार्थान्वयमृच्छति ।
स औपदेशिको ज्ञेयः सच द्वेधमुपस्थितः ॥ ६४ ॥

ग्रन्थेनोपस्थितश्चैव विध्यर्थोपस्थितस्तथा ।
यथोपकारः प्रकृतौ नियोज्यो वा श्रुतो यथा ॥ ६५ ॥

प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ।
तेनोपदेशिको नासौ केवलं कार्यबन्धनः ॥ ६६ ॥

पूर्वनिबन्धनिबन्धनमपनेतुं सम्यगीहमानेन ।
शालिकनाथेन कृतः कृतिनामानन्ददोयत्नः ॥ ६७ ॥

इति श्रीशालिकनाथमिश्रविरचितायां प्रकरणपञ्जिकायामतिदेशपारायणं नाम प्रकरणं संपूर्णम् ॥

॥ समाप्ता च प्रकरणपञ्जिका ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीमद्भगवत्पतञ्जलिविरचितार्याः ॥

गर्भगृहवाससंभवजन्मजरामरणविप्रयोगाब्धौ ।
जगदालोक्य निमग्नं प्राह गुरुं प्राञ्जलिः शिष्यः ॥ १ ॥

त्वं साङ्गवेदवेत्ता छेत्ता संशयगणस्य ।
अतं वक्ता संसारार्णवतरणं प्रश्नं पृच्छाम्यहं भगवन् ॥ २ ॥

दीर्घे ऽस्मिन्संसारे संसरतः कस्य केन संबन्धः ।
कर्मशुभाशुभफलमनुभवति गतागतैरिह कः ॥ ३ ॥

कर्मगुणजालबद्धो जीवः संसरति कोशकारइव ।
मोहान्धकारगहनात्तस्य कथं बन्धनान्मोक्षः ॥ ४ ॥

गुणपुरुषविभागज्ञे धर्माधर्मौ बन्धकौ न भवतः ।
इति गदितं प्रकृतिं पुरुषं च मे ब्रूहि ॥ ५ ॥

क्षित्याधारो भगवान्पृष्टः शिष्येण तं स होवाच ।
विदुषामप्यतिगहनं वक्तव्यमिदं शृणु तथापि त्वम् ॥ ६ ॥

सत्यमिव जगदसत्यं मूलप्रकृतेः कृतं येन ।
तं प्रणिपत्योपेन्द्रं वक्ष्ये परमार्थसारमिदम् ॥ ७ ॥

अव्यक्तादण्डमभूदण्डाद्ब्रह्मा ततः प्रजासर्गः ।
मायामयः कल्पान्ते संह्रियते पुनः क्रमशः ॥ ८ ॥

मायामयोप्यचेतनो गुणकरणगणः करोति कर्माणि ।
तदधिष्ठाता देही सचेतनोपि करोति न किंचिदपि ॥ ९ ॥

यद्वदचेतनमपि सन्निकटस्थे भ्रामके भ्रमति लोहम् ।
तद्वत्करणसमूहश्चेष्टते चिदधिष्ठिते देहे ॥ १० ॥

यद्वत्सवितर्युदिते करोति कर्माणि जीवलोको ऽयम् ।
न च तानि करोति रविर्न कारयति तद्वदात्मापि ॥ ११ ॥

मनसो ऽहंकारमूर्छितस्य चैतन्यविबोधितस्येह ।
पुरुषाभिमानसुखदुःखभावना भवन्ति मूढस्य ॥ १२ ॥

कर्त्ता भोक्ता द्रष्टा ऽस्मि कर्मणामुत्तमादीनाम् ।
इति तत्स्वभावविमलो मन्यते सर्वगोप्यात्मा ॥ १३ ॥

नानाविधवर्णानां वर्णान्धत्ते यथा ऽमलः स्फटिकः ।
तद्वदुपाधेर्गुणतो भावितस्य भावं विभुर्धत्ते ॥ १४ ॥

गच्छतिगच्छतिसलिले दिनकरबिम्बंस्थिते स्थितिंयाति ।
अन्तःकरणे गच्छति गच्छत्यात्मापि तद्वदिह ॥ १५ ॥

राहुरदृश्योपि यथा शशिबिम्बस्थः प्रकाशतामेति ।
सर्वगतो ऽपि तथात्मा बुद्धिस्थो दृश्यतामेति ॥ १६ ॥

आदर्शे मलरहिते यद्वद्रूपं विचिन्वते लोकाः ।
आलोकयति तथात्मा विशुद्धबुद्धौ स्वमात्मानम् ॥ १७ ॥

सर्वगतं निरुपममद्वैतं तच्च चेतसा गम्यम् ।
यद्बुद्धिगतं ब्रह्मोपलभ्यते शिष्य बोध्यं तत् ॥ १८ ॥

बुद्धिमनो ऽहंकारास्तन्मात्रेन्द्रियगणाः सभूतगणाः ।
संसारसर्गपरिरक्षणक्षमाः प्राकृता हेयाः ॥ १९ ॥

धर्माधर्मौ सुखदुःखे कल्पना स्वर्गनरकवासश्च ।
उत्पत्तिस्थितिनिधनवर्णाश्रमा न सन्तीह परमार्थे ॥ २० ॥

मृगतृष्णायामुदकं शुक्तौ रजतं भुजंगमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवद्भ्रान्तमखिलं जगद्रूपम् ॥ २१ ॥

यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्वेषु ।
तद्वत्सकलोपाधिष्ववस्थितो भाति परमात्मा ॥ २२ ॥

खमिव घटादिष्वन्तर्बहिः स्थितं ब्रह्म सर्वेषु पिण्डेषु ।
देहे ऽहमित्यनात्मनि बुद्धिः संसारबन्धाय ॥ २३ ॥

अमलः सकृद्विभातश्चैतन्यात्मा खवद्व्यापी ।
सर्वविकल्पनहीनः शुद्धो बुद्धो ऽजरो ऽमरः शान्तः ॥ २४ ॥

रसफाणितशर्करिकागुडखण्डाद्या विकृतयो यथेक्षोः ।
तद्वदवस्थाभेदाः परमात्मन एव बहुरूपाः ॥ २५ ॥

विज्ञानान्तर्यामिप्राणविराड्देहजातिपिण्डान्ताः ।
व्यवहारस्यस्यात्मन एते ऽवस्थाविशेषाः स्युः ॥ २६ ॥

रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्वद्द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम् ॥ २७ ॥

एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या ।
न विदन्ति वासुदेवं सर्वात्मानं नरा मूढाः ॥ २८ ॥

प्राणाद्यनन्तभेदैरात्मानं संवितत्येन्द्रजालमिव ।
उपसंहरति वासुदेवः स्वभूत्या क्रीडमानइव ॥ २९ ॥

त्रिभिरेव विश्वतैजसप्राज्ञैस्तैरादिमध्यनिधनाख्यैः ।
जाग्रत्स्वप्नसुषुप्तैर्भ्रमभूतैश्छादितं तुरीयम् ॥ ३० ॥

मोहयतीवात्मा न स्वमायया द्वैतरूपया देवम् ।
उपलभते स्वयमेव गुहायां पुरुषमात्मानम् ॥ ३१ ॥

ज्वलनाद्धूमोद्गतिभिर्विविधाऽऽकृतिरम्बरे यथा भाति ।
तद्वद्विष्णोः सृष्टिः स्वमायया द्वैतविस्तरा भाति ॥ ३२ ॥

शान्तइव मनसि शान्ते हृष्टे हृष्टइव मूढइव मूढे ।
व्यवहारस्थोऽपि पुनः परमार्थत ईश्वरो भवति ॥ ३३ ॥

जलधरधूमरजोभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत्प्रकृतिविकारैः परामृष्टोऽमलः पुरुषः ॥ ३४ ॥

एकस्मिन् घटगगने धूमादिमलावृते ऽशेषाः ।
न भवन्ति मलोपेता बन्धो जीवे ऽपि तद्वदिह ॥ ३५ ॥

देहेन्द्रियेषु नियताः कर्मगुणाः कुर्वते स्वभोगार्थम् ।
नाहं कर्तेति न ममेति विजानतः कर्म नैव बध्नाति ॥ ३६ ॥

अन्यशरीरेण कृतं यत्कर्म भवेद्येन देह उत्पन्नः ।
तदवश्यं भोक्तव्यं भोगादेव क्षयोऽस्य निर्दिष्टः ॥ ३७ ॥

प्राग् ज्ञानोत्पत्तेश्चित्तं यत्कर्म ज्ञानशिखिशिखालीढम् ।
बीजमिव दहनदग्धं जन्मसमर्थं न तद् भवति ॥ ३८ ॥

यद्वद्दिपीकातूलं पवनबलं दश दिशो याति ।
ब्रह्माणि तत्त्वज्ञानात्तथैव कर्माणि तत्त्वविदः ॥ ३९ ॥

ज्ञानप्राप्तेरूर्ध्वं क्रियमाणं कर्म यत्तदपि नाम ।
न श्लिष्यति कर्तारं पुष्करपर्णं यथा वारि ॥ ४० ॥

वाग्देहमानसैरिह कर्म चयः क्रियतइति बुधाः प्राहुः ।
एकोऽपि नाहमेषां न च कर्ता कर्मणामस्ति ॥ ४१ ॥

कर्मफलबीजनाशाज्जन्मविनाशो न चात्र सन्देहः ।
बुद्धत्वमपगततमाः सवितेवाभाति भारूपः ॥ ४२ ॥

क्षीराद्दुद्धृतमाज्यं क्षिप्तं यद्वच पूर्ववत्तस्मिन् ।
भवति गुणेभ्यस्तद्वत्पृथक्कृतश्चेतनोऽप्यात्मा ॥ ४३ ॥

गुणमयमायागहनं निर्धूय यथा तमः सहस्रांशुः ।
बाह्याभ्यन्तरचारी सैन्धवघनवद्भवेत्पुरुषः ॥ ४४ ॥

यद्वद्देहावयवा मृदेव पार्थो विकारजातयश्च ।
तद्वत्स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥ ४५ ॥

एकस्मात्क्षेत्रज्ञाद्भूयः क्षेत्रज्ञजातयो जाताः ।
लोहगतादिव दहनात्समं ततो विस्फुलिङ्गकणाः ॥ ४६ ॥

त्रैगुण्यसङ्गदोषाद्वद्धा इव धान्यजातयः स्वतुषैः ।
जन्म लभन्ते तावद्यावज्ज्ञानाग्निना ऽदग्धाः ॥ ४७ ॥

त्रिगुणा चैतन्यात्मनि सर्वगते ऽवस्थिताखिलाधारे ।
कुरुते सृष्टिमविद्या सर्वात्मा स्पृश्यते तया नात्मा ॥ ४८ ॥

रज्ज्वां भुजङ्गहेतो प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशे न च कारणमस्ति तद्वदिह ॥ ४९ ॥

जन्मविनाशगमनागमनविवर्जितो नित्यम् ।
आकाशमिव घटादिषु सर्वात्मा सर्वगो ऽबद्धः ॥ ५० ॥

कर्मशुभाशुभफलचयसुखदुःखैर्योगो भवत्युपाधीनाम् ।
तत्संसर्गाद्वद्धस्तस्करसङ्गादतस्करवत् ॥ ५१ ॥

देहगुणकरणगोचरसङ्गः पुरुषस्य यावदिह भवति ।
तावन्मायापाशैः संसारे बद्धवद्भवति ॥ ५२ ॥

मातृपितृपुत्रदारधनभोगविभागसुखदुःखसंमूढः ।
जन्मजरामरणमये चक्रमिव भ्राम्यते जन्तुः ॥ ५३ ॥

लोकव्यवहारकृतां य इहाविद्यामुपासते मूढाः ।
ते जननमरणधर्मिणो ऽन्धे तमसि प्रपद्यन्ते ॥ ५४ ॥

हिमफेनबुद्बुदाइव जलस्य धूमोद्गमो यथा वह्नेः ।
तद्वत्स्वभावभूता मायैषा कीर्तिता विष्णोः ॥ ५५ ॥

एनां द्वैतविकल्पभ्रमस्वरूपां विमोहिनीं मायाम् ।
उत्सृज्य सकलनिष्कलमद्वैतं भावयेद्ब्रह्म ॥ ५६ ॥

यद्वत्सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वद्ब्रह्मणि विमले भावनया तन्मयत्वमुपयाति ॥ ५७ ॥

को मोहः कः शोकः सर्वं ब्रह्मावलोकयतः ।
प्रारब्धान्ते साक्षाद्ब्रह्मीभूतः स्वसंवेद्यः ॥ ५८ ॥

ब्रह्मैवेदं सर्वं निष्कलमद्वैतं यदैव भातीह ।
मोहगहनाद्विमुक्तस्तदैव परमेश्वरीभूतः ॥ ५९ ॥

त्यक्तोपाधिः स्फटिकः स्वप्रभया भाति निर्मलो यद्वत् ।
चिद्व्याप्तं चैतन्यं तथा विभातीह निरुपाधि ॥ ६० ॥

गुणकरणगणशरीरप्राणतन्मात्रजातिसुखदुःखैः ।
अपरामृष्टो व्यापी चिद्रूपो ऽहं सदा विमलः ॥ ६१ ॥

द्रष्टा श्रोता घ्राता स्पर्शयिता ग्रहीता च देही ।
देहेन्द्रियविवर्जितश्च कर्त्ता भोक्ता ह्यकर्त्तासौ ॥ ६२ ॥

एकोनेकइव स्थितो ऽहमैश्वर्ययोगः स एवात्मा ।
व्याप्याकाशवदखिलं न कश्चिदप्यत्र संदेहः ॥ ६३ ॥

यद्यत्सिद्धान्तेष्वागमतर्कादिषु भ्रमन्ति रागान्धाः ।
अनुमोदामस्तत्तेषां सर्वात्मवादधिया ॥ ६४ ॥

सर्वाकारो भगवानुपास्यते येन भावेन ।
तंतं भावं भूत्वा चिन्तामणिवत्तमभ्येति ॥ ६५ ॥

नारायणमात्मानं ज्ञात्वा सर्गस्थितिप्रलयहेतुम् ।
सर्वज्ञः सर्वगतः सर्वः सर्वेश्वरो भवति ॥ ६६ ॥

आत्मज्ञस्तरति शुचं यस्माद्विद्वान् बिभेति न कुतश्चित् ।
मृत्योरपि मरणभयं न भवत्यन्यतः कुतस्तस्य ॥ ६७ ॥

तथा प्रकृतिं पुरुषं विज्ञाय निरस्तकल्पनाजालः
आत्मारामः पुरुषः परमात्मा केवलीभवति ॥ ६८ ॥

Digitized by Google

क्षयवृद्धिवध्यघातकबन्धविमोक्षैर्विवर्जितं नित्यम् ।
परमार्थतत्त्वमेकमतोऽन्यदनृतं सर्वम् ॥ ६९ ॥
नलकदलीवेणुबाणा नश्यन्ति यथा पुष्पमासाद्य ।
तद्वत्स्वभावभूताः स्वभावतां प्राप्य नश्यन्ति ॥ ७० ॥
भिन्ने ऽज्ञानग्रन्थौ छिन्ने संशयगणे शुभाशुभे क्षीणे ।
दग्धे तु जन्मबीजे परमात्मानं हरिं याति ॥ ७१ ॥
बुद्ध्वा विभक्तां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
मुच्यते सर्वकर्मभिरम्बुजपत्रं यथा सलिलैः ॥ ७२ ॥
मोक्षस्य नैव कश्चिद्वासो न वा गमनमन्यत्र ।
अज्ञानहृदयग्रन्थेर्भेदो यस्तं विदुर्मोक्षम् ॥ ७३ ॥
बुद्ध्वैवमसत्यमिदं विष्णोर्मायात्मकं जगद्रूपम् ।
सर्वद्वन्द्वसहिष्णुर्योगासक्तो भवेच्छान्तः ॥ ७४ ॥
त्यक्त्वा सर्वविकल्पानात्मस्थं निश्चलं मनः कृत्वा ।
दग्धेन्धन इव वह्निः सर्वस्यात्मा भवेच्छान्तः ॥ ७५ ॥
अश्नन्यद्वा तद्वा संवीतो येन केन चिच्छान्तः ।
यत्र क्व चन शायी मुच्यते सर्वभूतात्मा ॥ ७६ ॥
इति शिष्य ब्रह्म यथाऽभिहितं परमं विधूय नानात्वम् ।
निरुपमपरमानन्दं यो वेद स तन्मयो भवति ॥ ७७ ॥
हयमेधसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥ ७८ ॥
मदकोपहर्षमत्सरविषादभयपरुषवर्जितवाग्बुद्धिः ।
निःस्तोत्रवषट्कारो जडवद्विचरेदगाधमतिः ॥ ७९ ॥
उत्पत्तिनाशवर्जितमेकं परमार्थमुपलभ्य ।
कृतकृत्यः सफलजन्मा सर्वगतस्तिष्ठति यथेष्टम् ॥ ८० ॥
श्वपचगृहे तीर्थे वा नष्टस्मृतिः परित्यजन्देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥ ८१ ॥
पुण्याय तीर्थसेवा निरयाय श्वपचादनं निधनगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किं तेन ॥ ८२ ॥
परमार्थमार्गसाधनमभ्यस्याप्राप्य योगमपि नाम ।
सुरलोकभोगभोगी मुदितमना मोदते सुचिरम् ॥ ८३ ॥
विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः ॥ ८४ ॥
महता कालेन पुमान्मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं यत्तत्परं पदं विष्णोः ॥ ८५ ॥
वेदान्तशास्त्रमखिलं विलोड्य शेषस्तु जगदाधारः ।
आर्यापञ्चाशीत्या बबन्ध परमार्थसारमिदम् ॥ ८६ ॥
॥ इति श्रीमद्भगवच्छेषकृतार्यापञ्चाशीतिः समाप्ता ॥

महता परिश्रमेण संपाद्य संशोध्य प्रकाशितवानिदं सांख्य० बालशास्त्री।

॥ अथ बालभारस्य ॥

॥ पञ्चमः सर्गः ॥

सदा हृदन्तः स्फुरितस्य विष्णो-
र्विस्तारिणीभिर्द्युतिधोरणीभिः ।
रोमावलिद्वारविनिःसृताभि-
रिवासितः सत्यवतीसुतोऽव्यात् ॥ १ ॥
इतो निषिद्धोऽपि नदीजमुख्यै[1]-
र्दुर्योधनोऽधत्त धियं प्रयाणे ।
मतङ्गजस्तुङ्गनगेन्द्रशृङ्गात्
पतन् लताद्यैरपि रुध्यते किम् ॥ २ ॥
पथ्यं वचो बाल इवातुरोऽयं
क्रूरो न गृह्णाति सुयोधनो नः ।
रणे प्रवृत्ते कुरुपाण्डवानां
भूमिर्भविष्यत्यखिलापि नैषा ॥ ३ ॥
इति प्रणीतां विदुरेण वाणी-
माकर्ण्य कुन्ती कलितोरुचिन्ता ।
ततस्त्रिमार्गापुलिने दिनेश-
सूनुं दिनेशस्तुतिलीनमागात् ॥ ४ ॥
युग्मम् ।

आ पृष्ठतापादुदयन्तमर्कं
राधेयमारोपयितुं प्रवृत्तम् ।
प्रतीक्षमाणा सुतवत्सलासौ
तापार्तिताम्यत्तनुरत्र तस्थौ ॥ ५ ॥
कर्णं ह्रियान्तेऽथ पृथेत्यवोचत्
कन्यात्वजातस्तनयोऽसि मे त्वम् ।
देवः सहस्रांशुरसौ पिता ते
प्रभूतधाम्नो न पुनः प्रसूतः ॥ ६ ॥
देवेन साक्षाद्रविणाप्यमुष्मि-
न्ननूदिते तद्वचने दिवोऽन्तः ।
रोमाञ्चितस्तीर्थशतानि जानन्
पदानि कर्णोऽथ ननाम मातुः ॥ ७ ॥
निजाङ्घ्रियुग्मानतमूर्ध्नि कर्णे
द्राक् प्रस्नुवाना स्तनयोः पयांसि ।

१ इतश्च कैश्चिद्विनिवारितोऽपि इति पा० ।

Digitized by Google

वत्स स्वमूर्धानमितो विधेहो-
त्युवाच कुन्ती स्रुतसंमदास्रुः[1] ॥ ८ ॥
जगाद कर्णः किमितः करोमि
मातः शिरः स्वं यदि ह्रापयन्ति ।
जितद्युकुल्यास्त्रिजगत्यतुल्या-
स्त्वत्क्षीरधाराधुतपापभाराः ॥ ९ ॥
स्तन्यानि धन्यास्तव ते निपीय
मत्सोदरा विश्वजितो बभूवुः ।
धन्योऽहमप्यद्य जयी प्रयाण-
दृशो यदेतैरधुनाभिषिच्ये ॥ १० ॥
अप्येकवारं यदि पायितः स्यां
मातः पयस्तद्भुवि केन जीये ।
न पायितः साधु मृधे जयन्तु
पञ्चापि मत्पञ्चतया कनिष्ठाः ॥ ११ ॥
इत्युक्तिभाजं नतमङ्गराजं
कुन्ती कराभ्यां समुदस्य सद्यः ।
दृगम्बुजो ते परिचुम्ब्य मूर्ध्नि
दीनाननं नन्दनमित्युवाच ॥ १२ ॥
थूथूकृतं तद्वच एव यो वः
षण्णां विपक्षोऽस्त्वतु पञ्चतां सः ।
ज्येष्ठस्य ते धर्मसुतादयोऽपि
भवन्तु भूपस्य भुजिष्यरूपाः ॥ १३ ॥
त्वय्यागतेऽस्मासु बलेन कस्य
मृधं विधातास्ति सुयोधनोऽपि ।
इत्याप्य सौख्यं परिपात वत्सा-
स्त्वं च क्षितिं पञ्च च ते शतं च ॥ १४ ॥
अथाङ्गजः स्माह रथाङ्गबन्धो-
र्मा मेति वोचः कुविचारमम्ब ।
अद्यास्तमित्रे मयि निष्कुलोऽय-
मीदृग्जनोक्तिस्तव लाञ्छनाय ॥ १५ ॥
मदेकविश्रम्भधनं विहाय
दुर्योधनं युद्धधुरीणमद्य ।
सुते मयि द्वेषिपरे न धत्तां
शशीव शूरोऽपि कलङ्कपङ्कम् ॥ १६ ॥
भयान्न चाविष्कृतसोदरत्वात्
कर्णः श्रितो युद्धभयेन पार्थान् ।
इत्युक्तिभिः कौतुकिनां जनाना-
मवीरसूर्मा भव वीरमातः ॥ १७ ॥
युधिष्ठिरं सत्यगिरं प्रतिज्ञा-
निर्वाहबन्धूनपरांश्च बन्धून् ।
लज्जे श्रयन् संयति कौरवेभ्यः
श्रियं ददामीतिमृषाप्रतिज्ञः ॥ १८ ॥
तुङ्गाभिमानः कृपकुम्भयोनि-
पितामहद्रौणिमहासहायः ।
विनापि मां कोपनिधिः स धीरः
पक्षद्वयेऽपि क्षयकृन्नरेन्द्रः ॥ १९ ॥
मातर्वयं किं तनयाः षडेव
न ते शतं किं तव देवि पुत्राः ।
मुक्त्वा स्वकुल्यव्यसने शतं तान्
पञ्चाश्रयेऽहं किल को विवेकः ॥ २० ॥
इति प्रवीरव्रतधीरवाच-
मुवाच हृष्टा तनयं सतीयम् ।
साधूदितं त्वज्जनकः स कर्म-
साक्षी जगच्चक्षुरितोऽस्तु तुष्टः ॥ २१ ॥
स्थिरप्रतिज्ञं श्रितवीरधर्मं
याचे पुनः किंचिदहं मुहुस्त्वाम् ।
स्थिरश्चिरं तिष्ठ सुहृत्सु वत्स
यच्छाभयं किंतु निजानुजेषु ॥ २२ ॥
पृथामथावोचत भानुसूनुः
कथं वृथा मामिति याचसे त्वम् ।
त्वदङ्गजानामभयं भयं नः
प्रागेव दैवेन रणे प्रदत्तम् ॥ २३ ॥
मातर्महोत्पाततिः पुरे नः
प्रतिक्षणं कौरवभैरवास्ति ।
तप्ता निशीन्दुः कुरुपूर्वजः स्यात्
क्रुधेव दुर्योधनदुर्नयस्य ॥ २४ ॥
चण्डालभूतेष्विव दुश्चरित्रै-
र्धावन्ति दूराद्भषणा भषन्तः ।

१ च्युतसंमदाश्रुम् इति पा० ।

काकाश्च मौलीनभि कौरवेषु
मृतेष्विव क्रूररवा: पतन्ति ॥ २५ ॥
ह्रीणा इव स्वैश्चरितै: स्वमास्यं
स्वस्याप्यहो दर्शयितुं न शक्ता: ।
इतीव दिक्ष्वेषु विलोकयाम:
कबन्धमात्रं मुकुरेषु गात्रम् ॥ २६ ॥
प्रासादवृन्देऽस्मदभाग्यदुष्ट-
भूतग्रहार्ता इव तावदर्चा: ।
स्विद्यन्ति कम्पं दधते हसन्ति
वमन्ति रक्तं निपतन्ति भूमौ ॥ २७ ॥
कुहूकलामस्मदकीर्तिलेपै-
रिवाश्रयत् कार्तिकपूर्णिमापि ।
पतन्ति चास्मत्क्षयकालरक्त:-
करालवक्त्राग्निशिखावदुल्का: ॥ २८ ॥
धातापि संमूढ इव क्षयेऽस्मिन्
वृक्षेषु पुष्पाणि विपर्ययेण ।
करोत्यकालेऽधिकहीनगात्रान्
डिम्भानजात्यानपि गर्भिणीनाम् ॥ २९ ॥
एकाङ्गनायां बहुशोऽपि जाता:
सद्योऽपि नृत्यन्ति हसन्ति कन्या: ।
प्रविष्टमात्रा इव विश्वरङ्गे
सद्योऽस्मदायु:क्षयनाटिका या: ॥ ३० ॥
आसन्नमृत्यून् मृतभक्षणेच्छु-
व्यालोलजिह्वावलय: कृशानु: ।
संध्याद्वये पश्यति नित्यमस्मान्
दिग्दाहदम्भेन दिशोऽधिरुह्य ॥ ३१ ॥
स्वप्ने तु दृष्टा दिशि दक्षिणस्यां
यान्ता मया प्रौढमयाधिरूढा: ।
स्वशोणचीराभरणा: पितॄणां
पत्युर्गृहं गन्तुमिवात्तवेगा: ॥ ३२ ॥
प्रासादमारुह्य सहस्रपादं
स्वं मूर्तिमत् पुण्यमिवोल्लसन्त: ।
स्वप्ने व्यलोक्यन्त मया जयश्री-
विश्रामभूमिस्तु निजानुजास्ते ॥ ३३ ॥
भवन् ध्रुवं धर्मभवोऽद्रिवर्ती
भीम: किरीटी घृतपायसाश: ।
स्वप्ने मयैक्ष्यन्त यमौ गजस्थौ
नृवाहनस्थौ हरिसात्यकी च ॥ ३४ ॥
युष्मत्कुलेऽमी खलु सप्त दृष्टा:
स्वप्ने विशुद्धाम्बरलेपमाल्या: ।
दौर्योधने तु त्रय एव सैन्ये
कृप: कृपीभू: कृतवर्मवीर: ॥ ३५ ॥
एवं दशैवाखिलसैन्ययुग्म-
तृप्तस्य मृत्योर्विवशीभवन्त: ।
क्षीणां क्षितौ क्षत्रियजातिमत्र
समुद्धरिष्यन्ति पुन: प्रवीरा: ॥ ३६ ॥
बिभीहि मा पञ्चसु पाण्डवेषु
मृत्युर्भयेनेव न याति मात: ।
गन्ता स कौरव्यशतं बहूनां
न पक्षपातं युधि क: करोति ॥ ३७ ॥
अथो पृथोवाच यदीदमस्ति
तथाप्यभीतिं वितरानुजेषु ।
कल्याणलीनेऽपि सुते पितॄणा-
मनर्थशङ्कीनि न किं मनांसि ॥ ३८ ॥
अथाङ्गभर्ता गदति स्म मात-
र्बद्धप्रतिज्ञोऽस्मि वधेऽर्जुनस्य ।
तदेनमुन्मुच्य मया चतुर्णां
वितीर्यते भीतभियामभीति: ॥ ३९ ॥
राज्ञां समूहस्य समक्षमात्तां
मुञ्चन् प्रतिज्ञां रणसीम्नि लज्जे ।
मा भूत् पुनर्भीतिलवोऽपि मात-
रयं मया न म्रियते किरीटी ॥ ४० ॥
पुरा युधाभ्यासविधावहं-
युरहं धृतस्पर्धमनेन सार्धम् ।
द्रोणं गुरुं भक्तिभरैरयाचे
ब्रह्मास्त्रमस्मिन् विहितावतारम् ॥ ४१ ॥
नैवेदमज्ञातकुलस्य कल्प्यं
कदाचिदित्यर्जुनपक्षपातात् ।

Digitized by Google

निराकृतोऽहं गुरुणा जगाम
रामस्य धामाद्रिपतिं महेन्द्रम् ॥ ४२ ॥
अपेक्षयन्मे महास्त्रदायी
ममायमित्यादृतविप्रमायः ।
अहं महाभक्तिभरैर्गुरुं तं
संतोष्य कां प्राप न चापविद्याम् ॥ ४३ ॥
गुरुप्रसादोरुमदात् कदाचित्
क्वाचिन्मया मोहमयाशयेन ।
तपोवनान्तर्भ्रमता हता गो-
स्त्रस्तो भियेवाशु वृषस्तदेव ॥ ४४ ॥
अथाकुलः कश्चन तद्वने मां
शशाप विप्रः कटुकोपकम्प्रः ।
यं जेतुमिच्छन्नसि तन्मृधे ते
रथाङ्घ्रियुग्मं गिलतु क्षमेति ॥ ४५ ॥
मया स विप्रश्चटुचातुरीभि-
राराध्यमानोऽपि न कोपमौज्झत् ।
प्रज्वालितः शैलवनेष्वदग्ध्वा
जलादिसेकेन निवर्ततेऽग्निः ॥ ४६ ॥
तच्छापशल्यस्खलनातुरोरः-
क्षीणबुद्धेरपि मे क्रमेण ।
गुरुप्रसादात् तृणितार्जुनोऽभू-
द्ब्रह्मास्त्रमुख्यास्त्रसहस्रलाभः ॥ ४७ ॥
मूर्धानमाधाय ममाङ्कदेशे
सुखेन सुष्वाप गुरुः कदाचित् ।
दुःखं हृदः शापमयं जयन्ती
क्षणादभूदूरुतलेऽतिपीडा ॥ ४८ ॥
गुरुर्न जागर्तु ममेत्यकम्प्रः
केयं व्यथेत्याकलयामि यावत् ।
विनिर्ययौ वज्रमुखोऽष्टपाद-
स्तावत् ततोरुर्मणुकाख्यकीटः ॥ ४९ ॥
गुरौ मदूरुक्षतजोर्मिसक्त-
तन्द्रालुनिद्रेऽथ वितन्द्रकोपे ।
किमेतदित्यालपति स्वमङ्गं
खादन् मयादर्शि स वज्रतुण्डः ॥ ५० ॥

दृष्ट्वाथ दृष्ट्या सहसा स कीटो
भस्मीकृतस्तेन तपोधनेन ।
दिव्यां दधानस्तनुमस्तदोषः
पुरो गुरोः कोऽपि नमन्नुवाच ॥ ५१ ॥
दैत्योऽस्मि भर्तुर्भृगुतो महर्षे-
र्भृशापराधः खलु शापमाप ।
त्वद्दर्शनानुग्रहमुक्तकीट-
योनिः स्फुरामीति तिरोदधेऽसौ ॥ ५२ ॥
क्रुधाभ्यधान्मामथ कोपधाम-
व्याधामधामाचि दहन्मुनीन्द्रः ।
रे क्षत्रगोप क्षततोऽप्यकम्प्रो
विप्रोऽसि न त्वं क्व नु तस्य सत्त्वम् ॥ ५३ ॥
निर्माय मायामिति कामितास्त्र-
विद्यानवद्या शठ हा गृहीता ।
महाम्बुदे व्योम्नि सोममूर्ति-
रिवोज्ज्वलापि त्वयि निष्फलास्तु ॥ ५४ ॥
प्राप्तं त्वया ब्राह्मणमायया यद्
ब्रह्मास्त्रमेतत् तदहो महाजौ ।
मृत्योर्दिने द्वेषिहतिप्रयुक्तं
विनाशमेष्यत्यकृतार्थमेव ॥ ५५ ॥
इत्यत्र तादृग्गुरुसेवयापि
तापाय शापोऽजनि नास्त्रशक्तिः ।
अभाग्यभाजां व्यवसायकर्म
महन्महत्यै विपदेऽपदिष्टम् ॥ ५६ ॥
किंचाटवीयायिषु पाण्डवेषु
स्वप्ने सवित्रा निशि वारितोऽपि ।
इन्द्राय विप्रेन्द्रतयार्थितेऽह्नि
ते कुण्डले तत् कवचं च दत्तम् ॥ ५७ ॥
गिलिष्यति क्ष्मा समरे रथाङ्घ्री
शापात् तथास्त्रं प्रभविष्यति क्व ।
विद्वेषिणां संमुखभानुकल्पं
तदम्ब ताटङ्कयुगं ययौ मे ॥ ५८ ॥
गतं च तद्वर्म सकोपशक्र-
क्षिप्तेन नूनं पविनाप्यभेद्यम् ।

तत् कर्मणा केन मया स विष्णु-
र्जेयो जितः संयति येन रुद्रः ॥ ५९ ॥
छित्त्वा श्रुती स्वेन तनुं च भित्त्वा
तदा तु मे कुण्डलवर्मदातुः ।
सत्त्वेन तुष्टो हरिरेकवीर-
च्छिदं ददौ शक्तिमियं ममाग्रा ॥ ६० ॥
न सापि शक्तिः प्रभवत्यवश्यं
पार्थे कृतार्थे हरिमन्त्रितेन ।
तत् सर्वथा सर्वजितोऽनुज्ञा मे
दशापि जेष्यन्ति भुवोर्दिशोऽमी ॥ ६१ ॥
किंचात्मनः स्वप्ननिमित्तदिष्टं
जानामि मृत्युं पुनरस्मि धन्यः ।
मातः प्रयाणावसरेऽद्य यत् त्वं
तीर्थानि सर्वाण्यपि वीक्षितासि ॥ ६२ ॥
इदं वदन् मातृपदं प्रणम्य
कर्णः प्रयाणाय दिदेश सैन्यान् ।
कुन्ती च सूनोर्वचनेन हर्षं
दुःखं च दीर्घं दधती जगाम ॥ ६३ ॥
अथोरुवात्योद्धुतधूलिरुग्ण-
दूर्वारिदुष्यज्जलपूर्णकुम्भः ।
कुरुप्रभोर्विस्मृतमन्त्रशून्यं
यात्राभिषेकं विदधे पुरोधाः ॥ ६४ ॥
अस्मिन्नसत्यत्वभयेन नून-
मनिर्यतः स्वस्त्ययनस्य मन्त्रान् ।
प्रसह्य कर्षन् खिदयेव भिन्न-
स्तदा द्विजानां ध्वनिराप मान्द्यम् ॥ ६५ ॥
जेता भवान् वैरिपरंपराभिः
सुदुस्तरेऽस्मिन् समरे ससैन्यः ।
ततश्चिरं तापकशूरभेद-
परायणः प्राप्नुहि गां सबन्धुः ॥ ६६ ॥
आशीर्वचोभिर्विपरीतबोध-
क्लिश्यद्विदग्धैरिति मामधानाम् ।
मुग्धः प्रमोदं दधदन्धजन्मा
रथं मृतेर्गेहमिवारुरोह ॥ ६७ ॥
युग्मम् ।

तनोति दुष्टत्वततीरतीव
यः सस्फुटं पूर्वजपातहेतुः ।
अतः पपातादिपुमानमुष्य
छत्रापदेशेन दिवो भुवीन्दुः ॥ ६८ ॥
कुमारिका मौलिगपूर्णकुम्भा
शुभार्थमानीयत संमुखं या ।
इयं स्खलित्वा पतिता जयश्री-
रिवायतस्तारतरं रुरोद ॥ ६९ ॥
अस्मिन्नकल्याणमरातिवीर-
महाप्रहारैर्भवितेति भीतः ।
विमुच्य मूर्धानममुष्य राज्ञः
पपात कल्याणमयः किरीटः ॥ ७० ॥
आसन्नमार्जाररणोग्रनाद-
भियस्तदा दीपधरस्य हस्तात् ।
कम्प्रादपाति क्षितिपप्रताप-
बीजत्विषा मङ्गलदीपकेन ॥ ७१ ॥
उन्मत्तकाकूत्कटदण्डपात-
स्फुटत्पुटोत्थः कटु जर्जरश्रीः ।
जयश्रियः क्रन्दितवत् तदाभूत्
प्रयाणशंसी पटहप्रणादः ॥ ७२ ॥
देवव्रतद्रोणकृपैर्महद्भिः
समं चलद्भिर्बहुशास्त्रलीनैः ।
पदे पदे दुःशकुनैरिवायं
निवार्यमाणोऽपि चचाल मूढः ॥ ७३ ॥
तदा चलद्भिः समराय नागै-
र्न्यस्तं स्वसर्वस्वमिव प्रियासु ।
मदाम्बुरोलम्बकदम्बचुम्ब्य-
माविर्बभूव द्विरदीषु भूरि ॥ ७४ ॥
प्रदीपनैस्तत्र तदात्वदीप्र-
स्तापः पृथिव्या निबिडोऽभविष्यत् ।
न चेत् तदा संचलतां हयाना-
मिहापतिष्यन्नयनोदकानि ॥ ७५ ॥
विभग्नचक्राः परिभूतसूता
विलीनयोक्त्राश्च्युतरश्मयोऽपि ।

Digitized by Google

युद्धोद्धुरेभद्वयरौद्रनाद-
स्त्रस्तैरकृष्यन्त रथास्तुरंगैः ॥ ७६ ॥

चेलुस्तदा निश्चितमृत्यवोऽग्रे
मा यात पश्चाद्व्रजतेति मन्ये ।
संकेत्यमाना अपि संमुखीन-
मरुच्चलैः केतुपटैर्भटौघाः ॥ ७७ ॥

एवं बलैर्मानमिव ग्रहीतुं
भोगोचितायां भुवि विस्तरद्भिः ।
आनन्द्यमानः स महाभिमानः
प्रापत् कुरुक्षेत्रमहीं महीशः ॥ ७८ ॥

रङ्गत्तुरंगोर्मिरिभाब्दशोभी
स्थूलाद्रिशाली ज्वलितायुधौर्वः ।
भूभृद्बलौघोऽयमदृष्टपार-
स्तस्थावकूपार इवेह गर्जन् ॥ ७९ ॥

नोच्छेदनीया मम पाण्डुपुत्रा
भेत्स्यामि योधानयुतं दिनेन ।
इदं वदन् सिन्धुसुतोऽभिषिक्तः
सेनापतित्वेऽथ सुयोधनेन ॥ ८० ॥

शिनिप्रवीरो मगधेशधृष्ट-
द्युम्नौ विराटद्रुपदौ शिखण्डी ।
चेदीश्वरश्चेति तपःसुतेन
स्वे सप्त सेनापतयोऽभिषिक्ताः ॥ ८१ ॥

लेभे हरिस्वीकृतसारथित्व-
प्रीतोऽर्जुनः सर्वचमूपतित्वम् ।
इत्यष्टभिस्तैः स वृतो रराज
ग्रहैर्महाधीश इव क्षितीशः ॥ ८२ ॥

एवं रणोत्के बलयोर्द्वयेऽस्मिन्
खेदं स्वकुल्यव्यसनेन बिभ्रत् ।
धार्मिं तदापृच्छ्य जगाम रामः
सरस्वतीतीरगतीर्थवीथीः ॥ ८३ ॥

त्वं मां शरण्यं वद तद्रणे त्वा-
मेवं वदन् पार्थसुयोधनाभ्याम् ।
निराकृतो रुक्मिनृपस्तदानी-
मक्षौहिणीशः स्वपुरं जगाम ॥ ८४ ॥

सुयोधनो योधवरानथोचे
कालेन को वः कियता सकोपः ।
अक्षौहिणीः सप्त तपःसुतस्य
जेतुं समर्थः समरातिरेकात् ॥ ८५ ॥

स्वं विंशता शान्तनकुम्भयोनी
कृपस्तु षष्ट्या दशभिः कृपीभूः ।
कर्णो दिनैः पञ्चभिरस्य वैरि-
क्षये समर्थं कथयांबभूवुः ॥ ८६ ॥

संपृच्छमाने नृपतौ निवेद्य-
मानेषु भीष्मेण महारथेषु ।
उक्तोऽङ्गभर्तार्धरथीति कोपात्
प्राचीं प्रतिज्ञां पुनराबबन्ध ॥ ८७ ॥

उलूकनामाथ सुयोधनेन
दूतो नियुक्तः समरोत्सुकेन ।
कोपाग्निकीलाकटुभिर्वचोभिः
सभागतं धर्मसुतं बभाषे ॥ ८८ ॥

राजन् रणं कस्य बलेन कर्तु-
मुत्कोऽसि साकं कुरुकुञ्जरेण ।
न द्यूतमेतद्विजितः क्षणेऽस्मिन्
न यासि जीवन् सह बन्धुभिः स्वैः ॥ ८९ ॥

जीवन् व्रजाशु त्यज युद्धबुद्धिं
मिष्टान्नभोजी भव सर्वदापि ।
विराटभूपौकसि सूपकार-
भूतस्य भीमस्य करप्रसादात् ॥ ९० ॥

किरीटिकोदण्डगुणाग्रधूत-
तूलालिसंपादितसूत्रजानि ।
विप्राकृतेस्तत्र तवांशुकानि
ददातु साध्वी विशदानि कृष्णा ॥ ९१ ॥

निश्चिन्तमेवं कशिपुस्तवास्मि
मा मृत्युदूतीं भज राज्यचिन्ताम् ।
इमानपि श्रीपतिसात्वतादीन्
किं कालभोज्यं कुरुषे विमूढान् ॥ ९२ ॥

अथो रथाश्वेभनृवाहनाधि-
रोहस्पृहा काचन ते यकास्ति ।

तद्दासतामाशु सुयोधनस्य
भज स्वयं सेवककामधेनो: ॥ ९३ ॥
इत्यस्य वाग्भि: स्फुटनिष्ठुराभि-
र्भुजाभृतां कोपकुटुम्बितानाम् ।
कृष्णां द्युति: कौरवकालरात्रि-
संध्येव मध्येजगदुद्दिदीपे ॥ ९४ ॥
क्रोधज्वलच्चक्षुरभीषुभिन्ना:
कनीनिकांशुप्रकरा न केषाम् ।
दूतेऽत्र पेतु: प्रलयानलार्चि-
र्जटालकालायसदण्डचण्डा: ॥ ९५ ॥
हस्तेन चेदिक्षितिप: शतघ्नी-
मुदास घात्या: शतमित्यमर्षी ।
स्थाप्याश्च पञ्चेति महीं महाङ्घ्रि-
घातेन चक्रेऽङ्गुलिघातचिह्नाम् ॥ ९६ ॥
यं धृष्टकेतु: स्फुटितस्फुलिङ्गं
क्रुधा कृपाणं दशनैर्ददंश ।
उत्प्रेक्षि केनास्य स नास्यवर्ती
हृद्दीप्तशौर्यानलधूमदण्ड: ॥ ९७ ॥
क्रोधात् तथा क्रौर्यमधत्त धृष्ट-
द्युम्नो यथास्य प्रतिबिम्बदम्भात् ।
कृष्णासिवर्ती पुरतो बभूव
किं किं करोमीति यमोऽपि कम्प्र: ॥ ९८ ॥
विवर्तयंश्चक्रमिवाक्षितारा-
मारोपयंश्चापमिव भ्रुवं च ।
तुलां तदागाहत मातुलस्य
पितुश्च मन्युप्रवणोऽभिमन्यु: ॥ ९९ ॥
पदाङ्गुलीभिर्युधि केऽपि केऽपि
कराङ्गुलीभिर्युधि चूरणीया: ।
घात्या द्विषोऽमी शतमित्यमर्षात्
कृष्णासुतै: पञ्चभिरभ्यभाषि ॥ १०० ॥
स्रष्टुं स्वयं शत्रुषु दीर्घमायु:
क्षणादिवापूरयितुं प्रवृत्त: ।
विभु: क्रुधाविभ्रमदुग्रवेगा-
द्दृशो निशाघस्रविवर्तहेतू ॥१०१ ॥
यथा प्रकोपेन घटासुरारि-
श्चपेटया प्राहत दूरमूरुम् ।
भियेव तद्ध्वानभुवा म्रियेरन्
समीपत: स्युर्यदि धार्तराष्ट्रा: ॥ १०२ ॥
जिह्वाञ्चलोऽराजत सृञ्जयस्य
किंचिद्विवक्षो: प्रसृतास्यलोल: ।
अत्युत्सुक: शत्रुकुलानि दग्धुं
निर्यन् हृदो मूर्त इव प्रकोप: ॥ १०३
यमौ जगत्प्राणसमीरपान-
स्फीताविवोष्ठौ यमपन्नगस्य ।
प्रदर्शयामासतुराशु खड्ग-
जिह्वाद्वयं द्यामिव लेलिहानम् ॥ १०४ ॥
भूमिं परां प्राप्यत फाल्गुनेन
भ्रूर्भालरङ्गे प्रकटं नटन्ती ।
नटीव वैरिव्ययनाटकैक-
नटस्य गाण्डीवशरासनस्य ॥ १०५ ॥
तेषां प्रकोपस्य विकस्वरस्य
द्विषन्नृमेधक्रतुपावकस्य ।
जानन्नुलूक: प्रथमाहुतिं स्वं
त्रस्तो नृपभ्रूलवसंज्ञयैव ॥ १०६ ॥

द्वेषादेष निमेषतोऽहमखिलां द्विट्संहतिं संहरे
प्राप्यैकस्य हरे रणोत्सवनवोत्साहाय साहायकम् ।
इत्युग्रे नृपमुग्रवाचि विजयिन्यभ्युत्थिते निर्भरं
वीरेन्द्रा: समनीनहन् सममसी सेनां रसेनाञ्चिताम्[1] ॥१०७ ॥

भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थिते:
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्र: कृती ।
मोहद्रोहिणि बालभारतमहाकाव्ये क्रमं पञ्चमं
तद्बोधाम्बुधिमौक्तिकस्रजि ययौ पर्वेदमौद्योगिकम् ॥१०८॥

सर्गे: पञ्चभिरुद्योगपर्वण्यस्मिन्ननुष्टुभाम् ।
श्लोका: सप्ताधिका विंशत् तथाचैव शतानि षट् ॥ १०९ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्र-
विरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के
उद्योगपर्वणि पञ्चमे समरसमारम्भो नाम पञ्चम:
सर्ग: ॥ ५ ॥ :: :: ॥

१—माञ्चिता: इति पा०

॥ अथ बालभारतस्य भीष्मपर्वारम्भः ॥

॥ तत्र प्रथमः सर्गः ॥

यत्र भात्यनपवृत्तनिवेशः
कालदेशपिहितोऽपि पदार्थः ।
वैभवानि भुवि भारतकार-
ज्ञानतत्त्वमुकुरः स करोतु ॥ १ ॥

पुण्यधाम्नि कुरुवर्षपृथिव्यां
बालवृद्धपरिसेवितदिक्षु ।
प्रोद्यतेष्वथ नृपेषु बभाषे
श्रीपराशरसुतो धृतराष्ट्रम् ॥ २ ॥

दिव्यमक्षि वितरामि तवेदं
पश्य युद्धमिति वाचि मुनीन्द्रे ।
सौबलीपतिरुवाच कुलस्य
प्रक्षयं न खलु वीक्षितुमीशे ॥ ३ ॥

संजयाय समरावधि दत्त्वा
दिव्यमक्षि सहसाथ महर्षिः ।
सर्वमेष कथयिष्यति तुभ्यं
भूपतेरिति निवेद्य तिरोऽभूत् ॥ ४ ॥

संजयोऽथ रणसीमनि गत्वा-
गत्य खिन्नमनसः क्षितिभर्तुः ।
मन्दिरोदरगतस्य पुरस्ता-
द्वक्तुमारभत वीरविनाशम् ॥ ५ ॥

राजराज शृणु यो विषमस्थः
संगराद्य गतः स न वध्यः ।
संविदं मिथ इति प्रतिपद्य
क्ष्माभृतो रणभराय विनेदुः ॥ ६ ॥

सैनयोस्तदुभयोरभयैक-
भ्राजमानमनसः शिबिरेभ्यः ।
प्राचलन् भुजभृतो युधि योधा
मूर्तिमन्त इव विक्रमभेदाः ॥ ७ ॥

अद्भुतं रणरसे मधुरत्वं
पश्य यस्य रसनाय समुत्काः ।
नैकवेलमसृजन्नुपरुद्धाः
सुभ्रुवामधरपानमभीष्टम् ॥ ८ ॥

युद्धतूर्यनिनदैर्बलवद्भि-
र्द्राग्विजित्य रुदितान्यबलानाः ।
विस्मृतस्मररसो रणरौद्रः
कश्चिदाशु चकृषे वरवीरः ॥ ९ ॥

कोऽपि वीरमुकुटः परिरभ्य
प्रेयसीमुरसिजद्वयसङ्गात् ।
संस्मृतप्रधनकुञ्जरकुम्भो
मङ्क्षु वीररसमूर्तिरचालीत् ॥ १० ॥

अस्मि वीररमणीति रमण्या-
मस्मि वीरजननीति जनन्याम् ।
संमदं विदधदुत्सुकचेता-
स्तारतूर्यतरलश्चलितोऽन्यः ॥ ११ ॥

वल्लभास्मि तव चेत् करिकुम्भा-
न्मत्कुचोन्नतिरिपून् परिभिद्य ।
यच्छ मे मणिगणानिति कान्ता-
तर्जितो युधि ययौ द्रुतमेकः ॥ १२ ॥

कम्पितः पतसि पादयुगे मे
नेत्रकोणनिहतोऽपि भयार्तः ।
युध्यसे किमिषुभिः प्रिय भीरुं
भाषुकामिति हसंश्चलितोऽन्यः ॥ १३ ॥

कामयुद्धरसरागवशात्मा
कोऽपि दोलितमना रुचिभाजम् ।
कम्पिनीमहह पाणिगृहीतां
प्रेयसीमसिलतां च ददर्श ॥ १४ ॥

मा कृथा युधि वृथात्मकलङ्कं
मां निधाय हृदये हृदयेश ।
साहसिन्निह परत्र च यन्मे
त्वं गतिः प्रियमुवाच परैवम् ॥ १५ ॥

स्पर्धया लसदसिश्चलवेणिः
कुम्भिकुम्भसुभगा सुकुचश्रीः ।
हृत् परस्य सदिषुः सकटाक्षा-
लोलयत् परचमूश्च वधूश्च ॥ १६ ॥

अस्मि वीरतनया वरवीर-
प्रेयसी च कुरुवीरसवित्री ।

Digitized by Google

अद्य कृत्यसमरैरिति माता
कंचिदाह तिलकाक्षतपूर्वम् ॥ १७ ॥

पत्युरेव पुरतः सुतमेका स्माह
साहसनिधेः समरोत्कम् ।
विक्रमं युधि तथा विदधीथा
नो यथा भवति वत्स विकल्पः ॥ १८ ॥

उत्सुकास्मि तव संमुखपश्चा-
द्घातपङ्क्तिममृतेश्च विशेश्च ।
अर्जितैर्निजसतीव्रतशक्त्या
सेक्तुमित्यवददङ्गजमन्या ॥ १९ ॥

आशिषं च तिलकं च जनन्या
मन्यते स्म कवचाधिकमन्यः ।
तेन संयति स एव भटानां
विक्रमैः कवचतां प्रतिपेदे ॥ २० ॥

कोऽपि पाणिधृतकाष्ठकृपाणो
बालकोऽप्यनुपतन् जनकं स्वम् ।
हन्मि वीरतनयानिति जल्पन्
भक्तिशक्तिभिरधारि जनन्या ॥ २१ ॥

जीवतां युधि यशांसि मृतानां
यद्यशांसि च सुरप्रमदाश्च ।
सत्यमित्यशकुनान्यपि वीरा
मेनिरे सुशकुनानि चलन्तः ॥ २२ ॥

वज्रसूचिमुखयोस्तटिनीभू-
शक्रसूघटितयोः सुभटैस्तैः ।
व्यूहयोरथ रथद्विपवाजि-
स्थास्नुभिश्च पदिकैश्च विलेसे ॥ २३ ॥

व्यूहयुग्ममिदमद्भुतमाग्रं
तैर्भटैरभवदुद्भटघोरम् ।
नूनमुल्लसितकेतुकराग्रे-
राहवाय मिथ आह्वयमानम् ॥ २४ ॥

हाटकीयपटुकंकटपिङ्गे
ते बले चलदुकूलपताके ।

१ नूतनो—इति पा० ।

रेजतुर्युगभिदेऽद्भुतजिह्वा-
वौर्वरौद्रदहनाविव दीप्तौ ॥ २५ ॥

संभ्रमप्रसृतदृष्टिचलोष्ठं
हुंकृतीरकृत यद्भटवर्गः ।
तद्ध्रुवं मुहुररातिजयश्री-
कृष्टिमन्त्रमिह गुप्तमपाठीत् ॥ २६ ॥

अयतो रिपुषु विस्फुरितेषु
क्रोधिनामिह वधोत्कभुजानाम् ।
शश्वतां प्रभव एव भटानां
भेजिरे मृधविधावदिशन्तः ॥ २७ ॥

तत्र राजतरथः सितवर्णा-
श्वीषवर्मतुरगः कुरुवृद्धः ।
हेमतद्रुसितपञ्चशिखाभृ
तालकेतुरभवन्मृधमूर्धा ॥ २८ ॥

अर्जुनो रिपुपदानथ पश्यन्
संगरे गुरुपितामहबन्धून् ।
बाष्पपूरममुचन्नयनाभ्यां
शस्त्रमण्डलमथाशु कराभ्याम् ॥ २९ ॥

तं कृपामयमपाभयशक्तिं
मङ्क्षु वीक्ष्य चकितो हरिरूचे ।
आयुधं धर भटस्मरयोगं
कोऽपि कस्यचिदपीह न किंचित् ॥ ३० ॥

इत्युदीर्य परमं निजरूपं
विश्वरूपमयमेव मुरारिः ।
उद्भवप्रलयतत्परजन्तु-
व्रातसंकुलमदीदृशदस्मै ॥ ३१ ॥

वाङ्निदर्शनवशादिति दैत्य-
द्वेषिणा विरचितप्रतिबोधः ।
संस्मरन् नवमिवारिषु वैरं
चापमाप विजयी यमरौद्रः ॥ ३२ ॥

अर्जुने रणरसस्पृशि यावत्
पाण्डवाः किलकिलां कलयन्ति ।
तावदुज्झितशरासनवर्मा
धर्मसूरवततार रथान्तात् ॥ ३३ ॥

क्षायमायतभुजेषु परेषु
क्रोधिषु व्रजति संप्रति राजा ।
विस्मयं ददिति स्वभटानां
सोदरैः सह जगाम स भीष्मम् ॥ ३४ ॥
भीष्ममाप रिपुरेष शरण्यं
कौरवा जयरवानिति चक्रुः ।
आदधौ क्षितिपतिस्तु जयश्री-
लोभकं शिरसि भीष्मपदाब्जम् ॥ ३५ ॥
यत् त्वया सह पितामह योत्स्ये
यच्छ तन्मयि जयार्थमनुज्ञाम् ।
एवमुद्गिरति भूभुजि भीष्मः
स्माह संयति यतस्व जयास्मान् ॥ ३६ ॥
नाव्रजेरिति यदि प्रधनान्त-
स्त्वां तदा क्षितिपमुख्य शपेयम् ।
औचितीचतुर संप्रति हृष्टः
किं प्रियं तव वरं करवाणि ॥ ३७ ॥
इत्युदीरितगिरं गुरुमूचे
प्राञ्जलिः कलितधीर्धरणीशः ।
प्रीतिमान् यदि ततः कथय त्वं
तत्त्वतो निजवधार्थमुपायम् ॥ ३८ ॥
न म्रिये रणपरैरपि देवै-
रात्रजेः पुनरपीह कदाचित् ।
एवमुल्लसितवाचि स भीष्मे
द्रोणमाप च ननाम च राजा ॥ ३९ ॥
भीष्मवत् कृतवचाः स च राज्ञे
पृच्छते स्ववधबुद्धिमुवाच ।
हन्त हन्ति यदि कोऽपि रणे मां
न्यस्तशस्त्रमिति मे मरणं स्यात् ॥ ४० ॥
अप्रियं यदि महन्महनीयात्
त्वादृशादसमसत्य शृणोमि ।
संत्यजामि रणसीमनि शस्त्रं
तद्यतस्व विजयस्व च शत्रून् ॥ ४१ ॥
इत्युपायमनपायमवाप्य
द्रोणतः कृपमगाज्जगतीशः ।

तं प्रणम्य च निशम्य च तस्मा-
दाशिषं सपदि शल्यमगच्छत् ॥ ४२ ॥
भूपतिर्जयमतिः प्रणिपात-
प्रीतिभाजि वरदायिनि शल्ये ।
प्राच्यमद्रळयदेव तदेवो-
द्योगकर्मणि वचः प्रतिपन्नम् ॥ ४३ ॥
कर्णमर्णवसुतारमणस्तु
द्रागजगाम च जगाद च हृष्टम् ।
युध्यसे न खलु जीवति भीष्मे
तव पातिनि पुनः स्फुरितव्यम् ॥ ४४ ॥
तद्वचोमतविधायिनि राधा-
नन्दने हरिरवाप धरापम् ।
पाण्डुसूनुरवदत् पुनरस्मान्
यो वृणोत्यरिबले वृणुमस्तम् ॥ ४५ ॥
बुद्धिधाम कुरुभूपसुतानां
दुर्धियामपरमातृकबन्धुः ।
शिश्रिये तमथ मङ्क्षु युयुत्सु-
स्त्यक्तबान्धवबलः स्वबलेन ॥ ४६ ॥
धीनिधिर्जयजयेति गदद्भिः
स्तूयमानचरितोऽथ पृथाभूः ।
सैन्यमाप्य निजमादृतवर्मा
युद्धकर्मणि रथी प्रवणोऽभूत् ॥ ४७ ॥
दध्मुरुद्धुररवानथ शङ्खा-
नर्जुनप्रभृतयो रथभाजः ।
स्वैर्गुणैरपि तदा विहसद्भि-
र्दीर्यमाणमिव खं विरराज ॥ ४८ ॥
कौरवैरपि विपिष्टदिगन्ता-
श्चक्रिरे किमपि कम्बुनिनादाः ।
नूनमम्बरगुणो न रवो यैः
प्रत्युत ध्वनिगुणं वियदासीत् ॥ ४९ ॥
संमदध्वनिरतीव विरोधं
बन्धुतां च दधतां भुजभाजाम् ।
क्रोधतो नु मदतो नु न जानेऽ-
न्योन्यभेदकलितो मिलितः खे ॥ ५० ॥

Digitized by Google

निश्चितागतरणोत्सवहृष्यद्-
भीमसेनकृतनादपयोधौ ।
व्यूहयोरुभयतः सुभटानां
क्ष्वेडसिन्धुभिरमज्ज्यत ताभिः ॥ ५१ ॥

विस्फुटीभवितुमुद्गमतान्त-
र्विक्रमेण रणविभ्रमभाजः ।
विस्फुटद्भिरिव बाहुभिरुच्चैः
प्राचलन्नुभयतोऽथ भटौघाः ॥ ५२ ॥

सादिनं हयवरो रथभाजं
स्यन्दनी गजगतं च निषादी ।
पत्तिमप्यथ पदातिरवाप
द्वन्द्वयुद्धमिति जातममीषाम् ॥ ५३ ॥

मग्नमन्यरदिनो रदयुग्मं
कोऽपि संयति गजः प्रतिमाने ।
छिन्नमूलमिषुभिर्निजभर्षा
बिभ्रदाप सुरसिन्धुरशोभाम् ॥ ५४ ॥

तादृशं रणविलासमतन्वन्
पर्यताडि शिरसि स्वरदेन ।
कोऽपिनेव परकुञ्जरहस्ता-
भ्युद्धृतेन युधि कश्चन हस्ती ॥ ५५ ॥

कस्यचिद्द्विरदस्य न बाधा
रक्तपानसुखमापुररीणाम् ।
तत्करस्फुटितघोरधनुर्ज्या-
टंकृतिध्वनितनश्यदसूनाम् ॥ ५६ ॥

सारसारथिजुषं तरलाश्वं
स्यन्दनं हतपतिं निजपक्षे ।
कोऽपि मङ्क्षु विरथो रथभर्ता-
रुह्य संयति जघान विरुद्धम् ॥ ५७ ॥

सादिनौ सपदि कौचन युद्धे-
ऽन्योन्यचक्रवहद्ग्राहितभल्लौ ।
निर्व्यथं पुरत एव मिलित्वा
चक्रतुः परहतिं छुरिकाभ्याम् ॥ ५८ ॥

धावतः समिति हर्षितहेषं
कश्चिदात्मतुरगस्य हृदेव ।
पातितेषु परसादिषु सद्यो
न द्विषद्वधमहोत्सवमाप ॥ ५९ ॥

खण्डितैकचरणो विपरीतैः
कोऽपि यान्तमहितं पदपातैः ।
धावितो युधि जघान मुहुर्भू-
स्थापितोद्धृतकरस्फुरकोटिः ॥ ६० ॥

अम्बरोत्पततः प्रपतन्तं
वीरमुल्लसदसिं युधि कंचित् ।
एकमप्युपरि वज्रशिलाभ-
न्मेनिरे भयपराः परवीराः ॥ ६१ ॥

मत्तदन्तिपृतनासु पयोद-
श्रेणिकासु हिमकान्तिरिवैकः ।
द्राक् प्रविश्य परितः स्फुरिताङ्गः
कौमुदीमिव यशांसि वितेने ॥ ६२ ॥

भूतले निरवकाशतयाश्व-
श्रेणिमूर्धसु कृतक्रमचारः ।
उत्पतन्नरिबलेषु बलीयान्
सादिनः सपदि कोऽपि जघान ॥ ६३ ॥

स्वैरमप्रहतसारथिरथ्याः
क्षत्रधर्ममधुरेण परेण ।
चक्रिरे रिपुचमूषु रणप्राक्-
सज्जिता इव रथा रथिहीनाः ॥ ६४ ॥

धैर्यधन्यतममर्जितवत्यो-
र्ध्यातमेकसुभटं सुरवध्वोः ।
हेलया बत बिभेद विवादं
तद्वधूः शिखिपथेन गताग्रे ॥ ६५ ॥

क्वापि चित्तदयिते च्युतमौलौ
नृत्यति स्म निभृतिर्मृगनेत्रा ।
तूर्णपाणिधृतकुण्डलताला
तद्वरामरवधूर्विरसाभूत् ॥ ६६ ॥

कोऽपि तत्क्षणमदर्शितपक्ष-
स्वर्गभीरुरपि वीक्ष्य निजस्त्रीम् ।
स्पर्शनव्यसनिनीं स्वकबन्धे
संगमं स्पृहयति स्म भटात्मा ॥ ६७ ॥

Digitized by Google

एनमेनमथवा वृणवानि
स्ववधूरिति विचारपरैका ।
वञ्चिता निजहृदेव पराभि-
द्रोग्वृता यदधिकाधिकवीरा: ॥ ६८ ॥

भीरवोऽपि समसंगतिभीरु-
व्रीडया व्यधुरभीरुवदेके ।
युद्धमुद्धतकृपाणनिपात-
क्रीडया मृदितपूर्वकलङ्का: ॥ ६९ ॥

लोहमुद्गर इवाङ्गचतुर्दिक्-
खड्गवेगचलनास्फुटमूर्ति: ।
कोऽपि निष्फलपरास्त्रनिपातोऽ-
चासयद्रिपुकुलानि कुलीन: ॥ ७० ॥

कर्णतालयुगवीजितमूर्ति-
दीनलभ्यदलिगीतचरित्र: ।
कोऽपि भर्तुरनृणो गुरुनिद्र:
स्वापमाप रदिनो रदतल्पे ॥ ७१ ॥

एकत: परिकिरन् युधि बाणान्
भानुमानिव करानभिमन्यु: ।
निर्बिभेद परतामसमुच्चै-
राततान च महान्ति महांसि ॥ ७२ ॥

एष विश्वमहितां जयलक्ष्मी-
मुद्धरन्नहितसैन्यमदैन्यम् ।
मन्दराद्रिरिव वार्धिममन्दा-
डम्बरं द्रुतमलोडयदेक: ॥ ७३ ॥

विस्फुरन्तमिति तं प्रति कोपाद्
द्राग्बृहद्बलकृपौ नृपविप्रौ ।
पेततु: कुरुचमूचपलाक्षी-
लोचने इव तदा रथिराजौ ॥ ७४ ॥

तं बृहद्बलमखण्डबलश्री-
मैन्युमानभिययावभिमन्यु: ।
आर्जुने रणसहायतयाथो
केकयावनिपति: कृपमाप ॥ ७५ ॥

दन्तिनोरिव तदा कुरुपाण्डु-
व्यूहयोरुभयतो रदनाभान् ।
तान् प्रहारचतुरांश्चतुरोऽपि
प्रैक्षत ध्वनिघनानमरौघ: ॥ ७६ ॥

तन्मिथो विरथितौ सकृपाणौ
मङ्क्षु केकयनृपश्च कृपश्च ।
तत् किमप्यसृजतां युधि येना-
लोकितौ रणमपास्य भटैस्तौ ॥ ७७ ॥

दुर्मुखस्य धृतराष्ट्रसुतस्य
द्राग्बृहद्बलसहायपदस्य ।
सारथिं युधि शरेण सरोषो
निर्जघान सहसा सहदेव: ॥ ७८ ॥

आर्जुनेर्विकिरत: शरवीचीं
ज्यानिनादनिपतद्रिपुपङ्क्ते: ।
अच्छिनद्युधि बृहद्बलभूपो
मार्गणै: सपदि सारथिकेतू ॥ ७९ ॥

तत्कृतप्रतिकृत: स कृतघ्न:
कोपत: किमपि युद्धमधत्त ।
फाल्गुनिर्घनघनाघनसान्द्रै-
श्छादयन् गगनवर्त्म शरौघै: ॥ ८० ॥

एकमप्यतुलवीर्यमनेकं
मेनिरे निजनिजाग्रविभागे ।
रोदसी दश दिशोऽपि शरौघै:
प्लावयन्तमिव फाल्गुनिमन्ये ॥ ८१ ॥

अप्यभेद्यमुपलावलिवृष्ट्या
मण्डपं दिवि विधाय स काण्डै: ।
अग्निवज्जनकमातुलरीत्या-
चारयद्रिपुवने निजतेज: ॥ ८२ ॥

भिन्नभद्रगजरौद्रसुभद्रा-
नन्दनास्त्रगणविक्रमणेन ।
इत्यभिद्रुतकुरुप्रकरेण
प्राणिते समिति पाण्डवसैन्ये ॥ ८३ ॥

आपपात तटिनीतनयस्य
स्यन्दनो भुवनभीषणघोष: ।
चक्रयोर्गतिभिरेव मृतानां
जीवतां च हृदयानि बिभिन्दन् ॥ ८४ ॥

युग्मम् ।

आपतन् प्रलयमारुतकल्पः
सिन्धुसूनुरतुलस्तु बलान्तः ।
भूभृतां स कटकानि कुलानि
व्यक्तशक्तिरुदपीडयदग्रे ॥ ८५ ॥

न श्रमः समजनिष्ट तटिन्या
नन्दनस्य धनुषा विशिखैर्वा ।
भ्रूविभङ्गचललोचनरोचिः-
स्रग्भिरेव विमुखेषु परेषु ॥ ८६ ॥

अस्थिरा युधि युधिष्ठिरसेना
भीष्मभीष्मधनुरुद्धृतबाणैः ।
तुद्यमानतनुरातनुते स्म
व्याकुलेव सकलापि विलापम् ॥ ८७ ॥

सिन्धुजन्मनि जगत्त्रयरौद्रे
मुञ्चति चयकरानिति बाणान् ।
आरुरोह परमं वियदर्कः
कौतुकीव रणवीक्षणहेतोः ॥ ८८ ॥

आकुलान्यथ बलानि विलोक्य
स्यन्दनी पितृपितामहमागात् ।
अन्यवीरसमरेण सुभद्रा-
नन्दनः स्फुटमपूर्णविनोदः ॥ ८९ ॥

स्वप्रणप्तृरिषुणा हृदि विद्ध-
स्तच्चमत्कृतिविकम्पितमौलिः ।
तादृशे समिति शान्तनवोऽपि
व्याकुलः कुरुचमूभिरशङ्कि ॥ ९० ॥

भीष्मसीमनि कृपः कृतवर्मा
ते च दुर्मुखविविंशतिशल्याः ।
फाल्गुनेर्विशिखवल्गितकेन
व्याहताः कमपि कम्पमवापुः ॥ ९१ ॥

ऐन्द्रिसूनुरभितः परिभिन्नः
कोपनिर्जितयुगान्तकृतान्तः ।
अच्छिदत् सपदि दुर्मुखसूतं
भीष्मकेतुमिषुभिः कृपचापम् ॥ ९२ ॥

केतुपातकुपिते युधि भीष्मे
कालदण्डवदुदस्यति बाणान् ।
पाण्डुसैन्यरथिनो दश दीप्ता
रक्षितुं नरसुतं परिवव्रुः ॥ ९३ ॥

आपतत्पतगराडिव भीमो
भीष्मबाणगणपातितकेतुः ।
तत् किमप्यकृत संगरसङ्गी
येन वीररस एव स मेने ॥ ९४ ॥

आत्मयुध्यगजघातितसूत-
स्यन्दनाश्वनिकराय सकोपः ।
उत्तराय तु विराटसुताय
स्वर्णशक्तिममुचद्युधि शल्यः ॥ ९५ ॥

पर्वतादिव गजादथ तस्मा-
दुत्तरस्तरलया युधि शक्त्या ।
विद्युतेव कृतगाढनिपातं
पातितः शिखरदेश इवोच्चैः ॥ ९६ ॥

खड्गभिन्नरिपुसिन्धुरशुण्डे
तत्र राज्ञि कृतवर्मरथस्थे ।
भ्रातृमृत्युकुपितो युधि शङ्खः
सिन्धुजेन रुरुधे परिधावन् ॥ ९७ ॥

शङ्खरक्षणधियाथ धुनीजं
दुर्धरं लघु रुरोध किरीटी ।
तत् तयोः प्रलयविभ्रमदायी
सायके रणरसः प्रससार ॥ ९८ ॥

पादचारबलशल्यगदाग्र-
ध्वस्तसारथिहयस्तु स शङ्खः ।
जीवितव्यमिव मङ्क्षु गृहीत्वा
खड्गमर्जुनरथेऽधिरुरोह ॥ ९९ ॥

सिन्धुसूनुरथ पाण्डुचमूषु
त्यक्तफाल्गुनरणः[1] प्रणनाद ।
कोपविस्तृतयमाननतुल्या-
कृष्टचापदशनायितबाणः ॥ १०० ॥

लोठयन् गजघटां भटचक्रं
संहरन् विघटयन् रथवीथीम् ।

१—रथः इति पा० ।

चूर्णयन् हयचयं युधि जातो
वज्रपात इव शत्रुषु भीष्मः ॥ १०१ ॥
मार्गणेषु गगनं पिदधत्सु
क्रुद्धभीष्मधनुरुज्झितेषु ।
अस्तभूधरगुहान्तरमागात्
सोऽपि भीतवदथोष्णमरीचिः ॥ १०२ ॥

इत्थं भीष्मेऽतिभीष्मे क्षयसमयसमुद्भूतधूमध्वजोग्र-ज्वालाकल्लोललीढान्तरमिव तरसा कुर्वति व्योम बाणैः । यावद्युद्धान्निषेद्धुं किल निजकुलजानेति पूर्वाद्रिमिन्दु-स्तावत् ते मत्तवीराः स्वयमतनिषत व्रीडयेवावहारम् ॥१०३॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के भीष्मपर्वणि प्रथमदिनसाङ्गमवर्णनो नाम प्रथमः सर्गः ॥ १ ॥ :: :: ॥

॥ श्रीः ॥

खण्डप्रशस्तौ

रामावतारवर्णनम् ॥

(६०) स्थाणुः कूर्मोऽथ यष्टिर्भुजगपतिरसौ भाजनं भूतधात्री
तैलापूरः समुद्राः कनकगिरिरयं वृत्तवर्तिप्ररोहः ।
अर्चिश्चण्डांशुरोचिर्गगनमलिनिमा कज्जलं दह्यमाना
शत्रुश्रेणीपतङ्गा जयति रघुपते त्वत्प्रतापप्रदीपः ॥

हेरघुपते त्वत्प्रतापप्रदीपस्तव प्रताप एव प्रदीपो जयति प्रकर्षेण वर्तते, अथ प्रदीपसाधर्म्यं प्रतापस्य प्राह । अत्र प्रतापप्रदीपे कूर्मः कमठः स्थाणुः स्तम्भोऽवष्टम्भहेतुः, तथा भुजगपतिः शेषराजोयष्टिर्दीपदण्डः, तथा भूतधात्री वसुंधरा भाजनं दीपाधारपात्रं, तथा समुद्रास्तैलापूरास्तैलपूर्णाः, तथाऽसौकनकगिरिः सुमेरुर्वृत्तवर्तिप्ररोहे मध्यवर्तित्वादुत्तुंलदशाङ्कुरोऽभूत, तथा चण्डांशोः सूर्यस्य रोचिः कान्तिः साऽर्चिर्ज्वालाऽभूत, एवंभूते त्वत्प्रतापप्रदीपे दह्यमाना भस्मीभवन्ती शत्रुश्रेणी वैरिराजिः पतङ्गा अभूवन्निति भावः ॥ ६० ॥

(६१) गङ्गीयत्यसितापगां फणिगणं शेषीयति श्रीपतिं
श्रीकण्ठीयति कैरवीयति कुलं नीलोत्पलानां वने ।
कर्पूरीयति कज्जलं पिककुलं लीलामरालीयति
स्वःकुम्भीयति कुम्भिनामपिघटां त्वत्कीर्तिसंघट्टतः ॥

हेराम त्वत्कीर्तिसंघट्टनस्त्वद्यशः संयोगादसितापगां यमुनां गङ्गीयति गङ्गामिवाचरति, सर्वापि जनरत्यध्याहारः सर्वत्र, तथा फणिगणं कृष्णसर्पसमूहं शेषीयति शेषमिवाचरति, तथा श्रीपतिं श्रीकण्ठीयति विष्णुं हरमिवाचरति, तथा वने जले नीलोत्पलानां नीलकमलानां कुलं समूहं कैरवीयति कैरवमिव कुमुदमिवाचरति, तथा कज्जलमञ्जनं कर्पूरीयति कर्पूरमिवाचरति, तथा पिककुलं कोकिलव्रजं लीलामरालीयति लीलाया यो मरालो हंसस्तमिवाचरति, तथा कुम्भिनां हस्तिनां घटामपि स्वःकुम्भी ऐरावणस्तमिवाचरति, अत्र यमुनादीनां कृष्णानामपि सितायास्त्वत्कीर्तेः संयोगात्सितरूपत्वादिसाधर्म्येण गङ्गाद्यारोपो ज्ञेयः । उपमानादाचारइति क्यचि गङ्गीयतीत्यादिरूपसिद्धिरिति बोध्यम्, ॥ ६१ ॥

(६२) देव त्वत्करनीरदे दिशिदिशि प्रारब्धपुण्योन्नतौ
चञ्चत्कङ्कणरत्नकान्तितडिति स्वर्णामृतं वर्षति ।
स्फीता कीर्तितरङ्गिणी समभवत्तृप्ता गुणग्रामभूः
पूर्णं चार्थिसरः शशाम विदुषां दारिद्र्यदावानलः ॥

हेदेव हेराम त्वत्करनीरदे तव कर एव नीरदो मेघस्तस्मिन्, किंभूते तस्मिन्, दिशिदिशि प्रारब्धपुण्योन्नतौ प्रतिदिशं प्रारब्धा प्रवर्तिता पुण्या पवित्रा उन्नतिर्येन स तस्मिन्, पुनः किंविशिष्टे, चञ्चत्कङ्कणरत्नकान्तितडिति चञ्चन्ती देदीप्यमाने ये कङ्कणे वलये तयोर्या रत्नकान्तिः सैव तडिद्विद्युद्विद्यते यस्मिन्स तस्मिन्, स्वर्णामृतं स्वर्णमेवामृतं पानीयं वर्षति सति कीर्तितरङ्गिणी कीर्तिरेव तरङ्गिणी नदी स्फीता जलभरैर्वृद्धिं प्राप्ता समभवज्जाता, तथा गुणग्रामभूर्गुणसमूहभूमिस्तृप्ता अन्यस्मिन्नपि मेघे वर्षति सति ग्राम्यभूस्तृप्यति एवं त्वत्करमेघे वर्षति सति गुणग्रामभूस्तृप्तेति, तथा च पुनः अर्थिसरः अर्थिनो याचकास्त एव सरः, यद्वा अर्थिनां याचकानां सरो मनो ह्रदं वा तत्पूर्णं स्वर्णाम्भोभिर्भृतं, तथा त्वत्करनीरदे वर्षति सति विदुषां विपश्चितां दारिद्र्यदावानलः दारिद्र्यरूपोऽग्निः शशाम शान्तोऽभूत, वृष्ट्याप्यते सकलगुणा भवन्तीति भावः ॥ ६२ ॥

(६३) एकं काञ्चनभूधरं सुवलयं वासः सुधावारिधिं
तारं तारकराजमण्डलमिदं संप्राप्य सत्कुण्डलम् ।
दूरस्थापि च तेन तेन सदृशं त्वाभूषणं चापरं
स्त्रीमानग्रहिलेव याचतितरां श्रीराम कीर्तिस्तव ॥

हेश्रीराम तव कीर्तिर्दूरस्थापि दिक्पर्यन्तं प्राप्तापि त्वां प्रति तेन काञ्चनभूधरादिना सदृशं समानमपरं भूषणमन्यन्मण्डनं स्त्रीमानग्रहिलेव स्त्रिया यो मानः स्वपतिसौभाग्य-

सुरूपत्वादिगर्वस्तेन ग्रहिला ग्रहगृहीता ग्रहाद्यपस्मारपरवशा इवेत्युत्प्रेक्षायां याचतितरामतिशयेन याचतीत्यर्थः, अन्यापि या मानिनी मानग्रहगृहीता भवेत्सा विदेशस्थापि पतिं प्रभविष्णुं तत्तद्वस्तु याचते. यद्भूमण्डलेपि नाप्यते, तथेयं कीर्त्तिरपि अपरं भूषणं याचते, किंकृत्वा, एकमसहायं काञ्चनभूधरं स्वर्णाद्रिं सुवलयं शोभनकटकं संप्राप्य यतो हे स्वामिन् ममैकः काञ्चनगिरिर्दक्षिणे करे कटकोस्ति वामे तु न किमपीत्येकनेत्राञ्जनवच्च शोभेते पाणी अतोऽपरं तादृशं वलयाख्यं भूषणं मह्यं देहीति प्रार्थयते. पुनः किंकृत्वा. एकं सुधावारिधिं क्षीरसमुद्रं वासो वस्त्रं प्राप्यापरं तत्समं याचते, यतो नह्येकं वास उपर्यधश्चाङ्गे परिधातुं शक्यते, तथा पुनः इदमेकं तारकराजमण्डलं तारकाणां राजा तारकराजश्चन्द्रस्तस्य मण्डलं सत्कुण्डलं शोभनकुण्डलमेकस्मिन्कर्णे संप्राप्य तत्सममपरकुण्डलं द्वितीयकर्णार्थं याचति, किंभूतं तत् तारमुज्ज्वलं सकलकलाभिः संपूर्णमिति भावः । अत्र ग्रहिलेति ग्रहशब्दात्पिच्छादित्वादिलचिप्रत्यये ज्ञेयम् ॥ ६३ ॥

(६४) अत्युक्तो यदि न प्रकुप्यसि मृषावादं न चेन्मन्यसे
तद्भूमोद्भुतवस्तुवर्णनविधौ व्यग्राः कवीनां गिरः ।
राम त्वत्तरुणप्रतापदहनज्वालावलीशोषिता:
सर्वे वारिधयस्तवारिवनितानेत्राम्बुभिः पूरिताः ॥

हेराम अत्युक्तो बहुभाषिते यदि न प्रकुप्यसि चेत्कोपं न कुरुषे तथा मृषावादं असत्यवचनं चेद्यदि न मन्यसे न जानासि तर्हि तत्किमपि वयं ब्रूमः, तत्किमित्याह, हेराम अद्भुतवस्तुवर्णनविधौ अद्भुतमाश्चर्यकारि यद्वस्तु तस्य यद्वर्णनं शुभवाग्विलासैः कथनं तस्य विधौ विधाने कवीनां मेधाविनां गिरो वाण्यो व्यग्रा व्याकुला बभूवुरन्यवस्तुवर्णनमनस्काः कवयोऽन्यदेव व्याचक्षतेत्यर्थः । ननु गिरां शब्दात्मकत्वेनाचेतनत्वात्कथं व्यग्रत्वमिति चेत्सत्यम् । परमत्र कवीनामद्भुतस्तुतौ चेतसो व्याकुलत्वे तदुद्भवत्वात्तासामपि व्याकुलत्वमुपचर्यत इति भावः । अथ तत्किमद्भुतं वस्तु यस्य वर्णनविधौ कविगिरां व्यग्रत्वमिति तदाह । हेस्वामिन् सर्वे वारिधयः समुद्रास्त्वत्तरुणप्रतापदहनज्वालावलीशोषितास्तव तरुणः प्रत्यग्रोऽयं प्रतापः स एव दहनज्वालावल्योऽग्निशिखाश्रेणयस्ताभिः शोषिताः शोषं प्राप्ताः सन्तस्त एव पुनस्तवारिवनितानेत्राम्बुभिः वैरिस्त्रीनयनाश्रुभिः पूरिता भृताइति, अत्र सर्वसमुद्राणां शोषणं पुनश्च तेषां शत्रुवनितानेत्राम्बुभिः पूरणमेतत्सर्वमद्भुतमतोऽस्मिन्वर्णने कविगिरो व्यग्रा इति भावः ॥ ६४ ॥

॥ शेषउत्तराङ्के ॥

॥ श्रीकाशिराजसंस्थापितकाशीधर्म्मसभायाः संक्षिप्तं वृत्तम् ॥

आसीत् किल श्रीमदखिलराजन्यवृन्दवन्दितचरणकमलः सकलभुवनविख्यातप्रभावो महानुभावो मानधनप्रधानं श्रीमदुदितनारायणसिंहशर्म्मेतिशुभाभिधानो महाराजाधिराजः श्रीकाशिराजः। स भूपतिरेकदातिप्रबलेन कलिनातितरां पीड्यमानस्य श्रौतस्मार्त्तसद्धर्म्माचारस्य तन्मूलस्य श्रुत्यादिप्रचारस्य चोत्तरोत्तरं ह्रासमाकलय्य तदभिवृद्धये परमसौजन्याद्यखिलगुणगणसमृद्धेन श्रीमत्प्रसिद्धनारायणसिंहशर्म्मेतिनाम्ना प्रसिद्धेन निजानुजेन सविनयमभ्यर्थितस्तत्कालप्रसिद्धैरसंख्यातगुणगणास्तव्यैर्वाराणसीवास्तव्यैः श्रीभैरवमिश्रश्रीचन्द्रनारायणतर्कालङ्कारप्रमुखैर्विद्वद्वर्य्यैः सह मन्त्रयित्वा तेषामभूतपूर्वां परिषदं स्थापयामास । ततः कतिपयदिवसापगमे तस्मिन् महीपाले कालवशान्नलिनीदलगतजलबिन्दुचञ्चलं पाञ्चभौतिकं देहं विहाय निर्वाणपदं प्रविष्टे तेषु तेषु विद्वद्वर्य्येषु च यथाकालं लोकान्तरं प्रस्थितेषु सा सभापि फलविशेषमनुत्पाद्यैव कथाशेषतामयासीत् । अथ सम्प्रति तस्यैव महाराजस्य राज्यपदं प्रशासत् श्रीमत्समस्तसामन्तचक्रचूडामणिमरीचिनिचयचुम्बितचरणारविन्दः शरदिन्दुसुन्दरयशःपूरपूरिताखिलदिगन्तरो निरन्तरसम्पादितसपर्य्यासंभारसमाराधितमहेश्वरः श्रीमदीश्वरीप्रसादनारायणसिंहशर्म्मेतिसुगृहीतनामधेयो विद्वज्जनविधेयो महाराजाधिराजः श्रीकाशिराजः श्रीमत्पण्डितब्रह्मरामद्विवेदश्रीताराचरणतर्करत्नप्रभृतिभिर्विद्वद्वर्य्यैस्तस्याः परिषदः पुनः स्थापनाय प्रोत्साहितः षड्विंशत्यधिकैकोनविंशतिशततमे वैक्रमेऽब्दे पौषमासस्य कृष्णद्वादश्यां वाराणस्यामरालमालकोपलक्षिते प्रदेश एकस्मिन् पाकशासनसदनसुन्दरे स्वमन्दिरे सुधर्म्मामिव विबुधवराधिष्ठितां "श्रीकाशीधर्म्मसभे"त्यभिख्यया समलङ्कृतां विद्वत्सभां समतिष्ठिपत् । स्वीचक्रुश्च श्रीमतां सभासदां संमत्या वाराणसीस्थराजकीयसंस्कृतविद्यालयावलम्बिनो विद्वद्वर्य्या इतरेऽपि कतिपये नगरनिवासिनः पण्डितश्रेष्ठा राज्यकार्य्याधिकारिणश्च प्रतिष्ठितपुरुषाः प्रधानाध्यक्षोपाध्यक्षलेखाध्यक्षकोषाध्यक्षकार्यनिर्वाहकसामाजिकानां पदानि यथायथं पालयितुम् । तदाप्रभृत्येव प्रधानाध्यक्षप्रमुखाः परिषद्ग्रेसराः प्रतिचतुर्दशि निर्दिष्टचरे मन्दिरे मध्याह्नादूर्द्ध्वं समेत्य यथासम्भवं सभाकृत्यं निर्वर्त्तयन्ति । तच्च कृत्यं——धर्मसंक्रान्तेषु केषुचिद्विषयेषु जातसंशयेभ्यः साक्षात् पत्रादिद्वारा वा पृच्छद्भ्यो लोकेभ्यो यथाशास्त्रमुत्तरदानम्, धर्मसंबन्धिनं कमपि विषयमवलम्ब्य संस्कृतगिरा सुललितबन्धस्य प्रबन्धस्य निर्म्माणम्, सभायां प्रवृत्तायां तद्विषये विचारश्च । अवकाशश्चेद्धर्म्मप्रतिपादकानां

Digitized by Google

मनुस्मृत्यादिप्रबन्धानां कस्यचित् प्रकरणस्य पाठः, तद्बोद्धुमत्रमेभ्यस्तत्र संगतेभ्यो लोकेभ्यो देशीयभाषया तदर्थप्रतिपादनम्, सकलकृत्यमौलिभूतमत्राविधि सभासद्भिरननुष्ठितं केवलमनुष्ठेयत्वेन निर्धारितं तावदिदं यत् संस्कृतविद्याया वृद्धये प्रतिवर्षं परीक्षाकालात् पूर्वं नियमितेषु विषयेषु छात्राणां परीक्षां कृत्वा तेभ्यो योग्यतानुसारेण छात्रतावेतनस्य पारितोषिकस्य तत्तच्छास्त्रीयपाटवतारतम्यबोधकानां "व्याकरणप्रविष्ट" इत्याद्युपनाम्नां प्रशंसापत्रस्य च वितरणम् । प्रतिश्रुतं च श्रीमतात्रभवता सततसदाचारतत्परेण कीर्त्तितवरेण महाराजाधिराजेनैतत्समाजस्य समुदितकार्यसम्पत्तये प्रत्यब्दं सहस्रमुद्राः प्रदातुम् । श्रूयते किलैतस्यां पौषकृष्णचतुर्दश्यां परीक्षाविषयाणां परीक्षकाणां पारितोषिकस्य च नियमो जातः परीक्षाप्यचिराद्भविष्यतीति । संवत् १९२७पौषकृष्णामायाम् ॥

पण्डितशीतलप्रसादत्रिपाठी ।

THE APHORISMS

OF THE

YOGA PHILOSOPHY

OF

PATAÑJALI.

(*Continued from page* 177.)

¹ He [now] mentions the result of the conquering of the elements :—

ततोऽणिमादिप्रादुर्भावः कायसम्पत् तद्धर्म्मानभिघातश्च ॥ ४६ ॥

Aph. 46. Therefrom spring up [three perfections i. e.] minuteness &c., excellence of body, and non-destruction of the merits of it.

² "Minuteness" [aṇimá] attainment of an atomic form—or the power of becoming as minute as an atom, [by this power the ascetic can enter into a diamond &c]; [by the word 'Et cætera' are meant the other seven perfections viz.] 'Magnitude' [mahimá] greatness—or the power of magnifying oneself [by this power the ascetic can occupy as much space as he likes]. 'Gravity' [garimá] attainment of heaviness—or the power of becoming heavy; 'Lightness' [laghimá] the power of becoming as light as a ball of cotton; 'Reach' [prápti] the power of touching the moon &c., with the tip of the finger &c.; 'Irresistible will' [prákámya] means non-frustration of desires in the corporeal internal organ; 'Dominion' [íśitva] the power of prevailing everywhere; 'Subjection' [vaśitva] means that all the elements obey (or are unable to disobey) his (the ascetic's) command. These, viz. 'Minuteness' and the other seven perfections, which are conducive to meditation, result from the conquest of the elements, and [they] are called the eight great perfections [mahásiddhi]; the "Excellence of body" which will be described hereafter [in the next aphorism] is attained by the ascetic [who has conquered the elements]; "Merits of it" mean the qualities of the body [of the ascetic], colour &c., their destruction—annihilation—cannot be effected by anything, for example, fire cannot burn nor can air dry up his [the ascetic's] colour : such and other cases may be considered.

¹ [Next] He mentions what the 'Excellence of body' is:—

रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत् ॥ ४७ ॥

Aph. 47. The excellence of body consists of colour, loveliness, strength, and adamantine density.

² "The excellence of body" ['káya-sampat'—which is one of the three perfections that arise from the conquest of the elements] consists of "Colour" ['rúpa,'—which means the virtue of becoming white &c. from black &c. and so on]; "Loveliness" [lávaṇya—excellent beauty—or the virtue of becoming exceedingly beautiful] "Strength" ['bala'—or the power of becoming very strong] and "adamantine density" ['vajrasanhananatva'] i. e. hardness of the body like that of a diamond [or the power of making the body as hard as a diamond].

³ [Having described the conquest of the elements] He now mentions the conquest of the organs of sense :—

---

¹ भूतजयस्य फलमाह ।

² अणिमा परमाणुरूपतापत्तिर्महिमा महत्त्वङ्गरिमा गुरुत्वप्राप्तिः प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शनशक्तिः प्राकाम्यमिच्छानभिघातः शरीरान्तःकरणे ईशित्वं सर्वत्र प्रभविष्णुता वशित्वं सर्वाण्येव भूतानि तदुक्तमनुगच्छन्ति तएते अणिमाद्याः समाध्युपयोगिनो भूतजयात् प्रादुर्भवन्ति एत अणिमादयोऽष्टौ महासिद्धय उच्यन्ते कायसम्पद् वक्ष्यमाणा तामाप्नोति तद्धर्म्माऽनभिघातश्च तस्य कायस्य ये धर्म्मा रूपादयस्तेषामनभिघातो नाशो नास्य कुतश्चिदपि भवति नास्य रूपमग्निर्दहति न च वायुः शोषयतीत्यादियोज्यम् ॥

¹ कायसम्पदमाह ।

² वज्रसंहननत्वं वज्रवत्कठिनाङ्गत्वमन्यत्प्रसिद्धम् ॥

³ इन्द्रियजयमाह ।

Digitized by Google

ग्रहणस्वरूपाऽस्मिताऽन्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४८ ॥

Aph. 48. The conquering of the organs of sense results from the restraint performed with regard to perception, nature, egotism, concomitance, and possession of objects.

[1] The ascetic attains victory over the organs of sense, having as aforesaid [Aph. 45] performed restraint with regard to the five states of the organs of sense, viz. "Perception" ['grahana'] the function of the organs of sense directed towards their objects; "Nature" [svarúpa] the state of revealing in general—or the eleven organs, viz., [the five organs of action and the five of sense and the mind]; "Egotism" [asmitá] notion of selfishness; "Concomitance" and Possession of objects are as before-stated. [Aph. 45.]

[2] He (now) states the result of the conquering of the organs of sense :—

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४९ ॥

Aph. 49. Therefrom spring up velocity of mind, the state of modification, and the conquest of nature.

[3] "Velocity of mind" ('manojavitva') means attainment of rapid motion by the body like that of mind; [that is, the ascetic can move his body from one place to another as quick as the mind.] "The state of modification" ('vikaraṇabháva) is, the attainment of functions in the organs of sense independent of body; [that is, the modifications of the organs of sense take place independently of the body at any time, whenever the ascetic desires, with regard to any place or object.]

"The conquest of nature" [pradhána-jaya, the chief or universal victory,] controlling all things,—[that is altering anything from one state into another at will]. These perfections are attained by the ascetic who has conquered the organs of sense. And these are, here—in this system, called the honey-like [perfections, madhupratíka] because like an individual particle of honey each of them is tasteful.

(To be continued.)

---

[1] ग्रहणमिन्द्रियाणां विषयाभिमुखी वृत्तिः स्वरूपं सामान्येन प्रकाशत्वमस्मिता अहङ्कारानुगमोऽन्वयार्थवत्त्वे पूर्ववत् । एतेषामिन्द्रियाणामवस्थापञ्चके पूर्ववत् संयमङ्कृत्वा इन्द्रियजयो भवति ॥

[2] तस्य फलमाह ।

[3] शरीरस्य मनोवदुत्तमो गतिलाभो मनोजवित्वङ्कायनिरपेक्षाणामिन्द्रियाणां वृत्तिलाभो विकरणभावः सर्ववशित्वम्प्रधानजयः । एताः सिद्धयो जितेन्द्रियस्य प्रादुर्भवन्ति ताश्चास्मिन् शास्त्रे मधुप्रतीका इत्युच्यन्ते यथा मधुन एकदेशोऽपि स्वदते एवम्प्रत्येकमेताः सिद्धयः स्वदन्त इति मधुप्रतीकाः ॥

To the Editor "Pandit".

Sir,

Allow me to point out, what appears to me to be an inaccuracy in the current number of the Pandit. In translating Śankara Miśra's comment on Kaṇáda, the translator has rendered the word आततायिन् by "felon". But as the Sanscrit word is capable of being used in some such sentence as ममायमाततायी which itself does not admit of being rendered, "he is my felon", it appears that the word "felon" ought not to be fixed as a good rendering for आततायिन्. Some such phrase as "imminent foe," unless it grates on an English ear for its novelty, might imply what आततायिन् denotes, judging from its etymology, आतत+इ+णिन् "one who comes with an आतत or uplifted weapon".

I grant that the English criminal jurisprudence classifies as felonies every one of the crimes enumerated in the well known text which characterises an आततायी; but that is no reason for considering the limitation of the two words "felon" and "आततायिन्" as identical; a fact that ought to be carefully noticed as the only test for the correctness of the rendering of one word into another.

In the last number of the Pandit there is another point that strikes me as somewhat odd and whimsical. One signing himself as शिवप्रसाद holds up for the emulous imitation of our countrymen, the proficiency of the Germans in our ancient mother-tongue; and he reproduces the German soldier's Sanskrit letter, which has recently made some noise in the papers. But it appears to me that if शिवप्रसाद thought it worth his while to do so much, he ought as well to have pointed out the glaring marks of the exceedingly insufficient knowledge of Sanskrit evinced by the German in his very small Sanskrit letter. The phrases सुकुशलोऽस्मि, महद्भयं गतः, क्षेत्रे सुपार्श्वंते, are but a scanty instalment of the inaccuracies to which Europeans when attempting Sanskrit composition are necessarily liable. Though it will not be palatable to the Europeans, it had better be set down as an inevitable fact that, unless a long residence among the Pandits of this country should unwontedly ripen their knowledge of Sanskrit, the Europeans pretty often fall into egregious mistakes that would excite the smile of a simple-minded indigenous Pandit. The Anglo-maniacs of our country are welcome to applaud the zeal and perseverance of the European Sanskrit scholars and also their exertions in the publication of our ancient works; but to hold up such achievments as the German soldier's letter as an example is a proceeding that we might fairly ask them to spare.

Yours Obediently,

A. HINDU.

Digitized by Google

THE RÁMÁYAN.

BOOK III.

CANTO I.

THE HERMITAGE.

When Ráma, valiant hero, stood
In the vast shade of Daṇḍak wood,
His eyes on every side he bent
And saw a hermit settlement,
Where coats of bark were hung around,
And holy grass bestrewed the ground.
Bright with Bráhmanic lustre glowed
That circle where the saints abode:
Like the hot sun in heaven it shone,
Too dazzling to be looked upon.
Wild creatures found a refuge where
The court well-swept was bright and fair,
And countless birds and roedeer made
Their dwelling in the friendly shade.
Beneath the green of well-loved trees
Oft danced the gay Apsarases.
Around was many an ample shed
Wherein the holy fire was fed,
With sacred grass and skins of deer,
Ladles and sacrificial gear,
And roots and fruit and wood to burn,
And many a brimming water-urn.
Tall trees their hallowed branches spread,
Laden with pleasant fruit, o'erhead,
And gifts which holy laws require,[1]
And solemn offerings burnt with fire,[2]
And Veda chants on every side
That home of hermits sanctified.
There many a flower its odour shed,
And lotus blooms the lake o'erspread.
There, clad in coats of bark and hide,
Their food by roots and fruit supplied,
Dwelt many an old and reverend sire
Bright as the sun or Lord of Fire,
All with each worldly sense subdued,
A pure and saintly multitude.
The Veda chants, the saints who trod
The sacred ground and mused on God,
Made that delightful grove appear
Like Brahmá's own most glorious sphere.
As Raghu's splendid son surveyed
That hermit home and tranquil shade,
He loosed his mighty bow-string, then
Drew nearer to the holy men.
With keen celestial sight endued
Those mighty saints the chieftain viewed,
With joy to meet the prince they came,
And gentle Sítá dear to fame.
They looked on duteous Ráma, fair
As Soma[3] in the evening air,
And Lakshmaṇ by his brother's side,
And Sítá his devoted bride,
And with glad blessings every sage
Received them in the hermitage.
Then Ráma's form and stature tall
Entranced the wondering eyes of all,
His youthful grace, his strength of limb,
And garb that nobly sat on him.
To Lakshmaṇ too their looks they raised,
And upon Sítá's beauty gazed
With eyes unclosing, lest their sight
Should miss the vision of delight.
Then the pure hermits of the wood,
Rejoicing in all creatures' good,
Their guest, the glorious Ráma, led
Within a cot with leaves o'erhead.
With highest honour all the best
Of radiant saints received their guest,
With kind observance, as is meet,
And gave him water for his feet.
To highest pitch of rapture wrought
Their stores of roots and fruit they brought,
They poured glad blessings on his head,
And 'All we have is thine,' they said:
Then, reverent hand to hand applied,[1]
Each duty-loving hermit cried:
'The king is our protector, bright
In fame, maintainer of the right;
He bears the awful sword, and hence
Deserves an elder's reverence.
One fourth of Indra's essence, he
His people keeps from danger free;
Hence honoured by the world, of right
The king enjoys each choice delight.
Thou shouldst to us protection give,
For in thy realm, dear lord, we live:
Whether in town or wood thou be,
Thou art our king, thy people we.
Our worldly arms are laid aside,
Our hearts are tamed and purified,
To thee our guardian, we who earn
Our only wealth by penance, turn.'
Then the pure dwellers in the shade
To Raghu's son due honour paid,
And Lakshmaṇ, bringing store of roots,
And many a flower, and woodland fruits.
And others strove the prince to please
With all attentive courtesies.

[1] The *bali.*

[2] The *homa.*

[3] The Moon-God: 'he is,' says the commentator, 'the special deity of Bráhmans.'

[1] 'Because he was an incarnation of the deity,' says the commentator, 'otherwise such honour paid by men of the sacerdotal caste to one of the military would be improper.'

NOW READY.
Vols. I. and II.
THE RÁMÁYAN OF VÁLMÍKI,
TRANSLATED INTO ENGLISH VERSE
BY
R. T. H. GRIFFITH, M. A.
Price per Vol. Rs. 6. Postage 6 anas.
BENARES: MESSRS. E. J. LAZARUS & Co.,
CALCUTTA: MESSRS. BERIGNY & Co.,
LONDON: MESSRS. TRÜBNER & Co.,

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 57. Benares, February 1st, 1871. Vol. V.

॥ भाट्टचिन्तामणिवर्णनम् ॥

अथ प्रकरणपञ्चिकाया गुरुप्रभाकरमतप्रतिपादनैकपरायणायाः प्रकाशनोत्तरमवश्यं कश्चन भाट्टसिद्धान्तनिरूपणप्रवणो निबन्धः प्रकाशनमर्हति । यतो जैमिनिदर्शनमवलम्ब्य त्रीण्येव मतानि परस्परव्यावृत्तात्यन्तविशेषवन्ति प्रसिद्ध्यन्ति गुरुमतं भट्टमतं मुरारिमतं च । तत्र मुरारिमतानुसारी द्वादशाध्यायीव्याख्यानपरो निबन्धो नाद्यत्वे कोऽपि प्रसिद्ध्यति । भाट्टमतानुसारिणश्च भाट्टदीपिकाशास्त्रदीपिकाभाट्टरहस्यप्रभृतयो यद्यपि बहवो निबन्धा उपलभ्यन्ते ऽथापि ते ऽतिविस्तृताः कठिनतरसंस्कृतग्रथिताः सुलभपुस्तकाश्चेति कृत्वा ऽयं भाट्टचिन्तामणिनामधेयः स्पष्टार्थसंस्कृतो नातिप्राचीनोऽपि प्राचीनतमसंप्रदायानुसारी संक्षिप्तः सकलभाट्टमतनिबन्धसारसंग्राहको ऽतिदुर्मिलपुस्तकः काशीविद्यासुधानिधिचकोरनेत्रातिथिभावमर्हतीति तन्मुद्रणाय सोल्लासं प्रयतामहे । रचयिता चास्य भट्टकुलतिलको विश्वेश्वरभट्टापराभिधानो गागाभट्टः । योऽद्य यावदागोपालाङ्गनमुत्तमोत्तमविद्वदुपमानभावं प्रतिपदं लभते ।

अथ तस्य प्रथममुद्रणीयतर्कपादस्थप्रकरणानि प्रतिपत्तिसौकर्याय सूच्यन्ते ।

१ शास्त्रारम्भोद्देशः
२ मङ्गलवादः
३ धर्मस्वरूपम्
४ धर्मे वेदस्य प्रामाण्यपरीक्षा
५ ज्ञानप्रामाण्यनिरुक्तिः
६ स्वतः प्रामाण्यव्यवस्थापनम्
७ प्रत्यक्षनिरूपणम्
८ चार्वाकनिराकृतिः
९ अन्यथाख्यातिवादः
१० सामान्यलक्षणाज्ञानलक्षणे
११ अनुमाननिर्वचनम्
१२ व्याप्तिग्रहप्रकारः
१३ परामर्शविमर्शः
१४ ईश्वरवादः
१५ शक्तिवादः
१६ कारणतावादः
१७ सृष्टिप्रलयचिन्ता
१८ विवर्त्तखण्डनम्
१९ जगत्सत्यत्वव्यवस्थापनम्
२० जीवात्मसाधनम्
२१ मोक्षस्वरूपनिरूपणम्
२२ उपमानस्वरूपम्
२३ अर्थापत्तिस्वरूपम्
२४ अनुपलब्धिस्वरूपम्
२५ अभाववादः
२६ शब्दप्रामाण्यनिर्वचनम्
२७ आकाङ्क्षायोग्यतयोःस्वरूपम्
२८ तात्पर्यकारणत्वकल्पनम्
२९ शक्तिग्रहप्रकारः
३० वृत्तिस्वरूपम्

Digitized by Google

३१ गौण्यादिलक्षणानिरुक्तिः
३२ रूढादिपदभेदप्रदर्शनम्
३३ वाक्यार्थस्य लाक्षणिकत्वोपपादनम्
३४ प्रसङ्गात्स्फोटनिर्वचनम्
३५ प्रवर्तकज्ञानव्यवस्थापनम्
३६ विधिभेदप्रकाराः
३७ विधिलक्षणम्
३८ धात्वर्थनिरुक्तिः
३९ आख्यातार्थनिरुक्तिः
४० कारकान्वयनिरुक्तिः
४१ लकारार्थनिरुक्तिः
४२ प्रातिपदिकार्थजात्यादिनिरुक्तिः
४३ प्रथमादिसुबर्थनिरुक्तिः
४४ समासार्थनिरुक्तिः
४५ नञर्थनिरुक्तिः
४६ उपसर्गार्थनिरुक्तिः
४७ निपातार्थनिरुक्तिः
४८ त्वतलाद्यर्थनिरुक्तिः
४९ विधिप्रामाण्यम्
५० शब्दनित्यत्वम्
५१ अर्थनित्यत्वम्
५२ संबन्धनित्यत्वम्
५३ स्फोटोपपादनं तन्निराकृतिश्च
५४ वेदानामपौरुषेयत्वस्यसाधनम्

इति ॥

सांख्य० बालशास्त्री

॥ भाट्टचिन्तामणिः ॥

॥ श्रीगणेशाय नमः ॥

अधिसरयूतटिनीतटमधिसाकेताङ्गणमधितरूद्यानम् ।
खेलच्चोरदनीलो बालो मे मानसे सदा भूयात् ॥ १ ॥
सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसाम् ।
तत्कौशल्यावचसां शिवापात्रं महो वन्दे ॥ २ ॥
विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायण-
स्तद्वंशस्य करीरतां दधदयं विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनाद्
मीमांसाम्बुनिधिं प्रमथ्य चिनुते श्रीभाट्टचिन्तामणिम् ॥ ३ ॥
गुरोरथ कुमारिलस्य मुरारिविद्विषोऽपि श्रम-
क्रमो न सफलोऽभवद्भवति तत्र कस्योद्यमः ।
स साहसमिति प्रथामवितथां प्रकर्तुं ममो-
द्यमोऽयमिति चिन्तयन् बुधजनः परिक्षाम्यतु ॥ ४ ॥

अथातो धर्मजिज्ञासा ॥ १ ॥

अनेन सूत्रेण विषयप्रयोजनकथनद्वारा शास्त्रारम्भकर्तव्यता प्रतिपाद्यते । कर्तव्यपदाध्याहारेण जिज्ञासापदे विचारलक्षणया च वेदाध्ययनानन्तरं वेदाध्ययनहेतुको धर्मज्ञानेच्छाप्रयोज्यो धर्मप्रमाफलको विचारः कर्तव्य इति सूत्रार्थः । तेन विचारहेतुसूत्रसमुदायरूपशास्त्रस्य धर्मज्ञानप्रयोजनकता धर्मविषयता चोक्ता । संबन्धोऽपि प्रतिपाद्यप्रतिपादकभावः । वेदाध्ययनहेतुकता चाधीतवेदस्य धर्मेण पापमपनुदतीत्यादिवाक्येभ्यः । सामान्यतो धर्मज्ञानस्य विशेषधर्मप्रकारकज्ञानेच्छाहेतुत्वात् । तथाहि । धर्मेणेति वाक्येन सामान्यतो धर्मज्ञाने तदुत्तरं तदनुव्यवसाये धर्मज्ञानत्वसामान्यप्रत्यासत्त्या सकलधर्मज्ञानज्ञानम् । घटत्वसामान्यप्रत्यासत्त्या नीलघटादिज्ञानवत् । ततस्तद्विषयकेच्छेति क्रमेण सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकेच्छाप्रयोजकत्वम् । सा चेच्छा सप्रमाणकधर्मज्ञानं जायतामित्याद्याकारिका, तादृशेष्टसाधनताज्ञानजन्या च । तादृशज्ञानज्ञानं च धर्मज्ञानत्वसामान्यलक्षणप्रत्यासत्त्येति । तेन चाधीतवेदोऽधिकारी प्रदर्शितः । इदं च सूत्रं स्मृतिरूपं स्वसूचितन्यायानुग्राह्यप्रमाणसापेक्षं चेत्यध्ययनविधिमूलकम् । तेनापि वेदाध्ययनानन्तरं तदर्थज्ञानाय विचारविधानात् । तथाहि । स्वाध्यायोऽध्येतव्य इत्यत्राध्ययनकरणकभावनायामर्थज्ञानं भाव्यम् । कर्मानुष्ठानौपयिकत्वेन पुरुषार्थत्वादिति । स्वर्गार्थत्वमिति चेत् । न । अदृष्टार्थत्वापत्तेः । नाप्यक्षरग्रहणम् । पुरुषार्थाननुबन्धित्वात् । व्याकरणादीनां वेदाङ्गत्वोपपत्तेश्च । अङ्गत्वं कार्यजनने सहकारित्वं, तच्च वेदाध्ययनस्यार्थज्ञानार्थत्वे उपपद्यते । व्याकरणादीनां वेदार्थज्ञानोपयोगित्वात् । स्वर्गार्थत्वे वा तदनुपयोगात् । वेदाध्ययनमिष्टजनकदृष्टार्थकम्, अर्थवद्विषयकविहिताध्ययनत्वात्, अङ्गाध्ययनवदित्यनुमानात् । अत्र स्तोभाध्ययने व्यभिचारवारणाय अर्थवद्विषयकेति । विषमन्त्राध्ययने व्यभिचारवारणाय विहितेति । अतोऽर्थज्ञानं भाव्यम् । न चार्थज्ञानस्य भाव्यत्वेऽनध्यायादिनियमानां स्वरूपकार्ययोरनुपयोगादध्ययनाङ्गत्वानुपपत्तिः । कार्योपयोगाभावेऽपि विघ्ननिवारणार्थत्वेन स्वरूपोपयोगित्वात् । नियमापूर्वे उपयोगाच्च । कर्मार्थकतव्यप्रत्ययस्तु संबन्धमात्रे लाक्षणिकः । विषं भुनक्ति सक्तून् जुहोतीतिवदनीप्सितकर्मत्वपरो वा । ईप्सितकर्मत्वपरत्वेऽपि स्वाध्यायकर्मकभावनाविशिष्टत्वकरणभावनाविधित्वेनैतस्य विधेरर्थज्ञानभाव्यकत्वमिति कश्चित् । अत्र स्वाध्यायत्वं स्वशाखात्वम् । स्वत्वं च परंपरया

ऽध्ययनविषयत्वमनुष्ठानविषयत्वं च । तेन वेदत्रयान्तर्गतैकैकशाखापरः स्वाध्यायशब्दः । तेनाध्ययनानुष्ठानयोः स्वपरंपरापरिगृहीताध्ययनानुष्ठानविषयत्वोपपत्तिः । तच्चेतिकर्तव्यतापेक्षायां योग्यतया विचार इतिकर्तव्यतात्वेन संबध्यत इति विचारकर्तव्यतासिद्धिः । एवं च "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योर्थम्" "योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मे"त्यर्थाभिज्ञतदनभिज्ञनिन्दास्तुती उपपद्येते इति वार्तिकादयः ॥

पितृचरणास्तु प्रोक्षणादिविधावपूर्वसाधनत्वेन व्रीहीणामिवात्रापि प्रयोजनवदर्थज्ञानजनकत्वेन स्वाध्यायस्यैव भाव्यत्वं, वेदार्थज्ञानस्य द्रव्यप्राप्तिप्रतिष्ठौपयिकत्ववत्कर्मानुष्ठानौपयिकत्वमिति लोकसिद्धं पुरुषार्थत्वं, द्रव्यार्जनवत् । अतोयं विधिः प्रतिग्रहादिनियमवदध्ययननियमार्थः । नन्वध्ययननियमस्य निषेधेषु नोपयोगः, अध्ययनेनैव विध्यर्थं जानन् विधेयानुष्ठानेन फलमाप्नुयादितिवदध्ययनेनैव निषेधार्थं जानन् निषेध्यानुष्ठानेन प्रत्यवेयादिति कल्पनायां निषेधाध्ययने प्रवृत्त्ययोगादिति चेत् । न । तत्रागत्या ऽध्ययनेनैव निषेधार्थमजानन् प्रत्यवेयादिति कल्पनात् । न चैतावता ऽदृष्टार्थकत्वं, नापि विनियोगभङ्गः । यदेव विद्यया करोतीति वाक्यं तु अर्थज्ञानस्य नाङ्गताबोधकं, किं तु श्रद्धोपनिषज्जन्यज्ञानार्थवादः । अस्तु वा यत्करोतीति वैदिककर्मसामान्यमुद्दिश्य विद्यापदलक्षितार्थज्ञानविशेषनियमार्थः स चाङ्गताबोधकः, व्रीहिविधिवत् । तथापि न क्रत्वपूर्वार्थज्ञानजनकत्वेनैवोद्दिश्यता, येनाध्ययनस्याङ्गता स्यात्,स्याच्च प्रकरणापेक्षा । स्वाध्यायस्योद्दिश्यत्वादेव तद्गतैकत्वाविवक्षया वेदानधीत्येत्यादिस्मृतेरेतन्मूलकत्वे न तन्मूलश्रुत्यन्तरकल्पनागौरवम् । तेनार्जनविधिवद् अर्थज्ञानजनकत्वेनैवोद्दिश्यतेति अर्थज्ञानफलकविधिर्विचारकर्तव्यताक्षेपक इत्याहुः ॥

तेनार्थज्ञानपर्यन्तं गुरुकुलवासो विचारकरणं चाध्ययनविधेः फलम् । क्रत्वधिकारनियमाच्च । तथाहि । वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्यादिवाक्यैर्ब्राह्मणाद्यङ्गत्वेनोपनयनं विधीयते । अष्टवर्षं ब्राह्मणमुपनयीतेत्यादिवाक्येषु ब्राह्मणाद्युद्देशेनाष्टवर्षत्वादिविधिः तत्संनिधिपठितश्चाध्ययनविधिः कर्तृसापेक्षः कार्यापेक्षानुपनीतानेव कर्तॄन् गृह्णाति इत्यध्ययनविधिप्रयुक्ताध्ययनजन्यार्थज्ञाने त्रैवर्णिकानामेव सिद्धे क्रतुविधयो ऽप्यर्थज्ञानोपायाक्षेपकत्वाभावलाघवसहकृता ब्राह्मणादिपरा एव भवन्तीति शूद्रादेरुपनीतकर्तृकाध्ययनजन्यार्थज्ञानरूपाङ्गसंपादनासमर्थस्य नाधिकारः । तमध्यापयीतेति संनिधिसिद्धोपनीतकर्तृकत्वानुवादः । यद्वा उपनयनाध्यापनवाक्ययोः प्रयोजकव्यापाराविवक्षया उपगमनाध्ययनविधिः । अष्टवर्षो ब्राह्मण उपगच्छेत्सोधीयीतेति शाखान्तरीयत्वेन स्वाध्यायविधेर्नानर्थक्यम् । कर्मणां नित्यतया उपनयनाध्ययनयोः फलतो नित्यत्वम् । यद्वा

ब्रह्मक्षत्रविशां काल औपनायनिकः परः ।
अत ऊर्ध्वं पतन्त्येते

इति वाक्येन अनधीयाना व्रात्या भवन्तीति निषेधेन च नित्यत्वसिद्धिः । अधीतवेदस्य प्रयोजनवत्त्वं चेत्थमवसेयम् । विधीनां प्रवृत्तिजनकप्रवर्तनाज्ञानम्, अर्थवादानां प्राशस्त्यज्ञानं, मन्त्राणां विशिष्टार्थस्मरणं, नाम्नां कर्मभेदो गुणफलोपबन्धः संकल्पलाघवं च, साम्नामक्षराभिव्यक्तिः, स्तोभानां सामकालपूर्तिः,उपनिषदां पारलौकिकफलककर्मप्रवृत्तिजनकशरीरव्यतिरिक्तजीवात्मज्ञानं, ब्रह्मज्ञानादि च यथेष्टमूहनीयम् । एवमङ्गानां वेदोपकारकत्वम् । तच्च शिक्षायाः स्वरादिनिश्चयद्वारा, कल्पस्य शाखान्तरसंदिग्धविध्युपसंहारद्वारा, न्यायलभ्यार्थतात्पर्यनिर्णयद्वारा च, व्याकरणस्य वैदिकोहविज्ञानद्वारा, छन्दसां वैदिकवाक्यपरिमाणद्वारा, ज्योतिषस्य वैदिककर्मप्रयोगोपयोगितिथ्यादिज्ञानद्वारा, अधीतवेदजन्यार्थज्ञानोपयोगित्वाद् शास्त्रारम्भसिद्धिर्वैधी । अधिकरणं च पञ्चाङ्गम् ।

विषयः संशयश्चैव पूर्वपक्षस्तथोत्तरः ।
प्रयोजनं च पञ्चाङ्गं शास्त्रे ऽधिकरणं स्मृतम् ॥

संगतिश्चेति क्वचित्पाठः । तच्चेत्थम् । अध्ययनविधिर्विषयः । वेदाध्ययनोत्तरं धर्माधर्मज्ञानफलकविचारविधायको न वेति संशयः । अध्ययनस्य गुरुमुखोच्चारणपूर्वकोच्चारणरूपत्वात्तस्य विश्वजिद्वत्स्वर्गार्थत्वादधीत्य स्नायादिति स्नानविधिना न कर्तव्य इति पूर्वपक्षः । उक्तयुक्त्या ऽध्ययनविधेरर्थज्ञानपर्यन्ततया तस्य विचारमन्तरेणासंभवात्कर्तव्यः । स्मृतिस्त्वध्ययनकरणकभावनोत्तरकालं स्नानमिति व्याख्येया, श्रुत्यनुरोधादिति सिद्धान्तः । प्रयोजनं स्पष्टम् । एवमग्रे ऽप्यधिकरणानि द्रष्टव्यानि । तथा च सिद्धं धर्मज्ञानाय शास्त्रमारम्भणीयमिति । तज्ज्ञानं च स्वरूपप्रमाणसाधनप्रयोजनविचारद्वारेणेति तच्चिन्ता । एवं सूत्रे अकारप्रश्लेषेणाधर्मचिन्ताया अपि शास्त्रविषयत्वमुक्तम् ॥

अत्र जैमिनेर्विघ्नाभावनिश्चयाद् ग्रन्थादौ न मङ्गलाचरणे प्रवृत्तिरिति जीर्णाः । वस्तुतस्तु अतः पदेन अध्ययनहेतुत्वोक्तेरानन्तर्यस्याप्यर्थप्राप्तत्वादथशब्दानर्थक्यापत्त्या अथशब्दो मङ्गलार्थकः । तत्त्वं च समाप्तिविघ्नध्वंसान्यतरहेतुत्वेन विहितत्वम् । विधायको वेदस्त्वाचारानुमेयः । न च नास्तिकग्रन्थकादम्बर्यादावन्वयव्यतिरेकव्यभिचारेण मङ्गलस्य तद्धेतुत्वेन

Digitized by Google

विधिर्न संभवतीति वाच्यम् । व्यभिचारस्य हेत्वन्तरप्रयुक्ततया श्रुतिबोधितहेतुत्वबाधकत्वाभावाद्विघ्नसमसंख्याकमङ्गलत्वेन कारणत्वकल्पनाद्वेति जीर्णाः । समाप्तेर्बुद्धिप्रतिभादिदृष्टसामग्रीजन्यतया मङ्गलाजन्यत्वेन विघ्नध्वंसहेतुत्वेन विहितत्वं मङ्गलत्वमिति मणिकृत् । अत्र चिन्तयन्ति । विघ्नध्वंसस्य न भाव्यता, अपुरुषार्थत्वात् । न च समाप्तिजनकत्वेन तस्य पुरुषार्थता । समाप्तौ विघ्नसंसर्गाभावस्यैव जनकतया ध्वंसस्याजनकत्वात् । अन्यथा विघ्नात्यन्ताभाववदारब्धस्य समाप्तिर्न स्यात् । इष्टसाधनत्वभाव्यत्वयोः समानप्रकारकत्वनियमात् । न च विघ्नसंसर्गाभावस्यैव भाव्यता । अत्यन्ताभावप्रागभावयोर्ध्वंसवदजन्यत्वेन संसर्गाभावत्वस्य भाव्यतानवच्छेदकत्वात् । अतोऽदृष्टद्वारा मङ्गलस्य बुद्धिप्रतिभादीनां च दृष्टद्वारा समाप्तिजनकत्वम् । यदि चोपवापकर्मत्वेन तुषाणामन्वये तादृशनियमस्य व्यभिचार इति विभाव्यते तदा कोणकरप्रतिपत्तिकर्मत्वातिरिक्तकर्मत्वान्वये तादृशनियमाद्विघ्नध्वंसत्वस्य भाव्यतावच्छेदकत्वानुपपत्तिरेव । अदृष्टकल्पनागौरवं तु विघ्नध्वंसस्य फलत्वेऽपि मङ्गले पूर्वोत्तराङ्गोपसंहृतये तुल्यमिति दिक् ॥

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

अनेन सूत्रेण धर्मस्वरूपं तत्प्रमाणं चोच्यते । न तावद्यागापूर्वोभयनिष्ठा धर्मत्वं जातिः । यागस्य क्रियेच्छान्यतररूपतया क्रियात्वेनेच्छात्वेन च संकरात् । अतोऽपूर्वनिष्ठैव सुखकारणतावच्छेदिका धर्मत्वं जातिरिति नैयायिकाः ॥ अपूर्वमजानतामपि यागादिकर्तरि धार्मिक इति प्रयोगाद्वेदबोधितेष्टसाधनत्वरूपो यागापूर्वोभयनिष्ठोपाधिरेव धर्मत्वमिति केचित् । वस्तुतस्तु अलौकिकश्रेयःसाधनत्वेन विहितक्रियात्वं विहितत्वं वा धर्मत्वम् । सोमादिष्वङ्गत्वेन विहितेष्वतिव्याप्तिवारणाय तृतीयान्तम् । अलौकिकत्वं च वेदतदुपजीविप्रमाणातिरिक्तप्रमाणागम्यत्वे सति प्रमितिविषयत्वम् । वेदत्वं च न मुख्यवेदप्रयोगविषयत्वं शाखासमुदायत्वं वा, शाखात्वस्य वेदैकदेशत्वरूपतया आत्माश्रयात् । नापि संदिग्धकर्तृकवाक्यत्वम् । वादिनोः संदेहाभावेन मध्यस्थस्य वादिपञ्चावयववाक्यप्रयोगजन्यतया तत्र पक्षतावच्छेदकज्ञानाभावेनान्योन्याश्रयात् । अतो मन्त्रत्वब्राह्मणत्वव्यापकजातिविशेषो वेदत्वमिति केचित् । तदपि पौराणमन्त्रब्राह्मणत्वव्यापकपुराणत्वेऽतिव्याप्तेर्न युक्तम् । शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दाजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वमिति चिन्तामणिः । अत्र लौकिकवाक्येऽतिव्याप्तिवारणाय सत्यन्तं, घटादिवारणाय द्वितीयं, स्मृतिपुराणादिवाक्येष्वतिव्याप्तिवारणाय शब्दाजन्येति । तादृशेश्वरीयज्ञानजन्यत्वाद्वेदस्य लक्षणसमन्वयः । अपौरुषेयवाक्यत्वं वेदत्वम् । अपौरुषेयत्वं च पौरुषेयभिन्नत्वम् । पौरुषेयत्वं च न तावत्स्वतन्त्रपुरुषप्रणीतत्वम् । स्वातन्त्र्यस्य निर्वक्तुमशक्यत्वाद्, व्यर्थविशेषणत्वात्, पठ्यमानभारतेऽव्याप्तेश्च । नापि शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्यजातीयत्वं, पठ्यमानभारतेऽव्याप्तिवारणाय तज्जातीयेति । महाभारतादावसंभवात् सर्वस्यैव शब्दजन्यवाक्यार्थज्ञानजन्यत्वात् । तदुच्चारणेच्छाजन्यवाक्यत्वं, तदर्थधीजन्यवाक्यत्वं वा, सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं वा स्मृतिपुराणादिष्वव्याप्तिवारणाय सजातीयेति । एतादृशपौरुषेयत्वाभावस्य वेदे सत्त्वात् । तथा च सिद्धमपौरुषेयं वाक्यं वेद इति । उपपादयिष्यते चेदमुपरिष्टात् । अनिष्टसाधनकलञ्जभक्षणादौ व्यभिचारवारणाय श्रेयःपदम् । अपूर्वे व्यभिचारवारणाय विहितेति । तत्त्वं च विधिविषयभावनान्वयित्वम् । तेन फलसाधनत्वेन विहितक्रियाद्रव्यगुणादीनां धर्मत्वम् । एतेन विहितक्रियाजन्यत्वमपूर्वनिष्ठमेव धर्मत्वमित्यपास्तम् । धर्मः क्षरति कीर्तनादित्यादौ तु लाक्षणिकः प्रयोगः । एवं च "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणी"ति ।

"इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मः"

इति निर्धारणषष्ठ्यपि संगच्छते । न चैवं श्येने धर्मत्वापत्तिरिष्टत्वात् । प्राणवियोगरूपहिंसायाः श्येनफलत्वेन श्येने हिंसात्वाभावान्निषेधाप्रवृत्तेरधर्मत्वायोगात् । तदुक्तम् ।

हिंसा हि फलमेतेषां भिन्ना तेभ्यः स्वरूपतः ।
सा हि प्राणवियोगात्मा श्येनस्तत्रासिवत्पृथक् ॥

यदि च प्राणवियोगानुकूलव्यापारस्य हिंसात्वमुपेयते तदाप्यदृष्टाद्वारकव्यापारस्य हिंसात्वात् श्येने तदभावः सुवचः । अस्तु वा हिंसात्वं तथाप्यग्नीषोमीयहिंसावद्विधेयतया निषेधाप्रवृत्तेर्धर्मत्वोपपत्तिः । यागे रागादङ्गे वैधी प्रवृत्तिरित्यादि प्राभाकरवचनं निर्युक्तिकत्वादनादेयम् । यदि च तत्र हिंसात्वाभावेऽप्यदृष्टद्वारकमरणानुकूलव्यापारस्याभिचारत्वेन

"अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुध्यति"

इति स्मृत्याऽभिचारस्य निषिद्धतया तत्राधर्मत्वं विभाव्यते, तदा तस्यान्यतररूपेण धर्मत्वेऽपि न क्षतिः । अलौकिकपदेनैव विवाहार्थमिथ्यावादस्य विधेयत्वेऽपि धर्मत्वं व्यावर्त्यते । तस्य विवाहमात्रसाधनतया तदभावात् । अत एव

पञ्चानृतान्याहुरपातकानि

इति पातकत्वाभावमात्रं तत्र, न तु धर्मत्वम् । उपनिषज्जन्यात्मज्ञानस्याविद्यानिवृत्तिद्वारा मोक्षजनकस्य प्रमाणान्त-

Digitized by Google

इष्टाप्राप्त्याद्यलौकिकत्वमिति न तत्र धर्मत्वम् । अस्तु वा तत्र धर्मत्वम् । निषेधबोधितालौकिकानिष्टसाधनत्वमधर्मत्वम् । इदमप्यवधेयम् । स्वप्नकृतगङ्गास्नानादीनां मिथ्यात्वेपि श्रेयःसाधनतया धर्मत्वम् ।

"यस्यांयस्यामवस्थायां यद्यत्कर्म करोति यः ।
तस्यांतस्यामवस्थायां तत्तत्फलमुपाश्नुते,, ॥

इति वचनात् । अतः सिद्धं क्रियादीनां धर्मस्वरूपत्वम् ॥ एतत्प्रमितिकरणं वेदः । तत्रापि प्राधान्येन विधिनिषेधौ । ननु कोयं विधिस्तेन च कथमलौकिकश्रेयःसाधनत्वबोध इति चेत् । अत्र केचित् । लिङादिश्रवणे प्रवृत्तिर्जायत इति लिङादिज्ञानं प्रवृत्तिसामग्रीजनकम् । सा च कृतिसाध्यत्वप्रकारकेच्छारूपा चिकीर्षा, तज्जनकज्ञानं च लिङादिभिर्जन्यते, तच्चेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानम् । अन्यतराभावे प्रवृत्त्यजननात् । अतो लिङादिज्ञानेन त्रितयज्ञानजननात् त्रितयेपि शक्तिः । पुष्पवन्तशब्दवद्युगपदर्थत्रयस्य बोधः । अन्वयश्च तेषां विधेयधात्वर्थे । एवं च यागादिनिष्ठेष्टसाधनताबोधाद्धर्मे प्रामाण्यं, निषेधेष्वपि कलञ्जभक्षणादावनिष्टसाधनत्वबोधादधर्मे प्रामाण्यमिति ॥ मीमांसकास्तु विधेः प्रवर्तनायां शक्तिः । शब्दजन्यप्रवृत्तौ प्रवर्तनाज्ञानस्य हेतुत्वात् । प्रवर्तनाज्ञानस्य प्रवृत्तिहेतुत्वम् अहमेनं प्रवर्तयामि आचार्यो मां प्रवर्त्तयतीत्यनुभवात् । न च तत्रेष्टसाधनत्वज्ञानमेव प्रवर्त्तकम् । अनिष्टसाधनेपि आचार्यप्रवर्त्तितोहं करोमीत्यनुभवात् । प्रवर्तना च परनिष्ठप्रवृत्तिहेतुः प्रवर्त्तकधर्मः । प्रवर्त्तकधर्मत्वं चाहमेनं प्रवर्तयामीति देवदत्तस्त्वां प्रवर्तयति नाहमित्यादिप्रतीतिसाक्षिकं, भोजनस्य स्वनिष्ठप्रवृत्तिहेतुत्वेन प्रवर्तनात्ववारणाय परनिष्ठेति प्रवृत्तिविशेषणम् । आचार्यत्वादिवारणाय प्रवृत्तिहेतुरिति । प्रवृत्तिहेतुलिङादिवारणाय धर्मत्वं समवेतत्वं बोध्यम् । स च धर्मो लोके इच्छादिरूपो वेदे तु तदसंभवाल्लिङादिनिष्ठोऽलौकिकः कल्प्यते । प्रवृत्तिजनकत्वं च प्रवृत्तिविषयेष्टसाधनताज्ञानजननद्वारेत्याक्षिप्तेष्टसाधनताबोधकत्वात्सिद्धं विधेः प्रामाण्यम् । एतच्च नियोज्यान्वयवादे स्फुटीकरिष्यते । एवमर्थवादानामपीष्टसाधनयागविशेष्यकलक्षितप्राशस्त्यप्रकारकप्रमितिजनकत्वेन भावनाविशेष्यकप्राशस्त्यादिप्रमितिजनकत्वेन वा प्रकारांशे अनधिगतार्थगन्तृत्वं विशेष्यांशे धर्मप्रमाजनकत्वं चोपपादनीयम् । एवं मन्त्राणां निर्वापाग्न्यादिस्मारकत्वेनानधिगतार्थगन्तृत्वरूपप्रामाण्यासंभवेपि अविसंवादिफलकत्वमेव प्रामाण्यमिति जीर्णाः ॥ प्रकृताविधिकल्पनद्वारेष्टसाधननिर्वापादिविशेष्यकमन्त्रप्रकारकप्रकाश्यतादिसंसर्गकप्रमाप्रयोजकत्वेनोभयोपपत्तिरिति सोमेश्वरः ॥ प्रयाजादिमन्त्रादिविशिष्टेन भावयेदिति प्रयोगविध्यर्थे पदार्थे पदार्थविधया प्रामाण्यमिति मिश्राः ॥ वस्तुतस्तु मन्त्राणां मन्त्रवाक्यार्थबोधजनकत्वेनैव प्रामाण्यं निर्वापाग्न्यादिसंसर्गस्यानधिगतत्वेनानधिगतार्थगन्तृत्वोपपत्तेः । दृष्टसाधननिर्वापस्य विशेष्यत्वाद्धर्मप्रामाण्योपपत्तेश्च । यदि च स्वसमानाधिकरणस्वाव्यवहितपूर्वक्षणवृत्तिज्ञानाविषयविषयकत्वरूपमनधिगतार्थकत्वं विभाव्यते तदा सुतरां स्मारकत्वे ऽपि प्रामाण्योपपत्तिः । एवं नाम्नां सप्रकारकप्रमितिजनकत्वेन प्रामाण्यम् ॥

तस्य निमित्तपरीष्टिः ॥ ३ ॥

धर्मे वेदः प्रमाणमित्युक्तं, तत्संभवति नवेति परीक्षा, प्रत्यक्षादीनां धर्मप्रामाण्यासंभवनिरूपणद्वारा क्रियत इत्यर्थः । किं नाम प्रामाण्यं, प्रमाकरणत्वम् । ननु किं प्रमात्वम् । उच्यते । यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वं, भ्रमवारणाय विशेष्यकान्तम्, रजतविशेष्यकद्रव्यत्वप्रकारकज्ञाने रजतत्वप्रमात्ववारकं तत्प्रकारकमिति । न च रङ्गरजतयो रजतरङ्गप्रतीतेः प्रमात्वापत्तिः, ज्ञानैक्येन तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोः सत्त्वादिति वाच्यम् । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य विवक्षणात् । तत्रापि येन संबन्धेन तद्वत्त्वं तेन तत्प्रकारकत्वं बोध्यम् । अतो न समवायेन लोहितः स्फटिक इति ज्ञाने ऽतिप्रसङ्गः । न चैवं पाकरक्ते इदानीं श्यामरूपवानिति प्रतीतेः प्रमात्वप्रसङ्गः । यदवच्छिन्नेत्यस्य विवक्षितत्वात् । रूपप्रकारताया वर्तमानकालावच्छिन्नरूपवद्विशेष्यकत्वानवच्छेदकत्वात् । अन्ये तु अयं विनाशीत्यादौ मतुपो वर्तमानार्थत्वासंभवेन संबन्धार्थकत्ववदत्रापि संबन्धार्थकत्वादव्याहतमेव प्रमात्वमित्याहुः ॥ निर्विकल्पकस्य तु भ्रमप्रमोभयबहिर्भूतत्वमेवाकरे व्यक्तम् । अस्तु वा तस्यापि प्रमात्वं, विशेष्यावृत्त्यप्रकारकत्वस्यैव प्रमात्वात् । अत्र ज्ञानत्वघटितमेव प्रमात्वं सुवचं, तथापि तस्य स्मृतिसाधारण्येन तत्कारणस्य प्रमाणान्तरतापत्त्यानुभवत्वघटितमेवानुमन्यन्ते सांप्रदायिकाः । अनुभवत्वस्य जातित्वेन ज्ञानत्वाघटितत्वाच्च गौरवमित्यन्ये ॥ वस्तुतस्तु ज्ञानत्वघटितमेव तल्लाघवात् । न च स्मृतिकारणस्य प्रमाणान्तरतापत्तिः । इष्टत्वात् । निर्युक्तिकप्रवादस्य हेयत्वात् । अत एव मन्त्राणां स्मारकत्वे ऽपि प्रामाण्यम् । अनुभवत्वं च स्मृतिभिन्नज्ञानत्वं, स्मृतिजनकतावच्छेदकजातिविशेषो वा । न च स्मृतौ निश्चयत्वेन ज्ञानत्वेन वा जनकतेति वाच्यम् । गौरवात् । बहुतरानियताजनकवृत्तित्वाच्च । न च स्मृतितो ऽपि स्मृतिजननादनुभवत्वेन स्मृतिहेतुतेति वाच्यम् । प्रथमानुभवस्यैव सं-

Digitized by Google

स्कारद्वारा तत्र हेतुत्वात् । न च स्मरणेनानुभवजन्यसंस्कारनाशात्स्मरणोत्तरमस्मरणप्रसङ्गः । चरमस्मृतेरेव तन्नाशकत्वकल्पनात् । अतो ऽनुभवत्वेन स्मृतिजनकता । संस्कारं प्रति तु उपेक्षान्यनिश्चयत्वेन । संशयात्संस्काराजननाच्चिरश्चयेति । समानप्रकारकस्मृतेरेव संस्कारनाशकत्वकल्पनात्समूहालम्बनाद्वितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः । उद्बोधकसमवधानस्यैव तत्तत्स्मृतिजनकत्वात् । उपेक्षात्वं च प्रवृत्तिनिवृत्त्यजनकज्ञानत्वम् । तादृशेन संस्कारानुत्पत्तेः सर्वसंमतत्वात् । उपेक्षान्यत्वं च उपेक्षात्वात्यन्ताभाववत्वम् । तेनांशे उपेक्षात्मकस्यांशे ऽनुपेक्षात्मकस्य सुवर्णतृणे इति ज्ञानस्याद्यांशेन संस्कारजनकत्वमप्रत्यूहम् । तदंशे उपेक्षात्वाभावसत्त्वात् । इदं रजतमिति ज्ञाने प्रकारांशे प्रमात्वाभाववत् । अतो ऽनुभवत्वं जातिः ॥ वस्तुतः संस्कारं प्रति उपेक्षान्यसंशयान्यानुभवत्वेन स्मृतिं प्रति ज्ञानत्वेन जनकता, नातः पण्डसंस्कारकल्पनेति युक्तम् । एवं च संस्कारजनकतावच्छेदकतया ऽनुभवत्वजातिसिद्धिरिति ॥ संस्कारश्च सविषयकः । अन्यथा पटविषयकानुभवस्य स्वजन्यसंस्कारसंबन्धेन स्मृतिहेतुत्वे घटत्वप्रकारकानुभवात् तद्विशेष्यकस्मरणापत्तिः । अतः समानप्रकारकसमानविशेष्यकसंस्कारस्य तादृशस्मृतिं प्रति हेतुत्वान्नानुपपत्तिः । एवं च स्मृतिजनकतावच्छेदके ऽनुभवत्वस्याप्रवेशेन लाघवम् । समानविशेष्यकसमानप्रकारकत्वेनैव स्मृतिजनकत्वादिति दिक् ॥ स्मृतित्वं च ज्ञातविषयकज्ञानत्वं, संस्कारजन्यज्ञानत्वं वा । एवं चाज्ञातविषयकं बाधकज्ञानरहितज्ञानं प्रमेति फलितम् । अनेनैवाशयेनागृहीतग्राहित्वं प्रामाण्यमित्याचक्षते । न चैवं गृहीतविषयकधारावाहिकज्ञानस्याप्रामाण्यप्रसङ्गः । कालस्य षडिन्द्रियवेद्यत्वेन पूर्वक्षणविशिष्टघटस्य विषयीकरणेन तादृशस्योत्तरज्ञानाविषयतया ऽनधिगतार्थविषयकत्वसंभवात् । मन्त्राणामनुवादवाक्यानां स्मृतीनां च स्वसमानाधिकरणस्वाव्यवहितपूर्वक्षणवर्त्तिज्ञानाविषयविषयकत्वस्वरूपागृहीतग्राहित्वेन प्रामाण्योपपत्तिः ॥ तानि च प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्ध्याख्यानि षड् लौकिकानि । धर्मप्रमाणानि विध्यर्थवादमन्त्रनामधेयस्मृतिशिष्टाचाररूपाणि षट् । धर्मभेदकानि शब्दान्तराभ्याससंख्यानामगुणप्रकरणान्तराणीति षट् । धर्माङ्गताबोधकानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्येति षट् । श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिरूपाणि षट् क्रमबोधकानि । वचननामलिङ्गान्यतिदेशप्रमाणानि । स्थानापत्तिरूहप्रमाणम् । प्रत्याम्नानप्रतिषेधार्थलोपरूपाणि बाधप्रमाणानि । एवमेकत्रिंशदलौकिकप्रमाणानि । एषामालोकसंयोगादिवत्सहकारितामात्रं, विधिरेवात्र मानमित्यपि केचित् ॥ इदं तु चिन्त्यते । ज्ञानप्रामाण्यं ज्ञानहेतुभिन्नहेतुजन्यं ज्ञानग्राहकभिन्नज्ञानग्राह्यं वा, तज्ज्ञानसामग्रीजन्यं ज्ञानग्राहकसामग्रीग्राह्यं वेति ॥ अत्र नैयायिकाः । प्रमात्वं ज्ञानसामान्यकारणभिन्नकारणजन्यतावच्छेदकम् । ज्ञानवृत्त्यनित्यधर्मत्वात् । अप्रमात्ववदित्यनुमानेन प्रमात्वस्येन्द्रियादिगतगुणजन्यत्वं सिद्ध्यति । दोषाभावस्य कारणत्वे गौरवात् । पीतः शङ्ख इति शङ्खप्रमानुत्पत्तिप्रसङ्गाच्च । अन्वयव्यतिरेकाभ्यां तद्धेतुकत्वसिद्धेश्च । एवं च प्रमायां गुणः भ्रमे दोषः कारणम् । किं च रङ्गादपि रजतज्ञानोत्पत्तिदर्शनाच्च ज्ञानमात्रस्य तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वनियमः । अतस्तत्र भिन्ना सामग्री वाच्या । ज्ञानसामान्यकारणजन्यत्वे जन्यज्ञानमात्रस्य प्रमात्वप्रसङ्गः । तेन प्रामाण्यमप्रामाण्यं च परत उत्पद्यते । एवं ज्ञानान्तरेण गृह्यते । तच्च इदं ज्ञानं प्रमा, गुणवत्कारणजन्यत्वात्, अर्थक्रियासंवादात्, बाधाभावात्, इत्याद्यनुमानम् । संवादत्वं च तद्विषयविषयकत्वम् । न चैवं वेदवाक्यजन्ययागस्वर्गसाध्यसाधनभावज्ञाने ऽर्थक्रियासंवादाभावात् न कदापि प्रामाण्यनिश्चयः स्यादिति वाच्यम् । तेषामीश्वरवाक्यजन्यतया गुणवत्कारणजन्यत्वेन तदनुमानात् । न चार्थक्रियादिज्ञानेषु कथं प्रामाण्यनिश्चय इति वाच्यम् । अगत्या तत्र स्वतःप्रामाण्यग्रहाङ्गीकारात् तस्मात्परतः प्रामाण्यं निश्चीयतइत्याहुः ॥ सिद्धान्तस्तु अनन्तगुणानां हेतुत्वमपेक्ष्य ज्ञानसामान्यसामग्रीजन्यत्वस्यैवोचितत्वात् । दोषवदिन्द्रियजन्यस्यापि धर्म्यंशे प्रमात्वाच्च । एतेन गुणज्ञानज्ञाप्यत्वं दोषाभावज्ञानज्ञाप्यत्वं चापास्तम् । अनेकदोषाभावानामननुगतत्वेन गौरवात् । अतो न ज्ञानोत्पत्तेः परतस्त्वं, नापि ज्ञप्तेः परतस्त्वं संभवति । तथाहि । नोदकाहरणरूपार्थक्रियाज्ञानेनार्थनिश्चयद्वारा पूर्वज्ञाने प्रामाण्यनिश्चयः । तस्यापि स्वप्नावस्थायामर्थव्यभिचारेण तेनार्थनिश्चयासंभवात् । नापि तज्जन्यसुखाप्तत्या । अयथार्थादपि स्वप्ने चन्दनलेपादिज्ञानात्सुखोत्पत्तेस्तस्याप्यर्थव्यभिचारात् । किं चोदकाहरणादिरूपार्थक्रियया व्याप्यविधया घटनिश्चयः । व्याप्तिश्च संबन्धरूपेति नागृहीते संबन्धिनि ग्रहीतुं शक्यते । तत्र संबन्धिघटज्ञाने स्वत एव प्रामाण्यनिश्चयो वाच्यः । एवं गुणज्ञानसंवादज्ञानयोरपि । न चैताभ्यां विषयो निश्चेतुं शक्यते । न च तत्रापि ज्ञानान्तरेण प्रामाण्यनिश्चयः । अनवस्थापत्तेः । एवं च स्वत एवार्थतथात्वनिश्चयो वाच्यः । एवं तर्हि घटादिज्ञानेपि स्वत एव प्रामाण्यं, तस्यापराधाभावात् । तेन ज्ञानग्राहकेणैव तस्य ज्ञानमिति सिद्धं प्रामाण्यज्ञप्तेः स्वतस्त्वम् । किं च ज्ञानं न प्रत्यक्षम् । तस्य प्रत्यक्षत्वे निर्विकल्पप्रत्यक्षवारणाय निष्प्रका-

Digitized by Google

रक्तत्वनिर्विशेष्यकत्वनिःसंसर्गकत्वानां विनिगमकाभावेन त्रयाणामपि प्रतिबन्धकत्वकल्पने गौरवात् । न च विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतया तदभावाच्च निर्विकल्पकप्रत्यक्षतापत्तिरिति वाच्यम् । विशेष्ये विशेषणमिति रीत्या एकत्रोभयमिति रीत्या वा तादृशप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वाभावेन तद्रीत्या निर्विकल्पकप्रत्यक्षतापत्तेर्दुर्वारत्वात् । एवं चावश्यकप्रतिबध्यप्रतिबन्धकभावकल्पनमपेक्ष्यात्मनिष्ठगुणप्रत्यक्षे तादात्म्येन ज्ञानस्यैव धर्माधर्मभावनानामिव ज्ञानभावनादृष्टसाधारणवैजात्यकल्पनया तज्जात्यवच्छेदेनैव वा प्रतिबन्धकत्वकल्पनमुचितम्। जानामीत्याद्यनुभवानामपि अनुभवामीत्युपनीतभानत्वम्। एवं च विषयनिष्ठज्ञाततया तन्निष्ठमेव ज्ञानमनुमीयते। घटो ज्ञानवान् ज्ञाततावत्त्वादिति । तत्र घटत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन ज्ञानानुमितौ तादृशप्रकारतानिरूपितविशेष्यतारूपप्रामाण्यग्रहः । न च ज्ञाततायाः प्रमात्वाव्याप्यतया तदनुमापकत्वासंभव इति वाच्यम् । प्रमात्वस्याननुमेयत्वात् । ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत्प्रमात्वस्य स्वतस्त्वसंभवात् । न च ज्ञाततायां मानाभावः, तस्या विषयज्ञानातिरिक्ताया आवश्यकत्वात् । तथाहि । न तावद्विषयता ज्ञानस्वरूपा । घटप्रकारकभूतलविशेष्यकज्ञानाद्भूतलप्रकारकघटविशेष्यकानुव्यवसायापत्तेः । नापि विषयस्वरूपा, विशिष्टज्ञानसमूहालम्बनयोरवैलक्षण्यापत्तेः । अत उभयातिरिक्ता, सा च नित्या, लाघवात् । अन्यथा ऽनन्ततत्तद्विषयकज्ञानैरनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पनागौरवापत्तेः। एवं च नष्टयुधिष्ठिरादिविषयकज्ञानोत्पत्तिरपि सुलभेति युक्तम् ॥ अन्ये तु आत्मघटयोर्व्याप्यतालक्षणः संबन्धो मानसप्रत्यक्षः सविषयतेत्याहुः । तेषां भावं नाकलयामः ॥ अन्ये तु तत्तज्ज्ञानजन्या तत्तद्विषयनिष्ठा ज्ञातता सा च नष्टभाविविषयनिष्ठापि । न चासतोः कथं कार्योत्पत्तिरिति वाच्यम् । द्वित्वादिवदुत्पत्तौ बाधकाभावात् । न च तत्र नष्टद्वित्वस्य स्मरणमिति वाच्यम् । अननुभूतद्वित्वस्य स्मरणासंभवात् । न च यावदाश्रयप्रत्यक्षं विना कथं द्वित्वप्रत्यक्षमिति वाच्यम् । लाघवेन संयोगप्रत्यक्षे तस्य हेतुत्वाङ्गीकारेण व्यासज्यवृत्तिधर्मप्रत्यक्षे तस्य हेतुत्वाभावेन तत्प्रत्यक्षस्य सुवचत्वात् । न चाश्रयप्रत्यक्षं विना कथं तन्निष्ठगुणप्रत्यक्षमिति वाच्यम् । वायुप्रत्यक्षाभावे ऽपि तन्निष्ठस्पर्शप्रत्यक्षस्य त्वयैवाङ्गीकारात् । अतो द्वित्वबहुत्वयोर्भाविभूतपदार्थनिष्ठत्ववत् तत्तज्ज्ञानोत्पाद्यविषयताया अपि भाविभूतपदार्थनिष्ठत्वम् । न च द्वित्वादेर्गुणस्य समवायिकारणाभावेन भाविभूतयोः कथमुत्पत्तिरिति वाच्यम् । समवायसंबन्धेन भावकार्योत्पत्तौ तादात्म्यसंबन्धेन द्रव्यस्य जनकतेति समवायिकारणकार्यकारणभावस्य वक्तव्यत्वेन संख्यायाः पदार्थान्तरत्वेन विषयतावत् समवायेनोत्पत्त्यभावेन समवायिकारणानावश्यकत्वात् । संख्याया विषयतायाश्चाभावं जानामि, अभावौ द्वौ, चतुर्विंशतिर्गुणा इति प्रतीत्या ऽभावगुणादिनिष्ठतया स्वरूपसंबन्धेनैवोत्पत्त्यङ्गीकारेण समवायिकारणानावश्यकत्वात् । न च द्वित्वादीनामाकस्मिकत्वप्रसङ्गः । अपेक्षाबुद्धेरेव जनकतया नियामकत्वात् । अपेक्षाबुद्धेरभिव्यञ्जकत्वे तु नित्यतया न तदापत्तिप्रसङ्गोपि । न च कार्यसमवेतगुणत्वेनानित्यत्वानुमानात् कथं नित्यत्वमिति वाच्यम् । एकत्वेनाङ्गीकृतासु अरुणादिव्यक्तिषु व्यभिचाराद्, अनुकूलतर्काभावेनाप्रयोजकत्वाच्च । न च आश्रयाभावे विषयताद्वित्वादेः क्वावस्थानमिति वाच्यम् । कपालादिनाशे क्षणमात्रं घटादेरिव विषयताया अपि सत्त्वे बाधकाभावात् । अतो नष्टघटादावपि घटो ज्ञात इत्याद्यनुभवाद् भूतभाविनिष्ठत्वमिति दिक् ॥ अत एव ज्ञानजन्यज्ञाततावत्त्वाद् घटं जानामीति कर्मत्वोपपत्तिः । तस्मादतिरिक्ता विषयता । किं च ज्ञानेच्छाकृतिसंस्काराणां समानविषयकत्वेनैव कार्यकारणभावे लाघवादपि विषयता ऽतिरिक्ता, सैव च ज्ञातता, तयैव ज्ञानं गृह्यते, तन्निष्ठप्रमात्वमपीति स्वतस्त्वम् ॥ नन्वेवमिदं ज्ञानं प्रमा नवेति संदेहो न स्यात्, ज्ञानाग्रहे धर्मिज्ञानाभावात्, तद्ग्रहे तन्निष्ठप्रमात्वस्यापि ग्रहादिति चेन्न । नायं ज्ञानविशिष्टप्रमात्वसंशयः, किं तु विषयसंशय एवायं, पुरोवर्त्तिनि रजतत्वमस्ति वा नवेति रजतादिज्ञानोत्तरं प्रमात्वस्मरणे रजतादिज्ञाननाशात्तत्संशयोपपत्तेः । यद्वा धर्मिज्ञानाभावेपि धर्मीन्द्रियसन्निकर्षमात्रेण संशयोत्पत्तिः । यद्वा सत्यपि प्रामाण्यज्ञाने दोषवशादेव तदुत्पत्तिः । दोषश्चानभ्यासदशानापन्नत्वमिति । तस्माद्युक्तं ज्ञप्तिप्रामाण्यस्य स्वतस्त्वमिति ॥ गुरवस्तु घटादिमात्रविषयकं न ज्ञानं, सर्वज्ञानानां त्रिपुटीविषयकत्वाङ्गीकारात् । त्रिपुटी च ज्ञानात्मविषयरूपा, तेन सर्वं ज्ञानं घटं जानामीत्याद्यनुव्यवसायाकारमिति स्वेनैव स्वस्य घटादिविषयकत्वग्रहणात्ततः प्रामाण्यमित्याहुः ॥ मुरारिमिश्रास्तु घटादिज्ञानोत्तरं घटं जानामीत्याद्यनुव्यवसायो जायते तेन घटत्ववद्विशेष्यकत्वघटत्वप्रकारकत्वरूपप्रामाण्यग्रह इत्याहुः ॥ वस्तुतो जलादिज्ञानोत्तरं प्रवृत्त्या जलादिनिश्चयोत्तरं पूर्वज्ञाने प्रामाण्यं जानातीति कश्चित् ॥ कश्चित्तु ज्ञात्वा प्रामाण्यं प्रवर्तत इत्यनुभवाज्जातं ज्ञानं प्रमा न वेत्यादिसंशयानुभवाच्च ज्ञानमात्रे स्वतः प्रामाण्यनिश्चयो युक्तः । नापि परतः प्रामाण्यं क्व चित्सिद्धान्तभङ्गापादकम् ।

Digitized by Google

किं तु कुत्र चित्स्वतः प्रामाण्यग्रहः । क्व चित्परत इत्यननुगत एव प्रामाण्यग्रहः । शक्तिग्रहवत् । तेन वेदजन्यज्ञाने संशयाभावात्स्वतः प्रामाण्यं, तद्भिन्नज्ञाने तु परतः प्रामाण्यं ज्ञायते । अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेऽप्यङ्गीकृतमिति युक्तमुत्पश्यामः ॥

इति गागाभट्टकृतभाट्टचिन्तामणौ ज्ञानप्रामाण्यविचारः ॥

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

क्षीरोदधिरशायित्वात् पीयूषमिव संचितम् ।
स्फारयन् भारतं व्यासः श्रीकृष्णावतरः श्रिये ॥ १ ॥
राजानमहनि म्लानमथ भीष्मार्कतेजसा ।
गोभिरुल्लासयामास निशाकाले जनार्दनः ॥ २ ॥
निशान्तोद्घटिते वीरमुक्तिद्वारे रवौ ततः ।
कौन्तेयाः कौरवाः क्रौञ्चव्यूहव्यूहकृतोऽमिलन् ॥ ३ ॥
शिरांसि भूभुजामेव शरपातैरपातयत् ।
फलानि नालिकेराणामिव सिन्धुसुतस्ततः ॥ ४ ॥
राज्ञां भीष्मशरोत्क्षिप्ता मूर्धानो युधि नृत्यताम् ।
वरयित्रीं सुरवधूमिव द्रष्टुमगुर्दिवम् ॥ ५ ॥
क्षिप्तानां नभसि क्ष्मापमूर्ध्नां स्वस्मिन् प्रपातिनीः ।
रोषारुणा दृशोऽपश्यद्भीष्मः पुलककन्दलः ॥ ६ ॥
धुनीसुतशरोद्धूतैरास्ये राज्ञां सकुण्डलैः ।
सर्वाङ्गमफलद्व्योमसूर्येन्दुफलपादपः ॥ ७ ॥
इत्यस्य विशिखापातैर्वातैरिव विलोडिताम् ।
विलोक्य वाहिनीं क्रोधादधावद्धनुमद्ध्वजः ॥ ८ ॥
मर्माविद्भिर्द्विषां बाणैः कटाक्षैरिव सुभ्रुवः ।
पुरतस्ताड्यमानोऽपि हृष्यन्नेवापपात सः ॥ ९ ॥
स बाणविद्धसर्वाङ्गं गलद्रक्तं द्विषद्बलम् ।
मनसः कोपतप्तस्य धारागृहमिव व्यधात् ॥ १० ॥
तमभ्यधावत् क्रुद्धोऽथ धुनीसूनुः किरन् शरान् ।
संहर्षात्तालपातालकुमारप्रकरोपमान् ॥ ११ ॥
पार्थस्य चापतः सिन्धोर्मर्यादात इवोर्मिभिः ।
शरैः प्रसस्रे रुन्धद्भिर्लोकान् रोद्धुमवारितैः ॥ १२ ॥
विक्रमोपक्रमस्ताभ्यां तदा कोऽपि तथा दधे ।
व्योमापि विशिखस्तोमे रोमाञ्चीव यथैक्ष्यत ॥ १३ ॥
स्पर्शैकपेयं मधुरममरीकारकारणम् ।
अन्येऽप्यारेभिरे वीरा द्वन्द्वयुद्धरसायनम् ॥ १४ ॥
क्षतेभकुम्भोद्यन्मुक्ताछलोच्छलितसीकरम् ।
रेमे कलिङ्गवाहिन्यां भीमः साकं जयश्रिया ॥ १५ ॥
भीमभिन्नकरिश्रेणिरक्तवेणिषु मज्जताम् ।
तथासन् जीवितत्राणशरणं जीवतां मृताः ॥ १६ ॥
व्योम्नि भीमक्षतोत्क्षिप्ता द्विरदा नीरदा इव ।
रक्तवर्षैः कलिङ्गेषूत्पातं कंचिदसूचयन् ॥ १७ ॥
भीमोऽवधीच्छक्रदेवं भानुमन्तं च गोपतिम् ।
इत्युत्थिते ध्वनौ सिद्धा न्यधुरिन्द्रार्कयोर्दृशम् ॥ १८ ॥
ततो मूर्च्छत्पतद्वीरमुन्ननाद वृकोदरः ।
दिग्गजा द्यां तदैयन्त स्फुटद्ब्रह्माण्डशङ्कया ॥ १९ ॥
कुम्भीन्द्रेणेव भीमेन यमलीलावता युधि ।
ध्वस्तो वीररसस्येव प्रासादः केतुमान् नृपः ॥ २० ॥
अथ भीष्मास्त्रविरथस्तां चमूमत्यतापयत् ।
मारुतिर्मारुतोद्धूतजीमूत इव भानुमान् ॥ २१ ॥
सौभद्रशरवीचीभिः कुमारः कुरुभूपतेः ।
बालद्रुम इवाम्भोदधाराभिर्विधुरीकृतः ॥ २२ ॥
शराः सुयोधनादीनामितश्चेतश्च पातिनः ।
व्यजयन् संयतिश्रान्तमार्जुनिं वाजमारुतैः ॥ २३ ॥
द्रुमाणां कुसुमानीव यशांसि क्ष्माभुजां क्षिपन् ।
तत्रातित्वरया वायुरिवायात् कपिकेतनः ॥ २४ ॥
विपक्षविशिखास्तस्मिन्नकिंचित्करतां ययुः ।
नरेऽतिनीरसे नारीनिरीक्षणगुणा इव ॥ २५ ॥
कीनाशदासहस्ताग्रैरिव भल्लिनखोत्कटैः ।
असून् क्रष्टुं विपक्षेषु विष्वक् पेते तदाशुगैः ॥ २६ ॥
कौन्तेयकृतैर्वीरेन्द्रैर्विध्यमानः समन्ततः ।
उद्विग्न इव तीक्ष्णांशुस्तदास्ताद्रिगुहां गतः ॥ २७ ॥
ततोऽवहारव्याहारभाजि भीष्मे भुजाभृतः ।
ययुर्निजनिजं धाम धामनिह्नुतवह्नयः ॥ ॥ २८ ॥

द्वितीयमहः ।

अथोल्बणरणश्रद्धाः संनद्धा दोर्भृतोऽभितः ।
रत्नकङ्कटकान्त्योच्चैः क्षपाशेषे तमोऽक्षिपन् ॥ २९ ॥

Digitized by Google

भीष्मो व्यूहं व्यधाद्वैरिदर्पसर्पाय गारुडम् ।
तद्व्यूहगलहस्तार्थमर्धचन्द्रमथेन्द्रभूः ॥ ३० ॥

अभीष्टाट्टामसङ्ग्राममिथोदानसुहृत्तमाः ।
परस्परं प्रशंसन्तः प्रीता भुजभृतोऽमिलन् ॥ ३१ ॥

तदापलिप्रकीलालबालार्कद्युतिमालया ।
न प्रत्यङ्गं लगन्तोऽपि प्रहारा जज्ञिरे भटैः ॥ ३२ ॥

प्रविष्टौ कुरुसैन्येषु द्रुतं भीमघटोत्कचौ ।
भक्ष्येषु सममाबद्धौ बालकस्य कराविव ॥ ३३ ॥

तच्चापयोः शरासारैर्नो मुहुर्मुहुः कति ।
कटाक्षैर्लक्षितास्तीक्ष्णैः कालरात्रिदृशोरिव ॥ ३४ ॥

रिपुराजशरश्रेणिस्तयोरुपरि निष्फला ।
पपात जलभृद्वृष्टिरूषरार्णवयोरिव ॥ ३५ ॥

भीमसेनपृषत्केन हृदयान्तःप्रवेशिना ।
मूर्च्छा कौरवभूभर्तुर्मृतिदूतीव योजिता ॥ ३६ ॥

तस्मिन् मूर्च्छाभृति हृते दूतेन रथशायिनि ।
कृष्णाद्यैस्तद्बलं चक्रे विवशं विशरारुभिः ॥ ३७ ॥

द्रुतमाहितमोहेन नृपेणोत्साहितस्ततः ।
पालिं वीररसस्येव भीष्मः कृष्टं धनुर्दधौ ॥ ३८ ॥

मुहुर्धन्व धुनीसूनोः शरापातैर्नतोन्नतम् ।
भटालिचर्वणव्यग्रयमवक्त्राभमैक्ष्यत ॥ ३९ ॥

एकैककङ्कपत्रास्तवीचीभरुधिरार्णवे ।
सपार्थरथपत्त्यश्वं निमज्जयितुमुद्यतः ॥ ४० ॥

विश्वेषामीशभीष्मस्य विशिखोर्मिषु मज्जताम् ।
न किं भवार्णवोत्तारपोतः पोतत्वमेषितः ॥ ४१ ॥

इत्युपालभ्यमानोऽन्तरनन्यमतिकैर्नृपैः ।
विभुर्भीष्मरथस्याग्रं निनाय रथमार्जुनम् ॥ ४२ ॥

युग्मम् ।

प्रसरन् भीष्मदावाग्निबाणकीलाचयोऽयतः ।
चण्डैः पाण्डवकाण्डानां वातैरेव विवर्तितः ॥ ४३ ॥

रिपुच्छेदोच्छलद्बाणे चापचक्रे किरीटिनः ।
प्राकार इव संलीनं पाण्डुसैनिकजीवितैः ॥ ४४ ॥

भीष्मस्य विशिखानेव छिन्दन् भिन्दन् परान् शरैः ।
गुरोर्भक्तिं च शक्तिं च दर्शयामास वासविः ॥ ४५ ॥

ततस्त्रसद्द्वयो भीष्मः कृष्णौ नाराचपञ्जरे ।
निनाय निजशौर्यश्री[1]जयश्रीकेलिकीरताम् ॥ ४६ ॥

कृष्णौ बिबभतुर्भीष्मप्रहारक्षतजोक्षितौ ।
कालीकटाक्षकपिशप्रभौ कालभुजाविव ॥ ४७ ॥

गाङ्गेयवत्समुख्यानां सायकानां समागमे ।
तदासीत् पाण्डवी सेना गणिकेव पराङ्मुखी ॥ ४८ ॥

शिथिलं युध्यमानेऽथ फाल्गुने गुरुगौरवात् ।
सुघोरैर्भीष्मनिर्घातैः साक्रन्दे चाखिले बले ॥ ४९ ॥

स्वार्थसार्थच्छिदे पार्थे पदबन्धमथो युधि ।
यदेवं दीप्रमुद्भ्रान्तं न वृद्धं विनिषेधसि ॥ ५० ॥

अद्य हन्म्यहमेवामुं किं त्वयेत्युद्गमद्वचाः[2] ।
चण्डांशुचक्रचण्डांशुचक्रज्वालाज्वलन्नभाः ॥ ५१ ॥

दृष्टः कथं बलद्वीवैस्त्रसद्भिस्त्रिदशैरपि ।
रथाग्रादुग्रवेगश्रीरुत्ततार क्रुधा हरिः ॥ ५२ ॥

कालापकम् ।

तं प्रेक्ष्यायान्तमुद्भ्रान्तः स्मेरो हृष्यन् प्रसन्नदृक् ।
रोमाञ्ची चञ्चयंश्चापमाचष्ट वसुरष्टमः ॥ ५३ ॥

एह्येहि नाथ मुक्तिं मे द्राग् दत्तां त्वत्सुदर्शनम् ।
मूढाश्चिरं तपःकष्टं सेवन्ते दर्शनान्तरम् ॥ ५४ ॥

द्रुतमुक्तिकृते कैश्चिन्नाथ पूज्योऽपि कोप्यसे ।
धन्योऽहमपकर्तास्मि किंचिन्न कुपितोऽसि च ॥ ५५ ॥

इत्युक्तिपरिभक्त्या च चक्राप्तिस्पृहयापि च ।
नमन्मूर्धनि गाङ्गेये मुक्तिलक्ष्मीकटाक्षिते ॥ ५६ ॥

अनूत्पत्य समुत्थाप्योत्प्लुत्यारोप्य रथे हरिम् ।
जज्ञेऽर्जुनस्त्रिजगतीप्रेक्षणीय इव क्षणम् ॥ ५७ ॥

युग्मम् ।

विश्वेश कोऽयमारम्भः संरम्भस्त्यज्यतामयम् ।
प्रभावः प्रेक्ष्यतां प्रेङ्खन् स्व एव मयि बिम्बितः ॥ ५८ ॥

इत्युक्त्वा हृष्टवैकुण्ठकम्बुनादैः कृतोद्यमाः ।
ज्यानादैराह्वयत् पार्थः सुरीर्वैरवरोत्सुकाः ॥ ५९ ॥

भुजगीव भुजा तस्य कृष्टचापबिलाग्रजा ।
असूतेवाशुगान् सर्पान् नरेन्द्रैरपि दुर्धरान् ॥ ६० ॥

---

१ सममेव द्धौ इति पा० ।

२—द्वलः इति पा० ।

तुल्यकालोच्छलच्छस्त्रैरोधि क्रोथनैरयम् ।
संभूय भूभुजां भारैर्जम्भारिरसुरैरिव ॥ ६१ ॥
अथोत्कृत्तद्विषट्टृहवाहनायुधकेतनम् ।
माहेन्द्रमस्त्रं माहेन्द्रिर्व्यधाद्विश्वक्षयक्षमम् ॥ ६२ ॥
कोऽप्यासीत् खण्ड्यमानानां पाण्डवास्त्रैर्विरोधिनाम् ।
धीवरैर्धूयमानानां शङ्खानामिव निस्वन: ॥ ६३ ॥
पतन्त्येव बलाङ्गानि विखण्ड्याहर्तुमुत्सुका: ।
व्यलसन् रक्तकुल्यासु पिशाचास्तिमिरूपिण: ॥ ६४ ॥
धनंजयजये वीरा बहुभ्यासभुजामदम् ।
तदोच्चैरमुचन्नब्धितरणे तारका इव ॥ ६५ ॥
पार्थास्त्रक्षुण्णसैन्योद्यद्रक्तसिक्त इवारुण: ।
दिनेश: प्रविवेशाब्धौ तदा स्नानमनोरथ: ॥ ६६ ॥
आप्रभातं रणाम्भोधौ संपृक्तं दिवसात्यये ।
तदिति व्यथितं चक्रद्वयं विघटितं तदा ॥ ६७ ॥

तृतीयमह: ।

अथावासेषु निर्वर्त्य शर्वरीं स्वप्नसंगरे: ।
व्यूहेन्द्रं कौरवाश्चक्रुरर्धचन्द्रं च पाण्डवा: ॥ ६८ ॥
अथ रक्षोघसंवृत्तप्रात:कृत्यपिशाचकम् ।
भीष्माभिमन्युप्रमुखा विदधुर्युद्धमुद्धतम् ॥ ६९ ॥
भूपालै: कालबालस्य प्रातराशं प्रकल्पयन् ।
कर्मव्यूह इवात्मानं भीष्मोऽर्जुनमयोधयत् ॥ ७० ॥
कृताधिकप्रतिकृतैस्तौ हृष्यन्तौ मुहुर्मिथ: ।
चिरं चिक्रीडतुश्चारुसौहार्दौ सुहृदाविव ॥ ७१ ॥
अभिमन्यु: शरासारैरेक: शूननेकश: ।
आच्छादयदुडुस्तोमान् करैरिव दिवाकर: ॥ ७२ ॥
पौरव्यपुषं दमनं नृपं सांयमनिं पुन: ।
कर्मकालाविव ज्ञानी धृष्टद्युम्नस्तदावधीत् ॥ ७३ ॥
भीमो भेजे द्रुतं प्रीतिभावं धावत्सु संमुखम् ।
मगधेन्द्रगजेन्द्रेषु भेकेष्विव भुजंगम: ॥ ७४ ॥
गदापाणेस्तदा तस्य पादातस्य प्रसर्पत: ।
तदोत्पातेन नागेन्द्रा द्वयेऽपि विचकम्पिरे ॥ ७५ ॥
खण्डितं तद्गदापातैरुच्छलन्मौक्तिकच्छलात् ।
तदोत्पपात कुम्भिभ्यो दिक्कुम्भिजयजं यश: ॥ ७६ ॥
भीमस्य पादपातैर्या पीडा भोगिविभोरभूत् ।
नैव सा तद्गदोत्क्षिप्तगजेन्द्रगिरिपातत: ॥ ७७ ॥
घ्नति तस्मिन् रणोत्पातापातरक्ताब्धिमज्जनै: ।
गजान् वीक्ष्याकुलान् देवा: क्षिप्राद्रेरस्मरन् हरे: ॥ ७८ ॥
इति क्षतसमस्तेभवल्गनं फाल्गुनाग्रजम् ।
कृतान्तमिव संभ्रान्तमीयुर्दुर्योधनादय: ॥ ७९ ॥
काण्डेन कुरुराजेन ताडित: पीडित: क्षणम् ।
स्तब्धोऽभूत् तद्वधोपायं ध्यायन्निव वृकोदर: ॥ ८० ॥
पार्थेनाथ रथस्थेन पृषत्केन हृदि क्षत: ।
वणिकां मरणस्येव मूर्च्छामाप सुयोधन: ॥ ८१ ॥
सेनापतिसुषेणाख्यौ जलसंधसुलोचनौ ।
भीममुग्रं भीमरथं भीमबाहुमलोलुपम् ॥ ८२ ॥
समं विवित्सुविकटौ दुर्मुखं दुष्प्रधर्षणम् ।
इमान् यमातिथीकृत्य तत्सुतांश्च चतुर्दश ॥ ८३ ॥
चतुर्दशसु विश्वेषु व्रजतां यशसामसौ ।
उच्चै: सहचरीचक्रे सिंहनादान् वृकोदर: ॥ ८४ ॥

विशेषकम् ।

विषमास्त्रप्रगल्भेऽथ भगदत्ते समेयुषि ।
संचुकोच नवीनेव रामा भीमपताकिनी ॥ ८५ ॥
भीमो मूर्च्छन् ध्वजालम्बी विद्धस्तदिषुणा हृदि ।
घूर्णन् बभौ स्तम्भबद्धो मदान्ध इव सिन्धुर: ॥ ८६ ॥
स्वभटाह्लढदिग्दन्तिघटो मायी घटोत्कच: ।
तमिभस्थं सुरेभस्थस्ततस्तातक्रुधारुधत् ॥ ८७ ॥
तदस्त्रवृष्टिभि: शौर्यलताकन्दौ तदापतु: ।
उत्कर्षं भगदत्तश्च सुप्रतीकश्च तद्गज: ॥ ८८ ॥
प्रणादैर्भगदत्तस्य सुप्रतीकस्य चाद्भुतै: ।
द्राङ्नरेन्द्रा गजेन्द्राश्च बभूवुर्विमदास्तदा ॥ ८९ ॥
समुज्झितेव दिङ्नागैर्घटोत्कचहृतैरिव ।
तदा तमोतम:क्रान्ता सिन्धुमग्नेव भूर्बभौ ॥ ९० ॥
मायिनां रणराज्याय रक्षसां दिवसो निशा ।
इति भैमिभिया भीष्मोऽवहारं व्याहरज्जवात् ॥ ९१ ॥
न मृतास्तावदद्येति ध्यायन्त: कौरवा ययु: ।
श्वोऽप्यमून् हन्म एवेति स्मरन्त: पाण्डवा: पुन: ॥ ९२ ॥

चतुर्थमह: ।

किं त एव जयन्तीति निशि पृष्टः सुतेन ते ।
भीष्मो जगाद गां विष्णुमना विष्णुपदीनिभाम् ॥ ९३ ॥
स्वयंभुवा भुवो भारं निराकर्तुं स्मृतः पुरा ।
गतः प्रत्यवर्ता तेन सूतो नारायणः प्रभुः ॥ ९४ ॥
विश्व विश्वेश विश्वात्मन् विश्वकार्यौघ विश्वधीः ।
जय विश्वस्थिते विश्वमय विश्वोदय प्रभो ॥ ९५ ॥
ज्ञाताज्ञात[2]प्रभो ज्ञान ज्ञप्ते तुभ्यं नमो नमः ।
मोक्षभोग्यप्रभो भोगभोक्ते तुभ्यं नमो नमः ॥ ९६ ॥
ये जघ्निरे त्वया नाथ दिवस्तोषाय दानवाः ।
भारयन्ति भुवं देवीं मानवीभूय तेऽधुना ॥ ९७ ॥
यदंशमेरुमौलिर्द्यौः पातालं यत्तलं पुनः ।
हर्तुं तस्या भुवो भारं भगवन् भव मानवः ॥ ९८ ॥
स्वयं स्वयंभुवेत्युक्ते स श्रीनारायणः प्रभुः ।
नरेण सुहृदा सार्धं भेजे भूषणतां भुवः ॥ ९९ ॥
वासुदेवार्जुनीभूय ताभ्यां गुप्तो युधिष्ठिरः ।
जयत्येव स धर्मात्मा युक्तस्तेन समं शमः ॥ १०० ॥
इति भीष्मगिरा भूपः प्रभावं भावयन् हरेः ।
आसाद्य सदनं वीरविनयैरनयन्निशाम् ॥ १०१ ॥
आपपात ततः प्रातर्भीमभीष्ममुखो मृधे ।
प्रवीरप्रकरः श्येनमकरव्यूहसंहतः ॥ १०२ ॥
कालक्रीडावने युद्धे व्यत्ययाद्वीरशाखिषु ।
यशःकुसुमशुभ्रेषु तदा पेतुः शिलीमुखाः ॥ १०३ ॥
बाणभिन्नेभकुम्भासृग्धाराभारैर्बभूव भूः ।
प्रेतप्रीतिकरी प्रेतपतिपुण्यप्रपेव सा ॥ १०४ ॥
न दन्तिघातजं रक्तं रुग्रक्तेयं रवेरिति ।
भ्रातरः कातरा धीरैर्वारयांचक्रिरे क्षताः ॥ १०५ ॥
भिन्नभूपमुखाम्भोजैः कर्णान्तोत्थशिलीमुखैः ।
इभवद्भीमभीष्माद्यैर्जगाहे वाहिनीद्वयम् ॥ १०६ ॥
ध्वनद्धन्व नदद्बाणं सत्त्वालंकारभासुरम् ।
सात्यकिः सुरनारीभ्यो रथिनामयुतं ददौ ॥ १०७ ॥
नीरन्ध्रयन् शरैः शत्रुपलायनपरान् दिशः[3] ।
तमरुद्ध ततो युद्धसूरिर्भूरिश्रवा जवात् ॥ १०८ ॥
युद्धाय धावतस्तस्य दश सात्यकिनन्दनान् ।
भूरिश्रवाः शरैश्चक्रे दिक्पालेभ्यो बलीनिव ॥ १०९ ॥
ततः प्रवृद्धवेगौ तौ वीरौ तरलितक्रुधौ ।
मिथः क्रियाभिर्विरथौ धृतासी समधावताम् ॥ ११० ॥
भुग्नाशाकरिकूर्माहिवराहगिरितद्भरात् ।
तत्सत्यसत्त्वावष्टब्धं नामज्जद्भूतलं यदि ॥ १११ ॥
भीमदुर्योधनाभ्यां तौ स्वरथाभ्यामथान्यतः ।
द्राङ्नीतौ तौ तु मेनाते जीवनं निधनाधिकम् ॥ ११२ ॥
तदा तु सात्यकिसुतध्वंसक्रोधी धनंजयः ।
धनंजयोऽभवद्धाम्ना क्रूरः कौरवकानने ॥ ११३ ॥
अब्दादिव महाशब्दाच्चण्डकोदण्डतोऽर्जुनात् ।
भूभृन्मौलिषु संपातं व्यधुः शम्पा इवेषवः ॥ ११४ ॥
तद्बाणपातव्यथिता पिण्डीभूय भवच्चमूः ।
इतश्चेतश्च लुलितैर्मृत्योः कवलतां ययौ ॥ ११५ ॥
इति निर्दम्भसंरम्भात् तदा जम्भारिजन्मना ।
अहन्यन्त सहस्राणि नृपाणां पञ्चविंशतिः ॥ ११६ ॥
द्युतैः पल्लवितं रक्तैः पुष्पितं हारमौक्तिकैः ।
मौलिभिः फलितं राज्ञां तदा दुर्मन्त्रितं तव ॥ ११७ ॥
एवमाखण्डलौ चण्डशूरमण्डलखण्डिनि ।
दुर्गमं दुर्गमम्भोधिं बिम्बोऽम्बरमणेरगात् ॥ ११८ ॥
युद्धादप्यधिकं कष्टं कलयन् रक्तकर्दमे ।
उत्सुकोऽप्यगमद्धाम वीरवारः शनैः शनैः ॥ ११९ ॥

पञ्चममहः ।

पुनः प्रभाते संनद्धाः क्रुद्धाः कौरवपाण्डवाः ।
ते क्रौञ्चमकरव्यूहभाजो युयुधिरेऽधिकम् ॥ १२० ॥
विपक्षादागतेभ्योऽपि तीक्ष्णेभ्योऽपि भृशं मुखे ।
ते मार्गणेभ्यस्तृणवद्दातारो वपुरप्यदुः ॥ १२१ ॥
समरेऽस्मिन् यमक्रीडातडाग इव खेलताम् ।
नाकर्षन् क्षतजं केषां जलौकस इवेषवः ॥ १२२ ॥
कोपाटोपारुणरुचौ पेततुर्भीमपार्षतौ ।
कुरुषु स्फुरदिष्वासभ्रुवौ यमदृशाविव ॥ १२३ ॥
पीड्यमाना दृढं ताभ्यां प्रियदोर्भ्यामिव प्रिया ।
सिस्वेद च चकम्पे च संमुमोह च सा चमूः ॥ १२४ ॥

१—मिव इति पा० ।
२ ज्ञातज्ञेय इति प० ।
३ दृशः इति पा० ।

Digitized by Google

वाहिनीशोषणोद्यं गजानीकैः सुयोधनः ।
भीममाच्छादयद्भानुं प्रावृट्काल इवाम्बुदैः ॥ १२५ ॥

नागैः सङ्गोऽस्तु नागानामितीव गदया गजान् ।
दृढमाहत्य कुम्भेषु भीमः क्ष्मायाममज्जयत् ॥ १२६ ॥

तेनोत्क्षिप्तेषु नागेषु त्रस्तमस्तकुतूहलैः ।
विमानभङ्गभीत्या तु दिवि देवैरितस्ततः ॥ १२७ ॥

दातुं दिग्दन्तिविश्रान्त्यै दिक्पालेभ्य इवामुना ।
धृत्वा करेण जीवन्तो दिक्षु चिक्षिपिरे द्विपाः ॥ १२८ ॥

इत्युदस्तद्विपस्तोमं नृपस्तोमरवृष्टिभिः ।
भीममभ्यकिरत् कोपकृशानुः सोऽनुजानुगः[1] ॥ १२९ ॥

भीमस्तद्बाणसंजातसर्वाङ्गीणव्रणो रणे ।
गोपतिः कोपसंरक्तदृक्सहस्र इवैक्ष्यत ॥ १३० ॥

ततोंऽशुप्रकरेणार्कः कौरवप्रकरानिव ।
कौरवान् मोहयामास मोहनास्त्रेण पार्षतः ॥ १३१ ॥

मिथः पेषकपेष्यत्वं भेजिरे कौरवास्ततः ।
तीव्रात्मानः प्ररोहन्तो डिम्भस्य दशना इव ॥ १३२ ॥

प्रौढप्रज्ञास्त्रपातेन कौरवप्रकरं गुरुः ।
तदाशु बोधयामास मोहविद्रोहकारकः ॥ १३३ ॥

ततोऽमुञ्चत जीवन्तमेनमद्येति मारुतिः ।
विरथ्य कुरुपृथ्वीशं मूर्च्छयामास मार्गणैः ॥ १३४ ॥

नृपे कृपेण रथिना कृष्टे हृष्टेऽथ पाण्डवे ।
क्ष्वेडाभिः खण्डयत्यद्रींश्चकम्पे चकितेव भूः ॥ १३५ ॥

उद्यते कुरुवृद्धेऽथ पाण्डवप्रेयसी चमूः ।
शिरोनिखातैर्विशिखैर्नीरं गामिव निर्ममे ॥ १३६ ॥

भीष्मो भुवनसंक्षोभी भूरीणामथ भूभुजाम् ।
संकीर्णीकृतकीनाशसदनं कदनं व्यधात् ॥ १३७ ॥

स कोऽपि द्रौपदेयानां कौरवैरभवद्रणः ।
येनाशु जगृहे चक्षुर्भीष्मादिभ्योऽपि नाकिनाम् ॥ १३८ ॥

तदा तत्कदनाधिक्यमशक्त इव वीक्षितुम् ।
गिरिगुप्ते रवौ चक्रुरवहारं महारथाः ॥ १३९ ॥

षष्ठमहः ।

भीमाभिभूतमाश्वास्य निशान्ते शान्तनिर्नृपम् ।
उवाह मण्डलव्यूहं वज्रव्यूहं च धर्मजः ॥ १४० ॥

ततश्छिन्नेव भानोर्भा वीरक्षिप्तैर्महेषुभिः ।
क्ष्मायामितस्ततोऽभ्राम्यद्विधुरा रुधिरच्छलात् ॥ १४१ ॥

गाङ्गेयकृष्णमहसोर्महान् गाङ्गेयकृष्णयोः ।
संघर्षोऽभूत् सहस्रांशुसिंहिकासुतयोरिव ॥ १४२ ॥

बभुस्तद्विशिखा हेमाः खात् पतन्तः क्षमातले ।
तत्प्रतापौघमूर्च्छालाः करमाला रवेरिव ॥ १४३ ॥

निर्भग्नवाहनो द्रोणबाणश्रेणीरणार्णवे ।
विराटः शिश्रिये शङ्खं जीवनाशाविमूढधीः ॥ १४४ ॥

विराटशङ्खौ तावेकरथस्थौ पितृनन्दनौ ।
अयोधयद्गुरुर्मोघकर्मौघाविव शिष्यगौ ॥ १४५ ॥

घनसारोज्ज्वलेनाथ यशसा च शरेण च ।
द्रोणः शङ्खमसत्तायां मज्जयामास हेलया ॥ १४६ ॥

द्रौणिखण्डितपक्षेण उत्पत्येव शिखण्डिना ।
अस्त्रविद्यालतागुल्मविटपी सात्यकिः श्रितः ॥ १४७ ॥

सात्यकिः क्रुद्धमायान्तं मायाताण्डविताचलम् ।
ऐन्द्रेणास्त्रेण जितवानलम्बुसनिशाचरम् ॥ १४८ ॥

बिन्दानुबिन्दावावन्त्यौ पन्नगीसूनुरार्जुनिः ।
इरावानजयत् पुण्यपापौघाविव योगयुग् ॥ १४९ ॥

भयौघत्रस्तमरणं रणं कृत्वा क्षणं महत् ।
द्विड्वाहिनीमगाहेतां भगदत्तघटोत्कचौ ॥ १५० ॥

नकुलं विरथीकृत्य व्यद्रवन्मद्रपोऽभितः ।
विरथ्य सहदेवेन मातुर्भ्रातेति नो हतः ॥ १५१ ॥

क्रुद्धः शतायुषं भूपं जित्वा धार्मिः स्वयं क्रुधम् ।
संजहार जगद्भीतिहेलां वेलामिवार्णवः ॥ १५२ ॥

कृत्तैर्भीष्मास्त्रपातेन भुजैर्गात्रैश्च भूभृताम् ।
यमभोजनशालायां दर्वीभाण्डायितं युधि ॥ १५३ ॥

आकृष्टं लोहघातेन पक्षवातेन वीजितम् ।
यमस्य पेयतां निन्ये राज्ञां रक्तं नरेषुभिः ॥ १५४ ॥

तदा तयोरुदञ्चद्भिस्तेजोभिरिव तापिते ।
गतेऽर्णवं रवौ चक्रुरवहारं महीभुजः ॥ १५५ ॥

सप्तममहः ।

सुते सागरगामिन्याः सागरव्यूहकारिणि ।
प्रगे शृङ्गाटकव्यूहं तेने द्रुपदनन्दनः ॥ १५६ ॥

१—सानु—इति पा० ।

अङ्गुल्विट्पूर्णमध्यानि चापचक्राणि दोष्मताम् ।
भोजनाहूतकीनाशसैन्यभाजनतां ययुः ॥ १५७ ॥
रिपुबाणोच्छलद्रक्तधारासिक्तपुरोभुव: ।
अनुत्थितरजःपूराः सुखं शूराः प्रतस्थिरे ॥ १५८ ॥
क्षिपद्भिः क्ष्माभृतां मौलीन् नारिकेलीफलोपमान् ।
परा लङ्घितुमारेभे वाहिनी भीष्मसायकैः ॥ १५९ ॥
तेन दीर्णादरैश्छिन्नै[1] रुण्डैर्मुण्डैश्च भूभुजाम् ।
कपर्दकन्दुकाकारे रेमिरे यमकिंकराः ॥ १६० ॥
दधतः प्रधनाधिक्यं कुण्डलीकृतधन्वनः ।
अहो वृद्धस्य तस्याभूत् पार्थसेना पराङ्मुखी ॥ १६१ ॥
चस्तासु तासु सेनासु भीष्मः खेलन् यशोऽर्णवे ।
भीममेकं पुरोऽपश्यत् प्रतिबिम्बमिवात्मनः ॥ १६२ ॥
असृग्धाराबभुर्भीमहृदि भीष्मशराहते ।
रिपुदाहक्रियानिर्यत्प्रकोपाग्निशिखा इव ॥ १६३ ॥
अथ भीमशरायस्त[2]सारथिः शान्तनो रथः ।
वाहैराहवतोऽकर्षि ददद्भिर्द्विषतां यशः ॥ १६४ ॥
बह्वाशिनं कुण्डधारं विशालाक्षापराजितौ ।
महोदरं पण्डितकं सुनाभं चेति ते सुतान् ॥ १६५ ॥
निघ्नतः सप्त भीमस्य प्रतापदहनस्तदा ।
समुच्छलद्भिः कीलालैः सप्तकील इवाज्वलत् ॥ १६६ ॥
युग्मम् ।
अथ बन्धुवधक्रुद्धो युद्धोत्सस्तनयस्तव ।
आदित्यकेतुरादित्यवत्यैकारि बकारिणा ॥ १६७ ॥
विश्वस्य द्विट्चमूर्भीमो भीमोऽथ स्वयभीमवत् ।
उन्ननादोच्चकैर्भालप्ररूढज्वलदीक्षणः ॥ १६८ ॥
उलूपीपन्नगीसूनुर्दिवि पितार्जुनेन यः ।
प्रार्थितो युद्धसाहाय्यं स इरावानथोत्थितः ॥ १६९ ॥
चूडामणिप्रभापिङ्गैः स घातालतुरंगिभिः ।
आवृतः प्राविशद्वैरिसेनां दावो वनीमिव ॥ १७० ॥
स गान्धारबलाम्भोधिं तरङ्गाभतुरंगमम् ।
कालानल इवोद्दीप्तो हेतिपातैरशोषयत् ॥ १७१ ॥
स हत्वा शकुनेः पुत्रान् षट् दृष्टो न केनेदन् ।
अष्टमूर्तिरिवोच्चैस्तद्रक्तनिर्झरबिम्बितः ॥ १७२ ॥
दुर्योधनप्रणुन्नोऽथ तमभ्यायादलम्बुसः ।
मायामयहयारूढरक्षोभटघटावृतः ॥ १७३ ॥
मुखोच्छलच्छिखिज्वालाविषोल्काविषमायुधैः ।
रक्षःफणिभरैर्जज्ञे युध्यमानैः क्षयो मिथः ॥ १७४ ॥
मण्डलाग्रेण कोदण्डं खण्डयित्वाधिरक्षसः ।
चक्रे विराणान् दीप्तोऽसाविराणान् भीतिदस्तदा ॥ १७५ ॥
उत्प्लुत्यालम्बुसस्त्रासात् खं गतः खगवत् ततः ।
अनूत्पपात तं चासिचञ्चुः श्येन इवार्जुनिः ॥ १७६ ॥
इरावत्खड्गवल्ल्या खे सवितेवाब्दलेखया ।
द्विधाकृतोऽप्ययं क्रव्यात् पूर्णाङ्गो मुहुरैक्ष्यत ॥ १७७ ॥
अथ मायिन्यजेयेऽस्मिन् युद्धवल्गिनि फाल्गुनिः ।
कीनाशदासदोर्दण्डचण्डान् फणभृतोऽदिशत् ॥ १७८ ॥
चूडामणितडित्ताराः क्षयधाराधरा इव ।
ते तस्मिन् भस्मनि कृते ववृषुर्विषमं विषम् ॥ १७९ ॥
तार्क्ष्यीभूयामुना भुज्यमानानां फणिनां मणीन् ।
पततः कार्ष्णिरैक्षिष्ट दिवा नक्षत्रवृष्टिवत् ॥ १८० ॥
भुक्त्वाथ भोगिनो भूरीन् कृतभीमनिजाकृतिः ।
पलादः प्रोन्ननाद द्राक् लोकत्रयभयंकरः ॥ १८१ ॥
परो मायामयीं मूर्तिं कृत्वा योद्धुं निशाचरः ।
खड्गेनापातयत् पश्चात् कार्ष्णेर्हृत्कुण्डलं शिरः ॥ १८२ ॥
दृष्ट्वा हतमिरावन्तं नेतुमन्तं द्विषच्चमूम् ।
क्रुद्धोऽस्तदिक्करिक्रीडां क्ष्वेडां चक्रे घटोत्कचः ॥ १८३ ॥
स राज्ञां षड्रसास्वादसंभूतरससंकरैः ।
स्वभटान् प्रीणयन् मांसैर्ममन्यारिवरूथिनीम् ॥ १८४ ॥
गजेन्द्रगजानीको मानी कोपारुणेक्षणः ।
तमभ्यधावद्धार्त्तराष्ट्रो मृत्युं यम इवोद्धतः ॥ १८५ ॥
घटोत्कचस्य चतुरश्चकर्त सुभटानयम् ।
शौर्यश्रीमन्दिरस्तम्भानिव जम्भारिविक्रमः ॥ १८६ ॥
शक्तिर्घटोत्कचेनाथ क्षिप्ता क्ष्मापतये रयात् ।
नागं वङ्गाधिपेनान्तर्नीतं विघ्नरुषापिषत् ॥ १८७ ॥
रङ्गद्भुजतरङ्गेऽथ घटोत्कचबलेऽचले ।
उद्वेलार्णवतुल्याभूद् वाहिनीयं पराङ्मुखी ॥ १८८ ॥

१–खोच्छिन्नैः इति पा० ।
२–रोद्रस्त–इति पा०

Digitized by Google

नमद्भूमि भ्रमद्वार्धि त्रुटदद्रि त्रसज्जगत् ।
तदाभूत् कोऽपि संमर्दः पलाद्भगदत्तयोः ॥ १८९ ॥
श्रुत्वा सुतवधं जिष्णुर्निमन्त्रितयमः क्रुधा ।
चक्रे महीं महीन्द्राणां शीर्षैर्मोदकशालिनीम् ॥ १९० ॥
अनाधृष्टिं कुण्डलिनं व्यूढोरोदीर्घलोचनौ ।
कुण्डभेदं दीर्घबाहुं सुबाहुं कनकध्वजम् ॥ १९१ ॥
विरजं चेति राजेन्द्र हत्वा नव सुतांस्तव ।
भ्रातृपुत्रवधक्रोधी भीमोऽमृद्नाद्ध्रुवञ्चमूम् ॥ १९२ ॥
युग्मम् ।
पाण्डवैः खण्ड्यमानानामिति भूप भवद्भुवाम् ।
कृपयेव पयोराशिं गतेऽर्केऽवहृतं नृपैः ॥ १९३ ॥
अष्टममहः ।
आनाय्य कर्णो राज्ञाथ पृष्टः पार्थपराभवम् ।
ऊचेऽहं संहराम्येकः शत्रून् भीष्मोऽस्त्रमुज्झतु ॥१९४॥
सारालंकारभाग्दीपैर्महीपैरिव भासुरः ।
गतोऽथ पार्श्वं भीष्मस्य तेन राजेति पूजितः ॥ १९५ ॥
भीष्मं भूयोऽभ्यधात् तात भग्नस्त्वद्बाहुनामुना ।
क्षत्रान्तकारी कृष्णस्यावतारो भृगुनन्दनः ॥ १९६ ॥
इति शक्तोऽपि यद्येतान् क्षत्रियान् कृष्णरक्षितान् ।
न हंसि कृपया तत् तान् हन्तु कर्णस्त्वदाज्ञया ॥१९७॥
इत्युक्ते भूभुजा भीष्मः कोपोद्भूतिं जयन् जगौ ।
केन जेयोऽर्जुनः किंतु दृश्या मन्मार्गणाः प्रगे ॥ १९८ ॥
इति प्रीते गते राज्ञि प्रातः शान्तनवो व्यधात् ।
द्राग्व्यूहं सर्वतोभद्रं प्रतिव्यूहं च सोकृतिः ॥ १९९ ॥
सेनासंपातखातायां रणोत्थरुधिरच्छलात् ।
रेजिरे रत्नगर्भाया गर्भरत्नद्युतिस्तदा ॥ २०० ॥
सौभद्राम्बुदनाराचधाराचक्रप्रप्लुतः ।
ययौ दिशि दिशि त्रस्तं धार्तराष्ट्रबलं ततः ॥ २०१ ॥
तमभ्यधावत् क्रोधेन धुर्यो दुर्योधनेरितः ।
क्ष्वेडयैव क्षिपन् प्राणान् भूपालानामलम्बुसः ॥२०२॥
द्रौपदेयैर्मदाटोपज्वलितैः स्खलितः क्षणम् ।
सोऽभिमन्युरथं निन्ये शल्यैः शल्लकतुल्यताम् ॥ २०३ ॥
प्ररूढशरशैलाग्रशृङ्गतां कार्ष्णिमार्गणैः ।
नीयमानो भयात् तेने सोऽथ मायां तमोमयीम् ॥२०४॥

कवलीकृतमार्तण्डं तदोच्चैः प्रसृतं तमः ।
रक्षोमुखाग्निकीलाभिः स्फारोद्गारमिवाबभौ ॥ २०५ ॥
तमोबलज्वलन्नेत्ररक्षोभिः क्षोभिते बले ।
आर्जुनिर्व्यतनोदस्त्रं तापनं स्वप्रतापवत् ॥ २०६ ॥
क्व यास्यतीदमित्यर्कैः सर्वतोऽभ्युदितैस्तदा ।
क्ष्मायां छायामयमपि ध्वान्तमग्रासि हासिभिः ॥ २०७ ॥
तमसि ग्रस्यमानेऽर्कैस्तमःश्यामं निजं वपुः ।
निभाल्येव भयार्तेन पलादेन पलायितम् ॥ २०८ ॥
प्रहारचण्डैर्नोच्चालि चाचालैर्घटितोऽप्यथ ।
भीष्मादिभिः परिगतैः सौभद्रोऽद्रिरिव द्विपैः ॥ २०९ ॥
अथेदृक्सुतसंघट्टकुपितः कपिकेतनः ।
अस्त्रं ससर्ज वायव्यं कायव्ययकृते द्विषाम् ॥ २१० ॥
लोठितानां भटेन्द्राणां यशांसीव समीरणाः ।
क्षमाण्युत्क्षिप्य मलिनीचक्रिरे धूतधूलयः ॥ २११ ॥
क्षिप्ताः शैलास्ततः शैला द्रोणेन स्खलितानिलाः ।
अधावन्नधरीकर्तुमिन्द्रवैरादिवेन्द्रजम् ॥ २१२ ॥
अथ पार्थेन नाराचसार्थेन कुलिशत्विषा ।
विकीर्य जालं शैलानामालभ्यत बलं द्विषाम् ॥ २१३ ॥
वातपुत्रगदाघातहतमातङ्गजातजाः ।
तत्रासृक्सरितः सस्रुः प्रेतहासौघफेनिलाः ॥ २१४ ॥
शिरःकलिङ्गके रुण्डकूष्माण्डे भुजचिर्पटैः ।
क्षिप्रे राज्ञां व्यधाद्भीष्मः कालशाकवनं मृधम् ॥ २१५ ॥
भीष्मबाणच्युते राज्ञां छत्रैश्चामरसंयुतैः ।
कीर्णा तद्यशसां शीर्षैर्मुक्तकेशैरिवावनिः ॥ २१६ ॥
भीष्मो भालाग्रविश्रान्तभ्रमत्कुण्डलपाणिभिः ।
वृद्धवेतालनारीभिर्दत्ताशीः प्राहरच्चमूः ॥ २१७ ॥
इत्यस्य निष्ठापयतो भटान् भीष्मस्य सत्वरः ।
प्रतिज्ञां स्मारयन् विष्णुर्जिष्णुमभ्यानयत् पुरः ॥ २१८ ॥
गाङ्गेयमार्गणगणैः सर्वाङ्गप्रचरिष्णुभिः ।
सर्पिसर्पस्य बीभत्सुश्चन्दनस्य निभो बभौ ॥ २१९ ॥
प्रभुं वधाय धावन्तं क्रुधावन्तं विलोक्य तम् ।
वपुः सपुलकं बिभ्रद्भीष्मो धुन्वन् धनुर्जगौ ॥ २२० ॥
एह्येहि नाथ गोविन्द मां प्रतोदेन ताडय ।
उक्षाणमिव संसारारण्योल्लङ्घनमन्थरम् ॥ २२१ ॥

Digitized by Google

इत्युक्तिभाजि भीष्मे द्रागमूत्पत्य धनंजयः ।
मुकुन्दं स्यन्दनं निन्ये नत्वा युद्धप्रतिज्ञया ॥ २२२ ॥
अथार्जुनशरोत्क्षिप्तराजराजिमुखच्छलात् ।
प्रनृत्यत्सु कबन्धेषु पद्मवृष्टिरिवाभवत् ॥ २२३ ॥
प्रेक्ष्य भीष्मक्षुरप्रायोत्क्षिप्तान् क्ष्मापशिरोभरान् ।
राहुव्यूहभियेवाब्धिं गतेऽर्केऽवाहरन् नृपाः ॥ २२४ ॥

नवममहः ।

अथ ध्यायन् वरूथिन्या मथनं पार्थपार्थिवः ।
निशायामवदद् दीनमना दानवसूदनम् ॥ २२५ ॥
यदि त्रिजगतीसत्त्वमेकीभूयापि युध्यते ।
तथापि नापगेयस्य कामं रोमापि कम्पते ॥ २२६ ॥
गाङ्गेयजेयताबुद्धिस्तन्मूढमनसामियम् ।
अन्तायेव पतङ्गानां दीपे रत्नस्पृहेव नः ॥ २२७ ॥
अथाचष्ट हरिः कष्टमिदं भजसि भूप किम् ।
आपगेयं प्रगे हन्मि को भेदः कृष्णकृष्णयोः ॥ २२८ ॥
नृप नाहमसत्यत्वं सत्यसंध तनोमि ते ।
अनपायं जयोपायं प्रष्टव्यस्तु पितामहः ॥ २२९ ॥
इति निश्चित्य कृष्णेन सोदरैश्च समं नृपः ।
गुप्तं गत्वा जयोपायं ततः पप्रच्छ भीष्मतः ॥ २३० ॥
गाङ्गेयोऽथ जगौ युद्धाटोपे कोऽपि न मां जयेत् ।
तज्जेयोऽहमवध्येन स्त्रीपिण्डेन शिखण्डिना ॥ २३१ ॥
श्रुत्वेति ह्रीनतो राजा तं नत्वा शिबिरं ययौ ।
प्रातर्जातमहाव्यूहैर्वीरव्यूहैरथोत्थितम् ॥ २३२ ॥
प्रवीरमुक्तैः शस्त्रौघैर्दिवि संघट्टिभिर्मिथः ।
घूर्णिता इव चण्डांशुकरा वह्निकणा बभुः ॥ २३३ ॥
वीरेषुपूरा वीरेषु ययुर्व्योम्ना भुवा पुनः ।
तच्छायच्छद्मना कालकिंकराणां कराः समम् ॥ २३४ ॥
ततश्चलच्चमूत्खातक्षितिस्पृष्टाः फणीशितुः ।
रत्नभास इवेत्यन्त युद्धोत्थाः क्षतजोर्मयः ॥ २३५ ॥
आसन्नवीरलग्नेऽपि द्विड्बाणे स्वाङ्गवञ्चिनि ।
रक्तबालातपप्रेक्षामासन् वीराः क्षतभ्रमात् ॥ २३६ ॥
वीरैः शिखण्डिगाण्डीविप्रमुखैर्विमुखीकृतम् ।
गौरयन् कौरवं चक्रं विचक्राम पितामहः ॥ २३७ ॥
ममज्जुर्वीरगात्रेषु तन्मुक्ता बाणपङ्क्तयः ।
यथा मरुस्थले नीरधारा धाराधरोज्झिताः ॥ २३८ ॥
भीष्मः शिरोभिर्भूपानां क्षुरप्रोत्क्षेपपातितैः ।
ममर्द द्विट्चमूं यन्त्रोपलगोलकुलैरिव ॥ २३९ ॥
गोचक्रतप्रविचस्तविश्वस्य ज्वलनोऽजनि ।
कृकलास इवार्कस्य शिखण्डी तस्य संमुखः ॥ २४० ॥
अथाभ्यधत्त तं भीष्मः कामं प्रहर हन्त माम् ।
कृतिनोऽर्था इवापात्रे न यान्ति त्वयि मे शराः ॥ २४१ ॥
भीष्म प्रहर मा जीवन् जीवन् यास्यसि नाद्य मत् ।
इत्युक्त्वा पार्षतः काण्डैस्तं बिभेदार्जुनेरितः ॥ २४२ ॥
रोमाग्रखण्डितोद्दण्डं शिखण्डिविशिखेषु सः ।
रोपैरापूरयन् कृष्णो संजहार महारथान् ॥ २४३ ॥
नमद्भूस्फुटनोद्भ्रान्तस्वभ्रध्वान्तभरैरिव ।
रजोभिर्व्याप्तदिग् जज्ञे संमर्दो विद्विषां मिथः ॥ २४४ ॥
उत्पातजातसंभ्रान्तद्रोणाद्यात्वरितास्ततः ।
कुरुवीरा धुनीसूनोः प्राकाराकारतां ययुः ॥ २४५ ॥
भीष्मस्यास्त्रैर्मणीभूषा बभुः कूटीकृता नृपाः ।
मेरुणेव तमाह्वातुं प्रहिताः शिखरश्रियः ॥ २४६ ॥
दूरादेत्याथ घृणया भीष्मोऽभाषत धर्मजम् ।
खिन्नोऽस्मि कदनादस्मात् पुत्र पातय मामिति ॥ २४७ ॥
इत्युक्त्वा शिथिलास्त्रोऽपि स बहूनां जयोऽभवत् ।
क्रीडन्नपि करी मूलोन्मूलनं हि महीरुहाम् ॥ २४८ ॥
रक्ताब्धिबूडदन्द्रीन्द्रतुङ्गमातङ्गपुंगवः ।
भीमो बभूव बीभत्सोः शरव्यतिकरः परः ॥ २४९ ॥
भीष्मो दिव्यास्त्रवान् धावन् मध्यमेत्य शिखण्डिना ।
निवारितोऽर्जुनध्वंसे सीधुनेवामृताहुतौ ॥ २५० ॥
तं जयेऽस्मिन् रणे स्मेरमभ्येत्य वसवोऽभ्यधुः ।
कालोऽयं धन्य संन्यासहेतुस्तेऽस्माकमीहितः ॥ २५१ ॥
अथ भीष्मः श्लथारम्भः शिखण्डिविशिखव्रजैः ।
वातोत्थकुसुमस्तोमैरारामिक इवार्चितः ॥ २५२ ॥
पतच्छीर्षोच्छलद्रक्तच्छलनृत्यत्पराक्रमः ।
चक्रेऽरिचक्रं साक्रन्दं सांक्रन्दनिरिषुव्रजैः ॥ २५३ ॥
भीष्मेणास्त्रं धृतं यद्यत् तत् तदैन्द्रिस्तदाच्छिदत् ।
स्वीकृतं वादिना पक्षवितानमिव संमतिः ॥ २५४ ॥

छिन्दन्तो भीष्मशस्त्राणि भिन्दन्तो वैरिभूपतीन् ।
निन्दन्तोऽथ पविं देवैरसूयन्त नरेषव: ॥ २५५ ॥
भीष्मे शिखण्डिकाण्डौघगुप्ता: पार्थेषवोऽपतन् ।
वियोगिनि विधूद्योतलीना: स्मरशरा इव ॥ २५६ ॥
द्रोणादीन् निघ्नतो गुप्ता: पेतुर्भीष्मेऽस्य सायका: ।
पश्यन्त्या: पतिमेणाक्ष्या: कटाक्षा इव वल्लभे ॥ २५७ ॥
वज्राङ्कुरैरिव गिरिर्भिद्यमानोऽथ तच्छरै: ।
दु:शासनं संनिधिस्थं भीष्म: सस्मितमभ्यधात् ॥ २५८ ॥
भुजंगमा बिलानीव जालानीव रवे: करा: ।
मन्मर्माणि विशन्त्येते विशिखा न शिखण्डिन: ॥ २५९ ॥
पुत्रप्रेम्णा सुरेन्द्रेण वज्रधारा इवार्पिता: ।
पार्थस्यामी पृषत्कास्ते किरातरणसाक्षिण: ॥ २६० ॥
अथो कथान्ते शिथिल: काण्डपात इव क्रुधा ।
शिक्षार्थमिव पौत्राय गाङ्गेय: शक्तिमक्षिपत् ॥ २६१ ॥
तां छित्त्वाथ त्रिधा भीष्मं रोम्णि रोम्णि व्यपूरयत् ।
मुहुर्मुहुर्मुकुन्देन तर्ज्यमानोऽर्जुन: शरै: ॥ २६२ ॥
यमाविष्टेष्विव स्वाङ्गमजानत्सु क्षताकुलम् ।
मिथस्तदा मदान्धेषु युद्धोद्गर्जिषु राजसु ॥ २६३ ॥
रणोद्रेकमृतानेकवीरद्वारमिवात्मनि ।
देवे दर्शयति च्छिद्रमपराह्णविवर्तने ॥ २६४ ॥
छिन्न: पार्थशरैर्भिन्नतनु: श्रीशन्तनो: सुत: ।
क्षितौ पपात घस्रान्ते लघ्वंशुरिव घर्मरुक् ॥ २६५ ॥
विशेषकम् ।

पृष्ठनि:सृतकाण्डौघसुखपर्यङ्कशायिनि ।
वीरेऽस्मिन् वीरहृत्कर्त्ता हाहाकारो जगत्स्वभूत् ॥ २६६ ॥
दु:खशोकभयार्तेषु गलदश्रुदृगम्बुषु ।
महामोहप्रविष्टेषु कम्पमानेषु राजसु ॥ २६७ ॥
अलुप्तात्मनि गाङ्गेये दीप्यमाने द्युवागभूत् ।
उत्तरायणकालाय प्राणान् योगीन्द्र धारय ॥ २६८ ॥
युग्मम् ।

नियुक्तैर्गङ्गया हंसरूपैर्मुनिवरैरपि ।
इत्येवं कथिते योगी स्थितोऽस्मीति जगाद स: ॥ २६९ ॥
शान्तनि: सान्त्वयित्वाथ चकितान् कुरुपाण्डवान् ।
शिरो मे लम्बते कष्टं धार्यतामित्यभाषत ॥ २७० ॥
उपधानाय धावत्सु क्षत्रीशेषु धनंजय: ।
शरैस्त्रिभिरथ प्राज्ञस्तन्मूर्धानमधारयत् ॥ २७१ ॥
स्तुवंस्तमथ गां वीरानभ्यधत्त धुनीसुत: ।
मदन्तमस्तु वो वैरं पत्यन्तं योषितामिव ॥ २७२ ॥
निशि याचन् जलं हेमकुम्भहस्तेषु राजसु ।
दिव्यैर्जलैर्जलास्त्रस्य तर्पित: स किरीटिना ॥ २७३ ॥
तेनाथ पूजिते पार्थे पार्थिवेषु गतेषु च ।
एत्य प्रसादयामास कर्णस्तं प्रहृताञ्जलि: ॥ २७४ ॥
पाताङ्गिमूचे गाङ्गेय: पृथाया: सूनुषु त्वया ।
सहोदरेषु संरब्धो मुच्यतां वत्स मत्सर: ॥ २७५ ॥
कर्णोऽभ्यधात् प्रभो वैरं न मे बन्धुषु किंतु माम् ।
अनुजानीहि मित्रैकसौहार्दवशगं युधि ॥ २७६ ॥
गङ्गासुतेनानुमत: पतङ्गतनयस्तत: ।
ययौ मन्दितवातेन स्यन्दनेन वरूथिनीम् ॥ २७७ ॥
तदनु दिनपतिश्रीभाजि भीष्मेऽस्तभाजि
प्रतिनृपति महास्त्रध्वान्तभीकम्पितानाम् ।
कुरुपतिपृतनानां कर्णवीरेन्दुतेज:-
प्रसरसरभसत्वव्याकुलं चित्तमासीत् ॥ २७८ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थिते:
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्र: कृती ।
षष्ठं पर्व गतं सुपर्वतटिनीसूनोरिदं तन्मति-
व्यक्तादर्शनबालभारतमहाकाव्ये रसस्रोतसि ॥ २७९ ॥
सर्गाभ्यामभवद् द्वाभ्याममुष्मिन् भीष्मपर्वणि ।
अनुष्टुभां चतु:शती षड्विंशतिसमन्विता ॥ २८० ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के भीष्मपर्वणि दशदिवससङ्ग्रामवर्णनं तदनु भीष्मवधो नाम द्वितीय: सर्ग: ॥ २ ॥

॥ अथ बालभारतस्य द्रोणपर्वारम्भ: ॥

॥ तत्र प्रथम: सर्ग: ॥

क्षमां दधान: स गिरि प्रधान:
सिद्ध्यै सतां व्यासमुनिर्महोक्ष: ।
य: पुण्यकृत् पर्वशताववद्ध-
भास्वन्महाभारतवंशहेतु: ॥ १ ॥

Digitized by Google

इत्थं पितुः पातकथां निशम्य
मूर्च्छां गतं धीनयनं प्रबोध्य ।
गत्वा पुनर्दृष्टरणोऽभ्युपेत्य
गावल्गणिस्तं क्षितिपं जगाद ॥ २ ॥

राजन् सुतास्ते पतितेऽथ भीष्म-
भानौ महामोहतमःसु मग्नाः ।
प्रीताः पुरः प्रेङ्खति कर्णदीपे
व्यधुर्विधेयेषु पुनः प्रयत्नम् ॥ ३ ॥

कर्णानुमत्या पृतनाधिपत्ये
द्रोणः प्रसन्नो विधिनाभिषिक्तः ।
वरप्रदः प्रार्थि सुयोधनेन
धृत्वा श्वसन्तं नृपमर्पयेति ॥ ४ ॥

नरो न रणे सविधे विधाता
यदा तदा धर्मसुतं ग्रहीष्ये ।
इत्युल्लसद्वाचि गुरौ कुरूणां
बले बभूव प्रबलप्रणादः ॥ ५ ॥

इत्थं विदित्वार्जुनरक्षितात्मा
क्रौञ्चाह्वयं व्यूहमधत्त धार्मिः ।
बभूव सज्जः शकटाभिधेन
व्यूहेन युद्धाय सुयोधनोऽपि ॥ ६ ॥

द्रोणस्ततः शोणहयो हिरण्य-
कमण्डलुस्थण्डिलचापकेतुः ।
आकर्णभास्वत्पलितोऽसितस्त्री:
सुवर्णसंनाहरथः पुरोऽभूत् ॥ ७ ॥

उरः प्रविष्टस्य महाभटानां
दृग्वर्त्मनेव त्वरितं निरीय ।
कोपानलस्य ज्वलतो महोल्का
इव प्रपेतुर्द्विषतः पृषत्काः ॥ ८ ॥

कलम्ब*जालं परवाहिनीषु
विस्तीर्णमल्पान्तरगुम्फसान्द्रम् ।
द्रोणप्रमुक्तं परितोऽभिपत्य
प्रभूतजीवक्षयहेतु जज्ञे ॥ ९ ॥

प्रतापमित्रस्य रवेस्तनूजं
कालं करस्थं करवालमूर्त्या ।
अप्रीणयत् पौरवभूमिपाल-
कपालरक्तासवतोऽभिमन्युः ॥ १० ॥

तस्याथ मद्रेशजयद्रथाश्व-
सूतच्छिदाप्रच्छुरितासिलेखा ।
तेजोऽग्निकीलेव रराज राज-
वंशप्रतापोच्छलितस्फुलिङ्गा ॥ ११ ॥

भीमौ ततो मद्रनरेन्द्रभीमौ
भ्राम्यद्गदाभीतरवीन्दुतारौ ।
अधावतां भारनमद्धरित्री-
विषस्तशेषाहिवराहकूर्मौ ॥ १२ ॥

दक्षाणि वामान्यथ मण्डलानि
प्रदर्शयन्तौ मिलितौ रसेन ।
तौ पेततुर्जातमिथःप्रहारौ
वायुद्वयोत्थौ जलधेरिवोर्मी ॥ १३ ॥

रथेन कृष्टे कृतवर्मणाथ
शल्ये समुत्थाय रथेन भीमः ।
जघान शचोर्बलमुद्यदस्त्र-
सिन्दूरसीमन्तितदिग्वधूकः ॥ १४ ॥

कर्णस्य सूनुर्वृषसेनवीरः
शरप्रपातैः परिपीडितायाः ।
पञ्चेन्द्रियाणीव परध्वजिन्या
द्राग् द्रौपदेयान् विधुरीचकार ॥ १५ ॥

ततः प्रतिज्ञारभसेन सिंह-
युगंधरव्याघ्रनृपान् कृपीशः ।
युधिष्ठिरेप्सुर्निजघान मान-
लोभप्रमादानिव धर्मलिप्सुः ॥ १६ ॥

तद्बाणभिन्ने प्रबले नृपाल-
मौलिप्रसूनस्रगनूपवासम् ।
नालीकनालैरिव हस्तिहस्तै-
र्दूरं पिशाचाः पपुरस्रपूरम् ॥ १७ ॥

कृत्तानुपादाय करीन्द्रकर्णान्
प्राणेश्वरीभिः परिवीज्यमानाः ।
मांसास्रतृप्ताः सुखिनः पिशाचाः
किरीटिकोदण्डरवानशृण्वन् ॥ १८ ॥

* कलम्बो बाणः ।

सत्त्वचधर्मैकपरा: पुरस्ता-
न्निरूपयन्तो युधि विश्वरूपम् ।
स्वयं नरेण प्रहता: सुसत्त्वा-
स्तत्त्वस्पृशां लोकमपि व्यतीयु: ॥ १९ ॥

इत्थं कृपीशेन किरीटिना च
निहन्यमानस्य बलद्वयस्य ।
पूर्णाम्बरेण ध्वनिनेव मुन्ने
गतेऽस्तमर्के रथिनोऽवजह्रु: ॥ २० ॥

प्रथममह: ।

शक्यो ग्रहीतुं न महीन्दुरैन्द्रि-
गुप्तो गुरौ नक्तमिति ब्रुवाणे ।
तमाह्वयिष्ये जयिनं युधीति
त्रिगर्तभर्ता कुरुराजमूचे ॥ २१ ॥

पृथक् प्रभातेऽथ कृतार्धचन्द्र-
व्यूह: सुशर्मा चिरयायुतीभाक् ।
सुतं हरे राह्वयताशु योद्धुं
स्पर्धोद्धुरं क्रूरचमूमुखेन ॥ २२ ॥

ततोऽभिमन्त्र्य क्षितिपं तदग्रे
वीराग्रिमं सत्यजितं नियोज्य ।
धनुर्मिषव्यात्तमुखस्त्रिगर्त-
बलौघकाल: प्रचचाल पार्थ: ॥ २३ ॥

तेऽप्येककालं बलिनो बलौघा:
प्रहस्य बाणै: परिघप्रमाणै: ।
आच्छादयन्नर्जुनमुच्छलद्भि-
र्भरैस्तृणानामिव दीप्तमग्निम् ॥ २४ ॥

व्यावृत्तसिन्धूर्मिभर: प्ररुद्ध-
व्योमानिल: प्रोच्छलितोडुचक्र: ।
नतक्षितिर्नि:श्रुतिकत्रिलोक-
स्तदैन्द्रिणावाद्यत देवदत्त: ॥ २५ ॥

तच्छब्दसंरम्भसुलम्भदेह-
स्तम्भानुभावेषु रिपूच्चयेषु ।
समुल्लिलेखेव निजप्रताप-
प्रशस्तिमैन्द्रि: शरसारटङ्कै: ॥ २६ ॥

वज्राङ्कुरक्रूरमुखेन नून-
मन्योन्यसंघट्टजपावकेन ।
तद्बाणपूरेण निरन्तरेण
हताश्च दग्धाश्च न के विपक्षा: ॥ २७ ॥

नीरन्ध्रसंसप्रकबाणवृष्टि-
विखण्डितानां द्युमणिद्युतीनाम् ।
गर्भात् तमिस्रेव सदोपमुक्ता
तदापतत् सान्द्रतमश्छलेन ॥ २८ ॥

अस्त्रं ततस्त्वाष्ट्रमुदस्य वल्गन्
पृथक् पृथग वीरकुलैर्व्यलोकि ।
स्वस्वोपरिक्षिप्रकरायहेति-
र्मध्याह्नमार्तण्ड इवैष चण्ड: ॥ २९ ॥

रक्तौघसिक्ते रथचक्रभिन्ने
क्षेत्रे सुधन्वक्षितिपालमौलिम् ।
अपातयद्भूषणभासुराभं
निजप्रतापद्रुमबीजमैन्द्रि: ॥ ३० ॥

इन्द्रात्मभूचारितमारुतास्त्र-
निवारितास्त्रप्रसरैस्त्रिगर्ता: ।
इतस्तत: संपतितैर्मिथोऽपि
शरैर्निजानेव निजघ्नुरेते ॥ ३१ ॥

प्रहासशुभ्रैर्वदनैर्नृपाणां
छत्रै: पताकावसनैश्च पेते ।
पार्थेषुकृत्तै: फलगुच्छपत्रै-
रिव त्रिगर्ताधिपकीर्तिवल्ली: ॥ ३२ ॥

इतश्च ते व्यूहितमण्डलार्थ-
क्रोञ्चैर्बलै: पार्थकुरुप्रवीरा: ।
चेलुर्मिथ:सायकपातनिर्य-
द्रक्तच्छलाग्रेसरयुद्धरागा: ॥ ३३ ॥

उन्मूलयन् भूपतिभूरुहोऽथ
प्रोड्डाययन् सैन्यतृणानि धावन् ।
द्रोणो महावात इवाचलेन
सत्योजसा सत्यजिताभिरुद्ध: ॥ ३४ ॥

पाञ्चाल्यवीरस्य सुरेन्द्रशक्ते:
सहस्रश: सत्यजित: पृषत्का: ।
द्रोणेऽपतन् दु:सहपातसङ्गा-
स्तडित्तरङ्गा इव वज्रशैले ॥ ३५ ॥

दृग्वाजिभृत्कुण्डलचक्रचारु
सङ्ग्रामदीव्यानिलकोत्पताकम् ।
अपातयत् सत्यजितस्तदास्यं
शौर्यश्रियः पुण्यरथं[1] कृपीशः ॥ ३६ ॥

क्रुद्धः शतानीकनृपं विराटा-
नुजं ससेनं दृढसेनवीरम् ।
श्रीचन्द्रदेवं प्रधनैकदेवं
तेजोनिधानं वसुदानमूपम् ॥ ३७ ॥

पलायिते धर्मसुतेऽथ तस्य
चतुर्दिगुर्वीजयकुञ्जराणाम् ।
स्तम्भानिवेतांश्चतुरश्चकार
गुरुः कुरुक्ष्मापमुदां निदानम् ॥ ३८ ॥

युग्मम् ।

तेनातिनिर्नाथ इवातिदीन-
श्चमूसमूहस्तरलत्वरेण ।
नदीरयेणेव निरस्यमानो
भीमं महाद्वीपमिवाससाद ॥ ३९ ॥

ततः स्वतेजोभिरिव प्रवीरै-
र्वृतोऽभितोऽसौ प्रसरच्छरोल्कः ।
गुरोः परीवारबलानि बाढं
गिरेर्वनानीव दवो ददाह ॥ ४० ॥

युयुत्सुरच्छिन्नरिपूद्यमस्य
बाहुं सुबाहुं कृतबाहुकं च ।
भीमस्तु धम्मिल्लमिवोद्धरवं
सवङ्गराजं युधि नागराजम् ॥ ४१ ॥

इत्युच्छलत्सप्तचमूसमुद्रो
रजस्तमःकल्पितकालरात्रिः ।
संहृत्य सर्वं रभसेन भीमो
जगद्गुरौ ब्रह्मणि घातमैच्छत् ॥ ४२ ॥

अथावनीभाररुषेव दष्टो
नखच्छलादङ्घ्रिषु शेषपुत्रैः ।
मुखेन बिभ्रत् खलु तद्रुषेव
फूत्कारिणं हस्तमिषेण शेषम् ॥ ४३ ॥

दिग्दन्तिनो निर्मदयन् मदौघै
गन्धैः स्फुरत्कर्णमरुत्प्रणुन्नैः ।
पुच्छच्छलात् क्रौर्यजितेन काल-
दण्डेन नित्यानुगतेन सेव्यः ॥ ४४ ॥

गर्भान्तरालस्थितभूतभावि-
कल्पद्वयीवासरदीप्तिहृद्यौ ।
वहन् मुखद्वारि मणिप्रशस्त-
दन्तच्छलेन प्रलयो नु मूर्तः ॥ ४५ ॥

कृतान्तकान्ताकुचकर्कशत्व-
विरोधसक्रोधमिवातिरक्तम् ।
कुम्भद्वयं द्विट्कुलजीवकृष्टि-
ध्यानाभसिन्दूरभरं दधानः ॥ ४६ ॥

मृत्योः कृतान्तस्य च जीविताभ्यां
कनीनिकाभ्यामतिरौद्ररूपे ।
कः संप्रहारोऽयमितीव किंचि-
दुन्मील्य नेत्रे किमपीक्षमाणः ॥ ४७ ॥

स्फुरत्पदाङ्गुष्ठयुगाङ्कुशाग्र-
हक्कानने: संयति सुप्रतीकः ।
भीमाय भीमध्वनितो नियुक्तः
प्राग्ज्योतिषक्षोणिभुजा गजेन्द्रः ॥ ४८ ॥

केषांचिदुत्कर्षकरः परेषा-
मापत्करो दोलितविश्वविश्वः ।
चतुर्युगीचारुपदप्रचारः
स्वैरी शरीरीव चचाल कालः ॥ ४९ ॥

सप्तभिः कुलकम् ।

अक्षौहिणीरेष कराङ्घ्रिदन्तै-
रेकोऽपि सप्तापि निहन्तुमीशः ।
इति द्विषद्भिः परिशङ्क्यमानो
निघ्नन् बलान्यापदिभः स भीमम् ॥ ५० ॥

स कुञ्जरः कुण्डलितोरुशुण्डो
दोर्दण्डमेवैकमुदस्य भीमः ।
अधावतामुद्धतयुद्धतप्तौ
सपाशदण्डाविव लोकपालौ ॥ ५१ ॥

क्रमोच्छलद्धूलिमयेऽन्धकारे
दुर्लक्ष्यविक्रान्तिकलाविशेषौ ।

---

१ पुष्परथं इति पा० ।

मिथोऽपि गर्जारवसिंहनादा-
नुमेययुद्धावभिजघ्नतुस्तौ ॥ ५२ ॥
युधिष्ठिराद्येषु महारथेषु
क्रुधाभिधावत्सु विमुक्तभीमः ।
द्विपोऽयमुच्चैस्तनुवातघात-
पतत्तलारत्न्यबलोऽभ्यगच्छत् ॥ ५३ ॥
दाशार्हभूपे भगदत्तभल्ल-
भुजंगमग्रस्तसमस्तवायौ ।
शिनेस्तनूजेऽपि च सुप्रतीक-
द्विपेन्द्रकोपानललीढपर्वे ॥ ५४ ॥
भृशं पिशाचा भगदत्तभल्ल-
विदारितानां जगतीपतीनाम् ।
रक्तं शरीरात् पतदेव सौख्य-
निमीलिताक्षाः पपुरुष्णमुष्णम् ॥ ५५ ॥
युग्मम् ।

प्रदीप्तकोपाग्निकृताश्वहस्ति-
नृमेधमालामहनीयहस्तः ।
प्रभूतभूतप्रमदाय नासृक्-
पूर्णानि चक्रे कति सुप्रतीकः ॥ ५६ ॥
त्रस्तैरथाश्वैरथ सुप्रतीक-
सीत्कारचीत्कारभयादपि द्राक् ।
वृकोदराद्येष्वतिदूरगेषु
कश्चित् तदाभूत् तुमुलो बलानाम् ॥ ५७ ॥
श्रुत्वा तथाक्रन्दमथेन्द्रजन्मा
निर्जित्य वज्रास्त्रवशात् त्रिगर्तान् ।
समीरवेगी शरभो मृगेन्द्र-
मिव प्रमत्तो भगदत्तमागात् ॥ ५८ ॥
स आपतन् काण्डहतप्रवीर-
कीलालपङ्कोच्चयमूकचक्रः ।
ज्याघोषमूकीकृतसुप्रतीकः
खिन्नैरखिन्नैश्च नरैर्नरैर्चि ॥ ५९ ॥
प्राग्ज्योतिषेन्द्रेण तदा मदान्धं
द्विपेन्द्रमद्रीन्द्रमिव प्रयुक्तम् ।
देवोऽपसव्येन रथेन विष्णु-
र्वृथोद्यमीकृत्य पुनः पुरोऽभूत् ॥ ६० ॥

क्षिप्त्वाथ नाराचशतानि पार्थे
नारायणास्त्रं स मुमोच वीरः ।
तद्वक्षसादत्त सुपर्णकेतुः
सुवर्णसूत्रायितमेव देवः ॥ ६१ ॥
युद्धेऽप्ययोग्योऽस्मि धृतं यदस्त्रं
त्वयेति खिन्नोक्तिपरेऽथ पार्थे ।
कुक्षिस्थितक्षीरसमुद्रसान्द्र-
सुधार्द्रमूचे वचनं मुरारिः ॥ ६२ ॥
दैत्याय दत्तं नरकाय भूमि-
सुताय भूप्रार्थनया मयास्त्रम् ।
तेनेदमस्मै स्वसुताय तच्च
स्वमित्यगृह्णां जय संप्रतीमम् ॥ ६३ ॥
इत्युक्तिमाकर्ण्य हरेर्नरेण
क्षिप्तैः क्षणादूर्ध्वमुखैः पृषत्कैः ।
विध्वा द्विपं तं च नृपं चरद्भि-
रभ्रान्तरभ्राम्यत नाकिलोकः ॥ ६४ ॥
कृत्ता शरैस्तस्य गजस्य घण्टा
च्युतानि खात् तत्क्षणमस्रपङ्के ।
व्यधत्त मार्कण्डपुराणविद्या-
बीजानि चत्वारि खगाण्डकानि ॥ ६५ ॥
तदा नदन्तो नरबाणपात-
विद्धो बलाब्धौ भगदत्तनागो ।
विलोडयामासतुरस्रधारा-
स्थलोच्छलद्विद्रुमवल्लिजालम् ॥ ६६ ॥
ततः किरीटिप्रदरेण* मौलि-
प्रवेशिना बुध्नविनिर्गतेन ।
विभिन्नकायः स पपात कुम्भी
महाद्रिपादस्तडितेव तूर्णम् ॥ ६७ ॥
अथार्धचन्द्रेण वितन्द्रचन्द्र-
सहस्रसान्द्रोज्ज्वलकीर्तिजालः ।
प्राग्ज्योतिषक्षोणिपतेः सकोप-
चित्तानसूनाशु नरो निरास ॥ ६८ ॥

* प्रदरो बाणः ।

श्रीजामदग्न्यविशिखे हृतेऽथ
पार्थेषुपङ्क्त्या परिपीड्यमाना ।
न कंचिदापारिचमूः शरण्य-
मरो पशुश्रेणिरिवाब्दवृष्ट्या ॥ ६९ ॥

गान्धारवीरौ वृषकाचलाख्यौ
सुसंहतावुद्धतयुद्धसिद्धौ ।
अपातयच्छ्लाघ्यशौर्यदन्ति-
दन्ताविवैकेन शरेण पार्थः ॥ ७० ॥

जिग्येऽथ मायामयदुष्कृत्य-
मस्त्रान्धकारादिविकारयुद्धः ।
गान्धारभूपोऽनुजलोपकोपी
किरीटिना सौरमहास्त्रयोगात् ॥ ७१ ॥

द्रोणस्तु धार्मियहणप्रपञ्ची
पाञ्चालभूपालचमूं प्रविश्य ।
क्षिप्रैः सरोजैरिव वीरवक्त्रै-
र्दिशः स्वतेजोविधुराः व्यधत्त ॥ ७२ ॥

नीलाम्बरस्यन्दनसूतसप्ति-
नीलस्तडित्वानिव पावकास्त्रैः ।
माहिष्मतीशः शरवारिवर्षी
द्राग् द्रोणसेनां विधुरीचकार ॥ ७३ ॥

छिन्नातपत्रध्वजकार्मुकोऽथ
द्रोणात्मजेनाभिपतन् धृतासिः ।
नीलद्युतिर्दण्डधरो नु नीलः
श्रीनीलकण्ठावतरेण जघ्ने ॥ ७४ ॥

छिन्नेऽथ तन्मूर्धनि पाण्डुसेना-
मौलीन्द्रनीले कुरुषून्नदत्सु ।
पार्थः पुनर्निर्दलितत्रिगर्त-
स्तत्राशु निर्घात इवापपात ॥ ७५ ॥

एकोऽपि तुल्योऽखिलदेवदैत्यैः
पार्थः परं बभ्रुसखो बलाब्धिम् ।
विलोडयामास तथा यथाभूद्
व्योम स्फुरत्सोमभरं भटास्यैः ॥ ७६ ॥

ततान भर्गोस्तनयस्तदास्त्र-
माग्नेयमग्निप्रबलप्रतापः ।
अतर्कि वीरैः प्रधनप्रदेशो
यद्द्वीपितैः स्वस्य रविप्रवेशः ॥ ७७ ॥

हृत्वा तमस्त्रं हरिनन्दनोऽब्दैः
कर्णे शरैर्व्युवनं विधाय ।
न शोणिमश्लः कति रक्तसिन्धु-
र्युद्धाम्बुराशेर्दयितास्ततान ॥ ७८ ॥

ततो जघानावरजं विपाटं
शत्रुंजयं वीरमयं प्रवीरः ।
कर्णानुजान् वैरिनरेन्द्रराज्य-
श्रियः पुमर्थानिव तत्र पार्थः ॥ ७९ ॥

शौर्यातिरेकशुभयोरुभयोः
कर्णार्जुनप्रबलयोर्बलयोः ।
आसीत् ततोऽतिनिधनं प्रधनं
हृष्यन्निशाचरपिशाचरवम् ॥ ८० ॥

विद्विष्टशस्त्रफणिदष्टतनो-
र्मूर्च्छाभृतो भटभरस्य तदा ।
कीलालपूरपरिपूर्णनदी-
वाहैः प्रवाहनमभूदुचितम् ॥ ८१ ॥

उच्छिन्दन् सुभटभुजासरोजनाला-
न्युद्भिन्दन् हरिलहरीः समीरसूनुः ।
उद्गर्जन् गज इव विस्फुरन् मदोष्मा
तां दोष्मानसहनवाहिनीं जगाहे ॥ ८२ ॥

कोऽप्यासीन्नरशरपाततांडितानां
माक्रन्दः स युधि विरोधिवाहिनीनाम् ।
सस्मार स्वदहनदह्यमानलङ्का-
लोकानां कपिरपि येन स ध्वजस्थः ॥ ८३ ॥

पार्थोद्यमात् त्रसति शत्रुबले
व्याकम्पिभूमितलभूमिधरे ।
अस्ताचलादपतदुष्णरुचि-
र्वीरा: प्रतेनुरवहारमतः ॥ ८४ ॥

द्वितीयमहः ।

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के द्रोणपर्वणि दिनद्वयसङ्ग्रामवर्णनो नाम प्रथमः सर्गः ॥ १ ॥ :: :: ॥

॥ अथ खण्डप्रशस्तौ

रामावतारवर्णनम् ॥

(६५) भ्रान्त्वा भूवलयं दशास्यदमन त्वत्कीर्तिहंसी गता
व्योम ब्रह्ममरालसंगमवशात् सा तत्र गुर्विण्यभूत् ।
पश्य स्वर्गतरङ्गिणीपरिसरे कुन्दावदातं यया
मुक्तं भाति नवीनमण्डकमिदं शीतद्युतेर्मण्डलम् ॥

हेदशास्यदमन दशमुखनाशन त्वत्कीर्तिहंसी तव कीर्तिरेव हंसीरूपा भूवलयं पृथ्वीमण्डलं भ्रान्त्वाऽटित्वा व्योमाकाशं गता सती तत्र व्योम्नि सा कीर्तिहंसी ब्रह्ममरालसंगमवशाद् ब्रह्मणो विधेर्मरालो हंसस्तस्य यः संगमः संयोगस्तद्वशाद्गुर्विण्यभूत्, तदनन्तरं स्वर्गतरङ्गिणीपरिसरे त्रिपथगातीरे यया हंस्या मुक्तं कुन्दावदातं कुन्दवदुज्ज्वलं नवीनमण्डकमेवेदं शीतद्युतेश्चन्द्रस्य मण्डलं भाति शोभते, एतेन रामकीर्तिस्त्रिपथगामिनीति सूचितम् ॥ ६५ ॥

(६६) संग्रामाङ्गणमागतेन भवता चापे समारोपिते
रामाकर्णय येनयेन सहसा यद्यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥

हेराम संग्रामाङ्गणं रणभूमिमागतेन भवता चापे धनुषि समारोपिते सति येनयेन यद्यत् सहसा झटिति समासादितं तत्तदाकर्णय, कोदण्डेन धनुषा शराः प्राप्ताः, शरैश्चारिशिरो वैरिमस्तकं, तेन च भूमण्डलं पृथिवी, तेन भूमण्डलेन त्वं स्वामित्वेन प्राप्तो, भवता चातुलाऽनुपमा कीर्तिर्लब्धा, तया लोकत्रयं व्याप्तमिति ॥ ६६ ॥

(६७) पूर्णेन्दुः करकन्दुको हिमगिरिः क्रीडाविहारस्थली
क्षीराब्धिर्गृहदीर्घिका प्रियसखी वाचां पतिर्देवता ।
शय्या दिग्गजराजदन्तवलभी त्वत्कीर्तिकन्याकृते
पाञ्चालीमिथुनं व्यधायि विधिना गौरीगिरीशावपि ॥

हेराम त्वत्कीर्तिकन्याकृते त्वत्कीर्तिरेव कन्या तदर्थं "तत्क्रीडार्थमिति भावः" विधिना ब्रह्मणा व्यधायि निर्मितम्, किं तदित्याह, पूर्णेन्दुः करकन्दुकः पूर्णचन्द्रः करस्थो गेन्दुको गोलत्वात्, तथा क्रीडाविहारार्थं स्थली अकृत्रिमभूमिर्हिमगिरिर्हिमालयः, तथा गृहदीर्घिका गृहवापी क्षीराब्धिः क्षीरसमुद्रः, प्रियसखी सहेली वाचां गिरां पतिः सरस्वतीदेवता, शय्या दिग्गजराजदन्तवलभी दिग्गजराजानां दन्तवलभी शयनार्थभूमिः, पाञ्चालीमिथुनं पुत्रिकायुगलं गौरीगिरीशावुमामहेश्वरावपि निर्मितौ, एतेन रामे सर्वतः श्रेष्ठत्वमस्तीति सूचितम् ॥ ६७ ॥

(६८) संग्रामो दिवसायते तव भुजः पूर्वाचलेन्द्रायते
त्वत्क्रोधोऽप्यरुणायते तव लसच्छौर्यं प्रकाशायते ।
त्वद्वैरी तिमिरायते तदबलाहृत् सूर्यकान्तायते
त्वत्कीर्तिः कमलायते रघुपते त्वत्खड्गचण्डद्युतेः ॥

हेरघुपते तव खड्ग एव चण्डद्युतिः सूर्यस्तिग्मांशुत्वात् तस्य सर्वथा सूर्योपमत्वमस्तीति शेषः । तदेव कथयति । संग्रामो दिवसायते दिवस इवाचरति यथा दिवसे सूर्यः प्रभाप्रगल्भतामुपैति तथा त्वत्खड्गभानुरपि संग्रामे स्वस्पष्टतां प्रकटयतीत्यर्थः, तथा तव भुजो बाहुः पूर्वाचलेन्द्रायते पूर्वाचलेन्द्र उदयगिरिः स इवाचरति यथा भानुरुदयाचले भासते तथा चासौ त्वद्भुजे भासत इत्यर्थः, तथा त्वत्क्रोधस्तव कोपोऽप्यरुणायते अरुणः सारथिः स इवाचरति यथाऽरुणो रक्तवर्णोऽग्रे प्रादुर्भवति तथा क्रोधोऽपि रक्तमुखनेत्रादिना प्रादुर्भवतीत्यर्थः, तथा तव लसच्छौर्यं देदीप्यमानं शूरत्वं प्रकाशायते प्रकाश इवाचरति यथा सूर्यस्योदये सर्वत्र प्रकाशः प्रसरति तथा त्वत्खड्गभानोरुदये तव शौर्यं स्पष्टमुदेतीत्यर्थः, तथा त्वद्वैरी तव शत्रुस्तिमिरायते तिमिरवाचरति यथेनोदये तमांसि नाशमायान्ति तथा त्वत्खड्गभानूदये तव वैरिणो दिगन्तगामिनो भवन्तीत्यर्थः, तथा तदबलाहृत् तेषामरीणां या अबलाः स्त्रियस्तासां हृद्धृदयं सूर्यकान्तायते सूर्यकान्त इवाचरति यथा भानोरुदये सूर्यकान्तमणिषु महांस्तापः संजायते तथा चैतदुदये सति वैरिस्त्रीहृदयेषु महान् पश्चात्तापो भवतीत्यर्थः; तथा त्वत्कीर्तिः कमलायते कमलमिवाचरति यथा भानोरुदये कमलानि विकस्वराणि भवन्ति तथा त्वत्खड्गभानोरुदये त्वत्कीर्तिर्विकाशमुपैतीत्यर्थः, एतेन रामकरखड्गः सहस्रांशुरेव इति सूचितम् ॥ ६८ ॥

(६९) आकृष्टे युधि कार्मुके रघुपतौ वामोऽब्रवीद्दक्षिणं
पुण्ये कर्मणि भोजने च भवतः प्रागल्भ्यमस्मिन्न किम् ।
वामान्यः पुनरब्रवीन्न मम भीः पृच्छाम्यहं स्वामिनं
छिन्द्यां रावणवक्त्रपङ्क्तिमथवेत्येकैकमादिश्यताम् ॥

हेरघुपते त्वया युधि संग्रामे कार्मुके धनुषि आकृष्टे कर्णपर्यन्तं नीते सति वामः करो दक्षिणं करमब्रवीदुवाच, हे दक्षिणपाणे पुण्ये कर्मणि भवतस्तव प्रागल्भ्यं च पुनर्भोजनेऽपि दृश्यते यतः सर्वत्र सुकरे पुण्ये च कर्मणि सभ्यैर्दक्षिण एवादृतोऽसि, अत्र च संग्रामलक्षणे दुष्करे कृत्ये यत् पश्चाद्यासि अहं च त्वत्पुरो वैर्यभिमुखं स्थास्यामि तत् किं भवतोऽत्र प्रागल्भ्यं नास्तीति, ततः पुनर्वामान्यो दक्षिणो वाममब्रवीत् हेवाम न मम भीः नाहं भीत्या पश्चाद्यास्यामि किंतु पृच्छा-

Digitized by Google

ग्रहं स्वामिनं यतोऽनुचराः स्वामिनं पृष्ट्वैव कृत्यं कुर्वते नान्यथा अतोऽहं स्वामिनं किंचित् प्रष्टुं कर्णपर्यन्तं गच्छामि, किं तदित्याह, हेस्वामिन् अहमेकेनैव बाणेन एकदैव रावणवक्त्रपङ्क्तिं रावणाननदशकं छिन्द्यां लुनीयामथवैकैकं प्रत्येकं छिन्द्यामित्यादिश्यतामिति ॥ ६९ ॥

(७०) अस्माकं परमन्दिरस्य चरितं यद्यप्यवाच्यं भवेत्
स्वामी त्वं कथयामि तेन भवतः किंचित् प्रियादूषणम् ।
श्रीमद्राम नृप त्वया रणमुखे पाणिग्रहः सादरं
यस्याः साऽसिलता परस्य हृदये दृष्टा लुठन्ती मया ॥

हेराम यद्यपि परमन्दिरस्य परस्त्रियाः "तात्स्थ्यात् तद्व्यपदेश इतिन्यायेन मन्दिरशब्दोऽत्र स्त्रीवाची" चरितं कृत्यमवाच्यं वक्तुमनुचितं तथापि त्वमस्माकं स्वामी यतस्तेन हेतुना भवतो युष्मान् प्रति किंचिदनिर्वाच्यमपि प्रियादूषणं स्त्रीदुर्लक्षणं कथयामि "यतो भक्ताः स्वस्वामिनः कथमपि हानिं सोढुमक्षमाः स्त्रीदुर्लक्षणं तु परमपमानकारणमतो ब्रवीमीति भावः" तदेवाह, श्रीमदिति हेश्रीमद्राम त्वया रणमुखे संग्रामादौ स्वपरनरसुरसाक्षिकं यस्या असिलतायाः सादरमादरेण पाणिग्रहः करे ग्रहणं कृतं विवाह इति यावत् साऽसिलता परस्य शत्रोर्हृदये लुठन्ती विलसन्ती मया दृष्टाऽदर्शीति, यथा काचित् पाणिगृहीती परपुरुषस्य हृदये विलासं कुर्यात् तदा तस्या असतीत्वलक्षणेन पुरुषस्य महद्दूषणं लग्नं भवेत्, एतेन सकलवैरिहन्तृत्वमसिलताया द्योतितमिति भावः ॥ ७० ॥

(७१) सत्यं सा बहुरूपिणी समभवत् सिद्धिस्वरूपा भवत्कीर्तिः श्रीरघुवंशरत्न विमला जागर्ति विश्वोदरे ।
क्ष्मापारे रिपुमन्दिरे नृपपुरे रत्नाकरे निर्झरे
कान्तारे गिरिशेखरे विषधरागारे तथैवाम्बरे ॥

हेश्रीरघुवंशरत्न सा भवत्कीर्तिस्तवकीर्तिः सिद्धिस्वरूपाऽणिमाद्यष्टसिद्धिमती सती बहुरूपाऽनन्तरूपा सत्यं नियमेन समभवज्जाता नानारूपत्वेन विश्वव्यापिन्यभूदिति भावः, तदेव विवृणोति, सा विमला निर्मला सती विश्वोदरे विश्वमध्ये जागर्ति, तथा क्ष्मापारे भूमेः परे पारे, तथा रिपुमन्दिरे वैरिगृहे, तथा नृपपुरे सुराजवर्यमन्दिरे, तथा रत्नाकरे समुद्रे, तथा निर्झरे गिरिवर्त्मनिस्सरन्नीरप्रवाहे, तथा कान्तारेऽरण्ये, तथा गिरिशेखरे पर्वतशृङ्गे, तथा विषधरागारे पाताले, तथैवाम्बरे नभसि जागर्ति, यथा योगिनी सिद्धा गिरिदर्यादिषु स्वकामचारिणी भवेत् तथा त्वत्कीर्तिरपीति भावः ॥ ७१ ॥

(७२) कीर्तिस्तव क्षितिप याति भुजङ्गगेहं
मातङ्गसंगमकरी च दिगन्तकेषु ।
त्यक्त्वाम्बरं भजति नन्दनमप्यगम्यं
किंकिं करोति न निरर्गलतां गता स्त्री ॥

हेक्षितिप राजन् तव कीर्तिर्भुजङ्गगेहं नागलोकं याति, च पुनर्दिगन्तकेषु दिक्पर्यन्तेषु मातङ्गसंगमकरी मातङ्गानामैरावतादीनामष्टदिग्गजानां संगमं संयोगं कर्तुं याति, तथाम्बरं व्योम त्यक्त्वोल्लङ्घ्याऽगम्यमपि नन्दनं सुरालयवनं भजति सेवते, तथा च सर्वत्र त्वत्कीर्तिरस्तीति भावः, तस्याः सर्वत्र गमने कारणमाह, या हि परायत्ता स्त्री सा कदापि परगृहं नो सेवेत या च स्त्री निरर्गलतामुच्छृङ्खलतां गता प्राप्ता सा किंकिं न करोति सर्वमप्यकृत्यं कुर्यादेव यथोच्छृङ्खला काचन स्त्री भुजङ्गगेहं गणिकापतिगेहं "भुजङ्गो गणिकापतिः" याति जारगृहं यातीत्यर्थः, तथा दिगन्तकेषु विजनप्रदेशेषु गत्वा मातङ्गसंगमकरी चण्डालसंगमकारिणी भवति मातङ्गश्चण्डालः, तथाम्बरं वस्त्रं त्यक्त्वा निर्लज्जा भूत्वाऽगम्यमपि गमनानर्हमपि नन्दनं पुत्रं रिरंसया भजति सेवते तथेयं त्वत्कीर्तिरुच्छृङ्खला सती सर्वत्र प्रयातीति भावः ॥ ७२ ॥

(७३) देवे दिग्विजयोद्यते परिपतत्काम्बोजवाहावलीघोङ्खोल्लेखविसर्पिणि क्षितिरजःपुञ्जे वियच्चुम्बति ।
भानोर्वाजिभिरङ्गभूषणरसानन्दः समासादितो
लब्धः किंच नभःस्थलामरधुनीपङ्केरुहैरन्वयः ॥

श्रीरामे देवे दिग्विजयोद्यते दिग्यात्रां कर्तुं प्रवृत्ते सति भानोः सूर्यस्य वाजिभिरश्वैरङ्गभूषणरसानन्दोऽङ्गे भूषणमिव भूषणं भूमिविलुण्ठनलक्षणं तस्य यो रसस्तस्यानन्द आह्लादः समासादितः प्राप्तः, यतो वाजिनां भूमौ विलुण्ठनं परमं भूषणं सुखावहं चातो रजःसंश्लेषे सूर्याश्वैर्भूविलुण्ठनसुखं लब्धमिति भावः, किंचापरोऽपि विशेषः समुत्पन्नः, नभःस्थलामरधुनीपङ्केरुहैर्नभःस्थले आकाशे याऽमरधुनी गङ्गा तस्यां पङ्केरुहैः कमलैरन्वयो वंशो लब्धः, यतो गङ्गायां रजोलेशाभावेन पङ्काभावात् कथं तस्यां पङ्केरुहस्थितिः कुतश्च तेषामुत्पत्तिर्भवेद्यानि पद्मानि तत्रासंस्तेषु पङ्केरुहत्वमपि तत्सादृश्यादेव, यदा त्वं दिग्विजयोद्यतस्तदा त्वदश्वखुरक्षुण्णभूरजो नभःसरिति गतं ततस्तत्र तद्रजो जलयोगात् पङ्कत्वं प्राप्नात् ततश्च तेषु पङ्केरुहत्वं सत्यमभूदथ पद्मानामुत्पत्तिरपि तत्राभूदिति भावः । कदा चेदमभूदित्याह, क्षितिरजःपुञ्जे भूमिपांशुसमूहे वियदाकाशं चुम्बति सति, कथंभूते क्षितिरजःपुञ्जे, परिपतत्काम्बोजवाहावलीघोङ्खोल्लेखविसर्पिणि प-

Digitized by Google

रिपतन्तो गच्छन्तो ये काम्बोजवाहाः काम्बोजदेशोत्पन्ना अश्वास्तेषां याऽऽवली श्रेणिस्तस्या या वीङ्खा गतिः "गतौ वीङ्खेति हेमकोषः, गतिविशेषे चानेकार्थे, वीङ्खा तु शूकशिम्बायां गतिभेदे च नर्तने इति" तस्याउल्लेख उद्गमो वाजिनां हेषणादिकरणं तेन विसर्पति ऊर्ध्वं गच्छति तच्छीलस्तस्मिंश्चिति ॥ ७३ ॥

(७४) गर्वावेशविशालरावणभुजप्रोद्यत्प्रतापानल-
ज्वालाजालनवाम्बुदः कथमसौ सीतापतिर्वर्ण्यते ।
यस्याऽरातिनृपाः कृपाख्यजलधौ मग्नाः पुरो गौरवा-
दत्युच्चैर्गतयो भवन्ति च पुनर्भित्त्वा रवेर्मण्डलम् ॥

असौ सीतापती रामः कथं वर्ण्यते तत्र स्तवनाशक्यत्वे हेतुमाह । यस्य रामस्य पुरोऽग्रेऽरातिनृपा वैरिराजाः कृपाख्यजलधौ कृपाया एव कृष्णाभत्वाज्जलधिः समुद्रस्तस्मिन् गौरवाद्दौर्यान्मग्ना बुडितास्ते वैरिनृपाः पुना रवेर्मण्डलं सूर्यमण्डलं भित्त्वोच्चैर्गतयः स्वर्गयायिनो भवन्ति, यदुक्तं वृद्धैः ।

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदकौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥ १ ॥

अन्यो हि यो जलधौ निमग्नो भवति स च नीचैर्गतिरेव भवतीति प्रसिद्धम्, अत्र यो वैरिणामपि मोक्षदाता स कथं वर्ण्यः स्यादिति भावः, किंविशिष्टो रामः, गर्वावेशेन दर्पाटोपेन विशालौ विस्तीर्णौ यौ रावणभुजौ ताभ्यां प्रोद्यन्त्यो देदीप्यमानाः प्रतापानलज्वालाः प्रतापाग्निशिखास्तासां यज्जालं समूहस्तत्र नवाम्बुद इव नवमेघ इव यः सः, अन्योप्यनलोऽम्बुदेन शाम्यते यथा तथा तत्प्रतापाग्निरपि रामेण शमित इति भावः ॥ ७४ ॥

(७५) चिन्तागम्भीरकूपादनवरतचलद्भूरिशोकारघट्ट-
व्याकृष्टं निश्वसन्त्यः पृथुनयनघटीयन्त्रनिर्मुक्तधारम् ।
नासावंशप्रणाली विषमपथपतद्बाष्पपानीयमेता
राम त्वद्वैरिनार्यः कुचकलशयुगेनान्वहं संवहन्ति ॥

हेराम त्वद्वैरिनार्यस्तव शत्रोः स्त्रियः कुचकलशयुगं कुचौ स्तनौ तावेव कलशयुगं घटद्वन्द्वं तेन, नासावंश इव प्रणाली जलमार्गः सैव विषमपथः समोन्नतमार्गस्तस्मात् पतज्जलं बाष्पपानीयमश्रुजलं तदन्वहं प्रतिदिनं संवहन्त्युद्वहन्ति, सर्वा अपि नार्यः कलशयुगेनैव जलं वहन्ति तथैता अपीति भावः, किंभूतास्ताः, निश्वसन्त्यः निश्वासं मुञ्चन्त्यः, किंविशिष्टं बाष्पजलं, चिन्ता स्वभर्तृहननाज्जातो यः पश्चात्तापः सैव गम्भीरोऽलब्धमध्यो यः कूपस्तस्मादनवरतं निरन्तरं चलन् भूरि बहुलो यः शोकः स एवारघट्टस्तेन करणभूतेन व्याकृष्टं निष्कासितं, यथान्ययापि स्त्रिया पानीयं कूपादरघट्टद्वारा निष्कास्यते तथेदमपि, पुनः किंभूतं, पृथूनि विस्तीर्णानि नयनान्येव घटीयन्त्रं तेन निर्मुक्ता धारा जलप्रवाहो यस्मिन् तदिति ॥ ७५ ॥

(७६) महाराज श्रीमन् जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं त्रिभुवनपतिः स्वं करिवरं
कलानाथं राहुः कमलभवनो हंसमिथुनम् ॥

हेश्रीमन्महाराज रामचन्द्र ते तव यशसा कीर्त्या जगति भुवने धवलिते पाण्डुरतां प्रापिते सति अयं परमपुरुषो विष्णुः पयःपारावारं क्षीरसमुद्रं मृगयते, तथा कपर्दी शिवः कैलासं, त्रिभुवनपतिरिन्द्रः स्वं करिवरमैरावतं, राहुश्च कलानाथं चन्द्रं, तथा कमलभवनो विधिर्हंसमिथुनं, यतः सर्वेषां समुद्राणां पर्वतानां गजानां सर्वभक्ष्याणां पक्षिणां च त्वत्कृतकीर्त्या श्वेतत्वात् क्षीराब्ध्यादीनामनवगमस्तेषामतस्ते तान् सर्वत्रावलोकयन्तीति भावः ॥ ७६ ॥

"श्रीकाशीधर्म्मसभा" प्रकाशितपरीक्षाविषयादि-व्यवस्थितिप्रतिपादकपत्रसंक्षेपः ।

परीक्षाया आरम्भः श्रीमत्या भगवत्याखिलभुवनवन्दितचरणकमलया कमलया भक्तजनोपनीतमाध्यकुसुमाद्युपहारस्वीकारेणानुगृहीतायां माघशुक्लपञ्चम्यां भविता ।

अस्मिन् वर्षे वेदव्याकरणज्योतिषन्यायसाङ्ख्ययोगधर्म्मशास्त्रवेदान्तपूर्वमीमांसासर्वदर्शनद्वैतवादकाव्यालङ्कारपुराणेतिहासवैद्यकसंगीतमन्त्रशास्त्रसूत्रकोषकामशास्त्रेषु शतद्वयपरिमितानां छात्राणां परीक्षा भविष्यति ।

तत्र वेदे, परीक्षकः श्रीपण्डितबापूभट्टः श्रीपण्डितजयरामभट्टः । माध्यन्दिनशाखाप्रमुखेषु चतुर्षु विषयेषु श्रीपण्डितलक्षपाठकप्रभृतयोऽन्येऽपि सप्त परीक्षकाः । प्रथमश्रेण्यां पारितोषिकं १०१) द्वितीयश्रेण्यां पारितोषिकं ३१) तृतीयश्रेण्यां पारितोषिकं ११) व्याकरणे परी॰ श्रीपण्डितसखारामभट्टः श्रीपण्डितचन्द्रशेखरत्रिपाठी । प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) ज्योतिषे परी॰ श्रीपण्डितबापूदेवशास्त्री श्रीपण्डितदेवकृष्णमिश्रः । प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) न्याये परी॰ श्रीराधामोहनतर्कभूषणभट्टाचार्य्यः श्रीताराचरणतर्करत्नभट्टाचार्य्यः । प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) साङ्ख्ययोगयोः परी॰ श्रीपण्डितवेचनरामत्रिपाठी श्रीप-

Digitized by Google

ण्डितराजारामशास्त्री । प्र॰ पा॰ २१) द्वि॰ पा॰ ११) तृ॰ पा॰ ५) धर्म्मशास्त्रे परी॰ श्रीरामतुलारविश्रामणिभट्टाचार्य्यः श्रीपण्डितबालकृष्णशास्त्री । प्र॰ पा॰ ५१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) वेदान्ते परी॰ * ———— प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) पूर्वमीमांसायां परी॰ श्रीपण्डितहरेकृष्णः श्रीपण्डितगणेशशास्त्री श्रीपण्डितनीलदेवः । प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) सर्वदर्शने परी॰ श्रीजयनारायणतर्कालङ्कारभट्टाचार्य्यः श्रीताराचरणतर्करत्नभट्टाचार्य्यः प्र॰ पा॰ ५१) द्वि॰ पा॰ ३१) तृ॰ ५) द्वैतवादे परी॰ ———— प्र॰ पा॰ ३१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) काव्यालङ्कारयोः परी॰ श्रीपण्डितशीतलप्रसादत्रिपाठी श्रीपण्डितरामचन्द्रशास्त्री । प्र॰ पा॰ ४१ द्वि॰ पा॰ २१ तृ॰ पा॰ ११) पुराणेतिहासयोः परी॰ श्रीपण्डितभाऊशास्त्री श्रीपण्डितपरमेश्वरदत्तः । प्र॰ पा॰ ४१) द्वि॰ पा॰ ३१) तृ॰ पा॰ ११) वैद्यके परी॰ श्रीपण्डितरामचन्द्रशास्त्री श्रीपण्डितहरिरामः प्र॰ पा॰ ३१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) सङ्गीते परी ———— श्रीहरिरामवाजपेयी स्वरभेदे परीक्षकः । प्र॰ पा॰ ४१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) मन्त्रशास्त्रे परी॰ श्रीपण्डितगौरीशङ्करः श्रीमदुदयचन्द्रशि-रोमणिभट्टाचार्य्यः । प्र॰ पा॰ ३१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) सूत्रे परी॰ ———— प्र॰ पा॰ ३१) द्वि॰ पा॰ २१) तृ॰ पा॰ ५) कोषे परी॰ ———— प्र॰ पा॰ ५१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११) कामशास्त्रे परी॰ ———— प्र॰ पा॰ ३१) द्वि॰ पा॰ २१) तृ॰ पा॰ ११)

अथ परीक्षकसहायकाः ।

श्रीपण्डितदेवदत्तद्विवेदः । श्रीपण्डितबस्तीरामद्विवेदः । श्रीपण्डितविभवरामः । श्रीकालीप्रसादशिरोमणिभट्टाचार्य्यः । श्रीकैलासचन्द्रशिरोमणिभट्टाचार्य्यः । श्रीपण्डितानन्तरामभट्टः । श्रीपण्डितलक्ष्मीनृसिंहशास्त्री । श्रीपण्डितढुण्ढिराजपन्तधर्म्माधिकारी । श्रीपण्डितवेणीरामशेषः । श्रीपण्डितवामनाचार्य्यः । सत्यामपेक्षायामिमे विद्वांसः परीक्षकाणां साहाय्यमवलम्बिष्यन्ते ।

अथ परीक्षानिरीक्षकाः ।

श्रीमान् बाबू ऐश्वर्य्यनारायणसिंहः । श्रीमान् बाबू शिवप्रसादः । श्रीमान् मित्रोपनामको बाबू प्रमदादासः । श्रीमान् बाबू हरिश्चन्द्रः । श्रीपण्डितरघुनाथप्रसादः । एते खलु विश्रुतकीर्त्तयो महामतयो महाशयाः परीक्षाकर्म्मणि कृताकृतावेक्षकाः स्थास्यन्ति ।

यथोक्तासु तत्तद्विद्यासु दत्तयथोचितपरीक्षश्छात्रः प्रथमश्रेण्यां "तद्विद्यापारकृतो" द्वितीयश्रेण्यां "तद्विद्याप्रवीण"स्तृतीयश्रेण्यां,, तद्विद्याप्रविष्ट" इति यथाक्रममुपाधित्रयं लप्स्यते ।

तत्रापि प्रतिश्रेणि प्रश्नोत्तरदाने लब्धशतपरिमितयोग्यताबोधकाङ्क"उत्तम" शब्दाङ्कस्तच्छ्रेणीनियतं पारितोषिकमुपनामप्रशंसापत्रञ्चेति त्रितयं "मध्यमशब्दात्र"उपनाम प्रशंसापत्रञ्चेति द्वितयं," सामान्यशब्दाङ्कः केवलं प्रशंसापत्रमधिगमिष्यति ।

परीक्षां दित्सवो लोकाः पौषीं पूर्णिमामारभ्य माघशुक्लचतुर्थीं यावत्, पूर्वनिर्दिष्टविद्यान्तर्गतस्वेष्टविषयनामनिर्देशगर्भं स्पष्टसन्दर्भमधोनिवेशितनिजसत्रं प्रार्थनापत्रं लिखित्वा प्रस्तुतसभाया लेखाध्यक्षाणा*मन्यतमस्य समीपं प्रेषयितुमनुज्ञायन्ते ।

प्रश्नोत्तरलेखनावकाशश्च प्रतिदिनं मध्याह्नादुत्तरं घण्टाद्वयवादनमारभ्य घण्टापञ्चकवादनं यावत् ।

ब्राह्मणातिरिक्तौ क्षत्रियवैश्यावपि परीक्षां दित्सू तां दातुमनुमन्येते ; तौ पुनर्योग्यतानुसारेणोपाधिप्रशंसापत्रे एवाधिगमिष्यतो नतु पारितोषिकम् ।

अथ पूर्वनिर्दिष्टपारितोषिकातिरिक्तं परितोषिकम् ।

कौथुमशाखायां पाठे व्याख्याने च समर्थाय छात्राय श्रीमान् सर्वजनमान्यः परमवदान्यो बाबू ऐश्वर्य्यनारायणसिंहः १०१) पारितोषिकं प्रदास्यति । श्रीमान् ताराचरणतर्करत्नभट्टाचार्य्यः न्यायशास्त्रस्य प्रथमश्रेण्यां २५) माध्यन्दिनशाखायां पाठे व्याख्याने च समर्थाय गौड़जातीयायान्तेवासिने २५) सङ्गीतशास्त्रस्य प्रथमश्रेण्यां १०) पारितोषिकं वितरिष्यति । प्रतिश्रुतञ्च श्रीमता विद्वत्कुलकुमुदचन्द्रेण बाबू हरश्चिन्द्रेण काव्यकामशास्त्रान्यतरस्य प्रथमश्रेण्यां ५०) समस्तस्य यजुषः पाठे व्याख्याने च समर्थाय महात्मने १०००) वेदान्तशास्त्रे रश्मौ भाष्यप्रकाशे च १००) पारितोषिकं प्रदातुम् । वेदान्तातिरिक्तायाः कस्याश्चिद्विद्यायाः कस्यामपि श्रेण्यां काचिद्वनिता सम्यक् परीक्षां दास्यति चेत् तस्यै श्रीमान् बाबू हरिश्चन्द्रः तच्छ्रेणीनियतात् पारितोषिकादष्टगुणाधिकं पारितोषिकं प्रदास्यति ।

एतस्यां माघकृष्णचतुर्द्दश्यां प्रधानाध्यक्षसंमत्या सभासद्भिः काव्यफलितयोः पृथग्विभागः कृतः तत्र पारितोषिकाद्यपि पार्थक्येन व्यवस्थापितम् ।

संवत् १९२७ माघकृष्णामायाम्

पण्डितशीतलप्रसादत्रिपाठी ।

* अनिर्दिष्टपरीक्षकाभिख्यकासु विद्यासु परीक्षाकाले केचित् सभ्याः छात्रान् परीक्षितुं प्रार्थिता भविष्यन्ति ।

* लेखाध्यक्षाः श्रीपण्डितबालशास्त्री श्रीपण्डितगयादत्तः श्रीताराचरणतर्करत्नभट्टाचार्य्यः श्रीमान् बाबू ऐश्वर्य्यनारायणसिंहः श्रीमान् बाबू शिवप्रसादः श्रीपण्डितरघुनाथप्रसादः श्रीमान् बाबू हरिश्चन्द्रः ।

THE APHORISMS

OF THE

YOGA PHILOSOPHY

OF

PATAÑJALI.

(Continued from page 207.)

[1] He [now] mentions the conquering of the internal organ :

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्च ॥ ५० ॥

Aph. 50. Omniscience and Supremacy over all existence arise merely [in the ascetic] who has the discriminative knowledge of the element of purity and soul.

[2] [In the ascetic]. Who has practised asceticism with regard to the clear modification of the pure element [—i.e. with regard to internal organ, antahkarana] arises the knowledge of the difference between the quality of purity [sattwa] and soul [purusha], in the shape of inertness of the notion in regard to the qualities existing as agents, [or in other words, by which [knowledge the conceit that, 'the qualities are agents' is rendered inert]. From the influence of this [knowledge] arises in the ascetic, situated in the selfsame position, meditation—or recognition—viz, "Supremacy over all existence" and "Omniscience."

[3] "Supremacy over all existence" means, overcoming like a master all entities, which are modifications of the qualities [guṇa].

"Omniscience" means, the distinctive knowledge of them [i.e. of entities] as they are in themselves, which exist in the modes as subsided [Śánta] emerged [udita] and not yet named—[avyapadeśya]—viz., the things past, present and future. In the state of perfect consciousness of having overcome [them] the perfection which in this system is [technically] called viśoká, or free from sorrow, takes place.

[4] He [now] states another ground—or position in order :—

[1] अन्तःकरणजयमाह ।

[2] तस्मिन् शुद्धे सात्त्विके परिणामे कृतसंयमस्य या सत्त्वपुरुषयोरुत्पद्यते विवेकख्यातिर्गुणानां कर्तृत्वाभिमानशिथिलीभावरूपा तन्माहात्म्यात् तत्रैव स्थितस्य योगिनः सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्च समाधिर्भवति ॥

[3] सर्वेषां गुणपरिणामानां भावानां स्वामितयाऽऽक्रमणं सर्वाधिष्ठातृत्वं तेषामेव शान्तोदिताव्यपदेश्यधर्म्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वम् । एषा चास्मिन् शास्त्रे परस्यां वशीकारसञ्ज्ञायां विशोकानामसिद्धिरुत्पद्यते ॥

[4] क्रमेण भूमिकान्तरमाह ।

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ५१ ॥

Aph. 51. From an indifference even to this [perfection] through the destruction of the germ of perniciousness, results isolation.

[1] When an indifference even to this perfection [which is called] viśoká—or free from sorrow, results in the ascetic; then through that [indifference] on the absolute destruction—eradication of ignorance which is the germ of the evils—or perniciousness—i.e. desire &c. [—desire and aversion &c.]—isolation—absolute cessation of pain—that is, permanence of soul in its own state, takes place in consequence of the conclusion of the supremacy of the qualities [guṇa]. G. D.

(To be continued.)

THE

VAIŚESHIKA APHORISMS

OF

KAṆÁDA.

SIXTH BOOK, FIRST DAILY LESSON.

(Continued from page 184.)

तद्दुष्टभोजने न विद्यते ॥ ६ ॥

Aph. 6. That does not exist in the case of the eating of the wicked.

[2] 'That' denotes the fruit of a benediction. When evil Bráhmans, unworthy recipients, are fed at the obsequial rites, no fruit accrues from this to the ancestor; or the meaning is simply that the result of the obsequial rites does not accrue to the ancestor. U.

दुष्टं हिंसायाम् ॥ ७ ॥

Aph. 7. The evil has reference to wrong.

[3] 'Has reference to wrong' implies prohibited actions in general. It should therefore be understood that a man occupied in forbidden action is the wicked. U.

तस्य समभिव्याहारतो दोषः ॥ ८ ॥

Aph. 8. Demerit results from association with him.

[1] तस्यामपि विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां रागादीनां यद्बीजमविद्यादयस्तस्य क्षये निर्मूलने कैवल्यमात्यन्तिकी दुःखनिवृत्तिः पुरुषस्य गुणानामधिकारपरिसमाप्तेः स्वरूपप्रतिष्ठत्वम् ॥

[2] तदित्याशीर्दानफलं पराम्रशति दुष्टब्राह्मणाः पात्रानधिकारिणो यत्र श्राद्धे भोज्यन्ते तत्रापि पितरि तत्फलं न विद्यते न भवतीत्यर्थः श्राद्धफलमेव वा न भवति पितरीत्यर्थः ॥

[3] हिंसायामिति निषिद्धकर्म्ममात्रोपलक्षणम् तेन निषिद्धे कर्म्मणि प्रवृत्तं दुष्टं विजानीयादित्यर्थः ॥

Digitized by Google

[1] It is stated that not only is there absence of fruit in the partaking of an unworthy Bráhman invited to the obsequial rite, but also sin accrues. Demerit or guilt results from association, characterised as eating in the same row, sleeping, reading and the like, together with him, i. e. with a Bráhman occupied in illicit action. U.

तददुष्टे न विद्यते ॥ ९ ॥

Aph. 9. This does not exist in the case of one not unworthy.

[2] This—guilt—does not exist—does not accrue—in the case of a Bráhman not unworthy, i. e. one who acts according to sacred precepts, caused to partake in the obsequial rite. U.

पुनर्विशिष्टे प्रवृत्तिः ॥ १० ॥

Aph. 10. Again the procedure should be in relation to that which is excellent.

[3] If excellent persons, those who regulate their conduct according to sacred precepts, are procured at obsequial rites or in receiving gifts, a man should avoid those who are censurable though invited. The text 'A man should not reject those who are invited' refers to worthy recipients. But a man should gratify blameable persons, when invited, by giving money, &c. U.

समे हीने वा प्रवृत्तिः ॥ ११ ॥

Aph. 11. Again the procedure should be in relation to an equal or an inferior.

[4] Where persons more excellent than oneself are not procured at obsequial rites, it is explained that the procedure in obsequial rites, charity &c., should be in relation to an equal, one like oneself, or an inferior, one less in point of merit &c., than oneself. Persons prohibited are by all means to be avoided, but not the unblemished whether they be equals or inferiors. U.

एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम् ॥ १२ ॥

Aph. 12. By this is explained reception of property from another, from inferior, equal, and superior, virtuous persons.

[1] न केवलं दुष्टब्राह्मणस्य श्राद्धे निमन्त्रितस्य भोजनेन फलाभावः किन्तु पापमपि भवतीत्याह तस्य निषिद्धे कर्म्मणि प्रवृत्तस्य ब्राह्मणस्य समभिव्याहारात् एकपङ्क्तिभोजनसहशयनसहाध्ययनादिलक्षणात् दोषः पापमित्यर्थः ॥

[2] तत् पापमदुष्टे यथाशास्त्रं व्यवहारमाणे ब्राह्मणे श्राद्धे भोजिते न विद्यते न भवतीत्यर्थः ॥

[3] श्राद्धे प्रतिग्रहे वा विशिष्टा यथाशास्त्रमनुवर्तमाना यदि लभ्यन्ते तदा निमन्त्रितानपि निन्द्यान् परिहृत्य तानेव भोजयेत् न निमन्त्रितान् प्रत्याचक्षीत इति तु सत्पात्रपरम् निन्द्यांस्तु निमन्त्रितान् द्रविणदानादिना सन्तोषयेत् ॥

[4] समे स्वसदृशे हीने स्वापेक्षया गुणादिना न्यूने अदुष्टे पात्रे श्राद्धदानादौ प्रवृत्तिस्तेषामेवाशीर्दानात् पितरि सुखमित्यर्थः निषिद्धानां परं त्यागो नत्वादुष्टानां समहीनानामपीति भावः ॥

[1] Merit—successively an increase of merit—results in the acquisition of land &c., whether from an inferior, or an equal, or one more excellent than oneself, being virtuous. Acquisition is the reception of property or wealth from another. According to the author of the Vṛitti by the reception of property from another the taking of property by theft &c., is explained. In conformity with this is the text 'From a Śúdra on the seventh day, from a Vaiśya on the tenth, from a Kshatriya on the fifteenth, from a Bráhman in case of danger to life.' To save himself or his family when starving a man may steal the food of a Śúdra when he has been without food for seven days; when he has been without food for ten days, that of a Vaiśya; when he has been fifteen days without food, that of a Kshatriya. When his life is in danger stealing food from a Bráhman, tends not to demerit. U.

तथा विरुद्धानां त्यागः ॥ १३ ॥

Aph. 13. Likewise the making away with those who are contrary.

[2] Not only is the taking of others' property, when in danger of life, not forbidden, but in such circumstances those who do not give anything to take away, should even be put to death. And by all this there is no loss of merit, or manifestation of demerit. In such a case those who are contrary, those who act in the contrary manner, are to be put to death. Therefore it has been said: Let a man save himself when in despair by whatsoever deed fair or foul; when he is able let him practise righteousness. U.

हीने परे त्यागः ॥ १४ ॥

Aph. 14. Making away with another has reference to an inferior.

[3] If another who does not give anything to take away is inferior to oneself, he, the Śúdra &c., may be put to death. U.

[1] यथोत्तरं धर्म्मोत्कर्षः हीनादपि भूम्यादिप्रतिग्रहे समादपि स्वापेक्षया विशिष्टादपि धार्म्मिकात् धर्म्म इत्यर्थः परस्यादानं परस्मात् स्वस्य धनस्यादानं प्रतिग्रहः वृत्तिकारस्तु परस्वादानं चौर्य्यादिना परस्वग्रहणं व्याख्यातं तथा च श्रुतिः शूद्रात् सप्तमे वैश्याद्दशमे क्षत्रियात्पञ्चदशे ब्राह्मणात् प्राणसंशये इति क्षुधापीडितमात्मानं कुटुम्बं रक्षितुं सप्तदिनान्याहारमप्राप्य शूद्रभक्ष्यापहारः कार्य्यः एवं दशदिनान्याहारमप्राप्य वैश्यात् पञ्चदशदिनान्याहारमप्राप्य क्षत्रियात् प्राणसंशये ब्राह्मणात् भक्ष्यापहरणं न दोषायेत्याहुः ॥

[2] न केवलं प्राणसंशये परस्वादानं न निषिद्धं किन्तु तस्या दशायामपहर्त्तुं ये न प्रयच्छन्ति तेषां वधोऽपि कार्य्यो न तावता धर्म्महानिरधर्म्मप्रादुर्भावो वेत्याह तस्यां दशायां विरुद्धानां विपरीतमाचरतां त्यागो वधः कार्य्य इत्यर्थः तदुक्तम् कर्म्मणा येन केनापि मृदुना दारुणेन वा उद्धरेद्दीनमात्मानं समर्थो धर्म्ममाचरेत् इति ॥

[3] यदि स्वस्माद्धीनः परो भवति योऽपहर्त्तुं न ददाति तस्य शूद्रादेस्त्यागो वधः ॥

Digitized by Google

समे आत्मत्यागः परत्यागो वा ॥ १५ ॥

Aph. 15. In the case of an equal, suicide, or the destruction of the other.

[1] If the opposite party be one's equal—but only if a Bráhman—in such a case suicide—the destruction of oneself by fasting &c.—is to be committed. If there appear no means of preserving oneself or one's family, and the opposite party be an equal, he is to be made away with, or destroyed. U.

विशिष्टे आत्मत्याग इति ॥ १६ ॥

Aph. 16. In the case of a superior suicide [is to be committed.]

[2] In the case of an opposite party superior to oneself, distinguished by study of the Veda &c., suicide alone is lawful; though there be danger to life, a man may design only his own death, but must not slay a Bráhman. U.

SECOND DAILY LESSON.

दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्युदयाय ॥ १ ॥

Aph. 1. Of actions of which the motives are seen and unseen, a motive, where there is none seen, tends to exaltation.

[3] Actions where the motives are seen are agriculture, merchandise, service of the king, &c. Actions where the motives are unseen are sacrifice, charity, chastity, &c. Among these actions where a visible motive is not observed, an invisible motive is to be supposed, and such a motive conduces to exaltation, or knowledge of the truth. Or the dative case 'to exaltation' may be employed in the sense of the nominative, when the sense will be that exaltation is the result. An unseen result is a remote consequence. If this be produced by asceticism, the exaltation is presentation of soul; if by sacrifice, almsgiving &c., the exaltation is paradise. In this instance such actions as sacrificing, giving alms, practising chastity &c., do not immediately bear fruit, as such actions as milking, cooking &c., have immediate results, and such actions as sowing, ploughing &c., after a while bear fruit; for there is no such [immediate] result observed. Nor is gain &c., through being known as virtuous, the result. For those who practise secret chastity &c., do not design such results. The result therefore is the remotely future paradise &c., and this does not immediately suceed the action which rapidly ceases to exist. It results therefore that there is an intermediate common substratum of the action and the fruit, a remote consequence. U.

अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमन्त्रकालनियमाश्चादृष्टाय ॥ २ ॥

Aph. 2. Inaugurations, fasting, continence, residence in the family of a spiritual guide, life in the forest, sacrifice, almsgiving, oblation, the cardinal points, constellations, sacred texts, seasons, and religious observances, conduce to invisible result.

[1] Of these, some of the actions of which the result is unseen, are pointed out. These actions conduce to, that is produce, unseen results. Among these inauguration is the sprinkling of kings; fasting, the abstinence of the Śiva-rátrí; continence, the avoidance of sexual intercourse; residence in the house of a spiritual guide that of religious students for the purpose of studying the Veda; living in the forest, the actions of those who set out at the close of life for the forest; sacrifice, the Râja-sûya &c.; almsgiving, at the beginning of the month Áshâḍha; oblation, of rice, cattle &c.; the cardinal points, eating towards the east &c.; constellations, the obsequial rites of [the tenth lunar asterism] Maghá &c.; sacred texts, the holy monosyllable [Om,] the Gáyatrí &c.; seasons, the Cháturmásya rites &c.; religious observances, purifications, contentment, penance, study, and meditation on the Deity. By the word 'and,' are to be understood also those not here enumerated, but which are prescribed by revelation and tradition. V.

चातुराश्रम्यमुपधा अनुपधाश्च ॥ ३ ॥

Aph. 3. The duty of the four periods of religious life [has been declared.] Fidelities and infidelities [are causes of merit and demerit.]

---

[1] यदि स्वसदृशो ब्राह्मण एव विरोधी भवति तदात्मन एवोपवासादिना त्यागोऽवसादः कर्त्तव्यः यदि स्वस्य कुटुम्बस्य वा रक्षाप्रकारो न दृश्यते विरोधी च समो भवति तदा तस्यैव त्यागो वध इत्यर्थः ॥

[2] स्वापेक्षया विशिष्टे वेदाध्ययनादिना उत्कृष्टे विरोधिनि आत्मन एव त्यागो विधेयः प्राणसंशये सत्यप्यात्मानमेवाभिप्रेयात् न तु ब्राह्मणं हन्यादित्यर्थः ॥

[3] दृष्टप्रयोजनानि कृषिवाणिज्यराज्यसेवादीनि अदृष्टप्रयोजनानि यागदानब्रह्मचर्यादीनि एतेषां कर्मणां मध्ये यत्र दृष्टं प्रयोजनं नोपलभ्यते तत्रादृष्टं प्रयोजनं कल्पनीयम् तच्चाभ्युदयाय तत्त्वज्ञानाय यद्वा अभ्युदयायेति चतुर्थी प्रथमार्थे तेन फलमभ्युदय इत्यर्थः अदृष्टं फलमपूर्व्वमेव तद् यदि योगजं तदाऽभ्युदय आत्मसाक्षात्कारः यदि यागदानादिजं तदाऽभ्युदयः स्वर्गः तत्रापि यथा दोग्धि पचतीत्यादिक्रिया सद्यःफलिका वपति कर्षतीत्यादिक्रिया च विलम्बभाविफला तथा यजति ददाति ब्रह्मचर्य्यं चरतीत्यादिक्रिया तावत् सद्यःफलिका न भवति तादृशस्य फलस्यानुपलब्धेः न च धार्मिकतया ख्यानाल्लाभादिकमेव फलम् प्रच्छन्नं ब्रह्मचर्यादि चरतां तत्फलानुद्देशात् तस्माच्चिरभाविस्वर्गादिकमेव फलं तच्चाशुतरविनाशिन्याः क्रियाया न साक्षादित्यान्तरालिकं क्रियाफलयोः समानाधिकरणम् पूर्व्वं पर्य्यवस्यति ॥

[1] तत्रादृष्टफलकानि कानिचित्कर्म्माणि प्रदर्शयति एतानि कर्म्माणि अदृष्टाय अदृष्टजनकानि तत्र अभिषेचनमभिषेको राज्ञाम् उपवासः शिवरात्र्युपवासादिः ब्रह्मचर्यमष्टविधमैथुनादिवर्ज्जनम् गुरुकुलवासो ब्रह्मचारिणां वेदाध्ययनार्थः वानप्रस्थं वयःशेषे वनप्रस्थितानां पुटपाकादिकर्म्म यज्ञो राजसूयादिः दानमाषाढ्यादौ प्रोक्षणं व्रीहिपश्वादीनाम् दिक्प्राङ्मुखभोजनादि नक्षत्रं मघाश्राद्धादि मन्त्रः प्रणवगायत्र्यादिजपः कालः चातुर्मास्यव्रतादिः नियमाः शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि चकारादनुक्तानि श्रौतस्मार्त्तान्यपि ॥

Digitized by Google

[1] The duty of the four periods of religious life is the conduct prescribed in these four stages, viz., those of the religious student, householder, hermit, and mendicant. This has been already declared :—such are the words to be supplied. Infidelities are defects of faith ; fidelities non-deficiencies of faith, efficient causes of merit and demerit. V.

भावदोष उपधा ऽदोषो ऽनुपधा ॥ ४ ॥

Aph. 4. A deficiency of faith is an infidelity ; a non-deficiency a fidelity.

[2] Deficiencies of faith, lust, anger, covetousness, infatuation, intoxication, envy &c., are expressed by the term infidelity ; non-deficiencies of faith, freedom from negligence and sloth, tranquillity of mind &c., are to be understood by the term fidelity. V.

यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितञ्च तच्छुचि ॥ ५ ॥

Aph. 5. That which is of prescribed colour, taste, smell, and touch, the aspersed, and the sprinkled, are pure.

[3] That colour &c, which is enjoined by revelation and tradition is prescribed. The substance to which such [colour &c.] belongs is such [is pure.] Of these colour [is prescribed] in such texts as, He buys the soma for a cow, ruddy, one year old, with tawny eyes ; He should take a white goat. The aspersed is sprinkled with water during the recitation of a sacred text ; the sprinkled, that which is sprinkled with water without a sacred text. The word 'and' implies that which is lawfully acquired. This is such as is denoted by such precepts as that a Bráhman should acquire wealth by performing sacrifices, by teaching, and by receiving presents. U.

अशुचीति शुचिप्रतिषेधः ॥ ६ ॥

Aph. 6. 'Impure' denotes the negation of the pure.

[4] The contrary of such substance as is pure is impure. A substance of wrong colour, taste, smell, or touch, one not aspersed or sprinkled, or sprinkled with forbidden water, or unlawfully acquired, as the property of a Bráhman acquired by agriculture or merchandise, is impure. U.

अर्थान्तरञ्च ॥ ७ ॥

Aph. 7. And something else.

[1] That which is vitiated by speech or by disposition even in that which is of excellent colour, taste, smell, or touch, or in that which is aspersed or sprinkled, or justly acquired, is also impure. U.

अयतस्य शुचिभोजनादभ्युदयो न विद्यते नियमाभावात् विद्यते वा ऽर्थान्तरत्वाद्यमस्य ॥ ८ ॥

Aph. 8. To the unrestrained there accrues no exaltation from eating what is pure, inasmuch as there is an absence of religious observance ; or it accrues, because restraint is something else.

[2] 'To the unrestrained' means to one deficient in restraint, or wanting in self-control. The eating of one void of the restraint denoted by such a rule as, A man should eat after washing his hands and feet, and rinsing his mouth, restrained in speech : when food is presented to him, though pure, he should twice rinse his mouth, does not tend to exaltation, but to sin. It may be asked why: the answer accordingly is furnished. 'Inasmuch as there is an absence of religious observance,' in consequence of the non-existence of the religious observance, the secondary cause. That which takes place where the observance is performed is stated. 'Or it accrues,' —exaltation accures only in the case of eating with the accompaniment of the prescribed restraint. It may be asked why: hence it is stated that it is because restraint is something else, that is, is something other than eating. The sense, therefore, is that without the accessory cause there is no realisation of the result, and that with it there is. U.

असति चाभावात् ॥ ९ ॥

Aph. 9. For there is non-existence [of exaltation] where [the eating of pure food] does not exist.

[3] Though there be restraint, where the eating of pure food is not, there is non-existence of exaltation :—such is the completion of the ellipse. Restraint and eating are therefore both causes of merit. The word eating implies other notions. Restraint and religious observance are accessories also of sacrifice, almsgiving, ablutions, oblations and other acts prescribed by revelation and tradition. U. A. E. G.

(To be continued.)

[1] ब्रह्मचारिगृहिवानप्रस्थभिक्षुरूपेषु चतुर्षु आश्रमेषु विहितं यत्कर्म्म तत् चातुराश्रम्यं पूर्वमुक्तमिति शेषः उपधा भावदोषाः अनुपधा भावदोषाभाव धर्म्माधर्म्मसाधनानीत्यर्थः ॥

[2] कामक्रोधलोभमोहमदमात्सर्य्यादयो भावदोषा उपधाशब्दवाच्याः श्रद्धाऽप्रमादानालस्यमनःप्रसादादयोऽदोषा अनुपधाशब्दवाच्या इत्यर्थः ॥

[3] इष्टं श्रुत्या स्मृत्या च यद्रूपादिकं विहितं यस्य द्रव्यस्य तत्तथा तत्र रूपं अरुणया एकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति श्वेतं छागलमालभेत इत्यादौ प्रोक्षितं मन्त्रेणोदकसिक्तम् अभ्युक्षितं विनामन्त्रमुदकसिक्तं च काराच्यायतो लब्धं तच्च याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिनियमविधिबोधितम् ॥

[4] यद्द्रव्यं शुचि तद्विपरीतमशुचीत्यर्थः अप्रशस्तरूपरसगन्धस्पर्शमन्त्रप्रोक्षितमनभ्युक्षितं निषिद्धजलाभ्युक्षितं वा अन्यायागतम् कृषिवाणिज्यागतं ब्राह्मणस्य द्रव्यमशुचीत्यर्थः ॥

[1] अप्रशस्तरूपरसगन्धस्पर्शमपि प्रोक्षितमभ्युक्षितं न्यायार्जितञ्च यत्रापि वाग्दुष्टं भावदुष्टञ्च यत्तदप्यशुचीत्यर्थः ॥

[2] अयतस्य यमरहितस्यासंयतस्येति यावत् हस्तौ पादौ प्रक्षाल्याचम्य वाग्यतो भुञ्जीत भोक्ष्यमाणः प्रयतोऽपि द्विराचामेत् इत्यादिबोधितयमरहितस्य भोजनं नाभ्युदयाय किन्तु पापाय कुत एवमित्यत आह । नियमाभावात् नियमस्य सहकारिणोऽभावात् नियमे सति यत्तदाह विद्यते वा यथोक्तयमसाहित्येन भोजने भवत्येवाभ्युदयः कुत इत्यत आह । अर्थान्तरत्वाद्यमस्य भोजनादर्थान्तरं यतो यमः तथा च सहकारिकारणं विना न फलसिद्धिस्तस्मिन् सति फलसिद्धिरित्यर्थः ॥

[3] यमे सत्यपि शुचिभोजनेऽसति अभावादभ्युदयस्येति शेषः तथा च यमो भोजनञ्च द्वयमेव पुण्यकारणमित्यर्थः भोजनमित्युपलक्षणं यागदानहोमादीनामपि श्रौतस्मार्तकर्मणां यमनियमौ सहकारिणौ ॥

Digitized by Google

TO THE EDITOR OF THE 'PANDIT.'

SIR,

'Bless them that curse thee'—this divine precept is still believed by thousands of educated Christians and even perhaps by some of my own countrymen to have been first taught by Jesus Christ. There may possibly be some even among the readers of your valuable Journal labouring under this delusion, for the removal of which it seems worth while to give prominence to the following verse from Manu :—

न क्रुध्यन्तं प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् । Chap. VI, Śl. 48.

Though the verse is not new to European Sanskritists it has not, I believe, been carefully compared with the above Biblical teaching, nor their striking correspondence noticed. Sir William Jones, for instance, renders the latter clause thus wrongly—'Abused, let him speak mildly.' Now, there are two distinct words of the same orthography—कुशल, the one, an adjective, meaning 'skilful,' and the other, a substantive, signifying 'blessing.' The word, as used here, is doubtlessly not the adjective, but the substantive, which can neither be used adverbially nor rendered 'mildly.' The phrase कुशलं वदेत् is, in fact, equivalent to आशिषं वदेत् or आशीर्व्वादं कुर्य्यात् (He shall utter a benediction.) Further I should think that the English word 'curse' is a corrupted, or cognate form, as European philologists would call it, of the Sanskrit root क्रुश् from which the participle आक्रुष्ट is formed. Hence the clause in question ought to be translated—'When cursed, he shall utter a blessing, or *benediction, towards the offender*. So strong is the belief of zealous Missionaries that meekness and forgiveness are exclusively Christian, that one can not persist too much in controverting it, and the following quotation from the Mahábhárata may scarcely be deemed a tautology :—

अतिवादं न प्रवदेन्न वादयेत्
यो नाहतः प्रतिहन्यान्न घातयेत् ।
हन्तुं च यो नेच्छति पापकं वै
तस्मै देवाः स्पृहयन्त्यागताय ॥ (Udyoga parva, Chap. 26, Śl. 11.)

"He who does not speak, nor incites another to speak reproachful words, who, when struck, strikes not in return nor incites another to strike, who wishes not *in his mind* to strike the evil-doer—the gods long for the advent of such *a man*."

Professor Max Müller does not venture to give the Bráhmans the credit of a full perception of that fundamental maxim of morality.—'Do ye unto others as ye would that others should do to you.' He says—"The Bráhmans too had *a distant* perception of the same truth which is expressed, for instance, in the Hitopadeśa in the following words:—'Good people show mercy unto all beings, considering how like they are to themselves." *Chips from a German Workshop, Vol. I, p.* 312. I should therefore call the Professor's attention to the following from the Mahábhárata.

श्रूयतां धर्म्मसर्व्वस्वं श्रुत्वा चाप्यवधार्य्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥*

'Hear the sum-total of duties and having heard, bear it in mind—' Thou shalt (lit. he shall) not do to others what is disagreeable to thyself.'

It has the advantage of brevity over the Biblical sentence, expressing at the same time the entire sense though in the negative form.

How cheeringly, it may be remarked *en passant* does this sublime tone of ancient Indian morality harmonize with the equally sublime impartiality and unselfishness of a distinguished Indian of the present day who encourages his dear countrymen to emulate the virtues of the noble races of Europe in the following manner :—(I quote from memory.)

'As long as light will differ from darkness, so long will the European differ from the Native.'

Methinks I hear an echo answering in a sigh—As long as light will differ from darkness, so long will the European differ from the Native—*when such is the patriotism that animates our breasts !*

In the spirit of veneration peculiar to the Hindoos, our ancient Law-givers have represented the king as an incarnation of the *Lokapálas*, but the remarkable stanza which concludes this letter refutes the common notion that the sages meant to enjoin a slavish toleration of his tyranny or adoration of him as a divinity, though he act the devil :

अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥

Mahábhárata, Anuśásana parva,
Dána-dharma, chap. 61.

"Having declared 'I am your preserver,' that Monarch who does not preserve *his people*—let him be conspired against and killed like a dog, diseased and mad."

Loyalty indeed to such a sovereign as Victoria, I can truly say, notwithstanding the shortcomings of British rule in India, is a sacred duty enjoined on us by our very religion.

Yours Obediently,

BENARES : }
31st January, 1871. } PRAMADA'DA'SA MITTRA.

* A similar verse was translated by me in the 'Pandit,' No. 19.

NOW READY.

Vols. I. and II.

THE RA'MA'YAN OF VA'LMI'KI,

TRANSLATED INTO ENGLISH VERSE

BY

R. T. H. GRIFFITH, M. A.

Price per Vol. Rs. 6. Postage 6 anas.

BENARES : MESSRS. E. J. LAZARUS & Co.,
CALCUTTA : MESSRS. BERIGNY & Co.,
LONDON : MESSRS. TRÜBNER & Co.,

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 58. Benares, March 1st, 1871. Vol. V.

॥ भाट्टचिन्तामणेस्तर्कपादः ॥

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

इदानीं प्रत्यक्षस्य धर्मप्रामाण्यनिराकरणाय प्रत्यक्षलक्षणमुक्तं सूत्रकारेण । न तावदिन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति लक्षणम् । ज्ञानमात्रस्य मनोजन्यत्वात् । अत इन्द्रियार्थसंबन्धजन्यं ज्ञानं प्रत्यक्षमिति सूत्रकारः । न चेश्वरप्रत्यक्षे ऽव्याप्तिः । ईश्वरज्ञानस्यानुमितिविलक्षणत्ववत् प्रत्यक्षविलक्षणत्वादिति जीर्णाः ॥ यद्वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमित्युपमितिशाब्दबोधार्थापत्तिस्मृतीनां ज्ञानकरणकत्वात् । न च सविकल्पकप्रत्यक्षे विशिष्टवैशिष्ट्यप्रत्यक्षे चाव्याप्तिः, तयोर्निर्विकल्पकादिज्ञानकरणकत्वादिति वाच्यम् । व्यापारवदसाधारणकारणस्य करणतया तज्जन्यत्वे सति तज्जन्यजनकस्य व्यापारतया च निर्विकल्पकादेः कारणत्वे ऽप्यकरणत्वात् । जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं वा । सर्वत्र प्रत्यक्षे इन्द्रियस्य करणत्वात् तत्संबन्धस्य व्यापारत्वाच्च तादृशानामनुमितित्वादीनां प्रत्यक्षे ऽभावाल्लक्षणसंगतिः । सविकल्पकत्वादिकं तु न जातिः । इन्द्रियत्वं च संबद्धार्थविशदावभासकत्वम्, अपरोक्षज्ञानजनकद्रव्यत्वं वा ज्ञानानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं वा ॥ तच्च षड्विधम् । घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोभेदात् । तत्राद्यानि चत्वारि गन्धरसरूपस्पर्शमात्राभिव्यञ्जकतया गन्धादिमत्त्वानुमानेन पृथिव्यप्तेजोवायुप्रकृतीनि । श्रोत्रमपि शब्दमात्रग्राहकतया शब्दवत्त्वानुमानेनाकाशात्मकमित्यक्षपादीयाः ॥ अधिगुप्रेषान्तर्गतदिशःश्रोत्रमिति लिङ्गाद्दिगात्मकत्वं युक्तम् । मनसि च सुखीति प्रत्यक्षमिन्द्रियजन्यं, प्रत्यक्षत्वा,दित्यनुमानं प्रमाणम् ॥ अन्ये तु सुखादीनां नित्यद्रव्यविशेषगुणत्वेन द्रव्यान्तरसंयोगासमवायिकारणकत्वे सिद्धे तादृशसंयोगाश्रयतया मनःसिद्धिरित्याहुः ॥ तन्न । शरीरसंयोगेन सिद्धसाधनादर्थान्तरत्वाच्च । तच्चान्तरिन्द्रियं स्वातन्त्र्येणात्मतद्योग्यगुणतद्गतजातिमात्रग्राहकं, बाह्यविषयेषु तस्य स्वातन्त्र्याभावात् । कुतो न स्वातन्त्र्यमिति चेन्न । तस्याणुपरिमाणस्य देहाद्बहिर्भावाभावेन सन्निकर्षासंभवाद्युगपज्ज्ञानानुत्पत्तिश्च मनसोऽणुत्वे प्रमाणम् । येपि तस्य विभुत्वमाहुस्तेषामपि देहावच्छिन्नस्येन्द्रियत्वादस्वातन्त्र्याक्षतिः, युगपज्ज्ञानोत्पत्तिरिष्टैव । सन्निकर्षश्च संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायश्चेति । द्रव्यं संयोगेन, तद्गतगुणकर्मजातयो द्वितीयेन, गुणकर्मगतजातयस्तृतीयेन । के चित्तु समवायरूपप्रत्यासत्त्या द्रव्यगुणकर्मसामान्यगता सत्ता गृह्यते । सत्ता च तत्कालसंबन्ध इति तस्य जातिगतत्वं नानुपपन्नमित्याहुः, तेषां भावं नाकलयामः । शब्दस्य च द्रव्यत्वात्तत्रापि संयोग एव संबन्धः । ननु बाह्येन्द्रियग्राह्यतया शब्दे गुणत्वमिति चेत् । न । वायौ रूपत्वादिसामान्ये च व्यभिचारात् । प्रत्यक्षद्रव्यगुणत्वाभावविशिष्टप्रत्यक्षेण गुणत्वाभावानुमानाच्च । तत्रापि कर्मवेगवत्त्वेन द्रव्यत्वानुमानम् । न च तथापि शब्दे श्रोत्रसंयोगासंभवः, तस्य सर्वत्रोपलम्भेन विभुतया दिगात्मकश्रोत्रस्यापि विभुतया संयोगासमवायिकारणकर्माभावादिति वाच्यम् । न तावत्संयोगत्वावच्छिन्नं प्रति कर्मणो जनकता, संयोगजसंयोगे व्यभिचारात् । किं तु विजातीयसंयोगे, तत्र वैजात्यकल्पनमपेक्ष्य

Digitized by Google

जन्यसंयोगे कर्मत्वेन कारणता युक्ता । संयोगजसंयोगानङ्गीकाराच्च न व्यभिचारः । विभुनी मिथः संयुक्ते, निरन्तरद्रव्यत्वाद्, घटाकाशवदित्यनुमानेन विभुसंयोगसिद्धेश्च ॥

तच्च प्रत्यक्षं निर्विकल्पकं सविकल्पकं चेति द्विधा । प्रकारताविशेष्यतादिविषयतारहितं ज्ञानं निर्विकल्पकं, तद्विशेषणविशेष्यभावानापन्नघटघटत्वादिविषयकम् । इन्द्रियसंयोगानन्तरमविविक्तसामान्यव्यक्तिभागस्य व्यक्तिमात्रगोचरज्ञानस्य जायमानत्वात् । तच्च प्रत्यक्षं, किं चिद्भासतइति प्रतीतेः, अश्वोप्ययं न तथा पूर्वं प्रतीत इति प्रतीतेश्चेति के चित् ॥ विशिष्टज्ञानरूपसविकल्पकस्य विशेषणज्ञानं विनोत्पत्त्यसंभवादनुमानगम्यमित्यन्ये ॥ विशेष्यविशेषणेन्द्रियसन्निकर्षस्य विशिष्टज्ञानहेतुतया विशेषणज्ञानस्य विशिष्टज्ञाने न हेतुत्वमिति के चित् ॥ तत्सिद्धं घटत्वनीलपीतादिनानाधर्मविषयकं निर्विकल्पकम् ॥ सविशेष्यकं सप्रकारकं ससंसर्गकं वा ज्ञानं सविकल्पकम् । तच्च जातिद्रव्यगुणक्रियानामविषयकतया पञ्चधा । चाक्षुषादिभेदेन षोढा च । तत्र प्रत्यक्षमात्रे महत्त्वं हेतुः । तच्च द्रव्यप्रत्यक्षे समवायेन, गुणक्रियाजातिप्रत्यक्षे समवायघटितसामानाधिकरण्येन, गुणक्रियागतजातिप्रत्यक्षे त्वेकार्थसमवायसमवायेन । चाक्षुषे चोद्भूतरूपमुद्भूतानभिभूतरूपालोकसंयोगश्च । कालादिचाक्षुषे महत्त्वोद्भूतरूपादीनां न हेतुतेति के चित् । स्पार्शने चोद्भूतस्पर्शः । न तु रूपमपि । तेन वायुरपि त्वाचप्रत्यक्षः । एवं च बहिरिन्द्रियजन्यप्रत्यक्षत्वं नोद्भूतरूपकार्यतावच्छेदकं, किं तु चाक्षुषत्वादिजातिरेवेति लाघवम् । मानसेपि महत्त्वं हेतुरिति के चित् । नेत्यन्ये ॥ केचित्तु क्रिया न प्रत्यक्षा, किं तु विभागोत्तरसंयोगाभ्यामनुमेया । अतस्तत्प्रत्यक्षे महत्त्वस्य न हेतुतेत्याहुः ॥

द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोन्धकाररूपाण्येकादश । गुणा रूपरसगन्धस्पर्शपरिमाणसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टबुद्धिसुखदुःखेच्छाद्वेषयत्ना इति विंशतिः । कर्म चलनात्मकमेकम् । सामान्यं परापररूपं द्विधा । समवायश्चैकः । शक्तिस्त्रिधा । सहजाऽऽधेया पदशक्तिश्चेति । अभावस्त्रिधा । ध्वंसोऽत्यन्ताभावो भेदश्चेति ॥ एवं च द्रव्यगुणकर्मसामान्यसमवायशक्त्यभावाः सप्त पदार्थाः ॥ संख्यापि गुणादिवृत्तित्वात्पदार्थान्तरमित्यन्ये ॥ गुणसमुदाय एव पृथिव्यादिद्रव्यं, नातिरिक्तमिति के चित् । तन्न । पृथिव्यादौ पाकादिना पूर्वरूपनाशस्योत्तररूपोत्पत्तेश्चानुभवसिद्धत्वात् ॥ अन्ये त्ववयवसमुदायमेवावयविनमाहुः । तदपि न । उत्पन्नः पटो विनष्टः पट इत्यादिप्रतीतेः । तेन पटो रूपवान् नीलश्चलति डित्थोऽयमिति सविकल्पकं सिद्धम् ॥

ननु नेयं प्रमा । अलीकघटत्वादिजातिविषयकत्वात् । तथाहि । न तावद्व्यक्तिभिन्ना जातिः प्रत्यक्षत उपलभ्यते । इह गवि गोत्वमिति प्रतीत्यभावात् । भिन्नापि सा सर्वगता व्यक्तिमात्रनिष्ठा वा । अन्तरालेनुपलब्धेर्नाद्यः, द्वितीयेपि नित्याया उत्पत्त्ययोगात् । अमूर्त्ताया व्यक्त्यन्तरादागमनासंभवाद् भविष्यति घटे सा न स्यात् । न चांशत आगमनं, निरवयवत्वात् । एवमेकस्यां व्यक्तौ कृत्स्नायामंशेन वा न वृत्तिः संभवतीत्यवगन्तव्यम् । अतो न व्यक्तितो भिन्ना जातिः संभवति । व्यक्त्यात्मकत्वं तु नित्यत्वानित्यत्वाभ्यां विरुद्धधर्माभ्यामपहस्तितं, भेदाभेदश्चात्यन्तविरुद्धः । एवं च स्वलक्षणरूपशुद्धविषयकमेव निर्विकल्पकं प्रमेति चार्वाकैकदेशिनः । तन्न । काणकूटाद्यसदृशगोव्यक्तिष्वेकाकारप्रत्ययानुपपत्तेः । किं च सामान्यस्यालीकत्वं वदता वस्तुत्वव्यापकभेदाभेदासंभवेन सामान्ये वस्तुत्वं निराक्रियते । सिद्धं तर्हि वस्तुत्वसामान्यम् । भेदाभेदाङ्गीकारेण च पूर्वोक्तप्रत्यक्षापादनादिनिरासः । इयं गौरिति पदयोर्भिन्नप्रवृत्तिनिमित्तकयोः सामानाधिकरण्येनानुवृत्तव्यावृत्ताकारबोधकत्वेन भेदाभेदसिद्धिः । किं च जातिव्यक्त्योः समवायसंबन्धाङ्गीकारेण चाभेदसिद्धिः । येन संबन्धेनाधेयमाधारस्य स्वानुरक्तबुद्धिजनकं स संबन्धः समवायः न त्वयुतसिद्धसंबन्धः सः । युतसिद्धेर्वक्तुमशक्यत्वात् । पृथक्चलनवत्त्वस्य वृक्षशाखयोः सत्त्वेन तयोः समवायसंबन्धो न स्यात् । अतो भेदाभेदः । एवमवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोरपि भेदाभेदोनुसंधेयः । तेन सिद्धं सामान्यं जातिरूपं, तद्बाधके तूपाधिरूपम् । सामान्यं च नित्यमेकमनेकानुगतम् । तद्बाधकानि च ।

व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ।
रूपहानिरसंबन्धो ह्यांशिकत्वमपीष्यते ॥

इति । एकव्यक्तिगतं न सामान्यम् । तुल्यव्यक्तिगतं न सामान्यद्वयम् । यथा घटत्वकलशत्वादि । परस्परात्यन्ताभावसमानाधिकरणमेकव्यक्तिवृत्ति न सामान्यं द्वयम् । यथा भूतत्वमूर्तत्वे । अनित्यं न सामान्यम् । यथा पृथुबुध्नोदराकारत्वम् । असमवेतं न सामान्यम् । यथाऽभावत्वादि । आंशिकं न सामान्यम् । यथोपेक्षात्वमिति दिक् । तत्राप्यांशिकत्वं संकरान्तर्गतम् । स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य जातिनिष्ठस्वस्वाभावोभयसामानाधिकरण्यकत्वस्य भेदाभेदगर्भस्य दूषकताबीजस्य तुल्यत्वादित्यस्तु प्रसक्तानुप्रसक्तम् । अतः सविकल्पकप्रमा सिद्धा ॥

अत्र निरालम्बनवादिनः । सर्वाणि बाह्यघटादिविषयकाणि सविकल्पकज्ञानानि मिथ्यार्थविषयकाणि, बाह्यार्थवि-

Digitized by Google

षयकज्ञानत्वात् । स्वप्नप्रत्ययवत् । स्वप्नज्ञानानां हि बाह्यघटाद्याकारेण परिणतं ज्ञानमेव विषयो न घटादि, तदानीमभावात् । मनःप्रत्यासत्त्यभावात् । स्वशिरश्छेदादीनामसंभवाच्च । अतस्तत्र ज्ञानरूपात्मैव विषयः । एवं सर्वज्ञानानामिति दृष्टान्तेन न किं चिदपि ज्ञानं प्रमेत्याहुः ॥ तन्न । स्वप्नप्रत्ययानामात्मविषयकत्वासिद्ध्या दृष्टान्तासिद्धेः । किं च नीलोऽयमित्यादिसविकल्पकानामात्मविषयकत्वे नीलोऽहमित्याकारत्वापत्तिः । अत इदं बाह्यविषयकम् । बाधकाभावेन प्रमैवेति ॥

शून्यवादी तु न ज्ञानातिरिक्तो बाह्यो विषयोऽस्ति, ज्ञानस्यैवाकारो विषयो ज्ञानस्वरूपात्मक एव, स्वप्नज्ञानवत्, तेन सविकल्पकं न प्रमा । तथाहि । नीलादेः किं ज्ञानविषयत्वम् । न तावत्पदार्थत्वं सत्तावत्त्वं वा । नीलज्ञाने पीतादेरपि विषयत्वप्रसङ्गात् । न ज्ञानहेतुत्वम्, इन्द्रियादेरपि तत्त्वप्रसङ्गात् । नापि ज्ञानजनकसन्निकर्षाश्रयत्वम् । रूपज्ञाने स्पर्शस्य विषयत्वापत्तेः । नापि सादृश्यविशिष्टहेतुत्वं, विशेषणज्ञानस्य ज्ञानत्वेन सादृश्याद्धेतुत्वाच्च विशिष्टज्ञाने विषयत्वप्रसङ्गात् । न चात्यन्तसादृश्यं विवक्षितं, तच्च न ज्ञानत्वेन, तस्य साधारणत्वात् । किं त्वेकज्ञानविषयत्वेन । तच्च त्रिपुटीप्रत्यक्षाङ्गीकारेण ज्ञाननीलयोरेकज्ञानविषयत्वाद्धेतुत्वाच्चोपपन्नं विषयत्वमिति वाच्यम् । धारावाहिकज्ञानेषु पूर्वज्ञानस्य सादृश्येनोत्तरज्ञाने विषयत्वापत्तेः । ज्ञानस्य स्वस्मिन्स्वस्य हेतुत्वासंभवेन विषयत्वानुपपत्तेः । न च ज्ञाने नीलाद्याकारतासमर्पकत्वे सति हेतुत्वम्, तच्च जपाकुसुमस्येव सन्निधिनेति वाच्यम् । विषयस्य नीलाद्याकारतासमर्पकत्वे मानाभावात् । ज्ञानवैचित्र्यं मानमिति चेत् । न । अर्थं विनापि स्वप्नज्ञानवैचित्र्यदर्शनात् । नापि ज्ञानजन्योपादानहानादिव्यवहारवत्त्वम् । घटज्ञाने घटत्र्यणुकानां विषयत्वापत्तेः । सुखादीनां स्वज्ञानाविषयत्वापत्तेश्च । न च सुखादिषु सुखीत्यादिशब्दप्रयोगो व्यवहार इति वाच्यम् । शब्दप्रयोगस्य ज्ञानविषयनिरूपकत्वाभावात् । ज्ञानविषयनिरूपणपूर्वकत्वेन शब्दप्रयोगस्य तेन विषयनिरूपणे इतरेतराश्रयापत्तिः । नापि ज्ञानजन्यज्ञाततावत्त्वं तत् । भूतभविष्यतोस्तदसंभवात् । तत्र मानाभावाच्च । अतो ज्ञानात्मकमेव तत् । किं च विषयो ज्ञानात्मको, ज्ञानेन सहोपलभ्यमानत्वात्, ज्ञानत्ववत् । सहानुपलभ्यमानयोर्घटपटयोर्भेददर्शनमनुकूलतर्कः । न च घटोऽयमिति ज्ञानस्य ज्ञानाविषयत्वेनासिद्धः सहोपलम्भ इति वाच्यम् । उत्तरकालं ज्ञातो घट इति ज्ञानघटयोः स्मरणदर्शनेन पूर्वानुभवस्यावश्यकतया घटोऽयमिति ज्ञानस्य ज्ञानविषयकत्वकल्पनात् । स्वप्नादिज्ञानानां साकारत्वमिव सर्वेषां साकारत्वेन ज्ञानातिरिक्तविषयाभाव इति स्वमतं परिष्करोति ॥ तच्चिन्त्यम् । नीलादेर्ज्ञानात्मकत्वे ज्ञानस्य स्वविषयाकारत्वे मानाभावात् । उक्तानुमानस्याप्रयोजकत्वात् । समूहालम्बने सहोपलभ्यमानयोर्घटपटयोरभेदाभावेन व्यभिचाराच्च । किं च न ज्ञानात्मको विषयः । ज्ञानाभावविषयके ज्ञाने ज्ञानाभावस्य ज्ञानात्मकत्वासंभवात् । तदेवेदमिति स्थायित्वविषयके ज्ञाने स्थायित्वस्य क्षणिकज्ञानात्मकत्वासंभवात् । इदं नानाकारमिति चित्रबुद्धावनेकाकारस्यैकस्मिन्नसंभवाच्च । किं च विषयस्य ज्ञानात्मकत्वे ज्ञानस्यापरोक्षत्वनियमेनानुमितिविषयवह्न्यादेः परोक्षत्वानुपपत्तिः, किं चातीतकालसंबन्धानुमानविषयस्यातीतकालसंबन्धस्य वर्त्तमानज्ञानात्मकत्वानुपपत्तिः । न च तत्रातीतं ज्ञानमेव विषय इति वाच्यम् । अतीतत्वस्य ज्ञानाकारत्वासंभवात् । अतोऽवश्यं ज्ञानभिन्नो विषयो वाच्यः । तन्निष्ठविषयत्वं ज्ञानजन्यफलभागित्वं नित्यमतिरिक्तं वेत्युक्तं प्राक् । न च स्वप्नदृष्टान्तो युज्यते । तस्यापि बाह्यविषयत्वात् । तथाहि । स्वप्ने दिवसानुभूतदेशकालान्तरगताः शिरश्छेदादयो विषया अदृष्टोद्बोधितसंस्कारवशात्स्मर्यमाणा निद्रारूपदोषवशेनात्मनिष्ठतया भासन्ते । एवं चान्यसंबन्धित्वेनावगतानामन्यसंबन्धित्वेन भानं शुक्तिरजतज्ञानवत् । इयमेव चान्यथाख्यातिः । न च बाह्यविषयेषु मनसस्तदानीमसंबन्धात्कथं भानमिति वाच्यम् । ज्ञानलक्षणायाः प्रत्यासत्तेरङ्गीकारात् । प्रमुष्टतत्ताकस्मरणाङ्गीकाराद्वा न दोषः । अतः स्वप्नज्ञानानां बाह्यविषयत्वं सिद्धम् । तेनानुभूयमानानां बाह्यार्थानामपलापासंभवात्तद्विषयकज्ञाने न मिथ्यात्वं, किं तु दुष्टकारणजन्यं बाधितमिति ॥

गुरवस्तु शुक्तिरजतज्ञानादौ न संसर्गग्रहो मानाभावात् । किं तु स्मरणानुभवविषययो रजतत्वशुक्त्योरसंसर्गाग्रहमात्रं, नान्यथाख्यातिः । किं त्वसंसर्गाग्रहरूपेयमख्यातिः । एवं चासंसर्गाविषयकतत्प्रकारकज्ञानस्य प्रवृत्तौ व्यवहारे च हेतुत्वादतिलाघवमित्याहुः ॥ तन्न । असंसर्गाविषयकत्वरजतत्वप्रकारकत्वयोर्ज्ञानविशेषणयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कार्यकारणभावद्वयकल्पनागौरवात् । एवं सामान्यतः प्रवृत्तौ कार्यताज्ञानस्य हेतुत्वे यत्र कार्यताभ्रमात्प्रवृत्तिस्तत्रासंसर्गाविषयकत्वकार्यत्वप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पनम् । एवमप्रामाण्यज्ञानाभावविशिष्टकार्यत्वप्रकारकज्ञानस्य हेतुत्वेन यत्राप्रामाण्यग्रहो भ्रमरूपस्तत्राप्रमात्वात्संसर्गाविषयकत्वकार्यत्वप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पने

Digitized by Google

ऽतिगौरवापत्तिः । अतो ऽज्ञासंसर्गाग्रहस्य प्रवृत्तिव्यवहारादिहेतुत्वानुपपत्तेर्नाख्यातिसंभवः । तेनान्यथाख्यातिरूपरजतत्वविशिष्टज्ञानस्यैव ग्रहे प्रवृत्त्यादिहेतुता युक्तेति । न चैवं चैत्रो रजतज्ञानवान् । कार्यताज्ञानवत्त्वादिति ज्ञानान्मैत्रस्य प्रवृत्त्यापत्त्याभ्रान्तभ्रान्तिज्ञसंकरापत्तिरिति वाच्यम् । भ्रान्तिज्ञस्य बाधादेव प्रवृत्त्यभावोपपत्तेः । परकीयरजतत्वप्रकारकज्ञानज्ञानवतः क्षणविलम्बेन रजतत्वप्रकारकज्ञानादेव प्रवृत्त्यङ्गीकारात् । ज्ञानाविषयकज्ञानत्वेन प्रवृत्त्यङ्गीकाराद्वा न दोषः । यद्वा रजतविषयकप्रवृत्तित्वावच्छिन्नं प्रति रजतत्वप्रकारतानिरूपितरजतनिष्ठमुख्यविशेष्यताशालिज्ञानत्वेन हेतुत्वाच्च काप्यनुपपत्तिरिति । किं च सर्वत्र प्रवृत्तौ नासंसर्गाग्रहो हेतुः । सर्वदा प्रवृत्त्यापत्तेः । किं तु प्रमाजन्यप्रवृत्तौ तत्प्रकारकनिश्चयो हेतुः । भ्रमजन्य प्रवृत्तौ चासंसर्गाग्रह इति कार्यकारणभावद्वयकल्पनागौरवम् । मम तु सर्वत्र प्रवृत्तौ तत्प्रकारकनिश्चयत्वेनैव हेतुत्वमिति लाघवमिति दिक् ॥

तच्च सविकल्पकं द्विविधम् । लौकिकमलौकिकं च । उक्तसन्निकर्षजन्यमाद्यम् । सामान्यलक्षणाज्ञानलक्षणाजन्यं द्वितीयम् । सामान्यलक्षणा च सामान्यज्ञानं ज्ञायमानं सामान्यं वा । तेन संबन्धेनेन्द्रियसंबद्धानां तत्सामान्याश्रयव्यक्तीनां प्रत्यक्षम् । इदं चावश्यकम् । अन्यथा व्यवहारविषये घटे शक्तिग्रहे सर्वव्यक्तीनामप्रत्यक्षतया सर्वत्र शक्तिग्रहो न स्यात् ॥

गङ्गेशस्तु महानसीयधूमे व्याप्तिप्रत्यक्षे सति धूमत्वसामान्यलक्षणप्रत्यासत्त्या सकलधूमप्रत्यक्षानङ्गीकारे धूमो वह्निव्याप्यो न वेति संशयो न स्यात् । प्रसिद्धधूमे प्रत्यक्षेण व्याप्तिनिश्चयात् । अन्यस्य चाज्ञानात्संदेहानुपपत्तिः । किं च सुखार्थं कर्मणि प्रवृत्तिर्न स्यात्, सिद्धसुखेच्छाविरहात् । असिद्धस्य चाज्ञानात् । एवं सुखादाविच्छापि न स्यात् । किं च कपालेषु घटप्रागभावप्रत्यक्षं न स्यात् । प्राचीनघटानां प्रतियोगित्वानुपपत्त्या प्रागभावविशेषणीभूतस्य प्रतियोगिनो घटस्याज्ञानात् । एवं कपालाधिकरणको वर्त्तमानप्रागभावप्रतियोगी घट इति शाब्दबोधो ऽपि न स्यात् । अतः सामान्यलक्षणा ऽङ्गीकार्येति ॥

अत्र शिरोमणिः । प्रसिद्धधूमे तद्धूमत्वेन व्याप्तिनिश्चयेपि धूमत्वेन तन्निश्चयाभावाद् उक्तसंशयस्य नानुपपत्तिः । समानप्रकारकनिश्चयस्यैव संशयादिविरोधित्वात् । धूमत्वेन व्याप्तिनिश्चये संशयाभावस्येष्टत्वात् । एवमिच्छाप्रवृत्त्योरपि तत्प्रकारकनिश्चयहेतुकतया नानुपपत्तिः । विशिष्टज्ञाने विशेषणज्ञानस्य हेतुत्वानङ्गीकारेण विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वानङ्गीकारेण च नात्यन्ताभावप्रत्यक्षानुपपत्तिः । किं च प्रागभावसत्त्वेप्यत्र घटो भविष्यतीत्यत्र न घटप्रागभावप्रतीतिः किं तूत्पत्तिप्रागभावस्य । तस्याश्च कालसंबन्धरूपाया अप्रत्यक्षत्वात् तत्प्रतियोगिकप्रागभावस्य सुतरामप्रत्यक्षत्वात् तत्प्रतियोगिप्रत्यक्षार्थं का कथा सामान्यलक्षणायाः । तथाहि । भविष्यति भवितेत्यादौ उत्पत्तिर्धात्वर्थः । आख्यातार्थस्तदनुकूलव्यापारः, तेन वर्त्तमानकालोत्तरकालीनकपालाधिकरणकोत्पत्त्यनुकूलव्यापारवान् वर्त्तमानप्रागभावप्रतियोग्युत्पत्त्यनुकूलव्यापारवान् वा घट इति बोधः । उत्पत्त्याश्रय इति वा । एवं नङ्क्ष्यतीत्यत्र नाशो धात्वर्थः, वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं भविष्यत्त्वं प्रतियोगितासंबन्धेन धात्वर्थे ऽन्वेति । तेन वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिककपालाधिकरणकनाशप्रतियोगी घट इति बोधः । एवं चात्र वर्त्तमानोत्तरकालीनत्वं न प्रागभावेन तत्प्रतियोगिना घटेन वा नाशेन वा ऽन्वेति । तदन्वये परश्वो भविष्यति परश्वो नङ्क्ष्यति श्वो नङ्क्ष्यति श्वो भविष्यतीति प्रयोगापत्तिः । गृहाङ्गणमागमिष्यति देवदत्ते श्व उत्पत्स्यति गृहाङ्गणे भविष्यतीति प्रयोगापत्तिश्च । तेन वर्त्तमानोत्तरकालत्वस्य उत्पत्तावेवान्वय इति न तदर्थं सामान्यलक्षणापेक्षा । वस्तुतः प्रागभावे प्रमाणाभावात् सर्वमिदं गर्भस्रावगलितमिति । न च प्रागभावानङ्गीकारे उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः । शततन्तुकपटे द्वितन्तुकपटोत्पत्तिप्रसङ्गश्चेति वाच्यम् । तद्व्यक्तेरेव प्रतिबन्धकत्वाङ्गीकारात् । अक्लृप्तप्रागभावतद्धेतुत्वकल्पने गौरवात् ॥

केचित्तु प्रागभावो नाशश्च नाभावरूपः । किं त्वाद्यक्षणसंबन्धरूपोत्पत्तिपूर्वकालरूप एव प्रागभावः । एवं चरमक्षणसंबन्ध एव नाशः । तस्योत्तरकालमेव नाशादनित्यत्वम् । अत एव घटो भविष्यति नष्टो घट इति प्रतीतिः । नहि नाशोस्ति प्रागभावोस्तीति कश्चित्प्रत्येति । अतो नाशप्रागभावौ न स्त इति वदन्ति ॥

वस्तुतः सिद्धसुखविषयकप्रवृत्त्यभावादसिद्धसुखज्ञानार्थमरण्यस्थदण्डादौ प्रवृत्तिजनकघटहेतुताग्रहार्थं शक्तिग्रहार्थं च सामान्यलक्षणावश्यकीति युक्तम् ॥

एवं ज्ञानलक्षणानङ्गीकारे ज्ञातस्य सुरभिचन्दनखण्डस्य चक्षुषा सुरभि चन्दनमिति ज्ञानं न स्यात् । सौरभांशे सौरभत्वांशे वा प्रत्यासत्तेरभावात् । अतस्तत्र तज्ज्ञानमेव प्रत्यासत्तिः ॥

न्यायविदस्तु योगजधर्मप्रत्यासत्तिं तृतीयामाहुः ॥ तद्योगिषु मानाभावेनासुंदरम् । न चेतिहासपुराणादि मानम्, तस्यान्यतात्पर्यकत्वादिति दिक् ॥

Digitized by Google

इति गागाभट्टकृते भाट्टचिन्तामणौ प्रत्यक्षपरिच्छेदः ॥

अनुमानं तु

"ज्ञातसंबन्धस्यैकदेशदर्शनाद्देशान्तरे ऽसन्निकृष्टे बुद्धिः"

इति सूत्रेणोक्तम् । सामान्यरूपेण ज्ञातव्याप्तिकस्य व्यक्तिविशेषदर्शनजन्यं संदिग्धसाध्यवदधिकरणकमसन्निकृष्टसाध्यविषयकं निश्चयरूपं ज्ञानमनुमितिरित्यर्थः। व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयजन्यं ज्ञानमनुमितिरित्यर्थः । न चैवं पदज्ञन्यपदार्थस्मरणवद्व्याप्यज्ञानेन व्यापकस्मृतिरिति वाच्यम् । व्यापकवत्पक्षस्यानुभवाभावेन व्यापकवत्पक्षस्मृतित्वासंभवात्। न चांशे उपेक्षात्वानुपेक्षात्ववद् आंशिकं स्मृतित्वानुभवत्वमिति वाच्यम्। उपेक्षात्वानुपेक्षात्वयोरविरुद्धयोर्धर्मयोरेकानुभववृत्तित्वेपि विरुद्धयोः स्मृतित्वानुभवत्वयोरेकज्ञानवृत्तित्वासंभवात् । अत एव चाक्षुषत्वमानसत्वयोर्विरोधेन वह्न्यंशे मानसत्वमपास्तम् । बहिर्विषये तस्यास्वातन्त्र्यात् पक्षचाक्षुषसामग्र्याः प्रतिबन्धकत्वाच्च । न च तथापि व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयजन्ये तदनुव्यवसाये तद्विशिष्टवैशिष्ट्यप्रत्यक्षे तत्सदृशज्ञानजन्यानुमितौ विशिष्टशाब्दबोधे तत्स्मरणे चातिव्याप्तिरिति वाच्यम् । तादृशनिश्चयत्वेन हेतुत्वस्य विवक्षणात् । उक्तस्थलेषु अनुव्यवसाये विषयत्वेन विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनोपमितौ सादृश्यज्ञानत्वेन शाब्दबोधे चावान्तरवाक्यार्थज्ञानत्वेन स्मृतावनुभवत्वेन हेतुत्वात् । एवं भ्रमसंशयोत्तरप्रत्यक्षे विशेषदर्शनस्य भ्रमादिविरोधित्वेन हेतुत्वाद्भ्रमसंशयोत्तरैककोटिकप्रत्यक्षत्वस्यार्थसमाजसिद्धतया विशेषदर्शनजन्यत्वानङ्गीकाराद्वा नातिव्याप्तिः । न चान्वयव्यतिरेकव्याप्त्योरननुगमेनैकोपादाने ऽपरत्राव्याप्तिरिति वाच्यम् । व्यभिचारज्ञानविरोधिज्ञानविषयत्वेन व्याप्तिज्ञानस्यानुगमात् । तेन व्यभिचारधीविरोधिधीविषयतावच्छेदकधर्मप्रकारकपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति तु फलितम् ॥ नैयायिकास्तु लाघवाद् व्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति वदन्ति । तत्परामर्शवादे निराकरिष्यते । यद्वा अनुमितित्वजातिमती अनुमितिः । अनुमितित्वजातिस्तु अनुमिनोमीत्यनुभवसिद्धा । तत्करणमनुमानं, तच्च भूतभाविलिङ्गेनानुमित्यनुत्पत्त्यापत्तेर्ज्ञानमेव, न तु ज्ञायमानो हेतुः ॥

अथ केयं व्याप्तिः ॥ अत्र गौडमैथिलसर्वस्वम् । साध्यवदन्यावृत्तित्वं व्याप्तिः । वह्निमन्महानसान्यह्रदावृत्तित्वाद् धूमे लक्षणसमन्वयः । धूमवन्महानसान्यायोगोलकवृत्तित्वाद् धूमवान् वह्नेरित्यसद्धेतौ च नातिव्याप्तिः । अत्र साध्यतावच्छेदकसंबन्धेन साध्यवान् बोध्यः । तेन समवायेन वह्निमद्वह्न्यवयवान्यमहानसवृत्तित्वेपि धूमस्य नाव्याप्तिः । साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः । तेन यत्किंचिद्वह्निमदन्यवृत्तित्वेपि धूमस्य नाव्याप्तिः । वृत्तित्वाभावश्च वृत्तित्वत्वावच्छिन्नप्रतियोगिताकः । तेन धूमवदन्यजलावृत्तित्वेपि वह्नौ नातिव्याप्तिः । न चैवमीदृशव्याप्तिज्ञानस्य केवलान्वयिन्यसंभवात्कथमनुमितिरिति वाच्यम् । इष्टापत्तेः । केवलान्वयिव्यतिरेकिहेत्वोः पञ्चरूपोपपन्नत्वाभावेनानुमापकत्वाभावात् । एवं च केवलान्वयिव्यतिरेक्यनुमानमेव नेति ॥ यद्वा हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः । अत्र प्रसिद्धानुमाने घटाभावमादाय लक्षणसमन्वयः । व्यभिचारिण्ययोगोलकवृत्तिधूमाभावमादाय नातिव्याप्तिः । अत एव महानसीयवह्न्यभावं वह्निघटोभयाभावं वादाय नाव्याप्तिः । तत्र महानसीयवह्नित्वस्य च प्रतियोगितावच्छेदकत्वेन वह्नित्वस्य प्रतियोगितानवच्छेदकत्वात् । दण्डिमान् दण्डसंयोगादित्यादौ रूपत्वव्याप्यजातिमत्त्वान् पृथिवीत्वादित्यादौ च स्वाश्रयसंयुक्तत्वादिसंबन्धेन दण्डत्वादिकमेव साध्यतावच्छेदकम् । तस्य प्रतियोगितानवच्छेदकत्वान्नाव्याप्तिः । हेत्वधिकरणं च तदवच्छेदकसंबन्धेन हेतुतावच्छेदकविशिष्टाधिकरणं च बोध्यम् । तेन वह्निमान् धूमादित्यादौ समवायेन धूमावयववृत्त्यभावप्रतियोगितावच्छेदकत्वेपि वह्नित्वस्य द्रव्यं विशिष्टसत्त्वादित्यादौ च शुद्धसत्त्वाधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि द्रव्यत्वस्य नाव्याप्तिः । अभावश्च हेत्वधिकरणावच्छेदेन प्रतियोग्यव्यधिकरणः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणश्च बोध्यः । तेन संयोगी द्रव्यत्वात्कपिसंयोगी एतत्त्वादित्यादौ नाव्याप्तिः । न वा संयोगी सत्त्वाद्विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्तिः। प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसंबन्धेन, तेन ज्ञानवान्सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेपि न क्षतिः । ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्य चिदनधिकरणत्वं तत्सामान्यस्य यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् । आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः । कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि कपिसंयोगो भवति तदनधिकरणं च वृक्ष इति। द्वितीये प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । सर्वस्यैवाभावस्य पूर्वक्षणावृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । न च वह्निमान् धूमादित्यादौ घटाभावादेः स्वात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसंबन्धेन

Digitized by Google

तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणत्वाप्रसिद्धिरिति वाच्यम् । घटाभावे यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादिरिति क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् । यदि तु घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः । तत्र साध्यतावच्छेदकसंबन्धः स्वरूपसंबन्धस्तेन संबन्धेन सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति । तृतीये तु कपिसंयोगाभाववानात्मत्वादित्यादौ अव्याप्तिः । आत्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य च गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति चेत् । मैवम् । यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामभावानां साध्यतावच्छेदकसंबन्धेन कालिकविशेषणत्वेन प्रतियोग्यधिकरणत्वसत्त्वात् । अत्र के चित् । महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः । महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात् । महाकाले महाकालभेदाभावात् । यद्वा प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वयत्संबन्धावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं व्यापकसामानाधिकरण्यं च व्याप्तिः । अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायानधिकरणान्तं हेत्वधिकरणविशेषणम् । यद्वा हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वावच्छिन्नवृत्तित्वं व्याप्तिः, अन्योन्याभावस्य व्याप्यवृत्तित्वादत्र न प्रतियोगिव्यधिकरणत्वादिनिवेश इति लाघवमिति जीर्णाः ॥ तस्याप्यव्याप्यवृत्तित्वात्तथैव प्रतीतेरस्त्येव तद्विवक्षेति नव्याः ॥ अत्राचार्याः । व्यापकसामानाधिकरण्यं न व्याप्तिः । किं तु व्यापकसंबन्धमात्रम् । तेनाधश्छायादेरुपरि सवितरि कृत्तिकोदयस्य रोहिण्युदये हेतुत्वोपपत्तिरित्याहुः ॥ न चैवं व्यतिरेकव्याप्तौ कथं व्याप्तिपदप्रयोग इति वाच्यम् । अनुमितिकारणीभूतज्ञानविषयव्याप्तेर्लक्ष्यतया व्यतिरेकव्याप्तौ व्याप्तिपदप्रयोगाभावेऽपि बाधकाभावात् ॥ वस्तुतो व्यभिचारधीविरोधिविपक्षधर्मविशिष्टहेतुतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतेति युक्तम् । तेनानुमानत्रैविध्यमुपपन्नम् । पञ्चरूपत्वनियमस्त्वविवक्षित इति ॥

तादृशव्याप्तिग्रहे व्यभिचाराग्रहः सहचारग्रहश्च हेतुः । भूयोदर्शनं तु न हेतुः । व्यभिचारास्मरणे सकृद्दर्शनेनापि व्याप्तिग्रहात् । भूयोदर्शनं तु क्व चिद् व्यभिचारशङ्कानिवर्तकम् । क्व चित्तर्कः । व्याप्यारोपेण व्यापकारोपद्वाराऽनिष्टप्रसञ्जनं तर्कः । तथा ऽपि वह्निविरहेऽपि धूमः स्यादित्याशङ्का कार्यकारणभावप्रतिसंधानान्निवर्तते । तत्राप्यहेतुको भवत्वित्याशङ्का तु धूमार्थं वह्नेर्नियमत उपादाने प्रवृत्तिर्न स्यादिति व्याघातेन निरसनीया । यत्र स्वत एव शङ्का नावतरति न तत्र तर्कापेक्षेति दिक् ॥ व्याप्तिग्रहश्च सकलधूमे सामान्यलक्षणप्रत्यासत्त्या, सा च निरूपिता प्राक् । तदङ्गीकारे तु महानसीयधूमे धूमत्वप्रकारकव्याप्तिग्रहात् पर्वतीयधूमे धूमत्वप्रकारकव्याप्तिस्मरणोपपत्तिः । उपाधिज्ञानेन च व्याप्तिग्रहप्रतिबन्धः । स च यद्धर्मावच्छिन्नसाध्यव्यापकस्तद्धर्मावच्छिन्नसाधनाव्यापकः । भवति धूमवान् वह्नेरित्यत्र धूमत्वावच्छिन्नव्यापकं तत्साधनवह्नेरव्यापकमार्द्रेन्धनम् । स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वं मित्रातनयत्वाव्यापकम् । वायुश्चाक्षुषः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्यत्वावच्छिन्नचाक्षुषत्वव्यापकमुद्भूतरूपवत्त्वं तदवच्छिन्नहेतोरव्यापकं च । एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं जन्यत्वावच्छिन्नसाध्यव्यापकं साधनाव्यापकं च । एवं यत्र तादृशो धर्मो नास्ति तत्र साध्याधिकरणतदनधिकरणान्यतरत्वरूपधर्मो बोध्य इति । अयं च स्वव्यभिचारेण साधने साध्यव्यभिचारज्ञापनेन व्याप्तिग्रहप्रतिबन्धकः । वह्निरनुष्णः कृतकत्वादित्यत्र वह्नीतरत्वमुपाधिः । अयमेव बाधोन्नीत इत्युच्यते । प्रसिद्धानुमाने पर्वतेतरत्वं नोपाधिः । साध्यव्यापकत्वग्राहकमानाभावात् । अयं च बाधानुन्नीतः । संदिग्धपक्षेतरत्वं तु नोपाधिः, संप्रदायादिति के चित् ॥ अन्ये तु उपाधेः सत्प्रतिपक्षोत्थापनेन दूषकता । वह्निना धूमसाधने आर्द्रेन्धनाभावेन तदभावः साध्यते । इत्थं करका पृथिवी कठिनसंयोगवत्त्वादित्यत्र साधनव्यापकमप्यनुष्णाशीतस्पर्शवत्त्वमुपाधिरित्याहुः ॥

पक्षत्वं च असत्यां सिद्धौ सत्यां वा सत्यामनुमित्सायाम् उभयासत्त्वे वा ऽनुमितेरुदयादनुमित्साविरहविशिष्टायाः सिद्धेरभावः । अनुमित्सा च यादृशयादृशेच्छासत्त्वे ऽनुमितिः सा सा विवक्षिता । तेन प्रत्यक्षभिन्नं वह्निज्ञानं जायतामालोकेन वह्निज्ञानं जायतामित्यादीच्छासंग्रहः । अत्रायं निष्कर्षः । तत्साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टतत्पक्षतावच्छेदकविशिष्टभिन्नविषयिकाऽनुमितित्वभिन्नप्रमितिविभाजकधर्माविषयकतल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति त-

दन्यलिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिका तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गतावच्छेदकाविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यिका तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिका तल्लिङ्गकालान्यकालाविषयिणी या तदनुमित्सा तद्विरहविशिष्टसिद्ध्यभावः पक्षतेत्यर्थः । यत्र तत्साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टतत्पक्षतावच्छेदकविशिष्टभिन्नाविषयिकेतिकरणात् पर्वते वह्न्यनुमितिर्जायतां, प्रत्यक्षातिरिक्तं ज्ञानं जायतां, पर्वते वह्निप्रत्यक्षं तद्व्याप्यपरामर्शः विषयान्तरे चानुमितिसामग्र्यभावस्तत्र यत्किंचिद् ज्ञानं जायतामितीच्छादीनां संग्रहः । अनुमितित्वभिन्नप्रमितिविभाजकधर्माविषयकेतिकरणादनुमितौ प्रत्यक्षत्वभ्रमदशायां पर्वतो वह्निमानिति प्रत्यक्षं जायतामितीच्छाया न संग्रहः । तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति तदन्यलिङ्गकतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिकेति करणाद् धूमत्वावच्छेदेन व्याप्यत्वपरामर्शदशायां द्रव्यत्वावच्छेदेन द्रव्यत्वावच्छिन्नलिङ्गकानुमितीच्छाया न संग्रहः । तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गतावच्छेदकाविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यिकेति करणाद् धूमेनालोकेन च वह्न्यनुमितिर्जायतामितीच्छाया न संग्रहः । यत्र द्रव्यत्वस्य लिङ्गतावच्छेदकत्वानुल्लेखिनी द्रव्येण वह्निमनुमिनुयामितीच्छा तस्याः संग्रहश्च । तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिकेति करणाद् यत्र आलोकत्वस्यावच्छेदकत्वानवगाहिनी आलोकेन वह्निमनुमिनुयामितीच्छा तस्या न संग्रहः । तल्लिङ्गकालान्यकालाविषयिणीतिकरणात् पूर्वकालीनपर्वतीयधूमेन वह्न्यनुमितिर्जायतामितीच्छाया न संग्रहः ॥

गोढप्रलापैः स्वकपोलकल्पिते-
रिच्छासमारब्धमृषार्थकार्यैः ।
वृथैव कालक्षपणं विचिन्त्य
चिन्ता मयोपेक्षि खपुष्पतुल्या ॥ १ ॥

॥ अथ बालभारतस्य ॥

॥ द्वितीयः सर्गः ॥

धर्मशास्त्रकविमिष्टकवित्वाद्
यत्र चित्तभुवि कृष्णमुनीन्द्रम् ।
तत्कवित्वगुणानप्रतिशब्दा
येन वक्त्रकुहरे विहरन्ति ॥ १ ॥

धर्मजग्रहदृढीकृतसंध-
स्तैर्भटैर्युधि किरीटिनि हूते ।
प्रीणयन् कुरुवरानथ चक्र-
व्यूहमह्नि विमले गुरुराधात् ॥ २ ॥

तत्र भूभृदयुतेन कृतारे
तारनादिनि मणिध्वजतारे ।
भूपतिः परिवृतः पृतनाभि-
र्नाभितामधित चक्रसमाभिः ॥ ३ ॥

संहितः कुरुनरेन्द्रकनिष्ठै-
स्त्रिंशता त्रिदशवीरवरिष्ठैः ।
तन्मुखे गुरुरसौ बलसिन्धुः
सिन्धुराजसहितो विरराज ॥ ४ ॥

दुर्भिदं भवमिवाथ पुरस्तं[1]
व्यूहमुद्भटसमूहमुदीक्ष्य ।
दृम्भरेण परिरभ्य सुभद्रा-
सूनुमभ्यधित धर्मतनूजः ॥ ५ ॥

विष्णुजिष्णुमदनाश्च भवांश्च
व्यूहमेतमभिभेत्तुमधीशाः ।
त्वत्पिता स्फुरति संप्रति दूरे
तद्धुरं वहतु दुर्गमहः श्रीः ॥ ६ ॥

पार्थभूरथ मुदा गिरमूचे
व्यूहमद्य रभसेन भिनद्मि ।
मां निरीक्षयितुमक्षममी तु
स्यन्दनैर्भुजभृतोऽनुपतन्तु ॥ ७ ॥

एवमस्त्विति तपस्तनयेऽथ
व्यक्तवाचि सहसाञ्चितचापः ।
राजकानि गणयंस्तृणमक्ष्णा
मङ्क्षु फाल्गुनिरनोदयताश्वान् ॥ ८ ॥

तर्कुटङ्कहृतया रविभासा
निर्मितस्त्रिदशवर्धकिनेव ।
भासयन् दश दिशो रिपुकूरे-
दूरतोऽपि दुरवेक्षशरीरः ॥ ९ ॥

रुक्मकङ्कटरथः कपिशाश्वः
स्वर्णशार्ङ्गपतगोज्ज्वलकेतुः ।

[1] पुरस्थं इति पा० ।

सर्वतोमुखसमुन्मिषदन्तः-
पौरुषोष्मशिखिशाख इवोच्चैः ॥ १० ॥

यन्मदादित बलो बलवत् तत्
कोपतप्तनयनद्युतिदीप्तम् ।
धारयन् धनुरपत्रपशूनां
होमकुण्डमिव कुण्डलितं सः ॥ ११ ॥

स्पर्धमानमहसं पतिमह्ना-
मप्यहो शरभरैः पिदधानः ।
शिष्यमाणशरणो रणशिष्ये-
स्त्रासवद्भिरसुरैश्च सुरैश्च ॥ १२ ॥

उग्रवेगहृतया खलुरेखा-
कृपया तनुरुचाप्यनुयातः ।
मृत्युराजसमुखानलकीले-
ष्वाकुलेष्वरिकुलेषु पपात ॥ १३ ॥

पञ्चभिः कुलकम् ।

उन्नदन् परिहसन् धनुरुच्चै-
र्ध्वानयन् प्रविकिरन् विशिखौघान् ।
लोष्ठपातचलकाककुलाभं
तच्चकार बलमाशु कुमारः ॥ १४ ॥

तच्छरैर्गुरुभिराशु सुदूरा-
दापतद्भिरपराधपरैव ।
ताडिता च सहसा विरटन्ती
क्रोडिता च शिशुवद्रिपुसेना ॥ १५ ॥

द्रोणसिन्धुनृपती पटुघट्ट-
द्राक् कपाटपुटवद्विघटय्य ।
नागराज इव राजकुमार-
स्तद्बलं नगरवद्विजगाहे ॥ १६ ॥

पूर्वशर्ववरदुर्धरसिन्धु-
क्ष्मापनिर्जितधृतेः सबलौघैः ।
पाण्डवैः सहचरै रहितस्य
म्रीश्चचुम्ब वदनं नरसूनोः ॥ १० ॥

उद्भटप्रतिभटव्ययसंधा-
मुक्तवेणिरिव लोलपताकः ।
घोरघस्मररवोऽभवदस्य
व्यूहवीरभयदो रथ एव ॥ १८ ॥

एत्यसावभिगतोऽयमदीनं
हन्त हन्त्ययमनेन हता हा ।
तात तात हत रे हत रेऽमुं
तं प्रतीत्यजनि राजगणोक्तिः ॥ १६ ॥

राजकस्य तदिषुव्रतधूता
मौलयस्तरलकुण्डलपत्राः ।
संगरे भटभुजाभुजगाऽग्रे
हेमपर्णिपृथुका इव पेतुः ॥ २० ॥

रुण्डतुण्डमयमेव धरित्री-
पीठमस्त्रमयमेव विहायः ।
रक्तबिन्दुमयमेव तदाशा-
चक्रवालमकृतैष भुजालः ॥ २१ ॥

तस्य पत्रिषु ततेषु विभिन्ने-
र्व्यक्तमौक्तिकरदै रदिकुम्भैः ।
स्ववधूकुचतटार्पितहस्तं
स्वं निषादिभटवृन्दमहासि ॥ २२ ॥

तत्त्वरप्रततिकृत्तनिषिक्तं
वीररुण्डकरिमुण्डकदम्बम् ।
कुञ्जराननकुलत्रयबुद्ध्या-
लोकि नाकिसुभटैरपि भीतैः ॥ २३ ॥

सा स्थली तदिषुपातविकृत्तैः
पूरिता भटहयाननदेहैः ।
शोणिवाहतनुवाहमुखानां
युद्धभूमिरिव किंपुरुषाणाम् ॥ २४ ॥

घ्नन्तमेनमभियुध्य महास्त्रै-
स्ते कृपीतनयकर्णकृपाद्याः ।
वासिनो विजितवायुजवानां
वाजिनां गमनमान्द्यमनिन्दन् ॥ २५ ॥

अश्मकादिनृपवृन्दमुखाब्जै
रत्नभूषणविभाजललीनैः ।
स व्यधत्त वियदस्त्रविधूतैः
कीर्तिकेलिकमलाकरकल्पम् ॥ २६ ॥

ते पुनः कृपकृपीसुतकर्ण-
द्रोणशल्यशलसौबलमुख्याः ।

एत्य तं कनकमार्गणचक्रै-
श्चक्रिरे द्विगुणदेहमयूखम् ॥ २७ ॥
ते तदस्त्रभरभिन्नशरीरा-
स्त्रासतूर्णगतयः कुरुवीराः ।
लेभिरे न रुधिरासवलुब्धैः
खेचरैरपि निशाचरडिम्भैः ॥ २८ ॥
संनिहत्य युधि मद्रमहीभृ-
त्कर्णयोरवरजौ स वरौजाः ।
प्रेतराजपृतनासु सुभिक्षं
निर्ममे कुरुचमूभिरमूभिः ॥ २९ ॥
एकमेकमपि कौरववीरान्
संहतानपि पुनः पुनरेषः ।
कर्णसौबलसुयोधनमुख्यान्
पत्रिमारुततृणानि चकार ॥ ३० ॥
तत्र मुञ्चति शरान् परितोऽपि
छिद्रितः प्रपतितैः करिकर्णैः ।
रक्तसिन्धुसलिलानि कपाले
गालितानि न पपुः क्व पिशाचाः ॥ ३१ ॥
पूरिते जगति रेणुतमोभि-
र्निस्त्रपं चलति वीरसमूहे ।
वादनाय वदनेऽधित शङ्खं
द्विड्यशःकवलपिण्डमिवैषः ॥ ३२ ॥
दारयन्निव दिशो दश कम्बुं
वादयन् सपुलकं स ददर्श ।
चक्रहुंकृतिकृतः स्फुटमभ्यु-
त्तिष्ठतो भटकदम्बकबन्धान् ॥ ३३ ॥
कम्बुनादकुपिताः पुनरीयु-
स्तं प्रति प्रतिमहीपतिवीराः ।
चूडरत्नरुचिरुच्यनभोऽग्राः
पक्षिपुंगवमिवोरगपूगाः ॥ ३४ ॥
रुद्रमुद्रणरणस्थितिरौद्रं
नाम धाम च धनुश्च दधानः ।
उच्चकर्त स तदा कुरुलक्ष्मी-
केलिखण्डभटमुण्डफलानि ॥ ३५ ॥

कर्णसूनुवृषसेनभुजाभृ-
त्तूलपूलपवनो जवनोऽयम् ।
अक्षिपत् क्षितिधवस्य वसन्ते
श्रीलताविटपिनो मुखपुष्पम् ॥ ३६ ॥
उच्चकर्त स च बाणचयैः स-
त्यश्रवोनृपजयी भुजमौली ।
क्रन्दकारिमणिभूषणनादैः
शल्यजस्य युधि रुक्मरथस्य ॥ ३७ ॥
शल्यसूनुसुहृदः सुहृदर्थे
धावतः शतमिलापतिपुत्रान् ।
स व्यधत्त मुदितान् युधि गन्ध-
र्वास्त्रदर्शितसुहृत्पथभाजः ॥ ३८ ॥
भिद्यमानहृदयानि तदानीं
तस्य विक्रमगुणैश्च शरैश्च ।
दैवतानि च कुलानि च राज्ञां
मूर्धकम्पविवशानि बभूवुः ॥ ३९ ॥
शौर्यदन्तिदशनायितबाहुं
लक्ष्मणः कुरुनरेश्वरसूनुः ।
श्रीलताकिशलयः स्मरशोभा-
पल्वलैककमलं तमियाय ॥ ४० ॥
कार्ष्णिमार्गणगणैः पिहितेऽर्के
लक्ष्मणः शठ इवाशु भुजंगः ।
आलिलिङ्ग वसुधां वपुषा च
द्यां मुखेन च धुतेन चुचुम्ब ॥ ४१ ॥
अङ्गजव्ययजकोपकृशानु-
ज्वालजालनिभलोचनरोचिः ।
संहतैः सह महारथचक्रै-
राद्रवत् तमथ कौरवनाथः ॥ ४२ ॥
रोमरोमपतितैः प्रतिवीर-
स्तोमहेमविशिखैर्विरराज ।
अन्तरुद्घुषितधैर्यमयास्त्र-
प्रस्फुटत्पुलकदण्ड इवासौ ॥ ४३ ॥
दृग्विषो नु भुजगो भुजदण्ड-
स्तस्य चण्डचरितस्य तदानीम् ।

Digitized by Google

चापदृक्प्रसृमरेण ददाह
द्विड्गणानिषुविषज्वलनेन ॥ ४४ ॥

लक्ष्मणाय जलमेष ददौ
तद्गुरुर्क्षितिपतिक्षतजेन ।
कोशलेश्वरबृहद्बलमूर्ध्ना
पिण्डमप्यथ पितृव्यसुताय ॥ ४५ ॥

तत्कराम्बुजशिलीमुखदंश-
व्याकुले क्षुभितवत्यथ कर्णे ।
कौरवावनिधवध्वजिनी सा
संभ्रमेण सकलापि चकम्पे ॥ ४६ ॥

अङ्गराजपृतना नृपतीनां
रक्तकुङ्कुमरसैः स्नपिता च ।
पूजिता च मुखपद्मकदम्बै-
स्त्र्यम्बकाङ्गमिति तेन तदाभूत् ॥ ४७ ॥

दुर्गणभोजनृपकुञ्जरकेतु-
क्ष्मापतिर्जितसुशासनसूनुः ।
भग्नमद्रपरथो भृशमस्त्रा-
देष खिन्न इव कीर्तिपयोधौ ॥ ४८ ॥

मेघवेगविधुकेतुसुवर्चः-
शौर्यशत्रुजयभूपतिहन्त्रा ।
तेन सौबलबलक्षयकर्त्रा
चासितः शकुनिरस्त्रधुताङ्गः ॥ ४९ ॥

इत्यमुत्र शरसंहतिपातैः
संहरत्यहह मुक्तकचानाम् ।
हीति हेति ह हहेति च शब्दा-
स्त्रस्यतामुदभवन् सुभटानाम् ॥ ५० ॥

इत्यवेत्य स जगत्त्रयशूरः
शूरसूनुरपि दूरितयुद्धः ।
द्रोणमेत्य विदधौ गिरमुच्च-
श्वासखण्डितपदौघविवेकाम् ॥ ५१ ॥

विक्रमव्यतिकरैः शतमन्युः
स्फारमन्युरभिमन्युभटेन्द्रः ।
तात कातरयति प्रधनाये
योद्धुमीयुषि यमेऽपि यमोऽस्मान् ॥ ५२ ॥

नेह कुण्डलितधन्वनि बाणाः
कृष्टिसंधितविमुक्तिषु दृष्टाः ।
वैरिरक्तरसनव्यसनेन
प्रोत्थिताः स्वयमिवाशु निषङ्गात् ॥ ५३ ॥

संगरे स यमदेवनिकेतं
कर्तुमारभत किं विदधे यत् ।
अश्वपीठगजपीठनृपीठ[1]-
श्रीकृतेऽश्वगजनृव्रजपातम् ॥ ५४ ॥

मृत्युरेष यम एष युगान्ता-
रम्भ एष इति दूरगतानाम् ।
स प्रतिक्षितिभुजां मृधि धाव-
द्वन्ध्यपालनकृतां तुमुलोऽभूत् ॥ ५५ ॥

पूरितं खलु दृढप्रहतीनां
कौतुकं न करिवीरकुलैस्तैः ।
तज्जवेन ययुरस्य दिगन्तान्
पक्षिणो दिगिभदिक्पतिलोलाः ॥ ५६ ॥

तद् बले समुदितः क्षयरोगो
युज्यते न तदुपेक्षितुमेषः ।
स्वैरमेतदुपशान्तिभराय
प्रथ्यतां सपदि कश्चिदुपायः ॥ ५७ ॥

इत्युदीतगिरि तत्र गुरुर्गा-
मुज्जगार ननु सैष कुमारः ।
तातमातुलसमः समरान्त-
स्तत्क्षति क्षणलवेन बलेन ॥ ५८ ॥

व्यक्तकङ्कटरथायुधकेतु-
र्मृत्युहेतुरिह जेतुमशक्यः ।
सासुरैरपि सुरैः सुरभर्तुः
पौत्र एष कृतयुद्धविशेषः ॥ ५९ ॥

तद्रथास्त्रकवचप्रचयोऽस्य
छिद्यते यदि कथंचन शक्यम् ।
इत्युदीर्य गुरुसद्गुणचापः
कार्ष्णिमभ्यचलदर्कसुतेन ॥ ६० ॥

---

१ रथाङ्ग इति पा० ।

Digitized by Google

उन्मद्दाः[1] सह महारथसार्थै-
राद्रवन्तममुमैन्द्रितनूजः ।
कोपपातितकृतान्तकदंष्ट्रा-
निष्ठुरैर्व्यमुखयद्विशिखौघैः ॥ ६१ ॥
कोपिनः फणिशिशोरिव तस्यो-
न्मुच्य तेऽथ पथमेत्य च पार्श्वम् ।
स्यन्दनं हृदि कभूः कृपवीरः
सारथिं धनुरथाकिरकृन्तत् ॥ ६२ ॥
हेमचर्मकरवालकरोऽयं
घूर्णयन् परबलान्यथ कार्ष्णिः ।
तिग्मदीधितितमिस्रविराज-
त्पक्षयुग्म इव मेरुरचालीत् ॥ ६३ ॥
भस्मयन् भटमहीरुहचक्रं
घूर्णयन् करिगिरिप्रकरं च ।
उत्पपात च पपात च विद्यु-
द्दण्डचण्डचरितः परितोऽसौ ॥ ६४ ॥
उत्पतन्नुपरि नाकिकुलानां
न्यक् पतन्नवनिपालबलानाम् ।
नामयन्नवनिमङ्घ्रिनिपातै-
र्भोगिनामपि स भीतिकरोऽभूत् ॥ ६५ ॥
साहसेषु यदहासि महासि-
च्छेदनेऽप्युदितमौक्तिकदन्तैः ।
तद्विलासि हृदि दिव्यवधूनां
धूतकालिमभरैरिभकुम्भैः ॥ ६६ ॥
द्रोणबाणपरिखण्डितखड्ग-
श्चक्रपाणिरिव चक्रमुदस्य ।
द्विट्कुलं दनुभुवामवतारं
दारयन्नयमनूयत देवैः ॥ ६७ ॥
आकुलैर्नृपकुलैरिह चक्रे
खण्डितेऽपि तिलशः किल शस्त्रैः ।
तैर्गदाधर इवात्तगदोऽयं
भीप्रणश्यदसुभिर्भृशमैक्षि ॥ ६८ ॥
स कालकेयं शकुनेः कनिष्ठं
तदङ्गजान् सप्त च सप्ततिं च ।
नृपान् दश ब्रह्मवशातिजातीन्
जघान कैकेयरथप्रमाथी ॥ ६९ ॥
गदाप्रभिन्नद्विपचक्रवाल-
कीलाललीलास्तरिपुप्रतापम् ।
समभ्यधावद्रथभङ्गकोपा-
द्दोःशासनिर्भङ्क्तु तदा गदास्त्रः ॥ ७० ॥
पदोत्थधूलीतिमिराग्निकीटैः
परिज्वलच्छौर्यशिखिस्फुलिङ्गैः ।
मिथोगदापातलसत्कृशानु-
कणैर्नभोवर्त्म विभूषयन्तौ ॥ ७१ ॥
चिरं चरन्तौ समराब्धिमध्या-
वर्तप्रसक्ताविव मण्डलानि ।
मिथोऽभिघातादभिपेततुस्तौ
नवोढयोर्दृक्प्रसराविवोर्व्याम् ॥ ७२ ॥
युग्मम् ।

अथोऽभिमन्युं पतितं जघान
क्रूराशया कौरवराजसेना ।
तीव्रास्त्रपातेन सुखप्रसुप्तं
पतिं विरक्तेव विलोलनेत्रा ॥ ७३ ॥
उत्थाय दौःशासनिना च तस्य
धिग्धिक् कृतो मूर्ध्नि गदाभिघातः ।
तेने तदङ्गे न तदास्त्रवृष्टिः
साकं सुरस्त्रीजनलोचनेन ॥ ७४ ॥
विरथो रथिभिः षड्योधी कुरुषड्योधिभिः ।
एकोऽनेकैः शिशुः प्रौढैर्जघ्नेऽभूदिति खे ध्वनिः ॥ ७५ ॥
पुनरुत्थितिभीत्यैनं शङ्कमानैः क्रमात् पृथुः ।
अतन्यत तदा सिंहनादः कुरुमहारथैः ॥ ७६ ॥
ततो व्रजद्भिः कुरुवीरवृन्दै-
र्विद्राव्यमाणेषु पृथासुतेषु ।
प्रतापमित्रे पतितेऽभिमन्यौ
ययौ जलायेव पयोधिमर्कः ॥ ७७ ॥
जातेऽवहारे चलितः कलितारिजयोऽर्जुनः ।
इष्टनाशं वैमनस्याच्छङ्कमानोऽविशच्चमूम् ॥ ७८ ॥
शोकातुरान् स चतुरोऽपि निरूप्य बन्धू-

१ उन्मदः इति पा० ।

नूचेऽधुनापि न सुतः स्पृशति क्रमो मे ।
तत् किं छलेन रिपुभिः स हतोऽद्य चक्र-
व्यूहं विशन्नकुशलः खलु निर्गमेऽस्य ॥ ७९ ॥
श्रुतेऽथ सुतवृत्तान्ते मूर्च्छितं तं जगौ हरिः ।
मा वीरं शोच रौचिष्णुचरितं दिव्यतां गतम् ॥ ८० ॥
उत्थाय लब्धसंज्ञोऽथ पार्थः प्राह क्व पुत्रकः ।
स्वप्नचिन्तामणिमिव द्रक्ष्यामि त्वन्मुखं पुनः ॥ ८१ ॥
भीमाद्यैरभिरुग्रास्त्रैरपि त्रातोऽसि नो तदा ।
क्व वा दन्तिभिरुद्दान्तैर्धिंयेताद्रिशिरः पतत् ॥ ८२ ॥
मातुलोऽपि तदा वीर त्वया धीरेण न स्मृतः ।
ईशेन सर्वगेनापि न त्रातोऽस्यधुनापि यत् ॥ ८३ ॥
हा पुत्र क्व गतोऽस्येहि दृढं परिरभस्व माम् ।
इत्युक्त्वा पतितः क्ष्मायां संज्ञामाप्योत्थितः पुनः ॥ ८४ ॥
रणेकरौद्रं सौभद्रमनुयान्तो महारथाः ।
रुद्धा जयद्रथेनेति श्रुत्वा शक्तिक्रुधाभ्यधात् ॥ ८५ ॥
भास्वत्यनस्ते यदि सिन्धुराजं
गुप्तं हरेणापि न संहरेयम् ।
लिप्ये महापातकिनां च पापै-
स्ततः कृशानुं च विशामि दीप्तम् ॥ ८६ ॥
इति प्रतिज्ञाय ततान वीरः
कम्बुध्वनिं कम्बुधरेण साकम् ।
युगान्तहेतोः परिपीय कर्णौः
संचीयमानं हृदि शूलिनापि ॥ ८७ ॥
इति प्रतिज्ञया तस्य हिमान्येव जयद्रथः ।
कम्पी दुर्योधनेनापि त्रातुं तेजोनिधिर्गुरुः ॥ ८८ ॥
ततस्तदा तादृशपुत्रशोकात्
तारप्रलापं रुदती सुभद्रा ।
रणव्यसूनां दिशता प्रभुत्वं
प्रबोध्यमाना हरिणा जगाद ॥ ८९ ॥
दयाशया ब्रह्मविदो वदान्याः
सत्योक्तयः शीलमया नयाढ्याः ।
अन्येऽपि ये केचन पुण्यभाज-
स्तेषां गतिं प्राप्नुहि पुत्रकेति ॥ ९० ॥
युग्मम् ।

कृष्णाज्ञया जयपरः परमस्मयोऽथ
तल्पे शुचौ सुचरितः सुचिरात् प्रसुप्तः ।
ऐन्द्रिः सहैव हरिणा हरशैलमौलिं
स्वप्ने जगाम च ननाम च चन्द्रमौलिम् ॥ ९१ ॥
तं च तुष्टाव तुष्टात्मा वरदं विहिताञ्जलिः ।
देवं विश्वत्रयीहारं हरं हरिसखोऽर्जुनः ॥ ९२ ॥
नमः शिवाय रुद्राय महेशाय कपालिने ।
ज्ञानिने पशुनाथाय भवाय भवमायिने ॥ ९३ ॥
कामदायास्तकामाय धर्मदाय मखच्छिदे ।
सुधाकरकिरीटाय विषग्रीवाय ते नमः ॥ ९४ ॥
एवं देवः स्तुतस्तस्मै महाहिमयविग्रहम् ।
जयिने धनुरस्त्रं च सस्थानकमदीदृशत् ॥ ९५ ॥
आशु पाशुपतमद्भुतमस्त्रं
पूर्वलब्धमधिगम्य महेशात् ।
मन्त्रमाप्य च जयी जयबन्धुं
स व्यबुध्यत कृती कृतकृत्यः ॥ ९६ ॥
ततः प्रातः प्रीतो रिपुनृपतिवीरव्ययमय-
प्रतिज्ञापाथोधिं किमपि कलयन् गोष्पदतया ।
प्रमोदप्रागल्भीभरपरवशं वासवसुतः
प्रतेने पृथ्वीशं सुररिपुमपि स्वप्नकथनात् ॥ ९७ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के द्रोणपर्वणि तृतीयदिवसेऽभिमन्युवधो नाम द्वितीयः सर्गः ॥ २ ॥ :: ::

॥ अथ बालभारतस्य ॥

॥ तृतीयः सर्गः ॥

छलनिर्दलितारातिकलङ्कच्छेदधीरिव ।
पाराशरशरीरेण तपस्यन् पातु वो हरिः ॥ १ ॥
ततः कृतदिनारम्भकृत्या जम्भारितेजसः ।
युद्धश्रद्धोद्धसत्काया निरीयुर्दोर्भृतोऽभितः ॥ २ ॥
नक्तमप्यर्जुनभयादसुप्तैरथ मन्थरैः ।
सुभटैः शकटव्यूहं विकटं विदधे गुरुः ॥ ३ ॥
दलालिशालि तन्मध्ये नरेशकुलकेसरम् ।
चक्रे पद्मं रथाश्वेभकोटिकल्पितकर्णिकम् ॥ ४ ॥

Digitized by Google

कृतवर्मादिभिः सूचिव्यूहं व्यूह्य तदन्तरे ।
न्यवेशयद्द्रुतं वीरैः सूचिपाशे जयद्रथम् ॥ ५ ॥
विपक्षपक्षमुत्क्षेप्तुं युधि गोप्तुं जयद्रथम् ।
स्वयं द्रोणोऽद्भुताङ्गस्य शताङ्गस्य धुरि स्थितः ॥ ६ ॥
माणिक्यप्रथितरथान्तरप्रविष्ट-
स्तत्कालं भयदवपुः कपीन्द्रकेतुः ।
सैन्याग्रे जलदरुचिर्दिनाधिनाथ-
क्रोडस्थः शमन इव व्यलोकि लोकैः ॥ ७ ॥
कल्पान्तप्रकुपितकालकण्ठकण्ठ-
प्रस्पर्धामिव दधतौ सुघोरघोषौ ।
कृष्णाभ्यां तनुरुचिमेचकौ तदानीं
दध्माते प्रलयकरौ परेषु शङ्खौ ॥ ८ ॥
अन्योन्यं द्रुतमथ साहसप्रसक्त्या[1]
दोष्मन्तः प्रधनभृतोऽभितोऽभिचेलुः ।
आक्रन्दो गुणरवकैतवेन तेने
तन्मृत्युग्रहमसहिष्णुभिर्धनुर्भिः ॥ ९ ॥
आकृष्टैरथ हयतो हयत्वरायां
मानेन स्फुरितुमनीश्वरैर्लुठद्भिः ।
चीत्कारं रथचरणैः क्वणं सृजद्भि-
द्राग्वेगादतिरथिनोऽमिलन् मदान्धाः ॥ १० ॥
संरम्भादुचितकृतप्रतिक्रियाणां
वीराणामजनि तदा स शस्त्रपातः ।
संक्षोभे जगति यथा करं न तेषु
प्रक्षेप्तुं क्षणमशकत्तमां यमोऽपि ॥ ११ ॥
सङ्ग्रामव्यतिकरजातखेदसादि-
स्वेदाम्भःप्रतिहतवर्णके तदानीम् ।
आरूढं रुधिरधुनीमहोर्मिवृन्दैः
सिन्दूरीभवितुमिवेभकुम्भदेशे ॥ १२ ॥
अथ ज्यामरुदुड्डीनैः सत्त्वतुषतण्डुलैः ।
कृतान्तं भोजयन् भूपैर्हेतिसिद्धैर्महोष्मभिः ॥ १३ ॥
पुरःपातितमातङ्गस्थलस्थपुटितामपि ।
रसामुल्लङ्घ्य तरसा द्रोणमाद्रवदिन्द्रभूः ॥ १४ ॥
युग्मम् ।

१ प्रसक्ता इति पा० ।

नत्वानुमान्य प्राङ्मुक्ताशुगमाच्छाद्य चाशुगैः ।
दक्षिणीकृत्य च द्रोणं स व्यूहं रंहसाविशत् ॥ १५ ॥
चक्ररक्षौ विविशतुर्युधामन्यूत्तमौजसौ ।
सहैव तेन वीरश्रीदृक्कान्तिस्तबकाविव ॥ १६ ॥
लोलध्वजान् गजानद्रितनुजानिव सद्रुमान् ।
वज्रात्मजैरिव तदा शरैरैन्द्रिरपातयत् ॥ १७ ॥
गृह्यतां हन्यतां चैष कोऽमुं गृह्णीत हन्ति कः ।
हा हता वयमेवेति शब्दोऽभूत् तत्र भूभुजाम् ॥ १८ ॥
चक्रदारितभूजन्मा तदीयस्यन्दनस्वनः ।
व्यदारयत् तदा सिन्धुराजस्य हृदयावनिम् ॥ १९ ॥
निर्माय कृतवर्मादीन् धावतो धूमलाननान् ।
चक्रे जवनकाम्बोजवनदाहं धनंजयः ॥ २० ॥
अन्वेत्य गुरुणा मुक्तं ब्राह्मं ब्राह्मेण फाल्गुनः ।
अस्त्रमस्त्रेण जित्वाभूद्द्रोणभूपचमूयमः ॥ २१ ॥
जलेशसूनुर्वर्णाशासिन्धुजन्मा श्रुतायुधः ।
कृष्णौ[1] चक्रे शरैरर्ककरविद्धाम्बुदोपमौ ॥ २२ ॥
स किरीटिशरोत्कृत्तसर्वास्त्रस्यन्दनो बभौ ।
तपाकर इवोष्मांशुकरक्षतकरक्षपः ॥ २३ ॥
अयुध्यमाने या मुक्ता मोक्तारं हन्ति सा गदा ।
वरुणेन पुरा पित्रा दत्ता तेनाददे तदा ॥ २४ ॥
रे रे कातर रे मूढ मुञ्चाध्वानं त्वमत्र किम् ।
इत्यादिवादिनि हरौ स क्ष्मापस्तां रुषाक्षिपत् ॥ २५ ॥
गदा गोविन्दमालिङ्ग्य व्यावृत्याशु श्रुतायुधम् ।
जघान स्वं पतिं स्त्रीव पराश्लेषोल्लसद्रुषा ॥ २६ ॥
वातेऽनुवात्यपि ततः पश्चाद्विस्तृतकेतुना ।
हयानां रंहसा चालीज्जयद्रथरुषा जयः ॥ २७ ॥
दीप्तं सुदक्षिणं क्षोणीकान्तं काम्बोजमोजसा ।
कृताद्भुतरणं कालशरणं प्राहिणोन्नरः ॥ २८ ॥
अथेत्य पार्थं पृथ्वीशावच्युतायुःश्रुतायुषौ ।
शूलतोमरनाराचैर्मोहयामासतुर्द्रुतम् ॥ २९ ॥
द्रुतमूर्च्छितमूर्च्छेन ततः शक्रास्त्रमोचिना ।
तावर्जुनेन गर्जन्तौ जघ्नाते सानुजानुगौ ॥ ३० ॥
अङ्गवङ्गकलिङ्गादिध्वजिनी रुधिरैर्व्यधात् ।

१ तूर्णौ इति पा० ।

Digitized by Google

वीगलङ्काररत्नाढ्या: स रत्नाकरमष्टमम् ॥ ३१ ॥
तद्गल्लभिन्नकुम्भीन्द्रघटाकुम्भसमुद्भवै: ।
ताम्रपर्णीशतान्यासन् रक्तैर्मुक्तालिमालिभि:॥३२॥
प्रीतै: पीतेव रत्नोर्मिर्विलसब्रह्मराक्षसै: ।
तेने तेनेषुभिर्म्लेच्छवाहिनी रक्तवाहिनी ॥ ३३ ॥
अम्बष्ठाधिपतेर्मौलिं युद्धद्रुमफलं जयी ।
जयश्रियै प्रियायै स दत्त्वा कृत्याय तत्वरे ॥ ३४ ॥
इतश्च त्वरया गत्वा गुरुं कुरुपतिर्जगौ ।
त्वां विलङ्घ्याविशत् पार्थ: प्रियशिष्यतया तव ॥ ३५ ॥
दत्ताभयेन निश्येव त्रस्यन्नस्यापि सिन्धुप: ।
विशन्नुपेक्षितश्चेन्द्रिर्विरुद्धं चरितं तव ॥ ३६ ॥
अथाचष्ट गुरुर्व्यूहमविशद्वासवात्मज: ।
हरित्वरितवाहेन लङ्घयित्वा रथेन माम् ॥ ३७ ॥
यद्येनमनुगच्छामि तद्वीमाद्या विशन्त्यमी ।
त्वं तु युध्यस्व मन्मन्त्रवज्रवर्मवशेन तम् ॥ ३८ ॥
इत्युक्त्वा वज्रमन्त्रेण वर्मितो गुरुणा नृप: ।
क्रमागतेन रुद्रेन्द्रपर्शुरामगुरुक्रमात् ॥ ३९ ॥
अधरोल्लङ्घनानीशमुखश्वासेन रंहसा ।
पार्थमन्वचलद्दुन्वचलनोग्रै: समं बलै: ॥ ४० ॥

युग्मम् ।

प्रीयमाणोऽस्त्रटङ्कारलहरीतारगीतिभि: ।
वीज्यमानो विलोलासिभापूरव्यजनव्रजै: ॥ ४१ ॥
तदा व्यूहमुखे युद्धोत्सवे कौरवपाण्डवै: ।
यथेष्टं भोजयामास नैष्ठुर्यस्वजनो यम: ॥ ४२ ॥

युग्मम् ।

विशिखै: खरयोधचक्रवालं
दशनैरुग्रतरं करीन्द्रवृन्दम् ।
इतरेतरमङ्कुशप्रहारै-
र्मृधमाधोरणघोरणश्चकार ॥ ४३ ॥
मुखमण्डलमम्बरे भटानां
विवृतं मारय मारयेति शब्दै: ।
रिपुखड्गहतं पतच्चिनाशे-
रवलोकागतदेवतुष्टयेऽभूत् ॥ ४४ ॥
अहितासिभिदोत्थितं दधानो
गलरन्ध्रस्थितमैभमास्यमुच्चै: ।
युधि नृत्तपर: परश्चकाशे
हरनाट्ये गुहबन्धुवत् कबन्ध: ॥ ४५ ॥
रिपुमौलिरसिप्रहारनुन्नो
दिवि ताटङ्कयुतोऽभवद्भुटेन ।
सुरभीतिकृदेककाललब्ध-
द्युमणिश्वेतकरोग्रराहुरौद्र: ॥ ४६ ॥
रणसीमनि वाञ्छितस्य पत्यु:
प्रथमं प्राप्तमरातिखड्गघातात् ।
द्युगतं वदनं सहासमह्युं
द्युवधूं वञ्चितुमुच्चकैरियेष ॥ ४७ ॥
रिपुमेकमहो जघान कश्चित्
प्रथमं जाङ्घिकपुंगव: कृपाण्या ।
सममुच्चलितं जवेन जित्वा
शरमुच्चैर्निजपक्षवीरमुक्तम् ॥ ४८ ॥
मणिमौलिजटाग्रकान्तिसिन्धु:
प्रधनाम्भोधिभवार्धचन्द्रभाल: ।
असिदण्डशिखोद्धृतारिशीर्ष:
किल खट्वाङ्गकर: परश्चकाशे ॥ ४९ ॥
शरकृत्तनिरन्तरान्तरालं
फलकं काञ्चननिर्मितं परस्य ।
पतितं मृतवीरभेदपीडा-
विधुरं भूमितले क्विलार्कबिम्बम् ॥ ५० ॥
अवलोक्य पुर: श्वसन्तमन्त:-
कुपित: कोऽपि कुले कलङ्कभीरु: ।
असिना प्रथमं जघान बन्धुं
रिपुमन्वेषिणमेव तस्य पश्चात् ॥ ५१ ॥
सुहृदा धृतमञ्चलं विकर्षन्
वपुषि प्रत्तपदो मृतस्य बन्धो: ।
दयितारटितान्यमन्यमान:
परचक्रेषु पपात कश्चिदेक: ॥ ५२ ॥
व्ययितास्त्रभर: पर: समीके
द्रुतमुन्मूल्य रदं रिपुद्विपस्य ।
प्रसरन् प्रसभं बलेन दृष्टो

मुशलीवाद्भुतभीतिभङ्गुरेण ॥ ५३ ॥
खरशक्तिरपूर्णमण्डलोऽपि
प्रसभं पूर्णतरेऽपि नाशहेतुः ।
सकलेन्दुसमा भटास्यकूटा
द्विषतां चिच्छिदिरेऽम्बरेऽर्धचन्द्रैः ॥ ५४ ॥
युधि युद्धविधिं व्यथुर्गतास्त्राः
पतितोत्पाटितमुक्तमौलिगोलैः ।
दृढमुष्टिहते रदैर्नखैश्च
स्फुटरामायणवीरवद्भटेन्द्राः ॥ ५५ ॥
इतश्च प्रचलन् पार्थरथो रुद्धपुरःपथः ।
न तथास्खलि खेलद्भिः परैः परिहतैर्यथा ॥ ५६ ॥
पक्षिणां पार्थमुक्तानां गव्यूत्या पुरतः पतन् ।
स रथस्त्वरयाश्चर्यं चक्रे केतुकपेरपि ॥ ५७ ॥
बिन्दानुबिन्दावावन्त्यौ व्यथयन्तौ शिलीमुखैः ।
रथादपातयत् पार्थस्तौ मधुच्छत्रलीलया ॥ ५८ ॥
पायाम्बु हयान् खिन्नान् विशल्यान् कुरु शल्यितान् ।
इत्युक्त्वाथ हरिं जिष्णुरुत्ततार द्रुतं रथात् ॥ ५९ ॥
क्षणेऽस्मिन्नेव धावन्तीः सत्त्वाः शरमालया ।
रुरोध योधपटलीर्वेलयाब्धिरिवापगाः ॥ ६० ॥
निःशङ्ककङ्कपत्रालिमयं मन्त्रालयं व्यधात् ।
तदन्तरप्यसौ वारि शरदारितभूमिजम् ॥ ६१ ॥
तत्राथ पाययित्वा च सारयित्वा च वाजिनः ।
स्पर्शेन निर्व्रणीकृत्य कृष्णः पुनरयोजयत् ॥ ६२ ॥
अथाधिरोहिणौ कृष्णौ द्विगुणोत्तरया हयाः ।
ऊहुः कम्बूर्ध्वशिरसः प्रागुत्पातेऽप्यकम्पिनौ ॥ ६३ ॥
शिल्पमल्पावशेषेऽह्नि पार्थः प्रकटयन् परम् ।
कल्पान्तवात इव कान् भूभृतो न व्यकम्पयत् ॥ ६४ ॥
अथेत्य गुरुणा बद्धकवचः कौरवेश्वरः ।
रुरोध क्रोधनो युद्धकिरीटाभं किरीटिनम् ॥ ६५ ॥
छिन्धि मूलमनर्थानामित्युक्तो हरिणा नरः ।
क्षणं तेन रणं चक्रे चमत्कृतसुरासुरम् ॥ ६६ ॥
अमज्जन्नर्जुने बाणाः सद्यो नद्यो यथाम्बुधौ ।
नृपे तु पेतुरकृतार्था यथा कृपणेऽर्थिनः ॥ ६७ ॥
किमेतदिति गोविन्दे वदत्यूचे धनंजयः ।
ज्ञातं मयास्मिन् गुरुणा वज्रं वर्मणि मन्त्रितम् ॥ ६८ ॥
वेद्म्यस्य च्छेदमित्युक्त्वा यदस्त्रं फाल्गुनोऽमुचत् ।
लोभेनेव महत्त्वं तद् द्रौणिनास्त्रेण वारितम् ॥ ६९ ॥
द्विः क्षेप्यं न खलु रणेषु दिव्यमस्त्रं
ध्यात्वेति क्षितिभुजि विक्षिपन् पृषत्कान् ।
छित्वान्तः प्रगुणगुणं धनुस्तदोजः-
श्रीकर्णद्वयवदपातयत् किरीटी ॥ ७० ॥
स्म छिन्ते मणिमिव तज्जयाभिकाङ्क्षी-
वामाक्षीमुकुटरुचे रथस्य सूतम् ।
तच्चेतःकलितचतुर्दिगन्तराज्य-
श्रीदूतानिव चतुरोऽभिदत् तुरंगात् ॥ ७१ ॥
चिच्छेद द्विरदरदप्रभानिभं च
छत्रं प्राक् शिर इव तद्यशोऽङ्कुरस्य ।
तत्तेजस्तरुकरहाटवज्ज्वलन्तं
सौवर्णं कलशमपि ध्वजाच्चकर्त ॥ ७२ ॥
विशेषकम् ।
नाराचान् स कवचितेषु वज्रमन्त्रै-
स्तस्येन्द्रिः कररुहसंधिषु न्यधाच्च ।
तत्रस्तः स नरपतिस्तनूजुषां दिक्-
पालानामपि विकिरन् महांसि रक्तैः ॥ ७३ ॥
हेमवर्माच्चयान् द्रौणिप्रभृतीनामपातयत् ।
तदा तेजोमयानीव शरीराणि शरैर्नरः ॥ ७४ ॥
ते बाणै रक्तसिक्ताङ्गाश्चक्रिरे शक्रसूनुना ।
स्वजयश्रीगृहस्तम्भा इव सिन्दूरचर्चिताः ॥ ७५ ॥
ततश्च पातुमारेभे बलाम्भोधिं विरोधिनाम् ।
बाणाङ्गुलिजुषा चापप्रसृत्या कलशोद्भवः ॥ ७६ ॥
हत्वा बलावलीस्तेन पार्थंशे विरथीकृते ।
हतो हतोऽद्य राजेति लोकाः शोकात् प्रचुक्रुशुः ॥ ७७ ॥
क्षिप्तां शक्तिं नृपेणाथ कटुक्वाणां सघण्टिकाम् ।
ब्रह्मास्त्रेणाच्छिदद् द्रोणस्तच्छौर्यरसनामिव ॥ ७८ ॥
सहदेवरथेनाथ पलाय्य प्रययौ नृपः ।
दर्शितस्वामिभक्त्येव सेनयाप्यन्वगामि सः ॥ ७९ ॥
अथ पार्थचमूवीरैः समीरैः क्षयजैरिव ।
शोषिताः परवाहिन्यो रङ्गितासितरङ्गिताः ॥ ८० ॥

करटीव बृहत्क्षत्त्रः केकयानीकनायकः ।
द्रोणानुगं क्षेमधूर्तिं स्तम्भपातमपातयत् ॥ ८१ ॥
जघानाथ विगतं स धृष्टकेतुं महारथम् ।
सहदेवोऽरिमित्रं च व्याघ्रदत्तं च सात्यकिः ॥ ८२ ॥
त्वाष्ट्रास्त्रहतमायास्तं भीमं भीमवधोद्यतम् ।
अलम्बुसं रथात् कृष्ट्वा निष्पिपेष घटोत्कचः ॥ ८३ ॥
तदाभूद् द्रोणभीमाभ्यां भज्यमाने बलद्वये ।
क्षोणिभृत्क्षुभिताम्भोधिक्रोधी कलकलः किल ॥८४॥

अर्जुनप्रवेशः ।

दवीयसस्तदा जिष्णोरशृणवन् शङ्खनिस्वनम् ।
सात्यकिं कार्ष्णिचरितं परितप्तोऽभ्यधान्नृपः ॥ ८५ ॥
शूर क्रूरचरित्रेषु प्रविष्टस्ते गुरुः सुहृत् ।
धर्मज्ञ तव कालोऽयमालोकय शरण्यताम् ॥ ८६ ॥
प्रयातेऽपि त्वयि प्राणसदृक्षस्य दिदृक्षया ।
द्रोणाद् द्रोपदिभीमाभ्यां समेतस्य न मे भयम् ॥८७॥
इति श्रुत्वा तथेत्युक्त्वा दत्त्वा हुत्वा च सात्यकिः ।
स्रग्वी धात्रीशमामन्त्र्य मङ्गलालंकृतः कृती ॥ ८८ ॥
काण्डखण्डितविद्वेषिरक्तसिक्तेन वर्त्मना ।
रथेन रंहसा चालीदुद्धुतरजसा सुखम् ॥ ८९ ॥

युग्मम् ।

द्रोणसात्यकयोः काण्डमण्डपच्छन्नचण्डरुक् ।
रणोऽभूदस्त्रसंघट्टस्फुलिङ्गास्ततमास्ततः ॥ ९० ॥
गुरो त्वच्छिष्यमन्वेष्टुर्न मे संरोद्धुमर्हसि ।
इत्युक्तिभाजि शैनेये गुरुरूचे न मुच्यसे ॥ ९१ ॥
इत्युक्तवन्तमुत्काण्डकोदण्डं दुर्जयं गुरुम् ।
वञ्चयन् रथवेगेन सात्यकिर्व्यूहमाविशत् ॥ ९२ ॥
निकृत्य कृतवर्मादीन् प्रमादीव विशन्नसौ ।
चक्रे क्षितिभुजंगानां क्षयं तार्क्ष्यैरिवाशुगैः ॥ ९३ ॥
पाण्डवाश्चण्डकोदण्डा व्यूहभेदोद्यतास्तदा ।
गुणा इव प्रमादेन वारिताः कृतवर्मणा ॥ ९४ ॥
रणत्पत्रिभृतव्योमा संरम्भात् ताम्रदीधितिः ।
शिनेः सूनुस्तदा वीरनेत्राम्भोजनिमीलनः ॥ ९५ ॥
सिन्धुराज्जलसंधाख्यं मगधेन्द्रमपातयत् ।
संध्याकाल इव क्षिप्रं चण्डांशुं चरमाचलात् ॥ ९६ ॥

युग्मम् ।

मार्गणान् लक्ष्यदानेन प्रीणयन् स पदे पदे ।
नरनारायणौ द्रष्टुं शैनेयोऽचलदुत्सुकः ॥ ९७ ॥
गन्धसिन्धुरगन्धर्ववीरेन्द्रध्वजिनीव्रजान् ।
यमोऽङ्गुलीभिस्तद्बाणैर्लोलं लोलं मुदागिलत् ॥९८॥
सुदर्शनादिभूपालमौलीन् पत्त्रिभिराक्षिपन् ।
व्योम्नः स चक्रे चण्डोशमूर्तेर्मुण्डालिमण्डनम् ॥९९॥
शैनेयसायकैर्लूनो दूनो दुःशासनस्तदा ।
द्रोणं प्राप ततस्तापप्रम्लानाधरपल्लवः ॥ १०० ॥
तं जगाद गुरुर्मूढ किमु त्रस्तोऽसि सात्वतात् ।
पाञ्चालीचिकुराकृष्टौ स्पष्टो यः क्व स ते मदः ॥१०१॥
यो हासः पाशपातेषु रणद्यूतेऽभवत् तव ।
पतत्सु यमपाशेषु प्राणद्यूते क्व तेऽद्य सः ॥ १०२ ॥
अधुनापि कुरु त्वं वा संधिं युधि भयं यदि ।
ननु चेत् परलोकाय युध्यध्वं तदशङ्किताः ॥१०३॥
इत्युक्ते न्यङ्मुखस्त्राणाभिलाषी सैष दीनदृक् ।
दैत्यावतारः पातालदैत्यान् गन्तुमिवैहत ॥१०४॥
कृतान्तकिंकरस्वेच्छैर्म्लेच्छैर्व्यूढैः समन्ततः ।
स सात्यकिमगान्मङ्क्षु चक्षुर्वेगवरत्वरः ॥ १०५ ॥
मुहूर्तेऽस्मिन् गुरुर्विप्रः प्रज्वलत्कोपपावकः ।
विश्वं नृणां सुरस्त्रीणां व्यधात् पाणिग्रहान् बहून् ॥१०६॥
धीरकेतुचित्ररथचित्रकेतुसुधन्वनः ।
पाञ्चालदिग्जयस्तम्भान् जङ्गमान् सोऽभ्यपातयत् ॥१०७॥
यज्ञयोनिस्तदा वीरो मूर्च्छयित्वा शरैर्गुरुम् ।
कृपाणपाणिस्तं हन्तुं दण्डपाणिरिवाद्रवत् ॥ १०८ ॥
गुरुस्तं लब्धसंज्ञोऽथ शरैरासन्नपातिभिः ।
किष्कुप्रमाणैर्वैतस्तैर्वैशस्त्रकमपूरयत् ॥ १०९ ॥
त्रस्तेऽस्मिन् वाडवः सैष दीप्तहेतिरशोषयत् ।
अन्तर्धामिवलाम्भोधिं भुवनप्लवनक्षमम् ॥ ११० ॥
छिन्ने म्लेच्छबले बाणैः क्षीणवर्मायुधं युधि ।
दुःशासनं न शैनेयोऽवधीद्भीमभिया तदा ॥ १११ ॥
प्रविश्य पाण्डुवाहिन्यां नृपवक्त्राणि पद्मवत् ।
तदा लुलाव वीरश्रीपूजार्थीव द्विजो द्विगुः ॥११२॥
केकयाधिपतिज्येष्ठबृहत्क्षत्त्रद्रुमानलः ।

शिशुपालात्मभूधृष्टकेतुदावानलाम्बुदः ॥ ११३ ॥
जरासंधतनूजन्मसहदेवाम्बुदानिलः ।
धृष्टद्युम्नसुतक्षत्रधर्मश्वासानिलोरगः ॥ ११४ ॥
तेजसा प्रज्वलन् बाणैर्वर्षन् सर्पन्नुरुत्वरः ।
कोपेन निःश्वसन् द्रोणः पार्थं व्याकुलयद्बलम् ॥ ११५ ॥
त्रिभिर्विशेषकम् ।
सात्यकिप्रवेशः ।
सखेऽस्मिन्नन्तरिक्षान्तर्भाजि भास्वति भूपतिः ।
अभ्यधत्त समभ्येत्य भीमं भीमग्रमानसः ॥ ११६ ॥
वत्स त्वत्सत्त्वकालोऽयं द्विट्प्रविष्टं व्रजानुजम् ।
क्वार्यते केशवः कम्बुः क्रोशन् न पुनरार्जुनः ॥ ११७ ॥
द्विषद्विषमतामग्ने तात यातेऽर्जुने त्वयि ।
द्रोणजां द्रौपदिर्भीतिं हन्ता हन्तायमेव मे ॥ ११८ ॥
इति श्रुत्वाभ्यधाद्भीमः प्रभो तेभ्योऽर्जुने क्व भीः ।
दध्ये मूर्ध्नि तथाप्येष शिष्यवत् तव शासनम् ॥ ११९ ॥
इत्युदीर्य महावीर्यः स्यन्दनस्वनगर्जनः ।
मदौघशाली कर्णान्तलीनोड्डीनशिलीमुखः ॥ १२० ।
पुरोलोकैर्दत्तमार्गः प्रपतद्भिरितस्ततः ।
भीमः शकटभेदाय दन्ती मत्त इवाद्रवत् ॥ १२१ ॥
युग्मम् ।
कौन्तेय केयमिच्छा ते व्यूहं भेत्तुं मयि स्थिते ।
इत्युक्त्वामुं गुरुः क्रूरैर्बाणपूरैरपूरयत् ॥ १२२ ॥
तत्काण्डपतनव्यक्तसान्द्ररक्तो वृकोदरः ।
कालीकुचाग्रकाश्मीरक्लिन्नः काल इवाबभौ ॥ १२३ ॥
न शिष्योऽहं गुरुर्न त्वं नार्चामि त्वां यथार्जुनः ।
त्वां विजित्य विशन्तं मां पश्येत्युक्त्वानिलिर्गुरुम् ॥ १२४ ॥
याममुद्वेद्रजबलां घण्टाटङ्कारिणीं गदाम् ।
लूनं द्रुम इवाभञ्जि यस्तद्रोणस्तया रथः ॥ १२५ ॥
युग्मम् ।
तदा त्वदात्मजो राजन् सानुजो मनुजेश्वरः ।
सव्यालचन्दनौपम्यं भीमं भीमाशुगैरगात् ॥ १२६ ॥
वृन्दारकं दीर्घनेत्रं सुषेणं दुर्विमोचनम् ।
रौद्रकर्माणमभयं चित्रकान्तिं सुमर्षणम् ॥ १२७ ॥
इत्यष्टौ त्वत्सुतान् राजन्नाजघान वृकोदरः ।
तच्छिरोभिः शरोत्क्षिप्तैः कन्दुकैः क्रीडयन् दिशः ॥ १२८ ॥
युग्मम् ।
वर्षन् कीनाशदासेभ्यो हृतैर्दण्डैरिवाशुगैः ।
स्यन्दनेनाब्दनादेन तदा द्रोणस्तमाद्रवत् ॥ १२९ ॥
रामरावणसङ्ग्रामगुणग्राममलिम्लुचः ।
तदोच्छ्रसदवष्टम्भः संरम्भः कोऽप्यभूत् तयोः ॥ १३० ॥
रथादथावरुह्याशु भीमो हस्ताग्रलीलया ।
हस्तीवोत्पाट्य चिक्षेप दूरं दूरे रथं गुरोः ॥ १३१ ॥
पृथक्कृताङ्गशततः शताङ्गाद्विद्रुते गुरौ ।
रथी वरूथिनीं भीमोऽविशद्विशदविक्रमः ॥ १३२ ॥
अपूर्णचरणश्रद्धान् दूरदेशान्तरागतान् ।
यमदन्तानिव शरान् प्रीणयन् प्राणिकोटिभिः ॥ १३३ ॥
कर्णानीकं समीक्षार्थी घनाकुलमनाकुलः ।
भीमोऽभजद्गजक्रीडाकान्तारमिव केसरी ॥ १३४ ॥
संरब्धशैनेयधनुर्निनादा-
नादाय भीमोऽद्भुतमुन्ननाद ।
तत्क्ष्वेडया दध्मतुराशु कृष्णौ
कम्बू तदा धार्मिमनोविनोदौ ॥ १३५ ॥
पराङ्मुखोद्वर्तितवार्धिविभ्यद्-
द्वीपान्तरः कोऽपि स शब्दपूरः ।
श्लथार्धनारीश्वरसंधिबन्धः
समीरणस्कन्धसमीरणोऽभूत् ॥ १३६ ॥
सामीरिणा संयति भज्यमानं
विभज्यमानं यमदासवृन्दैः ।
बले तदालोक्य नृलोकमस्त्र-
मयं वितन्वन् प्रचचाल कर्णः ॥ १३७ ॥
मिथःप्रमाथाकुलयोस्तदाभूत्
कौन्तेययोः कश्चन काण्डपातः ।
यद्वातजातप्रसरैरिवासीत्
सुरासुराणामपि मौलिकम्पः ॥ १३८ ॥
भीमेन भग्नप्रसरः शरौघैः
कर्णस्तदा दीर्णरथायुधौघः ।
चस्तोऽपि वैरादिव रंहसैव
तदीयतातं जयति स्म वातम् ॥ १३९ ॥

म्लानानन: कृपीकान्तं तदागत्य नृपोऽभ्यधात् ।
प्रियोऽर्जुनस्ते यन्मुक्तो तस्मै सात्यकिमाहृती ॥ १४० ॥
अहो नु मन्दभाग्यानां सामर्थ्यं किंचिदद्भुतम् ।
येनापि वज्रदुर्भेदास्त्वत्प्रतिज्ञा: श्लथीकृता: ॥ १४१॥
ऊचे गुरुर्गुरुतरं किं युध्येयं चमूमिमाम् ।
किं वा तौ बाणवातौघचलाचलकुलाचलौ ॥ १४२॥
एकोऽपि वारयाम्येष सम्प्राप्यद्य चमूरमू: ।
एकादशचमूवीरैस्त्वं निवारय तत्त्रयम् ॥ १४३ ॥
इत्युक्त्वा गुरुणा गत्वा द्रुपदोर्वीशनन्दनौ ।
पार्थिवौ विरथीचक्रे शक्रभूचक्ररक्षकौ ॥ १४४ ॥
इहान्तरे महाशौर्य: सूर्यसूनुरतापयत् ।
भीमं हैमै: शरव्रातै: पितुरात्तै: करैरिव ॥ १४५ ॥
भीमास्त्रै: कर्कशैरर्कसूनुर्लूनरथायुध: ।
नश्यन्नङ्घ्रिरजोव्याजात् तेनेऽभ्रव्यापि दुर्यश: ॥१४६॥
भीमे भूपालमालाया मौलिजालानि कृन्तति ।
सुराणामप्यहो शीर्षै: कम्पितं चकितैरिव ॥१४७॥
पुनरप्याययौ सज्जस्यन्दन: सूर्यनन्दन: ।
भीमं हेमशरै: कुर्वन् हेमवल्लिवनोपमम् ॥ १४८ ॥
छन्ने बाणगणैर्व्योम्नि द्रष्टुं तत्र रणं तयो: ।
देवा इवाययु: पश्यदनिमेषभटच्छलात् ॥ १४९ ॥
कौन्तेये कर्णकोदण्डरथप्लोषानले तदा ।
दुर्जयाख्यस्तव सुतो राजन् भेजे पतङ्गताम् ॥ १५० ॥
भीमेन भुवनक्षोभशोभमानशरोत्कर: ।
गदया विरथीचक्रे पुनराधिरथी रथी ॥ १५१ ॥
तदा त्वदङ्गजो राजन् धावन् भीमेन निर्ममे ।
प्रमथ: स्वर्गसुमुखीमुखपद्मशिलीमुख: ॥ १५२ ॥
आरुह्य प्रमथरथं ततोऽधिरथभू: शरान् ।
यान् भीमस्य हृदि न्यास तैस्तत्कोपानलोऽज्वलत् ॥१५३॥
ततो दृष्ट्वा प्रविष्टेषु श्वभ्रं भीमेषुभोगिषु ।
कर्णो गुप्त्यै नरेन्द्राणां रथेन जविनाविशत् ॥ १५४ ॥
तान् दुर्मर्षणदुर्ग्राहजयदुर्धरदु:सहान् ।
जघान त्वत्सुतान् पञ्च भीम: सत्याभिधस्तथा ॥१५५॥
रङ्गन्तं पुनरङ्गेशं कृत्वा कृत्तरथायुधम् ।
भीमे नदति भक्त्यत्र भियालोटि भटैर्भुवि ॥ १५६ ॥

सप्ताथ त्वत्सुताश्चित्रचित्रबाणशरासना: ।
चारुचित्रकचित्राक्षो चित्रवर्मोपचित्रकौ ॥ १५७ ॥
कर्णत्राणधियो भीमबाणपातनिपातिता: ।
युधि स्वपुत्रं पाहीति वक्तुं शङ्केऽर्कमव्रजन् ॥ १५८ ॥
युग्मम् ।
मुहुर्जितोऽपि राधेयस्तान् मृतान् वीक्ष्य बाष्पदृक् ।
अनिर्वेद: श्रियो मूलमित्येवं पुनरापतत् ॥ १५९ ॥
भीम: क्षरदसृग्धारो राधेयविशिखैर्बभौ ।
वीरश्रीस्नानकाश्मीरारुणनिर्झरशैलवत् ॥१६०॥
विमुक्तभीमकरया वामया शरमालया ।
आलिङ्ग्यमान: सर्वाङ्गं मुमोहाङ्गपतिस्तत: ॥ १६१ ॥
ते चित्रायुधचित्राश्वचित्रसेनविकर्णका: ।
दृढ: शत्रुंजय: शत्रुसहश्चेति सुतास्तव ॥ १६२ ॥
कर्णत्राणाय धावन्तो हता भीमेन तद्बभौ ।
सप्तगोदावर इव श्रीभीमस्तदसृग्रयै: ॥ १६३ ॥
ततो मूर्च्छान्तविक्रान्त: कर्ण: स्वर्णमयै: शरै: ।
भीमं चक्रे दवार्चिष्मत्कीलालीढद्रुमोपमम् ॥ १६४ ॥
पार्थस्य विरथस्यास्य सर्वाण्यस्त्राणि धावत: ।
कर्णश्चिच्छेद पत्राणि तपस्य इव शाखिन: ॥१६५॥
क्षीणायुधो हरिकरिव्रातान् वातात्मजोऽक्षिपत् ।
वैकर्तनश्चकर्तैषु संतानैर्मङ्क्षु तानपि ॥ १६६ ॥
स्मरन् कुन्तीगिरं भीममनिघ्नन् भानुभूस्तदा ।
लीनं मृतेभकूटेषु धनुष्कोट्या स्पृशन् जगौ ॥ १६७ ॥
महद्भिर्न रणं कार्यमकृतास्त्र पुनस्तव ।
स्थूलमूर्तेर्बहुभुज: सूदतैव तवोचिता ॥ १६८ ॥
इत्युक्त्वा शल्ययन् भीमं दर्शितो दनुजद्विषा ।
अत्रासि दूरादुद्दण्डै: काण्डै: कर्ण: किरीटिना ॥ १६९ ॥
आरूढोऽथ विपत्त्यक्त: सुतप्त: सात्यके रथम् ।
भीम: प्रावृड्विमुक्तोऽर्क इव पूर्वगिरे: शिर: ॥ १७० ॥
भीमसेनप्रवेश: ।

नरेण नाराचमुदञ्चितं तदा
पतङ्गभूसंमुखमद्भुतप्रभम् ।
अखण्डयन् द्रोणिपतत्त्रिपङ्क्तय-
स्तदुन्मुखं दावमिवाब्दवृष्टय: ॥ १७१ ॥

Digitized by Google

ततः पतत्त्रिप्रकरैः पराङ्मुखं
विरच्य नाराचरुचा गुरोः सुतम् ।
असृक्प्रभामन्त्रितसांध्यविभ्रमान्
जघान संघानवनीभृतां नरः ॥ १७२ ॥

हयाङ्घ्रिधूतानपि रक्तवाहिनी-
प्रवाहबिन्दूनुदितान् पदे पदे ।
त्वरातिरेकादभिवञ्चयन् ययौ
जयद्रथेच्छोर्जयिनस्तदा रथः ॥ १७३ ॥

तदा हरीणामपि कृष्णयोरपि
द्युतिस्त्वरादीर्घतरेव मिश्रिता ।
मुदा भटैः संयति जह्नुनन्दिनी-
कलिन्दजासङ्गनिभा व्यभाव्यत ॥ १७४ ॥

सव्यसाची रविरिव प्रत्यङ्गाग्रशिलीमुखम् ।
कृतस्ततः कौर्णदलं पद्मव्यूहमथ व्यधात् ॥ १७५ ॥

विगाह्य वाहिनीं पद्मव्यूहोद्दलनलालसे ।
नरे नाग इवोद्भ्रान्ते राजहंसैः पलायितम् ॥ १७६ ॥

महारथघटागुप्तपार्श्वस्थितजयद्रथम् ।
सव्यसाची ततः सूचीव्यूहं निचितमाविशत् ॥ १७७ ॥

उद्यत्कीलालकीलालिमालिनं मारुतिस्तदा ।
अग्न्युज्ज्वलगदाहस्तो ददाह स्तोममस्त्रिणाम् ॥ १७८ ॥

सात्यकेर्निघ्नतः शत्रून् मुहुर्धन्व नतोन्नतम् ।
निमेषोन्मेषभृन्मृत्योर्विलोचन इवाबभौ ॥ १७९ ॥

धन्विना युयुधानेन युधानेन क्रुधार्दितम् ।
कौरवेन्द्रमहाचक्रं ह हा चक्रन्द तत् तदा ॥ १८० ॥

अलं वृषनृपस्यैष खे चिक्षेप शरैः शिरः ।
यद्विधुंतुदवद्वीक्ष्य विचस्तं राजमण्डलम् ॥ १८१ ॥

अपात्यन्त शरैस्तेन वीराः पञ्चशतीमिताः ।
क्ष्मासंमुखाः पतङ्गस्य करा इव दिवस्तदा ॥ १८२ ॥

नृपाङ्घ्रिपान् विमृद्नन्तं यूथेशमिव केसरी ।
भूरिश्रवाः समभ्यायाद्रूपस्तं यूपकेतनः ॥ १८३ ॥

उद्गर्जितौ विविधरत्नविचित्रचापौ
चञ्चत्तडित्तरलकाञ्चनकाण्डपातौ ।
चक्राब्धिनीररसनप्रसरद्विरोधौ
धाराधराविव जवादभिजग्मतुस्तौ ॥ १८४ ॥

दोःशालिनां मृधमिथःशिथिलादराणां
तेजोमयान्यगुणनूनि मनांसि नूनम् ।
अस्त्रौघघट्टजघनाग्निकणच्छलेन
पेतुस्तयोरुपरि कौतुकतश्चलानि ॥ १८५ ॥

धिङ्मां विभग्नविभुवाञ्छितमद्य धिग्धिक्
दिक्चक्रवालविदितं मम शायकत्वम् ।
यच्छायितो न रिपुरित्यविशद्धियेव
भूमिं शरव्यसफलोऽपि तयोः शरौघः ॥ १८६ ॥

अन्योन्यबाणततिपातितसूतसप्ति-
धन्वध्वजौ कलितकाञ्चनचर्मखड्गौ ।
चेरे प्रचेलतुरथोग्रनिजप्रताप-
द्विड्दुर्यशोविटपिबीजकराविवैतौ ॥ १८७ ॥

क्ष्वेडाभिः खड्गखाङ्कारैः स्फुलिङ्गैर्गतिभङ्गिभिः ।
स्फुरद्घर्घरघोषैश्च तौ जातौ प्रेक्षणक्षणौ ॥ १८८ ॥

अथाकृष्य कचैर्हत्वा हृदि पादेन सात्यकिम् ।
सौमदत्तिः प्रपात्यैच्छच्छिरश्छेत्तुं महासिना ॥ १८९ ॥

तदाचष्ट हरिः पार्थं शिष्यस्ते पश्य सात्यकिः ।
जगज्जेतापि धिग् दैवात् सौमदत्तिवशं गतः ॥ १९० ॥

श्रुत्वेति पत्रिणा पार्थः सासिं भूरिश्रवोभुजम् ।
चिच्छेद घाताभिमुखं तार्क्ष्यो वाहिरुत्फणी ॥ २९१ ॥

स क्वणत्कङ्कणो मुक्तामुद्रिकादन्तदीप्तिभिः ।
हसन् विवेकं पार्थस्य पपात भुवि तद्भुजः ॥ १९२ ॥

च्युतेऽथ बाहौ सत्कर्मसहाये सोमदत्तजः ।
पार्थं प्रोवाच भग्नेच्छो मुक्तसात्यकिमूर्धजः ॥ १९३ ॥

दर्शितं कूटयुद्धं हि पुंसो मैत्र्यफलं हरेः ।
त्वयाद्य छिन्दतैवान्यरणसक्तस्य मे भुजाम् ॥ १९४ ॥

इत्युक्त्वा विरचय्येषुशय्यां वामकरेण सः ।
प्रायोपविष्टो विष्टोऽन्तः समं स्पर्शादिवृत्तिभिः ॥ १९५ ॥

प्राणान् प्राणानले तस्य जुह्वतो मूर्ध्नि निर्ययौ ।
काचित् कान्तिशिखा धूमस्तोमयन्ती नभस्तलम् ॥ १९६ ॥

अथोचे निन्दतः क्ष्मापान् पार्थः किं कृत्यमस्त्रिणाम् ।
रक्षन्ति वैरे वैषम्ये मज्जन्तं स्वजनं न चेत् ॥ १९७ ॥

प्राणतुल्यसुहृद्रक्षाकारिणं किमु निन्दथ ।
सन्तो मूर्छितसौभद्रमृत्यूद्यत्पक्षिणोऽपि माम् ॥ १९८ ॥

इदं वदति कौन्तेये लब्धसंज्ञः शिनेः सुतः ।
अपरिज्ञातवृत्तान्तः कोपोद्भ्रान्तस्त्वरोत्थितः ॥ १९९ ॥
कृष्णाभ्यां वार्यमाणोऽपि दुता हसदिवाभितः ।
अच्छिनद्भूरिदत्तस्य प्रागुत्क्रान्तात्मनो मुखम् ॥ २०० ॥

आनिशागममथो जयद्रथं
रक्षितुं क्षितिभृतः कृतोद्यमाः ।
अर्जुनेन निहिताः पतिं द्युतां
तूर्णमस्तनयनाय विव्यधुः ॥ २०१ ॥

अम्बरे किमु विलम्बते न किं
तूर्णमस्तमभियात्यसाविति ।
रोषरक्तनयनैरवेक्षितः
कौरवैरविरभूत् तदारुणः ॥ २०२ ॥

आदिगन्तपरिपातिभिस्तदा
रुद्धमार्गमिव फाल्गुनेषुभिः ।
अम्बरान्तगतमप्यहो रवेः
बिम्बमम्बरमणेर्व्यलम्बत ॥ २०३ ॥

भाति सर्वजगतामपीक्षणं
भूषणं च सुकृतक्षणाश्च यः ।
अस्तमद्भुतरुचोऽपि तस्य हा
स्वार्थकाङ्क्षिभिरकाङ्क्षि कौरवैः ॥ २०४ ॥

सिन्धुभर्तरि रवौ च भूभुजां
मण्डले च मुहुरुत्सुकं पतत् ।
जिष्णुनेत्रमलिनं तदा श्रिया
वस्तुमैहि वलयातिचञ्चलम् ॥ २०५ ॥

विष्णुस्तदा द्युपतिसूनुमुवाच वृद्ध-
क्षत्रो मुनिर्ननु पितास्ति जयद्रथस्य ।
प्रीतः स पुत्रममुमाह शिरः क्षितौ ते
यः पातयिष्यति पतिष्यति तस्य तुल्यम् ॥ २०६ ॥

ध्यात्वेति पातय शिरोऽस्य जयद्रथस्य
क्रोडे पितुः सुतपसः कुरुवर्षसीम्नि ।
तस्मादिदं क्षितिमुपैतु यथा स वृद्ध-
क्षत्रो न शापमपि यच्छति ते विमौलिः ॥ १०७ ॥

इति ध्यायन् क्रोधानलबहलकीलालसदृशा
दृशा पश्यन् प्लुष्यन्निव दिवसभङ्गे रिपुवपुः ।
नरो धावन् धन्वी नृपकृपकृपीभूवृषमुखै-
र्द्विषद्भिः प्रेङ्खद्भिः क्षणमविकलैरस्खलि बली ॥ २०८ ॥

क्षिप्रं क्षुरप्रप्रकरेण कृत्वा
तान् सन्नसंनाहमहास्त्रवाहान् ।
क्षिपन् मुखानि क्षितिपव्रजानां
धनंजयः सैन्धवमभ्यधावत् ॥ २०९ ॥

ध्यात्वाथ वीरो निधनं मृधेन
क्रुद्धोद्धुरः सिन्धुधराधिराजः ।
पौरंदरिं रोषपरंपराभि-
रपूरयन्मुक्तिपुरीपरीप्सुः ॥ २१० ॥

अथो पृथासुतस्तस्य शिरो दिव्यशरोद्धृतम् ।
संध्यां ध्यातुरविज्ञातमङ्के पितुरपातयत् ॥ २११ ॥
किमेतदिति तन्मङ्क्षु क्षितौ सुतशिरः क्षिपन् ।
वृद्धक्षत्रोऽप्यमूर्धाभूत् स्ववरेणैव दैवतः ॥ २१२ ॥

इति समिति निहत्याक्षौहिणीः सप्त सिन्धु-
क्षितिभृति निहतेऽस्मिन् बल्गिना फाल्गुनेन ।
मदपरिमलचारुर्मारुतिर्यान् निनादा-
नकृत सुकृतजस्तानग्रहीद्वाद्यवृन्दैः ॥ २१३ ॥

ततो विघटितव्यूहा बभ्राम कुरुवाहिनी ।
सर्वदिग्दीप्तदावाग्निवनद्विपघटेव सा ॥ २१४ ॥

ततः किरीटी विकृपः कृपं च
कृपीसुतं च त्वरया निरस्य ।
मुखैर्महाभल्लधुतैर्नृपाणा-
मानर्च संध्यामिव पङ्कजौघैः ॥ २१५ ॥

दारुकप्रगुणितं रथं हरेः
सात्यकिः समधिरुह्य कर्णजित् ।
काण्डखण्डितनृपव्रजोत्थितैः
सांध्यधाम रुधिरैरवर्धयत् ॥ २१६ ॥

भीमापमानकुपितः पुरतोऽङ्गभर्तुः
संधां विधाय वृषसेनवधाय पार्थः ।
सर्वैः समं समरनित्यजयी जगाम
प्रीतिप्रणामकृतये सुकृतात्मजस्य ॥ २१७ ॥

अग्रे नृपस्य पुलकेन रणप्रशंसां
चक्रुर्मिथः पवनसत्यकशक्रपुत्राः ।

कृष्णौ तु संमदपरः परिरभ्य वीरौ
भूपो नुनाव हरिमेव जयस्य हेतुम् ॥ २१८ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के द्रोणपर्वणि चतुर्थदिने जयद्रथवधो नाम तृतीयः सर्गः ॥ ३ ॥ :: ::

॥ अथ खण्डप्रशस्तौ

रामावतारवर्णनम् ॥

(७८) देवाधिपो वा भुजगाधिपो वा
नराधिपो वा यदि हैहयःस्याम् ।
संदर्शनं ते गुणकीर्तनं ते
सेवाञ्जलिं ते तदहं विदध्याम् ॥

हे राम यद्यहं देवाधिप इन्द्रः स्यां तत्तदा शक्रवच्चक्षुःसहस्रेण ते तव संदर्शनं सम्यगवलोकनं विदध्यां कुर्यां, प्रतिप्रतीकं त्वद्वपुषि लावण्यातिशयाच्चयनयुगेन त्वज्ज्ञानस्याशक्यत्वादिति भावः । तथा यदि भुजगाधिपः शेषराजः स्यां तर्हि तद्वज्जिह्वासहस्रेण तव गुणानां कीर्तनं विदध्यां त्वद्गुणानामानन्त्यादेका रसना त्वद्गुणस्तुतावपर्याप्तेति भावः । तथा यद्यहं नराधिपो हैहयः स्यां तदा तद्वत्करसहस्रेण ते तव सेवार्थमञ्जलिं विदध्यां, भुजद्वयेन प्रणामकरणे मे संतुष्टिः कथं भवेदिति भावः ॥ ७८ ॥

(७९) पौलस्त्यस्यावमन्ता त्रिदशपतिसुतश्चक्रवर्ती कपीनां
कर्ता संध्यासमाधेर्जलनिधिषु चतुर्दिङ्कुञ्जाश्रितेषु ।
किष्किन्धाराजधानीं भुजपरिघबलात्त्रायमाणस्त्वयाऽसौ
वाली हेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणस्याम् ॥

हे राम वाली वानरस्त्वया इषुणा बाणेन साधनेन दक्षिणस्यां दिशि निर्मितः दक्षिणाशाधिपतेरतिथीकृतः इषुणा मारित इति यावत्, कथंभूतः सः, पौलस्त्यस्य रावणस्यावमन्ताऽवगणयिता, पुनःकथंभूतः, त्रिदशपतेरिन्द्रस्य सुतः, पुनःकथंभूतः, कपीनां वानराणां चक्रवर्ती सार्वभौमः, पुनःकिंविशिष्टः, जलनिधिषु समुद्रेषु संध्यासमाधेः संध्यावन्दनस्य कर्ता, कथंभूतेषु तेषु, चत्वारो दिङ्कुञ्जास्तेषु ये आश्रितास्तेषु, तथा किष्किन्धाख्यां राजधानीं भुज एव परिघः परिघास्त्रं तद्बलात्त्रायमाणः पालयन्, तथा हेमाब्जानां स्वर्णकमलाकराणां माला अस्यास्तीति, हेमाब्जानि मलते धारयतीति वा सः, पुनःकथंभूतः, गुणानां शौर्यादीनां निधिरित्यर्थः ॥

(८०) भीमं यज्जलधिं जवेन हनुमानुल्लङ्घ्य लङ्कां गतो
यच्चाशोकमहावनं दलितवानक्षं च यत्क्षुण्णवान् ।
सीतोपायनरत्नमौलिसहितः प्राप्तश्च यस्त्वामसौ
तत्राप्येष भवत्प्रतापमहिमा निर्यन्त्रणः कारणम् ॥

हे राम यद्धनुमान् भीमं रौद्रं जलधिं जवेन वेगेनोल्लङ्घ्यातिक्रम्य लङ्कां गतः प्राप्तः, तथा यच्चाशोकमहावनं दलितवान्बभञ्ज, तथा स यदक्षं रावणपुत्रं क्षुण्णवान् मारितवान्, तथा यश्चासौ हनूमान् सीताया उपायनत्वेन ढौकनिकत्वेन यन्मौलिरत्नं चूडारत्नं तेन सहितस्त्वां रामं प्राप्तः, तत्र सर्वत्रापि एषोऽयं निर्यन्त्रणोऽस्खलितो भवतः प्रतापस्य कीर्तेर्महिमा महत्त्वं कारणं संपादकमिति, यतो हनूमते सीताशुद्धौ गच्छते रामेण प्रत्यभिज्ञानाय स्वमुद्रिका समर्पिता ततोऽपि व्यावर्तमानाय हनूमते सीतया स्वोपायनचूडारत्नमभिज्ञानाय दत्तमित्यैतिह्यमस्तीति भावः ॥ ८० ॥

(८१) धाराधीर धरामहीशगणने कौतूहलीयानसौ
धाता तद्गणने चकार खटिकाखण्डेन रेखां दिवि ।
सेयं स्वर्गतरङ्गिणी समभवत्त्वत्तुल्यपृथ्वीधवा-
भावात्तां त्यजतिस्म सोयमवनीपीठे तुषाराचलः ॥

हे धारायामसिधारायां धीर शूर धरायां पृथ्व्यां ये महीशा राजानस्तेषां गणने संख्याकरणे कौतूहलीयान् कुतूहलविशिष्टः असौ धाता ब्रह्मा त्वद्गणने तव रामस्य गणने दिव्याकाशे खटिकाखण्डेन खटिनीशकलेन रेखां चकार, ततः सेयं रेखा स्वर्गतरङ्गिणी गङ्गा समभवज्जाता ततस्त्वया तुल्यस्यान्यस्य पृथ्वीधवस्याभावेनाये रेखाकर्षणस्याभावात्तां खटिकां त्यजतिस्म तत्याज, ततः स खटिकाखण्डोऽयमवनीपीठे भूमिपृष्ठे तुषाराचलो हिमाद्रिरभूदिति शेषः, रामचन्द्रसदृशं भूपतिमन्यं लोके विधिर्नापश्यदिति भावः ॥ ८१ ॥

(८२) धत्ते नायक राम तावकयशो रामे शशाङ्के महद्वाहे स्वर्गगजे हरे फणिपतौ वाण्यां वृषे भे रुचिम् ।
अन्येषां तु तदम्बरे तदहिते तद्भ्रुङ्गने तन्मदे
तत्कण्ठे च तदीक्षणे तदलके तत्प्रायके तत्पथे ॥

हे नायक स्वामिन् हे राम तावकं त्वदीयं यशः कीर्तिः रामे बलभद्रे शशाङ्के सुधांशौ, महद्वाहे उच्चैः श्रवसि, स्वर्गगजे ऐरावते, हरे शंभौ, फणिपतौ शेषे, वाण्यां सरस्वत्यां वृषेऽनडुहि, भे नक्षत्रे, च रुचिं शोभाप्रकर्षं धत्ते धारयति, सर्वेषां श्वेततया सादृश्यमस्तीति भावः, अन्येषां त्वद्वैरिणां तु यशः तदम्बरे रामवस्त्रे, तद्वस्त्रस्य नीलत्वादिति भावः,

Digitized by Google

तदहिते चन्द्राहिते राहौ, तद्वाज्जने उच्चैःश्रवसो व्यञ्जने, तन्मदे ऐरावतमदे, तत्कण्ठे ईशकण्ठे, तदीक्षणे शेषचक्षुषोः, तदलके वाण्याः केशेषु, तत्प्रोथके वृषनासिकायां, तत्पथे नक्षत्रमार्गे आकाशे च स्वीयां रुचिं धत्ते, अत्र सर्वत्र कृष्णत्वेन सादृश्यमस्तीति भावः, अत्र यथा संख्यमन्वयो ज्ञेयः । अनेन रामयशो धवलितं तदन्ययशः श्यामायितमिति सूचितम् ॥ ८२ ॥

(८३) श्रीमन्नायक रामभद्र भवतः पाणौ कृपाणं रणे
दृष्ट्वा यद्यदभूदरिक्षितिभुजां तत्तत्समाकर्णय ।
अङ्गे वेपथुरन्धता नयनयोर्वक्त्रे तृणं भूयसी
भीतिश्चेतसि वाचि संस्तुतिकथा हस्तद्वयं मस्तके ॥

हे श्रीमन्नायक रामभद्र रणे संग्रामे भवतस्तव पाणौ हस्ते कृपाणं खड्गं दृष्ट्वाऽरिक्षितिभुजां वैरिराजानां यद्यदभूत्तत्तत्समाकर्णय शृणु, अङ्गे वेपथुः कम्पः, नयनयोरन्धता, तथा वक्त्रे तृणं, येषां मुखे तृणं दृश्यते ते शूरा अपि गोवदवध्या इति भावः, तथाचेतसि भूयसी भीतिः, तथा तेषां वाचि संस्तुति कथा हे राम त्वं दयालुरतोऽस्मान्पाहीत्येवंविधाऽनेका, तथा हस्तद्वयं करद्वयं मस्तके शिरसि त्वत्प्रणामार्थं कृतवन्त इत्यर्थः ॥ ८३ ॥

(८४) करकम्पितखड्गयष्टिभीमे
रणसंनाहितरामनाथवीरे ।
अरिभूभृदमर्त्यसुन्दरीणा-
मचलन्दक्षिणवामलोचनानि ॥

रणे संग्रामे संनाहितः कवचितो यो रामनाथाभिधो वीरस्तस्मिन् करेण कम्पिता या खड्गयष्टिस्तया भीमे रौद्रे क्रुद्धे जाते सति अरिभूभृतो वैरिराजास्तथाऽमर्त्या देवास्तेषां सुन्दर्यस्तासां यथाक्रमं दक्षिणवामलोचनान्यचलन्नस्फुरन्, स्त्रीणांवामदक्षिणलोचनपरिस्पन्दस्य यथाक्रमं शुभाशुभसूचकत्वेन वैरिस्त्रीणामशुभं देवस्त्रीणां शुभं सिद्धं रावणमरणमिति सूचितम् ॥ ८४ ॥

(८५) आकृष्टे कवचादहीन्द्ररसनाकल्पे कृपाणे त्वया
श्रीमन्नायक रामचन्द्र भवतः प्रत्यर्थिनां वेश्मसु ।
गाहन्ते सहसा लुलायचमरीशार्दूलशाखाचरी-
यक्षोरक्षशृगालकोलशलभृद्भल्लूकभिल्लादयः ॥

हे श्रीमन्नायक रामचन्द्र त्वया कवचात्कोशादहीन्द्ररसनाकल्पे शेषराजजिह्वासदृशे कृपाणे खड्गविशेषे आकृष्टे निष्कासिते सति भवतः प्रत्यर्थिनां वैरिणां वेश्मसु गृहेषु सहसा सद्यो लुलाया महिषाश्चमर्यो वनगावः, शार्दूला व्याघ्राः, शाखाचर्यो वानर्यो, यक्षा देवयोनयो, रक्षांसि राक्षसाः, शृगालाः क्रोष्टारः, कोलाः शूकराः, शलभृतः शल्यकाः, भल्लूका ऋक्षा, भिल्लाः शबराश्च तदादयो हिंस्राः पशवो नराश्च गाहन्ते स्वेच्छया विलोडनं कुर्वते, तन्मन्दिराणां शून्यत्वेन वनचरतिरश्चां तत्र प्रवेशस्यानिवार्यत्वादितिभावः ॥ ८५ ॥

(८६) गण्डोपाण्डिमसात्तनूस्तनिमसात्पक्ष्मावलीबाष्पसात्
कीरः पञ्जरसान्मनोऽपि हरसात्कण्ठोऽपि कैवल्यसात् ।
आसन् राम चमूवरेण्य भवतः प्रत्यर्थिवामभ्रुवां
कोदण्डे परिवेषभाजि विजयश्रीसाधने योधने ॥

हे राम चमूवरेण्य सेनाप्रधान योधने रणे भवतस्तव कोदण्डे धनुषि परिवेषो मण्डलीकरणं धनुषस्तं भजते सेवते ऽसौ परिवेषभाक्तस्मिन् जाते सति कर्णान्तमाकर्षणेन कुण्डलनां प्राप्ते सतीत्यर्थः, प्रत्यर्थिवामभ्रुवां वैरिस्त्रीणां गण्डो पाण्डिमसादासीत् पाण्डोर्भावः पाण्डिमा कृत्स्नौ गण्डौ पाण्डिम्ना संपद्येते इति पाण्डिमसात्, तथा तासां तनूस्तनिमसादासीत् तनोर्भावस्तनिमा कृत्स्ना शरीरतनिम्ना कृशत्वेन संपद्यते इति तनिमसात्, तथा पक्ष्मावली पक्ष्माणि नेत्ररोमाणि तेषामावली श्रेणिर्बाष्पसादासीत् कृत्स्ना पक्ष्मावली बाष्पमश्रु संपद्यत इति बाष्पसात्, तथा तासां कीरः शुकोपि पञ्जरसात्पञ्जराधीन आसीत्, तथा मनोपि हरसाद्धराधीनमासीत्, सर्वदा शंभुध्यानमकार्षीदिति भावः, तथा तासां कण्ठः कैवल्यसादासीत्, अत्र सर्वत्र साकल्ये सातिः पञ्जरहराभ्यां तु तदधीनवचने बोध्यः, एते विशेषास्तासां बभूवुरिति भावः, किंभूते योधने, विजयलक्ष्म्याः साधने कारणभूते, यद्यप्यमरादौ समरवाचक आङ्पूर्वक एव योधनशब्दउपलभ्यते तथापि महाकविप्रयोगात्केवलोपि साधुर्बोध्यः ॥ ८६ ॥

(८७) एक एव महान्दोषो भवतां विमले कुले ।
लुम्पन्ति पूर्वजां कीर्तिं जाता जाता गुणाधिकाः ॥

हे स्वामिन् भवतां निर्मले कुले वंशे एक एव महान् गुरुर्दोषः कलङ्कोस्ति, यत्र जाताः समुत्पन्नाः पुत्रादयः सर्वे पूर्वपूर्वापेक्षया गुणाधिका गुणैरधिकाः सन्तः पूर्वजां समुत्पन्नां कीर्तिं लुम्पन्ति परिमृजन्ति, अत्रायं भावः, अत्र वंशे पूर्वापेक्षयोत्तरोत्तरः पुरुषो न कोपि न्यूनगुणोऽभूत्किं तु विशिष्टगुण एवाभवदिति भावः ॥ ८७ ॥

(८८) परिहरतपराङ्गनानुषङ्गं बत यदि जीवितमस्ति वल्लभं वः ।
हरहर हरिणीदृशो निमित्तं दशदशकन्धरमौलयो लुठन्ति ॥

Digitized by Google

हे जनाः यदि चेद्वो युष्माकं जीवितं प्राणा वल्लभं प्रियमस्ति बत इति खेदे तर्हि पराङ्गनानुषङ्गं परस्त्रीष्वनुरागं परिहरत परित्यजत, यतः हरिणीदृशो मृगाक्ष्या निमित्तं कारणेन हरहरेति स्मरणं खेदेन दशकन्धरस्य दशग्रीवस्य रावणस्य मौलयः शिरांसि दश दशसंख्याकानि लुटन्ति भूमौ विति शेषः, यद्यसौ रावणः सीतानुषङ्गं नाकरिष्यत्तदा कथं रामस्तन्मस्तकानि तृणानीवालविष्यदिति भावः ॥ ८८ ॥

THE APHORISMS

OF THE

YOGA PHILOSOPHY

OF

PATAÑJALI.

(Continued from page 234.)

[1] [Next] He states an expedient for firmess in this meditation.

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥५२॥

Aph. 52. [The ascetic ought] not to form association and exhibit wonderment at the invitation of the tutelary deities, for evil would again ensue.

[2] There are four [classes of] ascetics viz., (1) he who has performed the practice and in whom the light [that consists of the pure element] has just entered; (2) he who possesses knowledge that holds to the truth; (3) he who has conquered the elements and senses; (4) he who has transcended the objects of meditation. This —the fourth one, in whom has sprung up the seven-fold perfect knowledge, up to the ground of the limit, and is realising [or has the immediate cognition of] the last stage, which is technically called, madhumati or honied, is invited by tutelary deities [Indra &c.]: that is, they allure him with celestial nymphs and elixirs or ambrosia and the like.

He, upon this invitation should neither form association nor exhibit amazement. By association he falls again into the enjoyment of objects; and by wonderment thinking that he has accomplished his objects does not persevere in meditation. Therefore he should avoid association and wonderment.

[1] He states another expedient in regard to this resultant discriminative knowledge:

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥ ५३ ॥

Aph. 53. Knowledge springing from discrimination results from asceticism performed with regard to the relation between moments and to their order.

[2] "By moments" is meant the ultimate division of time, which cannot be sub-divided into other periods. 'Order" means modification of such moments of time as prior and posterior. From asceticism [performed] with regard thereto [i. e. with regard to both—the moments and their order] the above-discriminative knowledge results.

[3] The meaning is this, when perception even of an exceedingly subtile order of moments has taken place in the ascetic, who has performed asceticism in regard to the order that this moment is posterior to that, and that moment is prior to this; then he perceives other subtile things also, i. e., the great principle, &c.

[4] With the purpose of citing [another] discrimination of this restraint he states.

जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः ॥ ५४ ॥

Aph. 54. Therefrom results discernment of two similar things, as there is non-discrimination by class, characteristic and place.

[5] The causes of distinction of things are "class" [Jati] "characteristic" [lakshana] and "position" [desa].

In some cases the cause of distinction is "class" for instance, This is an ox, and This is a buffalo.

The cause of discrimination of two things of the same class, is "characteristic," for example, This [cow] is of variegated colour, and that is red. And the cause of discrimination of two things not differentiated by class

---

[1] अस्मिन् समाधौ स्थित्युपायमाह ।

[2] चत्वारो योगिनो भवन्ति तत्राभ्यासवान् प्रवृत्तमात्रज्योतिः प्रथमः । ऋतम्भरप्रज्ञो द्वितीयः । भूतेन्द्रियजयी तृतीयः । अतिक्रान्तभावनीयश्चतुर्थः ॥ तस्य चतुर्थस्य समाविर्भूतसप्तविधप्रान्तभूमिप्रज्ञस्यान्त्यां मधुमतीसंज्ञाम्भूमिकां साक्षात्कुर्वतः स्थानिनो देवाः उपनिमन्त्रयितारो भवन्ति दिव्यस्त्रीरसायनादिकेनोत्कर्षयन्तीति तस्मिन्नुपनिमन्त्रणे नानेन सङ्गः कर्तव्यो नापि स्मयः । सङ्गतिकरणे पुनर्विषयभोगे पतति स्मयकरणे कृतकृत्यमात्मानं मन्यमानो न समाधावुत्सहतेऽतः सङ्गस्मययोर्वर्जनन्तेन कर्तव्यम् ॥

[1] अस्यामेव फलभूतायां विवेकख्यातावुपायान्तरमाह ।

[2] क्षणः स चान्त्यः कालावयवो यस्य कालाः प्रविभक्तुं न शक्यन्ते तथा विधानाङ्कालक्षणानां यः पौर्वापर्य्येण परिणामस्तत्रसंयमात् प्रागुक्तविवेकजज्ञानमुत्पद्यते ॥

[3] अयमर्थः अयङ्कालक्षणोऽमुष्मात् कालक्षणादुत्तरोयमस्मात्पूर्व इत्येवं विधक्रमे कृतसंयमस्यात्यन्तं सूक्ष्मेऽपि क्षणक्रमे यदा भव-तिसाक्षात्कारस्तदाऽन्यदपि सूक्ष्मं महदादि साक्षात्करोति ॥

[4] अस्यैव संयमस्य विवेकोपक्षेपायाह ।

[5] पदार्थानाम्भेदहेतवो जातिलक्षणदेशा भवन्ति क्वचिद्भेदहेतुर्जातिर्यथा गौरयं महिषोऽयमिति जात्या तुल्ययोर्लक्षणम्भेदहेतुर्यथा इयङ्कर्बुरा इयमरुणेति जात्या लक्षणेन चाभिन्नयोर्भेदहेतुर्देशो दृष्टो यथा तुल्यपरिमाणयो-रामलकयोर्भिन्नदेशस्थितयोः ॥

[6] अत्र पुनर्भेदो नावधारयितुं शक्यते यथैकदेशस्थितयोः पार्थिवयोः परमाण्वोः । तथाविधे विषये भेदाय कृतसंयमस्य यदा भेदेन ज्ञानमुपजायते तदा तदभ्यासात् सूक्ष्माण्यपि तत्वानि भेदेन प्रतिपद्यन्ते । एतदुक्तम्भवति यत्र न केनाप्युपायेन भेदोऽवधारयितुं शक्यस्तत्र संयमाद्भवत्येव भेदप्रतिपत्तिरिति ॥

Digitized by Google

and possessing similar characteristics is the place seen, as in the case of two emblic myrobalans of equal size, situated in two different places. But distinction cannot be made in such case as of two terrene atoms existing in the same place. When [in the ascetic] who has practiced restraint for a discrimination in regard to such objects, knowledge of distinction arises, then from practice of that subtile principles are distinctively known.

What is meant is this: where it is impossible to know difference by any other means, there, discernment of distinction certainly takes place by asceticism.

[1] In order to explain the signification [sanjñá] object [vishaya] and nature or characteristic [swabháva] of the above-described knowledge, springing from discrimination he states:

तारकं सर्वविषयं सर्वथाविषयमक्रमञ्चेति विवेकजञ्ज्ञानम् ॥ ५५ ॥

Aph. 55. The knowledge springing from discrimination is [called] saving [knowledge], has all things and the entire nature of all things for its objects, and is non-successive.

[2] The knowledge arisen in its final stage, from the efficacy of the asceticism described above [81st, 53.] is by [its] significant name called saving [knowledge] for it delivers ascetics from the unfathomable sea of transmigratory existence. He states its object: It has all things for its object that is, all principles [tattwa] i. e. the great principle &c. are its objects. Its "Nature" [swabháva] is that it has all nature [or all states] of things for its object; that is, all principles existing in any mode, i. e. in all different forms gross, natural and subtile &c., in all states, in all modifications, are its objects. He states another characteristic of it, that it is non-successive, that is, there is no order [priority and posteriority] in perceiving without exception all entities modified in various states or forms: therefore it is called orderless [akrama].

It contemplates simultaneously all nature as if it were an emblic myrobalan-fruit in the hand. G. D.

(To be continued.)

[1] उक्तस्य विवेकजन्यज्ञानस्य सञ्ज्ञां विषयं स्वभावञ्च व्याख्यातुमाह।

[2] उक्तसंयमबलादन्त्यायाम्भूमिकायामुत्पन्नञ्ज्ञानं तारयत्यगाधात्संसारपयोधेर्योगिन इत्यान्वार्थिक्यासञ्ज्ञया तारकमित्युच्यते ॥

अस्य विषयमाह। पूर्ववीति। सर्वाणि तत्त्वानि महदादीनि विषयोऽस्येति सर्वविषयम्। स्वभावश्चास्य सर्वथाविषयत्वं सर्वाभिरवस्थाभिः स्थूलस्वरूपादिभेदेन तैस्तैश्चपरिणामैः सर्वेण प्रकारेणावस्थितानि तत्त्वानि विषयोऽस्येति सर्वथाविषयम्। स्वभावान्तरमाह। अक्रमञ्चेति निःशेषनानावस्थापरिणतभावग्रहणे नास्य क्रमो विद्यते इत्यक्रमम् ॥ सर्वं करतलगतामलकवद् युगपत् पश्यतीत्यर्थः ॥

THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

SIXTH BOOK, SECOND DAILY LESSON.

(Continued from page 237.)

सुखाद्रागः ॥ १० ॥

Aph. 10. From pleasure [arises] desire.

[1] Restraint having been specified as an accessory with regard to merit and demerit, the origin of defects is stated, with the purpose of specifying defects as accessories. Desire or wish arises from pleasure generated by attachment to garlands, sandal-wood, women, and other objects of sense, or in the pleasures of those successive kinds, or in the means of those pleasures. It is also to be considered that aversion arises from pain begotten by snakes, thorns &c., in those pains, or in the means of those pains. Desire, aversion, and infatuation, in virtue of being incentives to activity are called defects. Accordingly the aphorism of Gautama, Defects have for their characteristic incitement to activity. U.

तन्मयत्वाच्च ॥ ११ ॥

Aph. 11. Also through habituation to that.

[2] The words 'desire and aversion arise' are to be supplied. Habituation is a particular powerful reproduction engendered by use of objects of sense, by the influence of which it is that the unhappy lover, who does not win his mistress, sees his beloved in every object; and he who has been once bitten by a snake in consequence of the forcible reproduction sees snakes everywhere. It has therefore been said: Habituation to an object is its luminous revelation external or internal. U.

अदृष्टाच्च ॥ १२ ॥

Aph. 12. Also through destiny.

[1] एवं धर्माधर्मप्रादुर्भावं प्रति यमसहकारिणमभिधाय दोषं सहकारिणमभिधातुं दोषनिदानमाह स्रक्चन्दनवनितादिविषयसेवनजन्मनः सुखादुत्तरोत्तरं तज्जातीये सुखे तत्साधने वा राग इच्छा संजायते अहिकण्टकादिजन्मनो दुःखात् तत्र तत्साधने वा द्वेष इत्यपि द्रष्टव्यम् रागद्वेषमोहाः प्रवर्त्तकत्वेन दोषा इत्यभिधीयन्ते तथा च गौतमीयं सूत्रम् प्रवर्तनलक्षणा दोषाः इति ॥

[2] रागद्वेषौ भवत इति शेषः विषयाभ्यासजनितो दृढतरः संस्कारविशेषः तन्मयत्वं यद्वशात् कामातुरस्य कामिनीमलभमानस्य सर्व्वत्र कामिनीदर्शनम् [illegible] भुजभुजङ्गदष्टस्य तत्र दृढतरसंस्कारतः सर्व्वत्र भुजङ्गदर्शनम् तदुक्तं तन्मयत्वं तत्प्रकाशो बाह्याभ्यन्तरतस्तथा इति ॥

Digitized by Google

'The words 'desire and aversion [arise]' are to be supplied. Though destiny be a universal cause, yet in relation to these it sometimes assumes the nature also of a special cause. Such cases are to be inferred as the desire of a mistress at the commencement of youth even in one who has not experienced in that birth the pleasures of love; the aversion towards snakes even in those who have not experienced pain from snake-bites, &c. U.

जातिविशेषाच्च ॥ १३ ॥

Aph. 13. Also through particularity of race.

'Another accessory is stated. Thus on the part of the human race there is desire towards rice &c., on that of deer towards grass &c., on that of camels towards briers, &c. In all these cases destiny which determines such and such a race is the cause; but race, or particular birth is only a means. Similarly the desire of pigeons &c., for refuse. So also the aversion of buffaloes towards a horse, of dogs towards a jackal, of ichneumons towards a snake, &c. is to be inferred. U.

इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः ॥ १४ ॥

Aph. 14. Activity in merit or demerit has for its antecedents desire and aversion.

'Activity in a lawful action has desire for its condition; in an unlawful action, injury &c., activity has aversion for its condition. Activity conditioned by desire in sacrifice &c. begets merit; activity conditioned by aversion in injury &c. begets demerit. These same desire and aversion cause the series of transmigrations. Accordingly the aphorism of Gautama, Activity is energy of word, thought, and body. Verbal activity is energy of voice: it is meritorious so far forth as it is true, kind, and useful; evil so far forth as untrue, unkind, useless. By thought mind, by which we think or know, is intended. Mental activity therefore is compassion towards all creatures, &c. Bodily activity is almsgiving ministration &c., evil in ten ways, and good in ten ways. U.

तत्संयोगो विभागः ॥ १५ ॥

Aph. 15. By these are conjunction and disjunction.

'Existence in a future state is now declared to be the use of merit and demerit. By these—by merit and demerit—conjunction—birth—is caused. By conjunction is here intended connection with non-previous pains of bodily organs. Disjunction is the disjunction of body and mind characterised as death. The meaning is therefore that this transitory world, a series of births and deaths, otherwise termed existence in a future state, is caused by merit and demerit. U.

आत्मकर्मसु मोक्षो व्याख्यातः ॥ १६ ॥

Aph. 16. Emancipation is declared as dependent on the actions of the soul.

'This it is which is the separation of body and mind. When there exist the actions of the soul, emancipation ensues. The actions of the soul are as follows:—hearing, meditation, the practise of devotion, abstraction, a sitting posture, restraining the vital airs, the acquisition of quietism and self-subjugation, the presentation of one's own and others' souls, knowledge of merit and demerit previously acquired whereof there must be fruition in other bodies and places, the formation of various bodies suitable to the fruition thereof, the destruction of merit and demerit by fruition, and emancipation characterised as removal of pain consequent on the cessation of birth resulting from the cessation of activity in consequence of the non-production of further merit and demerit by overcoming the mist of defects characterised as desire and aversion. Of these the prime act of soul is knowledge of the real nature of the six categories. U.

SEVENTH BOOK. FIRST DAILY LESSON.

उक्ता गुणाः ॥ १ ॥

Aph. 1. The qualities have been stated.

'Desirous of investigating the qualities in the seventh book, the author reminds us of their enunciation and definition. The meaning is that the qualities have been stated, enunciated, and defined. V.

---

¹ रागद्वेषावितिशेषः यद्यप्यदृष्टं साधारणकारणं तथापि क्वचित्तौ प्रति असाधारणतामप्यनुभजति यथा तज्जन्मन्यननुभूतकामिनीसुखस्यापि यौवनोद्भेदे कामिनीरागः अननुभूतभुजङ्गदंशदुःखानामपि भुजङ्गेषु द्वेष इत्याद्युन्नेयम् ॥

² सहकार्य्यन्तरमाह । तथाहि मनुष्यजातीयानामन्नादौ रागः मृगजातीयानां तृणादौ करभजातीयानां कण्टकादौ तत्रापि तत्तज्जातिनियामकमदृष्टमेव तन्त्रं द्वारमात्रन्तु जातिर्जन्मविशेषः एवं पारावतादीनामवस्करे रागः तथा महिषजातीयानां तुरङ्गे द्वेषः सारमेयाणां शृगालेन नकुलानां भुजङ्गमे इत्याद्युन्नेयम् ॥

³ विहिते कर्मणि रागनिबन्धना निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः रागनिबन्धना यागादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मं तावेतौ रागद्वेषौ संसारमनुवर्तयतः तथा च गौतमीयं सूत्रम् प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः इति वागारम्भो वाचिकी प्रवृत्तिः सत्यं प्रियं हितमिति पुण्या असत्यमप्रियमहितमिति पापा बुद्धिः बुध्यते ज्ञायतेऽनेनेति मनउच्यते तेन मानसी प्रवृत्तिर्भूतदयादिः शारीरीप्रवृत्तिर्दानं परिचरणमित्यादिका दशविधा पापा दशविधा पुण्या चेति ॥

¹ इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावमाह । ताभ्यां धर्माधर्माभ्यां संयोगो जन्म अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इहोच्यते विभागस्तु शरीरमनोविभागो मरणलक्षणः तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावस्याजवञ्जवीभाव इति वैदिकी संज्ञा ॥

² अयमेव शरीरविभागः आत्मकर्मसु सत्सु मोक्षो भवतीत्यर्थः तत्रात्मकर्माणि तावत् श्रवणं मननं योगाभ्यासो निदिध्यासनमासनं प्राणायामः शमदमसम्पत्तिः आत्मपरात्मसाक्षात्कारो देहदेशान्तरोपभोग्यपूर्वोपात्तधर्माधर्मपरिज्ञानं तदुपभोगानुरूपनानादेहनिर्माणं तयोर्भोगेन प्रक्षयो रागद्वेषलक्षणदोषतुषारक्षोदादुत्तरधर्माधर्मयोरनुत्पादात् प्रवृत्त्यपाये जन्मापायो दुःखापायलक्षणोऽपवर्गस्तत्र षट्पदार्थतत्त्वज्ञानमाद्यमात्मकर्म ॥

³ सप्तमे गुणान् परीचिक्षिषुस्तदुद्देशलक्षणे स्मारयति । गुणा उक्ता उद्दिष्टा लक्षिताश्चेत्यर्थः ॥

Digitized by Google

पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च ॥ २ ॥

Aph. 2. Also the colour, taste, smell, and touch of the earth &c., inasmuch as substances are non-eternal, are non-eternal.

[1] The colour, taste, smell, and touch of earth; the colour, touch, and taste of water; the colour and touch of light [or fire]; and the touch of air;—these, inhering in the non-eternal are non-eternal, inasmuch as they cease to be on the cessation of the existence of their substrata. The particle 'also' implies unity, individual unity, extension, gravity, natural fluidity, and viscidity. These also are, in the non-eternal, non-eternal. V.

एतेन नित्येषु नित्यत्वमुक्तम् ॥ ३ ॥

Aph. 3. By this is declared their eternity in things eternal.

[2] By this—by the affirmation that their non-eternity is caused by the non-eternity of their substrata, the eternity of colour &c. in eternal substrata is declared, that is virtually asserted, being involved. The reading adopted by the author of the Vṛitti is 'Non-eternity in things eternal.' In his opinion colour &c. are non-eternal in things eternal, that is in atoms, inasmuch as colour and the other qualities [above mentioned] are destructible by conjunction with fire. But it is to be considered that in this reading there is no congruity between the words 'by this' and 'is declared.' V.

अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥ ४ ॥

Aph. 4. They are eternal in water, light, and air, inasmuch as the substances are eternal.

[3] It may be objected: Why, whereas colour and the other qualities residing in terrene atoms are destructible by conjunction with fire, is it universally stated that they are eternal in things eternal? The things eternal are therefore particularized. The sense is that colour and the other quatilies are not eternal when existing in eternal earth, but are stated in the preceding aphorism to be eternal only when residing in eternal water, light, and air. V.

अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥ ५ ॥

Aph. 5. In things non-eternal they are non-eternal because the substances are non-eternal.

[1] It may be asked whether qualities other than colour &c. existing in things non-eternal are eternal, in which case conjunction &c. would be eternal. It is therefore stated that all qualities which reside in things non-eternal, are non-eternal, in consequence of the non-eternity of their substratum; and that consequently there are no eternal qualities in things non-eternal.

कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ ६ ॥

Aph. 6. [Colour, taste, smell, and touch] produced by burning in earth, have for their antecedents the qualities of their causes.

[2] It is implied that the colour, taste, smell, and touch residing in wholes, have for their antecedents the qualities of their cause, that is that they become manifest from the homogeneous qualities which are attributes of the parts which are the causes of their own substratum. It is thus to be understood that the presentation of colour, taste, smell, and touch residing in the parts which are the non-coinherent causes of colour, taste, smell, and touch existing in the wholes, is by the connection of co-inhesion with the co-inherent. In anticipation of the question how in a dark water-pot &c. after powerful conjunction with fire there is production

[1] पृथिव्या रूपरसगंधस्पर्शाः, जलस्य रूपरसस्पर्शाः, तेजसो रूपस्पर्शौ, वायोः स्पर्शः, एतेषामनित्याश्रितानामनित्यत्वम् आश्रयनाशनाश्यत्वात्, चकारादेकत्वैकपृथक्त्वपरिमितिगुरुत्वसांसिद्धिकद्रवत्वस्नेहानां संग्रहः, तेऽपि अनित्यगता अनित्या भवन्तीत्यर्थः ॥

[2] एतेन आश्रयानित्यत्वहेतुकानित्यत्वकथनेन नित्येषु आश्रयेषु रूपादीनां नित्यत्वमुक्तमुक्तप्रायमर्थापत्तेरित्यर्थः । नित्येष्वनित्यत्वमिति वृत्तिकारसम्मतः पाठः, तन्मते नित्येषु पार्थिवपरमाणुषु रूपादीनामनित्यत्वमग्निसंयोगनाश्यत्वादित्यर्थः, किन्तु तादृशपाठे एतेनेति उक्तमिति च सङ्गतं न भवतीति ध्येयम् ॥

[3] ननु पार्थिवपरमाणुगतानां रूपादीनामग्निसंयोगनाश्यत्वात् कथं नित्येष्विति सामान्यत उक्तमतो नित्यानि विशेषयति । न खलु नित्यपृथिवीगता रूपादयो नित्याः किंतु नित्यजलतेजोवायुगता त एव नित्याः पूर्वसूत्रे उक्ता इत्यर्थः ॥

[1] ननु रूपादिभिन्ना अनित्यगता गुणाः किं नित्यास्तथा च संयोगादिकमपि नित्यं स्यादित्यत आह । अनित्येषु ये गुणा वर्तन्ते ते सर्व एवानित्या आश्रयानित्यत्वात् तथ चानित्येषु नित्या गुणा न सन्त्येवेत्यर्थः ॥

[2] रूपरसगंधस्पर्शाः अवयविगता इति विवक्षणीयं, कारणगुणपूर्वकाः स्वाश्रयस्य यानि कारणानि अवयवा इति यावत् तेषां ये गुणाः स्वसजातीयगुणाः तेभ्यः प्रादुर्भवन्तीत्यर्थः तथा चावयविवृत्तिरूपरसगन्धस्पर्शानामसमवायिकारणानि अवयवगता रूपरसगंधस्पर्शास्तेषां समवायिकारणप्रत्यासत्तिस्तु स्वसमवायिसमवायसम्बन्धेनेति बोध्यम्, ननु श्यामघटादौ बलवदग्निसंयोगानन्तरं कथं रक्ताद्युत्पत्तिरित्यत उक्तं पृथिव्यां पाकजा इति अपीतिशेषः तथा च पृथिव्यां रूपरसगन्धस्पर्शाः पाकजा अपि, पाकस्तु रूपादिपरावृत्तिफलकविजातीयतेजःसंयोगः, सोऽपि रूपादेरसमवायिकारणम्भवति, तत्र च परमाणावेव पाकाद्रूपादिपरावृत्तिर्नावयविनीति पीलुपाकवादिनः, तन्मते विजातीयाग्निसंयोगादारम्भकसंयोगनाशेन द्व्यणुकपर्य्यन्तावयविनाशे सति परमाणौ रक्ताद्युत्पत्तिस्ततो विजातीयाग्निसंयोगादारम्भकसंयोगानुगुणक्रियाद्युत्पत्त्यारम्भकसंयोगादिप्रक्रमेण पुनर्द्व्यणुकादिमहावयवपर्य्यन्तानामुत्पत्तिर्भवतीति । पिठरपाकवादिनस्तु अवयविनां सच्छिद्रतया विजातीयाग्निसंयोगात् तेषामपि रूपादिपरावृत्तिर्भवति न तु तत्रावयविनां नाशः प्रत्यभिज्ञाविरोधादित्याहुः । अत्र च पाकप्रक्रिया ग्रंथगौरवभिया परित्यक्ताऽन्यत्रानुसन्धेया । ये तु नीलरूपादिव्यक्तय एकैका एव नित्या इत्याहुस्तन्मते नीलरूपं नष्टं श्यामरूपमुत्पन्नमित्यादिप्रतीतिव्यवहारयोरनुपपत्तिः समवायसम्बन्धस्य नित्यतया तद्विषयतया तयोरुपपत्त्यसम्भवात् अन्यथा घटादीनामपि नित्यत्वमेकत्वञ्चापद्येत, घटस्य रूपमिति भेदप्रत्ययात् गुणगुणिनोर्नाभेदः नीलपीतादिनानातन्त्वाद्यारब्धे पटादौ चित्ररूपमेव जायते तादृशपटस्य नीरूपत्वे तच्चाक्षुषानुपपत्तेः, नव्यास्तु तत्र पटे तत्तदवयवावच्छेदेन नानैव रूपाणि भवन्ति । अतएव "लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" ॥ इत्यादिकं सङ्गच्छते इत्याहुः, रसगन्धयोस्तु न चित्रत्वं नानारसादिमदवयवारब्धानामवयविनां नीरसत्वादिस्वीकारेऽपि क्षत्यभावात्, चित्रस्पर्शस्तु रूपस्थलीययुक्त्या स्वीकरणीय एवेति संक्षेपः ॥

Digitized by Google

of red colour &c., it is stated that in earth [those qualities] produced by burning also—for the word also is to be supplied—colour, taste, smell, and touch in earth, even when produced by burning, [have for their antecedents the qualities of their causes.] Burning is heterogeneous conjunction with fire resulting in change of colour, &c. This also is a non-coinherent cause of colour, &c. On this subject those who maintain the combustion of atoms hold that it is in the atom that the change of colour &c. consequent on combustion takes place and not in the whole. According to their doctrine the red colour &c. is produced in the atom after the dissolution of the whole into binary atomic aggregates by destruction of the originative conjunction consequent upon heterogeneous conjunction with fire; and after this ensues again production beginning with binary aggregates and terminating in the whole possessed of magnitude, in the progressive order of originative conjunction &c. caused by the production of action &c., conformable to originative conjunction, in consequence of conjunction with heterogeneous fire. Those who maintain the combustion of [wholes such as] the pot teach that, the wholes being porous, it is in them that the change of colour &c. takes place in consequence of conjunction with heterogeneous fire; and that there is in this case no destruction of the wholes, for this would be contrary to observation. The order of combustion is here omitted to avoid voluminous prolixity, and may be sought elsewhere. According to the doctrine of those who teach that particular blue colours &c. are only individually eternal, the cognition and application that blue colour has ceased to exist and dark colour has been produced is impossible, inasmuch as connection by co-inherence is eternal, and the production of such a cognition and application with connection by co-inhesion as its object is impossible. Else [were it possible] the eternity and unity of water-pots &c. would follow. There being a cognition of difference in the notion of the colour of a water-pot, there cannot but be a difference in the attribute and then in that in which the attribute exists. In a piece of cloth &c. originating in various threads &c. of blue, yellow, and other colours, there is produced a composite colour, for were such cloth colourless its ocular perception would be impossible. In conformity with this, they say, is the verse; That is said to be a black ox which is ruddy in colour in the face, yellowish in the tail, and white in the horns and hoofs. Taste and smell are never composite, there being no want of argument if it be but allowed that wholes originated by parts, possessing various tastes &c. are tasteless, &c. A composite touch must be allowed according to the analogy of colour. V.

एकद्रव्यत्वात् ॥ ७ ॥

Aph. 7. Because there is only one substance.

[1] In reply to the objection How the qualities of the cause as not existing in the effect can be productive of the qualities of the effect, there being a difference of substratum? it is stated that it is because there exists that whereof there is one substance as the substratum, that is because there is a common substratum. Notwithstanding, therefore, that the qualities of the cause do not exist in the relation of immediate co-inherence in the effect, yet inasmuch as, in the relation of community of substratum characterised as co-inherence with the co-inherent, they do exist in the effect, the production by them of the qualities of the effect is not impossible. V.

अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥ ८ ॥

Aph. 8. The perception and non-perception of the atomic and of that which has magnitude have been explained to be constant.

[2] The word eternal [or constant] refers, as a subject to that which contains it, to the fourth book which treats of eternity. The respective application of the words perception and non-perception is according to the rule: That which is connected with another, is connected with the more remote. Non-perception of the atomic is thus

---

[1] ननु कारणगुणानां कार्य्येऽसत्त्वात् कथं कार्यगुणजनकत्वं वैय्यधिकरण्यादित्याशङ्कायामाह । एकं द्रव्यमधिकरणं यस्य तत्त्वात् सामानाधिकरण्यादित्यर्थः, तथा च कारणगुणानां साक्षात् समवायसम्बन्धेन कार्य्येऽसत्त्वेऽपि स्वसमवायिसमवायरूपसामानाधिकरण्यसम्बन्धेन कार्य्ये सत्त्वात्तद्गुणजनकत्वं नानुपपन्नमितिभावः ॥

[2] नित्ये इति विषयेण विषयिणं नित्यत्वप्रतिपादकं चतुर्थाध्यायमुपलक्षयति उपलब्ध्यनुपलब्धी इति यथायोगमन्वयः "येन यस्याभिसम्बन्धो दूरस्थस्यापि तस्य सः" इतिन्यायेन. तथाचाणोरनुपलब्धिरिति लभ्यते तदेवं स्थूलो नीलः कलश इति प्रात्यक्षिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्यन्तं परिमाणमुन्नीयते द्रव्यत्वाच्च किञ्च द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं नहि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथा च द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते यदि हि घटादिस्वरूपं परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानीयेत तथाच प्रैषसंप्रतिपत्ती विरुध्येयाताम्, एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति, मानव्यवहारासाधारणकारणत्वं द्रव्यसाक्षात्कारकारणविषयनिष्ठसामान्यगुणत्वं वा महत्त्वं मानव्यवहारो महत्त्वावितस्यादिव्यवहारे न तु फलसङ्ख्यादिव्यवहारः, तच्च परिमाणञ्चतुर्व्विधं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च. तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्तिनी त्रसरेणुमारभ्य महावयविपर्यन्तं महत्त्वदीर्घत्वे. एतञ्च सर्वाण्यपि द्रव्याणि परिमाणाद्भवन्ति, बिल्वामलकादावणुत्वव्यवहारः समिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारो भाक्तः, भक्तिश्चात्र प्रकर्षभावाभावः, आमलके यः प्रकर्षभावस्तस्याभावः कुवले, बिल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणमुख्योभयभागित्वाद् भक्तिपदवाच्यः ॥ दीर्घत्वह्रस्वत्वे नित्ये न वर्तेते इत्येके, परिमाण एव ते न भवत इत्यपरे, महत्सु दीर्घमानीयतामितिवत् महत्सु वर्तुलं त्रिकोणञ्चानीयतामिति निर्धारणबलाद्वर्तुलत्वादीनामप्याप्रतेरिति तेषामाशयात् ॥

Digitized by Google

obtained. In the perceptive cognition, therefore, determined as a large blue water-pot, the extension is just as much an object as the blue colour; and by means of this extension extension terminating in the atomic [as a minimum], is inferred, as also from substantiality. Moreover of the perceptibility of substance the cause is coloured extension; for without magnitude substance cannot be perceived. Accordingly it is decided that, as being a cause of perceptibility of substance, and as being of itself perceptible, extension is a quality. For were the form of a water-pot &c. its extension, a man would bring a water-pot, when he was told to bring the great; and thus there would be a contradiction in the order and the apprehension of it, and likewise from the term water-pot extension would be cognised, or from the term extension a water-pot. The notion of magnitude is that of a particular cause of the usage of measurement, or that of a universal quality existing in objects and the cause of the presentation of substance. The usage of measurement is the usage of cubits, spans &c., not the usage of weights, numbers, &c. This extension is of four kinds, the great, the small, the long, and the short. Of these infinite greatness and infinite length exist in the four pervading substances, absolute smallness and absolute shortness exist in atoms. Intermediate smallness and intermediate shortness exist in binary atomic aggregates. Greatness and length reside in substances from tertiary atomic aggregates upwards to composite wholes. In this manner all substances whatever possess two extensions [or dimensions.] The notion of smallness in a vilva or ámalaka-fruit, and of shortness in fuel, sugar-canes &c. is relative. The relativity in this case is the existence or non-existence of greater size. There is non-existence in a jujube of the greater size, of which there is existence in an emblic myrobalan. There does not exist in an emblic myrobalan the greater size which exists in a vilva-fruit. This as containing as parts both the primary and secondary magnitudes is described by the term relative magnitude. U.

कारणबहुत्वाच्च ॥ ९ ॥

Aph. 9. Also in consequence of a plurality of causes [extension is produced.]

The particle 'also' implies the addition of magnitude and coalescence. 'Extension is produced' is the ellipse to be supplied in the aphorism. Among these plurality of causes alone produces greatness and length in a tertiary atomic aggregate, since greatness and accretion do not exist in their cause. The plurality is derived from the relative idea of the Deity. The influence of particular destiny determines a plurality of objects in the divine idea. Similarly duality existing in two atoms is productive of extension in a binary atomic aggregate. In a piece of cloth originated by two threads not coalescent it is magnitude alone which is the non-coinherent cause, inasmuch as plurality and coalescence do not there exist. But where a ball of cotton is originated by two balls of cotton, in this case coalescence is the cause, for there is here observed an increase of extension, and there is no plurality; and magnitude even though it existed could not be an occasion of increase of extension. Such being the case even were magnitude here a cause, there would be no failure in the argument. Hence it has been said: By two, by one, or by all. Coalescence is an originative conjunction, and is defined as conjunction in an object of some of its constituent parts towards itself, in which object some of the constituent parts are non-conjunct towards itself; for it is said that this conjunction of constituent parts involves a lax conjunction of its own portions, is productive of extension, and is involved in the origination of qualities and actions. U.

A. E. G.

(To be continued.)

[1] चकारो महत्त्वप्रचयौ समुच्चिनोति. परिमाणमुत्पद्यते इति सूत्रशेषः तत्र कारणबहुत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः. एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामप्रचिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात् यत्र च द्वाभ्यां तूलकपिण्डाभ्यां तूलकपिण्डारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात् एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तं "द्वाभ्यामेकेन सर्वैर्वा" इति । प्रचयश्च आरम्भकः संयोगः स च स्वाभिमुखकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः सचावयवसंयोगः स्वावयवप्रशिथिलसंयोगापेक्षः परिमाणजनकः गुणकर्मारम्भे सापेक्ष इति वचनात् ॥

NOW READY.

Vols. I. and II.

THE RÁMÁYAN OF VÁLMÍKI,

TRANSLATED INTO ENGLISH VERSE

BY

R. T. H. GRIFFITH, M. A.

Price per Vol. Rs. 6. Postage 6 anas.

BENARES: Messrs. E. J. Lazarus & Co.,
CALCUTTA: Messrs. Berigny & Co.,
LONDON: Messrs. Trübner & Co.,

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 59. Benares, April 1st, 1871. Vol. V.

॥ भाट्टचिन्तामणेस्तर्कपादः ॥

परामर्शश्च यदि पक्षविशेष्यकस्तदा तद्विशेष्यिकैवानुमितिः । हेतुविशेष्यके तु साध्यविशेष्यिकेति मणिकृत् । उभयविधेनापि पक्षविशेष्यिकैवेति नव्याः । अत्र धूमलिङ्गकपर्वतपक्षकवह्निविधेयकानुमितिं प्रति धूमपरामर्शस्य हेतुत्वं, धूमलिङ्गकत्वं स्वाव्यवहितोत्तरत्वसंबन्धेन धूमज्ञानवत्त्वम्, अव्यवहितोत्तरत्वं च धूमज्ञानाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणत्वरूपम् । तेनापेक्षाबुद्ध्यात्मकपरामर्शसंग्रहः । एवं तत्तत्परामर्शानां कारणतेति । ननु सर्वेषु परामर्शेष्वनुमितिकारणतावच्छेदकतया परामर्शत्वं जातिः किमिति नाभ्युपेयते । चाक्षुषत्वादिना संकर इति चेत्, तर्हि तस्यां जातौ मानसत्वव्याप्यताङ्गीकार्या, चाक्षुषपरामर्शानन्तरं जायमानायामनुमितौ व्यभिचारवारणाय मध्ये मानसपरामर्शकल्पनेन संभवात् । न च चाक्षुषसामग्र्या मानसप्रतिबन्धकत्वेन तदानीं मानसोत्पादासंभव इति वाच्यम् । फलबलेन चक्षुर्योगाभावेन चाक्षुषसामग्र्यभावस्य सत्त्वात् । ननु परामर्शत्वं स्मृतित्वव्याप्यम् । चाक्षुषादिपरामर्शोत्तरोत्पद्यमानानुमितिस्थले भवत इव स्मरणरूपपरामर्शकल्पनान्न क्षतिः । एवं च स्मरणस्य संशयात्मकत्वाभावेन संशयानन्तरमनुमित्युत्पादनासंभवात् । विशेषतः परामर्शकारणतायां निश्चयत्वस्याप्रवेशेनातिलाघवमिति चेत्, चाक्षुषादिपरामर्शोत्तरोत्पद्यमानानुमितिस्थले स्मरणात्मकपरामर्शकल्पने तज्जनकसंस्कारकल्पने चातिगौरवापत्तेः । अनुमितिजनकतावच्छेदकजातेः संशयात्मकमानसव्यावृत्तत्वकल्पनेन संशयात्मकपरामर्शादनुमित्यापादनासंभवेन विशेषहेतुतायां निश्चयत्वाप्रवेशस्य तुल्यत्वात् । समूहालम्बनात्मकपरामर्शोत्तरमेकानुमितौ तद्व्याप्यवत्तापरामर्शान्तरकल्पनेन समूहालम्बनात्मकपरामर्शेऽनुमितिजनकतावच्छेदकजातिर्न कल्प्यते । अतो न तत्र द्वितीयानुमितिः । तस्मात् परामर्शत्वं जातिरिति चेत् । अत्र केचित् । उक्तनयेनेष्टहेतुताज्ञानादौ प्रवृत्तिजनकतावच्छेदकवैजात्यस्यापि मानसत्वव्याप्यत्वेन सिद्धेष्टसाधनत्वादिपरामर्शविशेषे प्रवृत्तिजनकतावच्छेदकवैजात्येन संकरप्रसङ्गात् । न च प्रवृत्तिजनकतावच्छेदकवैजात्यं चाक्षुषत्वव्याप्यमिति वाच्यम् । परामर्शत्वस्य चाक्षुषत्वादिव्याप्यत्वेन विनिगमनाविरहात् । अतो न परामर्शत्वं जातिरित्याहुः ॥

अत्र गौतमीयाः । वह्न्याद्यनुमितौ वह्निव्याप्यालोकवान्पर्वत इत्यादिविशिष्टपरामर्शस्यैव हेतुत्वं, न त्वालोको वह्निव्याप्य आलोकवान्पर्वत इति ज्ञानद्वयस्य, गौरवात् । यत्र च ज्ञानद्वयादनुमितिस्तत्र विशिष्टज्ञानकल्पनान्न व्यभिचार इत्याहुः ॥

मीमांसकास्तु वह्निव्याप्यधूमवान् पर्वत इति विशिष्टपरामर्शस्य हेतुत्ववादिनये व्याप्त्यंशे निश्चयत्वं निवेश्य धूमांशेऽपि निश्चयत्वं निवेशनीयम् । तथा च निश्चयत्वस्य तदभावाप्रकारकत्वरूपबहुतरपदार्थघटितत्वेन तेषां परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम् । ज्ञानद्वयवादिनये तु ज्ञानस्य भिन्नतया निश्चयत्वप्रवेशेऽपि न मिथो विनिगमनाविरहस्तत्र लाघवमित्याहुः ॥

न च परामर्शवादिनये व्याप्त्यवच्छिन्ना या हेतुनिष्ठप्रकारता तन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन

Digitized by Google

हेतुत्वकल्पनेन व्याप्त्यंशे निश्चयत्वानिवेशेन नोपदर्शितगौरवमिति वाच्यम्। वह्निव्याप्त्यंशे निश्चयत्वानिवेशे वह्निव्याप्यो धूम इति विशेषणतावच्छेदकप्रकारकनिर्णयकाले व्याप्त्यभावप्रकारकं ज्ञानं जायतामितीच्छासत्त्वे व्याप्त्यंशे संशयात्मकतथाविधविशिष्टवैशिष्ट्यबोधोत्पत्तौ बाधकाभावः । तथा च तादृशज्ञाने व्याप्त्यंशे निश्चयत्वनिवेशेन गौरवतादवस्थ्यात् । न च तादृशज्ञानस्याहार्यत्वेन न तस्मादनुमित्यापत्तिः, आहार्यपरामर्शादनुमित्यापत्तिवारणार्थमनाहार्यत्वनिवेशस्यावश्यकत्वादिति वाच्यम्। अनुमितिजनकतावच्छेदककोटावनाहार्यत्वस्यानुगतस्याशक्यनिर्वचनत्वेन तद्व्यक्तिविश्रान्ततया तथाविधतद्व्यक्तित्वावच्छिन्नभेदकूटस्यानुमितिजनकतावच्छेदककोटौ निवेशमपेक्ष्य व्याप्त्यंशे निश्चयत्वस्यैव तर्कसहत्वात् तथा च गौरवं तदवस्थमिति दिक् ॥

ज्ञायमानं लिङ्गमनुमानमिति के चित् । भूतभाविलिङ्गाभ्यामनुमित्यजननापत्तेस्तज्ज्ञानमिति युक्तम् । तच्चानुमानं द्विविधं, स्वार्थं परार्थं च । परामर्शेन स्वस्यैव साध्यज्ञानजनकं स्वार्थम् । प्रतिज्ञाद्यवयवप्रयोगेण परस्य साध्यज्ञानजनकं परार्थम् । अवयवत्वं चानुमानवाक्यैकदेशत्वम् । ते च प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः पञ्च । साध्यविशिष्टपक्षप्रतिपादकवाक्यत्वं प्रतिज्ञात्वं,यथा 'पर्वतो वह्निमा'निति । तृतीयान्तपञ्चम्यन्तान्यतरानुमितिप्रयोजकवाक्यत्वं हेतुत्वं, यथा 'धूमवत्त्वा'दिति । सदृष्टान्तव्याप्तिप्रतिपादकवाक्यत्वमुदाहरणत्वं, यथा 'यो धूमवान् सो ऽग्निमान्' 'यथा महानम' इति । व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षप्रतिपादकवाक्यत्वमुपनयत्वं, यथा 'तथा चाय'मिति । व्याप्तिविशिष्टवैशिष्ट्यहेतुकसाध्यविशिष्टपक्षप्रतिपादकवाक्यत्वं निगमनत्वं, यथा 'वह्निव्याप्यधूमवत्त्वाद् वह्निमा'निति । उदाहरणं साधर्म्योदाहरणं वैधर्म्योदाहरणं चेति द्विविधम् । हेतुमदुद्देशेन साध्यवदुपादानमाद्यम् । साध्याभाववदुद्देशेन हेत्वभाववदुपादानं द्वितीयम् । तत्रैकेनैव गतार्थत्वान्न द्वयोरावश्यकतेति । एवं चावयववाक्यैरवान्तरवाक्यार्थज्ञाने जनिते धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो, धूमव्यापकवह्निमन्महानससदृशो वह्निव्याप्यधूमवत्त्वहेतुकवह्निमदभिन्न इति महावाक्यार्थज्ञानात्परः साध्यं बुध्यत इत्यत्रपादीयाः ॥ प्रतिज्ञाहेतूदाहरणैरेव धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो वह्निव्याप्यधूमवन्महानससदृश इति वाक्यार्थज्ञानादनुमितिजननादुपनयनिगमने व्यर्थे । न च पर्वते धूमवैशिष्ट्यज्ञानार्थमुपनयः । प्रतिज्ञाहेतुभ्यामेव सिद्धेः । निगमनप्रयोगस्तु सर्वथैव व्यर्थः । एवं चोपनयनिगमने नावयवाविति ॥ यद्वोदाहरणप्रभृतिभिरेव साध्यसिद्धेः प्रतिज्ञाहेत्वोर्न किं चित्प्रयोजनमिति दिक् ॥

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानप्रकारो हेतुनिष्ठदोषो हेत्वाभासः । भवति चासिद्धत्वानैकान्तिकत्वबाधकत्वादिज्ञानाभावः प्रतिबन्धकाभावविधया ऽनुमितिकारणीभूतस्तत्प्रतियोगिप्रमाप्रकारत्वमसिद्धत्वादीनां, तेन हेतुनिष्ठो दोषो हेत्वाभासः। यादृशविशिष्टविषयत्वेन यथार्थज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वमिति यावत् । यद्वा तादृशप्रमाविषयत्वम् । तेन दुष्टो हेतुर्हेत्वाभासः । धूमो वह्निव्यभिचारीत्यादिभ्रमवारणाय यथार्थेति । उपाधिवारणाय कारणेति । उपाधिज्ञानस्य साक्षात्प्रतिबन्धकत्वाभावेन तदभावस्यानुमितिप्रयोजकतया हेतुत्वाभावात् । ते त्रयो ऽसिद्धानैकान्तिकबाधकाः । तत्रासिद्धिः, स्वरूपासिद्धिः संबन्धासिद्धिर्व्यतिरेकासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्चेति पञ्चधा । हेत्वप्रसिद्धिः स्वरूपासिद्धः । बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादिति । अत्र सर्वज्ञत्वं हेतुरप्रसिद्धः । पक्षे व्याप्यत्वेनाभिमतस्याभावः स्वरूपासिद्धिरित्यत्रपादीयमते त्वीश्वरे प्रसिद्धिसत्त्वे बुद्धे तदभावादक्षतिः । पक्षे व्याप्यत्वाभिमतस्य हेतुतावच्छेदकसंबन्धेनाभावः संबन्धासिद्धिः । वह्निरदाहकः शीतत्वादिति । पक्षतावच्छेदकहेत्वोरभेदे व्यतिरेकासिद्धिः । गोशब्दः सास्नादिमद्वचनो गोशब्दत्वात् । अयमसाधारणानैकान्तिक इत्यत्रपादीयाः । इदमेव पक्षमात्रवृत्तित्वमसाधारणस्य । अत्र साध्यवत्साध्याभावसाधकतया ऽनुमितिप्रतिबन्धो दूषकताबीजम् । पक्षाप्रसिद्धिराश्रयासिद्धिः । आकाशो नित्यो निरवयवद्रव्यत्वादिति । सौत्रान्तिकमाकाशाभाववादिनं प्रत्याश्रयासिद्धिः । पक्षतावच्छेदकाप्रसिद्धिरपि सा । काञ्चनमयपर्वतो वह्निमानिति । पक्षैकदेशे हेतोरवृत्तित्वं व्याप्यत्वासिद्धिः । यथा वायुराकाशश्चानित्यो मूर्तत्वादिति । साध्ये साध्यतावच्छेदकस्य, हेतौ हेतुतावच्छेदकस्याप्रसिद्धिर्व्याप्यत्वासिद्धिः । काञ्चनमयवह्निमान् काञ्चनमयधूमादिति । एवं नीलधूमादित्यादावपि नीलधूमत्वस्य गुरुतया हेतुतानवच्छेदकत्वन सापि व्याप्यत्वासिद्धिरित्यत्रपादीयाः । साध्यसंदेहजनको हेतुरनैकान्तिकः । संदेहजनकत्वं च साध्यतदभावसंबन्धित्वज्ञानेन सत्प्रतिपक्षितत्वेन च । यथा नित्यः शब्दो ऽमूर्तत्वादिति । अत्रामूर्तत्वमनित्यक्रियादिसाधारणत्वात् साध्यसंदेहं जनयति । एवं वायुरप्रत्यक्षो ऽरूपिद्रव्यत्वात् । वायुः प्रत्यक्षो महत्त्वेसत्युद्भूतस्पर्शवत्त्वात् । अत्रोभयोः समबलत्वात्साध्यसंदेहजनकतेति । अत्र साध्यतदभावव्याप्यताज्ञानात्परस्परानुमितिप्रतिबन्धो न संशयाकारानुमितिरित्यत्रपादीयाः। अत्राहुः । स्थाणुत्वपुरुषत्वव्याप्यवत्ताज्ञाने प्रत्यक्षरूपसंशयवत्सत्प्रतिपक्षस्थलेपि संशयाकारानुमितिरस्तु । यत्रैक-

कोटिव्याप्यदर्शनं प्रबलं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धाच्चसंशयः । फलबलेन चाधिकसमबलभावः कल्प्य इति ॥ अत्र नव्याः । तदभाववत्ताज्ञानस्येव तदभावव्याप्यवत्ताज्ञानस्यापि लौकिकसन्निकर्षाजन्यज्ञानत्वमेव प्रतिबध्यतावच्छेदकं तेन न संशयाकारानुमितिरित्याहुः ॥ बाधकस्तु साध्याभावसाधकः । अयं विरुद्ध इत्यक्षपादीयाः । यथा शब्दो नित्यः कृतकत्वादिति । अत्र कृतकत्वमनित्यत्वव्याप्यं नित्यत्वं बाधते । अयं साध्यसामान्यविपर्ययसाधक इत्युच्यते इति दिक् ॥

तदिदमनुमानं न धर्मप्रमितिजनकं व्याप्याभावेन व्याप्यग्रहादिति ॥

अत्र नैयायिकाः । एवमनुमाननिरूपणस्य जगन्निर्मातृपुरुषधौरेयसिद्धिः प्रयोजनम् । तथाहि । सिद्धसाधनभिया जन्यकृत्यजन्यं द्व्यणुकं पक्षीकृत्य सकर्तृकं कार्यत्वादित्यनुमानेन तत्सिद्धिरित्याहुः । तदापातरमणीयम् । धर्मवदिदमाम्नायगम्यत्वेन तदावेदकानुमानासंभवात् । तथाहि । उक्तानुमानस्याकर्तृकत्वसाधकेन शरीराजन्यत्वेन सत्प्रतिपक्षितत्वात् । यदि चात्र शरीरविशेषणस्य स्वरूपासिद्धिवारकतया व्यर्थविशेषणत्वेन नित्यत्वोपाधिकतया व्यभिचारित्वेन सत्प्रतिपक्षासंभव इति विभाव्यते, तदा भवत्पक्षमेव पक्षीकृत्य शरीरमात्रकर्तृकत्वाभाववद्वस्तुत्वादिति सत्प्रतिपक्षः । न चात्रापि नित्यत्वमुपाधिः । देहाङ्कुरादावेवाशरीरमात्रकर्तृकत्वसंदेहेन घटादौ तदभावस्यासंदिग्धतया साध्यव्यापकत्वाभावात् । कार्यत्वहेतोश्चाशरीरमात्रकर्तृकत्वाभावसाधकतया साधारणानैकान्तिकत्वं च बोध्यम् । अतो वेद एवेश्वरसिद्धौ प्रमाणं नान्यदिति दिक् ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ ईश्वरवादः ॥

नन्वेवं वह्निर्दाहानुकूलातीन्द्रियधर्मसमवायी, दाहजनकत्वाद्, आत्मवदित्यनुमानस्यानुकूलतर्काभावेनाप्रयोजकत्वादुत्तेजकाभावविशिष्टमण्यादिप्रतिबन्धकाभावस्यैव दाहजनकतया मण्यादिसमवधाननाश्यतया ऽपि शक्तिकल्पनस्यानुपपत्तेस्तद्बोधकवेदाभावाच्च शक्तिरपि न सिध्येदिति चेन्न । तृणारणिमणीनां व्यभिचारेण वह्नित्वावच्छिन्नजनकत्वग्रहानुपपत्त्या कार्यनिष्ठवैजात्यकल्पनापूर्वकहेतुहेतुमद्भावत्रयकल्पनमपेक्ष्य तृणादिनिष्ठजनकत्वावच्छेदकसहजशक्त्यङ्गीकारेणैकहेतुहेतुमद्भावकल्पनालाघवतर्कसहकृततृणादिपक्षकवह्निजनकत्वहेतुकतादृशधर्मानुमानस्य तत्र मानत्वात् । एवं वैकल्पिकव्रीहियवयोरपि हेतुताग्रहे लाघवं, व्यभिचारवारणं च । न च प्रदेयप्रकृतित्वेनोभयोर्हेतुत्वाज्जनकतावच्छेदकशक्त्यभावेऽपि न व्यभिचार इति वाच्यम् । व्रीहिनिष्ठकारणताग्रहे प्रदेयप्रकृतित्वग्रहस्तद्ग्रहे च तद्ग्रह इत्यन्योन्याश्रयात् । नाप्याग्नेयत्वव्याप्यवैजात्यस्य कार्यतावच्छेदकत्वकल्पनेन व्यभिचारपरिहारः । तादृशजातौ मानाभावात् । व्रीहिजन्यतावच्छेदकतयैव तत्कल्पने विकल्पो दत्तजलाञ्जलिः स्यात् । शक्तेश्च प्रत्येकं पर्याप्ततया न समुच्चयापत्तिः । अन्यथा ऽन्यतराभावविशिष्टान्यतरस्योभयाभावविशिष्टव्रीह्यादेर्वा हेतुत्वकल्पने गौरवापत्तिः व्यभिचारश्च । अतो जनकतावच्छेदकतया सहजशक्तिस्तावदावश्यकी । एवमाधेयशक्तिरपि प्रोक्षणादिजन्या व्रीहिनिष्ठा । अन्यथा प्रोक्षणादिजन्यापूर्वस्यात्मनिष्ठतया व्रीहीणां प्रोक्षणकर्मत्वानुपपत्तिः । अदृष्टवदात्मसंयोगेनादृष्टवत्तया कर्मत्वोपपत्तौ घटादीनामपि तत्कर्मत्वापत्तिः । तेन व्रीहिजन्यापूर्वजनिकाधेयशक्तिरप्यावश्यकी । तयोश्चायमेव भेदो यत्सहजशक्तिर्जनकतावच्छेदिका, आधेयशक्तिर्जनिका जन्या चेति । न च प्रोक्षणजन्यशक्तिमद्व्रीहित्वेनापूर्वजनकतया हेतुतावच्छेदकत्वं संभवति । तादृशशक्तिमद्यवजन्यतदपूर्वे व्यभिचारात् । शक्तिव्रीहित्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पने तथा यवत्वेऽपीति तच्चतुष्ककल्पनेऽतिगौरवापत्तिः । एवं सर्पविषमन्त्रोच्चारणजन्यपरशरीरनिष्ठाधेया शक्तिर्जीवनजनिका विषबाधापहारजनिका वा, प्रतिष्ठादिजन्या च पाषाणनिष्ठा पूजाहेतुश्चाण्डालादिस्पर्शनाश्या ऽप्यावश्यकीति । पदशक्तिस्तूभयसिद्धा । तच्छाब्दबोधजनकपदत्वहेतुकानुमानगम्या, वृद्धैस्तत्र प्रयुज्यमानत्वहेतुकानुमानगम्या वा । परं तु सेश्वरेच्छारूपा ऽतिरिक्ता वेत्यावयोर्विवादः । तत्रेश्वरेच्छावदीश्वरसंयोगस्य गुणरूपपदे ऽसंभवात्तत्तत्स्वरूपाणां संबन्धत्वकल्पनमपेक्ष्यैकसमवायस्योचितत्वात् पदानामर्थानामनित्यत्वेऽपि नानुपपत्तिः । वस्तुतस्तु पदानां नित्यत्वाज्जात्यादिरूपाणामर्थानां च तथात्वाच्छक्तिरपि नित्येति तत्संबन्धस्य सुतरां नित्यतेति नानुपपत्तिलेश इति दिक् ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ शक्तिवादः ॥

नन्वेवं कारणता ऽप्यतिरिक्ता स्यात् । तत्र तावत्कार्याभावव्यापकाभावप्रतियोगित्वम् । ईश्वरतज्ज्ञानेच्छादावव्याप्तेः । अत एव न कार्यव्यापकत्वम् । व्याप्तेरनन्तपदार्थगर्भतया गौरवात् । नापि कार्योत्पत्तिप्रतिबन्धकाभावप्रतियोगित्वम् । उत्तेजके ऽव्याप्तेरिति चेन्न । तस्यानन्यथासिद्धनियतपूर्ववर्त्तित्वरूपतया तदभिव्यञ्जकधर्मान्तरकल्पने मानाभावात् । अत्र दैवादागते हेतुत्ववारणाय नियतेति । सद्घटे तद्रासभस्य हेतुत्ववारणायानन्यथासिद्धेति ॥ वस्तुतस्तु नियतपदं व्यर्थम् । तच्चान्यथासिद्धेर्विरहित्वम् । गृहीतस्वतन्त्रान्वयव्यतिरेकानुविधानावच्छेदकधर्मत्वमाद्यम् । अन्यनिरूपितपूर्ववर्त्ति-

Digitized by Google

त्वग्रहहेतुककार्यपूर्ववर्त्तित्वग्रहविषयत्वं द्वितीयम् । क्लृप्तान्वयव्यतिरेकानुविधानसाहित्य तृतीयम् । अत्राक्लृप्तान्वयव्यतिरेकानुविधायिन इति विवक्षणीयम् । तेन न कारणान्तरस्यान्यथासिद्धिः । ईश्वरज्ञानादिसंग्रहश्च । तस्योपादानप्रत्यक्षतया स्वतन्त्रान्वयव्यतिरेकानुविधानात् । तच्च कारणं द्विविधं, स्वरूपयोग्यं फलोपहितं चेति । सहकार्यन्तराभावावच्छिन्नजनकत्वाभाववैशिष्ट्यमाद्यम् । सहकार्यन्तरसाहित्यं द्वितीयम् । अत एव नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियम इति प्रसिद्धिः । एवं च क्लृप्तकार्यपूर्वकालदेशसंबन्धस्यैव कारणतया नाक्लृप्तकारणत्वरूपपदार्थान्तरतत्प्रागभावध्वंसादिकल्पनम् । प्रयोजकत्वं चान्वयव्यतिरेकवत्त्वे सति नियतपूर्ववृत्तित्वमात्रमिति दिक् ॥

प्रसङ्गात्सृष्टिप्रलयौ चिन्त्येते ।

अत्र नैयायिकवैशेषिकौ । त्रिविधं वस्तुजातं, संप्रतिपन्नचेतनकर्तृकं यथाघटादि, संप्रतिपन्नचेतनाकर्तृकं व्योमादि, विप्रतिपन्नचेतनकर्तृकं महीरुहाङ्कुरादि । तत्र तृतीयं सावयवत्वेन सिद्धकार्यत्वकं पक्षीकृत्य बुद्धिमत्कर्तृकं कार्यत्वात्पटवदिति ईश्वरं कर्त्तारमनुमापयति । तस्य च परमाणवः समवायिकारणं, तत्संयोगश्चासमवायिकारणं, क्षेत्रज्ञपदवाच्याजीवात्मनो धर्माधर्मौ च निमित्तकारणम् । सर्गकाले पुनरीश्वरेच्छामदृष्टं च निमित्तमासाद्य परमाणुषु कर्माण्युत्पद्यन्ते । ततो मिथः संयुक्तैः परमाणुभिर्द्व्यणुकादिक्रमेण पृथिव्याद्यवयविचतुष्टयमारभ्यते । न च परमाणूनां निरवयवत्वादव्याप्यवृत्तिः परमाणुसंयोगो न संभवतीति वाच्यम् । तत्र व्याप्यवृत्तिसंयोगस्याङ्गीकारात् । तत्तद्देशस्यावच्छेदकत्वसंभवेनाव्याप्तिसंयोगस्यापि परमाणौ नानुपपत्तिः । निमित्तभूतादृष्टवैचित्र्यादीश्वरेच्छाजन्यक्रियावैचित्र्यवशाच्च जरायुजाण्डजोद्भिज्जस्वेदजभेदं शरीरमारभन्ते, इत्यूचतुः ॥

इदमेव युक्तमस्मन्मतं च । परं त्वेतावान् विशेषः । इच्छायाः कार्यमात्रजनकत्वे न किं चिन्मानमस्ति । न ह्यात्मनिष्ठप्रयत्नोत्पादनं विनेच्छायाः कार्यजनकत्वम् । अचेतननिष्ठक्रियादिजनकत्वं च नानुभूतपूर्वम् । अतस्तादृशहेतुहेतुमद्भावकल्पनेनात्यन्तगौरवापत्तिः । आवश्यकादृष्टहेतुकतयाऽन्यथासिद्धिश्च । अतो धर्माधर्मयोरेव विजातीयक्रियाजनकत्वं, नेश्वरेच्छाप्रयत्नादीनामिति । तेनेश्वरेच्छायां तस्याः कार्यजनकत्वे च "स ऐक्षत बहु स्यां प्रजायेये"ति श्रुतिरेव मानम् । तत्र चा"त्मन आकाशः संभूत" इत्यादाविवेक्षतिरदृष्टं लाक्षणिक इत्यलं पल्लवितेन ॥

ननु प्रलये किं मानमिति चेत् । न । कालकपालान्यावृत्तिप्रागभावः, कार्यद्रव्यानाधारकार्याधिकरणवृत्तिः, अभावत्वाद्, आत्मावृत्त्यन्योन्याभाववद्, इत्यनुमानेन' घटः, कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगी, भावकार्यत्वात्, शब्दवद्, इत्यनुमानेन खण्डप्रलयस्य' पटः, अदृष्टासमानकालीनध्वंसप्रतियोगी, भावकार्यत्वाद्, मुक्त्यव्यवहितप्राक्कालीनज्ञानवद्' बुद्धिः, प्रागभावासमानकालीनध्वंसप्रतियोगिनी, भावकार्यत्वाद्, मुक्त्यव्यवहितप्राक्कालीनादृष्टवत्' दुःखं, गन्धानाधारसमयवृत्तिध्वंसप्रतियोगि, जन्यगुणत्वात्, संस्काराजनकानुभववद्, आकाशवदिति व्यतिरेकिणा' एककालीनाः सर्वे परमाणवः समवायोपादेयप्रबन्धशून्याः, आरम्भकत्वाद्, नष्टपवनारम्भकपरमाणुवद्' दुःखसंततिरत्यन्तमुच्छिद्यते, संततित्वात्, प्रदीपसंततिवद्, इत्याचार्योपदर्शितानुमानेन च महाप्रलयस्य च सिद्धिः । एवं च नन्दान्तं क्षत्रियकुलमित्यादिपौराणव्यवहारोपपत्तिरित्याहुः ॥

अत्र जैमिनीयाः । उक्तानुमानेन "धाता यथापूर्वमकल्पय"दित्यादिमन्त्रलिङ्गेनावान्तरप्रलयसिद्धावपि महाप्रलये नास्ति प्रमाणम् । उक्तानुमानानामुपाधिग्रस्तत्वात् । तथाहि । अमूर्त्तमात्रवृत्त्यभावत्वस्योपाधित्वात् । उक्तः पक्षः, कार्यद्रव्याधाराधारः, मूर्त्तमात्रवृत्त्यभावत्वात्, तन्तुनिष्ठपटप्रागभाववदिति सत्प्रतिपक्षाच्च । एवं द्वितीयतृतीययोरमूर्त्तमात्रवृत्तिभावत्वमुपाधिः । एवं महाप्रलयानुमाने, उक्ताः परमाणवः, समवायोपादेयप्रबन्धवन्तः, प्रागभाववत्त्वात्, कपालवदिति सत्प्रतिपक्षः । आचार्यानुमानं तु "धाता यथापूर्वमकल्पय"दिति श्रुतिविरोधात्,

"अचन्द्रार्कग्रहा भूमिः कदा चिन्नु भविष्यति ।
अपौरवा तु पृथिवी कदापि न भविष्यति" ॥

इति हरिवंशरूपव्यासस्मृतिविरुद्धत्वाद्, यावत्तैलं तावद्व्याख्यानमिति दृष्टान्तप्रसिद्धतैलाभावादिरूपोपाधिविस्मरणाच्चानाचार्यानुमानमेव । अन्यथा नरशिरःकपालं, शुचि, प्राण्यङ्गत्वात्, शङ्खवदित्यनुमानस्यापि प्रामाण्यापत्तेः । एवमन्येष्वप्यनुमानेषु दूषणान्यूह्यानीति दिक् ॥

वेदान्तिनस्तु "सर्वं खल्विदं ब्रह्म, नेह नानास्ति किं चने" त्यद्वैतवादश्रुतिभि"रात्मको जगदादावासीत्, तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिब्रह्मोपादानत्वावेदकश्रुति"रिन्द्रो मायाभिः पुरुरूप ईयत" इति भेदावगमस्य मायारूपाविद्यानिबन्धनत्वश्रुतेश्च सैव व्योमादिरूपेण परिणतमिति चिदेकरसस्य च ब्रह्मणो जडरूपेण परिणामोऽनेकत्वं च न वास्तवं, किं त्वविद्योपाधिकं, स्वप्नप्रपञ्चवत्सत्यत्वविरोधिश्रुति-

अन्यं ज्ञानं चन्द्रतारकापरिमाणबोधकवाक्यवत् प्रत्यक्षबाधेनोपपन्नम्। एवं च "लोकास्तं परादुरन्यत्रात्मनो लोकान् पश्यति, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"त्यादयो भेदज्ञाननिन्दार्थवादा उपपद्यन्ते। तेन प्रपञ्चो ऽविद्योपाधिको ऽपारमार्थिकः। अत एव सदसद्विलक्षण इत्याहुः॥

तत्र किमिदमपारमार्थिकत्वं, मिथ्यात्वमिति चेत्, किमिदं मिथ्यात्वम्। न तावच्छशशृङ्गादिवदत्यन्तासत्त्वं तत्। अबाधितप्रत्यक्षादिविषयप्रपञ्चे तदभावात्। नापि ज्ञानबाध्यत्वमज्ञानजन्यत्वं वा। घटादेर्ज्ञानबाध्यत्वाभावाद् अज्ञानस्य जनकत्वे ऽबाधितमानाभावेनाज्ञानजन्यत्वासंभवाच्च। न त्वागमेन तद्बोधः। मिथ्याभूतप्रपञ्चान्तर्गतागमेन प्रत्यक्षदृष्टप्रपञ्चे मिथ्यात्वबोधासंभवात्। अन्यथा वेदबोध्ययागस्वर्गसाध्यसाधनभावज्ञाने मिथ्यात्वबोधप्रसङ्गात्। इष्टापत्तौ स्वर्गसाध्यसाधनभावज्ञानेन ब्रह्मज्ञाने मिथ्यात्वबोधापत्तिः। आगमजन्यत्वाविशेषात्। नाप्यनिर्वाच्यत्वं तत्। अनिर्वाच्यपदार्थस्य लोके ऽसंभवात्। प्रपञ्चस्यापि निर्वचनीयत्वेनानिर्वचनीयत्वाभावाच्च। किं चैवं श्रुतिबोध्यप्रपञ्चमिथ्यात्वस्यापि मिथ्यात्वप्रसङ्गः। तदङ्गीकारे सिद्धं प्रपञ्चस्यामिथ्यात्वमिति दिक्॥

इदमत्र वेदान्तिनामाकूतम्। चैत्रस्य शुक्त्यज्ञानमित्यादौ चैत्रनिष्ठशुक्तिज्ञानस्याभाव इति न बोधः, प्रतियोग्यप्रसिद्धेः, किं तु चैत्रनिष्ठं शुक्तिज्ञानमिति तदर्थः। तेनाज्ञानं भावरूपः पदार्थः। तस्य च शुक्तिरजते हेतुत्वं लाघवाद् न तु तज्ज्ञाने, गौरवात्। किं च तत्र रजतं पश्यामीति लौकिकसाक्षात्कारो ऽनुभवसिद्धः। तत्र लौकिकसंनिकर्षस्य विषयस्य च हेतुतेति तत्र रजतोत्पत्तिरावश्यकी। एतेन तत्र रजतत्वमेव विषयः, ज्ञानलक्षणा चालौकिकसंनिकर्ष इत्यपास्तम्। अज्ञानं च जीवानां न ब्रह्मणः। एवं चाधिष्ठानाज्ञानस्य शुक्तिरजतादौ हेतुत्ववद्वियदादिप्रपञ्चे ब्रह्माज्ञानस्य जीवसंबन्धिनः प्रपञ्चहेतुत्वमिति॥ इदमेव मिथ्यात्वं सदसद्विलक्षणत्वं चेति पूर्वमतोपपत्तिरिति, नेदमपि युक्तम्। अधिष्ठानज्ञानेपि शङ्खपीतिमोत्पत्तेरधिष्ठानाज्ञानस्योत्पादकत्वायोगात्। न च तत्र दोषस्य हेतुत्वेन दोषाजन्यरजताद्युत्पत्तावधिष्ठानाज्ञानस्य हेतुत्वमिति वाच्यम्। तर्हि परमाण्वाद्युपादानाजन्यस्वाप्नादिप्रपञ्च एवाधिष्ठानाज्ञानस्य हेतुत्वमस्तु, न प्रपञ्चमात्रे। किं च चन्द्रतारकापरिमाणशङ्खपीतिमादीनामधिष्ठानज्ञाने सत्यपि कथमुत्पत्तिः। भवतां विशेषदर्शने सत्यपि भ्रान्तेरिव दोषवशादिति चेत्। तर्ह्यविद्यातिरिक्तस्यापि प्रपञ्चहेतुत्वापत्त्या यतमज्ञानकारणत्वानियमेन॥ यत्तु रजतं पश्यामीति लौकिकसाक्षात्कारे विषयस्य लौकिकसंनिकर्षस्य च हेतुत्वसिद्धये रजतोत्पत्त्यङ्गीकार इति, तदपि पुरोवर्त्यंशे लौकिकत्वेन रजतत्वांशे ऽलौकिकत्वेन दोषजन्यत्वाङ्गीकारेण परास्तम्। यत्तु रजतज्ञानत्वस्य कार्यतावच्छेदकत्वमपेक्ष्य रजतत्वस्यैव कार्यतावच्छेदकत्वे लाघवमिति, तदपि अज्ञानस्य कारणत्वकल्पनमपेक्ष्य लघुभूतमेव। न चैवमधिष्ठानज्ञानेपि भ्रमापत्तिः। लौकिकतदभावसाक्षात्कारस्य तद्वत्ताज्ञानं प्रति प्रतिबन्धकत्वात्। "मायां तु प्रकृतिं विद्या"दित्यादिश्रुतेरपि स्वाप्नसृष्टिविषयत्वेन मायापदस्य दोषपरत्वेन वा व्याख्यानादिति संक्षेपः॥

केचित्तु परमात्मैव स्वेच्छया परमार्थत एव व्योमादि जनयति। "सदेव सोम्येदमग्र आसीत्, तदैक्षत, बहु स्यां प्रजायेय"इति, तस्माद्वा एतस्मादात्मन आकाशः संभूत इति, "पुरुष एवेदं नेह नानास्ति किं चने"त्यादिश्रुतयोऽमुमेवार्थं प्रकटयन्ति। अत्र ह्याद्यश्रुतिद्वयेनात्मनस्तद्रूपत्वेन प्रागवस्थितस्य बीजस्येव हेतुत्वं व्योमादीनां च वृक्षस्येव तत्कार्यत्वमुक्तम्। अपरश्रुतिद्वयेन धर्मिभेदाभाव उक्तः। नानाशाखस्य वृक्षस्यानेकत्वेन ज्ञातस्यैकबोधवत्॥ यानि तु "आत्मैवैकः सत्य, इन्द्रो मायाभिः पुरुरूप ईयत" इत्यादीनि प्रपञ्चस्य मिथ्यात्ववादासत्यत्ववादभ्रान्तिवादमायावादबोधकानि, तान्यस्यानित्यत्वमेव प्रतिपादयन्ति। अपशवो वा अन्ये गो अश्वेभ्य इतिवत्। एतेषामपि मुमुक्षूणामुत्साहजननार्थतया वैराग्यजननार्थतया च प्रपञ्चासत्यत्वात्मपरमार्थसत्त्वप्रतिपादकतयार्थवादत्वस्य तुल्यत्वात्। विस्पष्टं चैत 'द्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं तथेद"मिति श्रुतौ। मृत्पिण्डभावेन सकलतद्विकारशरावघटादिज्ञानमिवात्मज्ञानेन तज्जन्यसकलप्रपञ्चज्ञानमित्यर्थः। यद्यपि व्यासरूपेण न ज्ञानं तथापि समासरूपेणेत्युपपत्तिः। तच्च प्रपञ्चस्य सत्यत्वे उपपद्यते। नहि सद्रूपज्ञानेनासत्यस्य ज्ञानं, शशविषाणादिज्ञानप्रसङ्गात्। अतः सत्यत्वमेव प्रपञ्चस्य युक्तमित्याहुः॥

निरीश्वरसांख्यास्तु प्रकृतिरचेतना सत्त्वरजस्तमोगुणात्मिका प्रधानशब्दवाच्या चेतनात्मनामुपभोगाय महदादिविशेषप्रपञ्चरूपेण परिणमतीत्याहुः॥

सेश्वरसांख्यास्तु प्रकृतिरेवाविद्यास्मितारागद्वेषाभिनिवेशक्लेशकर्मविपाकाशयैरपरामृष्टं सर्वव्यापिनं पुरुषशब्दवाच्यमीश्वरमधिष्ठाय महदहंकारपञ्चतन्मात्रादिक्रमेण जगत्सृजति। बीजमेव संस्कृतं चेत्रमधिष्ठायाङ्कुरादिक्रमेण वृक्षादि। तस्मात्प्रकृत्युपादाना सृष्टिरीश्वराभिन्नक्षेत्रज्ञपदवाच्यजीवभोग्या। प्रकृतेरैक्येपि भोक्तॄणां भेदात्प्रपञ्चवैचित्र्योपपत्तिः। औपनिषदाभिमतैकात्म्यवादाः सादृश्यपरत्वेन व्याख्येयाः। एवं नानात्मनिषेधाश्च। एतदभिप्रायेणैव

Digitized by Google

"विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" ॥

इति । "इन्द्रो मायाभिः पुरुरूप ईयते" इति च । मुक्तात्मनामीश्वरेण सहैकत्ववादास्तेऽप्यत्यन्तसाम्येन वैलक्षण्याभावेन वोपपादनीयाः ॥

"यदा पश्यः पश्यति रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति"

इति श्रुत्या परमसाम्योक्तेः ।

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
स्वर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च"

इति भगवद्वाक्येनापि साम्योक्तेः । न च

"ममैवांशो जीवलोके जीवभूतः सनातनः"

इति भगवद्वचनस्य,

"भेदस्य जनके ज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति"

इति पुराणवचनस्य चानुपपत्तिः । तयोः स्वामिभृत्यभावबोधकत्वेनोपपत्तेः । एवं च

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"
"उपद्रष्टा ऽनुमन्ता च कर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः"

इति भेददर्शनमुपपद्यते । तस्मात्प्रकृत्युपादानोऽयं प्रपञ्च इत्याहुः ॥

तदपि न । प्रकृतेरेकरूपतया हेतुवैलक्षण्याभावेन नरपश्वादिरूपकार्यवैलक्षण्यानुपपत्तेः । क्षेत्रज्ञादृष्टवशाद्वैलक्षण्यमित्यप्यदृष्टस्य कार्यवर्गान्तःपातितया प्रकृतौ विलीनत्वेनाकारणत्वाद्वक्तुमशक्यम् । कुतो वा प्रकृत्या महदादिविकारारम्भः । ईश्वरेच्छयेति चेत्,तस्यापास्तसमस्तकामस्येच्छाभावात् । किं च प्रलये प्रकृतिमात्रस्यात्मनां च निर्विशेषाणामवस्थितत्वाद्धर्माधर्मयोश्चान्तःकरणधर्मतया तदानीमभावात् पूर्वजन्मनि कृताश्वमेधानां कृतमहापातकानां च विशेषो न स्यात् । न चातः शशविषाणादेरुत्पत्तिनाशयोरदर्शनान्नियतोत्पत्तिदर्शनाच्चोत्पत्तिनाशयोराविर्भावतिरोभावरूपतया शक्त्यात्मनावस्थितधर्माधर्मवशेन वैचित्र्योपपत्तिरिति वाच्यम् । मृत्पिण्डकपालावस्थयोर्घटसत्त्वस्यानुपलब्धिबाधितत्वात् । "नासतो विद्यते भाव" इति तु "न त्वेवाहं जातु नास" मिति नित्यत्वप्रतिपादनोपक्रमादात्ममात्रस्यानुत्पत्तिविनाशधर्मत्वप्रतिपादकं, न सर्वस्य कार्यजातस्य । अस्तु वा कारणात्मना ऽवस्थानं तथा मृदात्मना ऽवस्थितघटादिनोदकाहरणासंभववत्प्रकृत्यात्मना ऽवस्थितधर्माधर्माभ्यामपि न वैचित्र्यसंभवः । यदि तु सृष्टिप्रलयपरम्परया ऽनादित्वं शब्दानामनाद्यर्थसंबद्धानां वेदानां नित्यतां चाश्रित्य

"सर्वेषां चैव नामानि कर्माणि च पृथक्पृथक् ।
वेदशब्देभ्य एवादौ पृथगर्थांश्च निर्ममे"

इतिवचनानुरोधादेककर्तृका तुल्यनामव्यवहारकवस्तूत्पत्तिरङ्गीक्रियते ।

"अष्टाशीतिसहस्राणि संप्रदायप्रवर्त्तकाः"

इतिवचनानुरोधेन वा ऽनेककर्तृका तादृशसृष्टिरङ्गीक्रियते । तत्रापि प्रकृतेरुपादानत्वासंभवाद् अनुपादाननिर्माणासंभवात्सोपादानत्वसिद्धिरिति संक्षेपः ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ सृष्टिप्रलयविचारः ॥

ननु सर्वमिदं शरीरेन्द्रियमनतिरिक्तजीवात्मसद्भावे स्यात्तत्रैव मानं न पश्यामः । न चाहं जानामीति प्रत्यक्षं तत्र मानं, तस्याहं गौर इत्यादिवच्छरीरादिविषयकत्वेनाप्युपपत्तेरिति चेत् । अत्र जीर्णाः । शरीरान्तर्गतवायोरूर्ध्वाधोगमनानुकूलप्रयत्नाश्रयतया सुखाद्याश्रयतया वा तत्सिद्धिः । तेषामयावच्छरीरभावित्वेन तद्धर्मत्वासंभवात् । कार्यद्रव्यवृत्तिविशेषगुणानां पाकादिना विरोधिगुणान्तरोत्पत्त्या द्रव्यनाशेन वा नाश्यत्वमिति नियमः । उक्तनयस्य सुखादीनां च मृतावस्थायामुक्तनाशकद्वयाभावेन नाशानुपपत्तेर्न शरीरगुणत्वं संभवति । एवं ज्ञानेच्छादीनामप्ययावच्छरीरभावित्वेन न शरीरगुणत्वम् । किं चावयविविशेषगुणानामवयवगुणपूर्वकत्वनियमेन ज्ञानादीनां शरीरावयवगुणत्वाभावेन न तदुत्पत्तिसंभवः । अतः सुखादिगुणितया शरीरादिभिन्नात्मसिद्धिः । न च तेषामिन्द्रियगुणत्वम् । इन्द्रियनाशेन संस्कारनाशे स्मरणानुपपत्तेः । नापि मनोगुणत्वं, तस्याणुतया तद्गुणप्रत्यक्षानुपपत्त्या ज्ञानादीनामप्रत्यक्षत्वप्रसङ्गात् । मनसो विभुत्वनये तु तद्गुणत्वे ज्ञानादीनां करणाभावात्प्रत्यक्षानुपपत्तिस्तुल्या । तस्मात्तदाश्रयतया ऽऽत्मसिद्धिः । किं च स्वर्गकामादिश्रुत्यापि देहातिरिक्तात्मसिद्धिः । तथाहि । स्वर्गकामादिश्रुतयः कर्मजन्यफलभोक्तारं शरीरातिरिक्तं कर्त्तारमाक्षिपन्ति । "अविनाशी वा अरे ऽयमात्मे" त्यादय उपनिषदोपि तमेवार्थं द्रढयन्ति । अतो ऽहंप्रत्ययवेद्यः शरीरातिरिक्त आत्मेति । न च तस्याहंप्रत्ययगम्यत्वमनुपपन्नं, ज्ञातृत्वज्ञेयत्वयोर्विरोधात्, एकस्यां क्रियायामेकस्य कर्तृत्वकर्मत्वानुपपत्तेरिति वाच्यम् । स्वात्मनि क्रियाविरोधस्य दूषकताबीजाभावेनादूषकत्वात् । न च परसमवेतक्रियाजन्यफलभागित्वस्य कर्मत्वतया कर्मसंज्ञायास्तद्भिक्ते-

Digitized by Google

स्यासाधुतापत्तिदूषकताबीजमिति वाच्यम् । तादृशकर्मत्वाभावेपि तद्विभक्ते"रात्मा ज्ञातव्य. आत्मानं वेद, आत्मानमुपासीते"त्यादिलौकिकवैदिकप्रयोगेणैव साधुत्वात् । यथा चलतिगच्छत्योरेकार्थत्वेपि सकर्मत्वाकर्मत्वे एवं ज्ञातुर्ज्ञानजन्यप्राकट्यरूपफलवत्तया ज्ञानकर्मत्वे बाधकाभावात् । "स मानसीन आत्मा जनाना"मित्यादिश्रुतिवशाच्च मानसाहंप्रत्ययवेद्य आत्मा सिद्ध इत्याहुः ॥

वेदान्तिनस्तु सुखेच्छादीनां मनोगुणत्वस्य श्रुतिसिद्धतया निर्गुणज्ञानस्वरूप एवात्मा, तस्य च निष्प्रकारकमेवोपनिषज्जन्यप्रत्यक्षं मोक्षसाधनमित्याहुः ॥

कः पुनर्मोक्षः ।

अत्र के चित् । संस्काराजनकानुभवध्वंसो मुक्तिः ।

के चित्तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मुक्तिः ।

दुःखमयसंसारबीजमिथ्याज्ञानध्वंसो मुक्तिरित्यपरे ।

शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंस इत्यन्ये ।

आत्यन्तिकदुःखप्रागभावो मोक्ष इति गुरवः ।

संस्काराजनकभोगविषयदुःखध्वंस इति के चित् ।

समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसो मुक्तिरिति मणिकृत् ।

प्रपञ्चसंबन्धविलयो मुक्तिरिति वेदान्तिनः । प्रपञ्चसंबन्धो बन्धः । तस्यात्यन्तिको विलयो मोक्षः । तथाहि । भोगायतनभोगसाधनभोगविषयाणां शरीरेन्द्रियाणां संबन्धादात्मा बद्ध इत्युच्यते । एतत्कारणधर्माधर्मपरिक्षयादेतेषामात्यन्तिको विलयः पूर्वनाशपरानुत्पादस्वरूपः । न चैवमपुरुषार्थत्वापत्तिः । सुखवद्दुःखानुत्पादस्यापि पुरुषार्थत्वात् । तत्संबन्धविलयपूर्वकनित्यानन्दरूपात्माभिव्यक्तेर्मुक्तित्वाङ्गीकाराद्वा । तस्य सुखस्य नित्यतया धर्मजन्यत्वाभावात् । आत्मनश्च सुखात्मकत्वे मुक्तावस्थायां तन्नित्यत्वे चा"नन्दं ब्रह्मणो रूपं, न स पुनरावर्त्तत"इत्यादिश्रुतयो मानम् । यत्त्व"शरीरं वाव सन्तं प्रियाप्रिये न स्पृशत"इति मुक्तस्य सुखाभाववत्त्ववचनं, तत्प्रपञ्चसुखाभिप्रायम् । ननु मनःशरीराद्यभावात्कथं तत्रानन्दानुभवः । न च तस्यानन्दस्य स्वप्रकाशत्वम् । संसारावस्थायां तादृशस्याननुभवात् । न च तदानीमभिभवान्न तादृगनुभव इति वाच्यम् । स्वप्रकाशस्याभिभवासंभवादिति चेत् । तस्यानन्दस्या"त्रायं पुरुषः स्वयंज्योति"रिति श्रुतिसिद्धस्वप्रकाशतया ऽऽत्मरूपानन्दानुभवस्य लोकसिद्धकारणान्तरानपेक्षत्वात् । तदुक्तम् ।

निजं यच्चात्मचैतन्यमानन्दश्चेष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मुच्यते ॥

इति । अतो नित्यसुखाभिव्यक्तिर्मुक्तिरित्याहुः ॥

तन्न । "विज्ञातारं केन विजानीयाद्, अस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये"दिति च मोक्षकाले ज्ञानाभावप्रतिपादकश्रुतिविरुद्धत्वात् । आत्मनश्च न विज्ञानसुखादिरूपत्वम् । "आनन्दं ब्रह्मणो विद्वान्, स एको ब्रह्मण आनन्द" इति श्रुत्या भेदप्रतीतेः । मम न किमपि सुखं, केवलं दुःखमेवेत्यनुभवात् । "ता एताः प्रजा अहरहर्ब्रह्मलोकं यन्ति अहरहरागच्छन्ती"ति सुषुप्तिमुक्त्योः सादृश्यप्रतिपादकश्रुत्या ऽऽनन्दात्मकत्वनिषेधाच्च । सुषुप्त्यवस्थायामानन्दानुभवाभावात् । अतो न नित्यसुखाभिव्यक्तिर्मुक्तिः । तस्मात् प्रपञ्चस्य सर्वथा विलयो मुक्तिः । स च दुःखाभावरूपत्वात् पुरुषार्थः । तेन सुखदुःखोपभोगाभावो मोक्ष इति फलितम् । तथा च श्रुतिः । "प्रियाप्रिये न स्पृशत" इति । न चैवमानन्दश्रुतिविरोधः । "मन आनन्द"मितिश्रुतेर्मनस आनन्दधर्मत्वात्तदानीं "त्वमनस्क" मिति श्रुत्या मनोभावेन "विज्ञातारं केन विजानीया"दिति श्रुत्या च तदानीमानन्दानुभवनिषेधात् । "अलं वा अरे इदं विज्ञाना" इति तु शक्तिमात्रपरम् । किं चानन्दप्रियाभाववचनयोर्विरोधे प्रमाणान्तरोपपत्तिभ्यामानन्दवचसो दुःखाभावपरत्वं परिकल्प्य तत्परिहारः । उभयत्रापि सामान्योपादानात् । अत उक्तरीत्यैव विरोधपरिहार इत्यात्यन्तिकदुःखाभाव एव मोक्ष इति । न चैवं सुखस्यापि नानुपादेयत्वमिति पुमर्थत्वम् । मधुविषभोजनदुःखवत्सुखस्यापि बहुतरदुःखानुबद्धत्वेन हेयत्वात् । न चैवमपि वर्त्तमानदुःखानां स्वभावेन विरोधिगुणान्तरोत्पत्त्या वा नाशादागन्तूनां प्रतियोग्यभावादतीतानामतीतत्वादेव नाशासंभवान्न मोक्षः साध्यः स्यादिति वाच्यम् । दुःखहेतुधर्माधर्मोच्छेदस्य पुंव्यापारसाध्यत्वात् । तथाहि । संचितानां प्रारब्धानां चादृष्टानां भोगात्मज्ञाननैमित्तिकप्रायश्चित्तानुष्ठानेन नाशात्काम्यानुष्ठानजन्यानां तदननुष्ठानेनानुत्पादाद्विहितानुष्ठाननिषिद्धाकरणाभ्यां प्रत्यवायापरिहाराच्च । सुखदुःखजनकधर्माधर्मनाशात्पूर्वशरीरनाशे मुक्तो भवति । अत एव ज्ञानकर्मणोः समुच्चयेन जनकता । ज्ञानेन संचितानामुत्पन्नधर्माधर्माणां नाशः । नित्यकर्मभिश्च तदनुत्पत्तिः । अन्यथा नित्याकरणजन्यप्रत्यवायेन शरीरोत्पत्तिप्रसङ्गात् । तस्मादुभयोरपि शरीरोत्पत्त्यभावसंपादकतया मोक्षजनकता । प्रारब्धकर्मणां तु न कर्मभिर्न ज्ञानेन नाशः । किं तु भोगेनेति । न च

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ऽर्जुन"

इति ज्ञानस्यैव शरीरोत्पत्त्यभावसंपादकतया मोक्षजनकत्वमस्तु, किं कर्मणेति वाच्यम् । ज्ञानवतोपि विहिताननुष्ठाननिषिद्धाचरणाभ्यां प्रत्यवायोत्पत्तेः । तेन ज्ञानकर्मणोः सम-

Digitized by Google

च्चयेन जनकत्वम् । तत्राप्युपनिषज्जन्यात्मज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम् । उपासनात्मकं तु दृष्टोपयोगाभावात् "स सर्वान्कामानवाप्नोति, न स पुनरावर्तते" इत्यादिवाक्यशेषाच्चाभ्युदयफलकं निःश्रेयसफलकं चेति विवेकः । अतः सिद्धो ज्ञानकर्मसमुच्चय इति संक्षेपः ॥ तदुक्तम्

"सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग्ज्ञानेन ब्रह्मचर्येण वेति" ।
"स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

तमभ्यर्च्य तं ज्ञात्वेत्यर्थः ।

तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते ॥
उभाभ्यामिव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम्" ॥

इति ब्रह्मप्राप्तिर्मुक्तिरिति जीर्णाः ॥

नव्यास्तु "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाये"ति श्रुत्या "न कर्मणा न प्रजये"ति श्रुत्या च मोक्षे ज्ञानातिरिक्तसाधननिषेधात् तीर्थस्नानमहादानकाशीमरणादिकर्मणां ज्ञानद्वारैव मोक्षजनकत्वाच्च ज्ञानमेव साक्षान्मोक्षजनकम् । कर्म तु ज्ञानजनकान्तःकरणशुद्धिजनकम् । न च तमेवेत्यात्मातिरिक्तविषयकज्ञानस्य मोक्षजनकत्वपरिसंख्येति वाच्यम् । ज्ञानस्य मोक्षजनकत्वेन नियतप्राप्त्यभावात्परिसंख्यानुपपत्तेः । वाक्यान्तरप्राप्तपरिसंख्यायां तत्तद्वाक्यानां नान्यः पन्थेति निषेधस्य चानुपपत्तिः । एतेनोपनिषज्जन्यज्ञानातिरिक्तभावनान्यादिजन्यज्ञानपरिसंख्येति परास्तम् । अध्ययनविधिनैव तत्सिद्धेः । न चैवमुपनिषदध्ययनजन्यतत्त्वज्ञानस्य त्रैवर्णिकस्यैव संभवाच्छूद्रादीनां मुक्तिर्न स्यादिति वाच्यम् । तेषामपि "श्रावयेच्चतुरो वर्णानि"ति पुराणश्रवणविधिना तज्जन्यात्मज्ञानसत्त्वान्मुक्तिसिद्धेः । अतोऽयं ज्ञानस्य मोक्षसाधनत्वविधिः । नान्यः पन्था इति तदतिरिक्तकर्मणः साक्षात्साधनत्वनिषेधः । "न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूया"दितिवत् । एतन्निषेधवशादेव कर्मणां मोक्षसाधनत्वबोधकश्रुतयः परंपरासाधनत्वपराः । अत एव "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति श्रुतेरविद्यारूपकर्मणो मृत्युतरणशब्दलक्षितात्मज्ञाननाशस्यात्मज्ञानद्वारकत्वबोधकश्रुतिरपि संगच्छते । न कर्मणेत्यादिश्रुतिरपि परंपरया मोक्षसाधने संन्याससाकूल्यनिषेधनद्वारा संन्यासप्राशस्त्यबोधिका कर्मणां परंपरया साधनत्वं बोधयति । न साक्षात् । एवं "तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"ति श्रुतिरपि कर्मणां ज्ञानार्थत्वमेव बोधयति । न साक्षान्मोक्षार्थत्वमिति । न चैवं ज्ञानेन संचितकर्मविनाशेऽपि शरीरजनकनित्याकरणजन्याधर्मविनाशायोगान्मोक्षो न स्यादिति वाच्यम् । तस्य संचितविनाशकत्ववदधर्मानुत्पादकत्वस्याप्यङ्गीकारात् । उत्पन्ननाशाङ्गीकाराद्वा । न चैवं वेदान्ताध्ययनजन्यतत्त्वज्ञानोत्तरं मुक्तिः स्यादिति वाच्यम् । प्रारब्धस्य प्रतिबन्धकत्वात् । न चैवं संचितानां प्रायश्चित्तेन प्रारब्धानां भोगेन नाशान्नित्यकर्मभिश्चानुत्पादात्तत्त्वज्ञानस्यानुपयोग इति वाच्यम् । सुखभोगयोग्यदेहजनकधर्मविनाशद्वारा तस्य मोक्षोपयोगित्वादिति जीर्णाः ॥

अन्ये तु तत्त्वज्ञानस्य संचितनाशकत्ववत् प्रारब्धनाशकत्वमपि । तत्त्वज्ञानव्यक्तिविशेषस्यैव मोक्षजनकतया तदुत्तरमेव मुक्तिः । जीवन्मुक्तादिव्यवहारस्तु शरीररूपदुःखसत्त्वेन बाधाद् भाक्त इत्याहुः ॥

इति मीमांसकश्रीगागाभट्टकृतभाट्टचिन्तामणावनुमाननिरूपणम् ॥

॥ अथ बालभारतस्य ॥

॥ चतुर्थः सर्गः ॥

केशान्तर्भूतजीमूतविद्युद्दीप्त्येव पिङ्गरम् ।
जटाजूटं वहन् व्यासः पायादवतरो हरेः ॥ १ ॥
अथो जयद्रथो भेजे भवदत्तामयः स्वयम् ।
इत्यूचे कौरवस्तूर्णमर्णःपूर्णनयो गुरुम् ॥ २ ॥
अथ रुक्मरथः स्माह संनाहं नाहमाहवे ।
अद्य त्यजामि यामिन्यामप्यहत्वा तवाहितान् ॥ ३ ॥
एवमुक्तवति द्रौणे रोषशोणेक्षणाः क्षणात् ।
अस्तेऽपि सूरे शूरेन्द्रा युद्धायैव दधाविरे ॥ ४ ॥
निशाचराणां तमसां भियेव दिवसस्तदा ।
रक्षोविपक्षं शिश्राय कायकान्त्या जयध्वजम् ॥ ५ ॥
हता द्रोणद्रुणा नादैः पलादाः प्रधनोत्सवे ।
किरीटिकेतनकपेर्बूत्कारैर्दूरमत्रसन् ॥ ६ ॥
हनूमत्तारबूत्कारप्रतिशब्द इवोद्धतः ।
भीमास्यकन्दरान्नादस्तदाभूदरिकम्पनः ॥ ७ ॥
ततो युयुधिरे वीरा रुधिरेण परिप्लुताः ।
निशीथे रुचिनाथस्य रुचिपूरैरिवाञ्चिताः ॥ ८ ॥
तदोच्छलद्भिर्वीराणां बाणैर्विद्धमिवाम्बरम् ।
तारकच्छद्मना छिद्रपूरितं पतितोऽप्यभूत् ॥ ९ ॥

तदाच्छादितभूचक्रतमः समुदयच्छलात् ।
क्रुध्यद्रुद्रटेन्द्रक्ष्वेडाभिस्त्रुटित्वेवापतन्नभः ॥ १० ॥
अथ द्रोणशरोत्कृत्तैः शिबिमुख्यनृपाननैः ।
क्व गतोऽर्क इति ज्ञातुमब्रैरिव गतं दिवि ॥ ११ ॥
सामीरिमुष्टिपिष्टाङ्गकलिङ्गक्ष्माभृदङ्गजात् ।
शुभ्राण्यस्थीनि भोक्तव्यपुण्यानीवाभितोऽपतन् ॥१२॥
कालवैतालिककृते व्यञ्जनानीव कुर्वता ।
चक्रे विराटसूदेन कलिङ्गकुलकर्तनम् ॥ १३ ॥
जयरातध्रुवौ वीरौ तेजस्तारौ व्यपातयत् ।
भीमः कुहूनिशारम्भ इवार्करजनीकरौ ॥ १४ ॥
निरन्तरालं पिहिते कर्णे सामीरिसायकैः ।
अतः कौरववाहिन्यां कोऽप्यभूदद्भुतः स्वनः ॥ १५ ॥
हसन् बलिद्विषं भीमस्तदा दुःकर्णदुर्मदौ ।
त्वत्सुतौ सरथौ राजन् पदा हत्वाक्षिपत् क्षितौ ॥१६॥
सोमदत्तसुतं भूरिश्रवसः सोदरं शलम् ।
उपाचकार शैनेयः समरक्रतुदीक्षितः ॥ १७ ॥
परिपेतुः सपत्नेषु रत्नद्रुाः सहस्रशः ।
द्रौणिबाणास्तमस्विन्यां संध्यादीपा इवाभितः ॥ १८ ॥
वक्त्रज्वालातडित्क्रूरो घोरघोषो घटोत्कचः ।
जगद्द्रोहाम्बुद इव द्रौणिं रुद्रमिवाद्रवत् ॥ १९ ॥
व्योमाग्रमापतद्द्रैमेश्छित्त्वैकं चक्रमाशुगैः ।
द्रौणिस्तच्छौर्यसूर्यस्य बभञ्जोज्जागरां गतिम् ॥ २० ॥
राक्षसाक्षौहिणीं भीमां भैमेर्मायाविमोहिनीम् ।
द्रौणिरद्रावयद्भानुस्तमो रौद्रं तमीमिव ॥ २१ ।
पीतानि वीरतेजांसि मुखज्वालामिषाद्वमन् ।
नदन्नञ्जनपर्वोऽथ द्रौणिना तत्सुतो हतः ॥ २२ ॥
द्रौणिर्द्रुपदजानष्टौ कुन्तिभोजसुतान् दश ।
निहत्याष्टादशद्वीपदीप्तकीर्तिभरोऽभवत् ॥ २३ ॥
रत्नांशुधौतास्तद्भल्लधूता वीरालिमौलयः ।
तेनुस्तमस्यवस्कन्दं भानुभृत्या इवाम्बरे ॥ २४ ॥
गदानिष्पिष्टबाह्लीकक्षोणिभृन्मस्तकोत्थितैः ।
रत्नैरभाजि भीमस्य प्रतापाग्नेः स्फुलिङ्गता ॥ २५ ॥
प्रमाथी विरजा नागदत्तो दृढरथाह्वयः ।
वीरबाहुरयोबाहुः सुहस्तसुदृढावपि ॥ २६ ॥

ऊर्णनाभः कुण्डशायी दशेति तव सूनवः ।
भीमेन चक्रिरे क्षिप्रं क्षुरप्रैः क्षिप्तमौलयः ॥ २७ ॥
युग्मम् ।
तदा तेषां क्षणं राजन् युगपद्गमनोद्गतैः ।
शिरोभिः स्मारयांचक्रे सुराणां रामविक्रमः ॥ २८ ॥
क्षिप्ताः खे सप्त भीमेन दीप्ताः सौबलमौलयः ।
तत्क्ष्वेडाभ्रष्टसप्तर्षिकमण्डलुनिभा बभुः ॥ २९ ॥
दिव्यास्त्रदीप्तिविध्वस्ततमाः समरडम्बरः ।
द्रोणधर्मजयोर्वीरैर्दृष्टः स्पृष्टः कुतूहलात् ॥ ३० ॥
अथ पाण्डुभुवां काण्डेराकुले सकले बले ।
दीनवाचि नृपेऽवोचन्मुञ्चन्नुच्चैरिषून् वृषः ॥ ३१ ॥
मा भैषीरेष विद्वेषिपेषभारोऽस्ति भूप मे ।
अद्य ते रोचये राज्यं मोचये नरतां नरात् ॥ ३२ ॥
इदं कर्णे वदत्यूचे कृपः किं गोग्रहादिषु ।
न सूतसुत दृष्टोऽसि शक्त्या युध्यस्व गर्ज मा ॥ ३३ ॥
अथ क्रुद्धोऽभ्यधात् कर्णः कृपाचार्यं कृपाणवान् ।
वदस्यदो यदि पुनस्तच्छेद्या रसना पुनः ॥ ३४ ॥
ततः स्फीतोग्रदृग् द्रौणिर्मातुलाक्षेपकोपनः ।
रे रे किं वदसीत्युक्त्वा क्षीणासिः कर्णमाद्रवत् ॥ ३५ ॥
कर्णोऽप्यभ्युद्ययौ सासी दासीकृतयमाविमौ ।
मध्यमेत्य कृपाचार्यनृपाभ्यां शमितौ द्रुतम् ॥ ३६ ॥
कालैरिवाथ निघ्नद्भिः कर्णद्रौणिसुयोधनैः ।
आसन् परेषु मर्तव्यम्रियमाणमृतोक्तयः ॥ ३७ ॥
मौर्वी चार्जुनचापस्य सेना च कुरुभूपतेः ।
प्रबद्धमुष्टिर्वेगेन कर्णमूलमुपाविशत् ॥ ३८ ॥
रथे मनोरथे चाथ भग्ने फाल्गुनमार्गणैः ।
गन्ता तपस्वितां कर्णः कृपाचार्यमुपाश्रयत् ॥ ३९ ॥
द्रौणिध्वस्तद्रुपदजव्रजासृङ्निर्झरोद्गमैः ।
तमःक्रव्यात्कुलं दूरकृष्टजिह्वमिवेक्ष्यत ॥ ४० ॥
धर्मिस्तु भीमबीभत्सुपारिपार्श्वद्वयान्वितः ।
कौरवेन्द्रबलत्रासनाटकैकनटोऽभवत् ॥ ४१ ॥
मदावलिप्तमालानस्तम्भं संरम्भकुम्भिनः ।
सात्यकिर्मत्तदन्तीव सोमदत्तमपातयत् ॥ ४२ ॥
संहरन्ती प्रजाः पार्थद्रोणदिव्यास्त्रदीपिता ।

सा रात्रिः क्षुद्रसद्राग्निः कालरात्रिरिवोदभूत् ॥ ४३ ॥
पक्षद्वयाशुगरदैः पक्षपूगैकचूर्णिनि ।
यमस्यास्ये रणे रक्तं ताम्बूलाम्बु तदा बभौ ॥ ४४ ॥
घोरे तमसि वीरेन्द्रा बभुर्दीपैः समीपगैः ।
कर्णात्थैरन्तराध्मातक्रोधवह्न्यङ्कुरैरिव ॥ ४५ ॥
तमोऽपि विद्धं शूराणां बाणैः शोणितनिर्झराः ।
दधौ वनततीहृद्यद्वीप्रदीपावलिच्छलात् ॥ ४६ ॥
रणातिरेके वीराणां श्यामाभिर्भल्लिभिस्ततः ।
क्षणात् तमश्चपेटाभिरिवापात्यन्त दीपकाः ॥ ४७ ॥
दैत्यात्मानं कुरुपतिं दैवात्मा धर्मजः स्वयम् ।
निशाबलिष्ठमपि यज्जिगायाभूत् तदद्भुतम् ॥ ४८ ॥
प्रजाः कवलयन् कर्णो ग्रासस्थं नकुलानुजम् ।
कृती मातृवचः स्मृत्वा क्षिप्रं तार्क्ष्य इवामुचत् ॥ ४९ ॥
रथी तटस्थशौर्यश्रीस्पर्शेच्छुः क्रतुजोऽकृत ।
द्रुमत्सेनादिभूपालकपालैः स्थपुटां भुवम् ॥ ५० ॥
आच्छादि द्रोणकर्णाभ्यां क्षितिः क्षितिभुजां मुखैः ।
लोकान्तरं व्रजद्भिस्तैर्विमुक्ता वारिजैरिव ॥ ५१ ॥
धृष्टद्युम्नादिवीरेन्द्रविद्रावणभवं यशः ।
कर्णो चन्द्रयति म्लानमाननाब्जैर्विरोधिनाम् ॥ ५२ ॥
भ्रातृस्नेहात् कृतान्तस्य दंष्ट्रास्विव शितीकृतैः ।
शरैः सेनां जयाशां च पार्थानां चिच्छिदेऽर्कजः ॥ ५३ ॥
रत्नार्चिषमहाचापः सेन्द्रचाप इवाचलः ।
कृष्णोरितो महाकायस्ततस्तं भैमिराद्रवत् ॥ ५४ ॥
ज्वालाभिर्जाठरोदग्रसप्तार्चिर्जातजन्मभिः ।
दृङ्नासाकर्णवक्त्रेभ्यो निर्यन्तीभिर्भयंकरः ॥ ५५ ॥
स्फारस्फुलिङ्गभृत्पिङ्गश्मश्रुभ्रूमूर्धजोच्चयः ।
दावानलप्रदीप्ताग्रशृङ्गः शैल इवोच्चकैः ॥ ५६ ॥
मूर्त्यैव संहरन् भीरून् शूरान् दृष्ट्यैव पातयन् ।
क्ष्वेडयैव क्षिपन् वीरान् स कर्णं सायकैः प्यधात् ॥ ५७ ॥

त्रिभिर्विशेषकम् ।

ततः प्रतोलीतुल्यास्यस्तुङ्गदीर्घो निशाचरः ।
कर्णमन्तरयामास प्राकारवदलंबलः ॥ ५८ ॥
ततो घटोत्कचः प्रेक्ष्य जटासुरसुतं पुरः ।
चतुर्हस्तशतीमात्ररथस्थस्तमयोधयत् ॥ ५९ ॥
स्फूर्जद्भुजौ महाकायौ द्वावुग्रमिषुवृष्टिभिः ।
मायिनौ तावयुध्येतां प्रेङ्खत्पक्षौ नगाविव ॥ ६० ॥
रथाद्रथमथापत्य भैमिर्दृढमपीडयत् ।
भुजोरसा रसाद्दोर्दृग्युद्धबन्धुमलंबलम् ॥ ६१ ॥
पीडितायास्तदङ्गाब्ध्याः स्रोतोभ्यो मारुतैः सह ।
तेजोऽम्बुखगुणैः कीलारक्तशब्दैर्विनिर्गतम् ॥ ६२ ॥
भैमिस्तन्मौलिमुन्मूल्य गत्वा दुर्योधनं जगौ ।
इत्थं कर्णशिरोऽप्याशु दर्शयाम्येष पश्य माम् ॥ ६३ ॥
इत्युक्त्वा कर्णमेत्यातित्वराफूत्कारभीषणः ।
अपूरयच्छरस्तम्भैस्तम्भैरिव महारथः ॥ ६४ ॥
निष्कम्पः कम्पयन्नोष्ठं निश्चलश्चालयन् भुजम् ।
निर्व्यथो व्यथयन् मौर्वीकाण्डैः कर्णोऽपि तं व्यधात् ॥ ६५ ॥
भैमेश्चक्रं सहस्रारं सहस्रांशूपहासकृत् ।
ज्वलद्व्योम्नि शरैः साधु सहस्रांशुसुतोऽच्छिदत् ॥ ६६ ॥
अथ द्युपथमाविश्य सरथः सैष पार्थभूः ।
हिंस्रः प्राणिसहस्राणि भूत्वा भूत्वापिषद् द्विषः ॥ ६७ ॥
अज्वालोर्वी शिखिज्वालैर्द्यौर्ववर्ष शिलोच्चयैः ।
दिशोऽमुञ्चन् राक्षसौघान् द्विट्सैन्ये भैमिमायया ॥ ६८ ॥
दिव्यास्त्रेणाथ तां मायां हत्वार्किः कर्कशैः शरैः ।
क्षिपन् राक्षसलक्षाणि दिद्युते रामविक्रमः ॥ ६९ ॥
या रुद्रेण स्वयं चक्रे सा चक्रैरष्टभिर्वृता ।
भैमिक्षिप्ताशनिः शीर्णरथमाधिरथिं व्यधात् ॥ ७० ॥
ततः कर्णशरक्षुण्णस्यन्दनः पिशिताशनः ।
खमुत्पपात तरसा पक्षीव क्षीणपञ्जरः ॥ ७१ ॥
मायाविनममायेन भूमिष्ठेन रथस्थितम् ।
प्रयुध्यमानं भीमेन पलादेन्द्रमलायुधम् ॥ ७२ ॥
बकस्य रक्षसो मित्रममित्रघ्नो घटोत्कचः ।
तदा प्रदारिताशाभिः क्ष्वेडाभिः संमुखं व्यधात् ॥ ७३ ॥

युग्मम् ।

तादृक्प्रतिभटालाभचण्डकण्डूविखण्डिनोः ।
तयोर्महाप्रहारोऽभूत् कृतान्तभुजयोरिव ॥ ७४ ॥
विशीर्णानि मिथोघातध्वानैर्व्योमस्थयोस्तयोः ।
गिरिशृङ्गाण्यपि तदा भीतानीव भुवं ययुः ॥ ७५ ॥
भैमिकृत्तमथ द्वेषिमुण्डमुज्ज्वलकुण्डलम् ।

Digitized by Google

द्विषः पत्रिज्वलत्पत्रद्वयो गिरिरिवापतत् ॥ ७६ ॥
एत्य पार्थवरूथिन्यां मृद्नन्तमथ पार्थिवान् ।
पुनर्विरथ्याधिरथिं हैडिम्बोऽविशदम्बरम् ॥ ७७ ॥
स दशापि दिशो ह्रादेर्ह्रादेर्वात्तिमयीः सृजन् ।
ववर्ष राक्षसो वृक्षविषभृद्ग्रावपावकैः ॥ ७८ ॥
ततः पदे पदे शुष्यद् दिक्षु सर्वासु तद्बलम् ।
भिन्नपालिस्थलशिरः सरोजलमिवाद्रवत् ॥ ७९ ॥
शिश्रियुर्द्विट्चमूमेव केचित् केचिदहो पुनः ।
प्राविशंश्चाशु हस्त्यश्वशवशैलमहागुहाः ॥ ८० ॥
विपरीताम्बुशृष्ट्याभैस्ततः शरभरैर्नभः ।
सूरजः पूरयामास रुद्धद्विट्शस्त्रवर्त्मभिः ॥ ८१ ॥
आर्कैः शरा द्रुमा भैमैर्मिथः संघट्टजानलाः ।
ज्वलन्तः प्रपतन्तोऽथ प्रकृष्टाये भियेऽभवन् ॥ ८२ ॥
पलाशनबलाधीशः संरब्धेऽथ ववर्ष सः ।
कपाटसंधिघघटाभिः सर्वाभिः शस्त्रजातिभिः ॥ ८३ ॥
प्रच्छिन्नभिन्नदीर्णाङ्गः क्रियासमभिहारतः ।
हाहेत्येवध्वनिमयस्तदाजनि चमूचयः ॥ ८४ ॥
मुहुः किलकिलारावं चक्रे दिवि सुदारुणम् ।
मुहुर्ननर्त काष्ठासु ज्वलद्रोमावलीमुखः ॥ ८५ ॥
ससादि सालंकरणं हस्त्यश्वमगिलन्मुहुः ।
पपौ तडागतुल्याभ्यां प्रसृतिभ्यामसृङ्मुहुः ॥ ८६ ॥
इति नक्तंचरो नक्तं चरन् समहरच्चमूः ।
दर्शनेनैव रौद्रेण मुधा पेतेऽस्त्रजातिभिः ॥ ८७ ॥
स्वस्तीत्युक्त्वाथ यातेषु दिवः सिद्धसुरर्षिषु ।
क्षीयमाणासु सेनासु व्याकुलेषु जगत्स्वपि ॥ ८८ ॥
अहो गजेषु वाहानां वाहेषु भुजवाहिनाम् ।
भुजवाहिषु चाङ्घ्रीणां तलमिच्छत्सु संश्रयम् ॥ ८९ ॥
कौरवाः करिघटाभिरुन्नमाङ्क्ररक्षिणः ।
कस्य युद्धरसाधीनं दीनास्याः कर्णमूचिरे ॥ ९० ॥
त्रिभिर्विशेषकम् ।
अधुनाप्यमुनास्मासु हृतासुषु वृष त्वया ।
शक्त्या निघात्यः कस्यार्थे पार्थो वासवदत्तया ॥ ९१ ॥
इत्याकर्ण्यामुचत् कर्णस्तदस्त्रं वासवं ज्वलत् ।
सुसंकटाय कस्मैचिन्निधानमिव रक्षितम् ॥ ९२ ॥
मायास्त्रस्य पलादस्य मायास्थानं विदार्य हृत् ।
घ्नती तमोऽपि तन्मिषं सा शक्तिस्त्रिदिवं ययौ ॥ ९३ ॥
विपन्नोऽपि हितं स्वेषां परेषामहितं सृजन् ।
संजहार महारक्षोविभुरक्षौहिणीं पतन् ॥ ९४ ॥
पतिते तत्र वीरेन्द्रे कौरवा ननृतुर्मुदा ।
कृष्णोऽपि जगदात्मत्वं ख्यापयन्निव नृत्तवान् ॥ ९५ ॥
विष्वक्सेन विषादेऽपि कृत्ये नृत्येन भासि किम् ।
इत्यैन्द्रिणा तदा पृष्टो नृत्यन्नेवाभ्यधात् प्रभुः ॥९६॥
तेजोमयवपुः कर्णः कुरूणां जीवितं परम् ।
शक्तिर्वासवदत्तेयमभूत् तस्यापि जीवितम् ॥ ९७ ॥
न त्वत्सूनुरघानीति हसन्तीवांशुभिर्मुदा ।
सैकपुंघातिनी शक्तिर्भैमिं हत्वा हरिं स्मिता ॥ ९८ ॥
गतायां त्रिदिवं तस्यां मृतानेतान् न वेत्सि किम् ।
योऽन्यायाति मुखेऽमीषां श्वासः कोटरवायुवत् ॥९९॥
पार्थः पात्योऽद्य शक्त्येति कौरवैः शिक्षितोऽन्वहम् ।
तद्वृत्तवद्विसस्मार युधि सन्मोहितो वृषः ॥ १०० ॥
एकलव्यजरासंधशिशुपालादयो मया ।
दुर्जया जघ्निरे युक्त्या मत्वेतत् प्रधनं पुरा ॥ १०१ ॥
मत्संसाधितदुःसाधमित्येतद्वैरिमण्डलम् ।
अस्त्रास्तत्वक्पुटस्तोमं नालिकेरमिवाहर ॥ १०२ ॥
इत्युक्ते शौरिणा सर्वे भूपभीमार्जुनादयः ।
शोकाग्निं युधि रोषाग्नीकृत्य धीरा दधाविरे ॥ १०३ ॥
युध्यस्व धर्मात्मा क्रुध्य चतुर्थेऽह्नि जयस्तव ।
इत्यादिशत् तदा व्यासः क्षणादृष्टो युधिष्ठिरम् ॥१०४ ॥
अथोऽग्रे तमसि क्ष्वेडातुल्यकालं मिथः शराः ।
पेतुर्वक्त्रोदरेष्वेव योधानां शब्दवेधिनाम् ॥ १०५ ॥
ध्वान्तेषूग्रेषु सैन्याङ्गं दीप्रं दीप्रं मणित्विषा ।
द्विड्बाणा विव्यधुः कालनखाग्रेणेव दर्शितम् ॥ १०६ ॥
उत्पपातेव नाराचैर्नभस्तैर्वासिभिस्तदा ।
निशीथे योधनोन्मत्तं ननर्देव द्विपैस्तमः ॥ १०७ ॥
इत्थं चिरप्रहारेण भूभृतस्तेऽपि शश्रमुः ।
स्यान्न येषां श्रमांशोऽपि साब्धिशैलधराधृतौ ॥ १०८ ॥
अश्रान्तः करुणाक्रान्तमनाः संक्रन्दनात्मजः ।
तदा चख्यौ कृती वीरान् क्षणं विश्रम्यतामिति ॥१०९॥

Digitized by Google

ततः पार्थं प्रशंसन्तस्ते दुःखोच्छेददैवतम् ।
निद्रां हरिकरिस्कन्धस्थिता एव सिषेविरे ॥ ११० ॥
रेजतुर्युद्धसंनद्धे ते सेने स्वापनिश्चले ।
यमौकश्चित्रवन्नानारत्नभूषांशुवर्णके ॥ १११ ॥
अथोद्ययौ शशी सुप्तान् करैरमृतवर्षिभिः ।
स्पृशन्निव प्रहारार्तान् कुलवीरान् सहानुगैः ॥ ११२ ॥
खण्डमूर्तेर्विधोर्बिम्बे रक्तकुल्यासु दिद्युते ।
कृत्तैरिव तनूखण्डैः कुलव्यसनसंयति ॥ ११३ ॥
अथ द्विजेश्वरकरक्रीडाकलितशान्तिके ।
वियद्धाम्नि विवेशार्कः कुर्वन् वसुमयीं महीम् ॥ ११४ ॥
गुरुः कुरुनरेन्द्रेण वाक्शल्यैः शल्यितस्ततः ।
क्रुद्धो विव्याध दिव्यास्त्रैरनस्त्रकुशलानपि ॥ ११५ ॥
संपरायपरायत्ते यत्ते रिपुचमूचये ।
चकार कदनं प्रातः कृतान्तरदनं गुरुः ॥ ११६ ॥
किमकालक्षयोत्तालं भालचक्षुस्त्रिचक्षुषः ।
द्रोणपाणितले प्रायः प्राणिनश्छिनयेऽभ्ययात् ॥ ११७ ॥
इत्युल्कामण्डलीचण्डकाण्डग्रस्तप्रजाव्रजम् ।
दीप्रं निह्नुप्य तच्चापं खेचराः प्रोचिरे भयात् ॥ ११८ ॥

युग्मम् ।

पतत्सु द्रोणबाणेषु चर्मवर्मेभभेदिषु ।
रक्ताब्धिमज्जनैरेव वञ्चनं विदधुर्बुधाः ॥ ११९ ॥
विप्रैर्द्रुपदपुत्राणामिन्दुवृन्दैरिवाननैः ।
द्रोणश्चकार रक्तोदं तदा कालोदजित्वरम् ॥ १२० ॥
द्रोणेऽस्मिन्नचले क्रूरप्रचण्डप्रहृती ततः ।
विराटद्रुपदौ [1]शौर्यद्विपदन्तौ निपेततुः ॥ १२१ ॥
धार्मितेजोयशःसूर्यशशितुल्यग्रहस्पृशौ ।
क्षुरप्रलूनौ तन्मौली राहुयुग्मं गुरुर्व्यधात् ॥ १२२ ॥
आद्रवन्तो गुरुं भीमधृष्टद्युम्नादयस्तदा ।
गजैरिव गजाः कर्णशकुन्याद्यैर्धृता युधि ॥ १२३ ॥
रजःकालरजन्युग्रो मिलत्सर्वबलाम्बुधिः ।
भूयिष्ठभैरवरवः क्षयस्तत्राद्भुतोऽभवत् ॥ १२४ ॥
भिन्नेभकुम्भनिर्मुक्तमुक्तासिक्ततिलास्ततः ।
तत्र प्रसस्रुरस्रौघस्रवन्त्यः पलपङ्किलाः ॥ १२५ ॥

सप्तलोकतमांसीव प्रगेऽर्कः प्रलये पुनः ।
सप्तार्णवानिवौर्वाग्निर्द्रोणः सप्तार्दयच्चमूः ॥ १२६ ॥
ऊचे कृष्णोऽथ कौन्तेया न जेयोऽसौ धृतायुधः ।
अस्त्रं सुतमृतिश्रुत्या त्यजेन्नीत्या क्रियेत सा ॥ १२७ ॥
इत्याकर्ण्यार्जुने कर्णौ पिधायाधोमुखे स्थिते ।
कथंचिदभ्युपगमान्मूके भीमेन भूपतौ ॥ १२८ ॥
आलभ्य मालवपतेरश्वत्थामाभिधं द्विपम् ।
अश्वत्थामा हत इति प्रोच्चैरूचे वृकोदरः ॥ १२९ ॥
लज्जामज्जन्मुखाद्भीमाद्गुरुः श्रुत्वेदमप्रियम् ।
जानन्नजेयतां सूनोस्तदश्रद्धाय युद्धवान् ॥ १३० ॥
वीरान् षष्टिसहस्रीं स पाञ्चालान् हन्तुमुद्यतान् ।
जघान कपिलः कोऽपि सगरस्य सुतानिव ॥ १३१ ॥
प्रयुतानि प्रवीराणां ब्रह्मास्त्रेणाथ निर्दहन् ।
चतुर्वर्षशतोऽप्येष युवेव व्यचरत्तराम् ॥ १३२ ॥
कर्म कुर्वन्नतिक्रूरं निषिद्धोऽथ सुरर्षिभिः ।
भीमोक्तिं शङ्कितोऽपृच्छत् सत्यनिष्ठाद्युधिष्ठिरात् ॥ १३३ ॥
हरिणाभ्यर्थितो बाढं लोकप्रलयशान्तये ।
भीमोक्तिं धार्मिरप्युक्त्वा स्वैरं हस्तीत्यभाषत ॥ १३४ ॥
कृष्णकम्बुस्वनैर्हस्तीत्यनिशम्य नृपोदितम् ।
शङ्कितः सुतशोकेन क्षणं स्तब्धः स्थितो गुरुः ॥ १३५ ॥
अस्पृशन्तो भृशं भूमिं तं भूपं येऽवहन् हयाः ।
ते भुव्येत्य तदा चेरुर्बद्धपक्षा इवाण्डजाः ॥ १३६ ॥
धृष्टद्युम्नं प्रदीप्तास्त्रं कृष्टजिह्ममिवान्तकम् ।
जित्वा ततो जघानाशु दशवीरायुतीं गुरुः ॥ १३७ ॥
इति द्विड्भयदं भीमः समभ्येत्य तमभ्यधात् ।
सुते मृतेऽपि विप्रोऽपि पलाद इव हंसि धिक् ॥ १३८ ॥
इत्याकर्ण्य विमुच्यास्त्रं दत्तविश्वाभयो गुरुः ।
योगीन्दुर्दशमद्वारनिष्क्रान्तार्चिरुपाविशत् ॥ १३९ ॥
प्रागुत्क्रान्तात्मनस्तस्य नभसोऽस्तरवेरिव ।
पार्षतः प्रविवेशाङ्गमन्धकार इवाधमः ॥ १४० ॥
क्रुद्धः पार्थनिषिद्धोऽपि धिक्कृतोऽपि नृपैरयम् ।
कचैराकृष्य खड्गेन गुरोर्मूर्धानमच्छिनत् ॥ १४१ ॥
त्रस्तेऽथ कौरवबले किमेतदिति पृच्छतः ।
द्रोणेराख्यत् कृपः कृत्स्नमाशु दुर्योधनेरितः ॥ १४२ ॥

१ काल— इति पा० ।

ततः पितृवधक्रोधी रुद्रांशो भालरौद्रदृक् ।
अश्वत्थामा दधौ रूपं कल्पान्तायेव भैरवम् ॥ १४३ ॥
पिषन् करं करेणायं पेषोष्मवासितप्रभम् ।
ऊचे कोपानलोष्माभैः स्खलद्भिर्वाग्भरैर्मुहुः ॥ १४४ ॥
श्रावयद्भिः पितुः कर्णौ मृतं मां हन्त तैरपि ।
मृत एवास्मि किं ध्यातो यत् केशैर्जगृहुर्गुरुम् ॥ १४५ ॥
आजन्म धृतसत्योऽथ धर्मजोऽपि गुरुव्यये ।
दधौ मृषोक्तिं जीवत्सु विश्वासः क्षत्रियेषु कः ॥ १४६ ॥
अद्य नारायणास्त्रेण पितृदत्तेन विष्टपम् ।
असौ करोम्यपाञ्चालमपाण्डवमकेशवम् ॥ १४७ ॥
इत्युक्त्वा शुचिरादाय प्रकम्पितसुरासुरम् ।
अस्त्रं नारायणं द्रौणिर्जगर्जोद्धुतमूर्धजम् ॥ १४८ ॥
बलमाकुलमालोक्य तन्नादेनेन्द्रनन्दनः ।
अनुतापपरः क्ष्मापमूचे भ्रूचेष्टयोत्कटः ॥ १४९ ॥
राजन्नाजन्मसत्योक्तौ त्वयि सप्रत्ययो गुरुः ।
जघ्ने निरस्त्रो यदि तत् सद्यः केनैष तत्सुतः ॥ १५० ॥
धिग् भोगस्पृहयालुत्वं यत्कृते दुष्कृताशयः ।
शिष्यो वृद्धं गुरुं व्याजत्याजितास्त्रमपातयत् ॥ १५१ ॥
इति प्रलापिनि क्रुद्धे शतक्रतुसुते ततः ।
जगाद नादयन्नुर्वीं कोपनः पवनात्मजः ॥ १५२ ॥
क्षत्रियो मुनिवज्जल्पन् नैषि फाल्गुन वल्गुताम् ।
कः क्रूरारिवधोपाये प्रायो न्यायोचितं चरेत् ॥१५३॥
किं नाम ध्वनिमुद्दामं कुरुते गुरुनन्दनः ।
मयि त्वयि च कृष्णे च संपरायपरायणे ॥ १५४ ॥
इत्युक्तिं भीमसेनस्य गमयन् पूर्वरङ्गताम् ।
शतयज्ञसुतं यज्ञसुतः कोपोन्मदोऽवदत् ॥ १५५ ॥
अनस्त्रज्ञानपि ब्रह्मबन्धुर्ब्रह्मास्त्रतो हरन् ।
अधर्मसमरः स्वैरी पितृवैरी मया हतः ॥ १५६ ॥
भीष्मः पितामहो वृद्धो भगदत्तः पितुः सखा ।
धर्मैकयोधिनौ जल्प कया युक्त्या त्वया हतौ ॥ १५७ ॥
इति ब्रुवन्तं पार्थेन धिगित्युक्त्वा कटाक्षितम् ।
क्रोधाग्निसंभ्रमभ्राम्यच्चक्षुस्तं सात्यकोऽभ्यधात् ॥१५८॥
धिगस्मान् कुशलाचारानाराद्दाराध्य घातिनम् ।
स्वस्था भवन्तं हन्तव्यमपि ये मृगयामहे ॥ १५९ ॥

अथैनं पार्षतः प्रोचे केन प्रायगतो हतः ।
यज्ञैकशीलो यूपाङ्कः पार्थकृतभुजः कृती ॥ १६० ॥
रे नृशंस दुराचार पुनर्यदि वदस्यदः ।
तत् त्वां हन्मीति जल्पन्तौ मिथस्तौ हन्तुमुद्यतौ ॥ १६१ ॥
कृष्णोक्त्या तौ च भीमेन वारितौ स्फारितायुधौ ।
जज्वाल दीप्तदिग्जालमस्त्रं च द्रौणिचालितम् ॥ १६२ ॥
अथ नारायणास्त्रोत्थैर्व्यथितां विविधायुधैः ।
सेनां प्रेक्ष्य नरं पश्यन् भूधवान् धार्मिरभ्यधात् ॥ १६३ ॥
सत्यजित्प्रमुखा येन हता हन्त महारथाः ।
दुग्धमुग्धमुखो येन सौभद्रश्छलतो हतः ॥ १६४ ॥
दुर्योधनाय दुर्भेदं दिव्यं यः कवचं ददौ ।
वधे तस्य गुरोः क्रुध्यन् मध्यस्थोऽभून्मृधेऽर्जुनः ॥ १६५ ॥
युग्मम् ।
स्वस्त्यस्मै भोः पलायध्वं प्रवेक्ष्याम्येष पावकम् ।
केन शक्योऽधुना जेतुं कालकल्पः कृपीसुतः ॥ १६६ ॥
अथोद्बाहुश्चतुर्बाहुरूचे प्रज्वलितान् नृपान् ।
नास्त्रेणानेन दह्यन्ते त्यक्तायुधरथा युधि ॥ १६७ ॥
इति श्रुत्वाभ्यधाद्भीमो भो भो मा भैष्ट भूमिपाः ।
हन्म्येष पश्यत द्रौणिं निर्दयं गदयानया ॥ १६८ ॥
इत्युदीर्यातिगर्जन्तं धाविनं पावनिं पुरः ।
मूढोऽयमित्युपहसन् द्रौणिर्बाणैरपूरयत् ॥ १६९ ॥
अथो रथायुधमुचां मुक्त्वा चक्रं महीभुजाम् ।
एकीभूयास्त्रकीलालिर्द्विड्भीमं भीममासदत् ॥ १७० ॥
अस्त्रकीलाकलापेन वृतो भीमस्तदा बभौ ।
प्रतापभासुरो भानुरिव कल्पान्तवह्निना ॥ १७१ ॥
वारुणं मरुतिश्चाणमस्त्रमैन्द्रिस्तदामुचत् ।
क्षणान्नारायणास्त्रेण तदप्यफलितं बलात् ॥ १७२ ॥
अस्त्रेण ताप्यमानोऽपि युध्यमानो वृकोदरः ।
अभूत्ततश्चमत्कारकारी दिविषदामपि ॥ १७३ ॥
मुक्त्वाथ मन्थरहयं रथमेत्यातिरंहसा ।
यानादाकृष्य कृष्णाभ्यां भीमोऽस्त्रं त्याजितो बलात् ॥१७४॥
सह पाण्डुचमूदुःखैः सह द्रौणिमनोरथैः ।
सह विश्वोपतापैश्च ततोऽस्त्रं तद्ययौ शमम् ॥१७५॥
अस्त्रं पुनर्विमुञ्चेति द्रौणिर्दुर्योधनेरितः ।

Digitized by Google

द्भि: प्रयोज्यं न दिव्यास्त्रमित्युक्त्वाधावदुद्धत: ॥१७६॥

वज्रसारै: शरासारैर्जित्वा सात्यकिपार्षतौ ।
भूपं सुदर्शनं निन्ये पौरवं यमपौरताम् ॥ १७७ ॥

त्रस्यन्तीं धर्मजचमूमनुधावन्नथ क्रुधा ।
रुद्धो धनंजयेनास्त्रमाग्नेयं द्रौणिरक्षिपत् ॥ १७८ ॥

अस्त्रस्य तस्य कीलाभि: श्लिष्यमाणाश्चमूभटा: ।
कालकिंकरजिह्वाभिर्लिह्यमाना इवाबभु: ॥ १७९ ॥

धूमोर्मिमन्दमार्तण्डदृश्यतारकमण्डलम् ।
प्रदह्याक्षौहिणीं मङ्क्षु तदस्त्रं कृष्णमाद्रवत् ॥ १८० ॥

तत्कीलापटलालीढौ कृष्णौ प्रधनमूर्धनि ।
तदा गर्भितनीलाश्महेमताटङ्कतां गतौ ॥ १८१ ॥

अथ पार्थो बभौ क्षिप्रब्रह्मास्त्रशमितानल: ।
तत्कालदहनोत्तीर्णसुवर्णवदतिद्युति: ॥ १८२ ॥

अपाण्डवामकृत्वापि महीं शान्तेऽस्त्रपावके ।
दिव्यास्त्राणि तदा निन्दन् द्रौणिर्व्यासमलोकत ॥१८३॥

रथं मुक्त्वा मुनिं नत्वा ततोऽपृच्छत् कृपीसुत: ।
विफलत्वं किमस्त्राणि कृष्णयोरगमन् मम ॥ १८४ ॥

अथोवाच मुनिर्वत्स विद्धि बीभत्सुकेशवौ ।
निमित्तमानवावेतौ नरनारायणावृषी ॥ १८५ ॥

तप: षष्टिसहस्राब्दीं तप्त्वा नारायणो मुनि: ।
लिङ्गार्चनव्रत: शर्वं सेवित्वा तत्समोऽभवत् ॥ १८६ ॥

मूर्तिसेवापर: शंभोस्त्वं तु यातस्तदंशताम् ।
विश्वरूपस्वरूपं हि लिङ्गमङ्गं तु तद्भव: ॥ १८७ ॥

तन्मा कृथा: पृथासूनुकृष्णयोर्धाम्नि विक्रियाम् ।
रुद्रांश: सततं रुद्ररूपयोरेकरूपयो: ॥ १८८ ॥

इत्युक्त्वान्तर्हिते व्यासे द्रौणिर्नत्वा हृदा हरम् ।
देवरूपौ स्वयं कृष्णौ शान्तमन्युरमन्यत ॥ १८९ ॥

ततो विरतसंहारेऽवहारे विहिते नृपै: ।
अभिसर्पन्निवाम्नायव्यासं वासविरैक्षत ॥ १९० ॥

नत्वाथ पप्रच्छ मुनिं पृथाभू-
र्दृष्ट: पुमान् शूलकरो मयाग्रे ।
कुरून् हरन् शूलभवैस्त्रिलोक-
ग्रासार्चिजिह्वैरिव कस्त्रिशूलै: ॥ १९१ ॥

अथाददे वाचमयं मुनीन्द्र:
कृष्णप्रसादेन तव प्रसन्न: ।
स्वामी स कामी गिरिपुत्रिकाया
जगत्त्रयीकाननकल्पवृक्ष: ॥ १९२ ॥

तमात्मानमनात्मानं तमीश्वरमनीश्वरम् ।
पार्थ तं ज्ञानमज्ञानं ध्याय तं प्रियमप्रियम् ॥ १९३ ॥

इत्थं जगत्पतिजयैरनुगृह्य पार्थं
याते मुनौ निजनिजं शिबिरं प्रविश्य ।
वीरा: शरीररुचिकृद्दिना दिनान्ते
चक्रु: कथामवितथां सुभटप्रथासु ॥ १९४ ॥

भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थिते:
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्र: कृती ।
तद्वाक्कर्मणि बालभारतमहाकाव्ये कविप्रीतिदे
पीयूषद्रवधाम्नि सप्तममिदं द्रोणस्य पर्वाद्रवत् ॥१९५॥

सर्गैश्चतुर्भिरप्यत्रानुष्टुभां द्रोणपर्वणि ।
अशीतिसंनिकृष्टानि निर्दिष्टानि शतानि षट् ॥ १९६ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के द्रोणपर्वणि पञ्चमदिने द्रोणवधो नाम चतुर्थ: सर्ग: ॥ ४ ॥ :: :: ॥

॥ अथ बालभारतस्य ॥

॥ कर्णपर्वारम्भ: ॥

अगोचरं वागधिदेवताया
वाचामपि स्वं चरितप्रपञ्चम् ।
वक्तुं जगत्तारणकारणेन
व्यासीभवन् पातु भवो मुरारे: ॥ १ ॥

पुन: कुरुक्षेत्रनिषण्णनेत्र:
सङ्ग्राममुद्दामतमं निरूप्य ।
गावल्गणिर्द्रोणवधाकुलाय
न्यवेदयत् कौरवपुंगवाय ॥ २ ॥

तत: कृपीसूनुमते कुरूणां
सेनाधिपत्ये मुदितेन राज्ञा ।
कर्णोऽभिषिक्तस्तृणवत् त्रिलोकीं
मेने दृशा क्रोधशिखित्विषेव ॥ ३ ॥

स्मरानुकारो मकरक्रमेण
बलं महद् व्यूह्य तदङ्गराजः ।
राजन् जगज्जैत्रपतत्रिपातः
प्रकम्पयामास न कस्य चेतः ॥ ४ ॥

विभूष्य भूमिं हरमूर्तिमर्ध-
चन्द्रानुकारेण बलेन पार्थः ।
जज्वाल भालाक्षिवदस्त्रजाल-
ज्वालाकरालो भयदस्तदये ॥ ५ ॥

अथास्त्रसंघट्टपरंपराभि-
श्चूर्णीकृतानां तपनद्युतीनाम् ।
लेशैरिव व्योमतलं स्फुलिङ्गैः
शृङ्गारयन्तः सुभटाः प्रसन्नुः ॥ ६ ॥

पक्षद्वयक्ष्मापपटुप्रताप-
स्विद्यज्जयश्रीयुगघर्मनीरैः ।
इतस्ततोऽपि क्षतजच्छलेन
काश्मीरमिश्रैरिव भूरभूषि ॥ ७ ॥

रिपुक्षुरप्रोत्पतितप्रवीर-
ताटङ्कचक्रौघनिभाद्विभाते ।
अभ्युद्गमोऽकारि सकोकयुग्मै-
रिवाम्बुजैरम्बुजकोकबन्धोः ॥ ८ ॥

गदाप्रपातोत्पतदस्रबिन्दु-
सिन्दूरिताशापतिकुम्भिकुम्भः ।
सामीरिणा मत्तकरिस्थितेन
कुलूतराजः सगजोऽपि जघ्ने ॥ ९ ॥

आच्छादिते रेणुभरेण भानौ
नभःस्पृशा संयति भानुसूनुः ।
शरक्षतारिक्षतजौघवृष्ट्या
निविष्टरेणुं धरणीं चकार ॥ १० ॥

निपात्य संसप्तकमण्डलानि
क्ष्माखण्डमाखण्डलसूनुरस्त्रैः ।
चकार कोपारुणदृष्टिधाम-
वृष्टिप्रपञ्चैरिव पूर्यमाणम् ॥ ११ ॥

पार्थप्रतापप्रहतौ प्रभूत-
प्रतापयाञ्चार्थमिव प्रयातौ ।
भूपौ सगर्भौ युधि दण्डधारो
दण्डस्य चण्डद्युतिमण्डलाय ॥ १२ ॥

पाण्ड्यो नृपः पाण्डुचमूचलाक्षी-
चूडामणिः कौरवकालरुद्रः ।
विश्वाधिकंमन्यतयातिदर्पः
ससर्प सर्पाधिपबन्धुबाहुः ॥ १३ ॥

कर्णाद्विजेतुर्युधि तस्य मौलिं
द्रौणिक्षुरप्रोत्पतितं पतन्तम् ।
रत्नप्रभादीप्तदिशं निभाल्य
भिया न भानौ नयनं दधौ कः ॥ १४ ॥

मौलिं महायुद्धसमुद्धतस्य
छित्त्वोत्सुकेर्म्लेच्छबलाधिपस्य ।
भुवि प्रविष्टं बलिसङ्गिगङ्गा-
स्नानाय नूनं नकुलस्य काण्डैः ॥ १५ ॥

स्मरन् गिरं मातुरनातुरात्मा
कृती कृतारातिजयो जघान ।
अभ्यागतं वध्यदशां दशाशा-
विकीर्णकीर्तिर्नकुलं न कर्णः ॥ १६ ॥

इत्थं मिथःसंगरसंगतानां
चमूचराणां खचरैः शरौघैः ।
विष्वक्चलत्प्राजनशङ्कयेव
रथ्या रवेराशु ययुर्नभोऽन्तम् ॥ १७ ॥

प्रथममहः ।

कृतावहारे निशि वीरवारे
प्रातः प्रवृत्ते पुनराहवाय ।
रराज कर्णः कुरुराजकर्ण-
सुधाधुनीपूरगिरिर्गिरैवम् ॥ १८ ॥

राजन्नराजन् नयनोत्सवा ये
भवत्प्रसादाः कृतशत्रुसादाः ।
अद्यैष तेषामनृणो भवामि
दहामि कामं ज्वलितोऽर्जुनस्य ॥ १९ ॥

शौर्यास्त्रवीर्यैरधिकोऽस्मि पार्थात्
स सर्वथा सारथिनाधिको मत् ।
कृष्णाधिकं सारथिमद्य शल्यं
यच्छाशु यच्छामि जयश्रियं ते ॥ २० ॥

इत्युक्तिभिस्तस्य मुदा नृपेण
शल्योऽर्थितस्तद्रथसारथित्वम् ।
क्रुद्धो जगौ विश्वजयक्षमस्य
ददासि धिक् सूतजसूततां मे ॥ २१ ॥

नृपोऽथ तं प्रश्रयवानवादी-
न्मा वीरकोटीर कुरुष्व कोपम् ।
सारोत्तराः सारथयो रथिभ्यः
पथि प्रथिम्नः प्रधनस्य धेयाः ॥ २२ ॥

ततो हुताशस्य यथा समीरः
पुरां विपक्षस्य यथा विरञ्चिः ।
पृथातनूजस्य यथा मुकुन्द-
स्तथास्य सारथ्यमुरीकुरु त्वम् ॥ २३ ॥

इत्युक्तिपूरैर्नृपतेः सुधौघ-
समद्रवैर्मद्रपतिः प्रसन्नः ।
स्वच्छन्दचारी रविनन्दनस्य
सूतो भवामीति भृशं बभाषे ॥ २४ ॥

ततः सितोष्णीषधरोऽङ्गभर्ता
रथं वलत्ताश्वमकूजनाख्यम् ।
महेन्द्रसूतं भृगुसूनुदत्तं
तं दन्तिकक्षाध्वजमारुरोह ॥ २५ ॥

कुरूद्वहेषु ध्वनिदीर्णदिक्षु
धुन्वन् धनुः शल्यमथाह कर्णः ।
अद्यार्जुनं हन्मि यतो मुरारि-
स्ततो जयः स्यादिति वाङ्मुधास्तु ॥ २६ ॥

मयेन्द्रपुत्रेऽथ हते हृषेन्द्रः
सेवागतायास्त्रिदशास्त्रपङ्क्तेः ।
लज्जाविनम्राण्यपि दृग्भिरङ्घ्रि-
गताभिरालोकयतां मुखानि ॥ २७ ॥

अथाह शल्यः प्रहसन् यदृच्छा-
प्रलापतः कर्ण न लज्जसे किम् ।
भोः केन न त्वं स च दृष्टसारो
गन्धर्वयुद्धे च गवां ग्रहे च ॥ २८ ॥

द्रष्टासि तेजोऽद्य ममेति शल्यं
संलाप्य कर्णोऽथ जगाद भृत्यान् ।
संप्रेक्षतां क्वापि जितेन्द्ररुद्रः
पार्थस्तदर्थं विशिखा ममोत्काः ॥ २९ ॥

यो दर्शयत्यर्जुनमद्य तस्मै
ददामि दामानि रणन्मणीनि ।
रामास्तुरंगान् करिणः पुराणि
साराणि यद्वा स्वयमीहते सः ॥ ३० ॥

उवाच शल्योऽथ हसन्नवैमि
सत्यीभवत् कर्ण वचस्तवेदम् ।
यदर्जुनो दर्शयिता स्वयं स्व-
मिष्टान् ग्रहीता भवतस्ततोऽसून् ॥ ३१ ॥

स्पर्धां मृधे मा कुरु भर्तृपिण्ड-
पुष्टोऽद्य राज्यांशभुजार्जुनेन ।
हंसेन हेमाब्जभुजा गृहस्थो-
च्छिष्टाशनैः काक इव द्युयाने ॥ ३२ ॥

तावन्महान्त्यङ्गमहीभुजंग
कुरङ्गवत् तुङ्गय रङ्गणानि ।
मृगेन्द्रवद् यावदफल्गुपातं
न फाल्गुनो वल्गति वल्गुतेजाः ॥ ३३ ॥

क्रुद्धोऽथ कर्णो निजगाद वेद्मि
तमर्जुनं मां च स वेत्ति तत्त्वात् ।
शल्योपमैः शल्य किमत्र शत्रु-
र्मित्रोपधिस्त्रासयसीव वाक्यैः ॥ ३४ ॥

वदाथवा स्वैरमगम्यगन्तु-
रपेयपातुर्यदभक्ष्यभोक्तुः ।
त्वं मद्रदेशैकनिवेशनस्य
जनस्य नेतासि शुचिः कुतोऽसि ॥ ३५ ॥

शल्योऽथ तं प्राह मुहुः किमित्थं
मामात्थ नाथोऽसि यदङ्गभूमेः ।
विक्रेयमानीतकलत्रपुत्रै-
स्त्याज्या जनन्योऽपि जनैर्न यत्र ॥ ३६ ॥

क्रुधं विधत्सेऽभिहिते हितेऽपि
वैधेय युध्यस्व तदर्जुनेन ।

१–हृतिः इति पा० ।

उक्त्वेति शल्यस्त्वरयांचकार
हरीनरीणां जडयन् मनांसि ॥ ३७ ॥
महारथान्नामिषवोऽन्तरिक्षे
तदा मिथःपातविलूनदेहाः ।
तेजोमयं प्राप्य शरीरमंशु-
च्छलेन मन्ये तपनं प्रविष्टाः ॥ ३८ ॥
संनाहदृङ्मार्गगलल्ललाट-
स्वेदोदबिन्दुर्दलयन्नथारीन् ।
अस्मिन् नियत्या निहिते नियोगे
रुदन्निषादर्शि दयालुरैन्द्रिः ॥ ३९ ॥
अथावदन्मद्रनृपोऽङ्गभूपं
कुतूहलं सूतज पश्य पश्य ।
लीलालवः संयति योऽर्जुनस्य
प्राणापहारः स महारथानाम् ॥ ४० ॥
मृत्यो समासीदति पश्य कर्ण
कुरुश्रियामुत्कटचाटुकानाम् ।
अपाति दन्तैरेकाण्डलून-
नृपालिमौलिच्युतहारमूर्त्या ॥ ४१ ॥
पश्यैन्द्रिबाणा युधि सप्त सप्ता-
ष्टाष्ट द्विषः कर्ण निपात्य तुष्टाः ।
ध्वान्ताविले यान्ति बिलेऽभिरन्तुं
जयश्रियं चाहृतरां गृहीत्वा ॥ ४२ ॥
इतस्ततः शैलततीस्तताम
कोदण्डकोट्येव पुरा पृथुर्यत् ।
तत् कौतुकं शान्तमगुर्दिगन्तान्
यद् भूभृतोऽस्मिन् धृतचाप एव ॥ ४३ ॥
शरत्वरामाहृतलुप्तखेद-
संसुप्तसंसप्तकचक्रवालः ।
वृषः सदादेव बलेषु बल्वान्
हरेः सुतोऽयं वद केन सह्यः ॥ ४४ ॥
अद्य क्व यास्यत्यधुना मृधेऽसौ
दृष्टो मयेत्युल्लसदंशमुक्त्वा ।
कर्णः शराकीर्णनभा नभस्व-
त्प्रभाततेरप्यदितावकाशम् ॥ ४५ ॥

शरोत्करैरर्कसुतस्य दिक्षु
भित्तीभवद्भिः स्खलितेऽपि वाते ।
आध्यध्यमाना बलिना भयेन
वनीव पाण्डुध्वजिनी चकम्पे ॥ ४६ ॥
काण्डैर्महामण्डपमन्तरिक्षे
कृत्वाग्रजं भोजयितुं कृतान्तम् ।
शवान्नकूटान् पतितानपत्र-
पाचे रणे सूरसुतस्ततान ॥ ४७ ॥
विद्धो मृधोर्वीषु सहस्ररश्मि-
सुतेन तेनाशुगमण्डलैर्यैः ।
तदाशुगैर्विव्यधुरात्मभिस्ते
रोषादिव व्योम्नि सहस्ररश्मिम् ॥ ४८ ॥
मुहुर्विरथ्य क्रतुनन्दनादीन्
दशायुतीं बाहुभृतां निहत्य ।
नदन् शरैर्धर्मसुतेन हेमे-
ष्वक्रोंऽशुमानर्क इवार्कजोऽपि ॥ ४९ ॥
क्षीणायुधः छिन्नरथोऽथ कृत्त-
वर्मा क्षताङ्गो हतचक्ररक्षः ।
वृषत्सुरप्रैर्विधुरो धरित्री-
धवोऽथ बोधिच्छदवच्चकम्पे ॥ ५० ॥
तीक्ष्णांशुमत्येव यमं भ्रुवैव
जित्वाङ्गभर्तुः पितृपूर्वबन्धू ।
कोपावनिः पावनिराशुगैर्यत्
तदाजयत् तं किमु चित्रमत्र ॥ ५१ ॥
नन्दोपनन्दौ कवची सुपर्वा
पाशी धनुर्ग्राहमहाभुजौ च ।
निर्द्वन्द्वदीर्घात्मकसंनिषङ्गि-
क्राथा जरासंध इति प्रतीताः ॥ ५२ ॥
सुतास्तव द्वादश जघ्निरेऽमी
राजन्नथाजौ पवनात्मजेन ।
सूर्या इव द्वादश तत्प्रतापा-
स्ततः कुरूक्षामदिशन् युगान्तम् ॥ ५३ ॥
युग्मम् ।
तत्कार्मुकद्वादशतूर्यघोष-

Digitized by Google

नान्यन्तदीप्तः पवनस्य सूनुः ।
रेजे यशोनाट्यनटो हतेभ-
कुम्भोत्थमुक्तातातिमुष्टिपुष्पः ॥ ५४ ॥

मुक्ताफलैर्मारुतिदारितानां
कुम्भस्थलोत्थैः करिणामपाति ।
दिवं गतानां क्षणेन तेषां
द्युलोकवृक्षेभ्य इव प्रसूनैः ॥ ५५ ॥

परस्परोत्तालनृपालमाला-
कलम्बजालैर्बलयोर्द्वयी सा ।
अकम्पतान्योन्यविलोलचक्षुः-
कटाक्षपातैर्युगलीव यूनोः ॥ ५६ ॥

जनौघसंहारचिराद्विराग-
भृता तपस्वीभवता यमेन ।
ज्येष्ठेन दत्तं स्वमिवाधिकार-
मादात् तदार्किः परसंप्रहारैः ॥ ५७ ॥

हत्वा हयानां च विषाणिनां च
सप्रायुतीं ततदसृक्पयोधीन् ।
चन्द्रैरिवाभूषयदेष लूनै-
र्द्रागव्याघ्रदत्तादिनरेन्द्रवक्त्रैः ॥ ५८ ॥

दिव्यास्त्रभृद्द्रोणिजयावदातं
दिव्यास्त्रवर्त्मक्षपितत्रिगर्तम् ।
किरीटिनं कर्णकलम्बचक्र-
चमत्कृतः प्राह तदा मुकुन्दः ॥ ५९ ॥

विदारयन् वीरभुजोर्मिमाला
दोर्भ्यां तरन् संगरसागरेऽस्मिन् ।
कर्णोऽद्य पश्यार्जुन पश्यति त्वां
मुहुः परं पारमिवारुणाक्षः ॥ ६० ॥

उत्तुङ्गमातङ्गतुरङ्गमुख्य-
प्राणिव्रजप्राणनिरासरौद्रः ।
विना त्वयोच्चैः शरभेन केन
ग्रस्खाल्यतां सिंह इवैष धावन् ॥ ६१ ॥

इत्युक्तिपारे वृषभज्ञिभिन्नं
निशम्य भीमाच्छिविरप्रयातम् ।
युधिष्ठिरं द्रष्टुमगादगाध-
बाधः क्रुधान्धः सहरिः किरीटी ॥ ६२ ॥

मर्दातिकोपेन निपात्य कर्णे-
मिमौ समेताविति जातबुद्धिः ।
निरीक्ष्य तौ क्षोणिपतिः क्षतौघ-
क्षीणोऽपि हर्षो शयनादुदस्थात् ॥ ६३ ॥

नत्वा निषण्णौ तदनु क्षतौघ-
वीक्षाविषण्णौ नृपतिर्मुदा तौ ।
पप्रच्छ दिष्ट्याद्य स पिष्टसैन्यः
कथं हतः संयति रामशिष्यः ॥ ६४ ॥

पार्थस्ततः प्राह विभो कृपीभू-
जयश्रिया विघ्नितकर्णमृत्युः ।
भीमे भरं न्यस्य निरीक्षितुं त्वा-
मेतोऽधुना हन्मि तवाज्ञया तम् ॥ ६५ ॥

क्रुधाथ धार्मिस्तमुवाच कुन्त्याः
क्षत्राधम त्वं जठरं किमागाः ।
धिङ्मां त्वयि क्षात्रिणि येन दध्रे
त्रयोदशाब्दीमसुहृज्जयाशा ॥ ६६ ॥

एकोऽद्य बन्धून् परिहृत्य कर्णात्
त्रस्तोऽसि लुब्धादिव कृष्णसारः ।
ओजस्विनः कस्यचिदर्पयेदं
गाण्डीवमस्मानवति द्विषो यः ॥ ६७ ॥

इत्युक्तिभिः कोपकडारमक्षि
खड्गे क्षिपन्तं हरिरैन्द्रिमूचे ।
गाण्डीवमन्यस्य समर्पयेति
वक्तुर्वधेऽसि प्रथितप्रतिज्ञः ॥ ६८ ॥

ततः प्रतिज्ञाघटनाय शोणां
साम्नामनौचित्यविवेचनेन ।
आकर्ष खड्गाद् दृशमाशु निन्दां
गुरोरशस्त्रं वधमादिशन्ति ॥ ६९ ॥

इदं निशम्याह महेन्द्रसूनु-
र्युधिष्ठिरं धृष्टतरैर्वचोभिः ।
भयार्तिपूर्णः परमप्रमादी
त्वमेव पृथ्व्या मघवान् प्रतीतः ॥ ७० ॥

इतीरितोक्तिं द्रुतकृष्टखड्गं

१ हृत इति पा० ।

तमाह कृष्णस्त्यज मूढ शस्त्रम् ।
त्वं ज्येष्ठनिन्दानुशयान्मुमूर्षुः
स्तवं कुरु स्वस्य सतां स मृत्युः ॥ ७१ ॥

इदं विदित्वाह नरश्चरित्रे-
र्न मादृगस्त्री पुरुषोऽस्ति कश्चित् ।
कलिप्रकर्षं कलितोदयानां
शरीरिणां शश्वदहं धुरीणः ॥ ७२ ॥

अथैष मां निन्दति नेति च स्व-
मिति क्रुधा रक्तमुखं नरेन्द्रम् ।
हरिर्जगौ भूप विचारयेन्द्रि-
स्तव स्तवं स्वस्य चकार निन्दाम् ॥ ७३ ॥

इति ब्रुवन् भूपपदाब्जयुग्मे
मधुव्रतामास नरेण कृष्णः ।
भूपोऽपि तौ कर्णवधेऽभ्यषिञ्च-
द्दिवाश्विनीरैः परिरभ्य हृष्टः ॥ ७४ ॥

रणे धरित्रीरमणेन साकं
पाकद्विषः सूनुरथाभ्युपेत्य ।
हत्वापि राजप्रकरानकार्षीत्
तेषां मुखै राजमयीमिवोर्वीम् ॥ ७५ ॥

गदाबलैर्वैरिबलानि भीम-
स्तथा बिभेदाश्च यथा न भेदाः ।
क्ष्मायामबुध्यन्त महीभुजंग-
शताङ्गमातङ्गतुरङ्गमाणाम् ॥ ७६ ॥

भीतैर्भटैर्मुक्तमुखः करीव
माद्यन्नथोत्पत्य पुरः स्फुरन्तम् ।
दुःशासनं क्रूररथास्त्रपेषः
स एष जग्राह करेण कम्प्रम् ॥ ७७ ॥

दोषान् स्मरन्त्या हृदयस्थयाशु
स कृष्णया नुन्न इवोग्रकोपः ।
हत्वेनमङ्केऽग्निसदृग्भिरुच्चै-
राचष्ट दृग्भिः प्रदहन्निवाशाः ॥ ७८ ॥

जहर्ष यः संसदि याज्ञसेनी-
केशांशुकाकर्षणकौतुकेन ।
भो भूमिपाः पश्यत पश्यतास्य
विपाट्य वक्षो रुधिरं पिबामि ॥ ७९ ॥

इदं गदन्नेव तदा त्वदीय-
सूनोः कपाटोरु विपाट्य वक्षः ।
रक्तं मुहुः सैष पपौ जगर्ज
मुहुर्महीपान् मुहुरालुलोके ॥ ८० ॥

आस्फालयन् बाहुमसृक्छितेन
स सृक्किणी चावलयन् करेण ।
ननर्द स्तदा रक्तदृगूर्ध्वरोमा
दृष्टश्च वीरैरभिमूर्च्छितं च ॥ ८१ ॥

स तेन कोपेन तदाकरिष्य-
दकर्णदुर्योधनमेव विश्वम् ।
स्मरस्मयस्मेररसोऽस्मरिष्य-
न्न द्रौपदीवेणिविमोक्षणं चेत् ॥ ८२ ॥

ऐन्द्रिं तृणीयन् रणकर्मणीन्द्र-
स्पर्धैकधीरो वृषसेनवीरः ।
क्षणोऽच कार्णिः कटकोत्कटानि
न्यपातयत् क्षोणिभृतां कुलानि ॥ ८३ ॥

मुहुः स माद्रीसुतसात्यकादी-
नेको बहून् विश्वविलोपशक्तीन् ।
विभग्नसंरम्भभरानकार्षी-
दब्धेस्तरङ्गानिव तीरदेशः ॥ ८४ ॥

ततः किरीटी प्रहरन् शरौघै-
र्मुखं च हस्तौ च वृषाङ्गजस्य ।
अपातयत् कौरवराज्यलक्ष्मी-
वासाम्बुजं च श्रवणाम्बुजे च ॥ ८५ ॥

ततः शिखिक्रोडितकालकूट-
चक्रायमाणारण[1]कृष्णचक्षुः ।
राधाङ्गभूर्धैर्यधनोऽभ्यधाव-
द्धनंजयं पुत्रवधक्रुधार्तः ॥ ८६ ॥

तयोरभून्नारदनादहूत-
गीर्वाणगन्धर्वभृतान्तरिक्षम् ।
अभ्यस्तमाजन्ममनोरथानां
परंपराभिः समरं पराभिः ॥ ८७ ॥

सूर्येन्द्रयोः पुत्रजयोक्तिवादे
द्विधा स्थितैः पूर्वममर्त्यवृन्दैः ।

१–यत–इति पा० ।

पृष्टस्तदेयस्य विधिश्च यत्र
कृष्णो जयस्तत्र सदेत्युवाच ॥ ८८ ॥
मिलच्चतुर्वार्धिमिथोमहोर्मि-
संघट्टघोषोग्रयुगान्तकल्पः ।
संरब्धकृष्णार्जुनशल्यकर्ण-
शङ्खप्रणादः समयः स जज्ञे ॥ ८९ ॥
ततोऽतिसंरम्भिणि पार्थयुग्मे
शल्यश्चलत्कृष्णकटाक्षविद्धः ।
हनूमतः पुच्छलवाग्ररोम्णा
सा हस्तिकक्षा च हता चकम्पे ॥ ९० ॥
इन्द्राय धात्रा दनुजान् विजेतु-
मिन्द्रेण रामाय नृपान् विपेष्टुम् ।
रामेण दत्तं विजयाङ्कमस्मै
यच्चापमार्किस्तदयं चकर्ष ॥ ९१ ॥
द्वन्द्वैकयुद्धस्पृहया सहस्र-
चक्षुःसहस्रांशुतनूद्भवाभ्याम् ।
मिथः शरैः पार्श्वचरा नरेन्द्रा
विजिग्यिरे मङ्क्षु निजघ्निरे च ॥ ९२ ॥
अथार्कपुत्रेण बलक्षपक्षाः
क्षिप्ता यशोऽङ्का इव कङ्कपत्त्राः ।
अपूरयन् पार्थचमूं रयेण
मरालमाला इव नीलमभ्रम् ॥ ९३ ॥
जवादवैरोचनमेव विश्वं
कर्तुं नरेण प्रहिताः पृषत्काः ।
भित्त्वा भृशं कर्णशरीरमुर्व्या
मूलं बलिं भेत्तुमिव प्रविष्टाः ॥ ९४ ॥
मुष्टिस्थितानेव चकर्त कर्णः
शरानथैन्द्रेः कृतविश्वविघ्नः ।
उत्पातुकामान् लघुमूल एव
विधेरनर्थानिव बुद्धिकारः ॥ ९५ ॥
उक्तोऽर्जुनस्तद्गुणविस्मिताभ्यां
भीमाच्युताभ्यां ननु दुर्जयोऽसौ ।
धीराधिकं खाण्डवकालिकेय-
किरातयुद्धादिह संरभस्व ॥ ९६ ॥
मत्त्वेति पार्थोऽभ्युदितेऽनुरूपे
रणे रणत्कङ्कणकेतवेन ।
दोर्भ्यां हसन्तामिव दूरमुक्तैः
शरैः शरीरीव नभोऽप्यकार्षीत् ॥ ९७ ॥
पराक्रमं दर्शयितुं सुरेभ्य
इवात्मनो मानधनस्तदार्किः ।
तद् भार्गवास्त्रेण किरीटिक्लृप्तं
ब्रह्माण्डतः काण्डपटं जहार ॥ ९८ ॥
विद्धाखिलाङ्गानथ कृष्णभीम-
किरीटिनः काण्डगणेन कर्णः ।
प्रातः पतङ्गांशुसहस्रलीढ-
त्रिकूटकूटप्रतिमानकार्षीत् ॥ ९९ ॥
तयोर्वनान्मद्रिपयोरिवाथ
गण्डस्थलोड्डीनशिलीमुखेन ।
रणातिरेकेण न के समीपा
जग्मुर्महीपास्तरुषद्विनाशम् ॥ १०० ॥
यः खाण्डवे खण्डितपुच्छदण्डः
स कृष्णयुग्मग्रसने प्रतिज्ञाम् ।
जिह्वायुगेनेव सृजन् वृषेण
बाणासने बाणपदे कृतोऽहिः ॥ १०१ ॥
हितोक्तिषु स्वैरमकर्णं कर्ण
संधानतोऽस्माद् भुजगाशुगोऽयम् ।
द्विषद्गलं नेति पुनस्तदेनं
संधेहि युद्धेषु जडोऽन्यथा त्वम् ॥ १०२ ॥
इत्युच्यमानो युधि मद्रपेन
तेनोवधार्थं व्यथमानचेताः ।
द्विः संदधे नास्त्रमितीरितोक्ति-
र्मुमोच कर्णो जयिने भुजंगम् ॥ १०३ ॥
युग्मम् ।
हरौ गृहीताचलगौरवेऽथ
हृदा रथाश्वेषु भुवं गतेषु ।

१ विद्वेषिणोऽर्थो—इति पा० ।

१ बलं इति पा० ।

किरीटिनो मङ्क्षु किरीटखण्ड-
मेवाहरन्नग्रमुखस्य सर्पः ॥ १०४ ॥
कृष्णो ततो रत्नविचित्रवर्णैः
कर्णस्य बाणैः परितः परीतौ ।
अवापतुः पाण्डवराज्यराज-
जयश्रियोः केलिकलापिहेलाम् ॥ १०५ ॥
यान् सूनुवात्सल्यवशंवदोऽन्त-
र्हस्तानिवादत्त वृषस्य भानुः ।
अखण्डयत् तानपि काण्डपातैः
पार्थस्त्रुटत्काञ्चनवर्मदम्भात् ॥ १०६ ॥
अर्कात्मजत्वाद् वृषपर्वभाजा
क्षिप्तो यमेनेव भुजो भुजंगः ।
धावन् रवात् खाण्डवदत्तवैर-
श्छिन्नस्तदा व्योम्नि शरैर्नरेण ॥ १०७ ॥
दिव्यास्त्रपातैरपि दुर्जयस्य
जयस्य कर्णेन ततः शतघ्न्यः ।
तादृग्गरावर्मान्त इवास्त्रदण्डो
विश्रामकामः शममुन्ननाम ॥ १०८ ॥
कोपच्छलेन ज्वलनः स्वचाप-
पराभवेनेव तदातिताप:: ।
महारिमह्नाय जहीति वक्तु-
मिवाविशच्चेतसि शक्रसूनोः ॥ १०९ ॥
द्राक् सज्जिते धन्वनि रौद्रमैन्द्रि-
स्ततो दधे दिग्दहनीयमस्त्रम् ।
नश्यन्निवैतद्भयतस्तदोर्वी-
मज्जद्रथाङ्गो रविसूरथोऽभूत् ॥ ११० ॥
धर्मध्वजो गोपतिपापपङ्क
इवावमज्जद्रथचक्रमुर्व्याम् ।
उद्धर्तुमिच्छन्नथ भानुसूनु-
रवोचदुच्चैस्तनयं पृथायाः ॥ १११ ॥
मनोरथं भर्तुरिवोद्धरामि
रथस्य चक्रं सुकृतञ्च यावत् ।
तावद्विलम्बस्व महास्त्रमोचे
शूरा न शूरा व्यसनस्थितेऽरौ ॥ ११२ ॥

इत्युन्नथामुं हरिराह कर्णं
दिष्ट्योपदेष्टुं सुकृतानि वेत्सि ।
विषाग्निचारे क्रतुजानिकारे
सौभद्रमारेऽपि न किं स्मृतानि ॥ ११३ ॥
इत्यच्युतोक्त्या कुपितस्तदस्त्रं
ब्रह्मास्त्रपातेन विजित्य कर्णः ।
बिम्बं रवेर्गन्तुमिव प्रतेने
पद्यामयं द्यामनु बाणचक्रैः ॥ ११४ ॥
अथ व्यमुञ्चत् प्रसभात् कृशानु-
मयं महास्त्रं ज्वलिताग्रमैन्द्रिः ।
जितो यमार्को दिवि धूमतापै-
र्भीता च तातश्च वृषस्य येन ॥ ११५ ॥
अथाक्षिपद्वारुणमस्त्रमार्किः
शान्ताग्निकीलापटलं समन्तात् ।
संताप्य सद्यो जलमज्जितस्य
रूपस्य रूपं तदगाद् यशोऽस्य ॥ ११६ ॥
इत्यस्त्रमस्त्रेण निहत्य तिष्ठन्
कर्णोऽवनियस्तसमस्तचक्रः ।
प्रम्लानदुर्योधनचक्रपद्मो
बभावसूर्येन्दुरिव प्रदोषः ॥ ११७ ॥
ततस्तपोभिर्यदि मे प्रसन्ना
रुद्रादयोऽस्त्रे गुरवस्तदेनम्‌ ।
हन्यामनेनेत्यभिमन्त्र्य हैमं
बाणं मुमोचाञ्जलिकं किरीटी ॥ ११८ ॥
सूनोः युधा दीर्घमिवोहरन्ध्र-
मुरश्चिरं दर्शयति द्युरत्ने ।
कण्ठेऽथ तेनाङ्कविभुर्विभिन्नः
पपात पातालपतिव्यथाकृत् ॥ ११९ ॥
दानैकशौण्डः परमार्गणाय
तदाङ्गमप्यङ्गपतिः प्रदाय ।
दिशो दशापि द्युतिभिर्विभिन्द-
न्नङ्के पितुः केन पतन् न दृष्टः ॥ १२० ॥
उत्कृत्तकर्णा मदपौरुषाभ्यां
सा कुण्डलाभ्यामिव वर्जिताथ ।

कीर्त्या हसन्त्येग्दिभुजाद्रियेव
पराङ्मुखाभूत् कुरुराजसेना ॥ १२१ ॥

मुक्तात्मने जलमिव स्वसुताय दातुं
यातेऽथ पश्चिमपयोनिधिमुष्णरश्मौ ।
एके स्मिताक्षिकुमुदा विदधुः प्रवीराः
प्रम्लानवक्त्रकमलाश्च परेऽवहारम् ॥ १२२ ॥

मूर्धेव तस्मिन् पतितेऽपि बन्धो
दुर्योधनो युद्धरसेन धावन् ।
त्वत्सूनुराश्चर्यकरः सुराणां
वीरेषु रेखां विशदां तदाप ॥ १२३ ॥

भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मताहंस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
पर्वेदं रविनन्दनस्य जगदानन्दे तदास्यामृत-
ज्योतिर्ज्योतिषि बालभारतमहाकाव्ये जगामाष्टमम् ॥ १२४ ॥

अनेनैकेन सर्गेण कर्णपर्वण्यनुष्टुभाम् ।
शतमेकमिहोत्पन्नं त्रिभिर्युक्ता च सप्ततिः ॥ १२५ ॥

इति श्रीजिनदत्तसूरिशिष्यपण्डितश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के कर्णपर्वणि कर्णवधो नाम ग्रन्थारम्भतः सर्गसंकलनया सप्तविंशतमः सर्गः ॥ २७ ॥ :: :: ॥

॥ अथ खण्डप्रशस्तौ

रामावतारवर्णनम् ॥

(८६) पाताले मञ्जुमूलं फणिपतिरभितः कीर्तिवल्लेस्तवैषा
स्थूणा कैलासशैलो गगनमिह महामण्डपः पाण्डुदण्डाः ।
दन्तीन्द्रस्थूलदन्ता दलततिरतुला शारदाभ्राणि सारा-
स्तारा: पुष्पाणि चन्द्रः फलमिदममलं राम राजेन्द्र मन्ये ॥

हे राम राजेन्द्र अहमेवं मन्ये यत्तव कीर्तिवल्लेः कीर्तिरूपाया व्रततेः पाताले फणिपतिः शेषो मञ्जु मनोहरं मूलं वर्तते, तथा तस्याः स्थूणा स्तम्भः कैलासशैलो ऽस्ति, तथा तस्या महामण्डपो गगनमाकाशमस्ति, तथा तस्याः पाण्डुदण्डाः श्वेतयष्टिका दन्तीन्द्रस्थूलदन्ताः दन्तीन्द्राणां दिग्गजानां स्थूला महान्तो दन्ताः सन्ति, तथा तस्या अतुला दलततिः अनुपमा पर्णसन्ततिः श्रेणिः शारदाभ्राणि शरत्काले भवा जलधराः सन्ति, तथा तस्याः पुष्पाणि साराः प्रसृतास्तारा गगनज्योतींषि सन्ति, तथा तस्याः फलमिदं प्रत्यक्षदृश्यममलं निर्मलं चन्द्र इन्दुरस्तीति ॥ ८९ ॥

(९०) त्वं चेत्कल्पतरुर्वयं सुमनसस्त्वं चेत्सुधात्मा कलाः
संपूर्णा वयमीश्वरो यदि भवान् स्वच्छा विभूतिर्वयम् ।
संपूर्णः कमलाकरो यदि भवान् श्रीराजहंसा वयं
स्वामिंस्त्वं शृणु रामचन्द्र नृपते किंकिं न तेऽङ्गं वयम् ॥

हे स्वामिन् रामचन्द्र नृपते वयं ते तव किंकिं नाङ्गमवयवो भवेम किं तु वयं सर्वे तवैवावयवा इति भावः, अथ तदेवाह, हे राम त्वं चेद्यदि कल्पतरुः कल्पवृक्षस्तर्हि वयं सुमनसः पुष्पाणि भवेम वृक्षस्यावयवत्वात्पुष्पाणामिति भावः, एवमग्रेपि तत्तदवयवत्वं ज्ञेयम्, तथा हे राम त्वं चेद्यदि सुधात्मा चन्द्रस्तर्हि वयं संपूर्णाः कलाः, तथा यदि भवानीश्वरः शंभुस्तर्हि वयं स्वच्छा विभूतिर्भस्म तदपीश्वराङ्गमिति भावः, तथा यदि भवान् कमलाकरः संपूर्णस्तर्हि वयं श्रीराजहंसाः, एवमेवास्माकं सर्वेषां सर्वत्र सर्वदा सर्वथाऽङ्गत्वं जायत एवेति भावः ॥ ९० ॥

(९१) एतस्मिन्विजनेवनेऽतनुतरुच्छन्नावकाशे सुखं
तिष्ठामीति तव द्विषामधिपतिर्यावद्विधत्ते मतिम् ।
तावत्तत्र निपातितं भुवि भवन्नामाङ्कभल्लाहतं
दृष्ट्वा केसरिणः करङ्कमसमत्रासो मुहुर्मूर्छति ॥

हे राम तव द्विषां शत्रूणामधिपतिः स्वामी वैरिराजः एतस्मिन् कस्मिंश्चिदविष्टे विजने जनरहिते वने अतनुभिर्महद्भिस्तरुभिर्वृक्षैश्छन्नमाच्छादितोऽवकाशो दिग्विदिशोरन्तरालं यस्मिंस्तत्र स्वच्छीत्या सुखं तिष्ठामीति यावन्मतिं विधत्ते तावत्तत्र वने भुवि पृथिव्यां भवन्नामचिन्हितेन भल्लेन शस्त्रविशेषेणाहतं व्याहतं केसरिणः सिंहस्य करङ्कमस्थिपञ्जरं निपातितं दृष्ट्वा असमत्रासोऽतुलत्रासो मुहुर्मूर्छति मूर्छां प्राप्नोतीत्यर्थः ॥ ९१ ॥

(९२) अयि खलु विषमः पुराकृतानां
विलगति जन्तुषु कर्मणां विपाकः ।
क्व नु कुलमकलङ्कमायताक्ष्याः
क्व च रजनीचरसंगमापवादः ॥

अयीति कोमलामन्त्रणे खलु निश्चितं जन्तुषु जीवेषु पुराकृतानां पूर्वजन्मविहितानां कर्मणामर्थादशुभानां विषमो विपाकः फलं विलगति भवत्युत्पद्यत इति यावत्, तदेवाविष्करोति, नु इति वितर्के आयते विस्तीर्णे अक्षिणी नेत्रे

Digitized by Google

यस्यास्तस्याः सीतायाः अकलङ्कं कलङ्को दोषस्तद्रहितं कुलं क्व क्व च पुना रजनी चरो रावणस्तस्य यः संगमः संयोगः स एवापवादोऽश्लाघ्यो दोषः, अनेन सीताया रावणस्य चात्यन्तासंगतिः सूचिता ॥ ९२ ॥

(९३) अयि खलु विषमः पुराकृतानां
विलसति जन्तुषु कर्मणां विपाकः ।
हरशिरसि शिरांसि यानि रेजु-
र्हरहर तानि लुठन्ति गृध्रपादैः ॥

अत्र पूर्वार्धो व्याख्यात एव, यानि रावणस्य शिरांसि मस्तकानि पूजायां निहितानि हरशिरसि शंभुमस्तके रेजुः शुशुभिरे तानि शिरांसि हरहरेति खेदे गृध्रपादैर्गृध्रचरणैर्लुठन्ति, रावणस्य शिरांसि रामबाणच्छिन्नानि भूमौ पतितानि गृध्रचरणैरितस्ततो लोठ्यन्त इति भावः ॥ ९३ ॥

(९४) अयि खलु विषमः पुराकृतानां
विलसति जन्तुषु कर्मणां विपाकः ।
क्व च ननु जनकाधिराजपुत्री
क्व च दशकन्धरमन्दिरे निवासः ॥

पूर्वार्धस्यार्थः पूर्ववदेव नन्विति वितर्के, जनकमहाराजस्य कन्या सीता क्व क्व च दशग्रीवरावणस्य गृहे निवासः, असंभावितमपि सर्वं दैवयोगेन फलतीति भावः ॥ ९४ ॥

(९५) त्वत्प्रारब्धप्रचण्डप्रधननिधनितारातिवीरातिरेक-
क्रीडत्कीलालकुल्यावलिभिरलभत स्पन्दमाक्रन्दमुर्वी ।
दम्भोलिस्तम्भभास्वद्भुज भुजगजगद्भर्तुराभर्तुरेनां
तेनायं मूर्ध्नि रत्नद्युतिततिमिषतः शोभते शोणभावः ॥

दम्भोलिर्वज्रं तस्य यः स्तम्भस्तद्वद्भास्वन्तौ देदीप्यमानौ भुजौ यस्य तत्संबोधने हे दम्भोलिस्तम्भभास्वद्भुज येन कारणेनोर्वी भूमिराक्रन्दं क्रन्दं मर्यादीकृत्य त्वया प्रारब्धं प्रचण्डं रौद्रं यत्प्रधनं संग्रामस्तेन निधनिता विनाशं प्राप्ता येऽरातिवीराः वैरिसुभटास्तेभ्योऽतिरेकेणाधिक्येन क्रीडन्ती खेलन्ती या कीलालकुल्या रुधिरनदी तस्या या आवलयः श्रेणयस्ताभिः स्पन्दं चरणमलभत प्राप, यदा त्वया वैरिणो हतास्तदा तद्रुधिरं भूमितले गतमिति भावः, तेन कारणेन भुजगजगत् पाताललोकस्तस्य भर्तुः स्वामिनः शेषस्य मूर्ध्नि मस्तके रत्नद्युतिततेः शेषाहिशिरःस्थितकान्तमणिसमूहस्य मिषतः छलेनायं शोणभावः शोणत्वं रक्तत्वं शोभते, रामाहतवैरिरुधिरसंपर्कजनितमेव रक्तत्वं शेषशिरःस्थितमणिषु भासत इति भावः ॥ ९५ ॥

(९६) देव त्वद्विजये तुरङ्गमखुरव्रातक्षतक्ष्मातल-
प्रोद्भूते रजसः परागपटले दिक्चक्रमाक्रामति ।
अक्ष्णां पङ्क्तिशतानि निन्दति निजां हस्तद्वयीं निन्दति
स्वां निन्दत्यनिमेषतां परिपतद्बाष्पाम्बुधारो हरिः ॥

हे देव त्वद्विजये तव विजयकाले तुरङ्गमाणामश्वानां खुरव्रातैः खुरसमूहैः क्षतं क्षुण्णं यत् क्ष्मातलं भूतलं तस्मात्प्रोद्भूते उत्थिते रजसो धूलेः परागपटले सूक्ष्मकणसमूहे दिक्चक्रं दश दिश आक्रामति सति हरिरिन्द्रः परिपतद्बाष्पाम्बुधारः सर्वनेत्रेषु रजःकणसंसर्गात्परिपतन्ती निर्गच्छन्ती नेत्रेभ्यो बाष्पाम्बुधारा अश्रुजलप्रवाहो यस्य स परिपतद्बाष्पाम्बुधारः सन् स्वीयानामक्ष्णां नेत्राणां पङ्क्तिशतानि दशशतानि निन्दति, यतश्चैतावद्रजः समुच्छलितं येन तस्य सहस्रनेत्राणि तिरोहितानि बभूवुस्तेन यदि मम नेत्रसहस्रं नाभविष्यत्तदा चैतावद्रजो निकरस्तत्र नापतिष्यदतो नेत्रसहस्रं मम किमर्थमभवदिति, तथा निजां स्वीयां हस्तद्वयीं करद्वयं निन्दति सत्यपि नेत्रसहस्रे तत्तिरोधानाय यदि हस्तसहस्रमप्यभविष्यत्तदा हस्तैः सर्वनेत्राच्छादनं कर्तुमशक्यमतो मम पाणिद्वयं व्यर्थमेवेति, तथा स्वां स्वकीयामनिमेषतामक्ष्णां पक्ष्मपाताभावतां निन्दति, यतो मया देवत्वादनिमेषता पक्ष्मपाताभावः किमिति प्राप्तः यस्माच्चक्षुषां रजःपटलाक्रान्तत्वमभूद्यदि च मे नयनेष्वनिमेषता नाभविष्यत्तदा रजःपातोपि नाभविष्यदतः स्वामनिमेषतां निन्दतीति भावः ॥ ९६ ॥

(९७) अम्भः कर्दमतामुपैति सहसा पङ्कः पुनः पांसुतां
रेणुर्वारणकर्णतालयुगलैर्दिक्प्रान्तनीहारताम् ।
निम्नत्वं गिरयः समं विषमतां शून्यं जनाकीर्णतां
निर्याते त्वयि रामचन्द्र नृपते त्यक्तस्वरूपं जगत् ॥

हे रामचन्द्र नृपते त्वयि निर्याते यात्रार्थं निष्क्रान्ते सति जगत् त्यक्तस्वरूपं त्यक्तं स्वं रूपं येन तथाविधं जातम्, तत्कथमित्याह, अम्भो जलं सहसा झगिति कर्दमतामुपैति प्राप्नोति यतोऽम्भसो द्रवत्वेपि भवदीयाश्वाद्युत्थापितरजःसंपर्कात्तस्य कर्दमता जातेति, तथा पुनः सच पङ्कः पांसुतां धूलितां जनसंपर्कात्प्राप्तः, तथा रेणुर्वारणकर्णतालयुगलैर्वारणानां हस्तिनां यानि कर्णतालयुगलानि तैर्दिक्प्रान्तनीहारतां दिगन्ते या नीहारता हिमता तामुपैति दिगन्ते समुद्राणां सत्त्वात्तत्र च वारणकर्णतालयुगलप्रेरिता रेणवो निपातिता हिमा भवन्तीति भावः, तथा गिरयः घोटकखुरक्षुण्णा निम्नत्वं प्राप्नुवन्ति, समं च स्थलं विषमतामुपैति, जनशून्यं स्थलं जनाकीर्णतां त्वत्सेनया वने प्रवेशादरण्यमपि जनपदवद्भवति,

Digitized by Google

एवं सर्वमेव जगत्स्वस्वरूपत्यागेन त्यक्तस्वरूपं जज्ञे इति भावः ॥ ९७ ॥

(९८) देव त्वद्भुजदण्डचण्डिमचमत्कारिप्रतापानल-
ज्वालाजालभयादिवाभिविशति क्षीराम्बुधिं माधवः ।
भर्गः स्वर्गधुनीं दधाति शिरसा त्यक्तत्रिलोकीकृति-
र्वेधाः किंतु मुहुः कमण्डलुजले रात्मानमासिञ्चति ॥

हे देव त्वदीयौ यौ भुजदण्डौ तयोर्यश्चण्डिमोग्रत्वं तेन चमत्कारकारी आश्चर्यकारीयः प्रतापः स एवानलज्वालाजालमग्निशिखासमूहस्तद्भयादिव माधवः कृष्णः क्षीराम्बुधिमभिविशति प्रविशति, यथा भर्गः शंभुस्तद्भयादिव स्वर्गधुनीं गङ्गां शिरसा दधाति धारयति, तथा वेधा ब्रह्मा त्यक्ता त्रिलोक्याः कृतिः करणं येन स तथा ऽभूत्, अथ च न केवलं त्यक्ता किंतु मुहुर्वारंवारं कमण्डलुजलैरात्मानमासिञ्चति, यथा जनः प्रोद्भूतानलदाहसंत्रस्तो जलं सेवते तथैतेपि त्वत्प्रतापानलसंत्रस्ता इव जलं सेवन्ते इति भावः ॥ ९८ ॥

(९९) रेफ व्यञ्जनराजता तव तवाकारप्रकर्षः स्वरे-
ष्वन्त्यस्यापि मकार विस्फुरति ते वर्गाक्षरेष्वादिमा ।
यैः संभूयनिगद्यते रघुकुलालङ्कारहीराङ्कुरो-
देवः क्षोणिसुतापयोधरतटीशृङ्गारहारो हरिः ॥

हे रेफ तव व्यञ्जनराजता व्यञ्जनेषु श्रेष्ठत्वं स्फुरति, हे आकार तव स्वरेषु प्रकर्षः स्फुरति, तथा हे मकार तव वर्गाक्षरेषु कखादिषु अन्त्यस्यापि सत आदिमा विस्फुरति, विपरीतगणनयेति भावः, तेषां प्राधान्यं प्रपञ्चयति, यैर्वर्णैः संभूय मिलित्वा राम इत्यनेन रघुकुले यो लङ्कारस्तदीयो यो हीराङ्कुरः स इव देवो द्योतनशीलो हरी रामचन्द्रः क्षोणीसुतायाः सीतायाः पयोधरतटी स्तनतटी तस्याः शृङ्गारार्थं यो हारः स इव निगद्यते कथ्यत इत्यर्थः ॥ ९९ ॥

(१००) देव ब्रह्माण्डभाण्डे सदसि विकसितन्यायनान्दीनिनादै-
र्भूतेशप्रीतिहेतोर्भुवनधवलनं नाटकं नाटयन्त्याः ।
त्वत्कीर्तेर्मूर्तयोऽमी कुमुदकुमुदिनीकान्तकर्पूरकुन्द-
क्षीराब्धिक्षीरमुक्तामणिविबुधसरित्तारकाशेषसंघाः ॥

हे देव ब्रह्माण्डभाण्डे सदसि सभायां न्याय एव नान्दीनिनादा द्वादशतूर्यशब्दास्तैर्भूतेशस्य शम्भोः प्रीतिहेतुना भुवनस्य जगत्त्रयस्य धवलनं श्वेतताकरणं नाटकं नाटयन्त्यास्त्वत्कीर्तेरमीपदार्था मूर्तयो जाताः, ते के इत्याह, कुमुदं कैरवं, कुमुदिनीपतिश्चन्द्रमाः, कर्पूरः, कुन्दः, क्षीराब्धिः क्षीरसमुद्रः, क्षीरं दुग्धं, मुक्ताः, मणयश्चन्द्रकान्ताद्याः, विबुधसरिद्गङ्गा, तारका ज्योतींषि, शेषः नागः, शङ्खाः इति, यथाऽन्यापि काचन नटभार्या स्वसदृशरूपवत एव पदार्थान्प्रकाशयति तथैव त्वत्कीर्तिः स्वसदृशान् श्वेतानेव पदार्थान् नाटकार्थमुत्पादितवतीति भावः ॥ १०० ॥

THE APHORISMS
OF THE
YOGA PHILOSOPHY
OF
PATAÑJALI.

(Continued from page 262.)

What results from this saving [knowledge's táraka]? To this he replies :—

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ॥ ५६ ॥

Aph. 56. On equalization of clearness of the pure quality [i. e. understanding] and soul, Isolation takes place.

On the equality of clearness of the pure quality [viz., the understanding—the modifications of the pure quality] and soul, the characteristics of which have been described before, Isolation takes place.

By "clearness" of the pure quality [i. e. thinking principle, buddhi-sattwa] is meant its resolution into its cause, by removal of the conceit [or notion] of being the agent of universe; and the "clearness" of soul is non-existence of experience [which is] attributed to it.

Thus, when "clearness" of these two [i. e. of the principle of understanding and soul] has equally taken place, then Isolation—perfect emancipation—ensues.

BOOK IV.

Now [the fourth book, which is called] Kaivalya Páda—book of Isolation is commenced for the purpose of establishing, by consistent reason, the nature of Isolation, by means of expelling mistakes arisen from contrary determination. And there by mentioning various causes as birth &c., of the fore-mentioned perfections, he informs us that the meditation should, therefore be performed; and he states its subservience to Isolation.

अस्मात् तारकात् किम्भवतीत्याह ।

सत्त्वपुरुषावुक्तलक्षणौ तयोः शुद्धिसाम्ये कैवल्यम् । सत्त्वस्य सर्वकर्तृत्वाभिमाननिवृत्त्या स्वकारणेऽनुप्रवेशः शुद्धिः । पुरुषस्य शुद्धिरुपचरितभोगाभावः इति द्वयोः समानायां शुद्धौ कैवल्य मुत्पद्यते मोक्षो भवतीत्यर्थः ॥

इति श्रीमहाराजाधिराज श्रीभोजदेवविरचितायां पातञ्जलयोगशास्त्रवृत्तौ विभूतिपादस्तृतीयः ॥

Digitized by Google

जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ॥ १ ॥

Aph. 1. Perfections are produced by birth, herbs [of mysterious virtue], incantations, penances and meditations.

Some "Perfections" [Siddhi, supernatural powers] are caused by birth alone; such as the motion of birds in the air and the like; or the knowledge &c., of Kapila and other saints, [or minuteness &c., of deities that were invested with them their birth].

"Perfections" produced by herbs consist of elixirs and the like, that is, supernatural herbs in Pátála—the regions under the earth, [this perfection is obtained by persons who possess knowledge of these supernatural herbs or medicines].

"Perfections" produced by Incantations are well known [that is this perfection may be obtained by any one, who knows and repeats incantations]. Perfections produced by "Penances" are those obtained by Viswámitra and others, [mendicants and performers of penances]. "Perfections" caused by "meditations" are such as have been described before.

The [real] cause of perfections is meditation alone performed in the other births; Incantations and the rest are merely media or mediate causes [or occasional causes.] But then [it may be asked] how the meditation of other [former] births can be the cause [of perfection, for] in the case of Nandíśwara and others the result is seen in this birth alone? To this he replies.

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

Aph. 2. The change into another class is from the supply of nature.

The change of class &c. of Nandiśwara and others in this present life, was from the "Supply of Natures." That is, the natures of former births alone supply the modifications in this birth—viz, they [the former natures] cause changes of those [modifications] by changing them into different classes, &c.

[The meaning is this that the fact of change of class &c. as is seen in the case of Nandíśwara &c., who was born a Bráhman, and by worship of Siva was changed into a deity in that very life, can be accounted for by Nature —or modifications of Nature—i. e. in the case of Nandíśwara the body and organs of sense belonging to him as a man and a Bráhman were modified into the body and organs of sense of a deity, by supply of constituent particles of the body and organs of sense belonging to a deity].

But [even] then [it may be objected] merits and demerits are observed to be in process of being realised in this life; how then can it be maintained that the supply of natures is the cause? To this he replies:—

निमित्तमप्रयोजकम्प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

Aph. 3 The occasional is the non-efficient cause of natures: thereby there is removal of obscurations, as in the case of a husbandman [who removes the impediments to the irrigation of his fields].

"Occasicnal"—merit &c. is the non-efficient cause of the modifications of natures into other things, for a cause is not set in motion by an effect.

Then where [it may be asked] is operation of the merits &c.? To this he replies:—Thereby is the removal of obscurations "as in the case of a husbandman." "Thereby" from the merits &c. which are realised, takes place "Removal" or destruction of whatever is obscurant—the obstacles—i. e. of works &c. because it is contradictory. On the removal of that obstacle, the natures themselves become efficient of the desired effect. He gives an example, Like a husbandman, i. e. as a farmer or husbandman desiring to conduct water from one field to another merely removes the impediments or obstacles [in the way] of the water which being removed the water itself assumes the modification of profluence, but there is no exertion made by him of advance of water. Similarly is it to be understood of merit and demerit. G. D.

इदानीं विप्रतिपत्तिसमुत्थभ्रान्तिनिराकरणेन युक्त्या कैवल्यस्वरूपव्यवस्थापनाय कैवल्यपादोऽयमारभ्यते । तत्र पूर्वोक्तसिद्धीनां नानाविधजन्मादिकारणप्रतिपादनद्वारेणैवम्बोधयति नैः फल्यं नास्तीति समाधिः कर्तव्य इति कैवल्यार्थत्वञ्चाह ॥

काश्चन जन्मनिमित्ता एव सिद्धयो यथा पक्ष्यादीनामाकाशगमनादयः । यथा वा कपिलादिमहर्षीणाञ्ज्ञानादयः । ओषधिसिद्धयः पातालादौ रसायनादयः । मन्त्रसिद्धयः प्रसिद्धाः । तपः सिद्धयो यथा विश्वामित्रादीनाम् । समाधिसिद्धयः पूर्वमेवोक्ताः ॥

सिद्धीनां समाधिरेव हेतुर्जन्मान्तराभ्यस्तः । मन्त्रादीनां द्वारतेव ॥

ननु नन्दीश्वरादीनां जात्यादिपरिणामोऽस्मिन्नेव दृश्यते तत्कथञ्जन्मान्तरसमाधेः कारणत्वं तत्राह ॥

योऽयमिहैव जन्मनि जात्यन्तरादिपरिणामः स प्रकृत्यापूरात् पाश्चात्या एव हि प्रकृतयोऽस्मिन् जन्मनि विकारानापूरयन्ति तान् जात्यन्तरादिद्वारेण परिणामयन्ति ॥

ननु च धर्मादयस्तत्र क्रियमाणा उपलभ्यन्ते तत्कथम्प्रकृतीनामापूरणात्कारणमित्यत्राह ॥

निमित्तं धर्मादि तत्प्रकृतीनामर्थान्तरपरिणामे न प्रयोजकं नहि कार्य्येण कारणम्प्रवर्त्तते । कुत्र तर्हि धर्मादेर्व्यापारस्तत्राह ॥

वरणभेदस्तु ततः क्षेत्रिकवत् । ततस्तस्मादनुष्ठीयमानाद्धर्म्मादेर्वरणमावरकमधर्म्मादि तस्यैव विरोधित्वात् क्षयः क्रियते । तस्मिन् प्रतिबन्धके क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति दृष्टान्तमाह क्षेत्रिकवत् यथा कृषीवलः केदारात् केदारान्तरं जलं निनीषुर्जलप्रतिबन्धकावरणभेदमात्रङ्करोति तस्मिन् भिन्ने जलं स्वयमेव प्रसररूपं परिणामङ्गृह्णाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः एवन्धर्म्मादेर्बोध्यम् ॥

Digitized by Google

THE VAIS'ESHIKA APHORISMS OF KAṆA'DA.

SEVENTH BOOK, FIRST DAILY LESSON.

(*Continued from page 266.*)

अतो विपरीतमणु ॥ १० ॥

Aph. 10. The contrary of this is the minute.

[1] That which is the contrary of this, that is of great extension established by perception, is minute extension. The contrariety arises from imperceptibility, and contrariety of causes, for the causes of magnitude are magnitude, plurality, and coalescence, and the cause of minuteness is duality derived from the relative idea of the Deity residing in the cause. By this is also to be understood shortness the contrary of length, and in this case also the contrariety is as aforesaid. U.

अणु महदिति तस्मिन् विशेषभावाद् विशेषाभावाच्च ॥ ११ ॥

Aph. 11. The notions greater and smaller [arise] in this conception [of a relatively great and a relatively small object] from the existence of particularity, and from the non-existence of particularity.

[2] The word *iti* refers to the usage. There is, then, a conventional notion that a jujube is small in relation to a bel-fruit, an emblic myrobalan great in relation to a jujube, and a bel-fruit great in relation to an emblic myrobalan. Among these the principal notion is that of greatness. The reason of this is stated to be that there exists particularity, that is that there exists particular magnitude because there is a relation of more and less. But among these the notion of smallness is relative. The reason of this is said to be the non-existence of particularity, that is the non-existence therein of particular smaliness. For minuteness as a product resides only in binary atomic aggregates, and as eternal abides only in the ultimate particles. But this does not exist in a jujube, &c. In other words it is because there exists in the particles of the jujube &c. plurality, magnitude and coalescence of constituent elements, which are a particular cause of magnitude, and because there does not exist in the jujube &c. duality not having a common substratum with magnitude which duality is the cause of smallness. U.

एककालत्वात् ॥ १२ ॥

Aph. 12. Because the time is one.

[1] The greatness and smallness are both experienced at one time, and these greatness and smallness being contrary to one another cannot exist together in one substratum. Therefore, inasmuch as there exists a cause of greatness, the conception of magnitude is in this instance primary and the notion and usage with regard to smallness are derivative [or relative only.] U.

दृष्टान्ताच्च ॥ १३ ॥

Aph. 13. Also because of the example.

[2] It is seen likewise that in the natural order of things there must be a practical conception of a great, greater and greatest in the jujube, emblic myrobalan and bel-fruits which posssess magnitude, just as in the course of things there is a conventional notion of white, whiter and whitest in a piece of cloth, a conch shell, crystal &c. which are white. U.

अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ॥ १४ ॥

Aph. 14. The non-existence of greatness and smallness in greatness and smallness is explained by greatness and smallness.

[3] It may be objected that in virtue of the practical notion of small and great extension it is known that in magnitude as an extension there exists magnitude, and in smallness as an extension there exists smallness. How then can these exist in substance alone, or how does not the contradiction arise of the existence of qua-

---

[1] अतः प्रत्यक्षसिद्धान्महतः परिमाणाद्विपरीतं तदणुपरिमाणमित्यर्थः। वैपरीत्यञ्चाप्रत्यक्षत्वात् कारणवैपरीत्याच्च, महत्त्वे हि महत्त्वबहुत्वप्रचयानां कारणत्वम्, अणुत्वे च कारणगतस्य द्वित्वस्येश्वरापेक्षाबुद्धिजन्यस्य कारणत्वम्, एतेन दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यम्, वैपरीत्यञ्चात्रापि पूर्ववत् ॥

[2] इतिशब्दो व्यवहारपरतां दर्शयति, तेन बिल्वापेक्षया कुवलमणु कुवलापेक्षयामलकं महत् आमलकापेक्षया बिल्वं महदिति तावद्व्यवहारोऽस्ति, तत्र महदिति तेषु व्यवहारो मुख्यः कुत एव मतमाह। विशेषभावा-महत्त्वविशेषस्यैव तरतमादिभावेन भावात्. अणुव्यवहारस्तु तेषु भाक्तः कुत एव मतमाह। विशेषाभावात् अणुत्वविशेषस्य तत्राभावात्. अणुत्वं हि कार्यं द्व्यणुकमात्रवृत्ति, नित्यं परमाणुवृत्ति कुवलादौ तदभावात् यद्वा विशेषस्य महत्त्वकारणस्यैवावयवबहुत्वमहत्त्वप्रचयानां कुवलाद्यवयवेषु भावात् सद्भावात् विशेषाभावात् विशेषस्य अणुत्वकारणस्य महत्त्वासमानाधिकरणद्वित्वस्य कुवलाद्यवयवेष्वभावादसद्भावादित्यर्थः ॥

[1] महत्त्वमणुत्वञ्च द्वयमप्येकस्मिन् काले ऽनुभूयते, ते च महत्त्वाणुत्वे परस्परविरोधिनी नैकत्राश्रये सह सम्भवतः, अतो महत्त्वकारणसद्भावान्महत्त्वप्रत्ययस्तत्र मुख्योऽणुत्वप्रत्ययप्रयोगौ च भाक्तावित्यर्थः ॥

[2] दृश्यते तथा वस्तुगत्या महत्स्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारेण भवितव्यमित्यर्थः यथा वस्तुगत्या शुक्लेष्वेव पटशङ्खस्फाटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारः ॥

[3] नन्वणु महत्परिमाणमिति व्यवहारबलान्महत्त्वेऽपि परिमाणे महत्त्वमणुत्वेऽप्यणुत्वमस्तीति ज्ञायते तत् कथं द्रव्यमात्रवृत्तित्वमनयोः कथं वा गुणे गुणवृत्तित्वविरोधो नापद्यत इत्यत आह। यथा गुणकर्मणी नाणुत्वमहत्त्ववती तथाऽणुत्वमहत्त्वे अपि नाणुत्वमहत्त्ववती इत्यर्थः प्रयोगश्च भाक्तो द्रष्टव्यः ॥

Digitized by Google

lity in quality? In answer to this it is stated that as quality and action do not possess quality and action, so also greatness and smallness do not possess greatness and smallness, and that such a conventional notion is to be regarded as derivative. U.

कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥ १५ ॥

Aph. 15. Actions are explained to be [void] of actions, and qualities of qualities.

[1] It may be urged that as qualities are possessed of qualities—and how else could there be such conventional notions as a loud sound, one sound, twenty-four qualities &c.?—and as actions are possessed of actions—and how else could there be such cognitions as, It goes quickly, It goes rapidly?—so in like manner greatness and smallness must also be possessed of greatness and smallness. In answer to this it is stated that actions are not possessed of actions, nor are qualities possessed of qualities, and that in like manner greatness and smallness are not possessed of greatness and smallness, but the conventional notion is in all these cases derivative. U.

अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥ १६ ॥

Aph. 16. Actions moreover and qualities are explained to be [void] of smallness and greatness.

[2] It may be urged than in virtue of such conventional notions as small actions, great actions, small qualities, great qualities, the extension greatness and smallness must be concluded to exist in action and quality. It is therefore stated that as the extensions greatness and smallness do not exist in the extensions greatness and smallness, in like manner neither of those extensions exists in action or in qualities; and that the aforesaid conventional notions have as their objects increase and diminution. V.

एतेन दीर्घत्वह्रस्वत्वे व्याख्याते ॥ १७ ॥

Aph. 17. By this length and shortness are explained.

[3] It is stated that shortness and length are similar to smallness and greatness. As smallness and greatness are proved to exist by the conventional notions of great and small, so shortness and length are proved to exist by the conventional notions of long and short. In like manner also the notion and convention that one thing is shorter or is longer than another have for their object increase and diminution. V.

अनित्येऽनित्यम् ॥ १८ ॥

Aph. 18. In the non-eternal [extension] is non-eternal.

[1] Extension is non-eternal in the non-eternal. It is in consequence of the destruction of its substratum that it ceases to exist. It is not to be maintained that in a water-pot and the like, where there is an increase or diminution by two, three or more atoms, there is another extension recognised by perception, on the ground that there is in this case no destruction of the water-pot &c. inasmuch as there exists in regard to it the recognition that it is the same water-pot. For in the case of a diminution or increase of the atoms there is necessarily a destruction commencing in the tertiary atomic aggregates and terminating in the composite wholes, there being necessarily a destruction of the binary aggregates; for the sum of destroying causes fails not in obtaining its effect through any difficulty with regard to the recognition. In the case of an increase in the body &c. there is necessarily a destruction of the composite whole in consequence of the necessity of the destruction of the non-coinherent cause. Nor can it be urged, Where there is not destruction of a piece of cloth &c., how can there be an addition of extension resulting from conjunction with other threads? For in this instance there must needs be destruction of the piece of cloth resulting from the destruction of the conjunction of the threads, which conjunction is the non-coinherent cause, which destruction is caused by the striking of the loom, &c. Moreover if that other thread were a portion of that

---

[1] ननु यथा गुणा गुणवन्तः कथमन्यथा महान् शब्दः द्वौ शब्दौ एकः शब्दः चतुर्विंशतिर्गुणा इत्यादिव्यवहारः, कर्माण्यपि च कर्म्मवन्ति प्रतीयन्ते कथमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीति व्यवहारः तथाचाणुत्वमहत्त्वे अपि न तद्वती स्यातामित्यत आह । कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणा न तद्वन्तस्तथाऽणुत्वमहत्त्वे अपि न तद्वती, व्यवहारस्तु सर्वत्र भाक्त इत्यर्थः ॥

[2] नन्वणूनि कर्माणि महान्ति कर्माणि अणवो गुणा महान्तो गुणा इत्यादिव्यवहारबलात् कर्मणि गुणे च अणुत्वं महत्त्वञ्च परिमाणं सेत्स्यतीत्यत आह । यथा अणुत्वमहत्त्वपरिमाणयोर्नाणुत्वमहत्त्वपरिमाणे तथा कर्म्मणि गुणेषु च न तदुभयम् उक्तव्यवहाराश्चापकर्षोत्कर्षविषयका एवेति ॥

[3] ह्रस्वत्वदीर्घत्वयोरप्यणुत्वमहत्त्वतुल्यतेत्याह । यथा अणु महदितिव्यवहारसिद्धे अणुत्वमहत्त्वे तथा ह्रस्वं दीर्घमितिव्यवहारसिद्धे ह्रस्वत्वदीर्घत्वे एवमिदमस्माद् ह्रस्वमिदमस्माद्दीर्घमित्यादिप्रत्ययव्यवहारावप्यपकर्षोत्कर्षविषयकावेवेत्यर्थः ॥

[1] परिमाणमनित्ये अनित्यमाश्रयविनाशादेव तन्नश्यतीत्यर्थः नच घटादौ त्रिचतुरादिपरमाणुविश्लेषे तदुपचये वा परिमाणान्तरं प्रत्यक्षसिद्धं स एवायं घट इत्यादिप्रत्यभिज्ञायास्तत्र सत्त्वेन घटादेर्नाशाविनादिति वाच्यं परमाणुविश्लेषे तदुपचये वा द्व्यणुकनाशस्यावश्यकत्वेन त्र्यसरेण्वाद्यन्त्यावयविपर्य्यन्तनाशस्याप्यावश्यकत्वात् नहि विनाशसामग्री प्रत्यभिज्ञाभिया कार्य्यं नार्ज्जयिष्यति शरीरादाववयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः नच पटाविनाशेऽपि तन्त्वन्तरसंयोगात् कथं परिमाणाधिक्यमिति वाच्यं तत्रापि वेमाद्यभिघातेनासमवायिकारणतन्तुसंयोगनाशादेव पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशात्पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम् अवयविनः प्रत्यभिज्ञानन्तु साजात्येन सैवेयं दीपकलिकेत्यादिवत् । नच पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभन्त इति वाच्यं मूर्त्तयोः समानदेशताविरोधादिति संक्षेपः ॥

Digitized by Google

cloth, the cloth of which it is the thread would not previously exist, since the thread which is its cause would not exist. But if that thread be not a part, there can be thereby no addition to its extension, as is the case with other conjunct substances. It must, therefore, necessarily be admitted that in this case, when conjunction with another thread takes place, there results production of another piece of cloth from destruction of the former piece of cloth. The recognition of the composite whole is caused by the homogeneity [of the former and latter wholes], as in the recognition of the continuous identity of the flame of a lamp. Nor is it to be maintained that the former threads through the subsidiary agency of the other threads originate a new piece of cloth during the existence of the former piece of cloth, for it would involve the contradiction of two substances [at the same time] occupying the same space. V.

नित्ये नित्यम् ॥ १९ ॥

Aph. 19. In the eternal it is eternal.

[1] The extension which exists in things eternal, that is in ether &c. and in atoms is eternal, for there is nothing to destroy it. U.

नित्यं परिमण्डलम् ॥ २० ॥

Aph. 20. Atomic extension is eternal.

[2] The word *parimaṇḍala* technically designates atomic extension and an atom characterised by such extension. An atom, that is a substance consisting of an ultimate particle characterised by atomic extension is eternal: there is therefore no scarcity of eternal substance. The eternity thereof has also previously been declared. V.

अविद्या च विद्यालिङ्गम् ॥ २१ ॥

Aph. 21. Ignorance, moreover, is an indication of knowledge.

[3] It may be asked why should we admit substance in the form of atoms, since it cannot be perceived, and maintained that only such substance as is recognised by perception, such as tertiary atomic aggregates &c., is to be admitted. To this the reply is furnished, Ignorance the absence of certain knowledge, that is such cognition as that earth is eternal or that water is eternal, having a composite whole as its object, is a mark [or indication of the existence] of the science or certain knowledge, the object of which is atomic, that earth is eternal; inasmuch as certain knowledge, has always for its antecedent the absence of certain knowledge, for such an error as that earth is eternal cannot arise in one that has no notion of eternity. This mode of proving accidentally but really the existence of atoms which has been formerly described, merits attention. V.

विभवान्महानाकाशस्तथा चात्मा ॥ २२ ॥

Aph. 22. Ether, in consequence of its universal pervasion, is infinitely great; and so likewise is soul.

[1] Ether, as pervading all things, in consequence of conjunction with all matter, is infinitely great, or possesses infinitely great extension. This extension is eternal, since ether is eternal. Did there not exist in ether conjunction with all matter, the production of sound limited to various places would be impossible, for conjunction with ether in respective places is the non-coinherent cause of respective sounds. In like manner soul also is possessed of eternal, and infinitely great extension, being all-pervasive. The universal pervasion of soul is proved, inasmuch as conjunction with soul influenced by destiny is the cause of action in the atoms at the time of creation. V.

तदभावादणु मनः ॥ २३ ॥

Aph. 23. In consequence of non-existence of that [universal pervasion] the internal organ is absolutely small.

[2] It may be urged: The internal organ is also, like soul, an all-pervading substance, inasmuch as it is the substratum of conjunctions which are the non-coinherent causes of cognitions &c.; why therefore has not

---

[1] नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात् ॥

[2] परिमण्डलशब्दो परमाणुपरिमाणं तद्विशिष्टं परिमाणञ्च परिभाषया प्रतिपादयति परिमण्डलं पारिमाण्डल्यपरिमाणविशिष्टं परमाणुरूपं द्रव्यं नित्यमिति न नित्यद्रव्यस्य दुर्भिक्षतेत्यर्थः । तस्यनित्यत्वञ्च प्रागेव प्रतिपादितम् ॥

[3] ननु परमाणुरूपं द्रव्यं कथमङ्गीकर्तव्यं तस्याप्रत्यक्षत्वात् त्रसरेण्वादिकन्तु प्रत्यक्षसिद्धं यद् द्रव्यं तदेवाङ्गीकरणीयमित्यत आह । अविद्या अप्रमा पृथिवी नित्या जलं नित्यामन्यादिप्रतीतिरवयविविषयिणी विद्यायाः परमाणुविषयिण्याः पृथिवी नित्येति प्रमाया लिङ्गम् सर्व्वत्र प्रमाया अप्रमापूर्व्वकत्वात् नहि कुत्रापि नित्यत्वमजानतः पृथिवी नित्येति भ्रमो भवितुमर्हति एतच्चापाततः वस्तुतः परमाणुसिद्धिप्रकारः प्राक् प्रदर्शित एवादरणीयः ॥

---

[1] विभवात् सर्व्वमूर्त्तसंयोगादाकाशो महान् परममहत्परिमाणवान् तच्च परिमाणं नित्यमाकाशस्य नित्यत्वात् आकाशस्य सर्व्वमूर्त्तसंयोगाभावे नानादेशावच्छेदेन शब्दोत्पत्त्यसम्भवात् तत्तद्देशाकाशसंयोगस्य तत्तच्छब्दासमवायिकारणत्वात् एवमात्माऽपि नित्यपरममहत्परिमाणवान् वैभवात् अदृष्टवदात्मसंयोगस्य सर्गाद्यकालीनपरमाणुकर्महेतुत्वादात्मवैभवमप्यावश्यकम् ॥

[2] नन्वात्मवन्मनोऽपि विभुज्ञानाद्यसमवायिकारणसंयोगाश्रयत्वादिति तस्य महत्परिमाणं कुतो नोक्तमत आह । तस्य विभवस्याभावान्मनोऽणु न परममहत्परिमाणवदित्यर्थः ज्ञानायौगपद्यानिय म कृतयाऽणुत्ववत एव मनसः सिद्धि वैभवसाधकप्रागुक्तानुमानस्य च निषेधकप्रमाणेन बाधितत्वादिति भावः ॥

Digitized by Google

its infinite greatness been enounced? In reply to this it is stated that in consequence of the non-existence of that universal pervasion, mind is absolutely small, is not possessed of infinitely great extension. The proof that the internal organ, as determinant of non-simultaneity of cognitions, is absolutely small, results from the impossibility of evidence cognisant of an object of the formentioned inference probative of universal pervasion. V.

गुणैर्दिग् व्याख्याता ॥ २४ ॥

Aph. 24. By its qualities space is explained [to be all-comprehensive.]

[1] By its qualities characterised as priority and posteriority existing in all matter and consisting of the common prior, posterior, and other conceptions of beings existent in all divisions of the universe, space also is explained to be all-comprehensive. If it be asked how the notion and expression of ten spaces [or quarters of the compass] arise, whereas it is to be stated that relative conception, having for its object the more and the less in conjunctions with the conjunct, is the cause of the production of priority and posteriority, and whereas the conception of a plurality of spaces is contravened by the complexity of the conception [or needlessness of the hypothesis]; to this we reply that this is no valid objection, inasmuch as it has been stated that a conception is determined by the particular accidents [of space.] U.

कारणे कालः ॥ २५ ॥

Aph. 25. Time relates to a cause.

[2] The designation time relates to a substance which is the cause of the cognitions of the prior, posterior, reciprocal, simultaneous, non-simultaneous, slow, and fast. Such a cognition, common to persons in all places, would be impossible unless time were universally pervasive. Its universal pervasion is possession of infinite magnitude. Or [it may be argued] that in virtue of such cognitions as 'born now' &c. time is the occasional cause of all that is produced, and this is dependent on universal pervasion, for an occasional cause is the condition of the apprehension of the co-inherent and non-coinherent cause. Or [another argument might be that] the notion of past, present, and future is applicable to all objects, and therefore time is existent everywhere. Or [that] the designation time relates to the conventional divisions of moments, *lavas*, hours, watches, days, days and nights, lunar fortnights, seasons, half-years, years &c., and this conventional division being of universal application, time is everywhere existent, and consequently infinitely great. It has been explained that the conception of a plurality of times is contravened by the complexity of the conception. U.

---

[1] गुणैः सकलद्वीपवर्त्तिपुरुषसाधारणपूर्व्वापरादिप्रत्ययरूपैः सकलमूर्त्तनिष्ठपरत्वापरत्वलक्षणैः दिगपि व्यापकत्वेन व्याख्यातेत्यर्थः परत्वापरत्वयोरुत्पत्तौ संयुक्तसंयोगभूयस्त्वाल्पीयस्त्वविषयापेक्षाबुद्धेः कारणत्वस्य वक्ष्यमाणत्वात् नानादिक्कल्पनस्य कल्पनागौरवप्रतिहतत्वात् कथं तर्हि दश दिश इति प्रतीतिव्यपदेशाविति चेत् तत्तदुपाधिनिबन्धनत्वादित्युक्तत्वात् ॥

[2] परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययकारणे द्रव्ये काल इति समाख्यानं तादृशः प्रत्ययः सर्व्वदेशपुरुषसाधारणः कालस्य व्यापकतामन्तरेण सम्भवतीति तस्य व्यापकत्वं परममहत्त्वयोग इत्यर्थः । यद्वा इदानीं जातमित्यादिप्रतीतिबलात् सर्वोत्पत्तिमन्निमित्तकारणत्वं कालस्य प्रतीयते तदपि व्यापकत्वाधीनं निमित्तकारणस्य समवाय्यसमवायिकारणप्रत्यासत्त्यनियमात् । यद्वा अतीतानागतवर्तमानव्यवहारः सार्वत्रिक इति सर्वगत एव कालः । यद्वा क्षणलवमुहूर्त्तयामदिनाहोरात्रपक्षमासर्त्त्वयनसम्वत्सरादिव्यवहारकारणे द्रव्ये कालाख्येति व्यवहारस्य सार्वत्रिकत्वात्कालः सार्वत्रिक इति परममहान् तस्य नानात्वकल्पना च कल्पनागौरवप्रतिहतेत्युक्तम् ॥

SECOND DAILY LESSON.

रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् ॥ १ ॥

Aph. 1. Because of the exclusion of colour, taste, smell, and touch, unity is a different object.

[1] The investigation of number, and individuality is commenced after that of extension, because magnitude is the cause of the perceptibility of number, &c. Unity is a different object, different from colour &c., not having colour &c. for its form. The term unity implies number and the four succeeding qualities [viz. extension, individuality, conjunction, and disjunction.] The object of such cognitions as Space is one, Time is one &c., must be allowed to be some quality different from colour &c., because of the exclusion of colour, taste, smell, and touch, that is because of the non-existence of colour &c., in space &c. It cannot be urged: What is the case with such cognitions as one generality, one particularity, one co-inhesion, one non-existence &c.; for we must admit in regard to these independently a notion of unity constituted by their being the object of a modifiication of the intellect. V.

तथा पृथक्त्वम् ॥ २ ॥

Aph. 2. Likewise individuality.

---

[1] महत्त्वस्य संख्यादिप्रत्यक्षहेतुत्वात् परिमाणनिरूपणानन्तरमेव संख्यापृथक्त्वयो र्निरूपणमारभते । एकत्वम् अर्थान्तरं रूपादिभ्यो भिन्नं न तु रूपादिस्वरूपम् एकत्वपदं सङ्ख्यादिपञ्चकोपलक्षकं गगनमेकं काल एक इत्यादिप्रतीतिविषयो रूपादिभिन्नो गुणोऽवश्यमङ्गीकार्य्यः गगनादिषु रूपरसगन्धस्पर्शव्यतिरेकात् रूपादीनामभावादित्यर्थः नचैकं सामान्यमेको विशेषः एकः समवायः एकोऽभाव इत्यादिप्रतीतेः का गतिरिति वाच्य तत्रानायत्या धीविशेषविषयत्वरूपस्यैकत्वस्य भानाङ्गीकारादधिकमन्यत्रानुसन्धेयम् ॥

Digitized by Google

[1] The similarity of the quality individuality to number is stated. Individuality also is like number another quality. In this quality single individuality is like the number unity, and dual individuality &c. is like the numbers duality, &c. Nor is it to be argued that, there being observed a community of object in the cognitions, The water pot is individually apart from the piece of cloth, or other than, or different from it, individuality is only reciprocal non-existence, and not another quality; for did the negative particle signify no difference from the word apart as an adverb, there could be no dissimilarity between the cognitions This is apart, and this is not. V.

एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावो ऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ३ ॥

Aph. 3. The non-existence of unity, and single individuality in unity and single individuality is explained by smallness and greatness.

[2] It may be objected that in virtue of such cognitions as one unity, there exists unity in unity, and in like manner in virtue of such cognitions as that single individuality is individually apart from dual individuality, single individuality must be admitted to exist in single individuality; and that consequently there is a difficulty involved in their being qualities, inasmuch as they exist in qualities. In answer to this it is stated that as smallness and greatness do not exist in smallness and greatness, so also unity and single individuality do not exist in unity and single individuality, but this cognition is to be shown possible in some other manner. V.

निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते ॥ ४ ॥

Aph. 4. Unity does not exist in all things, for actions and qualities are void of number.

[3] It may be asked as the notion of unity is common to qualities and to actions, what reason there is to conclude that the unity which exists in substances does not exist in qualities, &c. Unity does not exist in all things. If it be asked why, it is replied that it is because actions and qualities are destitute of number. Numberlessness is the state of those things that pass the domain of numbers, that is, that are without number. Accordingly actions and qualities are without number. Inasmuch as number is a quality, number does not exist in qualities. Nor does it exist in actions, for qualities are denied of actions, for otherwise it would follow that actions were substances; and it has been demonstrated that number is quality, and unity a number. U.

भ्रान्तं तत् ॥ ५ ॥

Aph. 5. That [notion] is erroneous.

[1] It may be asked: How then the notion of one colour, one taste &c.? It is stated in reply that the notion of unity in relation to qualities and actions is erroneous. In the aphorism there is an ellipse of the word notion, this being the subject previously mentioned. The notion thus applied is derivative and derived from essential inseparability; but this is not unity, for it has been stated to be other than unity. U.

एकत्वाभावाद्भक्तिस्तु न विद्यते ॥ ६ ॥

Aph. 6. In consequence of non-existence of unity, secondariness does not exist.

[2] It may be asked: Say that this notion of unity be secondary or derivative in relation to substances also, and the cognition be erroneous in relat[...]ion to them, then what of unity? To this the reply is as follows. If unity in its primary sense be nowhere to be observed the notion thus applied cannot be secondar[...], for the secondary has for its antecedent the primary. Nor is the conception erroneous, for error has for its antecedent certain knowledge, it being the certainly known that is [erroneously] attributed, for an erroneous designation is proved to be such by disproving an untrue conception. U.

कार्यकारणयोरेकत्वैकपृथक्त्वाभावादेकत्वैकपृथक्त्वनवं न विद्यते ॥ ७ ॥

Aph. 7. Of cause and effect there is not unity and single individuality, in consequence of the non-existence of unity and single individuality.

---

[1] पृथक्त्वगुणस्य संख्यातुल्यत्वमाह । पृथक्त्वमपि संख्यावद्गुणान्तरमेव तत्रैकपृथकत्वम् एकत्वसंख्यातुल्यं द्विपृथक्त्वादिकञ्च द्वित्वादिसंख्यातुल्यमिति नच घटः पटात् पृथगन्यो भिन्न इत्यादिप्रतीतीनां समानविषयकत्वानुभवादन्योन्याभाव एव पृथक्त्वं नतु गुणान्तरमिति वाच्यं नञ्शब्दस्येव पृथक्शब्दस्याप्यव्ययतया ऽभेदार्थकतयाच अस्मात् पृथक् इदमिदं नेति प्रतीत्यै वैलक्षण्यानुपपत्तेः ॥

[2] नन्वेकमेकत्वमित्यादिव्यवहारबलादेकत्वे ऽप्येकत्वमेवमेकपृथक्त्वं द्विपृथक्त्वात्पृथगितिव्यवहारबलादेकपृथक्त्वे ऽप्येकपृथकत्वमङ्गीकार्य्यमिति तयोर्गुणत्वं दुर्घटं गुणे ऽपि सत्त्वादतआह । यथा ऽणुत्वमहत्त्वे नाणुत्वमहत्त्वयोस्तथाएकत्वैकपृथक्त्वयोरपि नैकत्वैकपृथक्त्वे व्यवहारस्तु प्रकारान्तरेणोपपादनीय इत्यर्थः ॥

[3] ननु गुणेषु कर्म्मसु च साधारणएवैकत्वव्यवहारः किमत्र विनिगमकं यद्द्रव्येष्वेवैकत्वं न गुणादिष्वित्यत्राह । सर्व्वेषामेकत्वं तच विद्यते कुत इत्यत आह निःसङ्ख्यत्वात् कर्म्मगुणानामिति सङ्ख्याया निष्क्रान्ताः निःसङ्ख्यास्तेषांभावो निःसङ्ख्यत्वम् तथाच कर्म्माणि गुणाश्च निःसङ्ख्यानि सङ्ख्याया गुणत्वेन गुणेषु तावत् सङ्ख्या न विद्यते नवाकर्म्मसु गुणानां कर्म्मसु निषेधात् अन्यथा द्रव्यत्वप्रसङ्गात् साधितञ्च सङ्ख्याया गुणत्वमेकत्वस्य च सङ्ख्यात्वमितिभावः ॥

[1] तर्हि कथमेकंरूपमेकोरस इत्यादिज्ञानमित्यत आह । गुणकर्म्मसु यदेकत्वज्ञानं तद् भ्रान्तमित्यर्थः सूत्रे च ज्ञानमितिशेषः अक्षिप्तपूर्व्वपक्षत्वात् प्रयोगस्तु भाक्तः स्वरूपाभेद एवञ्च भक्तिः नच तदेवैकत्वमुक्तोत्तरत्वात् ॥

[2] ननु द्रव्येप्ययमेकत्वप्रयोगोभाक्तो ऽस्तु तत्र भ्रान्तः किमेकत्वेनेत्यत आह । यदि पारमार्थिकमेकत्वं क्वचिचाभ्युपगन्तयं तदा न प्रयोगोभाक्तः मुख्यपूर्व्वकत्वाद्भक्तेः नवा प्रत्ययोभ्रान्तः प्रमापूर्व्वकत्वाद्भ्रमस्य प्रमितं ह्यारोप्यते नाप्रमितम् असत्ख्यातेर्निरासात् अन्यथाख्यातेः साधनादितिभावः ॥

[1] With the purpose of parenthetically rejecting the Sáṅkhya doctrine of the unity, and single individuality and indivisibility of constituent parts and constituted wholes, it is stated that there is neither unity nor single individuality in cause and effect, that is, there resides no unity or single individuality in both the cause and its effect. For this the reason assigned is that there do not exist in the cause and its effect unity and single individuality. Unity is indivisibility, single individuality is non-dissimilarity. Since these do not exist [in the sum of constituent parts and the constituted whole, the parts and the whole are not identical]; for it is allowed on all hands that the thread is conceived as separate from the cloth, and dissimilar to it. V.

एतदनित्ययोर्व्याख्यातम् ॥ ८ ॥

Aph. 8. This is explained in relation to non-eternal [cause and effect.]

[2] This—the possession of non-existence of unity and single individuality, by reason of possession of non-existence of indivisibility and non-dissimilarity—is affirmed of non-eternal cause and effect. Accordingly on the hypothesis of the indivisibility of the threads and cloth it would follow that in the case of the production of the threads the cloth would be conceived and stated to be produced; in the case of the production of the cloth the thread to be produced; in the case of the destruction of the threads the cloth to be destroyed; and in the case of; the destruction of the cloth the threads to be destroyed. Nor can it be maintained that production and destruction are non-probative, because it is possible that the conceptions of these are caused merely by appearance and disappearance; for on the hypothesis of an appearance of an appearance there will result a regress to infinity. On the hypothesis of their production, therefore, what fallacy is there involved in the production of the cloth &c.? And if the appearance in appearance be not allowed to be production it follows that appearance is constant, but the constancy of appearance is not admitted even by the Sáṇkhyas. In fact the universal experience that the cloth is produced and destroyed and so forth is proof of production and destruction, for if experience of one object be allowed to have another object for its object, we must deny also the water-pot, cloth, &c. This error has been sufficiently discussed. V.

A. E. G.

(To be continued.)

[1] अवयवावयविनोरेकत्वमेकपृथक्त्वञ्च ननु तयोर्भेद इति साङ्ख्यमतं प्रसङ्गान्निराकर्तुमाह । कार्य्यकारणयोर्नैकत्वं नवैकपृथक्त्वं किमप्येकत्वमेकपृथक्त्वं वा कार्य्यकारणोभयनिष्ठं न भवतीत्यर्थः । अत्र हेतुमाह कार्य्यकारणयोरेकत्वैकपृथक्त्वाभावात् एकत्वमभेदः एकपृथक्त्वमवैधर्म्यं तयोरभावात् तन्तुः पटाद्भिन्नः पटविधर्म्मेत्यादिप्रतीतेः सर्व्वसिद्धत्वादिति भावः ॥

[2] एतदभेदावैधर्म्याभाववत्त्वेनैकत्वैकपृथक्त्वाभाववत्त्वम् अनित्ययोः कार्य्यकारणयोः कथितमित्यर्थः तथाच तन्तुपटयोरभेदाङ्गीकारे तन्तूत्पाददशायां पट उत्पद्यते पटोत्पत्तिदशायां तन्तुरुत्पद्यते तन्तुनाशदशायां पटो नश्यति पटनाशदशायां तन्तुर्नश्यतीत्यादिप्रत्ययप्रयोगयोः प्रसङ्गः न चोत्पत्तिविनाशावेवाप्रामाणिकौ आविर्भावतिरोभावाभ्यामेव तत्प्रतीत्युपपत्तेरिति वाच्यमाविर्भावाङ्गीकारेऽनवस्थाप्रसङ्गात् तदुत्पत्तिस्वीकारे तु किमपराद्धं पटाद्युत्पत्तिभिः आविर्भावे आविर्भावस्योत्पादस्य चानङ्गीकारे आविर्भावस्य सार्व्वदिकत्वप्रसङ्गः नचाविर्भावस्य सार्व्वदिकत्वं साङ्ख्यैरपि स्वीक्रियते वस्तुतः पटः उत्पद्यते पटो विनश्यतीत्यादिकः सार्व्वलौकिकोऽनुभव एवोत्पादविनाशसाधकः एकविषयकानुभवस्य विषयान्तरविषयकत्वस्वीकारे घटपटादेरप्यपलापापत्तेरित्यलमसदावेशेन ॥

VEDAVATÍ.

The Rámányana, as is well known to students of Indian literature, relates the adventures of Ráma, son of the King of Ayodhyá (Oude), who, in consequence of a domestic intrigue, became an exile from his country, and wandered about the southern regions of India in company with his brother Lakshmana and his wife Sítá. Sítá was carried off by Rávana, King of the Rákshasas (demons or goblins), to his capital, Lanká, in the island of Ceylon. Ultimately, Rávana was slain in battle by Ráma, who (according, at least, to the poem in its existing, and perhaps interpolated, form) was an incarnation of the supreme god Vishnu, and Sítá was rescued. Ráma returned to Ayodhyá after his father's death, and succeeded him on the throne. The legend now freely translated is taken from the supplementary book of the Rámáyana, chapter 17, and relates a passage in the earlier life of Rávana. Vedavatí, the heroine of the story, agreeably to the Indian theory of the transmigration of souls, was subsequently re-born in the form of Sítá.

WHERE, clothed in everlasting snow,
  Himálay's giant peaks arise
  Against the ambient azure skies,
And bright as molten silver glow—
While, far beneath, the solitudes
Are green with Devadáru* woods—

It chanced that once the demon lord
  Who ruled in Lanká's isle afar,
  And, mounted on his airy car,
These northern tracts sublime explored—
Alighted there upon the ground,
And roamed those forests wild around.

* *Pinus devadaru*, which signifies, the "divine tree;" the Deodar a magnificent tree, both in height and girth.

Digitized by Google

And, lo, he saw a maiden, fair
And brilliant as a goddess, clad
In garb ascetic, rude and sad,
Deform with squalid matted hair:
And all at once with passion fired,
The damsel's secret thus inquired:

"How is it, tell me, lovely maid—
Whose virgin charms subdue the heart,
Whose form with every grace of art
In gold and gems should be arrayed—
Thou dost this doleful garb assume,
Which ill beseems thy youthful bloom?

"Whose daughter art thou? What hath led
Thy choice to such a life austere?
O blest were he whom, lady dear
And beauteous, thou should'st deign to wed!"
Him, duly honoured as a guest,
The fair ascetic thus addressed:

"My father was a holy sage;
From him I sprang as, calm, and dead
To earthly aims and joys, he read
Th'eternal Veda's hallowed page:
The Voice which spoke within the Book
In me a form corporeal took.

"The gods, enamoured, all aspired
The honour of my hand to gain;
Their ardent pleas were urged in vain;
A loftier aim my father fired;
For he had vowed, with lawful pride,
I could be only Vishnu's bride.

"Incensed at his rejection, one
Among the suitors, proud but base,
The chieftain of the Daitya race,†
Avenged the slight the sage had shown:
By night he nigh my father crept,
And vilely slew him while he slept.

"That I my sire's high aim may gain,
And win great Vishnu for my lord,
I lead this life, by thee abhorred,
Of hard austerity and pain;
And, till the god himself impart,
I wed his image in my heart.

"I know thee, Rávan, who thou art:
By virtue of this life austere
All secret things to me are clear;
I bid thee hence; avaunt, depart."
But by the maiden's charms subdued,
The demon still his suit pursued.

"Proud art thou, lady fair, whose soul
So high aspires; but such sublime
Devotion suits not well thy prime,
Nor stern and painful self-control.
The old may so their days employ;
But thou should'st live for love and joy.

"I am the lord of Lanká's isle;
Thy peerless charms my bosom fire;
If thou wilt crown my heart's desire,
And ever on me sweetly smile,
Then thou, my favoured queen, shalt know
The bliss that power and wealth bestow.

† The Daityas in character correspond with the Titans of the Greeks.

"And who is Vishnu, pray, declare,
Whose form thy fancy paints so bright?
Can he in prowess, grandeur, might,
And magic gifts with me compare?
A phantom vain no longer chase,
The offer of my love embrace."

To whom the holy maid replied—
"Presumptuous fiend, thy boast is loud.
No voice but thine, profanely proud,
Hath ever Vishnu's might defied;
Heaven, earth, and hell, all own him lord—
By all their hosts and powers adored."

She spake; the fiend with rage was fired,
The damsel's hair he rudely grasped;
Thus by his hated fingers clasped,
She tore her locks, and cried, inspired—
"This insult I may not survive:
I enter now this fire, alive.

"Yet though I die, I once again
Shall live to recompense this wrong.
And though my vengeance slumber long,
My pious works their meed shall gain,
And I shall reappear on earth,
A virgin fair of royal birth."

She ceased. With fixed resolve to die,
The fire she entered, calm, elate;
When, all at once, to celebrate
This deed heroic, from the sky
There fell a shower of fragant flowers,
Rained down by gods from heavenly bowers.

Nor was the maid's prediction vain.
Attaining all her heart's desire,
As Sítá she was born again,
The daughter of a royal sire,
And won great Ráma for her lord,
Whom men as Vishnu's self adored.

And now the demon-king profane,
Whose coming doom had been foretold
By that insulted maid of old,
By Ráma's hand in fight was slain.
For how could hellish power withstand
Incarnate Vishnu's murderous brand?

January 17, 1871. J. MUIR.

NOW READY.

Vols. I. and II.

THE RÁMÁYAN OF VÁLMÍKI,

TRANSLATED INTO ENGLISH VERSE

BY

R. T. H. GRIFFITH, M. A.

Price per Vol. Rs. 6. Postage 6 anas.

BENARES: MESSRS. E. J. LAZARUS & Co.,
CALCUTTA: MESSRS. BERIGNY & Co.,
LONDON: MESSRS. TRÜBNER & Co.,

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 60. Benares, May 1st, 1871. Vol. V.

॥ भाट्टचिन्तामणेस्तर्कपादः ॥

अथोपमानं निरूप्यते ॥

उपमानं पूर्वदृष्टेऽर्थे स्मर्यमाणे दृश्यमानार्थसादृश्यज्ञानम् । दृश्यमानगवयनिरूपितसादृश्यप्रकारकगोविशेष्यकप्रमोपमितिः । तत्करणं गवयपिण्डदर्शनमित्यर्थः । एवं चारण्यकवाक्यार्थज्ञानवतोऽरण्ये गवयदर्शनं तत्करणं, तत्सादृश्यविशिष्टो गौरिति ज्ञानं प्रमा, वाक्यार्थस्मरणमवान्तरव्यापार इति । न चेदं सादृश्यप्रत्यक्षम् । अर्थान्तरयोगिभिर्धर्मैरर्थान्तरस्य सादृश्ययोगरूपसादृश्यस्य व्यासज्यवृत्तितया यावदाश्रयप्रत्यक्षाभावेन तदयोगात् । नानुमानम् । उपमिनोमीत्यनुव्यवसायेनानुमितिवैलक्षण्यप्रतीतेः । नापि शाब्दम् । पदज्ञानाद्यभावादिति । अत इदं मानान्तरम् । एवं च प्रत्यक्षसौर्यविधिसादृश्यस्याग्नेयविधावुपमित्यैवास्यितदाग्नेयविधिविहितेतिकर्तव्यतावा अर्पेक्षितायाः सौर्याङ्गत्वबोधः फलमिति जीर्णाः ॥

नव्यास्तु नैतच्चियतम् । उपमानस्य शक्तिग्राहकत्वानापत्तेः । एतादृशसादृश्यज्ञानस्यातिदेशवाक्यार्थज्ञानाजन्यत्वाच्च । अतो गोसादृश्यविशिष्टपिण्डदर्शनं करणम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । अयं गवयपदवाच्यः गवयो गवयपदवाच्य इति वा संज्ञासंज्ञिसंबन्धज्ञानं प्रमेत्याहुः ॥

इत्युपमानम् ॥

अथार्थापत्तिः ॥

अर्थापत्तिः प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्योपपादकार्थान्तरकल्पनम् । यथा देवदत्तनिष्ठं दिने भोजनाभावः पीनत्वं च प्रत्यक्षदृष्टं स्वोपपादकं रात्रिभोजनं कल्पयति । तथा विश्वजिद्यागकरणकभावनाविषयकप्रवर्तना विधिप्रमितेष्टोद्देश्यकत्वं विना ऽनुपपद्यमाना स्वर्गाद्युद्देश्यकत्वं कल्पयति । अत्र दिनभोजनाभावविशिष्टपीनत्वज्ञानं न करणं, येनानुमानान्तर्भावः शङ्क्येत । किं तु भोजनाभावपीनत्वयोः सामानाधिकरण्यरूपसंबन्धानुपपत्तिज्ञानम् । रात्रिभोजनज्ञानं प्रमा । उपपादकत्वज्ञानमवान्तरव्यापारः । एवं जीवतो देवदत्तस्य गृहे ऽदर्शनेनादृष्टबहिर्भावकल्पना । तेन नानुमानान्तर्गतिरिति जीर्णाः ॥ वस्तुतस्तु नानुमिनोमि नोपमिनोमि न शाब्दयामि किं त्वर्थापयामीत्यनुभवादेव मानान्तरत्वं युक्तम् । इयमेव सहजशक्त्याधेयशक्त्योश्च मानम् । तथाहि । बीजत्वावच्छेदेनाङ्कुरजनकत्वे गृहीते मूषिकाघ्रातेषु तददर्शनेन कारणत्वसंदेहे मूषिकाघ्राणनाश्या व्रीहिनिष्ठा कारणशक्तिः कल्प्यते । एवं यागजन्यं स्वर्गजनकमपूर्वं कल्प्यतइति जीर्णाः ॥

इत्यर्थापत्तिः ॥

एवमनुपलब्धिरभावग्राहकं मानान्तरम् । न चाभावस्य केवलाधिकरणात्मतया प्रत्यक्षेण ग्रह इति वाच्यम् । तस्याधिकरणात्मकत्वे भूतले घटाभाव इत्याधाराधेयभावप्रतीत्यनुपपत्तेः । किं च घटो नास्ति नायं पट इत्यादिव्यवहारस्य सघटे प्रसङ्गाच्च भूतलमात्रं विषयः । घटविविक्तस्य विषयत्वे ऽभावातिरिक्तस्य विवेकस्यासंभवात्सिद्धमभावेन । तद्ग्राहकं च योग्यानुपलब्धिर्मानान्तरम् । तथाहि । अभावो नेन्द्रियग्राह्यः । सन्निकर्षाभावात् । न च विशेषणत्वादि संनिकर्षः । तस्य प्रत्येकवृत्तितयोभयनिष्ठत्वाभावेन संनिकर्षत्वायोगात् । न च त-

ज्ञाभावस्मरणम् । पूर्वं तदनुभवाभावात् । एवं च तस्यानुपलब्धिरूपप्रमाणान्तरवेद्यत्वम् । योग्यानुपलब्धिश्च दर्शनयोग्यस्यादर्शनं दर्शनाभाव इति यावत् । तेन घटाभावादिज्ञानं दर्शनाभावेन प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकेन यदि घटः स्यात्तदा दृश्येतेत्याकारकेण घटाभावो ज्ञायते । योग्यता च योग्यप्रतियोगिकत्वयोग्याधिकरणकत्वादिरूपा । तत्तदभावग्रहे नानैव । अतः सिद्धमभावग्राहकमनुपलब्धिरूपं मानान्तरम् । अत्र प्रतियोगिप्रत्यक्षाभावः करणम् । अनुमितिरवान्तरव्यापारः । अभावज्ञानं फलम् । अर्थापत्तौ तु ज्ञानं करणमनुपपत्तिज्ञानमवान्तरव्यापारः । उपपादकज्ञानं फलमित्यनयोर्भेदमाहुः । अतः षट् प्रमाणानि । वस्तुतस्त्वर्थापत्त्यनुपलब्ध्योरन्योन्यभेदमनुमानाच्च भेदं नाकलयामः । यत्तु सहस्रसंख्यान्तर्गतशतसंख्याप्रमाकरणं संभवाख्यं प्रमाणं, तदनुमानान्तर्गतं, वटे वैश्रवणमिति चैतिह्यं न प्रमितिकरणं, तत्त्वे ऽप्यागमान्तर्गतम् । श्वो मे भ्राता ऽऽगन्तेति प्रतिभाख्यमनिश्चायकत्वान्न मानम् । तेनर्षीणां प्रतिभया धर्माधर्मप्रमेति परास्तम् । लोकप्रसिद्धिः प्रत्यक्षान्तर्गतैव । अतः षडेव प्रमाणानि । ताम षट्कया लोके याभिः सर्वो ऽनुवृत्ततन्त्रमि समयमयवाच्चेति संक्षेपः ॥

इत्यभाववादः ॥

अथ शब्दः ।

शब्दं शब्दविज्ञानादसन्निकृष्टे ऽर्थे विज्ञानम् ।

इति सूत्रम् । शब्दज्ञानजन्यमसन्निकृष्टार्थविषयकं यथार्थज्ञानं शाब्दप्रमा, तत्करणीभूतशब्दः प्रमाणमित्यर्थः । शब्दानुव्यवसाये ऽतिव्याप्तिवारणाय द्वितीयम् । अनुमित्यादावतिव्याप्तिवारणायाद्यम् । एवं वाक्यश्रवणानन्तरं पदोपस्थितपदार्थानां संसर्गविषयिणी प्रमितिः प्रत्यक्षादिविलक्षणा जायते, तत्करणं शब्दस्तज्ज्ञानं वा प्रमाणान्तरम् । अन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीः शब्दप्रमा, तत्करणं शब्दः प्रमाणमिति जानकीनाथः । प्रत्यक्षानुमितिस्मृतीनां वारणाय सत्यन्तम् । असंभववारणाय अनुभवत्वव्यापकेति जातिविशेषणम् । उपमितिवारणाय शून्यान्तम् । घटादिवारणाय धीपदम् । स्वकारणकशाब्दधीप्रकारप्रकारकप्रमाजन्यः शब्दः प्रमाणशब्द इति मणिकृत् । वाक्यं चैकार्थकपदसमूहः । एकार्थकत्वं चानेकमुख्यविशेष्यराहित्यं न त्वेकाख्यातकत्वम् । तेनाख्यातभेदे ऽपि यत्रैकाख्यातार्थो ऽन्याख्यातार्थः प्रकारो यथा पश्य मृगो धावतीत्यादौ तत्रैकवाक्यत्वम् । नन्विदं पदोपस्थितपदार्थानां संसर्गावगाहि मानसप्रत्यक्षमस्त्विति चेत् । न । तत्र मनःसंनिकर्षाभावात् । उपनीतभानेऽपि ज्ञातस्यैव विषयतया ऽज्ञातसंबन्धस्योपनीतभानासंभवाच्च । किं च शाब्दसामग्री चाक्षुषादिप्रतिबन्धिका । मानसे तु चाक्षुषादिसामग्री प्रतिबन्धिकेति सर्वसंमतम् । एवं च शाब्दत्वस्य मानसत्वव्याप्यत्वाङ्गीकारे भिन्नविषयकचाक्षुषसामग्रीकाले शाब्दबोधो न स्यात् तत्र चाक्षुषसामग्रीमानसयोः प्रतिबध्यप्रतिबन्धकभावेष्वनन्तेषु शाब्दान्यत्वप्रवेशे गौरवं स्यात् ॥

वैशेषिकास्तु शब्दो ऽनुमानान्तर्गतः । घटमानयेत्यादिपदानि तात्पर्यविषयभूतपदार्थनिरूपिततात्पर्यविषयसंसर्गप्रमापूर्वकाणि । परस्परान्वयतात्पर्यकत्वे सति योग्यत्वात् । पदान्तरवत् । आकाङ्क्षासत्त्योस्तु तात्पर्यज्ञानार्थमेवापेक्षा । यद्वा पदैरुपस्थितेषु घटादिपदार्थेषु । कर्मत्वमाधेयतासंसर्गेण घटवत् । तेन संसर्गेण घटबाधाभावरूपयोग्यतावत्त्वात् । एते पदार्थास्तात्पर्यविषयसंसर्गवन्तः । आकाङ्क्षादिमत्पदस्मारितत्वात् । इदं वाक्यं संसृष्टार्थज्ञापकम् । आप्तवाक्यत्वात् । इत्याद्यनुमानमुद्रयैव शब्दस्यार्थप्रत्यायकत्वसंभवेन पृथक्प्रामाण्यकल्पना ऽयुक्ता । न चैतादृशसंसर्गज्ञानात्कथं प्रवृत्तिः, इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानस्य प्रवृत्तिहेतुत्वादुक्तस्य तथाविधत्वाभावादिति वाच्यम् । इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानस्यैव प्रवृत्तिहेतुत्वात् । इष्टतावच्छेदकसंसर्गप्रकारकस्यापि वैशिष्ट्यावगाहिज्ञानत्वात् । अस्मिन् ह्रदे सुवर्णपर्यन्तमस्तीति ज्ञानादपि प्रवृत्तिनिरूपणानुभवाच्चार्थापत्त्यनुमाने दोषाभावाच्चेत्याहुः ॥ अत्र केचित् पदपक्षकानुमानस्य संसर्गप्रकारकत्वनियमादुक्तत्वप्रकारकज्ञानार्थं शब्दप्रामाण्याङ्गीकार आवश्यकः । नहि रत्नवद्भूतलमिति शब्दश्रवणोत्तरं संसर्गप्रकारकमेव ज्ञानं जायत इति नियमः । रत्नप्रकारकानुभवस्यापि सत्त्वात् । अर्थपक्षकानुमाने च योग्यतया हेतुतया लिङ्गस्य निश्चितस्यैव निश्चायकतया योग्यतासंशये ऽनुमानानुपपत्त्या प्रवृत्त्यनुपपत्तिः । शाब्दबोधे तु संशयसाधारणयोग्यताज्ञानस्य हेतुत्वान्नानुपपत्तिरित्याहुः ॥ वस्तुतो ऽपरे तु मतान्तरादिवद्भूयां शाब्दबोधाय योग्यतानिश्चयस्यैव शाब्दबोधे हेतुतेति बोधयोः पक्षयोर्विशेषः । पक्षधरास्तु घटमानय घटः कर्मत्वमानयनमित्यादिरूपयोग्यतयोर्विशेषो न स्यात् । अनुमानस्योभयत्र संभवात् । अतो व्याप्त्यादिज्ञानसापेक्षत्वतदनपेक्षत्वकृतबोधविलम्बाविलम्बाभ्यां विभक्त्यादिसमभिव्याहृतशब्दस्य मानान्तरत्वम् । किं च एकपदार्थप्रकारकापरपदार्थविशेष्यकभानं शब्दादेव नानुमानात् । अयं पदार्थोऽपरपदार्थवानित्यनुमानेऽपि विपरीतक्रियाकर्मभावमादायार्थो-

Digitized by Google

न्तरतापत्तेः। तात्पर्यविषयसंसर्गवानित्यनुमाने तु संसर्गस्य प्रका-रतापत्तिः। न च तादृशज्ञानस्य मानसत्वम्। शब्दातिरिक्त-स्य मनःसहकारिणोऽभावात्। किं चौदनं पचत्योदनः पच्यत इत्यत्र पाकौदनयोर्विशेष्यत्वानियमः शाब्दप्रामाण्यं वि-नानुपपन्नः। तस्माच्छब्दः प्रमाणमित्याहुः॥ एवं शाब्दसामग्री-त्यनुभवोऽपि संगच्छते। न चानुमितिप्रमातः शाब्दप्रमाया भेदे यत्रैकस्मिन्विषये ऽनुमितिसामग्री शाब्दसामग्री च तत्रा-नुमितिवारणाय शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरव-मिति वाच्यम्। फलमुखत्वेनादोषत्वात्। किं च शाब्द-प्रमाया अनुमितित्वे सिद्धिसत्त्वे शाब्दबोधो न स्यात्। शाब्दान्यानुमितित्वस्य सिद्धिप्रतिबध्यतावच्छेदकत्वकल्पने गौ-रवम्। किं चानुमितिशाब्दसामग्रीसत्त्वे सिद्ध्यभावदशायाम-नुमितिकारणीभूतस्य सिद्ध्यभावस्य सत्त्वेन तत्र शाब्दानुमि-त्युभयापत्तिस्तद्वारणाय शाब्दान्यानुमितौ शाब्दसामग्र्याः प्र-तिबन्धकत्वं वाच्यं तत्र शाब्दान्यत्वनिवेशे गौरवमिति दिक्। तत्सिद्धं शब्दस्य विजातीयप्रमितिजनकतया प्रामाण्यं, तत्र च पदेनान्वयानुभवजनने आकाङ्क्षायोग्यतासत्तिज्ञानं सहकारि। घटः कर्मत्वमित्यादेर्निराकाङ्क्षतया स्वरूपायोग्यात् अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादेर्जनितान्वयबोधेन निरा-काङ्क्षात् वह्निना सिञ्चतीत्यादेरयोग्यात् गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादेरनासन्नाच्च शाब्दबोधानुदयात्॥

आकाङ्क्षा च पदनिष्ठा तत्पदव्यतिरेकप्रयुक्तान्वयाननुभाव-कत्वरूपा। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजप-दस्य पुत्रेण सह जनितान्वयबोधस्य न पुरुषसाकाङ्क्षत्वम्। घटः कर्मत्वमित्यादेरभेदान्वयबोधे साकाङ्क्षत्वेऽपि भेदान्वयबोधे न साकाङ्क्षत्वं, लाक्षणिकगङ्गादिपदस्याप्यनुभावकत्वस्वीकारात्। तत्रापि साकाङ्क्षत्वम्। यदि च लाक्षणिकस्य नानुभावकत्वं त-दा तीरोपस्थापकपदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वरूपाका-ङ्क्षात्राप्यङ्गीकार्या। एवं श्रुतपदे ऽध्याहृतपदनिरूपिताकाङ्क्षा-पि बोध्या। यत्र सर्वाणि पदानि लाक्षणिकानि तादृशवाक्याद् न बोधः। अन्ये तु यत्पदोपस्थाप्यस्य येन विना नान्वयबोधविष-यत्वं तस्य तेनाकाङ्क्षा सा चार्थनिष्ठा तेन लाक्षणिके ऽध्याहारस्थले च नानुपपत्तिरित्याहुः। वाक्यैकवाक्यतास्थले तु तद्व्यतिरेक-प्रयुक्तकार्याजनकत्वमाकाङ्क्षा। एवं वाक्यार्थविधिवाक्ययोर-न्यतरव्यतिरेकप्रयुक्तान्यतरजनकत्वमाकाङ्क्षा। एवं प्रधानवि-धेः प्रधानस्याङ्गविधयोङ्गं विना फलाजनकत्वरूपाकाङ्क्षा। अन्ये तु पदव्यतिरेकप्रयुक्तो वक्तुस्तात्पर्यविषयसंसर्गावगमप्रा-गभाव आकाङ्क्षा। घटः कर्मत्वमानयनं कृतिरित्यादावय-मेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादिजनितान्वयबोधे च संसर्गावगमप्रागभावाभावादिदमाकाङ्क्षामित्या-हुः। न चैवं सर्वथाकाङ्क्षाया अभावरूपतया स्वरूपसत्या ज-नकत्वादाकाङ्क्षाभ्रमेण शाब्दबोध इति व्यवहारोच्छेदापत्ति-रिति वाच्यम्। अन्वयानुभवाभावे तत्पदव्यतिरेकप्रयुक्तत्वा-मसंभवात्। घटः कर्मत्वमित्यादौ तत्पदव्यतिरेकाभावभ्रमेण शाब्दबोधसंभवः। जनितान्वयबोधे स्वजनितबोधत्वभ्रम इ-ति दिक्॥

योग्यता च अन्वयप्रयोजकधर्मवत्त्वम्। अस्ति च पयसा सिञ्चतीत्यत्र सेकान्वयप्रयोजकधर्मजलत्वस्य पयसि सत्त्वा-द्योग्यता, न तु वह्निना सिञ्चति इत्यत्र। केचित्तु बाधा-भावो योग्यता, सा च तात्पर्यविषयीभूतपदार्थसंसर्गे ऽपर-पदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावः। वर्तते चेत् घ-टपदार्थसंसर्गे निष्ठत्वे कर्मत्वनिष्ठात्यन्ताभावप्रतियोगित्वा-भावः। अपरपदार्थनिष्ठात्यन्ताभावश्च प्रतियोगिव्यधिकरणो बोध्यः। तेन घटवद्भूतलमित्यत्र घटसंयोगे भूतलनिष्ठाभाव-प्रतियोगित्वे ऽपि न क्षतिः। एकपदार्थतावच्छेदके तात्पर्यविष-यापरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावो वा योग्यता। तेन समुद्रजलनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य सेककरणतात्वे सत्त्वेऽपि पयोजलस्य तात्पर्यविषयत्वान्न योग्यता-हानिः, समुद्रजलाभिप्राये त्वयोग्यमेव। एवं तत्तावच्छेद-कभेदेनैकपदबोध्ययोः पचतीत्यादौ कृतिसंख्याकालत्वयोर्योग्य-ता। पदार्थेऽपि स्थितौ क्वचित्संशयरूपस्य क्वचिन्निश्चयरूप-स्य संभवात्। अत एव वह्निना सिञ्चतीत्यादौ शाब्दबोधवा-रणाय योग्यता हेतुः। सा च न स्वरूपसती हेतुः। तद्भ्रमेण शाब्दबोधोदयात्, अतस्तज्ज्ञानं हेतुः। तच्च संशयनिश्चय-साधारणम्। न चात्यन्तान्यान्याप्रसिद्धयोग्यताया एकरूपेण हेतुत्वं संभवतीति वाच्यम्। अयोग्यतानिश्चयविरोधित्वेन हेतु-त्वात्। होतव्यमपि होतव्यं न होतव्यमिति शब्दात् नित्यो न वेति वाक्याद्योग्यतासंशयादपि शाब्दबोध इष्ट एव। यद्वा तदभावशाब्दसामग्र्यास्तद्वत्ताशाब्दे प्रतिबन्धकत्वं कल्प्यते, अतस्तत्र पदार्थस्मृतिमात्रं न शाब्दबोध इति दिक्॥

वस्तुतस्तु न योग्यताज्ञानस्य कारणता किं तु वह्निना सिञ्चेदित्यादौ बाधावतारोऽयोग्यतानिश्चयः प्रतिबन्धकः। स चानुमित्यादिसाधारणत्वेनैव तत्तत्प्रतिबन्धकीभूतबाधज्ञान-त्वादिनैव शाब्दबोधे ऽपि प्रतिबन्धकम्। किं च योग्यतायाः सर्वत्रैकस्यासंभवाद्विलक्षणहेतुतायां तत्तद्वाक्यजन्यशाब्दबोधप्र-सिद्ध्या हेतुत्वकल्पनं न संभवति। अतो न योग्यताज्ञानं का-रणं किं त्वगृहीताप्रामाण्यकतद्धर्मितावच्छेदकतद्धर्मावच्छिन्न-प्रकारकभावनिश्चयत्वेन प्रतिबन्धकता, तद्धर्मावच्छिन्नांशे दोष-

Digitized by Google

विशेषाजन्यतल्लौकिकप्रत्यक्षनिश्चयान्याहार्येतरतद्धर्मितावच्छेदकतद्धर्मावच्छिन्नविशिष्टबुद्धित्वेन प्रतिबध्यतेति रीत्या अयोग्यतानिश्चयः प्रतिबन्धकस्तदभावः कारणमित्याहुः ॥ आलंकारिकास्तु । न शाब्दबोधे योग्यताज्ञानं हेतुः नाप्ययोग्यतानिश्चयः प्रतिबन्धकस्तत्सत्त्वेपि चन्द्रो मुखमित्यादिरूपकादिबोधोदयादेव वन्ध्यासुतो याति खपुष्पकृतशेखर इत्यादिश्लोकार्थशाब्दबोधेन चमत्कारातिशयानुभवाच्च । न च तत्र पदार्थस्मरणमात्रं न शाब्दबोध इति वाच्यम् । घटमानयेत्यादावपि तथा वक्तुं शक्यतया शाब्दबोधमात्रोच्छेदापत्तेः, किं तु बाधनिश्चयस्य शाब्दभिन्नमेव प्रतिबध्यम् । न चैवं प्रवृत्त्याद्यापत्तिः । प्राक्तनबाधेन प्रामाण्यशङ्कया एव जायमानज्ञाने जननादप्रामाण्यशङ्काशून्यज्ञानस्य प्रवृत्तिं प्रति हेतुतया तदभावेन प्रवृत्त्यापादनासंभवात् । तदुक्तं खण्डने 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति ही'त्याहुः ॥ वस्तुतस्तु एवं सत्ययोग्यवाक्योच्छेदापत्तेः । चन्द्रो मुखमित्यादिवाक्येन पामराणां बोधानुत्पादादालंकारिकाणामेव बोधोदयाच्च वासनाविशेष एवोत्तेजको वाच्यः, एवं चोत्तेजकाभावविशिष्टबाधनिश्चयाभावस्य शाब्दबोधे हेतुत्वं युक्तमित्ययोग्यतानिश्चयस्य प्रतिबन्धकत्वं युक्तमुत्पश्यामः ॥

आसत्तिस्तु अव्यवधानेनान्वयप्रतियोग्युपस्थितिः । अव्यवधानं च प्रकृतान्वयबोधाननुकूलत्वेन । अननुकूलत्वं च प्रकृतान्वयबोधाननुकूलोपस्थित्यधिकरणत्वं, तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ नासत्तिः । अतएवान्तरालिकाननुकूलपदार्थोपस्थितेर्न व्यवधायकत्वम् । श्लोकादौ त्वासत्तिभ्रमेण शाब्दबोध इति केचित् । अन्ये तु अन्वयप्रतियोग्युपस्थापकपदाव्यवधानमासत्तिः श्लोकादौ तु योजनावाक्यादेव शाब्दबोध इत्याहुः ॥

तात्पर्यं तु तत्प्रतीतीच्छया वक्त्रानुसंहितत्वम् । तत्र पदार्थतात्पर्यनिश्चयः संसर्गतात्पर्यनिश्चयश्च तादृशशाब्दबोधे हेतुः । तत्संदेहे शाब्दबोधानुदयात् । तात्पर्यभ्रमे चाहार्यशाब्दबोधोदयात् । शुकवाक्ये वेदवाक्ये चेश्वरतात्पर्यग्रहेण शाब्दबोधोऽध्यापकतात्पर्यग्रहेण वा । न च प्रकरणादिकमेव तत्तच्छाब्दबोधे हेतुर्न तु तात्पर्यज्ञानमिति वाच्यम् । अननुगतप्रकरणादिज्ञानानां हेतुत्वे गौरवात् । केचित्तु तात्पर्यज्ञानं लाक्षणिकनानार्थस्थलीयशाब्दे हेतुर्न तु शाब्दबोधमात्रे, गौरवात् । एवं च सैन्धवपदजन्यनानार्थोपस्थितिकालीनतत्पदजन्यलवणादिशाब्दबोधे तात्पर्यज्ञानं कारणम् । न चैवं गौरवं, सर्वशाब्दे तत्तच्छाब्दत्वावच्छिन्ने तत्तत्तात्पर्यज्ञानानामनन्तकार्यकारणभावापेक्षया लघुत्वादित्याहुः ॥ परे तु तात्पर्यज्ञानस्य न हेतुत्वं संभवति । तज्ज्ञानासंभवात् । आवश्यकप्रकरणसमभिव्याहारादिना तज्ज्ञानसंभवे तद्धेतोरिति न्यायेन तस्य वैयर्थ्यात् । अतो वेदवाक्यार्थबोधे लौकिकलाक्षणिकनानार्थस्थलीयशाब्दबोधे च न तात्पर्यज्ञानं हेतुरित्याहुः ॥

अत्रेदं बोध्यम् । पदार्थोपस्थितिमात्रं न हेतुः पचतीत्यादौ प्रत्यक्षदृष्टकलापादेरपि शाब्दबोधापत्तेः । नापि पदजन्यपदार्थोपस्थितिः, पदोपस्थितस्वाश्रयाकाशादेरपि शाब्दबोधापत्तेः । अतो वृत्त्या पदजन्यपदार्थोपस्थितिर्हेतुः । अन्ये तु न पदजन्यपदार्थोपस्थितिर्हेतुः, किं तु पदार्थोपस्थितिमात्रम् । आकाशादेः शाब्दबोधस्याकाङ्क्षायोग्यत्वाभावेनैव वारणात् । न च तथापि प्रत्यक्षगम्यकलापादेरपि पचतीत्यादौ शाब्दबोधापत्तिः । तात्पर्याभावात् । तत्सत्त्वे शाब्दबोधस्येष्टत्वात् । न चैवं घटः कर्मत्वमित्यादिपदजन्यपदार्थोपस्थितौ शाब्दबोधापत्तिः । तादृशसमभिव्याहारविशिष्टपदजन्यपदार्थोपस्थितेरेव हेतुत्वाङ्गीकारात् । अत एव वाचकपदानुपस्थितस्यापि कर्मत्वस्य विधानमुपपद्यत इत्याहुः । नन्वस्तु शाब्दबोधे आकाङ्क्षादिज्ञानानां कारणता तथापि युगपत् तावत्पदज्ञानानां तावत्पदार्थस्मृतीनां चासंभवात् कथं वाक्यार्थबोध इति चेन्न । क्रमोच्चारितपदजन्यपदार्थक्रमिकोपस्थित्युत्तरं सर्वेषां पदानां समूहालम्बनरूपमानसोपस्थितिः ततः समूहालम्बनरूपतत्पदार्थोपस्थितौ तदन्वयबोधोत्पत्तिः । न च पदसमूहालम्बनं विना ऽर्थोपस्थितिरेव कल्प्यतामिति वाच्यम् । तस्याः पदजन्यत्वाभावेन क्लृप्तकार्यकारणभावबाधापत्तेः । अतः पदसमूहालम्बनमावश्यकम् । वस्तुतस्तु जन्यत्वापेक्षया अनन्यथासिद्धत्वस्याप्रवेशेन प्रयोज्यत्वस्य लघुतया पदजन्यपदार्थोपस्थितेर्न हेतुत्वं किं तु पदप्रयोज्यपदार्थोपस्थितेरेव । तथा सति पदसमूहालम्बनं नावश्यकमिति युक्तम् । पदार्थानां च खलेकपोतन्यायेनान्वयबोधः । तदुक्तम्

वृद्धा युवानः शिशवः कपोताः
खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः
परस्परेणान्वयिनो भवन्ति ॥

केचित्तु राजपुरप्रवेशन्यायेनान्वयबोधः । यत्र खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधः । यत्र वा दण्डी कुण्डली छत्री चैत्र इत्यादौ विशिष्टस्य वैशिष्ट्यबोधे तात्पर्यं, तत्र । तदुक्तम्

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेनतेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

Digitized by Google

इति संप्रदायः । खण्डवाक्यार्थबोधोत्तरं चरमपदस्मृतिस्तत्पदार्थस्मृतिस्तच्चार्थस्मृतिकाले खण्डवाक्यार्थबोधनाशाच्चरमपदस्मृतिरेव तावत्पदविषयिणी । चरमार्थस्मृतिः तावदर्थविषयिणी ततो ऽन्वयबोध इति नव्याः । ननु पदजन्यपदार्थोपस्थितिः शाब्दबोधहेतुः, अन्यथा पचतीत्यादितः प्रत्यक्षदृष्टकलापादेरप्यन्वयबोधापत्ते,रित्युक्तम् । एवं सति द्वारमित्यादौ शाब्दबोधो न स्यात् क्रियावाचकपदाभावादिति चे,न्न । अनुषङ्गाध्याहारादिनाऽन्वयबोधात् । एतेन विश्वजिता यजेतेत्यत्र स्वर्गकाम इति वा स्वर्गार्थमिति वा सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादौ प्राकृताग्न्यन्वाधानादीतिकर्तव्यतावाचकस्याग्नेयवदितिपदस्य प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति सर्वेभ्यो दर्शपूर्णमासावित्यादौ विधिपदस्य सौर्यादिविकृतावतिदेशिकमन्त्रे ऽर्थलोपेन निवृत्ताग्निपदके सूर्यादिपदस्य चाध्याहारादिति व्याख्यातम् । स्वस्थानस्थितस्य पुनरनुसंधानमावृत्तिः। नेदीयस्थानान्तरस्थस्यानुसंधानमनुषङ्गः। दवीयस्थानान्तरस्थस्यानुसंधानमनुवृत्तिः । सा च सिंहावलोकितमण्डूकप्लुतिगङ्गास्रोतोवदिति त्रिधा । आवृत्त्यनुषङ्गानुवृत्त्यसाधारणलक्षणं श्रुतपदस्यानुसंधानम् । अश्रुतपदस्यानुसंधानमध्याहारः । स च सर्वापेक्षया जघन्य इति । गुरवस्तु तद्विषयकशाब्दे पदजन्यतदुपस्थितेर्न हेतुत्वं किं तु तत्तदन्वयबोधे पदजन्यतत्तदन्वयप्रतियोग्युपस्थितित्वेन हेतुत्वम् । उक्तस्थले त्वर्थाध्याहारेणैवान्वयबोध इत्याहुः । तेषामयमाशयः । कार्यवाचकपदासमभिव्याहृतवाक्यानां मूकत्वाच्छाब्दबोधमात्रे कार्यवाचकपदज्ञानमर्थोपस्थितिश्च हेतुः । आकाङ्क्षाभावान्नोपस्थितस्याकाशादेर्बोधः । उपस्थितकलापादेराकाङ्क्षायां बोधस्त्विष्ट एव । एवं च तत्तच्छाब्दबोधे तत्तत्पदार्थोपस्थितित्वेन हेतुतेति लाघवम् । मतान्तरे तु तत्तत्पदज्ञानस्य तत्तत्पदजन्योपस्थितेश्च हेतुत्वकल्पने हेतुहेतुमद्भावकल्पनागौरवमिति । अत्राहुः । असाधुपदेनार्थप्रत्ययाभावात्साधुपदज्ञानमपि शाब्दबोधे हेतुः । साधुत्वं चानादिवृत्तिप्रमाप्रयोज्यार्थप्रतिपादकत्वम् । तेन भाषाशब्देष्वनादिशक्त्यभावाच्छक्यार्थाभावेन लक्षणाया असंभवाच साधुत्वम् । लाक्षणिकगङ्गापदे च न क्षतिः । आधुनिकसंकेतितडित्थादिपदेषु पाणिनिसंकेतितवृद्धिटिघुभादिपदेषु च पिता नाम कुर्यादिति विधिना पुत्रत्वनामत्वोपाधिना व्याकृता वागुच्यत इति विधिना व्याकरणोपाधिना चानादिवृत्तिप्रमासंभवात्साधुत्वम् । वृत्तिभ्रमेणार्थप्रत्यायकत्वमसाधुत्वम् । तद्यथा । भाषाशब्दानां प्रयोगप्रमयोः करणापाटवशक्तिभ्रमाभ्यामुपपत्तेः शक्त्यभावादेव वृत्त्यन्तरस्य चासंभवाच वृत्तिप्रमेति न साधुत्वम् । राणकस्तु पौरुषेयसंकेतविरहविशिष्टत्वं साधुत्वम् । व्याकरणसंकेतितानामसाधुत्वमिष्टमेवेत्याह । तन्न । टिपदोत्तरं विभक्त्यनुत्पत्तिप्रसङ्गात् । टिघुभादिशब्दानामुभयबहिर्भूतत्वमिति के चित् । अदृष्टजनकतावच्छेदको व्याकरणाभिव्यङ्ग्यो जातिविशेष एव साधुत्वमित्यपि कश्चित् । तदुक्तम् ।

अनवभ्रष्टतानादिर्यद्वाभ्युदययोग्यता ।
व्याक्रिया व्यञ्जनीया सा जातिः कापीह साधुता ॥
यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः ।
कथं नु तासां साधुन्वं नैव ताः साधवो मताः ॥
अनपभ्रंशरूपत्वाच्चाप्यासामपशब्दता ।
हस्तचेष्टा यथा लोके तथा संकेतिता इमाः ॥
ततश्चासां नाभ्युदयः प्रत्यवायो ऽपि वा भवेत् ।
लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलम् ॥

वस्तुतः साधुत्वज्ञानं न कारणं नाप्यसाधुत्वज्ञानं प्रतिबन्धकं, किं तु तादृशसमभिव्याहारस्य तादृशाकाङ्क्षाया वा हेतुत्वात्, नोक्तातिप्रसङ्ग इति युक्तम् । पदज्ञानस्य च द्वैधीकारणता चरमपदस्य सर्वपदस्मृतिहेतुसंस्कारोद्बोधकतया लाक्षणिकस्य च शक्तपदस्मृतिहेतुसंस्कारोद्बोधकतया स्वार्थोपस्थितिद्वारा च । अन्येषां तु स्वार्थोपस्थितिद्वारैवेति, तत्रोद्बोधकविधया यत्पदज्ञानजन्यत्वं पदार्थोपस्थितिद्वारा च यत्पदज्ञानजन्यत्वं शाब्दबोधनिष्ठं तदन्यतरसंबन्धेन पदज्ञानविशिष्टघटोपस्थितित्वादिना घटादिशाब्दे हेतुत्वम् । लाक्षणिकपदस्यानुभावकत्वाभावात् । तत्स्मृतशक्तपदस्यैव शाब्दबोधहेतुत्वादिति के चित् । पदं चानुपूर्वीविशिष्टतद्वर्णसमुदायः । आनुपूर्वी च शक्ततावच्छेदिका । सा च टप्रागभावविशिष्टघत्वरूपा घनाशविशिष्टटत्वरूपा वा । वर्णानां नित्यत्वे तु अव्यवहितोत्तरत्वसंबन्धेन घज्ञानविशिष्टज्ञानविषयटत्वादिरूपा। सुप्तिङन्तं पदमिति वैयाकरणाः । शक्तं पदमिति तु युक्तम्। इदं तु बोध्यम् । पदज्ञानस्य घटशाब्दे केन रूपेण हेतुत्वम्। न तावत्पदज्ञानत्वेन, व्यभिचारात्। नापि घटपदज्ञानत्वेन, कलशपदादपि घटशाब्दे व्यभिचारात् । किं तु घटशक्तपदज्ञानत्वेन । न तु वृत्तिमत्पदज्ञानत्वेन, वृत्तित्वस्य शक्तिलक्षणान्यतरगर्भतया गौरवात् । तेन लाक्षणिकस्याननुभावकत्वम् । अत एव यत्र सर्वाणि लाक्षणिकानि तद्वाक्यं मूकमेव । गङ्गायां घोष इत्यादौ तु यत्किंचिच्छक्तपदमादायान्वयानुभव इति संप्रदायः । वस्तुतो वृत्तिमत्पदज्ञानत्वेन घटपदज्ञानत्वेन घटस्मारकपदज्ञानत्वेनान्ततः शाब्दत्वावच्छिन्ने पदज्ञानत्वेनैव वा हेतुत्वं, तत्पदजन्यपदार्थोपस्थितिरूपव्यापाराभावेन

Digitized by Google

न व्यभिचारः । तेन लाक्षणिकस्याप्यनुभावकत्वं युक्तमिति दिक् ॥ ननु शक्तपदज्ञानत्वेन हेतुतेत्युक्तं, तत्र केयं शक्तिरिति चेत् । अव्यवधानेन शब्दजन्यप्रतीत्यनुकूला वृत्तिः शक्तिः । अव्यवहितत्वं चार्थान्तरप्रतीत्यद्वारकत्वम् । इदं च लक्षणावारणाय तादृशचेष्टावारणाय चावशिष्टम् । सा चास्मात्पदादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छेति न्यायविदः । पदार्थान्तरमिति मीमांसकाः । अस्या एव संकेत इति व्यवहारः । साक्षाच्छब्दजन्यार्थप्रमितिसहकारिज्ञानविषयत्वं वा । वैयाकरणास्तु बोधकत्वमेव शक्तिः । एवं लाक्षणिकार्थे ऽपि शक्तिरेव । अत एव सर्वे सर्वार्थवाचका इत्याहुः ॥ शक्तिग्रहश्च व्याकरणादिना । तदुक्तम्

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

अनुमानोपमानशब्दा एव शक्तिग्राहकाः । व्यवहारप्रसिद्धसामानाधिकरण्यविवरणानामनुमानान्तर्भावः । व्याकरणवाक्यशेषकोशानां शाब्दान्तर्भाव इति नव्याः । व्याकरणात् तृतीयादेः करणत्वकर्तृत्वादौ शक्तिग्रहः । उपमानेन उपमितिरूपः शक्तिग्रहः । कोशो वैजयन्त्यादिः । आप्तवाक्यं घटो घटपदवाच्य इत्यादि । अत्र च आप्तवाक्यत्वेन न शक्तिग्रहहेतुता किं तु वाक्यत्वेन, लाघवात् एवं च

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इत्यादिवाक्येन शक्तिग्रहः । व्यवहारः प्रयोज्यवृद्धप्रयोजकवृद्धव्यवहारः । तथाहि । प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यवृद्धप्रवृत्तिमुपलभमानो बालः प्रयोज्यवृद्धस्य तज्ज्ञानं ज्ञाने च शब्दस्यैव हेतुता तदन्यथानुपपत्त्या च शक्तिं परिकल्पयन्नावापोद्वापाभ्यां तत्तत्पदस्य तत्तदर्थे शक्तिमवधारयति । तदनन्तरं व्याकरणोपमानकोशाप्तवाक्यविवरणवाक्यशेषप्रसिद्धपदसामानाधिकरण्ययथायोगं शक्तिमवधारयतीति दिक् ॥ लक्षणा गौणी च अपरा पदवृत्तिः । तत्र सादृश्यान्यशक्यसंबन्धेनाशक्योपस्थितिर्लक्षणा । सादृश्यरूपशक्यसंबन्धेनाशक्योपस्थितिर्गौणीति के चित् । तन्न । वृत्तेरुपस्थितिहेतुत्वेनोपस्थितिरूपत्वानुपपत्तेः । अतः स्वशक्यसंबन्धवत्त्वं लक्षणा । तस्याश्च पदनिष्ठत्वं स्वाश्रयसंबन्धिवाचकत्वसंबन्धेन । यथा गङ्गायां घोष इत्यादौ गङ्गापदशक्यप्रवाहसंबन्धो लक्षणा तज्ज्ञानकार्यतावच्छेदकं च गङ्गासंबन्धवत्तीरत्वप्रकारकतीरविशेष्यकशाब्दत्वम् । गङ्गासंबन्धस्य संबन्धत्वेन भानं संयोगत्वादिना वा, गङ्गासंबन्धितीरे घोषो गङ्गासंयुक्ततीरे घोष इत्युभयविधानुभवात् । एवं सिंहो देवदत्त इत्यत्रापि परंपरासंबन्धेन सिंहसंबन्धी देवदत्त इति बोधे लक्षणैव । अभिधेयाविनाभूतइत्यस्याप्यभिधेयसंबन्धत्वेन यत्र प्रकारः, तत्र वृत्तिर्लक्षणेत्यर्थः । यदा तु सिंहनिष्ठक्रौर्यसजातीयक्रौर्यवत्त्वेन देवदत्तप्रतीतिस्तदा गौणीति वक्ष्यते । न चैवं तीरत्वमात्रप्रकारको बोधः कथं स्यादिति वाच्यम् । नदीतीरे समुद्रतीरे वेति संदेहापत्त्या तादृशबोधस्यालीकत्वात् । न चैवं सर्वत्र गङ्गासंबन्धिनीति बोधादजहल्लक्षणापत्तिः । शक्यलक्ष्योभयस्य क्रियान्वयित्वे ऽजहल्लक्षणाङ्गीकारादिति संप्रदायः । वस्तुतो गङ्गापदात्तीरत्वमात्रप्रकारको बोधः । तीरत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन गङ्गापदजन्यशाब्दे समवायेन गङ्गासंयोगवत्त्वज्ञानस्य हेतुत्वकल्पनया न संशयाद्यापत्तिरिति युक्तम् । सा च लक्षणा द्विधा, ऽजहत्स्वार्था, जहत्स्वार्था च । स्वशक्यार्थविशेष्यकान्वयबोधप्रयोजिका, अजहत्स्वार्था यथा यष्टीः प्रवेशयेत्यादौ । अत्र शक्यार्थस्यापि क्रियान्वयात् । इयमेवोपादानलक्षणेत्यालंकारिकाः । स्वशक्यार्थाविशेष्यकान्वयप्रयोजिका जहत्स्वार्था । गङ्गायां घोष इत्यादौ । लक्षितलक्षणाया अप्यत्रैवान्तर्भावः । स्ववाच्यपदघटकवर्णद्वयघटितपदवाच्यत्वरूपसंबन्धस्यैव द्विरेफादिपदे लक्षितलक्षणात्वात् । एतेन द्विरेफपदेन भ्रमरपदं लक्ष्यते । तेन शक्त्या भ्रमरबोध इत्यपास्तम् । द्विरेफपदोत्तरविभक्त्यर्थस्यानन्वयापत्तेः । तत्त्वमसीत्यादौ जहदजहल्लक्षणा च तृतीयेति वेदान्तिनः । लक्ष्यतावच्छेदके च न लक्षणेति प्राञ्चः । गोत्वविशिष्टशक्तिग्रहस्य हेतुत्ववत्, तद्विशिष्टशाब्दे तद्विशिष्टवृत्तिज्ञानस्य हेतुत्वात्, तत्रापि लक्षणा युक्तेति नव्याः । लक्षणाबीजं शक्यार्थान्वयानुपपत्तिर्न तु तात्पर्यानुपपत्तिः । वेदे तदसंभवात् । यष्टीः प्रवेशयेत्यादौ तु प्रवेशनपदस्य भोजनप्रयोजनकप्रवेशनपरत्वग्रहादन्वयानुपपत्तिरेव । वस्तुतो मुख्यार्थानुपपत्तिज्ञानं मुख्यार्थबाधे प्रतिबन्धकं न लक्ष्यार्थबोधकारणं, लाक्षणिकस्थले गङ्गापदेन तीरपदस्मृतिस्तेन तीरस्मृतिरिति प्राञ्चः । तन्न । गङ्गापदात्तीरानुपस्थितौ तत्र विभक्त्यर्थान्वयो न स्यात् । अतस्तीरोपस्थापकत्वेपि नानुभावकत्वं, तीरान्वयबोधे तीरान्वयप्रतियोगिशक्तपदज्ञानत्वेन हेतुताङ्गीकरणात् । शक्तपदान्तरादेव तीरान्वयानुभवस्य युक्तत्वात् । सर्वलाक्षणिकस्थले तु न बोध इति दिक् ॥ अथ केयं गौणी नाम । सादृश्यरूपशक्यसंबन्धो गौणी, तेन लक्षणान्तर्गतिरिति नैयायिकाः । के चित्तु लक्ष्यमाणगुणयोगनिमित्तवृत्तित्वं गौणत्वम् । सिंहो देवदत्त इत्यत्र सिंहपदलक्षिता सिंहगुणक्रौर्यादिसंबन्धनिमित्ता अपरात्र वृत्तिरित्याहुः । तन्न । सिंहनिष्ठक्रौर्यादीनां देवदत्ते असंभवात् । प्रसिद्धार्थत्यागेनाप्रसिद्धगुणवाचित्वं तत्त्वम् । सिंहपदेन

Digitized by Google

प्रसिद्धार्थसिंहत्वत्यागेन देवदत्तनिष्ठक्रौर्यादि शक्त्योच्यते । सामानाधिकरण्यं च मत्वर्थलक्षणयोपपद्यत इति । तदपि न । प्रसिद्धार्थत्यागस्य तात्पर्यग्रहाधीनतया वेदे तदसंभवात् । एतेन समुदायवाचिन एकदेशे वृत्तिर्गौणी, सिंहशब्दो न जातिमात्रवाचकः किं तु जातिव्यक्त्याकृतिक्रौर्यादिगुणसमुदायवाचकः । अन्यथा शक्तसिंहादिशब्दे देवदत्तपदसामानाधिकरण्यानुपपत्तेः । एवं च समुदायवृत्तेन एकदेशार्थलक्षणया देवदत्तपदसामानाधिकरण्यमित्यपास्तम् । तात्पर्यग्रहं विना तज्ज्ञानस्यासंभवात् । आरोपितार्थवृत्तित्वं गौणत्वं, सिंहो देवदत्त इति प्रयोक्ता सिंहत्वादि देवदत्ते आरोप्य वाक्यं प्रयुङ्क्ते, बोद्धा च तथैव प्रतिपद्यते । आरोपश्चाहार्यो बोधः । एवं चालंकारिकाणां चन्द्रो मुखमित्यादावारोपेण गौणबोधः । परं त्वयमारोप आलंकारिकवासनाविशेषजन्यत्वात्प्रेक्षित आहार्य इत्युच्यते । अत एव शुक्तिरजते न गौणत्वं, तदारोपस्य कारणदोषजन्यत्वेन आहार्यत्वाभावादित्यपरे । तन्न । आरोपकपुरुषाभावेन वेदे तदसंभवात् । किं च खपुष्पं भवत्सिद्धान्त इत्यादावननुभूतपूर्वतया ऽऽरोपासंभवात्, गौणत्वानुपपत्तिः । अथ तत्र विशकलितप्रसिद्धभवदाकाशाधिकरणत्वरूपसंसर्गस्यारोपेणाकाशाधिकरणकवृक्षादौ वर्तमानं पुष्पं खपुष्पपदार्थमङ्गीकृत्य तत्तादात्म्यारोपेण सिद्धान्ते गौणतेत्युच्यते । तदा आरोपितसंसर्गरूपार्थवृत्तितया खपुष्पे खपुष्पशब्दस्य गौणत्वापत्तिः । अतो गौणत्वनिरुक्तिरशक्येति चेत्, न । स्वशक्यसंबन्धिगुणसजातीयगुणवद्वृत्तित्वं गौणत्वं, शक्यसंबन्धश्च एकार्थवृत्तित्वसमवेतत्वादिः । एवं सिंहो माणवक इत्यादिवाक्यजन्ये सिंहत्वैकार्थसमवेतक्रौर्यादिसजातीयगुणवत्प्रकारके गुणप्रकारके वा माणवकादिविशेष्यके शाब्दे सिंहपदजन्यगुणवदुपस्थितेर्गुणोपस्थितेर्वा हेतुत्वम् । तत्र च सिंहपदेनैकसंबन्धिज्ञानादपरसंबन्धिस्मरणमिति रीत्या सिंहगुणतत्सजातीयगुणानां लक्षणयोपस्थितिः । एवं योषावावगौतमाग्निरित्यादावग्निशब्दो योषायां गौणः, एवं खपुष्पं सिद्धान्त इत्यादौ खपुष्पसमासार्थस्यालीकत्वस्य सिद्धान्ते संबन्धाद्गौणता । खपुष्पं नास्तीत्यत्र तु नास्तिपदमनुवादः । अतः स्वशक्यसंबन्धिगुणसजातीयगुणवदुपस्थितिहेतुवृत्तिर्गौणीति सिद्धम् । एवंविधगौणत्वाङ्गीकारे च शक्यार्थत्यागाभावेन न वेदाप्रामाण्यापत्तिलेशोऽपि । अत एव यजमानः प्रस्तर इत्यादौ यजमानप्रस्तरयोर्यागकारणत्वरूपगुणयोगेन यजमानपदं प्रस्तरे गौणमतो भिन्ना लक्षणातो गौणी । उपपादयिष्यते च तच्चिह्नानि तत्सिद्धान्तादीनीति दिक् ॥ तच्च पदं चतुर्विधम् । रूढं, यौगिकं, योगरूढं, यौगिकरूढं, च । समुदायशक्त्या ऽर्थप्रत्यायकत्वं रूढत्वम् । अवयवशक्त्यार्थप्रत्यायकत्वं यौगिकत्वम् । समुदायशक्त्या अवयवशक्त्या चैकार्थप्रत्यायकत्वं योगरूढत्वम् । तथैव भिन्नार्थप्रत्यायकत्वं यौगिकरूढत्वम् । यथा घटः, चित्रगुः, पङ्कजं, मण्डप, इत्यादिशब्देषु । पङ्कजपदात् पङ्कजनिकर्तृत्वपद्मत्वोभयप्रकारकोपस्थितेरानुभविकत्वात् । अन्यथा पङ्कजपदात् भेकादिबोधोऽपि स्यात् । अतो योगरूढिरावश्यकी । अत्र के चित् । पङ्कजादिपदानां यौगिकत्वमेव पङ्कजपदावयवशक्त्या पद्मविशेष्यकपङ्कजनिकर्तृत्वमात्रप्रकारकबोधेन पद्मत्वप्रकारकबोधाभावात् । न चैवं पङ्कजपदात् कुमुदभेकादिविशेष्यकपङ्कजनिकर्तृत्वप्रकारकबोधापत्तिरिति वाच्यम् । पूर्वतरप्रयोगत्वप्रकारकज्ञानस्य तत्पदजन्यशाब्दबोधे हेतुत्वाङ्गीकारात् । यद्वा पङ्कजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन पङ्कजपदावयवशक्तिग्रहजन्यशाब्दबोधं प्रति समवायसंबन्धेन पद्मत्वस्य पद्ममात्रवृत्तिविषयतया वा पद्ममात्रवृत्तिविषयतासंबन्धेन ज्ञानस्यैव वा हेतुताङ्गीकारान्नातिप्रसङ्गो न वा भूतभाविपद्मबोधानुपपत्तिरित्याहुः ॥ के चित् कुमुदादौ प्रयोगस्तु लाक्षणिकः । यद्यपि योगरूढ्यङ्गीकारेऽपि इयं लक्षणा तुल्या तथापि शक्यतावच्छेदकाननुप्रविष्टधर्मेण लक्षणापेक्षया तदनुप्रविष्टधर्मेण लक्षणा लघीयसी । लाघवं च तेन रूपेणान्वयमात्रकल्पनं न तु स्मरणमपीति । एवं यौगिकरूढं मण्डपादिपदम् । योगेन रूढ्या च भिन्नार्थप्रत्यायकत्वात् । योगापेक्षया रूढेः प्राबल्यमप्येतद्विषयमेव । अत एव रथकारादिशब्दे सौधन्वनापरपर्यायऋभुरूपजात्यन्तरग्रहणमेव सिद्धान्तयिष्यत इति दिक् ॥ उक्तरूपपदज्ञानकरणको वाक्यार्थो द्विविधः । भेदरूपः, संसर्गरूपश्च । राज्ञः पुरुष इत्यादावराजसंबन्धिभिन्नः पुरुष इति बोधादिति के चित् । सर्वत्र संबन्ध एव वाक्यार्थे, इतररूपापोहस्य प्राचुर्येण भानाभावात्, अपोहस्याप्रसिद्धेश्च । अतः संसर्ग एव वाक्यार्थः । स च घटमानयेत्यादौ घटकर्मकत्वादिरूपविशेषणविशिष्टं विशेष्यमेव वाक्यार्थ इत्याचार्याः ॥ तस्य च विशिष्टवैशिष्ट्यरूपवाक्यार्थस्य भानं चतुर्विधम् ।

भावनैव हि वाक्यार्थः स्वकारकविशेषिता ।
विधिस्त्वं श्रौतमार्थं वा भावनाकारकाश्रयम् ॥

इति वार्त्तिकात् । विशिष्टस्य वैशिष्ट्यरूपमेकं, विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्यपरं, यथा नीलदण्डवान् पुरुष इति । एकविशिष्टे अपरवैशिष्ट्यमिति तृतीयम् । दण्डी देवदत्तः कुण्डलीति, एकत्र द्वयमिति चतुर्थम् । यथा दण्डी कुण्डली देवदत्त इति । चतुर्विधेऽपि वाक्यार्थे वाक्यस्य प्र-

Digitized by Google

क्तिरिति वैयाकरणाः । कार्यान्विताभिधानाङ्गीकारेण कार्यान्वयरूपेण वाक्यार्थे शक्तिरिति गुरवः । इतरान्विताभिधानाङ्गीकारेणान्वयरूपे वाक्यार्थे शक्तिरिति वेदान्तिनः । वैयाकरणानां वाक्यार्थो विशेष्य इतरयोस्तु विशेषणभूत इति भेदः । संसर्गमर्यादया वाक्यार्थभानमिति गौतमीयाः । वाक्यार्थे लक्षणेति सिद्धान्तः । तत्र वैयाकरणास्तावत् । भवति भूयात् बभूव रामः रामानित्यादौ श्रूयमाणतिकारविसर्गादीनां वाचकता न तु भूधातुलकारसुबाद्युपस्थापनद्वारा ऽर्थप्रत्यायकत्वम् । आदेशिनां वाचकत्वकल्पने आदेशानां तदुपस्थापकत्वकल्पने गौरवात् । व्याकरणभेदेनादेशिनामननुगमाच्च । अन्यथा ऋषभो वृष इत्यादावप्यन्यतरेणान्यतरस्मरणेनैकत्रैव शक्त्यापत्तेः । अतः श्रूयमाणानुपूर्वीविशिष्टा वर्णा वाचका न तु धात्वाद्युपस्थापका इति वर्णस्फोटः । एवं हरिणा हरये रामात् हरेरित्यादौ पदादेशविभागाभावात्कस्य चिदंशस्य द्रव्यवाचकत्वं कस्य चित्करणत्वादिवाचकत्वमिति नियन्तुमशक्यत्वात् संपूर्णस्यैव करणत्वादिविशिष्टहरिवाचितेति पदस्फोटः । एवं कृष्णोहि रक्षैनमित्यादौ वाक्येंशविभागाभावादेकारघटितानुपूर्वीकस्यागमनवाचकस्यात्र सत्त्वेमानाभावाद्वाक्यस्यैव विशिष्टार्थे शक्तिरिति वाक्यस्फोटः । स द्विविधः सखण्डवाक्यस्फोटो ऽखण्डवाक्यस्फोटश्च । आद्यो द्विधा । पदरूपखण्डवाक्यस्फोटो, वर्णरूपखण्डवाक्यस्फोटश्च । तथाहि । विष्णोवेत्यादिवाक्येषु आकाङ्क्षादिसहकृततत्तत्पदस्मारितपदार्थानां संसर्गरूपवाक्यार्थावगमेपि तस्य शाब्दत्वसिद्धये वाक्यस्य शक्तिः कल्प्यते । सैव वाक्यस्फोटः । सा चाज्ञातैव स्वरूपेण हेतुः, अन्वितशक्तिवादिमते अन्वयांशशक्तिवत् । हरिद्रायां नद्यां घोष इति वाक्यद्वयान्वयाव्यवहितपूर्वक्षणे तदवगमो वा कल्प्यते । यद्वा हरे ऽवेत्यादौ पदविभागानिर्णयाद्वर्णत्रयात्मकवाक्यस्य संबोध्यहरिकर्तृकरक्षणे शक्तिरूपः स्फोटः । तदा वर्णरूपः खण्डवाक्यस्फोटः । अस्याश्च व्यवहारकाले ग्रहः । न चैवं वाक्यस्य पदवत्स्मारकत्वापत्त्या ऽननुभावकत्वापत्तिः । अनुभवत्वस्य प्रत्यक्षमात्रवृत्तितयेष्टत्वात् । यथार्थज्ञानजनकत्वस्यैव वाक्यप्रमाणत्वात् । आकाङ्क्षादिसहकृतपदार्थस्मरणजन्यार्थज्ञानजनकत्वस्यैवानधिगतार्थगमकतया प्रामाण्याविघातः । यद्वा वाक्ये बोधकत्वातिरिक्तः संबन्धो न शक्तिः, मानाभावात् । हस्तिपकादौ तु तस्य मानान्तरगम्यत्वाद्युक्तं तेन तत्स्मरणम् । अतो न स्मारकत्वापत्तिलेशोपि । एवं चाकाङ्क्षादिज्ञानस्य हेतुत्वाभावात्तात्पर्यज्ञानस्यैव हेतुतया कार्यकारणभावकल्पनालाघवम् । यद्वा घटमानयेत्यादिवाक्येषु ध्वनिधर्मैस्तारत्वमन्दत्वादिभिरिव घटत्वादिध्वनिधर्मैरेव एकशब्दो वर्णरूपो ऽभिव्यज्यते । स एव वाक्यस्फोटः । एवं पदस्फोटेपि द्वैविध्यमुन्नेयम् । एवं च एकं पदमेकं वाक्यं महत्पदं महद्वाक्यं शब्दात् प्रत्येमीत्याद्यनुभवोपपत्तिः । वर्णानामनेकत्वेन महत्त्वाभावेन च तदनुपपत्तेरित्याहुः ॥ परे तु । यथा बलवता प्रेरित इषुरेकेनैव वेगाख्यव्यापारेण वर्मच्छेदमुरोभेदं प्राणहरणं शत्रोः करोत्येवं शब्द एकेनाभिधाख्यापारेण पदार्थस्मृतिं वाक्यार्थानुभवं च करोतीति यत्परः शब्दः स शब्दार्थ इति वाक्यार्थे शक्तिमाहुः । तदयुक्तम् । पूर्वो धावतीत्यत्र परस्य पुत्रस्ते जात इत्यादिषु हर्षादीनां,गच्छसि चेदित्यादौ मागा इति निषेधस्य वाक्यार्थतापत्तेः । अत एव तादृशार्थप्रत्ययाय व्यञ्जनैवाङ्गीकृता । तच्च व्यञ्जनानिरूपणे स्पष्टमिति दिक् ॥ के चित्तु वाक्यार्थे तात्पर्याख्यं वाक्यस्य वृत्त्यन्तरमाहुः ॥

प्राभाकरास्तु । कार्यान्विते पदानां शक्तिः । तथाहि । पदेषु स्मारिका, ऽनुभाविका,चेति शक्तिद्वयम् । तत्र स्मारिका जातौ । अनुभाविका कार्यान्विते । एवं च घटादिपदानि घटत्वादिजातिस्मरणद्वारा घटादेः कार्यान्वयानुभवजनकानि । तथाहि । सर्वत्र व्यवहारेणैव शक्तिग्रहः, प्रयोज्यवृद्धस्य प्रयोजकवाक्यश्रवणानन्तरं गोकर्मकानयनचेष्टया तादृशकृतीच्छानुमानद्वारा स्वप्रवृत्तौ कार्यताज्ञानस्य हेतुत्वदर्शनात्कार्यताज्ञानमनुमाय कार्यताज्ञानहेतुत्वमवधार्य तस्यासति वृत्त्यन्तरे तदर्थशक्तिं विनानुपपद्यतया कार्यान्वये अनुभाविकां शक्तिमवधारयति । कार्यं चापूर्वमेवेति यत्र कार्यवाचकपदाभावस्तत्र न वाक्यार्थबोधः किं तु पदार्थस्मरणमात्रम् । लिङादियुक्तलौकिकवाक्यस्य च लक्षणया ऽऽनयनादिरूपकार्यान्वितबोधकत्वमित्याहुः ॥

वेदान्तिनस्तु इतरान्वित एव शक्तिग्रहो न तु कार्यान्विते । तथाहि । प्रयोजकवाक्यस्य आनयनकर्मत्वविशिष्टगोरूपेर्थे शक्तिमवधार्यावापोद्वापाभ्यां गवादिपदस्य गोत्वादौ शक्तिमवधारयन्बालव्युत्पत्तिगृहीतान्वयांशे शक्तिमत्यजन्नानयनान्विते एव शक्तिमवधारयति । एवं चान्वयेपि शक्तिरित्याहुः ॥

नैयायिकास्तु समभिव्याहारेण वाक्यार्थबोध इति घटानयनविशिष्टसंसर्गज्ञाने तादृशानुपूर्वीज्ञानस्य हेतुतामात्रकल्पने लाघवात् । शाब्दत्वं च न शब्दवृत्तिविषयत्वं किं तु शब्दजन्यप्रतीतिविषयत्वम् । तेन वृत्त्यविषयस्याप्यन्वयस्य शाब्दत्वोपपत्तिरित्याहुः ॥ सिद्धान्तस्तु वाक्यस्य वाक्यार्थे लक्षणा । न च शक्याभावात् कथं लक्षणेति वाच्यम् । बोध्यसंबन्धस्यैव लक्षणात्वात् । घटमानयेत्यादिवाक्ये घटानयनसामान्यबोधेपि तद्विशेषबोधस्य लक्षणां विनानुपपत्तेः । नहि घटानयनसामान्

वाक्यार्थः । ज्ञानेच्छाप्रवृत्तीनां समानप्रकारकत्वसमानविशेष्यकत्वेन हेतुहेतुमद्भावाद्विशेषविषयकेच्छाप्रवृत्त्यनुपपत्तेः । अतस्तद्विशेषरूपवाक्यार्थस्य लाक्षणिकत्वं युक्तमिति स्फुटीकरिष्यते चैतत्तद्गताधिकरणे ।

अवलोक्य सद्विवन्नाज्ञात-
मणिमन्यानि तदीयटिप्पणानि ।
अनवाप्य मुदं ततो मुदर्थं
लिखितो ऽयं निजकल्पितो विशेषः ॥ १ ॥

॥ अथ बालभारतकाव्यस्य ॥

॥ शल्यपर्व ॥

युष्मान् शमसुधाम्भोधिः पायाद् द्वैपायनो मुनिः ।
पापतापं न कः शास्त्रैर्यस्योर्मिभिरिव त्यजेत् ॥ १ ॥
ततो निध्याय निःशेषनिधनं प्रधनं पुनः ।
नृपमेत्य जगौ दुःखैः संजयः खञ्जयन् वचः ॥ २ ॥
एको[1] रराज शौर्ये च दाने च प्रश्रये च यः ।
तस्मिन् कर्णे जगत्कर्णेन्द्रियैकग्राह्यतां गते ॥ ३ ॥
उड्डीनजीविते राजन् पुत्रस्ते कर्णजीवितः ।
भूताविष्ट इव स्वेषां भियेऽभूद्विकलश्चलन् ॥ ४ ॥
बाढं कृपेण संध्यर्थमर्थितस्त्वत्सुतोऽवदत् ।
कः सुहृद्बन्धुभिर्मुक्तं कर्ता मेऽलं मृधं विना ॥ ५ ॥
ततो न मे समो कृष्णाविति निष्णातशान्तवाक् ।
राज्ञा द्रौणिमतेऽरातिशल्यं शल्योऽभ्यषिच्यत ॥ ६ ॥
अमुं द्रोणार्किभीष्मेभ्योऽधिकमर्जुनदुर्जयम् ।
स्वयं जहीति कृष्णोक्त्या शल्यं वव्रे युधिष्ठिरः ॥ ७ ॥
अथ संभूय भूयोभिर्योध्यं नैकेन केनचित् ।
इत्युक्त्वा सर्वतोभद्रं व्यूहं मद्रपतिर्व्यधात् ॥ ८ ॥
बलं विभिद्य[2] शैनेयधृष्टद्युम्नशिखण्डिभिः ।
कर्मसाक्षिणि साक्षित्वं गते धामिस्ततोऽचलत् ॥ ९ ॥
प्रावर्तत ततः सङ्ग्रामसङ्ग्रप्रसरच्छरम् ।
अन्तदिक् स्तनजच्छायोच्छलन्नवरविच्छवि ॥ १० ॥
वध्यप्राणिगणे तस्मिन् रणे यममहानसे ।
प्रातर्धूलिच्छलाद् धूमस्तोमो व्योमोदरं ययौ ॥ ११ ॥

[1] राजन् इति पा० ।
[2] विभज्य इति पा० ।

असिदण्डैस्तदा कुट्यमानानां मुण्डकेतवात् ।
राज्ञां यमस्य धान्यानामिव प्रोच्छलितं कणैः ॥ १२ ॥
कृपेभक्तो गणभृत्सेतुमुल्लङ्घ्य सतजार्णवम् ।
सतारयः श्रियं प्राप्य रेमिरे रामवद्भटाः ॥ १३ ॥
पितृव्यमातुलभ्रातृपितृपुत्रसुहृत्स्वयात् ।
निराशा जीवितव्येऽपि घोरं युयुधिरे भटाः ॥ १४ ॥
हासैः शुभ्रोऽसिभिः श्यामो वाहिन्योः कोऽप्यभूत् तयोः ।
संभेदो मज्जतां मुक्त्यै गङ्गायमुनयोरिव ॥ १५ ॥
सत्यसेनं सुषेणं च चित्रसेनं च कर्णजान् ।
नकुलो युद्धवैचित्र्यचण्डः कुण्डलिनोऽवधीत् ॥ १६ ॥
एवं विपक्षवक्षांसि दारयिष्यामि संगरे ।
इत्याख्यातुमिव स्वर्णसीतां केतौ प्रदर्शयन् ॥ १७ ॥
धिङ्मां मयैव भीष्माद्या हताः प्रागेव सैष यत् ।
नाभ्यषेचीति तन्वानः पश्चात्तापं कुरुप्रभोः ॥ १८ ॥
संहरन् रक्तलौल्येन गताभिः काण्डभल्लिनाम् ।
कीनाशदासजिह्वाभिरिवारीन् मद्रपोऽविशत् ॥ १९ ॥
विशेषकम् ।
शल्ये प्रहरति स्वैरं पत्त्यश्वरथकुञ्जरम् ।
खं दिशोऽपि द्विषः शल्यमयान्येव व्यलोकयन् ॥ २० ॥
तेन काण्डहतः शैलशृङ्गादिव रथादथ ।
भीमः सिंह इवाधावत् क्ष्वेडामुखरिताम्बरः ॥ २१ ॥
भेजे भीमो गदाभग्नमहेन्द्रस्यन्दनस्ततः ।
दन्तक्षतादिशृङ्गस्य मतङ्गजपतेस्तुलाम् ॥ २२ ॥
पदधूतासु धूलीषु भीमशल्यावथोद्गदौ ।
भ्रेमतुर्मण्डलावर्तैर्मृत्युवात्यावशाविव ॥ २३ ॥
ततो मिथो गदापातैः स्फुरणयोः खलु तेजसोः ।
कणैरिव स्फुलिङ्गैर्द्यां द्योतयन्तौ विनेदतुः ॥ २४ ॥
तौ पेततुस्त्वरातारौ परिहृत्य परस्परम् ।
वीरावुभयतो यन्त्रनिर्मुक्तौ गोलकाविव ॥ २५ ॥
अथेत्य स्वस्वसेनाभिर्नीभितां गमितौ हृतौ ।
संज्ञामाप्य रथारूढौ गूढौ समिति चेरतुः ॥ २६ ॥
चलद्स्त्रदलो दन्तिदन्तालीपुष्पितस्तदा ।
चिच्छेदे रणकल्पद्रुः स्वर्गस्त्रीकाङ्क्षिभिर्भटैः ॥ २७ ॥
सत्त्वासन्नीकृतं ब्रह्मलोकं क्षितिभृतां यताम् ।

दुर्योधनास्त्रैरग्रेऽभूच्चेकितानो नृपस्तदा ॥ २८ ॥
तेजोभिरुज्ज्वलैर्भूपसहस्रद्वयघातजैः ।
सहस्ररश्मिद्विगुणप्रभावोऽभूद्युधिष्ठिरः ॥ २९ ॥
रत्नाढ्यपुङ्खैरापुङ्खं हृन्मग्नैः शल्यसायकैः ।
आलिङ्गत मृधे धार्मिः कौस्तुभाङ्कधिया श्रिया ॥३०॥
उड्डाययति शल्येषुमारुते तृणवद् द्विषः ।
चकम्पे द्युसदां चक्रैर्वियत्कासारवारिजैः ॥ ३१ ॥
हतसूतस्त्वरातारहयः कुरुपते रथः ।
निर्ययौ भीमबाणेभ्यः पताकाङ्गुष्ठनर्तकः ॥ ३२ ॥
पार्थास्त्रविरथो द्रौणिर्निहत्य सुरथं नृपम् ।
बिलं बिलशयाशीव भोगी तद्रथमास्थितः ॥ ३३ ॥
क्षितिभृद्भ्यः क्रुधा रक्ते रक्ताब्द इव मद्रपः ।
रक्तरक्तैः शरैर्वर्षन्नकर्षद्रक्तनिम्नगाः ॥ ३४ ॥
वृतः पाण्डवशैनेयैर्मौलिहस्तक्रमैरिव ।
युधिष्ठिरवपुः शल्यं मूर्तो मृत्युरिवाद्रवत् ॥ ३५ ॥
मिथोऽस्त्रपातविरथौ रेजतुर्धार्मिमद्रपौ ।
महीमूलगतौ प्रातः सूर्याचन्द्रमसाविव ॥ ३६ ॥
द्विषिक्षयानुमेयोऽस्त्याद् मुग्रं यो दक्षिणे भुजे ।
तमाकृष्य यमं खड्गमूर्त्याधावत मद्रपः ॥ ३७ ॥
मद्रेशचन्द्रहासेन पतता मूर्ध्नि भूभृताम् ।
निघ्नता सिन्धुरध्वान्तानसृक्सिन्धुरवर्ध्यत ॥ ३८ ॥
कुम्भिकुम्भभिदालग्नमुक्ताव्यक्तरदस्तदा ।
जहास यशसा शल्यकृपाणः पार्थपौरुषम् ॥ ३९ ॥
दिव्यास्त्रैरर्जुनादीनां महेन्द्रः क्व नु पात्यताम् ।
अजातरिपुणा कोपाद् दृष्टोऽप्यासीन्न भस्म यत् ॥ ४० ॥
अथ यां शंभवे त्वष्टा सृष्टवान् दैत्यदारिणीम् ।
सर्वघात्येव शक्तिं तां शल्याय प्राक्षिपन्नृपः ॥ ४१ ॥
हतस्तया सहस्रघ्न्या सहासो हृदि मद्रपः ।
शेषशीर्षसहस्रस्य व्यथां भुवि पतन् ददौ ॥ ४२ ॥
धावन् शल्यानुजः क्रुद्धो विचित्रकवचाभिधः ।
युधिष्ठिरक्षुरप्रेणाभिमुखोऽप्यमुखीकृतः ॥ ४३ ॥
धावत्सु मद्रसैन्येषु ततः कञ्चुकिषु क्रुधा ।
पक्षिभिः काञ्चने रौद्रैः सुपर्णतनयायितम् ॥ ४४ ॥
भीमेनाभ्रंलिहारातिशवालिनगमालिनी ।
निर्मनुष्या महारण्यभूरिवाकारि युद्धभूः ॥ ४५ ॥
शैनेयभल्ललूनेन शाल्वभूपालमौलिना ।
दृष्टेन राहुणेवाशु म्लानं कुरुमुखेन्दुभिः ॥ ४६ ॥
दुर्योधनशरोदस्तैर्भेजे द्विट्चक्रमौलिभिः ।
भुग्नानदण्डभृत्सैन्योत्क्षिप्तवायसपिण्डता ॥ ४७ ॥
स्वीकर्तुमिव निःशेषा तेन द्विषिचमूः शरैः ।
आपुङ्खमग्नैः पुङ्खस्थनिजनामभिरङ्किता ॥ ४८ ॥
सुशर्मकृपहार्दिक्यद्रौणभूसौबलक्रुलिः ।
अरातिषु कुरुक्ष्मापो यमपाणिरिवापतत् ॥ ४९ ॥
कार्योऽद्य समरस्यान्त इत्युद्भ्रान्तपराक्रमैः ।
ततः कल्पान्तकालोग्रैः संरब्धं कुरुपाण्डवैः ॥ ५० ॥
मा गा वलस्व तिष्ठेहि पूर्वं प्रहर हन्मि तत् ।
इत्यन्तरेऽस्त्रपातानामश्रूयन्त भटोक्तयः ॥ ५१ ॥
शस्त्रैरेव भटाः शस्त्रारवैरेव भटारवाः ।
अहन्यन्त तदा तस्मिन् समरे वस्तखेचरे ॥ ५२ ॥
लोकान्तध्वान्तदुर्भेदे ततो रजसि विस्तृते ।
शब्दा एव घ्नतामासन् स्वान्यपक्षोपलक्षणम् ॥ ५३ ॥
क्व सुशर्मा क्व हार्दिक्यः क्व द्रौणिः क्व सुयोधनः ।
क्व सौबल इति व्यापुः खं तदा पाण्डवोक्तयः ॥ ५४ ॥
जयत्सेनो महाबाहुर्जैत्रो दुर्विषहोऽरिहा ।
दुर्मर्षणो दुःप्रधर्षः समं सहसुवर्चसौ ॥ ५५ ॥
सुजातः श्रुतवान् वातवेगो भूरिबलोऽप्यमी ।
राजन् भीमेन पुत्रास्ते त्रयोदश तदा हताः ॥ ५६ ॥
युग्मम् ।
त्रयोदशानां रक्तेषु स तेषां बिम्बितो दधौ ।
चतुर्दशजगत्त्राणे द्राक् चतुर्दशतामिव ॥ ५७ ॥
सर्वे जयाय धावन्ति मया लब्धोऽद्य संजयः ।
इति ब्रुवाणः शैनेयो राजन् मामग्रहीत् तदा ॥ ५८ ॥
उग्रकर्मा सुशर्माणं सानुजानुगनन्दनम् ।
स्वर्गमार्गसुशर्माणं ससैन्यं निर्ममेऽर्जुनः ॥ ५९ ॥
तदा मदान्धो भीमेन भवत्सूनुः सुदर्शनः ।
मरुन्मृगाक्षीवक्षोजस्तम्बे स्तम्बेरमीकृतः ॥ ६० ॥
पृष्ठघातं छलात् कुर्वन् सबलः सुबलात्मजः ।
अदृष्टव्रणवज्जघ्ने सहदेवेन शस्त्रिणा ॥ ६१ ॥

गृहीतां द्रोणतो युद्धविद्यामुद्योतयन्नयम् ।
उलूकं शकुनेः सूनुं ससैन्योघमपातयत् ॥ ६२ ॥
धृष्टद्युम्नगिरा हन्तुमुद्यतादथ सात्यकेः ।
प्रत्यक्षीभूय मां व्यासो विश्वदृश्वा व्यमोचयत् ॥ ६३ ॥
अदर्शि द्रौणिहार्दिक्यकृपशेषान्मया रणात् ।
एकाकी पद्गतिर्निर्यन्नेकादशचमूपतिः ॥ ६४ ॥
स मां ह्रीणोऽवदत् कथ्यं मत्पितुर्यत् तवात्मज: ।
हतबन्धुसुहृत्सैन्यो दुःस्थः श्रान्तो ह्रदेऽविशत् ॥ ६५ ॥
इत्युक्त्वा मायया सैष दैत्यानामब्धिशायिनाम् ।
संस्तभ्याम्भो ह्रदेऽविशत् संध्यारविरिवार्णवे ॥ ६६ ॥
क्व राजेति कृपद्रौणिहार्दिक्यै रथिभिस्त्रिभिः ।
भ्रमद्भिः कुरुवर्षान्ते मद्गिरासौ ह्रदाश्रितः ॥ ६७ ॥
युधिष्ठिराज्ञया राजन् युयुत्सुस्त्वत्सुतस्तदा ।
दारान् दुर्योधनादीनामादाय प्रस्थितः पुरम् ॥ ६८ ॥
तदा रथिसहस्राभ्यामयुतेनाङ्घ्रिचारिणाम् ।
मातङ्गसप्तशत्याश्वसहस्रैः पञ्चभिर्वृतः ॥ ६९ ॥
युधिष्ठिरश्चरान् दिक्षु प्रैषीच्चिन्ताभरातुरः ।
युद्धाद् दुर्योधनः क्वागाद्वैरमूलमितीक्षितुम् ॥ ७० ॥
हार्दिक्याद्याः शनैरूचुस्तदा ह्रदगतं नृपम् ।
वीरोत्तिष्ठ सहास्माभिः शत्रून् जयमुखान् जय ॥ ७१ ॥
तान् प्रशंसन्नथाचष्ट क्ष्माकान्तः श्रान्तवानहम् ।
विश्राम्यन्तु भवन्तोऽपि प्रातर्वध्या विरोधिनः ॥ ७२ ॥
इत्याकर्ण्यावनीगुप्ता लुब्धका धनलुब्धकाः ।
द्विषं शशंसुर्भीमाय ह्रदस्थं सोऽपि भूभुजे ॥ ७३ ॥
ततः सह महावीरैर्मुदा भूमिः स भूमिपः ।
ययौ ह्रदं चमूह्रादह्रीणदिग्दन्तिसंततिः ॥ ७४ ॥
मा बुध्येऽहं परैरेवेत्याज्ञयाथ कुरुप्रभोः ।
दूरे वटद्रुमं गत्वा द्रौणिमुख्या विशश्रमुः ॥ ७५ ॥
अथापत्य पृथापत्यतिलकस्तज्जलान्तिकम् ।
उच्चैर्द्विषन्तमुद्दिश्य मुकुन्दप्रेरितो जगौ ॥ ७६ ॥
विश्वचर्यीवशीकारकारणं ह्रदमध्यग: ।
प्रक्षालयसि किं राजन् यशश्चन्दनमण्डनम् ॥ ७७ ॥
मानेन हृज्जुषाप्यम्भःस्तम्भनं किं न शिक्षितम् ।
यत् ते ह्रदप्रवेशोऽस्मिन् साहचर्यं मुमोच सः ॥ ७८ ॥

उत्तिष्ठोत्तिष्ठ युद्धोत्थै रेणुभिः कीर्तिदर्पणम् ।
नीरप्रवेशविच्छायं वीरकोटीर मार्जय ॥ ७९ ॥
चिन्तामणिः क्षत्रियाणां रणस्तदधिकोऽपि वा ।
कदाचिद्याचतामुर्वीं ददाति दिवमप्यसौ ॥ ८० ॥
अथोद्यद्बुद्बुदच्छद्मनिर्यन्मूर्तिमदक्षरम् ।
ह्रदवर्ती वचोऽवोचत् तं प्रति प्रतिभूपतिः ॥ ८१ ॥
युक्तमुक्तं त्वया वीर किंतु पृथ्व्या किमद्य मे ।
अर्था यदर्थमर्थ्यन्ते ते मृता मित्रबन्धवः ॥ ८२ ॥
स्वर्गे रिपूत्सवम्लानप्रमोदं ददते रणाः ।
तदेनं विश्ववन्द्येन प्राप्स्यामि व्रतवर्त्मना ॥ ८३ ॥
राजन् शमरसेनैव रचिताचमने मयि ।
मद्भुक्तोच्छिष्टनिर्मुक्तामिदानीं भुङ्क्ष्व मेदिनीम् ॥ ८४ ॥
अथाह पार्थः किं भूप स्वं भूदानेन रक्षसि ।
भूलवोऽपि न मेने प्राक् कुलमुच्छेत्तुमेव किम् ॥ ८५ ॥
पार्थेभ्यः सूचिवेध्यापि न देयोर्वीति सिद्धवाक् ।
कृत्स्नां दत्त्वाद्य तां भग्नप्रतिज्ञः किं न लज्जसे ॥ ८६ ॥
तदुत्तिष्ठ मृधेनास्तु तव वा मम वा मही ।
मा भूद्विजयसंदेहो मयि त्वयि च जीवति ॥ ८७ ॥
अथाह कौरवः क्रुद्धः सर्वानप्येष हन्मि वः ।
एकैकेन पृथग् युद्धं विधाय गदया रयात् ॥ ८८ ॥
अथ धार्मिस्तमाचष्ट तुष्टोऽहं[2] तव शौर्यतः ।
इष्टेनास्त्रेण जित्वैकमप्यस्मासु भुवं भज ॥ ८९ ॥
अथाभ्यधत गान्धारीसूनुर्योऽङ्गीकरोति माम् ।
गदया स मया सार्धं समरेऽस्तु समाहितः ॥ ९० ॥
इत्युक्त्वाशु गदापाणिर्नदादुत्थितवानयम् ।
शोणाक्षः परिभुक्तश्रीर्जनार्दन इवार्णवात् ॥ ९१ ॥
सौभद्र इव युष्माभिर्नास्माभिस्त्वं निहन्यसे ।
इत्युक्त्वास्मै शिरस्त्राणं ददौ वर्म च धर्मजः ॥ ९२ ॥
येन ते रोचते युद्धमाह्वयस्व तमित्यथ ।
सत्याह्वे गदत्याह दैत्याहतिबुधः क्रुधा ॥ ९३ ॥
पुनर्द्यूतमिदं मूढ किमारब्धमिह त्वया ।
अयमाहूयते चेत् त्वां तन्महाभाग का गतिः ॥ ९४ ॥

१ बुद्धि—इति पा॰ ।
२ अथाह तपसः सूनुस्तु—इति पा॰ ।

त्रयोदश समाः पुंसि गदाभ्यासमयोमये ।
अयं चक्रे कृती तेन भीमोऽप्येनं जयेन्नवा ॥ ९५ ॥
अथोत्थायावदद्भीमो मैवं वद गदाधर ।
हराम्येष द्विषः प्राणान् क्षणेन गदयानया ॥ ९६ ॥
अथाह्वयत तं गर्वी गर्जन् दुर्योधनो युधे ।
सोऽप्यधावत घोरेण ध्वनिना दारयन् दिशः ॥ ९७ ॥
तदा सरस्वतीतीरतीर्थचारी हलायुधः ।
तौ शिष्यौ नारदाद्बुद्ध्वा युद्धस्थौ द्रष्टुमागमत् ॥ ९८ ॥
अथाभ्युत्थानमातेनुः कृष्णकुन्तीसुतादयः ।
चकोरा इव चन्द्रस्य रेवतीहृदयेशितुः ॥ ९९ ॥
स्यमन्तपञ्चके युद्धं सिद्धक्षेत्रे विभाति मे ।
इति दुर्योधनेनोक्ते सर्वे सत्यसुतादयः ॥ १०० ॥
दक्षिणेन सरस्वत्यास्तीर्थे शयननामनि ।
गत्वा सीरिणमावृत्य रणं द्रष्टुमुपाविशन् ॥ १०१ ॥
युग्मम् ।
आपत्य विरथावेव भीमदुर्योधनाविह ।
अतिष्ठतां गदापाणी मिथोगर्जिततर्जितौ ॥ १०२ ॥
सुरसिद्धर्षिगन्धर्वैः कुतुकाद् द्रष्टुमागतैः ।
तौ दृश्यमानौ समरे समानौ चेलतुस्ततः ॥ १०३ ॥
उद्गारैरिव पीतारितेजसोर्गदयोर्मिथः ।
तौ महाघातकीलाभिर्भासुरावभिजग्मतुः ॥ १०४ ॥
तर्जने वर्जने स्थाने चलने वलनेऽभ्रमौ ।
तौ जातौ चित्रचारीभिः स्वर्नारीनयनोत्सवौ ॥ १०५ ॥
वामदक्षिणगोमूत्रप्रभृती मण्डले क्रमात् ।
तयोः क्रमोद्धतौ रेणुरेवाचख्यौ दिवौकसाम् ॥ १०६ ॥
दुर्योधनेन गदया भीमः पार्श्वेऽतिताडितः ।
शक्रेण पविना तार्क्ष्य इव नैव व्यकम्पत ॥ १०७ ॥
भ्रामयित्वा गदां वेगाद्वेगदर्शितदिग्भ्रमिम् ।
उच्चैर्व्यमुञ्चत् सामीरिस्त्वत्सुताय द्रुतोत्प्लुतः ॥ १०८ ॥
त्वत्सूनुर्वञ्चयित्वैनां तं मूर्ध्नि गदयार्दयत् ।
दन्तिदन्ताहतशिरा नायं गिरिरिवाचलत् ॥ १०९ ॥
गदा भीमेन मुक्ताथ क्षितिनाथेन वञ्चिता ।
पपात कम्पितक्षोणिभ्राम्यद्दिक्कुलाचला ॥ ११० ॥
अथ वक्षसि दक्षेण भीमो भूपेन ताडितः ।
आलिलिङ्ग क्षणं कम्पी मूर्च्छां मीलितलोचनः ॥ १११ ॥
भीमेनाश्वस्य नृपतिस्ताडितः प्रपतन् भुवि ।
स्थितोऽसौ जानुहस्ताग्रे रिपुसिंह इवेक्ष्यत ॥ ११२ ॥
हर्षात्पाञ्चालचक्रेषु स क्रोशत्सु क्रुधोत्थितः ।
दिक्कूलंकषनिर्घोषः शङ्खं भीममताडयत् ॥ ११३ ॥
रक्तारुणः कम्पमानः पवमानसुतः क्षणम् ।
रेजेऽर्कबिम्बवत् कालक्रीडासरसि संगरे ॥ ११४ ॥
आहत्य भुवि भीमेन पातितस्तव नन्दनः ।
अविलम्बितमुत्थाय सोऽपि भीममपातयत् ॥ ११५ ॥
स्वतोऽप्यधिक एवायं तदा मेने युधि ध्रुवम् ।
त्वद्भूर्देवैरपि यतः पूजितः पुष्पवृष्टिभिः ॥ ११६ ॥
भीमे प्रमृज्य कीलालं पुनर्युद्धार्थमुत्थिते ।
अधिकः कोऽनयोरित्थं पार्थपृष्टो हरिर्जगौ ॥ ११७ ॥
बली भीमः कृती भूपः कृतिना जीयते बली ।
छलयुद्धेन भङ्क्त्वोरू यदि भीमो जयत्यमुम् ॥ ११८ ॥
इति श्रुत्वोत्तरानृत्यगुरुः स्वामूरुमाश्वहन् ।
भीमे पश्यति हस्तेन नर्तयिष्यन्निव श्रियम् ॥ ११९ ॥
आदाय भीमस्तां संज्ञां प्रतिज्ञां स्वामथ स्मरन् ।
चचार विविधाश्चारीर्द्विषदूरुभिदामतिः ॥ १२० ॥
तेनाशु मुक्तामुल्लङ्घ्य गदां त्वत्सूनुना हतः ।
स मूर्च्छितः स्थितः पाणिवक्षःस्तब्धगदः क्षणम् ॥ १२१ ॥
तं मत्वा प्रहरिष्यन्तं नापपात पुनर्नृपः ।
निहन्यात् तदवस्थं चेत् तन्न जीवेद्वृकोदरः ॥ १२२ ॥
मूर्च्छान्ते तलमालोक्य तेनोर्ध्वं प्रेरिता गदा ।
मुञ्चतस्तलमुत्प्लुत्य नृपस्योरू बभञ्ज सा ॥ १२३ ॥
तदोत्पातसहस्रेण विश्वे वैधुर्यधारिणि ।
पपात विचलत्पादः श्रीलतापादपो नृपः ॥ १२४ ॥
निकारान् विषदानादीनुन्नादी श्रावयंस्तदा ।
पदा भीमोऽस्पृशन्मौलिमेकादशचमूपतेः ॥ १२५ ॥
अस्मान् द्यूतच्छलाज्जित्वा कृष्णां गौरिति ये जगुः ।
धर्मयुद्धान्निहत्याद्य ब्रूमो गौरिति तान् वयम् ॥ १२६ ॥
इत्युद्दामवचा भीमो वार्यमाणोऽपि धार्मिणा ।
पुनर्नैकृतिकेत्युक्त्वा भूपं मूर्ध्नि पदास्पृशत् ॥ १२७ ॥

* एतदन्तं पद्यद्वयं प्रक्षिप्तम् ।

रुदन्नथाह त्वत्पुत्रं धार्मिकेभ्यो विधिर्बली ।
पितृव्यपुत्रयोरासीद्यद्वैरं नो कुलान्तकृत् ॥ १२८ ॥
किं रे छलेन जित्वापि स्पृशसि क्ष्मापमङ्घ्रिणा ।
इत्युक्त्वाथ बली भीमं हली क्रोधादधावत ॥ १२९ ॥
कटेरधो न हन्तव्यं गदयेति विदन्नपि ।
अस्योरुं भग्नवान् भीमः प्रतिज्ञापालने कृती ॥ १३० ॥
अस्योरुभङ्गं मैत्रेयमुनिशापस्तदाफलत् ।
इत्यादिभिस्तदा वाग्भिः शौरिणा बोधितो बलः ॥ १३१ ॥
पाण्डवाश्छलयोद्धारः कौरवा ऋजुयोधिनः ।
इत्यस्तु ख्यातिरित्युक्त्वा क्रुद्धोऽथ द्वारिकां ययौ ॥ १३२ ॥
युद्धे धर्मेऽप्यधर्मेऽपि पाण्डवाः काममाययुः ।
इत्यूचेऽथ वचः कृच्छ्राद्धार्मिणाभ्यर्थितो हरिः ॥ १३३ ॥
दिष्ट्या दुष्टस्य दत्तोऽङ्घ्रिस्त्वया मूर्ध्नि रिपोरिति ।
स्तुतोऽथ भीमः पाञ्चालैर्धार्मिलालितपौरुषः ॥ १३४ ॥
तानथाह हरिः पापैः स्वैरेवायं हतः पुरा ।
भीमेनाद्य हतोऽस्त्येव वाग्भिः किं हन्यतेऽधुना ॥ १३५ ॥
स्फिग्भ्यां विष्टो भुवं दोर्भ्यामवष्टभ्य उन्नतानन: ।
भ्रूसङ्कटललाटोऽथ क्रुधाह त्वत्सुतो हरिम् ॥ १३६ ॥
रे कंसदासदायाद स्वैरधर्मैर्वयं हताः ।
त्वद्दिष्टैर्धर्मयोद्धारो नाधर्मैः किं हता मृधे ॥ १३७ ॥
भीष्मो भूरिश्रवा द्रोणः कर्णोऽहमपि कैतवात् ।
न्यपात्यामहि युष्माभिः पापिभिः शोच्यविक्रमैः ॥ १३८ ॥
धर्मयुद्धमनूपेक्षीकृतारिः सर्वकृत्यकृत् ।
आजन्मसुखितः संख्ये कः परोऽहमिवापतत् ॥ १३९ ॥
इत्युक्तवति वीरेऽस्मिन् मुक्ताः पुष्पस्रजः सुरैः ।
स्वं शोचन्तस्ततः पार्था छिद्रनिवासान् समासदन् ॥ १४० ॥
अथोत्तीर्णेषु तूणास्त्रपार्थेऽन्तर्हितवानरः ।
साश्वः सरश्मिः सर्वाङ्गं दग्धः कृष्णोज्झितो रथः ॥ १४१ ॥
द्रोणकर्णास्त्रलीढोऽयमेऽधुना मदवधीरितः ।
दग्धो रथोऽयमित्यूचे पार्थपृष्टोऽच्युतस्ततः ॥ १४२ ॥
अथामृत्युञ्जयो भूतिः सर्वं नस्त्वत्प्रसादतः ।
इति स्तुवन् हरिं तत्र निवासानग्रहीन्नृपः ॥ १४३ ॥
याम ओघवतीं नाम श्रेयसेऽद्य सरस्वतीम् ।
इत्युक्त्वा शिबिरात् कृष्णोऽकृषत् सात्यकिपाण्डवान् ॥ १४४ ॥
इहान्तरे महार्तिर्मामूचे भूप भवत्सुतः ।
कृतं मे मायया पश्य पाण्डवैर्मानखण्डनम् ॥ १४५ ॥
शतया संबलितश्चार्व्यो चार्वाको यदि जीवति ।
स परिव्राट् सुहृद्वैरणारं मम गमिष्यति ॥ १४६ ॥
धन्योऽहं दिवि यास्यामि भविष्यन्ति कष्टाः पुनः ।
तौ मातापितरौ वृद्धौ स्वसा मुग्धा च दुःशला ॥ १४७ ॥
इत्यादिवादिनानेन विषमस्थेन भूभुजा ।
राजन् वच्मि किमात्मानं भूरुहोऽपि प्ररोदिताः ॥ १४८ ॥
अथाकर्ण्य व्यथाकीर्णं कथकेभ्यः कुरूद्वहम् ।
तीर्थं ते द्रौणिहार्दिक्यकृपाः शयनमाययुः ॥ १४९ ॥
तत्र निर्लुठिताङ्गस्तैरिलापतिरलोक्यत ।
स्वर्गं गन्तुमिव चोर्वीं पृच्छन्नालिङ्गनैर्घनैः ॥ १५० ॥
अथावदत् कृपीसूनुरश्रुधाराललोचनः ।
पृथ्वीपतेर्नियमयन् विकीर्णान् मूर्धजान् मुहुः ॥ १५१ ॥
विश्वं विश्वंभरागोलं लोलयित्वा चमूभरैः ।
धिग् धिगद्यागतो राजन्नवस्थां कथमीदृशीम् ॥ १५२ ॥
संख्येज्यथा यथाकामं चामरैर्यः पुराद्य सः ।
त्वं मरुद्भिः स्फुरत्केशः स्थलानां चामरीकृतः ॥ १५३ ॥
स्पृष्टाङ्घ्रिणापि न प्राग् या दुर्भगेव महीपते ।
सुभगामिव सर्वाङ्गमालिङ्गस्यद्य तां महीम् ॥ १५४ ॥
तवार्कस्य च तेजोभिः स्पर्धया तपतोर्मिथः ।
यत् पुरा प्राविशन्मध्यं छत्रं क्व तदद्य ते ॥ १५५ ॥
अलङ्घ्यत भवान् वाहैर्यो मरुत्तरलैः पुरा ।
साद्य त्वां लङ्घते भूमिर्भूमिनाथ रजःकणैः ॥ १५६ ॥
कुम्भिकुम्भौ स्पृशन् कुम्भस्तनीभिर्वीजितो रुषा ।
यः पुरा स शिवाभिस्त्वं क्ष्मागतो वीक्ष्यसे मुदा ॥ १५७ ॥
वर्णगीतिविरक्तेन चक्रचीत्कृतिकौतुकात् ।
पुराग्राहि रथो येन स शृणोषि शिवारुतीः ॥ १५८ ॥
हतस्ततः स्फुरन् वीरैरुक्तो जीवेति यः पुरा ।
उच्यसे स म्रियस्वेति पलादैः स्वस्वभाषया १५९ ॥
दिने दानभरश्रान्तो रात्रौ च स्त्रीकुचेषु यः ।
स ते हस्तः क्षितौ वेल्लन् न विश्राम्यति संप्रति ॥१६०॥
क्षितौ क्षिपन् मुहुर्बाहू मूर्धानं विधुवन् मुहुः ।

१ सताङ्गा इति पा० ।

मृद्नन् सास्रं मुहुश्चक्षुर्जगादाथ कुरूद्वहः ॥ १६१ ॥
दिष्ट्या साम्राज्यमासाद्य स्वविनाशभियाभवम् ।
क्वापि प्रत्यर्थिनां नाहमर्थिनां च पराङ्मुखः ॥ १६२ ॥
दिष्ट्या कलावसुस्थानदानेन सततं मया ।
चक्रिरे परमप्रीताः सज्जना दुर्जनाश्च ते ॥ १६३ ॥
परं प्रति भयोल्लासं बिभ्रद्भिरनिशं मया ।
दिष्ट्या धीरैश्च वीरैश्च सदा गोष्ठीरसः कृतः ॥ १६४ ॥
शुभवत् सकलोत्साहा दिष्ट्यानुसमयं मया ।
भवार्णवमहानावो गावो विप्राश्च पूजिताः ॥ १६५ ॥
लब्धं भीमस्य सांमुख्यात् कुरुदेशव्यवस्थितम् ।
दिष्ट्याभूदुज्ज्वलं राज्यकरणं मरणं च मे ॥ १६६ ॥
दिष्ट्या पुण्यप्रदा ब्रह्मकेशवेशा इव त्रयः ।
महात्ययेऽपि जीवन्तो भवन्तो वीक्षिता मया ॥ १६७ ॥
तन्मास्म कुरुत वचोत्साहनिर्वाहशालिनः ।
शोकं लोकंपृणाशेषचरितस्य मृतस्य मे ॥ १६८ ॥
इत्युक्त्वा मौनिनि क्षोणिपतौ रोषारुणेक्षणः ।
पिंषन् करं करेणाह द्रौणिः साहसिकाग्रणीः ॥ १६९ ॥
दुःखाय क्ष्माप न तथा वधोऽप्यनुचितः पितुः ।
यथाद्य त्वदवस्थेयं मम मर्माणि कृन्तति ॥ १७० ॥
तदद्य पञ्च पाञ्चालान् पञ्च यज्ञसुतासुतान् ।
पाण्डवान् पञ्च पञ्चत्वं नयाम्यायान्ति चेत् पुरः ॥ १७१ ॥
तदादिश दिशः सर्वा नादयन् हर्षनिस्वनैः ।
यथा यामि पृथासूनुपृतनानाशमानसः ॥ १७२ ॥
इत्याकर्ण्य नृपः प्रीतः कृपमादिश्य तत्क्षणम् ।
सरस्वतीजलेनामुं सेनापत्येऽभ्यषेचयत् ॥ १७३ ॥
क्ष्मापसिंहमथालिङ्ग्य सिंहनादनदन्नभाः ।
दक्षिणाभिमुखं द्रौणिः सहार्दिक्यकृपोऽचलत् ॥ १७४ ॥
तरणौ वरुणावासं याते तदुदयैषिणः ।
शिबिरस्य समीपेऽमी गत्वा तस्थुर्विनद्य ते ॥ १७५ ॥
इति संजयवाचार्तौ गान्धारीं च नृपं च तौ ।
प्रतिबोधयितुं व्यासे समासेदुषि तत्क्षणम् ॥ १७६ ॥
युग्मम् ।
तयोः शापभयादेत्य पार्थप्रेरितो हरिः ।
गृहीत्वा नृपतेः पादावरुदद्रोदयन् सभाम् ॥ १७७ ॥
अथोत्थाय कृती कृत्वा शौचमूचे जनार्दनः ।
गान्धारीं धृतराष्ट्रं च वचोभिर्दुःखगद्गदैः ॥ १७८ ॥
प्रकृष्टे दैवदृष्टेऽस्मिन् हन्त जातेऽन्वयक्षये ।
अत्यक्तधर्मा युवयोः क्रोधपात्रं न पाण्डवाः ॥ १७९ ॥
युद्धोद्यते सुते तस्मिन् याचमाने जयाशिषम् ।
युवाभ्यामेव गदितं यतो धर्मस्ततो जयः ॥ १८० ॥
युष्मदाज्ञाकृतः पार्था द्रष्टव्याः पुत्रवत् ततः ।
मुहुर्ब्रुवाण एवेदमुदस्थात् सहसा हरिः ॥ १८१ ॥
निशायुद्धेऽस्तिधीर्द्रौणिस्तत् त्रातुं यामि पाण्डवान् ।
एवं ब्रुवन् सुतान् पाहीत्युक्तो राज्ञा हरिर्ययौ ॥ १८२ ॥
व्यासेऽप्याश्वासनावाचश्चञ्चयित्वा तिरोहिते ।
ज्ञातुं रजनिवृत्तान्तं संजयं प्राहिणोन्नृपः ॥ १८३ ॥
तानि स्मरन् कृपकृपीश्वरसिद्धसिन्धु-
सूनुप्रबोधवचनान्यवधीरितानि ।
दुर्योधनप्रधनपातविमुह्यमान-
बुद्धिर्धृतिं न धृतराष्ट्रनृपः प्रपेदे ॥ १८४ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
शोभाशालिनि बालभारतमहाकाव्ये तदेकाक्षर-
ध्यानाधानमहाफलेऽत्र नवमं शल्यस्य पर्वागमत् ॥ १८५ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के सगदायुद्धं शल्यपर्व ॥ ९ ॥

॥ अथ बालभारतकाव्यस्य ॥

॥ सौप्तिकपर्व ॥

अथ ते व्योममानेन वर्धमाने वटे स्थिताः ।
निशि द्रौण्यादयो निद्रामद्रौणी पुनरापतुः ॥ १ ॥
अनिद्राणः स्वयं द्रौणिर्द्रोणारिद्रोहचिन्तया ।
चिरं बभ्राम कान्तारचक्रे कौम्भिकचक्रवत् ॥ २ ॥
एष वृक्षशिखासुप्तं घूकेनैकेन केनचित् ।
निगृह्यमाणं साक्रन्दं काकलोकमलोकत ॥ ३ ॥
समिति द्विषतो जानन् दुर्जयानेकको बहून् ।
अथायं तद्वधोपायं तद्वदेव व्यचिन्तयत् ॥ ४ ॥
रयाज्जागरयित्वाथ सोऽयं हार्दिक्यमातुलौ ।

Digitized by Google

सौप्तिकेन द्विषः सुप्तान् हन्मीत्यवददुन्मदः ॥ ५ ॥
कृपोऽप्यूचे द्विषः सुप्तानसुप्तान् कवचायुधैः ।
निघ्नन् निर्विघ्न एव स्यान्नरकस्यातिथिर्नरः ॥ ६ ॥
तत् स्वधर्ममाश्रित्य कर्मसाक्षिणि साक्षिणि ।
अरातीन् पातयिष्यामो यास्यामो वैरपारताम् ॥ ७ ॥
श्रमविद्राविणीं निद्रामेव सेवामहेऽधुना ।
आपृच्छ्य धृतराष्ट्रादीन् यामः प्रातररातिषु ॥ ८ ॥
कृत्येषु हि स्फुरद्दृष्टाङ्कुरः कुशलवान् पुमान् ।
इह वैधर्म्यदृष्टान्तः वितिक्रान्तः सुयोधनः ॥ ९ ॥
अथ क्रोधप्रबोधातिव्यक्तरक्तविलोचनः ।
निश्वसन् विश्वरौद्रोक्तिरूचे शारद्वतीसुतः ॥ १० ॥
भीष्मभूरिश्रवस्तातकर्णभूपानधर्मतः ।
तेषां हतवतां हन्त हतो को धर्ममीक्षते ॥ ११ ॥
स्मरतः समरोत्सङ्गे तातघातमधर्मतः ।
मम श्रमस्य निद्रा च कुतोऽस्तु भवतोरिव ॥ १२ ॥
भुजाभाजां प्रतिज्ञैकपालनं धर्मपालनम् ।
तत् तद्वधे प्रतिज्ञाते किं प्रष्टव्या जरत्तराः ॥ १३ ॥
अधुनापि ततो हन्मि निशि तान् निशितायुधः ।
किं मे धर्मैरिति प्रोच्य प्रचचाल रथेन सः ॥ १४ ॥
इति प्रतिज्ञया यान्तं तं तावप्यनुजग्मतुः ।
जन्तोः कर्मपरीपाकमिव बुद्धिक्रियाचयौ ॥ १५ ॥
अथेत्य शिविरद्वारि महाभूतं प्रभूतदृक् ।
अहिस्रग्मिं महाकायं दोर्निकायस्थितायुधम् ॥ १६ ॥
दृङ्भिर्यद्दूरिभीमास्त्रं हरिवक्त्रोत्थितानलम् ।
हण्डोपवीतिनं तेऽपश्यंश्चकिताः कृत्तिचीवरम् ॥ १७ ॥
युग्मम् ।
रत्नदीप्ताङ्गिकेयूरे सूरेन्दुशततेजसि ।
द्रौणिस्तत्राफलीभूतशस्त्रपातो व्यचिन्तयत् ॥ १८ ॥
उल्लङ्घ्य कृपहार्दिक्यौ वृद्धौ स्वश्रद्धया स्फुरन् ।
एतामापदमाप्तोऽहं महेशानं श्रयेऽधुना ॥ १९ ॥
इति ध्यात्वा हुताशे स्वं जुहोमीति स्तुतो हरः ।
तेनाग्रे वीक्षितं चाग्निकुण्डं कल्याणवेदिकम् ॥ २० ॥
निःशङ्कः शंकरध्यानो निर्यद्धूमततौ ततः ।
कार्यसिद्धिपुरद्वारीवाग्निकुण्डेऽथ सोऽविशत् ॥ २१ ॥

स पुरारिं पुरोऽपश्यत् ततः किमपि नापरम् ।
अथ प्रीतिभरस्मेरमुखोऽभाषि स्मरद्विषा ॥ २२ ॥
धर्मसूनुधरित्रीशचमूं रक्षितुमक्षताम् ।
वत्स माया मयैवेयं चक्रे चक्र्युपरोधतः ॥ २३ ॥
सत्त्वेनानेन ते प्रीतश्चमूं संप्रत्यमूं जय ।
इत्युक्त्वास्मै हरो भेषं दत्त्वा खड्गं तिरोदधे ॥ २४ ॥
अतो निर्यन् निघात्यौ वामित्युक्त्वा भोजमातुलौ ।
सैन्यस्य द्वारि मुक्त्वान्तरद्वारा द्रौणिराविशत् ॥ २५ ॥
उत्थाप्याङ्घ्रिप्रहारेण सुखसुप्तं मखात्मजम् ।
उत्तिष्ठन्तं कचाग्रेषु क्रोधोऽग्रः सोऽग्रहीदमुम् ॥ २६ ॥
शस्त्राज्जहीति जल्पन्तं मदस्त्राणि गुरुद्रुहम् ।
न स्पृशन्तीत्युदीर्योक्तिः पशुवत् तं जघान सः ॥ २७ ॥
हत्वोत्तमौजसं तद्वदेव द्रौणिर्गतो रथम् ।
तद्ध्वानैर्धावतो वीरान् रुद्रास्त्रेण न्यपातयत् ॥ २८ ॥
युधामन्युं युधा मन्युं धृत्वा धावन्तमुद्धतम् ।
गदोन्मुचमशस्त्रेण रथोत्तीर्णः क्रुधावधीत् ॥ २९ ॥
बहूनपि मुहूर्तेन सुप्तानेवावधीद्भटान् ।
गन्धसिन्धुरगन्धर्ववृन्दानीव स खड्गभृत् ॥ ३० ॥
पञ्चापि द्रौपदीपुत्रान् धावतो दुर्धरायुधान् ।
स जघानासिना तौ च शिखण्डिजनमेजयौ ॥ ३१ ॥
द्रुपदस्याथ पुत्राणां पौत्राणां सुहृदामसौ ।
प्रभद्रकाणां मत्स्यानामपि चक्रे महाक्षयम् ॥ ३२ ॥
दिग्द्वये ज्वालयित्वाग्निं तौ तु द्वारि स्वयं स्थितौ ।
अघ्नतः कृपहार्दिक्यौ भयतो निर्यतो भटान् ॥ ३३ ॥
वह्निना तेन ताभ्यां च दह्यमानाश्चमूचराः ।
को हन्ति किमिदं हन्तेत्याक्रन्दं चक्रुरुच्चकैः ॥ ३४ ॥
रक्तस्रगलेपनां रक्तवाससं रक्तदृङ्मुखीम् ।
कालीं पाशकरां नाशकरीं पाशेन देहिनाम् ॥ ३५ ॥
कालरात्रिमलोकन्त हन्यमानास्तदा भटाः ।
द्रोणाङ्गजस्य कल्पान्तरुद्रस्येव पुरश्चरीम् ॥ ३६ ॥
युग्मम् ।
आ युद्धादिदिनात् कृत्यायुक्तं घ्नन्तं कृपीसुतम् ।
वीराः स्वप्नेषु तेऽपश्यन् स्वप्नश्च फलितं तदा ॥ ३७ ॥
प्राश्निया हरिपार्थानां स्वप्नेऽस्वप्नेऽन्वहं हताः ।

Digitized by Google

ते वीरा द्रौणिकृत्याभ्यां प्रत्यक्षं तु तदुज्झिताः ॥ ३८ ॥
कालरात्रिपरीवारपिशाचपलभुक्चमूः ।
देहभाजस्तदास्वादञ्जीवतोऽपि मृतानपि ॥ ३९ ॥
इति निःशेष्य तां सेनां शेषे यामद्वये निशः ।
ते त्रयोऽप्यमिलन् प्रातः प्रीताः प्रोक्तमिथःकथाः ॥४०॥
गत्वा च कौरवाधीशं निःसंज्ञं रक्तमुद्गुखम् ।
रुरुदुः परितः स्थित्वा शुशुचुश्चास्य तां दशाम् ॥४१॥
ऊचुश्च नृप यद्यस्ति संज्ञा शृणु ततः प्रियम् ।
पाण्डवाच्युतशैनेयशेषाः सर्वे हता द्विषः ॥ ४२ ॥
तान् प्रियोक्त्या नृपोऽप्याप्तसंज्ञः प्राह वहन्मुदम् ।
न भीष्मद्रोणकर्णैस्तद्यद्युष्माभिः कृतं मम ॥ ४३ ॥
प्राणान् प्रीतोऽधुना मुञ्चे स्वर्गे सङ्गोऽस्तु नः पुनः ।
इत्युक्त्वाभूद्व्यसुर्भूपस्तमथालिङ्ग्य ते ययुः ॥ ४४ ॥
अथ पार्थभिया भोजः स्वदेशं हास्तिनं कृपः ।
व्यासाश्रमं कृपीसूनुर्गन्तुमैच्छद्दिनोदये ॥ ४५ ॥
सौप्तिकस्य कथायुक्तिं प्राणमुक्तिं च भूपतेः ।
आख्यातुं धृतराष्ट्राय संजयोऽप्यचलद् द्रुतम् ॥ ४६ ॥
इत्येवं कृतवर्मास्त्रान्निःसृतो निशि दैवतः ।
आख्यन्मखभवं यन्ता सौप्तिकं कर्म धार्मये ॥ ४७ ॥
तच्छ्रुत्वा मूर्च्छितः कृष्णानुजभोजैर्धृतः पतन् ।
संज्ञां प्राप्यावदद्भूपो निश्वसन्नश्रुमिश्रदृक् ॥ ४८ ॥
अस्माकं धिग् जयोऽप्येष जज्ञे स्वक्षयहेतुकः ।
शोच्यो लोकेषु वैसर्यामिव पुत्रभवोत्सवः ॥ ४९ ॥
अथारिदलनानन्ददुग्धाब्धौ स्नास्यति ध्रुवम् ।
धिग्भ्रातृपुत्रशोकातिपङ्किले द्रुपदाङ्गजा ॥ ५० ॥
इत्युक्त्वा नकुलं कृष्णानयनाय निदिश्य सः ।
राजा स्वयं मृताशेषयोधमायोधनं ययौ ॥ ५१ ॥
वीक्ष्य वीरान् हतान् राजा मूर्च्छन्नाश्वासितोऽनुजैः ।
कृष्णां प्राप्तामुपप्लव्याद्वीक्ष्य भेजेऽधिकां शुचम् ॥ ५२ ॥
तं त्रयं वीक्ष्य मूर्च्छन्ती भीमेनाश्वासिता तदा ।
कृष्णा स्माह नृपं धर्मसुतो भुङ्क्ष्व भुवं मुदा ॥ ५३ ॥
दर्शयिष्यसि चेद् द्रौणिं हत्वा मे तच्छिरोमणिम् ।
तदा भुञ्जेऽहमित्युक्त्वा सेयं प्राय उपाविशत् ॥ ५४ ॥
बोध्यमानाथ भूपेन सा क्रुधा स्माह मारुतिम् ।
मानिन् क्षत्रियकोटीर दुःखात् त्रायस्व मामिति ॥ ५५ ॥
इत्युक्तः कान्तया भीमस्तूर्णं नकुलसारथिः ।
हन्तुमुद्दामधामानमश्वत्थामानमन्वगात् ॥ ५६ ॥
अथोचे पार्थिवं विष्णुः फाल्गुनाय गुरुः पुरा ।
ददौ ब्रह्मशिरोऽस्त्रं तत् क्रूराय द्रौणये तु न ॥ ५७ ॥
भवत्सु वनयातेषु द्रौणिना क्रूरचेतसा ।
पुरीं द्वारवतीमेत्य ततोऽहं चक्रमर्थितः ॥ ५८ ॥
गृहाणेति मयोक्तोऽथ नायं वामेन पाणिना ।
न दक्षिणेन न द्वाभ्यां चक्रोत्क्षेपे क्षमोऽभवत् ॥ ५९ ॥
अथोचे मामयं चक्रं ग्रहीतुं स्यां यदि क्षमः ।
ततस्त्वामेव युध्येयं बुद्धिरीदृङ्ममाभवत् ॥ ६० ॥
यच्छ ब्रह्मशिरोऽस्त्रं तच्चक्रोत्क्षेपाक्षमाय मे ।
इदमुक्तवते तस्मै तदस्त्रं प्रददे मया ॥ ६१ ॥
स्वभावभीरुः संरम्भी क्रूरात्मास्त्रेण तेन सः ।
जयोज्ज्येनापि मानव्ये द्रौणिर्भीमं हनिष्यति ॥ ६२ ॥
तदितो रक्षणीयोऽद्य भीम इत्युक्तिमान् हरिः ।
भूपार्जुनौ समारोप्य रथे सामीरिमन्वगात् ॥ ६३ ॥
व्यासाश्रमं गताः सर्वे ततो द्रौणिमलोकयन् ।
घृताक्तवाससं तीराभ्यासस्थं व्याससंनिधौ ॥ ६४ ॥
तं निरीक्ष्य किरीट्यग्रजन्माधावत् क्रुधान्वितः ।
रे क्रूर ब्रह्मबन्धो रे तिष्ठ तिष्ठेति विब्रुवन् ॥ ६५ ॥
द्रौणिर्भयभ्रमद्द्रौणिर्वीक्ष्य तं युद्धदीक्षितम् ।
निरस्त्रो नीरथोऽगृह्णादिषीकां वामपाणिना ॥ ६६ ॥
तत्र ब्रह्मशिरोऽस्त्रस्य मन्त्रन्यासं विधाय सः ।
एनामपाण्डवायेदमुक्तवानाशु मुक्तवान् ॥ ६७ ॥
अथाभ्यधान्मधुध्वंसी बिभ्यद् बीभत्सुमुत्सुकः ।
पार्थ पार्थ यतस्वाशु मा स्याद्विश्वमपाण्डवम् ॥ ६८ ॥
रथादथावतीर्यैन्द्रिः कृतदेवगुरुस्मृतिः ।
स्वस्त्यस्तु गुरुपुत्राय सहैभिः पाण्डुसूनुभिः ॥ ६९ ॥
उदयमिदमेवास्त्रमस्त्रेणानेन शाम्यतु ।
इत्युक्त्वातिशुचिर्भूत्वा परमास्त्रमयोजयत् ॥ ७० ॥
युग्मम् ।
ज्वालालिजटिले तत्र ज्वलितेऽस्त्रद्वये दिवि ।
तदनुङ्गस्फुलिङ्गान्तः पतङ्गोऽपि न लक्षितः ॥ ७१ ॥

Digitized by Google

द्वयेऽपि द्रागुदेव स्फुरन्तौ: किं तेऽद्य कोटिश: ।
तयो: स्फुलिङ्गानालोक्य रुद्राद्यैरित्यचिन्त्यत ॥ ७२ ॥
रौद्रौर्वाग्निसमे शस्त्रे ते विलोक्य त्रिलोक्यपि ।
कल्पान्तशङ्कयेवाप कम्पसंपातमद्भुतम् ॥ ७३ ॥
वीक्ष्यात्मसमिषमथाग्निं दूरत: क्रूरतां गतम् ।
क्रूरतां वायवोऽप्यापु: कर्करीकृतपर्वता: ॥ ७४ ॥
और्वाग्निमिव खे वीक्ष्य तदस्त्रद्वयजं मह: ।
उच्चकैरुच्चचालाब्धि: क्रोडीकर्तुमिवाशु तत् ॥ ७५ ॥
क्षुभ्यदब्धिस्त्रुटच्छैल: स्फुटद्ब्रह्माण्डखण्डभू: ।
ब्रह्मास्त्रप्रसरे क्रूर: कोऽपि कोलाहलोऽभवत् ॥ ७६ ॥
तदोचतुर्मुनयो धर्मज्ञौ युवां द्रौणिपाण्डवौ ।
स्वं स्वमस्त्रममानुष्यवेध्यं संहरतं द्रुतम् ॥ ७७ ॥
कलिप्रियोऽपि कल्पान्तशङ्की व्यासानुगो मुनि: ।
तदा तयो: पपातान्तर्निषेद्धुं युद्धमस्त्रयो: ॥ ७८ ॥
तावन्तर्वीक्ष्य पार्थोऽस्त्रं संजहार महारयात् ।
मैतयोर्भूत् तपोलेशक्लेशोऽस्य स्तम्भनादिति ॥ ७९ ॥
विचिन्त्यैव तपस्तेजस्तीव्रताभिर्महाव्रतौ ।
तदस्त्रं तु कृपीसूनो: स्तम्भयामासतुर्द्रुतम् ॥ ८० ॥
प्रतिव्रतियति स्माह साहसाब्धिस्ततोऽर्जुन: ।
सृष्टं मयास्त्रमस्त्रस्य ध्वंसाय न कृपीभुव: ॥ ८१ ॥
मयास्त्रेऽस्मिन् हृतेऽस्त्रेण सैष न: संहरिष्यति ।
तदस्मासु च लोकेषु यद्धितं तद्विधीयताम् ॥ ८२ ॥
अथोचतु: सुतं कृप्यास्तौ मुनी शस्तया गिरा ।
द्विजोत्तम किमारब्धं त्वया लोकद्वयाहितम् ॥ ८३ ॥
पार्थेष्वमानुषवेध्यं क्षिप्तं ब्रह्मशिरस्त्वया ।
तस्यैव प्रतिघाताय परमास्त्रं नरोऽसृजत् ॥ ८४ ॥
स्याच्चेद्ब्रह्मशिरोऽस्त्रस्य परमास्त्रेण च क्षय: ।
कथं त्रुटिष्यसि क्रूरकर्मकृद्वृकोदरात् ॥ ८५ ॥
अस्त्रं संहर संहर्षसंरम्भाभ्यां समन्तत: ।
यथास्मद्दर्शनादेव हृतमस्त्रं किरीटिना ॥ ८६ ॥
पार्थेभ्यश्च शिरोरत्नं स्वं जीवितमिवार्पय ।
तत्क्रूरकार्यकर्तापि जीवन्नेभिर्विमुच्यसे ॥ ८७ ॥
द्रोणात्कृपीभूर्जगादाथ तौ मुनी विनयानत: ।
अयुत्थापाति भीमेन भूष इत्यस्त्रमीरितम् ॥ ८८ ॥

नाधुना साधुनाथौ मे विरोधविधुरं मन: ।
नित्यानामपि वैराणां युष्मदीक्षणमौषधम् ॥ ८९ ॥
किंतु शूरो गुरौ भक्त: सत्यब्रह्मव्रतोऽर्जुन: ।
नाहं तद्वदतो नेदमस्त्रं संहर्तुमीश्वर: ॥ ९० ॥
योऽस्त्रमेतदसद्ब्रह्मचर्य: सृष्ट्वैव संहरेत् ।
एतेन सानुबन्धस्य मूर्धा तस्याशु लूयते ॥ ९१ ॥
अमोघमस्त्रमीदृक्षमीदृक्क्षयशान्तये ।
अभिमन्युप्रियायास्तद्गर्भभ्रूणे पतत्वद: ॥ ९२ ॥
रक्षोदानवदिव्यास्त्रव्याधिविघ्नादिजं भयम् ।
दलयत्याशु तेनायं स्यान्न देय: शिरोमणि: ॥ ९३ ॥
यच्छामि पितृशिष्येभ्यस्तथाप्येनं भवद्गिरा ।
अयं प्रलयसंरम्भ: समन्ताच्छाम्यतादिति ॥ ९४ ॥
युग्मम् ।
एवमेव विधेहीति मुनिभ्यां गदितस्तत: ।
तदस्त्रमुत्तरागर्भे प्रत्यमुञ्चत् कृपीसुत: ॥ ९५ ॥
अथावदद्गदापाणिर्द्रौणिं भ्रूणो न दह्यताम् ।
क्षीणस्य कुरुवंशस्य कुलतन्तुर्भवत्वयम् ॥ ९६ ॥
व्रती विप्र: पुरा प्रोचे वैराटीं प्रति यत् तव ।
परिक्षीणेषु कुरुषु परिक्षिद् भविता सुत: ॥ ९७ ॥
तद् द्विजेश द्विजस्यास्य तद्वचो मान्यथा कृथा: ।
त्वत्पितृप्रियशिष्यस्य कुलमेतच्च वर्धताम् ॥ ९८ ॥
द्रौणिरूचेऽथ मा पक्षपाताद्वद गदाधर ।
अमोघेन मदस्त्रेण सैष भ्रूणोऽस्तु भस्मसात् ॥ ९९ ॥
कृष्णोऽप्यूचे विमुञ्चास्त्रममोघं भ्रूणभित्तये ।
अहं तु तपसा स्वेन जीवयिष्यामि तं सुतम् ॥ १०० ॥
भवान् पुनरिति क्रूरकर्मनिर्मितिपातकी ।
त्रीणि वर्षसहस्राणि चरिष्यत्यजने वने ॥ १०१ ॥
असहायो मलक्लिन्न: पूतिशोणितगन्धभृत् ।
न प्राप्स्यसि क्वचित् कांचित् कस्यचित् संविदं पुन: ॥ १०२ ॥
ऊचे सत्यवतीसूनु: सत्यमस्तु हरेर्वच: ।
द्रौणे यतस्त्वया क्रूरं कर्माशूरोचितं कृतम् ॥ १०३ ॥
इति शप्तो मणिं द्रौणिर्दत्त्वा तेभ्यो वनं ययौ ।
तेऽप्यगुर्द्रौपदीं व्यासनारदाभ्यां युता द्रुतम् ॥ १०४ ॥
अथ रत्नं नभोरत्नसपत्नं द्योतयन् पुन: ।

Digitized by Google

सामीरिराज्ञया राज्ञः कृष्णामभ्यर्थित स्मितः ॥ १०५ ॥
लघगत्या जितोऽस्त्रमस्त्याजितोऽस्त्रशिरोमणिम् ।
गुरोरङ्गज इत्यङ्ग न स्वर्गं गमितोऽद्य सः ॥ १०६ ॥
अथ मुहुरमुदयन्तो द्रौपदी स्माह मान्यो
गुरुरिव गुरुसूनुर्युक्तमत्याजि जीवन् ।
मणिममुममराणां लोभकं शोभितार्थं
निजशिरसि रसायाश्चिननाथो निधत्ताम् ॥ १०७ ॥
कुनयकुरुकुटुम्बच्छेदनात् खेदनाशः
समजनि मम यत्ते द्रौणिमर्षात् सुहर्षः ।
अहमिति हरिमेच्यात् त्वत्प्रियत्वात् कृतार्था
जगति सुगतिभाजो नैव शोचामि बन्धून् ॥ १०८ ॥
ते पुत्रास्तव बन्धवस्तव च ये न द्रौणिना जघ्निरे
तत्कृष्टेन हता हरेण महतामेषां न शोच्यं मह: ।
इत्युक्तेऽसुरवैरिणा सुकृतभूपृष्ठेन हृष्टिं परां
भेजेऽसौ निजवर्गवीरचरितस्नानेन[1] यज्ञाङ्गजा ॥ १०९ ॥
भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
वाणीवेश्मनि बालभारतमहाकाव्ये तदन्तर्गु-
न्मेषप्रेङ्खगभासि पर्व दशमं शान्तिं ययौ सौप्तिकम् ॥ ११० ॥
अनयोरेकसर्गेण शल्यसौप्तिकपर्वणोः ।
एकेन कलितान्यासन् शतानि चोण्यनुष्टुभाम् ॥ १११ ॥

इति श्रीजिनदत्तसूरिशिष्यपण्डितश्रीमदमरचन्द्रविरचिते बालभारतनाम्नि महाकाव्ये वीराङ्के सैषीकसौप्तिकपर्वकीर्तनो नामाष्टाविंशत्तमः सर्गः ॥ १० ॥ :: :: ॥

॥ अथ खण्डप्रशस्तौ

रामावतारवर्णनम् ॥

(१०१) देव त्वं मलयाचलोऽसि भवतः श्रीखण्डशाखी भुज-
स्तस्मिन्कालभुजङ्गमो निवसति स्फूर्जत्कृपाणच्छलात् ।
एष स्वाङ्गमनर्गलं रिपुतरुस्कन्धेषु संघट्टयन्
दीर्घव्योमविसारि निर्मलयशो निर्मोकमुन्मुञ्चति ॥

हे देव त्वं मलयाचलो मलयाद्रिरसि वर्तसे, तत्र भवतस्तव भुजो बाहुः श्रीखण्डशाखी चन्दनवृक्षोऽस्ति, तस्मिन् त्वद्भुजचन्दनतरौ स्फूर्जत्कृपाणच्छलात् स्फूर्जतः खड्गस्य व्याजेन कालभुजङ्गमः कालसर्पो निवसति, तत्र स एषः कालभुजङ्गमः स्वाङ्गं स्वशरीरं रिपव एव तरवस्तेषां स्कन्धेषु प्रकाण्डेषु रिपुमस्तकेष्विति यावत्, अनर्गलं यथेच्छं यथा स्यात्तथा संघट्टयन् संश्लेषयन् दीर्घव्योमविसारि महत्याकाशे विस्तरणशीलं निर्मलं यश एव निर्मोकः कञ्चुकस्तमुन्मुञ्चति प्राबल्येन त्यजति, यथा कश्चन सर्पस्तरुस्कन्धे संघट्टनं कुर्वन् स्वं कञ्चुकं परित्यजति तथा त्वत्कृपाणाहिः शत्रुतरुस्कन्धेषु संश्लिष्य यशःकञ्चुकं मुञ्चतीति भावः ॥ १०१ ॥

(१०२) आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालखण्डमहसो लीलोपधानं श्रियः ।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति वैरिराजवनितावैधव्यदस्ते भुजः ॥

हे राजन् ते तव भुजो बाहू राजति शोभते, किंविशिष्टो भुजः, जय एव कुञ्जरस्तस्यालानं बन्धनस्तम्भः, तथा विपद एव वारिधिः समुद्रस्तस्य दृषदां पाषाणानां सेतुः पारगमनमार्गः, दृषदामित्यनेनाविनश्वरत्वमस्य सेतोः सूचितम्, तथा करवालः खड्गः स एव चण्डमहः उग्रतेजाः सूर्यस्तस्य पूर्वाद्रिरुदयाचलः, तथा श्रियो लक्ष्म्याः लीलार्थमुपधानमुच्छीर्षकं, यतः सा जयश्रीस्त्वद्भुज एव सर्वदास्त इति भावः, तथा संग्राम एवामृतसागरः क्षीराब्धिस्तस्य या प्रमथनक्रीडा विलोडनलीला तस्या विधौ विधाने मन्दरो मेरुगिरिः, यथा क्षीराब्धिमन्थने मन्दराचलस्तथा संग्रामामृतसागरविलोडने त्वद्भुजः यथा च तत्रामृतमुत्पन्नं तथात्र यश इति भावः, तथा वैरिराजवनितानां शत्रुनृपस्त्रीणां वैधव्यं ददातीति सः, यतस्त्वद्भुजेन सर्वेऽपि वैरिनृपा हता निर्मलं यशश्च संपादितमिति भावः ॥ १०२ ॥

(१०३) खेदाम्भःकणमण्डलानि खुरलीखेलोद्भवान्यन्वहं
त्वद्बाह्वो रसयन्महाबल इति ख्यातिं गतो मारुतः ।
तं चास्वाद्य मुहुः सहस्रफणताशाली बलीयानहि-
र्धत्ते कोमलकोमलैरपि फणैः श्रीरामचन्द्र स्थिराम् ॥

हे श्रीरामचन्द्र त्वद्बाह्वोस्त्वद्भुजयोः खुरली श्रमस्तत्संबन्धिनी या खेला तस्या उद्भवन्ति यानि स्वेदस्य प्रस्वेदस्याम्भःकणानां जलबिन्दूनां मण्डलानि समूहान्यन्वहं निरन्तरं रसयन् आस्वदयन्नहर्दिव मारुतो वायुर्महाबल इति ख्यातिं प्रसिद्धिं गतः प्राप्तः, यदा त्वया वैरिणो हतास्तदा त्वद्भुजयोः परिश्रमजः स्वेद उत्पन्नस्तच्छोषणाद्वायुर्महाबलोऽभूदिति भावः, तं च महाबलं वायुं मुहुर्वारंवारमास्वाद्य सहस्रसंख्या-

---

1—वरताज्ञानेन इति पा० ।

ऽफणतया शालते शोभते ऽसौ तथाविधो हि शेषराजो बलीयान् भूत्वा कोमलेभ्योऽपि कोमलैरतिकोमलैरिति यावत्, एवं भूतैः फणैः स्थिरां पृथ्वीं धत्ते धारयति, सर्पाणां महाबलवायुभक्षणाद्देव बलिष्ठत्वमस्तीति ध्येयम् ॥ १०३ ॥

(१०४) देव त्वद्गजवाजिपत्त्रपटलप्रोद्भूतधूलीभरै-
राकाशं वसुधायते खरकरः सोमायते निष्प्रभः ।
किंचाधोभरकुञ्चितः फणवतां नाथः स कूर्मायते
कूर्मो भोगपतीयते किमपरं रात्रीयते वासरः ॥

हे देव त्वदीयानां गजानां वाजिनां पत्त्राणां वाहनानां पटलेन प्रोद्भूताः समुद्भूता ये धूलीभरास्तैराकाशं खं वसुधायते वसुधेवाचरति, रामचन्द्रवाहिन्येतावतीविपुलाऽऽसीद्यत्तत्संमर्दादाकाशमपि रजोमयं बभूवेति भावः, अत एव निष्प्रभो निस्तेजः खरकरश्चण्डांशुः सोमायते सोमइवाचरति, तथा किं च फणवतां सर्पाणां नाथः स्वामी शेषराजः अधोभरकुञ्चितः सन् भारेणाधः संकोचं प्राप्तः सन् स कूर्मायते कूर्म इवाचरति यथा कूर्मः संकोचयति स्वं शरीरं तथा शेषोऽपि त्वद्वाहिनी भारेण संकुचितशरीरोऽभूदिति, तथा कूर्मो भोगिपती, यते भोगिपतिः शेषः स इवाचरति संकुचितशरीरोपि प्रलम्बकायोऽभूदिति, तथाऽपरमपि किं चिद्भूदित्याह, वासरो दिनं रात्रीयते रात्रिरिवाचरति यतस्तादृक् त्वद्वाहिन्या धूलीपटलं समुच्छालितं येन दिनमप्यन्धकारवशाद्रात्रिरिवाभवदिति भावः ॥ १०४ ॥

(१०५) लावण्योकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः, किमेष विहितः पूषा, किमुत्पादितं
चिन्तारत्नमहोमुधेव किममी सृष्टाः कुलक्ष्माभृतः ॥

हे देव त्वयि रामे वेधसा ब्रह्मणा लावण्यौकसि लावण्यं सौन्दर्यं तस्यौको गृहं यः तस्मिन्निष्पादिते उत्पादिते सति पुनरिन्दुः किमर्थं घटितो निर्मितः यतस्त्वमेव विमलसकललावण्यगृहमतस्त्वत्पुरः सकलङ्कस्य चन्द्रस्य लावण्यमयत्वेन घटनं व्यर्थमेवेति, तथा त्वयि प्रतापविशिष्टो गरिमा यस्मिंस्तथाभूते उत्पादिते सत्येव पूषा किंविहितः यतः पूषा त्वत्प्रतापगरिमालवांशमपि नाप्नोतीति, तथा त्यागिनां दातॄणामग्रेसरे प्रधाने त्वयि निष्पादिते सति चिन्तारत्नं किमुत्पादितं यतश्चिन्तारत्नस्यायं प्रभावो यद्याचकयाचितार्थानां सद्य एव पूरणं भवति तच्च त्वत्त एव भवतीति अतश्चिन्तामण्युत्पत्तिर्व्यर्थेति, अहो इत्याश्चर्ये, तथा त्वयि अवनेर्भारस्य क्षमौ वहनसमर्थौ भुजौ यस्य स तथाविधे उत्पादिते सति अमी कुलक्ष्माभृतः कुलाचलाः पर्वता मुधेव वृथैव स्रष्टा निर्मिताः यत पृथ्वीभारस्त्वया भुजाभ्यामेव धारितोऽतस्तदुत्पत्तिर्व्यर्थेति भावः ॥ १०५ ॥

(१०६) श्रीरामे मृगयां गतेऽपि धनुषा बाणे समारोपिते-
प्याकर्णान्तगतेऽथ मुष्टिगलितेऽप्येणाङ्किघ्रलग्नेऽपि च ।
न त्रस्तं न पलायितं न चकितं नोत्कम्पितं न द्रुतं
मृग्या मद्वशगं करोति दयितं कामोऽयमित्याशया ॥

श्रीरामे मृगयार्थमाखेटार्थं वनं गते सति मृग्या हरिण्या न त्रस्तं त्रासो न कृतः अथ धनुषि बाणे समारोपिते संन्यस्ते सति वा तया भीत्या न पलायितं, तत आकर्णान्तं बाणे प्राप्ते सत्यपि न चकितं विस्मितं, अथ च तस्मिन्मुष्टिगलिते हस्तान्मुक्तेऽपि नोत्कम्पितं न कम्पः प्राप्तः, अथापि च एणचरणलग्ने तया न द्रुतं स्थानान्तरगमनं न कृतं, यतो रामे रूपलावण्यातिशयाद् भ्रान्त्या कामोऽयं मम दयितं भर्तारं रत्यर्थे मद्वशगं करोतीत्याशया, अयं कामो मया सह रन्तुं स्वबाणप्रक्षेपेण दयितं मामभिमुखीकरोतीति सा जानाति स्म व्याधशङ्केव तस्या नोदेति यतो रामदर्शनादेव सा तृषस्यन्ती संपन्नेति भावः । एतेन रामस्यातीव रूपलावण्यं प्रदर्शितम् ॥ १०६ ॥

(१०७) मनोभूर्मुग्धासु क्षिपति यदि बाणावलिमसौ
कथं ताभिःक्षिप्तास्त्वयि नयनविक्षेपविशिखाः ।
अथ ज्ञातं ब्रूमः शृणु सुभग शृङ्गारनलिनी-
वनक्रीडाहंसं स्मरमिव विदुस्त्वां मृगदृशः ॥

हे श्रीराम असौ मनोभूः कामो मुग्धासु स्त्रीषु यदि बाणावलिं मोहनादिशरश्रेणिं क्षिपति तर्हि ताभिः स्त्रीभिस्त्वयि रामे नयनानां ये विक्षेपास्त एव विशिखा बाणाः कथं क्षिप्ता मुक्ताः यतो लोके हन्ता हन्यते नान्यः परमत्र विपर्यासो दृश्यते यत् स्वहन्तारमपि कामं त्यक्त्वाऽन्य एव त्वं स्वचक्षुःकटाक्षबाणैस्ताभिर्हन्यसे इति कथमन्यायाचरणं ताभिः कृतमिति विस्मितस्तदौचित्यं निरूपयति, हे सुभग अथ ज्ञातमधुनावगतमस्माभिस्तद्ब्रूमस्त्वं शृणु, यन्मृगदृशः स्त्रियस्त्वां रामं स्मरमिव काममिव विदुरवगच्छन्ति त्वां काममेव जानन्तीति भावः, अतोऽनङ्गं काममनुपलभ्य त्वामेव साङ्गं काममुपलभ्य त्वयि स्वहन्तरि ताः स्वनेत्रबाणान्विचिक्षिपुः अतस्ताभिरन्यायो न कृतः; किं भूतं त्वां, शृङ्गार एव नलिनीवनं पद्मिनीवनं तस्मिन् क्रीडाहंसः केलिहंस इव यस्त्वामिति ॥ १०७ ॥

(१०८) नागविशेषे शेषे
शेषेऽशेषेपि संहृते जगति ।

हंस्यसिकालं कालं
का लङ्कालङ्घने स्तुतिर्भवतः ॥

हे राम त्वया अशेषे समस्तेऽपि जगति संहृते संहृतवति त्वं नागविशेषे शेषनागे शेषे स्वपिषि, तथा असिवत् खड्गवत् कालं कृष्णं अथवा असिवत् कलनाकर्तारं कालं मृत्यु हंसि मारयसि यतः समृत्यु जगदुपसंहृत्य दुग्धाब्धौ शेषे शेषे इत्यादीनि बहूनि महदाश्चर्यजनकानि तव कृत्यानि दृष्टान्यतो भवतस्तव लङ्कायां लङ्घने पारगमने कास्तुतिः स्तवनं न किमपीति भावः ॥ १८ ॥

(१०९) योऽद्धा योद्धावधीत्तान् सपदि पलभुजः संपराये पराये
येनायेनाश्रितानां स्तुतिरवनमितेशानचापेन चापे ।
लङ्कालंकारहर्ता ककुभिककुभि यः कान्तया सीतयासी-
दूनो दूनोऽथहृष्टः सविभुरवतु वः स्वः सभाऽर्यः सभार्यः ॥

यः श्रीरामः सपदि शीघ्रं तान्पलभुजो राक्षमानवधीज्जघान, तान्कानित्याह, ये संपराये संग्रामे परा दर्पिष्ठाः, किंभूतो रामः, योऽद्धा निश्चितं योद्धा युद्धकर्ता, तथा अवनमितं नम्रीकृतमीशानस्य शंभोश्चापं धनुर्येन तथाविधेन येन रामेणायेन स्वभाग्येन "अयं भाग्यमिति दुर्गः" आश्रितानां जनानां स्तुतिः प्रशंसावचश्चापे प्राप्तं, तथा लङ्कानगर्या अलंकारो भूषणं यो रावणस्तस्य हर्ता विघातकः, तथा यः सीतया कान्तयोनो विरहितः सन्ककुभिककुभि दिशिदिशि दूनो दुःस्थितमना भ्रमन्नासीत्, अथ च यदा सभार्यः सीतया सहितो जातस्तदा हृष्टः, स स्वःसभा देवसभा तस्या अर्यः स्वामी विभुः प्रभुर्वो युष्मानवतु, रक्षत्वित्यर्थः ॥१०९॥

(११०) यो रामो न जघान वक्षसिरणे तं रावणं सायकै-
र्हृद्यस्य प्रतिवासरं वसति सा तस्या ह्यहं राघवः ।
मय्यास्ते भुवनावली परिवृता द्वीपैः समं सप्तभिः
स श्रेयो विदधातु नस्त्रिभुवनत्राणैकचिन्तापरः ॥

यः श्रीरामस्तं सीतापहारकं रावणं सायकैर्बाणैर्वक्षसि न जघान, हि यतोऽस्य रावणस्य हृदि हृदये प्रतिवासरं सततं सा सीता वसति सीताध्यानपरत्वाद्रावणः सीताभक्त इति सूचितम्, तस्या हृदये चाहं राघवो वसामि साचमद्भक्तेति भावः, मयि च सप्तभिर्द्वीपैः समं परिवृता भुवनावली जगतः श्रेणिर्वसति सर्वं जगद्रामाधारमेव वर्तते इति भावः, यद्यहं वक्षसि रावणं हनिष्यामि तर्हि तद्वक्षसो विदारणे सीताविनाशो भवेत्तद्विनाशे तद्धृदयस्थत्वान्ममविनाशो भवेन्मन्नाशे च मदेकशरणस्य जगत्त्रयस्य नूनं विनाशो भवेत्तर्हि कथं कर्तव्यमिति त्रिभुवनत्राणविषयिण्यकैव चिन्ता पराश्रेष्ठा यस्य स रावणशिरांस्येवाच्छिनत्स रामो नोऽस्माकं श्रेयः कल्याणं विदधातु करोत्वित्यर्थः ॥ ११० ॥

(१११) संग्रामे रिपुभूभुजां मुखरुचिर्जीवश्च देवाङ्गना-
चक्षुः प्रोल्लसदस्रमांसनिवहैस्तन्मेदिनीमण्डलम् ।
त्वच्चापोद्गतबाणसंहतिरभूच्छ्रीराम भूमीपते
जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥

हे श्रीराम भूमीपते चक्रवर्तिन् त्वया संग्रामे प्रारब्धे सति रिपुभूभुजां वैरिराजानां मुखस्य रुचिः कान्तिर्जम्बूवत् तद्वच्छयामाऽभूत् तथा तेषां जीवः प्राणो जलबिन्दुवत्क्षणनश्वरोऽभूत्, तथादेवाङ्गनानामप्सरसां चक्षुर्जलजवत्पङ्कजवदभूत्, यथा जलजं कमलं विकस्वरं सूर्योदये जायते तथा संग्रामारम्भे सुरप्रतिपन्थिदैत्यविनाशसंभावनया संग्रामं पश्यन्तीनामप्सरसां नेत्रजातमप्यविकस्वरं वर्तते, तथा तन्मेदिनीमण्डलं संग्रामभूमिः प्रोल्लसन्त्युच्छलन्ति यानि रामाहतवैरिशरीरेभ्योऽस्राणि रुधिराणि मांसानि च तेषां निवहैर्जम्बालवत्कर्दमवदभूत्, तथा त्वदीयाच्चापादुद्गतानां बाणानां संहतिः संघातो जालवदभूत् यथा जालगता मत्स्या बहिर्निष्क्रान्तुं न समर्थास्तथा त्वदीयबाणान्मुक्तः कोपि वैरी नावशिष्ट इति भावः ॥ १११ ॥

(११२) राज्यं येनपटान्तलग्नतृणकंत्यक्तं गुरोराज्ञया
पाथेयं परिगृह्यकार्मुकवरं घोरं वनं प्रस्थितः ।
स्वाधीनः शशिमौलिचापविषये प्राप्तो न वै विक्रियां
पायाद्वः स बिभीषणाग्रजनिहा रामाभिधानोहरिः ॥

येन रामेण गुरोर्दशरथस्याज्ञया राज्यं पटान्ते वस्त्रान्ते लग्नं तृणं यथा भवति तथामत्वा त्यक्तमुत्सृष्टं ततः पाथेयं पथो योग्यं कार्मुकवरं सुन्दरं धनुः परिगृह्य गृहीत्वा घोरमुग्रं वनमारण्यं प्रस्थितो गन्तुं प्रवृत्तः, अतएव स्वाधीनः स्वतन्त्रः, यश्च शशिमौलेः शंभोश्चापस्य धनुषः समारोपणविषये विक्रियां विकारं नवै प्राप्तः, यश्च विभीषणस्याग्रजनिरग्रजन्मा रावणस्तं हन्तीति स रामाभिधानो रामनामा हरिर्वः पायाद्रक्षत्वित्यर्थः ॥ ११२ ॥

(११३) यस्तीर्थानामुपास्त्या गलितमलभरं मन्यते स्म स्वमेवं
नाज्ञासीज्जज्ञिरे यन्मम चरणरजःपातपूतान्यमूनि ।
पादस्पर्शेन कुर्वन् झटिति विघटितग्रावभावां महल्यां
कौशल्यासूनुरुद्धनं व्यपनयतुवः श्रेयसा च श्रिया च ।

यो रामस्तीर्थानामुपास्त्या सेवनया स्वमात्मानं गलितः क्षरितो मलभरः पापसमूहो यस्य तमिव तीर्थस्नानेन पवित्रः

मात्मानं मन्यतेस्म अमंसीत् परं स्वपादस्पर्शेन अहल्यां विघटितग्रावभावां विघटितो दूरीकृतो ग्रावभावः पाषाणत्वं यस्याः सा तां पुनः प्राणिरूपां कुर्वन्नपि एवं नाज्ञासीदज्ञातवान्यन्मम चरणयो रजसः पातेन पूतान्यमूनितीर्थानि जज्ञिरे जातानीति एवं भूतः स कौशल्यासूनू रामो वो युष्माकं श्रेयसा यशसा श्रिया लक्ष्म्या यदून मूनत्वं तदपनयतु दूरीकरोतु, अज्ञान मिति भावप्रधानो निर्द्देशो बोध्यः ॥ ११३ ॥

॥ शेष उत्तराङ्के ॥

THE APHORISMS

OF THE

YOGA PHILOSOPHY

OF

PATAÑJALI.

(Continued from page 291.)

[1] When an ascetic assumes numerous bodies simultaneously, then from whence are so many minds [which are necessary for so many bodies] produced? To this he replies.

निर्म्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

Aph. 4. The minds in the productions [ensue] from mere egotism.

[2] The minds in the productions [that is, in the bodies which he produces for himself] of an ascetic created by himself, ensue, as sparks arise simultaneously as modifications from fire, at his will from egotism alone, which is the general and original cause [of mind].

[3] But [it may be objected] as there may be different purposes of so many, [different] minds, how can they produce one effect? To this he replies.

प्रवृत्तिभेदे प्रयोजकञ्चित्तमेकमनेकेषाम् ॥ ५ ॥

Aph. 5. In different activities of [those] numerous [minds] one mind [of the ascetic] is the moving cause.

[4] The "Moving cause"—i. e. that which actuates the different activities—various operations of those [different] minds, as a ruler, is the one mind of the ascetic and not a different element.

[1] The meaning is that as the mind like a ruler directs at will the sight, the hand &c. [i. e. other organs of sense and action] in his [the ascetic's] own body, so in like manner it does in regard to other bodies [i. e. with regard to the internal and external organs of sense belonging to other bodies].

[2] He [now] states the distinction of the mind produced by meditation from the minds produced by birth &c. [birth, medicine, incantations and penances].

तत्र ध्यानजमनाशयम् ॥ ६ ॥

Aph. 6. Among these [minds produced by birth &c.], that which springs from meditation is without substratum.

[3] Among those five kinds of minds springing from birth &c. [i. e. birth, medicines, incantations, penances and meditation] that which springs from meditation or reflection is without substratum—i. e. destitute of the basis of mental deposits of works.

[4] He [now] states that as the mind of the ascetic is free from afflictions and actions and is distinct, so his work also is likewise distinct [from that of others].

कर्म्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥ ७ ॥

Aph. 7. The work of an ascetic is neither pure nor dark, and that of others is of three kinds.

[5] [There are four kinds of works (1) pure, [śukla] (2) dark, [krishṇa]; (3) pure and dark [śukla-krishṇa]; (4) neither pure nor dark [aśukla-krishṇa]. Work such as sacrifice &c. which produces a good result, is pure; that which produces an evil or a bad result, such as the murder of a Brahman &c. is dark; that which is the commixture of both is [called] pure-dark.

Of these the pure [work] is of those persons who give alms and perform penances and study the Veda; dark work is that which belongs to infernal beings; the pure dark work is of men. The works of ascetics is neither pure nor dark, for it does not produce any result, in consequence of the renunciation of results, their practice.

[6] He [now] states the result of this work :

---

[1] यदाऽनेकशरीराणि युगपदेव गृह्णाति योगी तदा कुतस्तानि चित्तानि प्रभवन्तीत्याह ॥

[2] योगिनः स्वयं निर्म्मितेषु कार्य्येषु यानि चित्तानि तानि मूलकारणादस्मितामात्रादेव तदिच्छया प्रसरन्ति । अग्नेर्विस्फुलिङ्गा इव युगपत् परिणमन्ति ॥

[3] ननु बहूनाञ्चित्तानाम्भिन्नाभिप्रायत्वान्नैककार्य्यकर्तृत्वं स्यादित्यत्राह ॥

[4] तेषां चेतसाम्प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तम्प्रयोजकम्प्रेरकमधिष्ठातृत्त्वेन न भिन्नं तत्त्वम् ॥

[1] अयमर्थो यथाऽऽत्मीय शरीरे मनश्चक्षुः पाण्यादीनि यथेच्छम्प्रेरयत्यधिष्ठातृत्त्वेन तथा कायान्तराण्यपीति ॥

[2] जन्मादिप्रभवचित्तात्समाधिजस्य वैलक्षण्यमाह ॥

[3] ध्यानजं समाधिजं यच्चित्तन्तत्पञ्चसु जन्मादिप्रभवचित्तेषु मध्येऽनाशयङ्कर्म्मवासनारहितमित्यर्थः ॥

[4] यथेतरचित्तेभ्यो योगिनश्चित्तङ्क्लेशकर्म्मादिरहितं विलक्षणं तथा कर्म्मापि विलक्षणमित्याह ॥

[5] शुभफलदं यागादि शुक्लम् । अशुभफलदं ब्रह्महत्यादि कृष्णम् उभयसङ्कीर्णं शुक्लकृष्णम् । तत्र शुक्लङ्कर्म्म दानतपः स्वाध्यायादिमताम्पुरुषाणाम् । कृष्णङ्कर्म्मनारकाणाम् । शुक्लकृष्णं मनुष्याणाम् । योगिनान्तु फलत्यागेनानुष्ठानेन न किञ्चित्फलमारभते कर्म्म ॥

[6] अस्यैव कर्म्मणः फलमाह ।

Digitized by Google

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥ ८ ॥

Aph. 8. Therefrom [results] manifestation of those mental deposits alone which are conformable to its fructification.

¹ There are two kinds of mental deposits of works, (1) those which have their fruit in memory alone; (2) those which have for their fruit rank [in the scale of being] longevity and enjoyment.

Of these, [two kinds] those that have for their fruit rank, longevity and enjoyment, have been described before.

But of those that have for their fruit memory, manifestation merely of those mental deposits takes place, which are adequate and agreeable to the fructification of the work—that is those mental deposits of work become manifest, which are adequate and agreeable to this or that body [whether of man, deity or animal &c. originating in this or that work].

The meaning is this, that by whatever work any body such as [of a deity &c.] had previously originated [in work] after an interval of hundreds of years in commencing the same kind of body again, the mental deposits [of works] having for their fruit memory alone, re-appear in regard to new things alone. The others which are not agreeable thereto remain in subsidence. In this case the mental deposits [impressions produced by experience of hell &c.] become manifest.

G. D.

¹ इह द्विविधाः कर्मवासनाः स्मृतिमात्रफलाः जात्यायुर्भोगफलाश्च तत्र जात्यायुर्भोगफलाः पूर्वकृतनिर्णयाः । यास्तु स्मृतिमात्रफलास्ततः कर्मणो याद्दृक्शरीरमारब्धं देवतिर्य्यगादिभेदेन तस्य विपाकस्य यावनुगुणा अनुरूपा वासनास्तासामेव तस्मादभिव्यक्तिर्वासनानाम्भवति । अयमर्थः । येन कर्म्मणा पूर्वं देवतादि शरीरमारब्धं जात्यन्तरशतव्यवधाने पुनस्तथाविधस्यैव शरीरस्यारम्भे तदनुरूपा एव स्मृतिफला वासनाः प्रकटीभवन्ति लोकोत्तरेष्वेवार्थेषु तत्स्मृत्यादयो जायन्त इतरास्तु सत्योऽपि न्यग्भूतास्तिष्ठन्ति तस्यां दशायां नारकादिशरीरोपभोगभवा वासना व्यक्तिमायान्ति ॥

THE VAIŚESHIKA APHORISMS

OF

KAṆÁDA.

SEVENTH BOOK, SECOND DAILY LESSON.

(Continued from page 297.)

Conjunction. अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः ॥ ९ ॥

Aph. 9. Conjunction is produced by extraneous action, by reciprocal action and by conjunction.

¹ Undeniable cognition of the conjunct, and products are proof of [the existence of] conjunction. [As products] may be inferred substance in relation to conjunction of atoms, colour &c. produced by burning in relation to conjunction with fire, particular extension in relation to accretion, sound in relation to the conjunction of a kettle-drum and ether, and so forth. Conjunction is not mere contiguous production; as excluding momentary interruption and modification, conjunction is acquisition having non-acquisition as its antecedent. This is produced by extraneous action, as the conjunction of a hawk in motion with a motionless post, or the conjunction of one in motion with one not in motion towards him, as conjunction of a runner with the back of another person running. [Conjunction is also] produced by reciprocal action as that of two rams [butting one

¹ संयोगे संयुक्तप्रतीतिरबाधिता प्रमाणं कार्याणि च अवयवसंयोगेषु द्रव्यमग्निसंयोगे पाकजरूपादयः प्रचये परिमाणविशेषः भेर्याकाशसंयोगे शब्द इत्याद्यूह्यम् । नचाविरलोत्पत्तिरेव संयोगः क्षणभङ्गपरिणामयोर्निराशात् अप्राप्तिपूर्विका प्राप्तिः संयोगः सचान्यतरकर्मजः क्रियावता श्येनेन निष्क्रियस्य स्थाणोस्तदभिमुखक्रियारहितस्य सक्रियस्यापि धावतः यथा धावता पुरुषान्तरेण पृष्ठदेशसंयोगः उभयकर्मजः मेषयोर्मल्लयोर्वा प्रत्येकं गृहीतसामर्थ्याभ्यामुभाभ्यामेव तज्जननात् तृतीयस्त्वङ्गुलितरुसंयोगाद्धस्ततरुसंयोगः स चैकस्मादपि भवति यथा तन्तुवीरणसंयोगात् पटवीरणसंयोगः क्वचिद्द्वाभ्यां संयोगाभ्यामेकः संयोगः यथा द्वाभ्यां तन्तुभ्यामाकाशस्य द्वौ संयोगौ ताभ्यामेक एव द्वितन्तुकपटस्याकाशेन संयोगः क्वचिच्च बहुभिरपि संयोगैरेकः संयोग आरभ्यते यथा दशभिस्तन्तुभिराकाशस्य दशसंयोगा एकमेव दशतन्तुकपटाकाशसंयोगमारभन्ते क्वचित् पुनरेकस्मादपि संयोगादसमवायिकारणात् संयोगद्वयमुत्पद्यते यथा पार्थिवाप्ययोः परमाण्वोः प्रथममनारम्भकं संयोगे जाते पार्थिवे परमाणोः पार्थिवपरमाण्वन्तरेण आप्ये च परमाणावाप्यपरमाण्वन्तरेण च परमाणावाप्यपरमाण्वन्तरेण द्व्यणुकद्वयारम्भकं संयोगद्वयमुत्पद्यते ताभ्यां संयोगाभ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते तत्र यः पार्थिवाप्यपरमाण्वोरनारम्भकसंयोग उत्पन्नस्तेनैकेनैव पार्थिवपरमाणुनाप्यद्व्यणुकेनैकः संयोगः आप्यपरमाणुना पार्थिवद्व्यणुकेनापरः संयोगो द्व्यणुकयोरूपाद्युत्पत्तिसमकालमेव जायते कारणाकारणसंयोगेन कार्याकार्यसंयोगयोरवश्यं जननात् मूर्त्तविभूनामन्यतरकर्मज एव विभुनोस्तु न संयोगः कारणाभावात् कर्म तावत्तत्र नास्ति नच तेनकारणाकारणसंयोगात् कार्याकार्यसंयोगोऽपि नास्ति नित्यस्तु संयोगो न सम्भवति अप्राप्तिपूर्विकायाः प्राप्तेः संयोगत्वात् नित्यत्वे तद्व्याघातात् एवञ्च सति विभागोप्यसंस्तत्र स्यात् नचेष्टापत्तिः संयोगविभागयोर्विरोधिनोरविनश्यदवस्थयोरेकत्रानुपपत्तेः किञ्च संयोगं प्रति प्रयोजिका युतसिद्धिः नच विभुनोस्तत्सम्भवः साहि द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं युताश्रयाश्रयत्वं वा विनाशस्तु संयोगस्य समानाधिकरणाद्विभागादाश्रयनाशादपि क्वचित् यथा तन्तुद्वयसंयोगानन्तरमेकस्य तन्तोरवयवेंऽशौ कर्म जायते तेनांश्वन्तराद्विभागः क्रियते विभागादारम्भकसंयोगनाशस्ततस्तुविनाशस्तन्तुविनाशात् संयोगनाशो यत्र तन्तुद्वयं चिरं संयुक्तं सदनुत्पन्नक्रियं भवति केचित्तु तन्त्ववयवकर्मणा यदा तन्त्वारम्भकसंयोगनाशः क्रियते तदा तन्त्वन्तरे कर्मचिन्तनात् आश्रयनाशविभागाभ्यां युगपदुत्पन्नाभ्यां संयोगो नश्यतीत्याहुः । तच्चानुपपन्नं समवायिकारणनाशक्षणे विभागानुत्पत्तेः समवायिकारणस्य कार्यसमकालस्थायित्वनियमात् सचायं संयोगो द्रव्यारम्भे निरपेक्षो गुणकर्मारम्भे सापेक्षः स्वसमानाधिकरणात्यन्ताभावप्रतियोगी तथैवानुभवात् शाखामात्रावच्छेदेनापि महति न्यग्रोधतरौ वर्तमानः कपिसंयोगः न्यग्रोधतरौ कपिसंयोग इत्यनुभवात् अवच्छेदमात्रेणान्यथासिद्धौ परमाणौ वृत्तिरापद्येत तथाच नोपलभ्येत विभूनामप्युपाधिभेद एव प्रदेशस्तदवच्छेदेन वर्तमानस्य संयोगस्याव्याप्यवृत्तित्वं परमाणुनिष्ठस्यापि संयोगस्य दिगादयोऽवच्छेदकाश्चिन्तनीयाः ॥

Digitized by Google

another] or of two wrestlers, this being produced by both, both individually acquiring the power. The third [kind of conjunction or conjunction produced by conjunction is such as] conjunction of the hand with a tree resulting from conjunction of a finger with the tree. This moreover results from one conjunction, as the conjunction of a piece of cloth with the grass may result from the conjunction of a thread and the grass. In some cases one conjunction is produced by two conjunctions, as two conjunctions with ether may be produced by two threads and by these two conjunctions a single conjunction of a piece of cloth made of two threads with the ether. In other cases a single conjunction is originated by a plurality of conjunctions, as when ten conjunctions with ether originated by ten threads originate a single conjunction between a piece of cloth made of ten threads and the ether. Sometimes, on the other hand, two conjunctions are produced from one single conjunction as their non-co-inherent cause, as when there having first taken place a non-originative conjunction between two atoms terrene and aqueous, subsequently two conjunctions originative of binary atomic aggregates are produced, a conjunction in the terrene atom with another terrene atom, and in the aqueous atom with another aqueous atom. By these two conjunctions existing in homogeneous objects two binary atomic aggregates are simultaneously produced. In these by the one non-originative conjunction produced in the terrene and aqueous atoms a single conjunction of the terrene atom with the aqueous binary atomic aggregate, and another conjunction of the aqueous atom with the terrene atomic aggregate, are produced simultaneously with the production of colour &c. in the two binary aggregates, for the conjunction of a cause and non-cause must necessarily produce a conjunction of an effect and non-effect. The conjunction of all-pervading substances with material substances is produced by reciprocal action only. Of two all-pervading substances there is no conjunction, for there is no cause [of conjunction.] There exists in them no action, therefore there results in them no conjunction of effect and non-effect from conjunction of cause and non-cause. An eternal conjunction is impossible, for conjunction is acquisition having non-acquisition as its antecedent, and this is repugnant to the notion of the eternal. Also in this case [were eternal conjunction possible] no disjunction could be therein produced. Nor can it be allowed [as involving no objection, that no disjunction is therein produced] for conjunction and disjunction reciprocally repugnant and of indestructible condition, are impossible. Moreover the effecting of a junction is a necessary condition of conjunction, and this consists in the individual movement of one or other of two objects, or inhesion in the substratum of the object joined. Destruction results from disjunction having a common substratum with conjunction, or from destruction of a substratum in some instances, as when after the conjuntion of two threads, action is produced in that portion of a thread which constitutes its extremity; by this action there is effected disjunction from what now becomes the extremity; from this disjunction results destruction of the originant conjunction; from this results destruction of the thread; from destruction of the thread results destruction of the conjunction, where two threads having been long conjoined action is not produced in them. Some have maintained that when by action in the portions of the thread there is effected destruction of the conjunction originant of the thread, the conjunction is destroyed by destruction of the substratum and disjunction simultaneously produced, inasmuch as action is conceived to exist in another thread. This is impossible: for disjunction is impossible at the moment of the destruction of the co-inherent [or material] cause, it being a law that the co-inherent cause is of equal duration with the effect. This conjunction is absolute in the origination of substances, and relative in the origination of qualities and actions, non-existent in the case of the absolute non-existence of its proper substratum; for it is observed to be so. The conjunction existing between an ape and a great sacred fig-tree limited to [conjunction] with the branches only, exists inasmuch as it is observed that there exists in the sacred fig-tree conjunction with the ape. For were it to be accounted for otherwise than by such mere limitation conjunction might possibly reside in an ultimate particle, and consequently be not cognisable. Position is an accidental difference of all-pervading substances; and these cannot exist subject to conjunction limited to position. Of conjunction residing in an ultimate particle space &c., may be regarded as determinant U.

एतेन विभागो व्याख्यातः ॥ १० ॥

Aph. 10. By this disjunction is explained.

[1] The analogy of conjunction to disjunction is stated.

[1] विभागे संयोगतुल्यतामाह । विभागोऽपि त्रिविधः एककर्मजोभयकर्मजविभागजभेदात् तत्राद्यः श्येनशैलयोः द्वितीयो मेषयोः तृतीयस्तु त्रिविधः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति तत्राद्यो यथा प्रथमं कपाले कर्म ततः कपालद्वयविभागः ततो घटारम्भकसंयोगनाशस्ततो घटनाशस्ततस्तेन कपालद्वयविभागेन कपालस्याकाशादिना विभागो जन्यते ततः कपालाकाशादिसंयोगनाशः तत उत्तरदेशसंयोगस्ततः कर्मनाश इति नच प्राथमिकेन कपालकर्मणा कथं कपालाकाशविभागो न जन्यते इति वाच्यम् एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वविरोधात् अन्यथा विकसत्कमलकुड्मलादिभङ्गप्रसङ्गात् तस्मादनारम्भकाकाशकपालसंयोगप्रतिद्वन्द्विविभागो न कपालकर्म जनयेत् तस्य घटारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वात् नच

Digitized by Google

Disjunction also is of three kinds, as divided into that produced by the action of a single agent, that produced by reciprocal action, and that produced by disjunction. Of these the first [is instanced in the disjunction] of a hawk from a mountain ; the second [in that] of two rams [when they cease to butt each other] ; the third is of two kinds, being either produced by the disjunction of causes only, or by the disjunction of causes and non-causes. Of these [disjunctions produced by disjunction] the former class [is exemplified] where firstly action is produced in one of the two halves of a water-pot, thence disjunction of the two halves of the vessel, thence destruction of the conjunction originant of the water-pot, thence destruction of the water-pot, then by disjunction of the two halves of the water-pot disjunction of the halves from [the circumjacent] ether &c., thence destruction of the conjunction of the halves with ether &c., thence conjunction with another place, thence destruction of the action. Nor is it to be urged in objection, How is it that disjunction of the halves of the water-pot from the ether [in which they were situated while component parts of the vessel], is not produced by the primary action in the halves of the water-pot? For one action productive of disjunction repugnant to the originative conjunction is contradictory to producing of disjunction repugnant to non-originative conjunction [such as that of the halves of the vessel with the ether circumjacent] ; since otherwise there would follow [the possibility of] the breaking of the buds of a full-blown lotus. The action, then, in the halves of the vessel cannot produce disjunction repugnant to the non-originative conjunction of the halves of the water-pot and the ether, inasmuch as such action produces disjunction repugnant to the conjunction originative of the water-pot. Nor can it be objected, Whence is it that disjunction of the halves of the vessel and the ether is not produced by the mere disjunction of the two halves previously to the destruction of the water-pot? For disjunction from another place is impossible in an existing substance in any portion possessed of disjunction repugnant to the originative conjunction. Disjunction produced by disjunction of causes and non-causes [is exemplied] where by action of the hand disjunction of the hand from a tree is produced, and by this [mediately] disjunction of the body from the tree. In this [disjunction] the action of the hand is not the cause, for there is a difference of substratum. But there is not at that time action in the body for the action of a composite whole is determined as the action of the sum of the constituent parts. In this case, therefore, there is produced by disjunction of cause and non-cause a disjunction of effect and non-effect. This same quality disjunction is proved to exist by the perceptive cognition that one object is disjoined from another, and is not therefore otherwise accounted for [or unnecessarily assumed.] V.

संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ११ ॥

Aph. 11. The non-existence of conjunction and disjunction in conjunction and disjunction is explained by by smallness and greatness.

[1] Conjunction and disjunction are not possessed of conjunction and disjunction, as smallness and greatness are not possessed of smallness and greatness, for qualities have no qualities. V.

कर्मभिः कर्माणि गुणैर्गुणा अणुत्वमहत्त्वाभ्यामिति ॥ १२

Aph. 12. Action [are explained to be void] of actions, and qualities by smallness and greatness.

[2] The aphorism 'Actions &c.' is repeated for clearness or to aid the memory. Its meaning has been already expounded [VII. 1. 15.] V.

युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते ॥ १३ ॥

Aph. 13. Inasmnch as there is non-existence of effecting of a junction, there exist not conjunction and disjunction in an effect and its cause.

[3] A solution of the difficulty why there should not be conjunction and disjunction in constituent parts and constituted wholes, is stated. Effecture of a junction is a modification of two objects void of mutual connection. Conjunction and disjunction do not exist in a cause and its effect, that is in the constituent parts and the constituted whole, inasmuch as there is non-existence of effecture of a junction. For a constituent whole, a water-pot and the like, does not remain in existence out of connection with its constituent parts, the two halves of the

कपालविभागेनैव घटनाशात् पूर्वं कुतः कपालाकाशविभागो न जन्यते इति वाच्यम् आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् । कारणाकारणविभागजन्यविभागो यथा यत्र हस्तक्रियया हस्ततरुविभागस्तेन शरीरतरुविभागो जायते तत्र च हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु तदा क्रिया नास्ति अवयविक्रियाया यावदवयवक्रियानियतत्वात् अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यते इति अयमस्माद्विभज्यते इति प्रत्यक्षसिद्धोऽयं विभागगुणः संयोगनाशेन नान्यथासिद्ध इति संक्षेपः ॥

[1] संयोगविभागौ न संयोगविभागवन्तौ यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती गुणानां निर्गुणत्वादित्यर्थः ॥

[2] कर्मभिरिति सूत्रं स्पष्टार्थं स्मरणार्थं वा पुनरुक्तम् अस्यार्थः प्रागेवाभिहितः ॥

[3] ननु अवयवावयविनोः कथं न संयोगविभागावित्याशङ्कायामाह । युतसिद्धिः परस्परसम्बन्धशून्ययोरवस्थानं कार्यकारणयोरवयवावयविनोर्न संयोगविभागौ वर्तेते युतसिद्ध्यभावात् नहि घटाद्यवयवी कपालाद्यवयवासम्बन्धः सन् तिष्ठति येन तयोः संयोगविभागौ सम्भाव्येयातामिति ॥

Digitized by Google

vessel &c., that conjunction and disjunction should be possible in them [that is, in the simple elements and the complex totality.] V.

गुणत्वात् ॥ १४ ॥

Aph. 14. Inasmuch as it is a quality [a word has not conjunction with the object which it denotes.]

[1] An introductory proposition is here stated with the purpose of establishing that there exists between a term and its designates a connection of power, in obviation of the difficulty:—How can there be a conjunction between a word and its meaning; for a word [or sound] being a quality cannot possess any quality; nor is it to be replied that there exists not between them any conjunction, for were that the case there might result from such a vocable as water-pot the verbal apprehension of a piece of cloth, there being no speciality of connection. The term denotative being a quality, there can exist therein no conjunction with the object designated, that is, with the water-pot, &c. V.

गुणो ऽपि विभाव्यते ॥ १५ ॥

Aph. 15. A quality also is implied.

[2] Moreover the object is sometimes characterised as as a colour, taste, &c., and with this conjunction is not possible, no quality being allowed to exist in a quality. Hence it is said that a quality also is an object—these words having to be supplied—; a quality, as colour &c. may be the object of a word, but with this there can be no conjunction or connection. Or the sense may be that a quality also is implied or denoted by a word, and that the word can have no conjunction or connection with this quality. U.

निष्क्रियत्वात् ॥ १६ ॥

Aph. 16. Inasmuch as there is no action [in the term and the object denoted by it, there exists no conjunction between them.]

[3] Similarly connection by conjunction cannot exist in substances such as ether denoted by such words as *sky;* for conjunction which is produced by action is impossible in the term designating and the object designated, these being void of action. V.

असति नास्तीति च प्रयोगात् ॥ १७ ॥

Aph. 17. Inasmuch also as the expression *is not* is used of the non-existent.

[1] Conjunction is impossible inasmuch as the object designated may not exist. It is therefore said Inasmuch also as it is observed that the expression *is not*—and in virtue of the particle *also* is to be understood *will be*—is used of the non-existence, of that which is not known to be. Thus by reason of the expressions, The past water-pot does not now exist, Tomorrow the water-pot will exist, there results a cognition of a past and a future water-pot, and there can be no conjunction &c. between them and words. V.

शब्दार्थावसम्बन्धौ ॥ १८ ॥

Aph. 18. The word and its meaning are without connection.

[2] If there be conjunction between the word and its meaning, it follows that the word and its meaning are without connection. U.

संयोगिनो दण्डात् समवायिनो विशेषाच्च ॥ १९ ॥

Aph. 19. [The cognition] of that which possesses conjunction [resul s from knowledge of the conjunct as] from a staff; and [the cognition] of that which possesses co-inhesion [results] from the particular.

[3] It is stated that there is no cognition conversant about conjunction and other connections between a word and its meaning. From a staff—being conversant about a staff—results a cognition (for these words are to be supplied) of that which possesses conjunction—of a man possessing conjunction with the staff; and from the particular—being conversant about a particu-

---

[1] ननु शब्दार्थयोः कथं संयोगः सम्भवति शब्दस्य गुणत्वेन गुणवत्त्वासम्भवात् नच नास्त्येव तयोः संयोग इति वाच्यं सम्बद्धत्वाविशेषेण घटादिशब्दात् पटादिशाब्दबोधापत्तेरित्यतः पदपदार्थयोः शक्तिसम्बन्धःव्यवस्थापयिष्यन् पूर्वपक्षयति । प्रतिपादकस्य शब्दस्य गुणत्वात् तत्र प्रतिपाद्यस्य घटादेः संयोगो न सम्भवतीत्यर्थः ॥

[2] किञ्च विषयोऽपि क्वचिद्रूपरसादिलक्षणस्तेन संयोगो न सम्भवति गुणे गुणानङ्गीकारादित्याह । गुणोऽपि विषय इतिशेषः गुणोऽपि रूपादिः शब्दस्य विषयो नतु तेन समं संयोगः सम्बन्ध इत्यर्थः यद्वा गुणोऽपि शब्देन विभाव्यते प्रतिपाद्यते तेन च शब्दस्य न संयोगः सम्बन्ध इत्यर्थः ॥

[3] एवं गगनादिशब्दप्रतिपाद्ये आकाशादिद्रव्येऽपि संयोगस्य सम्बन्धता न सम्भवति प्रतिपाद्यप्रतिपादकयोः कर्मशून्यत्वेन क्रियाजन्यकस्य संयोगस्यासम्भवादित्यर्थः । गगनादिशब्दस्य गगनादेश्च निष्क्रियत्वात् संयोगो न सम्भवतीत्यर्थः ॥

[1] प्रतिपाद्यस्यावर्तमानत्वादपि संयोगो न सम्भवतीत्याह । असति अविद्यमाने नास्तीति चकारात्भविष्यतीति च प्रयोगदर्शनात् तथाचातीतघट इदानीं नास्ति परदिने घटोभविष्यतीत्यादिप्रयोगेण अतीतानागतघटयोर्बोधो भवति नच ताभ्यां शब्दस्य संयोगादिः सम्भवतीत्यर्थः ॥

[2] शब्दार्थयोः संयोगश्चेन्नास्ति तदेतदायातं शब्दार्थावसम्बन्धावित्यर्थः ॥

[3] शब्दार्थयोः संयोगादिसंसर्गावगाही प्रत्ययोऽपि नास्तीत्याह । दण्डात् दण्डमवगाह्य संयोगिनः दण्डसंयोगिनः पुरुषस्य विशेषादवयवविशेषमवगाह्य समवायिनोऽवयविनः प्रतीतिर्भवतीतिशेषः तथाच यथा संयोगसम्बन्धावगाही दण्डी पुरुष इति प्रत्ययः समवायसम्बन्धावगाही करी कुञ्जर इति प्रत्ययश्च स्वारसिको लोकानां तथा घटवान् घटशब्दः घटशब्दवान् घट इत्यादिप्रत्ययो नास्तीति पदपदार्थयोर्न संयोगो नवा समवायः सम्बन्ध इत्यर्थः । करी कुञ्जर इत्यादौ तु स्वानुयोगिकसमवायः संसर्गतया भासते कपालं घटवदित्यादौतु समवाय एवेत्यादिकमूहनीयम् ॥

Digitized by Google

lar constituent element—results a cognition of that which possesses co-inhesion—of a constituted whole. There is, then, no cognition of the term water-pot as possessing a water-pot, or of a water-pot as possessing the word water-pot, as there is a cognition, conversant about connection by conjunction, of a man with a staff, and a cognition conversant about connection by co-inhesion, of an elephant with a trunk, current among men. Therefore there is no connection of conjunction or of co-inhesion between the term and the objected denoted by it. V.

सामयिकः शब्दादर्थप्रत्ययः ॥ २० ॥

Aph. 20. The recognition of a meaning from a word is conventional.

[5] It may be asked, If there be neither conjunction nor co-inhesion between a word and its meaning, by what connection does a term convey a determinate sense? To this the reply is furnished. It is conventional. Convention is the arbitrement of the Deity, in the form that by such and such a word such and such a sense is to be understood. Whatever word was arbitrarily assigned by the Supreme Being to any meaning, conveys that meaning: it is the will of God that is the connection between the term and its signification. This connection is a convention, that is, it is dependent upon convention, [or arbitrement], as whatever plant the ichneumon touches with his teeth is an antidote to poison. This convention is sometimes derived from common usage, as for instance when any one gives the order Bring the water-pot, and a child standing by infers the cognition of another that receives the order and brings an object possessing a tubular neck; the child inferring that this activity of the bringer is produced by knowledge, inasmuch as it is an activity like his own [the child's] activity, and that this knowledge is produced by the words [of the person who gives the order] because it is brought into being subsequently to those words. The child's knowledge of the meaning of water-pot, piece of cloth, is by means of the process of consequence and non-consequence, in that the object of this knowledge [in the mind of the bringer], is an object possessing a tubular neck denoted by the word water-pot. At other times [this convention results] from direct testimony, as that this tubular-necked object is designated by the term water-pot. At other times it results from comparison [or recognition of similarity], as through the judgment of similarity that a gayal is like a cow, mudga-parṇí [a kind of bean] is like mudga, másha-parṇí [a leguminous plant] is like a bean. At other times it results from opprobrious language, as when after hearing, O the camel with pendulous upper lip and long neck, the eater of hard thorns, the vilest of animals,—on seeing such an object there ensues the verbal knowledge that it is a camel. At other times it results from community of substratum with terms of known import, as when after hearing the proposition, The bee is sipping sweets in the cloven lotus blossom, it is inferred that this must be that which is denoted by the word bee, inasmuch as this is the agent in the drinking of nectar in the cleft hollow of the lotus, or as [in the common example], The cuckoo sings sweetly in the mango-tree. This is, therefore, an inference or even a mere word producing verbal knowledge through the power of community of substratum with words well known. Or it is a kind of knowledge by comparison through the application of similarity to other individual bees &c., viz. agency in the drinking of nectar. The convention, according to the followers of Tutáta has reference only to the universal, being applied to the individual only as a predicate. According to the Prábhákaras the [denotative] capacity is common to the class and to the individual, but in relation to the class it is the knowing subject, and in relation to the individual, that which is by its own nature, that is determinant. The ancients teach that the convention is the [verbal] power, and that objects are universals the form whereof is the individuals. This is the case with terms like cow &c., but the object [or meaning] of words expressive of qualities, actions &c., is both the universal and the particular, as is detailed in the Mayúkha. U.

[5] ननु यदि न संयोगो नवा समवायः शब्दार्थयोस्तर्हि केन सम्बन्धेन शब्दो नियतमर्थं प्रतिपादयतीत्यत आह। सामयिक इति समय ईश्वरसङ्केतः अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारः यः शब्दो यस्मिन्नर्थे भगवता सङ्केतितः स तमर्थं प्रतिपादयति तथाच शब्दार्थयोरीश्वरेच्छैव सम्बन्धः स एव समयस्तदधीन इत्यर्थः यथा नकुलदंष्ट्राग्रस्पृष्टा याः काश्चिदोषधिः सा सर्वाऽपि हि सर्पविषं हन्ति सच समयः क्वचिद्व्यवहाराद्गृह्यते यथा प्रयोजकेन घटमानयेत्युक्ते प्रयोज्यस्य कम्बुग्रीवावन्तमर्थमानयतीति ज्ञानं तावदनुमिनोति तटस्थो बालः इयमस्य प्रवृत्तिर्ज्ञानजन्या प्रवृत्तित्वात् मत्प्रवृत्तिवत् तच्च ज्ञानमेतद्वाक्यजन्यमेतदनन्तरभावित्वात् एतज्ज्ञानविषयो ऽयं कम्बुग्रीवावानर्थो घटपटवाच्य इत्यावापोद्वापप्रक्रियया बालस्य घटपटादावर्थे व्युत्पत्तिः क्वचिच्च साक्षादाप्तवाक्यादेव यथाऽयं कम्बुग्रीवावानर्थो घटपदवाच्य इति क्वचिदुपमानात् यथा गोसदृशो गवयः यथा मुद्गस्तथा मुद्गपर्णी यथा माषस्तथा माषपर्णीत्यादि साधर्म्योपमानात् क्वचिन्निन्दाकारादपि वाक्यात् यथा धिक् करभमतिलम्बौष्ठं दीर्घग्रीवं कठोरकण्टकाशिनमपसदं पशूनामिति निन्दावाक्यश्रवणानन्तरं तादृशपिण्डमुपलभ्यायमसौ करभ इति व्युत्पत्तिः क्वचित् प्रसिद्ध पदसामानाधिकरण्यात् यथा प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति वाक्यश्रवणानन्तरं भवत्ययमसौ मधुकरपदवाच्यः प्रभिन्नकमलोदरे मधुपानकर्तृत्वात् यथा वा सहकारतरौ मधुरं पिको रौतीति। तदेतदनुमानं वा शब्द एव वा प्रसिद्धपदसामानाधिकरण्यसामर्थ्याद्बोधोत्पादकः उपमानविशेष एव वा मधुपानकर्तृत्वस्य भ्रमरादिव्यक्त्यन्तरसाधर्म्यस्योपनयात्। समयश्च जातिमात्रे व्यक्तेराक्षेपत एवोपस्थितइति तौतातिकाः। जातौ व्यक्तौ चोभयशक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूपसती प्रयोजिकेति प्राभाकराः। समयः शक्तिरेव व्यक्त्याकृतिजातयः पदार्था इति वृद्धाः। गवादिपदानामियं गतिः गुणकर्मादिवाचकपदानान्तु जातिव्यक्ती एवार्थ इति मयूखे विपञ्चितम्॥

Digitized by Google

[1] The connection between words and objects conditioned by verbal knowledge is now pointed out. The knowledge of the meaning of words is conventional, or determined by the connection of convention. It is, therefore, a connection of convention between the term and the object, that regulates verbal knowledge. Convention is arbitrement. This is of two kinds, eternal and modern. Eternal arbitrement is [verbal] power; modern arbitrement, terminology. The arbitrement has for its form, This sense is to be understood by this word, or Let this term convey this signification. It has therefore been said: 'Arbitrement' [in the application of terms] has been declared twofold, original and modern. The original is eternal, herein is that which is called power; but the modern is occasional, imposed by scientific writers and others. The apprehension of power is from common usage, &c. It has, therefore, been said: The ancients have declared the apprehension of power to be from grammatical analysis, from knowledge of comparison, from lexicography, from testimony, and from usage, from contiguity to a term of known import, from the context, and from explication. The apprehension of the power of roots, crude forms and affixes, results from grammatical analysis, as the knowledge from such rules as, The second case is used of the object, The transitive verb is of the agent, that the accusative case &c. is used of the object, &c. From knowledge of comparison there results from knowledge of similarity to a cow &c. the apprehension of the power of the terms gayal &c. in restriction to the classes gayal, &c. According to such lexicographical information as White &c. implying qualities, in the masculine denote the subject of the attribute, Cold is a quality, The words chill, cool, and benumbed imply possession of that quality, and Powder is that which is triturated, Routed and panic-striken imply extreme confusion,—according to such information there results apprehension of the power of the words white &c. in reference to the white, &c. Apprehension of the power of the terms *pika &c.* in reference to a cuckoo &c. results from testimony such as, A cuckoo is signified by the word *pika.* From the practical relation of one who gives and one who receives an order results apprehension of the power of the terms cow &c. in reference to objects possessing the essential attributes of a cow, &c. For instance when an adult giving an order says Bring the cow, and another adult receiving the order brings the cow, a child standing by, observing this, reflects that the bringing of a cow is implied by the words Bring the cow; and afterwards by the consequence and non-consequence in the orders Tie up the cow, Bring the horse, he apprehends the power of the terms cow &c. in reference to cows characterised by a dewlap &c. From community of substratum with words of known import, in such propositions as Air is colourless and tactile, He who gives a girl in marriage with due ceremony and fittingly adorned is called *kúkuda,* there results apprehension of the power of the terms air &c. in reference to objects colourless, tangible &c., and of the term *kúkuda* &c. in relation to those who give girls in marriage, &c. Similarly also [apprehension of verbal power results] from the context of words, thus since the term barley is em-

[1] इदानीं शाब्दबोधौपयिकं पदपदार्थयोः सम्बन्धं प्रदर्शयति । शब्दादर्थप्रत्ययः सामयिकः समयरूपसम्बन्धप्रयोज्यस्तथाच पदपदार्थयोः समयरूपः सम्बन्ध एव शाब्दबोधनियामकः समयश्च सङ्केतः सच द्विविधो नित्य आधुनिकश्च तत्र नित्यसङ्केतः शक्तिः आधुनिसंकेतः परिभाषा संकेतश्चास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकः अयं शब्द इममर्थं बोधयत्वित्याकारको वा तदुक्तम् । आजानिकश्चाधुनिकः संकेतो द्विविधः स्मृतः । नित्य आजानिकस्तत्र या शक्तिरिति गीयते । कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः ॥ इति शक्तिग्रहश्च व्यवहारादितो भवति तदुक्तम् शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद्व्यवहारतश्च । सान्निध्यतः सिद्धपदस्य वृद्धा वाक्यस्य शेषाद्विवृतेर्वदन्ति इति । धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति यथा कर्मणि द्वितीया कर्तरि परस्मैपदम् इत्याद्यनुशासनात् कर्मत्वादौ द्वितीयादेः उपमानाद् गवादिसादृश्यज्ञानात् गवयत्वादिजात्यवच्छिन्ने गवयादिपदानां शक्तिग्रहः कोशात् गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति । शीतं गुणे तद्वदर्थाः सुशीमः शिशिरो जडः ॥ चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले । इत्यादिकान् श्वेतादौ शुक्लादिशब्दानां शक्तिग्रहः कोकिलः पिकपदवाच्य इत्याद्याप्तवाक्यात् कोकिलादौ पिकादिपदानां शक्तिग्रहः प्रयोज्यप्रयोजकव्यवहारात् गोत्वादिविशिष्टे गवादिपदानां शक्तिग्रहः तथाहि यत्र प्रयोजकवृद्धेन गामानयेत्युक्तम् तच्छ्रुत्वा प्रयोज्यवृद्धेन गौरानीतः तदवधार्य पार्श्वस्थो बालो गवानयनं गामानयेति शब्दप्रयोज्यमवधारयति ततश्च गां बधान अश्वमानयेत्यावापोद्वापाभ्यां गवादिपदानां सास्नाविशिष्टगवादौ शक्तिं गृह्णाति प्रसिद्धार्थकपदसामानाधिकरण्यात् नीरूपः स्पर्शवान वायुः सत्कृत्यालङ्कृतां कन्यां ददानः कूकुदः स्मृतः इत्यादौ रूपशून्यस्पर्शवदादौ वाय्वादिशब्दस्य कन्यादात्रादौ कूकुदादिशब्दस्य च शक्तिग्रहः एवं वाक्यशेषादपि यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारात् व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवति इति श्रुतौ यवपदस्यार्थसन्देहे वसन्ते सर्वशस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥ इति विध्यर्थाकाङ्क्षया प्रवर्तमानाद्वाक्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः यथा वा स्वाराज्यकामोऽग्निष्टोमेन यजेत इत्यादिविधिशेषीभूतेभ्यः । यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम् ॥ इत्यादिवाक्येभ्यः स्वरादिपदस्य विजातीयसुखादौ शक्तिग्रहः । क्वचिद्विवरणादपि यथा पचति पाकं करोतीति तुल्यार्थकवाक्यात् कृत्यादौ तिङादेः शक्तिग्रह इति । तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानन्त्याच्चेति मीमांसकाः तत्रापि प्राभाकरमते व्यक्तिं विना जातिभानस्यासम्भवात्तुल्यवित्तिवेद्यत्वादेव गामानयेत्यादौ व्यक्तेर्भानम् भट्टमते च सामानाधिकरण्यसम्बन्धेन कर्मत्वादौ गोत्वादेः प्रथममन्वयबोधः पश्चात्तु कर्मतायां गोवृत्तित्वस्यानुमानं भवतीति । मण्डनाचार्यमते व्यक्तेर्लक्षणया भानं भवतीति । तदेतज्जातिशक्तिमतं न समीचीनं गामानयेत्यादौ व्यक्तेः शाब्दबोधविषयत्वस्यानुभवसिद्धस्य विना शक्तिमनुपपत्तेः न च लक्षणया व्यक्तेर्भानम् मुख्यप्रयोगस्यासत्त्वे लाक्षणिकप्रयोगस्यासम्भवात् न च तुल्यवित्तिवेद्यतयाऽपि व्यक्तेर्भानं सम्भवति कार्यीभूतशाब्दबोधविषयतायाः कारणप्रयोज्यत्वस्यावश्यकत्वेन नियमरूपस्य तुल्यवित्तिवेद्यत्वस्य तत्राप्रयोजकत्वादिति तस्माज्जात्याकृतिविशिष्टव्यक्तावेव गवादिपदानां शक्तिरितिमतमेवादरणीयम् तदुक्तं गौतमीये जात्याकृतिव्यक्तयस्तु पदार्थः इति ॥

Digitized by Google

ployed in the common usage of barbarians to denote panic seed, and in that of civilized men to denote the long-awned cereal, a doubt arising in regard to the word barley in such sacred texts as *Charu* (a kind of oblation) is made of barley, inasmuch as it is impossible to restrict it to one meaning, and it is illogical to understand it ambiguously, apprehension of the power of the term barley to denote the long-awned cereal only arises from the context proceeding by the requisition of the meaning of the predication, In spring the leaves of all kinds of grain wither away, and the pleasant, bearded barley still remains. Or for example apprehension of the power of the terms heaven &c. to designate a particular kind of bliss, results from such words as That bliss which is not interrupted by pain, which is not forthwith destroyed, and which is obtained by desire, is the object of term heaven, as the context of the sentence let him that desires the lordship of heaven sacrifice an agni-shtoma. Apprehension of the power of terms sometimes also results from explication, as that of the personal terminations of the verb to designate action, as from He performs culinary operations as a proposition identical with He cooks. According to the Mímáṇsakas verbal power has reference to the universal only, and not to the individual, for did it apply to the individual it would be either too narrow or too wide, and would be infinite. According to the doctrine of the Prábhákaras on this point, in such sentences as Bring the cow, there is a knowledge of the individual, a knowledge of the universal apart from the particular being impossible, the act and object of cognition being equal. According to the doctrine af Bhaṭṭa there is first a knowledge of connection of the notion cow &c. with the notion of the object of the action of the verb, by means of the connection in a common substratum, and afterwards an inference of the existence of a cow as the notion of the object. According to the doctrine of Maṇḍanácharya the knowledge of the individual arises by implication. These doctrines of these authorities on the power of the universal is not correct, for unless in such instances as Bring the cow, the power had reference to the individual, it would be impossible that the fact that the individual is the object of verbal knowledge should be established by experience. Nor does the knowledge of the individual arise from implication, for in the absence of the primary expression an expression by implication is impossible. Nor is a knowledge of the individual possible by equality of the act and the object of knowledge, for inasmuch as the being an object of verbal knowledge produced as an effect must be occasioned by cause, the equality of the act and object of cognition which is a condition cannot be the occasion. We must therefore respect the doctrine that the power of the terms cow &c. has reference to an individual characterised by the form of the universal. It has therefore been laid down in the aphorism of Gautama that particulars characterised by the form of the universal are the object of the term. V.

Cf. Siddhánta-Muktávalí on Bháshâ-parichchheda, v. 80. "Knowledge of words is the instrument, the understanding of the meaning of words is the process, whereof verbal knowledge is the result. The understanding of the power of words is accessory hereto." The knowledge of words, but not the word known, is the instrument, for there is verbal knowledge without words, in verses mentally recited. The process is recollection, produced by the term, of the meaning of the term. Otherwise verbal knowledge would be possible to one that knows the meaning of words by perception &c., in the presence of the object. In verbal knowledge that which is effected by the term is to be understood by means of its function; otherwise, from a term such as water-pot there might be produced a recollection of ether, by means of the connection of co-inherence [between ether and the sound or word, for ether also might be an object of verbal knowledge.] The function is one of the two conjunctions power and implication.

The knowledge of a term awakens memory by way of knowledge of an object of connection. The power of a term is the connection between the term and the object of the term. This power is dependent on the will of God that such and such a sense shall be conveyed by such and such a term. In a modern name there does exist power, for there exists in relation to it the will of God [revealed in the text] 'On the eleventh day let the father name the child.' The doctrine of the ancients is that in modern convention there is no power, while the moderns maintain that it is not the will of God, but will in general, that is the power, and that consequently there is power in modern convention. A. E. G.

(To be continued.)

शाब्दबोधप्रकारं दर्शयति । पदज्ञानन्त्विति । न तु ज्ञायमानं पदं करणं। पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् । पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यं । अन्यथा घटादिपदात् समवायसम्बन्धेन आकाशस्मरणं जायते । आकाशस्यापि शाब्दबोधापत्तेः । वृत्तिः शक्तिलक्षणान्यतरः सम्बन्धः । पदज्ञानस्य सम्बन्धिज्ञानविधयाऽर्थस्मारकत्वं । शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा । आधुनिके नाम्नि शक्तिरस्त्येव । एकादशेऽहनि पिता नाम कुर्याद् इतीश्वरेच्छायाः । सत्त्वात् । आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः ॥ नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव । तेन आधुनिकसङ्केतेऽपि शक्तिरस्तीति वदन्ति ॥

Digitized by Google

ASITA AND BUDDHA, OR THE INDIAN SIMEON.

In the Lalita Vistara—a legendary history in prose and verse of the life of Buddha, the great Indian Saint, and founder of the religion which bears his name—it is related that a Ṛishi, or inspired sage, named Asita, who dwelt on the skirts of the Himálaya mountains, became informed, by the occurrence of a variety of portents, of the birth of the future lawgiver, as the son of King Śuddhôdana in the city of Kapilavastu, in Northern India, and went to pay his homage to the infant. I have tried to reproduce the legend in the following verses. The similarity of some of the incidents to portions of the narrative in the second chapter of St. Luke's Gospel, verses 25, ff., will strike the reader.

I may mention that the Buddhist books speak also of earlier Buddhas, that the word means "the enlightened," or "the intelligent," and that Buddha also bore the appellations of Gautama, and of Sákyasinha, and Sákyamuni—*i.e.*, the lion, and the devotee, of the tribe of the Sákyas, to which he belonged.

That I have not at all exaggerated the expressions in the text which speak of Buddha as a deliverer or redeemer, or assimilated his character more than was justifiable to the Christian conception of a saviour, will be clear to any one who can examine the original for him self. Kumárila Bhatta, a renowned Brahmanical opponent of the Buddhists, while charging Buddha with presumption and transgression of the rules of his caste in assuming the functions of a religious teacher, with which, as belonging to the Kshattriya, and not to the Brahmanical class, he had no right to interfere, ascribes to him these words—"Let all the evils (or sins) flowing from the corruption of the Kali age" (the fourth, or most degenerate, age of the world) "fall upon me; but let the world be redeemed!" If we might judge from this passage, it would seem that the character of a vicarious redeemer was claimed by, or at least ascribed to, Buddha. But a correspondent who is well acquainted with Buddhism informs me that in his opinion the idea of vicarious atonement is foreign to it.

On Himalaya's lonely steep
  There lived of old a holy sage,
  Of shrivelled form, and bent with age,
Inured to meditation deep.

He—when great Buddha had been born,
  The glory of the Sákya race,
  Endowed with every holy grace,
To save the suffering world forlorn—

Beheld strange portents, signs which taught
  The wise that that auspicious time
  Had witnessed some event sublime,
With universal blessing fraught.

The sky with joyful gods was thronged:
  He heard their voice with glad acclaim
  Resounding loudly Buddha's name,
While echoes clear their shouts prolonged.

The cause exploring, far and wide
  The sage's vision ranged; with awe
  Within a cradle laid he saw
Far off the babe, the Sákyas' pride.

With longing seized this child to view
  At hand, and clasp, and homage pay,
  Athwart the sky he took his way
By magic art, and swan-like flew;

And came to King Suddhôdan's gates,
  And entrance craved—"Go, royal page,
  And tell thy lord an ancient sage,
To see the the King permission waits."

The page obeyed, and joined his hands
  Before the prince, and said—"A sage,
  Of shrivelled form, and bowed with age,
Before the gate, my sovereign, stands,

"And humbly asks to see the King."
  To whom Suddhôdan cried—"We greet
  All such with joy; with honour meet
The holy man before us bring."

The saint beside the monarch stood,
  And spake his blessing—"Thine be health,
  With length of life, and might, and wealth;
And ever seek thy people's good."

With all due forms, and meet respect,
  The King received the holy man,
  And made him sit; and then began—
"Great sage, I do not recollect

"That I thy venerable face
  Have ever seen before; allow
  Me then to ask what brings thee now
From thy far-distant dwelling-place."

"To see thy babe," the saint replies,
  "I come from Himalaya's steeps."
  The King rejoined—"My infant sleeps;
A moment wait until he rise."

"Such great ones ne'er," the Rishi spake,
  "In torpor long their senses steep,
  Nor softly love luxurious sleep;
The infant Prince will soon awake."

The wondrous child, alert to rise,
  At will his slumbers light dispelled,
  His father's arms the infant held
Before the sage's longing eyes.

The babe beholding, passing bright,
  More glorious than the race divine,
  And marked with every noble sign,*
The saint was whelmed with deep delight;

* Certain corporeal marks are supposed by Indian writers to indicate the future greatness of those children in whom they appear. Of these, thirty-two primary, and eighty secondary marks are referred to in the original as being visible on Buddha's person.

Digitized by Google

And crying—"Lo! an infant graced
With every charm of form I greet!"
He fell before the Buddha's feet,
With fingers joined, and round him paced.†

Next round the babe his arms he wound,
And "One," he said, "of two careers
Of fame awaits in coming years
The child in whom these signs are found.

"If such an one at home abide,
He shall become a King, whose sway
Supreme a mighty arm'd array
On earth shall stablish far and wide.

"If, spurning worldly pomp as vain,
He choose to lead a joyless life,
And wander forth from home and wife,
He then a Buddha's rank shall gain."

He spoke, and on the infant gazed,
When tears suffused his aged eyes:
His bosom heaved with heavy sighs;
Then King Suddhôdan asked, amazed—

"Say, holy man, what makes thee weep,
And deeply sigh? Does any fate
Malign the royal child await?
May heavenly powers my infant keep!"

"For thy fair infant's weal no fears
Disturb me, King" the Rishi cried;
"No ill can such a child betide;
My own sad lot commands my tears.

"In every grace complete, thy son
Of truth shall perfect insight‡ gain,
And far sublimer fame attain
Than ever lawgiver has won.

"He such a Wheel § of sacred lore
Shall speed on earth to roll, as yet
Hath never been in motion set
By priest, or sage, or god before.

"The world of men and gods to bless,
The way of rest and peace to teach,
A holy law thy son shall preach—
A law of stainless righteousness.

"By him shall suffering men be freed
From weakness, sickness, pain, and grief,
From all the ills shall find relief
Which hatred, love, illusion, breed.

"His hand shall loose the chains of all
Who groan in fleshly bonds confined;
With healing touch the wounds shall bind
Of those whom pain's sharp arrows gall.

"His potent words shall put to flight
The dull array of leaden clouds
Which helpless mortals' vision shrouds,
And clear their intellectual sight.

"By him shall men who, now untaught,
In devious paths of error stray,
Be led to find a perfect way—
To final calm || at last be brought.

"But once, O King, in many years,
The figtree¶ somewhere flowers perhaps;
So after countless ages' lapse,
A Buddha once on earth appears.

"And now, at length, this blessed time
Has come; for he who cradled lies
An infant there before thine eyes
Shall be a Buddha in his prime.

"Full, perfect insight gaining, he
Shall rescue endless myriads tost
On life's rough ocean waves, and lost,
And grant them immortality.

"But I am old, and frail, and worn;
I shall not live the day to see
When this thy wondrous child shall free
From woe the suffering world forlorn.

"Tis this mine own unhappy fate
Which bids me mourn, and weep, and sigh:
The Buddha's triumph now is nigh,
But ah! for me it comes too late!"

When thus the aged saint, inspired,
Had all the infant's greatness told,
The King his wondrous son extolled,
And sang, with pious ardour fired—

"Thee, child, th' immortals worship all,
The great Physician, born to cure
All ills that hapless men endure;
I, too, before thee prostrate fall."

And now—his errand done—the sage,
Dismissed with gifts, and honour due,
Athwart the æther swan-like flew,
And reached again his hermitage.

J. MUIR.

January 21, 1870.

† The word here, imperfectly translated, means, according to Professor H. H. Wilson's Dictionary, "reverential salutation, by circumambulating a person or object, keeping the right side towards them."

‡ The term here translated "insight" is derived from the same root as the word "Buddha," and means "intelligence," or "enlightenment."

§ The term thus rendered, "dharmachakra," expresses a somewhat singular figure. It denotes the "wheel of the law," or the "wheel of righteousness," or the "wheel of religion."

|| The word in the original is "nirvána," a term of which the sense is disputed—some scholars esteeming it to mean absolute annihilation; others explaining it as the extinction of passion, the attainment of perfect dispassion.

¶ The tree referred to in the original is the Udumbara, the Ficus glomerata.

NOW READY.

Vols. I. and II.

THE RÁMÁYAN OF VÁLMÍKI,

TRANSLATED INTO ENGLISH VERSE

BY

R. T. H. GRIFFITH, M. A.

Price per Vol. Rs. 6. Postage 6 anas.

BENARES: MESSRS. E. J. LAZARUS & Co.
CALCUTTA: MESSRS. BERIGNY & Co.
LONDON: MESSRS. TRÜBNER & Co.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

And crying—"Lo! an infant graced
With every charm of form I greet!"
He fell before the Buddha's feet,
With fingers joined, and round him paced.†

Next round the babe his arms he wound,
And "One," he said, "of two careers
Of fame awaits in coming years
The child in whom these signs are found.

"If such an one at home abide,
He shall become a King, whose sway
Supreme a mighty arm'd array
On earth shall stablish far and wide.

"If, spurning worldly pomp as vain,
He choose to lead a joyless life,
And wander forth from home and wife,
He then a Buddha's rank shall gain."

He spoke, and on the infant gazed,
When tears suffused his aged eyes:
His bosom heaved with heavy sighs;
Then King Suddhôdan asked, amazed—

"Say, holy man, what makes thee weep,
And deeply sigh? Does any fate
Malign the royal child await?
May heavenly powers my infant keep!"

"For thy fair infant's weal no fears
Disturb me, King" the Rishi cried;
"No ill can such a child betide;
My own sad lot commands my tears.

"In every grace complete, thy son
Of truth shall perfect insight‡ gain,
And far sublimer fame attain
Than ever lawgiver has won.

"He such a Wheel § of sacred lore
Shall speed on earth to roll, as yet
Hath never been in motion set
By priest, or sage, or god before.

"The world of men and gods to bless,
The way of rest and peace to teach,
A holy law thy son shall preach—
A law of stainless righteousness.

"By him shall suffering men be freed
From weakness, sickness, pain, and grief,
From all the ills shall find relief
Which hatred, love, illusion, breed.

"His hand shall loose the chains of all
Who groan in fleshly bonds confined;
With healing touch the wounds shall bind
Of those whom pain's sharp arrows gall.

"His potent words shall put to flight
The dull array of leaden clouds
Which helpless mortals' vision shrouds,
And clear their intellectual sight.

"By him shall men who, now untaught,
In devious paths of error stray,
Be led to find a perfect way—
To final calm || at last be brought.

"But once, O King, in many years,
The figtree¶ somewhere flowers perhaps;
So after countless ages' lapse,
A Buddha once on earth appears.

"And now, at length, this blessed time
Has come; for he who cradled lies
An infant there before thine eyes
Shall be a Buddha in his prime.

"Full, perfect insight gaining, he
Shall rescue endless myriads tost
On life's rough ocean waves, and lost,
And grant them immortality.

"But I am old, and frail, and worn;
I shall not live the day to see
When this thy wondrous child shall free
From woe the suffering world forlorn.

"Tis this mine own unhappy fate
Which bids me mourn, and weep, and sigh:
The Buddha's triumph now is nigh,
But ah! for me it comes too late!"

When thus the aged saint, inspired,
Had all the infant's greatness told,
The King his wondrous son extolled,
And sang, with pious ardour fired—

"Thee, child, th' immortals worship all,
The great Physician, born to cure
All ills that hapless men endure;
I, too, before thee prostrate fall."

And now—his errand done—the sage,
Dismissed with gifts, and honour due,
Athwart the æther swan-like flew,
And reached again his hermitage.

J. MUIR.

January 21, 1870.

† The word here, imperfectly translated, means, according to Professor H. H. Wilson's Dictionary, "reverential salutation, by circumambulating a person or object, keeping the right side towards them."

‡ The term here translated "insight" is derived from the same root as the word "Buddha," and means "intelligence," or "enlightenment."

§ The term thus rendered, "dharmachakra," expresses a somewhat singular figure. It denotes the "wheel of the law," or the "wheel of righteousness," or the "wheel of religion."

|| The word in the original is "nirvâna," a term of which the sense is disputed—some scholars esteeming it to mean absolute annihilation; others explaining it as the extinction of passion, the attainment of perfect dispassion.

¶ The tree referred to in the original is the Udumbara, the Ficus glomerata.

NOW READY.
Vols. I. and II.
THE RÁMÁYAN OF VÁLMÍKI,
TRANSLATED INTO ENGLISH VERSE
BY
R. T. H. GRIFFITH, M. A.
Price per Vol. Rs. 6. Postage 6 anas.
BENARES: MESSRS. E. J. LAZARUS & Co.
CALCUTTA: MESSRS. BERIGNY & Co.
LONDON: MESSRS. TRÜBNER & Co.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google